श्रीः

रौरवागमः

[विद्यापादः]

[प्रथमः पटलः]

[उपोद्घातः]

[1]शिवविद्यात्मविज्ञानतत्त्वादिशिखराश्रितम्[2] । भानुमन्तमिवाभान्तं भाभिरप्रतिमौजसम् ॥ १ ॥
तेजोराशिं महाप्राज्ञं रुरुं मुनिवरोत्तमम्[3] । प्रसन्नमनसं[4] शान्तं शिवज्ञानैककारणम् ॥ २ ॥
[5]भार्गवाङ्गिरसात्रेयपौलस्त्याः समरीचयः[6] । पप्रच्छुर्विनयानम्रा[7] ऋषयो हृषिताननाः ॥ ३ ॥
भगवञ्छ्रविद्यात्म[8]तत्त्वविज्ञानसंविधिम्[9] । [10]यागसंस्कारयोगांश्च विधिवत्प्रब्रवीहि नः ॥ ४ ॥
स मन्त्रपूतान् संस्पृश्य पुष्पपूर्णौ[11]ज्ज्वलाञ्जलीन् । हर्षादुद्गतरोमाञ्चः[12] प्राह वाक्यमिदं रुरुः[13] ॥ ५ ॥
[14]सुराधिपं नमस्कृत्य शशाङ्ककृतशेखरम् । कपालमालिनं देवं प्रणतोऽस्मि सदाशिवम् ॥ ६ ॥

---

[1] B (ms. de Dharmapuram) ajoute: शिवमयम् । रौरवसूत्रसंग्रहप्रारम्भः ।

[2] ०विज्ञानतत्त्वाद्दशशिराश्रितः—A (ms. de Kilvelur); ०विज्ञानतत्वादर्शशिराश्रितम्—B; ०विज्ञानं तत्वादिशिखराश्रितम्—C (ms. de KuNRakkuḍi).

[3] मुनिवरोद्गतम्—B.

[4] प्रसन्नमानसं—C.

[5] भृगवोऽङ्गिरसात्रेय०—C.

[6] समरीचिकाः—C.

[7] पप्रच्छुर्विषयानत्र—C.

[8] विज्ञान pour विद्यात्म—B; विद्यात्मा pour विद्यात्म—C.

[9] विज्ञानवं विधिम्—A; विज्ञानवारिधे—B.

[10] नाना pour याग—B.

[11] पूर्णे pour पूर्णौ—A.

[12] रोमाञ्चान् pour रोमाञ्चः—B.

[13] कुरुः—A.

[14] Les vers 6 à 19 sont cités dans la *Kriyākramadyotikā* de Aghoraśivācārya p. 120-121.

[1]कालेश्वरं महाकालं [2]कालञ्जरनिवासिनम् । कालकृत्कालवेत्तारं प्रणतोऽस्मि सदाशिवम् ॥ ७ ॥
[3]सर्वकृत्सर्ववेत्तारं[4] सर्वज्ञमपराजितम् । सर्वभूतात्मभूतस्थं प्रणतोऽस्मि सदाशिवम ॥ ८ ॥
योऽसृजत्सर्वभूतानि ब्रह्माद्यांश्च सुरासुरान् । तमहं लोककर्तारं प्रणतोऽस्मि सदाशिवम् ॥ ९ ॥
वरं वरेण्यं वरदं वरिष्ठं वरवाहनम् । वनमालाधरं देवं प्रणतोऽस्मि सदाशिवम् ॥ १० ॥
प्रीतिमत्प्रीतिदातारं सुप्रियं प्रियदर्शनम् । उमाप्रियं[5] सदा कान्तं प्रणतोऽस्मि सदाशिवम् ॥ ११ ॥
धर्माधर्ममयं देवं सुखदुःखफलोदयम् । बन्धमोक्षप्रणेतारं प्रणतोऽस्मि सदाशिवम् ॥ १२ ॥
मनोबुद्धिरहंकारतन्मात्रेन्द्रियगोचरम् । प्रधानपुरुषेशानं प्रणतोऽस्मि सदाशिवम् ॥ १३ ॥
यं ध्यायन्ति महात्मानो मुनयः संशितव्रताः । तमोङ्कारपरं सूक्ष्मं प्रणतोऽस्मि सदाशिवम् ॥ १४ ॥
[6]सूक्ष्मं सर्वगतं नित्यं सर्वविद्येश्वरेश्वरम् । सर्वतत्त्वाश्रयं देवं प्रणतोऽस्मि सदाशिवम् ॥ १५ ॥
भूमिरापोऽग्निरनिलः खमात्मा चन्द्रभास्करौ । मनोबुद्धिरहंकारः परा[7] प्रकृतिरेव च ॥ १६ ॥
[8]यस्येच्छामनुवर्तन्ते भावाभावविकारिणीम्[9] । तस्मै परमदेवाय पराय परमात्मने ॥ १७ ॥
[10]नमस्ते [11]कालबोधाय कालान्तक नमोऽस्तु ते । कालाधिप नमस्तेऽस्तु सर्वकालप्रवर्तक ॥ १८ ॥
[12]कलासकलरूपेण कलाभिर्विश्वरूपधृक्[13] । विश्वेश्वर नमस्तेऽस्तु [14]ह्यादिकालप्रवर्तक ॥ १९ ॥
[15]महद्भयश्चातिमहते महामायातिमायिने । सूक्ष्मेभ्योऽप्यतिसूक्ष्माय नमस्कृत्यामितात्मने[16] ॥ २० ॥
देवदेवाय शर्वाय विद्याविद्येश्वरैः सह । शैवं ज्ञानं प्रवक्ष्यामि [17]तच्छृणुध्वं समाहिताः ॥ २१ ॥

इत्युपोद्घातः[18]

---

[1] Les vers n° 7 et 10 sont omis par B.

[2] Kālañjara: centre śivaite de haute antiquité, (U.P.), où se trouve un temple de Śiva du même nom; voir *Imperial Gazetteer of India*, Vol. XIV pp. 310-313; कालञ्जन pour कालञ्जर—C.

[3] Les vers n° 8 et 9 sont omis par A et B.

[4] दातारं pour वेत्तारं—*Kriyākramadyotikā*.

[5] उमाश्रयं—B.

[6] C omet le vers n° 15.

[7] परप्रकृतिरेव च—B; परं प्रकृतिरेव च—A et C.

[8] तस्य pour यस्य—C.

[9] ०विकारिणीम् pour विकारिणीम्—B.

[10] Le vers n° 18 est omis par C.

[11] बोधरूपाय pour कालबोधाय—*Kriyākramadyotikā*.

[12] काला pour कला—A.

[13] धृत् pour धृक्—B.

[14] A omet हि dans ह्यादि०

[15] Dans A et B on trouve le vers 20 avant le vers 18; mais il faut le placer avant le vers 21.

[16] मितात्मने pour अमितात्मने—C.

[17] तच्छृणु त्वं समाहितः—B.

[18] इत्युपोद्घातप्रकरणम्—A et B; इत्युपोद्घातम्—C.

[सृष्टिक्रमः]

अथातोऽनादिमध्यान्तं पशुपाशजितात्मनाम् । तमश्छित्त्यै परं शैवं महाज्ञानासिमुत्तमम् ॥ १ ॥
प्रवक्ष्ये कारणात्मानो[1] वक्त्रपद्माद्विनिःसृतम् । विद्याराजमहोत्पत्तिं[2] तत्त्वाध्वनि विनिश्चितः[3] ॥ २ ॥
रागविद्याकलाव्यक्तगुण[4]बुद्धिसमुद्भवम् । ब्रह्मादिसुरमानुष्यपशुपक्षिसरीसृपम् ॥ ३ ॥
स्थावरान्तं महामायापाशजातं सनातनम् । जन्मव्याधिजरामृत्युमहोदधिपरिप्लुतम् ॥ ४ ॥
अनादिबद्धं[5] गहने संसारे खिन्नमानसम्[6] । कारणेच्छामहाशक्तिधृतं मायासमुद्भवम् ॥ ५ ॥
वामादिशक्तिभिर्युक्तः[7] शिवेच्छाविधिचोदितः[8] । विद्याराजाधिराजेशो मायां[9] विक्षोभ्य मन्त्रराट् ॥ ६ ॥
कलामुत्पादयामास विद्यां क्षेत्रज्ञसंवृताम् । यया युक्तः समभ्येति [10]वेदनां सुखदुःखजाम्[11] ॥ ७ ॥
विद्यां[12] च [13]धर्माधर्मादिकर्मसंवेदिनीं पराम्[14] । [15]विवेचयति या [16]पुसां शुभाशुभपरिच्छदम् ॥ ८ ॥
रागं च रञ्जकं चैव विषयानन्दलक्षणम् । तस्मात्कोपात्समुत्पाद्य [17]प्रधानमसृजद्गुणात् ॥ ९ ॥
बुध्यादिकार्यकरणं [18]सूक्ष्मस्थूलविभागजम् । देवमर्त्यतिरश्चां च[19] शरीरोत्पत्तिकारणम् ॥ १० ॥
एवं प्राधानिकी[20] [21]सृष्टिर्या जन्मजरया युता । निगूढो भगवान्मायी [22]जगद्भ्रमयतीच्छया ॥ ११ ॥
मायाबन्धविमोक्षाय कारणादात्मनोऽव्ययात् । [23]मन्त्रकोट्योऽभवन् सप्त शिवभक्तिसमन्विताः ॥ १२ ॥
[24]पतयश्चाज्ञनातीताः सर्वविज्ञानसंयुताः । [25]अनन्तादिशिखण्ड्यन्ता अष्टौ विद्यामहेश्वराः[26] ॥ १३ ॥

---

[1] Le mot कारणात्मान: a un sens possessif et devrait s'écrire कारणात्मन:; mais ce mot serait trop court d'une *mātrā* pour le mètre. Il vaudrait mieux lire: प्रवक्ष्ये कारणेशानवक्त्रपद्माद्विनिःसृतम् ।

[2] ०त्तित्त्वाध्वनि—A. [3] विनिश्चितम् B et C. [4] ०गुणो बुद्धि—C.
[5] बन्धं pour बद्धं—B. [6] संसारेऽस्मिन्नागसम्—A et B.
[7] युक्तं pour युक्तः—B et C. [8] चोदितम् pour चोदितः—B et C.
[9] मया pour मायां—A. [10] वेहानां—C. [11] दुःखजाः pour दुःखजाम्—C.
[12] विद्यां—A; विद्या—B et C. [13] नन्वधर्मादि pour धर्माधर्मादि—A.
[14] कर्मवेदिमपरम् pour कर्मसंवेदिनीं पराम्—C. [15] विवेदयति—C; पिपेचयदिति—A.
[16] पुंसः—A. [17] प्रधानं सृजद्गुणाद्—A. [18] सूक्ष्मं pour सूक्ष्म—C.
[19] तिरश्चश्च pour तिरश्चां च—B. [20] प्राधानिकीं—B; प्रवादकं—C.
[21] सृष्टिमाजन्मजरया युताम्—B. [22] जगद्भ्रमयदिच्छया—C; जगद्भ्रमयदीच्छया—A.
[23] मिश्रकाख्योभवन् सप्त—A. [24] पतयश्च जनातीताः—A.
[25] cf. *Rauravāgama*, I. 4. 30-31.
[26] cf. *Mṛgendrāgama*, 1. 4. 13:

स इत्थंविग्रहोऽनेन करणेनाहतौजसा । करोति सर्वदा कृत्यं यदा यदुपपद्यते ॥
तत्रादौ केवलाणूनां योग्यानां कुरुतेऽष्टकम् । वामादिशक्तिभिर्युक्तं सप्तकोटिपरिच्छदम् ॥
तेषामनन्तः सूक्ष्मश्च तथा चैव शिवोत्तमः । एकनेत्रैकरुद्रौ च त्रिमूर्तिश्चामितद्युतिः ॥
श्रीकण्ठश्च शिखण्डी च राजराजेश्वरेश्वराः । ईषदप्राप्तयोगित्वान्नियोज्याः परमेष्ठिनः ॥
सर्वज्ञत्वादियोगेऽपि नियोज्यत्वं मलांशतः । परस्परं विशिष्यन्ते मन्त्राश्चैवमधः स्थिताः ॥
ते च मन्त्रेश्वरव्यक्तशिवशक्तिप्रचोदिताः । कुर्वन्त्यनुग्रहं पुंसां यदा येषां स युज्यते ॥

तेऽधिकारं प्रकुर्वन्ति शिवेच्छाविधिचोदिताः । मायाबन्धविमोक्षाय कारणादात्मनोऽव्ययात् ॥ १४ ॥
[1]स्थितिसंरक्षणादान[2]भवानुग्रहकारिणः । वीरभद्रादय[3]श्चान्ये [4]मायाञ्जनविवर्जिताः ॥ १५ ॥
प्रधानपुरुषैश्वर्य[5]गुण[6]भोगसुखप्रदाः । [7]तेजस्वित्वमथैश्वर्यं ब्रह्मादीनां प्रजासृजाम् ॥ १६ ॥
प्रयच्छन्ति महात्मानो देवेभ्यश्चामितौजसः । मध्योत्तमनिकृष्टानि भुवनानि सहस्रशः ॥ १७ ॥
विशेषविषयानन्द[8]विसृष्ट्याक्रीडभूमयः । तेषामुत्पत्तिसंहारस्थित्यनुग्रहहेतवः ॥ १८ ॥
पतयः [9]साञ्जनाः प्रोक्ता ब्रह्मविष्ण्विन्द्रदेवताः[10] । तेऽत्यन्तशुद्धमैश्वर्यं विद्येशानां महात्मनाम् ॥ १९ ॥
दृष्ट्वा तद्योगमीप्सन्त[11]स्तेषां शरणमभ्ययुः । विद्याराजाधिराजेशास्ते[12]ऽत्यन्तनिरपेक्षणाः[13] ॥ २० ॥
जरामरणसंसारबन्धभेदविचक्षणाः । विद्यामण्डप[14]दीक्षाभिर्यजनेज्यापरिग्रहैः ॥ २१ ॥
विद्यात्रतोपदेशैश्च मन्त्रतन्त्राङ्गनिःसृतैः[15] । दिव्यैरनुग्रहैश्चान्यैः शुद्धसत्त्वा[16]वभासिभिः ॥ २२ ॥
तेषामनुग्रहं चक्रुर्मन्त्रतन्त्रेश्वराः[17] शिवाः । पितामहादयश्चापि तेभ्योऽवाप्य[18] महोदयाः ॥ २३ ॥
शैवं परमनिर्वाण[19]कारणं ज्ञानमुत्तमम् । ऋषिभ्यो विबुधेभ्यश्च पितृभ्यश्च यथाक्रमम् ॥ २४ ॥
प्रयच्छन्ति महामन्त्र[20]मन्त्रराजमहाध्वरान्[21] । पितामहनियोगाच्च ऋषयश्चिच्छन्नसंशयाः ॥ २५ ॥
दीक्षाविधिविधानज्ञा[22] नुजेभ्यः प्रचक्षते ॥
शिवेन्दुकिरणा[23]देतत्सूत्रमात्रं विनिःसृतम् । पाशौघतिमिरान्धानां प्रकाशजनकं[24] परम् ॥ २६ ॥

[25]इति श्रीरौरवसूत्रसंग्रहे सृष्टिपटलः प्रथमः

प्रयोक्तृदेहसापेक्षं तदर्धमखिलेऽध्वनि । कृत्वाधिकारं स्थित्यन्ते शिवं विशति सेश्वरम् ॥
विनाधिकरणे नान्यत् प्रधानविकृतेरधः । कृत्वाधिकारमीशेष्टमपैति स्वाध्वसंहृतौ ॥
ततोऽनन्ताद्यभिव्यक्तः पतीनां ग्रन्थितत्त्वतः । कलाद्यारब्धदेहानां करोत्यष्टादशं शतम् ॥
तानप्याविश्य भगवान् साञ्जनान् भुवनाधिपान् । येभ्यः सर्वमिदं येषां शक्तिः कर्मनिबन्धना ॥
प्रणेतॄन् पशुशास्त्राणां पशूंस्तदनुवर्तकान् । स्वसाध्यकारकोपेतान् कालधामावधि स्थितान् ॥
स्थितौ सकारकानेतान् समाक्रम्य स्वतेजसा । युनक्ति स्वार्थसिद्ध्यर्थं भूतैरनभिलक्षितः ॥
भोगसाधनमाक्षिप्य कृत्वा कारणसंश्रयम् । तच्च सात्मकमाक्रम्य विश्रमायावतिष्ठते ॥

[1] स्थितिः सा रक्षणा—B; cité par Aghoraśivācārya dans son comm. *Dīpikā* sur le *Mṛgendrāgama*, I. 1-22.
[2] भाव pour भव—B.
[3] जय pour दय—A.
[4] मायाजन pour मायाञ्जन—A.
[5] ऐश्वर्या pour ऐश्वर्य—C.
[6] गुणा pour गुण—C.
[7] त एव तु महैश्वर्यं—B; ते स्व तु मथैश्वर्यं?—A.
[8] आनन्दं विसृज्या pour आनन्दविसृष्ट्या—A; आनन्दा विसृज्या—B.
[9] सजना—A.
[10] संज्ञिताः pour देवताः—A et B.
[11] ईप्सन्तं pour ईप्सन्तः—C.
[12] हि pour ते—B; स्वे pour ते—A.
[13] निरपेक्षिणः pour निरपेक्षणाः—C.
[14] मण्टप pour मण्डप—C.
[15] मिश्रितैः pour निःसृतैः—C.
[16] A et B omettent त्त्वा.
[17] मन्त्रेश्वराः pour तन्त्रेश्वराः—A.
[18] वापि pour अवाप्य—C.
[19] निर्माण pour निर्वाण—B; निर्वाणं—C.
[20] मन्त्र pour तन्त्र—A.
[21] महोद्धतान् pour महाध्वरान्—B.
[22] विधानाज्ञां pour विधानज्ञा—B.
[23] करण pour किरण—C.
[24] करणं pour जनकं—A et C.
[25] B omet श्रीरौरवसूत्रसंग्रहे ; इति श्रीमद्रौरवसूत्रसंग्रहे सृष्टिर्नाम प्रथमः पटलः—C; सृष्टिपटलं समाप्तम्—B.

द्वितीयः पटलः

[शिवतत्त्वानि]

अथापनीतकुपथा[1]श्छिन्नमायातिबन्धनाः[2] । सुरासुरगुरोः पादौ प्रणम्य विधिवत्स्थिताः[3] ॥ १ ॥
तेषां [4]तथोपपन्नानां शिवतत्त्वं च [5]पृच्छताम् । पद्मयोनिः प्रसन्नात्मा समुत्थाप्येदमब्रवीत् ॥ २ ॥
यथाश्रुतं मया पूर्वमनन्तेशमुखोद्गतम् । नन्दीशात्परमेशाननियोगामृतमुत्तमम् ॥ ३ ॥
शिवतत्त्वं परं ह्येतदचलं सर्वतोमुखम् । कथं विभिन्नं बहुधा मायाञ्जनविवर्जितम् ॥ ४ ॥
एवं पृष्टो महातेजा [6]हसन्नन्दीश्वरो महान् । [7]प्रत्युवाच मनोदिव्यं मनो मे [8]नन्दयन्निव ॥ ५ ॥
[9]शृणुष्वैकमना ब्रह्मन् यत्परं [10]परमेष्ठिनः । अचिन्त्यस्याप्रमेयस्य तदेकं बहुधा स्थितम् ॥ ६ ॥
[11]परमेशात्पुरावाप्त[12]मिदं ज्ञानामृतं मया । तत्समासेन ते वक्ष्ये तत्त्वानां प्रतिसंचरम् ॥ ७ ॥
प्रसन्नं परमं शान्तमजमीशानमव्ययम् । शिवतत्त्वं सुनिर्वाणमच्युतं च[13] सनातनम् ॥ ८ ॥
तस्मात्तेजःसुसंपूर्णं शक्त्यष्टकसमन्वितम् । विभिन्नं[14] त्वष्टधा भूयः शिवेच्छाविधिचोदितम्[15] ॥ ९ ॥
अनन्तेशस्ततः[16] पूर्वं ततः [17]सूक्ष्मः शिवोत्तमः । एकनेत्रैकरुद्रौ च त्रिमूर्तिश्चानलद्युतिः[18] ॥ १० ॥
श्रीकण्ठश्च शिखण्डी च सूर्यकोटिसमप्रभौ[19] । अष्टावेते[20] महात्मान[21]स्तस्मात्तेजोविनिःसृताः[22] ॥ ११ ॥
तेऽधिकारं प्रकुर्वन्ति शिवेच्छाविधिचोदिताः । तेषामनन्तशक्तीनामनन्तः परमेश्वरः ॥ १२ ॥
अनन्तः परमस्तेषां महतां चक्रवर्तिनाम् । [23]विहितं[24] सर्वकर्तृत्व[25]कारणं परमं पदम् ॥ १३ ॥
ततोऽधिष्ठाय विद्येशो[26] मायां स परमेश्वरः । क्षोभयित्वा स्वकिरणैः सृजते तैजसीं[27] कलाम् ॥ १४ ॥

---

[1] कुपथात् pour कुपथाः—A et C.
[2] बन्धनात् pour बन्धनाः—A, B et C.
[3] स्थितः pour स्थिताः—A.
[4] ततोपपन्नानां—A et C.
[5] पूजिताम्—A.
[6] भासन् pour हसन्—C.
[7] पाद्यमाचमनं नित्यं मानसं च ददौ च वा—C.
[8] नन्दयन्ति वा—A.
[9] शृणुष्वैकं महाब्रह्मन्—A.
[10] परमेष्ठिना—A et C.
[11] परमेश्वरात् pour परमेशात्—C.
[12] परावाप्तं pour पुरावाप्तं—A et B.
[13] अद्भुतैकं pour अच्युतं च A et C.
[14] विभिन्नः—A.
[15] चोदितः pour चोदितम्—B.
[16] अनन्तो शक्तितः पूर्वं—C.
[17] सूक्ष्मशिवोत्तमौ—B; सूक्ष्मशिवोत्तमम्—C.
[18] अचलद्युतिः pour अनलद्युतिः—B.
[19] प्रभः pour प्रभौ—C.
[20] अष्टौ चैते—C.
[21] तस्याः pour तस्मात्—C.
[22] cf. *Mṛgendrāgama*, I. 4. 3-4.
[23] B omet cette ligne.
[24] सहितं pour विहितं—C.
[25] कर्तृत्वं pour कर्तृत्व—C.
[26] विद्येशाः pour विद्येशो—C.
[27] तैजसं—C.

[1]कलातत्त्वा[2]द्रागविद्ये द्वे तत्त्वे संबभूवतुः । अव्यक्तं च ततस्तस्माद्गुणांश्चैवासृजत्प्रभुः १५ ॥
गुणेभ्यो धिषणा जज्ञे याष्टरूपगुणान्विता[3] । बुद्धेश्चाप्यत्र संक्षोभादहंकारो व्यजायत ॥ १६ ॥
अहंकारात्तु सूक्ष्माणि तन्मात्राणीन्द्रियाणि च । भूतादिकरणानीकं सप्तस्तं चाप्यजायत ॥ १७ ॥
एवं सुसूक्ष्मां संक्षोभ्य मायां स परमेश्वरः । तत्त्वान्युत्पादयामास [4]यैरोतं जगदातुरम् ॥ १८ ॥
भुवनानि विचित्राणि [5]नानारूपाकृतीन्यथ । सोऽसृजद्भगवानीशो विषयानन्दभूमयः ॥ १९ ॥
पतयश्चाञ्जनातीताः साञ्जनाश्च पृथग्विधाः । भुवने भुवने [6]वापि तन्नियोगाद्व्यवस्थिताः ॥ २० ॥
ऐश्वर्यसंपत्प्रभवविलयानुग्रहैषिणः । यजन्ति विविधैर्यज्ञैर्मन्त्रतन्त्रविशारदाः ॥ २१ ॥
[7]गुरुतन्त्राभ्यनुज्ञाता दीक्षाविच्छिन्नबन्धनाः[8] । पशूंश्च [9]दीनबद्धांस्तु मुञ्चन्तोऽपि महेश्वराः ॥ २२ ॥
देवदानवगन्धर्वरक्षोयक्षोरगादिषु । [10]मण्डलान्यन्यरूपाणि दर्शयन्तः पृथग्विधाः[11] ॥ २३ ॥

[12]इति श्रीरौरवसूत्रसंग्रहे द्वितीयः पटलः

---

[1] Cité par Aghoraśivācārya dans son commentaire *Dīpikā* sur le *Mṛgendrāgama*, I. 10-11.

[2] विद्यात् pour तत्त्वात्—C.

[3] अन्विताः pour अन्विता—A et C.

[4] यदेतज्जगदातुरम्—B; यैरेते जगदातुरम्—C.

[5] नानारूपधराण्यथ—B.

[6] देवाः pour वापि—C; वास्तन्नियोगाद् pour वापि तन्नियोगात्—A.

[7] गुरुस्तत्र pour गुरुतन्त्र—C.

[8] बन्धनात् pour बन्धनाः—C.

[9] अतिबन्धांस्तु pour दीनबद्धांस्तु—B; पशूनामिव बध्यांस्तु pour पशुनो दीनबद्धांस्तु—C.

[10] अण्डान्यनेकरूपाणि—C; मण्डन्यरूपाणि ?—A.

[11] पृथग्विधान्—A et B.

[12] इति श्रीमद्रौरवसूत्रसंग्रहे द्वितीयः पटलः—C; इति द्वितीयपटलं समाप्तम्—B.

तृतीयः पटलः

[तन्त्रावतारः]

[1]श्रुत्वा माहेश्वरं तत्त्वमजमीशानमव्ययम् । प्रभवं सर्वतत्त्वानां स्थितिसंहारकारणम् ॥ १ ॥
अथ [2]सद्भावमीप्सन्तो मुनयो भृगुनन्दनम् । [3]रुरुं प्रणम्य विधिवदूचुस्ते वचनं पुनः ॥ २ ॥
केनावतारितं ह्येतत्तन्त्रं [4]तन्त्रविदां वर । [5]गुरवः [6]कथितास्तन्त्रे [7]तत्संख्या च कति स्मृता ॥ ३ ॥
मन्त्राणां कियती [8]संख्या मण्डलानां तथैव च । तत्त्वानां भुवनानां च यथावद्वक्तुमर्हसि ॥ ४ ॥
परमेशमुखोद्गीर्णमुत्तमं परमं मतम् । गुरुवंशं रुरुर्धीमान् प्रवक्तुमुपचक्रमे ॥ ५ ॥
शिवानलविनिष्क्रान्तमधूमज्योतिरूपिणम्[9] । [10]जगतः कारणं देवमनन्तेशं परं गुरुम् ॥ ६ ॥
तेनोक्तं [11]परमेशानश्रीकण्ठाय महात्मने । [12]सुरासुराणां गुरुणा देव्यै सर्वमुदाहृतम् ॥ ७ ॥
देवी च प्राह [13]नन्दीशस्कन्दयोर्गुह्यमुत्तमम् । [14]नन्दीशाद्ब्रह्मणावाप्तं [15]शक्रेण च महात्मना ॥ ८ ॥
तस्मादवाप्तमूर्वेण ऋचीकेन ततः पुनः । तस्मादवाप्तं रामेण रामाच्चाहमधीतवान् ॥ ९ ॥
इति वंशक्रमः प्रोक्तः [16]संक्षेपेण मया द्विजाः । शतानि पञ्च शिष्याणां [17]शक्रस्यापि महात्मनः[18] ॥ १० ॥

---

[1] Tous les MSS. ont ce vers à la fin du *paṭala* précédent, mais sa place naturelle est au debut de celui-ci.

[2] प्रभाव pour सद्भाव—C.

[3] गुरुं pour रुरुं—A; B omet रुरु et lire प्रणम्य विधिवद्भक्त्या ह्यूचुस्ते वचनं पुनः ।

[4] तत्रविदां धरः—A.

[5] गुरुभिः pour गुरवः—C.

[6] कथितं pour कथिताः—C; कल्पिताः—B.

[7] तत्संख्या च काः स्मृताः—A.

[8] A omet संख्या.

[9] मधु ज्योतिरूपिणम्—A; मधु ज्योतिःस्वरूपिणीम्—B; मधु ज्योतिस्वरूपिणम्—C.

[10] जगदावरणं—C; जगतः कारणं—A et B; les deux lignes suivantes sont citées par Aghoraśivācārya, dans son commentaire *Dīpikā* sur le *Mṛgendrāgama*, I. 1. 1.

[11] परमेशानं—C.

[12] सुरासुराणां देव्यै च (विष्णवे) सर्वदा हृदा—B; सुरासुरगुरूणां वा देव्यै सर्वमुदाहृतम्—C; सुरासुराणां गुरुणा देव्यै सर्वदा हृतम्—A.

[13] नन्दीशं स्कन्दये pour नन्दीशस्कन्दयोः—C.

[14] नन्दीशो ब्रह्मणे स्थानं—C.

[15] शुक्रेन—A; शुक्रेण—B et C; on trouve dans différents MSS. ici et au vers n° 10, शुक, शुक्र, et शक्र, c'est probablement शक्र qu'il faut lire comme dans d'autres *āgama*.

[16] संक्षेपाद्वो—B; संक्षेपाद्धो—C.

[17] शुक्रस्यापि—A; शुक्रस्यापि—B et C.

[18] महात्मनाम्—C.

इतरे शास्त्रवक्तार[1]स्तन्त्रेऽस्मिन्पारमेश्वरे[2] । दशैते[3] गुरवः प्रोक्तास्तन्त्रे[4] दान्ता महौजसः ॥ ११ ॥
अन्येऽपि वीरभद्राद्या [5]ब्रह्मान्ता गुरवः स्मृताः । संहितापारगाः प्रोक्ता अष्टादश महौजसः ॥ १२ ॥
मन्त्रतन्त्रविदः सर्वे [6]वास्तवज्ञा विशारदाः । पाशविच्छित्तये नॄणां [7]नित्यमाहितबुद्धयः ॥ १३ ॥
ये च ते गुरवः प्रोक्तास्तन्त्रे स्वायंभुवे पुरा[8] । [9]एतेषामपि शिष्याणां सहस्रं परिसंख्यया ॥ १४ ॥
तन्त्रसंख्यासहस्राणां शतमुक्तं समासतः । [10]ब्रह्मणा मण्डलेशानविधियज्ञप्रसिद्धये ॥ १५ ॥
भार्गवेणाप्यथैशानतन्त्रानुज्ञातकर्मणा । प्रोक्तं पुरा द्वादशभिः सहस्रैर्मन्त्रलक्षणम् ॥ १६ ॥
मुद्रासमयतत्त्वार्थमण्डलेज्यापरिग्रहः । [11]उत्तरेऽभिहितः सर्वो मन्त्राणां चैव संग्रहः ॥ १७ ॥
[12]सप्तकोट्यस्तु मन्त्राणां [13]शिववक्त्राद्विनिःसृताः । याः साधकमहामायापाशविच्छित्तिहेतवः ॥ १८ ॥
[14]ता जन्ममृत्युखचितां[15] पितामह[16]कृतामिमाम् । सृष्टिं [17]दृष्ट्वेश्वरीं मूर्तिं प्रविष्टाः पुनरेव हि ॥ १९ ॥
[18]अन्तर्हितांस्ताननघान् मन्त्रराजेश्वरः प्रभुः । [19]दधार भगवानीशो लोकानां हितकाम्यया[20] ॥ २० ॥
[21]तेषामकल्पयद्देवो मन्त्राध्वरविभूतयः । [22]मण्डलेज्याविधानेन मन्त्रसद्भावसत्तमः[23] ॥ २१ ॥
गुह्यानि मण्डलान्यष्टौ [24]नवनाभादिसंज्ञया । अनन्तविजयादीन्नं[25] शतमन्यत्प्रकीर्तितम् ॥ २२ ॥
तेष्विज्यो [26]भगवानेभिर्मण्डली सततं शिवः । [27]ऋषिदेवासुरनरैर्विनिर्मोक्षार्थकाङ्क्षिभिः ॥ २३ ॥
विद्यामण्डलराजानां[28] [29]मण्डलांशविभूतयः । न [30]शक्याः परिसंख्यातुं मन्त्राणां च तदात्मनाम् ॥२४॥

---

[1] वक्तारं pour वक्तारः—C. [2] परमेश्वरे—A et C. [3] दश ते—A.

[4] त्रि त्रेधान्ता—A; तन्त्र यान्ता—C; le MS. semble corrompu. Pour donner un sens à la phrase धान्ता a eté remplacé par दान्ता.

[5] Brahmā est cité parmi les dix premiers guru; ici on le nomme à nouveau comme le dernier des 18 guru secondaires. C'est peut être un autre Brahmā comme Dakṣa Brahmā etc.

[6] वस्थलैक्या pour वास्तवज्ञा—A; वत्स्थलेत्या—B. [7] नित्यं मोहितबुद्धयः—B.

[8] Ceci prouve que notre *āgama* est postérieur au *Svāyambhuvāgama*.

[9] तेषामपि च—C. [10] ब्रह्माणं—C.

[11] Ceci montre que *Rauravottara* fait partie de notre *āgama* (*Rauravāgama*) ; B omet cette ligne.

[12] सप्तकोटिस्तु—B. [13] शिवभक्ताः pour शिववक्त्राद्—A.

[14] तारजं pour ता जन्म—C. [15] खचिता pour खचितां—C.

[16] क्रमाम्—B. [17] दृष्ट्वेश्वरैः—A.

[18] अन्तर्धन्ताः साममर्हाः—A; अन्तस्तन्तसायमर्हाः—B; अन्तर्भासां महामन्त्रराजराजेश्वरी प्रभुः—C.

[19] आधार—C. [20] cf. *Matangapārameśvara*, p. 38, vers, 2-9.

[21] तेषां कल्पयते देवो—A. [22] मण्डलज्याविधानेन—B.

[23] सत्तमाः pour सत्तमः—B. [24] नवनाहादिसंज्ञया—A.

[25] अनन्तविजयान्द्रीशं—A. [26] भगवान् देवो मण्डलं—B.

[27] ऋषिदेवासुरा ह्येषु ते मोक्षार्थं च कांक्षिणः—C. [28] राजानं pour राजानां—C.

[29] मण्डलांशं विभूतयः—C. [30] शक्या—A; शक्याः—B; शक्त्या—C.

यावन्तो रुद्रदेवाश्च [1]रक्षोयक्षमहेश्वराः । तावन्मन्त्राः समाख्यातास्तेषां संख्या न विद्यते ॥ २५ ॥
देशभाषानिबद्धाश्च[2] दिव्याक्षरपदैर्युताः[3] । सर्वज्ञाः सर्वगाः शुद्धाः सर्वे सर्वज्ञभाविताः ॥ २६ ॥
[4]न मीमांस्या[5] विचार्या वा मन्त्राः [6]स्वल्पधिया नरैः । [7]प्रमाणमागमं कृत्वा [8]श्रद्धातव्यं [9]हितैषिभिः ॥ २७ ॥
[10]सर्वे मन्त्रात्मका देवाः सर्वे मन्त्राः शिवात्मकाः । शिवात्मकमिदं ज्ञात्वा शिवमेवानुचिन्तयेत् ॥ २८ ॥

[11]इति श्रीरौरवसूत्रसंग्रहे तृतीयः पटलः

---

[1] रक्षो यक्षो महेश्वरः—C.
[2] निबन्धाश्च pour निबद्धाश्च—A, B et C.
[3] युतम् pour युताः—C.
[4] cf. *Matańgapārameśvara*, p. 46, vers 73.
[5] मीमांसा—A.
[6] स्वल्पधियो नराः—B; स्वल्पधिया रुरोः—C.
[7] प्रमाणभागमकृत्वा—B.
[8] श्रद्धातव्या—A et B.
[9] हितेष्टिभिः—A.
[10] सर्वमन्त्रात्मका—B.
[11] इति श्रीमद्रौरवतन्त्रे तृतीयः पटलः—C; इति तृतीयपटलं समाप्तम्—B.

[तुरीयः पटलः]

[अध्वविधिः]

[1]अथाध्वनां प्रसंख्यानं मन्त्रतन्त्रानुवर्तिनाम्[2] । वर्णयिष्ये[3] समासेन लोकालोकानुसंचयम् ॥ १ ॥
अथ कालाग्निरुद्रो वै नरकाश्चानुपूर्वशः । रौरवः कुम्भीपाकश्च [4]अवीचीत्येवमादयः[5] ॥ २ ॥
पातालानि ततः सप्त [6]पातालपतयस्तथा । हाटकश्च महावीर्यो विद्याविद्येश्वरैः [7]स्मृतः[8] ॥ ३ ॥
सप्तद्वीपा मही[9] कृत्स्ना समुद्रैः सप्तभिर्वृता[10] । नानाजनपदाकीर्णा विचित्ररचनोज्ज्वला ॥ ४ ॥

---

[1] अथाध्वनः—A.
[2] वर्तिनम् pour वर्तिनाम्—B.
[3] वर्णयित्वा—A.
[4] अवीची ह्येवमादयः—B.
[5] cf. *Suprabhedāgama*, IV. 3. 4-6, 9-10:
पृथिव्यादीनि मायान्तमध्वानं वर्ण्यते क्रमात् । कालाग्नेः शतरुद्रान्तं ब्रह्माण्डमिति संस्मृतम् ॥
अथाण्डकटहोत्सेधं योजना कोटिरुच्यते । कालाग्निरुद्रदेवस्य तस्योर्ध्वे भुवनं विदुः ॥
अनेककोटिरुद्रैस्तु परिवृत्तस्तु तिष्ठति । . . . तस्योर्ध्वे नरकं विद्याच्चत्वारिंशच्छताधिकम् ॥
तेषां प्रयत्या द्वात्रिंशत् प्रधानास्तेषु ते त्रयः ।
Voir aussi *Mṛgendrāgama*, I. 13. 9 et 13-14.
कपालमर्बुदं स्थौल्याद्ब्रह्माण्डस्य योजनैः । तस्यान्तः काञ्चनं धाम कालाग्नेस्तावदेव हि ॥ . . .
ततः पुटास्त्रयस्त्रिंशद् दशलक्षोनकोटिकाः । तदन्तराणि द्वात्रिंशल्लक्षकाणि दुरात्मनाम् ॥
स्थानानि यातनाहेतोः निर्मितान्यध्ववेधसा ॥ etc.
[6] पातालं तमधस्तथा—B.
[7] स्मृताः—B et C.
[8] cf. *Suprabhedāgama*, IV. 3. 33-34, 37:
तस्योपरिष्टात् पातालं कथयामि समासतः । महातलं सुतलं च रसातलं तलातलम् ॥
पातालं शंकरं चैव आभासं चैव सप्तकम् । . . . तस्योर्ध्वे तु वसुर्देवो हाटकः परमेश्वरः ॥
Voir aussi *Mṛgendrāgama*, I. 13. 32-33:
तेषामुपरि निःशेषपातालाधिपतीश्वरः । साहस्रे काञ्चने धाममण्डले हाटकः स्थितः ॥
यं स्तुवन्ति प्रियप्राप्त्यै यता यतिविभूषणैः । दैत्ययक्षसुराहीशललना ललितैः पदैः ॥
cf. *Kiraṇāgama*, I. 8. 2, 7, 13, 17:
सरथः कालरुद्रस्तु दहेदास्थानमध्यगः । . . . तदूर्ध्वे नरका घोराः क्षीणजन्तुसमाश्रयाः ॥ . . .
अष्टभेदास्त्रयो ज्ञेया कुम्भोपाकश्च रौरवः । अवीचिश्चैव चण्डस्थं चत्वारिंशच्छतं मतम् ॥ . . .
नवलक्षान्तरं गत्वा सप्तपातालकं भवेत् । त्रिखण्डं त्रिजनाकीर्णं हाटकाधिष्ठितं तदा ॥ . . .
[9] महा pour मही—C.
[10] स्थिता pour वृता—A.

तस्या मध्ये महामेरुः स्थितो ह्यमरपूजितः । [1]प्रविष्टः षोडशाधस्ताच्चतुरशीतिरुच्छ्रितः ॥ ५ ॥
ब्रह्मणोऽण्डं महाशैले [2]राजते चावभासितः । [3]अमरऋषिगन्धर्वविमाननगराकुलम् ॥ ६ ॥
अनेकाकार[4]विन्यासप्रमाणरचनादिभिः । भुवनानि निविष्टानि [5]तस्मिन्नण्डे चतुर्दश[6] ॥ ७ ॥
भूलोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महस्तथा । जनस्तपस्तथा सत्यमेतावान् लोकसंग्रहः ॥ ८ ॥
तेषामुत्पत्तिसंहारस्थित्यनुग्रहकारणम् । उमापतिर्महातेजाः परमेशसमो गुरुः ॥ ९ ॥
पद्मजन्माण्डमध्वानमतीत्यानलवर्चसः । शतरुद्रा इति ख्याता [7]वीरभद्रपुरःसराः[8] ॥ १० ॥
श्रीकण्ठाधिष्ठिताः सन्तो देवानां मनसेप्सितम् । ऐश्वर्यं [9]संप्रयच्छन्ति हरन्ति च महौजसः[10] ॥ ११ ॥

---

[1] प्रविष्टः षोडशाद्धस्ताश्चतुराशीरधिश्रितः—A. [2] राजतेजोवभासितः—A; राजते चावभासतः— B.

[3] अमराद्धर्षि pour अमरैर्ऋषि—B ; अमारादृषि pour अमरैर्ऋषि—C.

[4] चिन्न्यास pour विन्यास—A. [5] तस्मिंस्तण्डे—A.

[6] cf. *Suprabhedāgama*, IV. 3. 43-46:

भूलोकं प्रथमं वक्ष्ये समासात्तु शृणुष्व हि । नानाजनपदाकीर्णं नानावस्तुसमायुतम् ॥
जम्बूद्वीपादिसंयुक्तं क्षीरमम्बोधिसंयुतम् । तस्य मध्ये महामेरुर्हेमरूपेण तिष्ठति ॥
लक्षयोजनमानेन कर्णिकारूपवत्क्रमात् । षोडशैस्तु सहस्राणि भूम्यधस्तात्प्रविष्टकम् ॥
चतुरशीतिसहस्रं योजनोर्ध्वे विधीयते । . . . . . ॥
तस्योर्ध्वे तु सभां विद्याद्ब्रह्मणश्च महात्मनः । नाम्ना मनोवती चैव सर्वरत्नसमासतः ॥ . . .
नानालंकारसंयुक्ता ऋषिसिद्धगणायुताः । . . . सगन्धर्वसमायुक्तं सर्वदेवगणावृतम् ॥

cf. *Kiraṇāgama*, I. 8. 44-45, 48-50:

ततोऽष्टाशीतिलक्षाणि द्वे च कोटिप्रमाणतः । भूपृष्ठं सुकटाहेन कोटिमानेन तत्समम् ॥
एवमेकीकृतं सर्वं पञ्चाशत्कोटयः स्थिताः । भूलोकस्तत्र विख्यातः सप्तद्वीपार्णवान्वितः ॥ . . . .
नवखण्डं च तज्ज्ञेयं मेरुमध्यं सपर्वतम् । स मेरुर्हेमसंभूतिः शरावाकृतिमस्तकः ॥
प्रविष्टः षोडशाधस्तात् सहस्राणि सवर्तुलः । उच्छ्रायेण सहस्राणामशीतिश्चतुरन्यथा ॥

cf. *ibid*, I. 8. 81-93, aussi.

[7] वीरुद्रपुरःसराः—A, C.

[8] cf. *Suprabhedāgama*, IV. 3. 163-178 et *Mṛgendrāgama*, I. 13. 124-136 pour les noms des 100 Rudra; cité par le Aghoraśivācārya dans son commentaire *Dīpikā* sur le *Mṛgendrāgama*, I. 13. 145-146.

[9] सप्त यच्छन्ति—B. [10] महौजसम्—B.

पञ्च पञ्चाष्टकं चैव प्रत्यात्मकमथादितः[1] । गुह्यं[2] तथातिगुह्यं[3] च [4]पवित्रं [5]स्थाणुसंज्ञितम् ॥ १२ ॥

---

[1] उदितः pour आदितः—B.

[2] cf. *Suprabhedāgama*, IV. 3. 180:

गुह्यम्

अमरेशं प्रभावं च नैमिशं पुष्करं तथा । आषाढीशं च पिण्डीशं हारभूतं च वाकुलम् ॥
प्रोष्टं(क्तं ?) गुह्याष्टकं ह्येवं जलावरणमाश्रितम् ।

cf. *Mṛgendrāgama*, I. 13. 137-138:

भारभूत्याषाढडिण्डिलाकुल्यमरपुष्कराः । प्रभासनैमिशौ चेति गुह्याष्टकमिदं जले ॥

[3] cf. *Suprabhedāgama*, IV. 3. 182:

अतिगुह्यम्

हरिश्चन्द्रं सुशैलं च जल्पेरम्रातिकेश्वरम् । महाकालं मध्यमं च केदारं भैरवं तथा ॥
अतिगुह्याष्टकं ह्येवं अग्न्यावरणमाश्रितम् ।

cf. *Mṛgendrāgama*, I. 13. 138-139:

श्रीशैलजल्पकेदारभैरवाम्रातकेश्वराः । हरिश्चन्द्रमहाकालमध्यास्सातिपदा रुचौ ॥

गुह्याद्गुह्यम्

cf. *Suprabhedāgama*, IV. 3. 184:

गया चैव कुरुक्षेत्रं नखलं नाखलं तथा । विमलं चाट्टहासं च महेन्द्रं भीम एव च ॥
गुह्याद्गुह्याष्टकं ह्येवं अनिलावरणे स्थितम् ।

cf. *Mṛgendrāgama*, I. 13. 139-140:

महेन्द्रभीमविमलकुरुक्षेत्रगयाखलाः । सनापदोत्तराः साट्टहासाः सनखलाः खगे ॥

[4] cf. *Suprabhedāgama*, IV. 3. 186-187:

पवित्रम्

वस्त्रापदं रुद्रकोटिरविमुक्तं महालयम् । गोकर्णं भद्रकर्णं च सुवर्णाक्षं च स्थाणुकम् ॥
पवित्राष्टकमेवं हि व्योमावरणमाश्रिताः ॥

cf. *Mṛgendrāgama*, I. 13. 140-141:

स्थाणुस्वर्णाक्षगोकर्णभद्रकर्णमहालयाः । वस्त्रापदाविमुक्ताह्वरुद्रकोट्यः खमण्डले ॥
पवित्राष्टकमित्याहुः"

cf. *Kiraṇāgama*, I. 8. 117:

वस्त्रापदं रुद्रकोटिमविमुक्तं महालयम् । गोकर्णं भद्रकर्णं च स्वर्णाक्षं स्थाणुसंज्ञकम् ॥
पवित्राष्टकमेतद्धि"

[5] cf. *Suprabhedāgama*, IV. 3. 188-189:

स्थाणु

खगलेन्दुकरण्डञ्चोनाकोटीमण्डलेश्वरम् । कौञ्जरं शङ्खुकर्णञ्च स्थूलेश्वरं स्थलेश्वरम् ॥
स्थानाष्टकमिदं विद्यात्पूर्वाद्यैः शान्तकं स्थितम् ॥

cf. *Mṛgendrāgama*, I. 13. 142-143:

स्थाण्वष्टकं द्विजश्रेष्ठ नामतः कथयामि ते । माकोटमण्डलेशानद्विरण्डच्छगलण्डकाः ॥
स्थलस्थूलेश्वरौ शङ्ककर्णकालाञ्जनावपि ।

cf. *Kiraṇāgama*, I. 8. 119-120:

खगलण्डं द्विरण्डं च माकोटं मण्डलेश्वरम् । कालाञ्जनपुरं चैव शङ्ककर्णं स्थलेश्वरम् ॥
स्थूलेश्वरं च विख्यातमहंकारे प्रतिष्ठितम् । स्थाण्वष्टकमिति ख्यातम्" . . .

पैशाचं राक्षसं [1]याक्षं गान्धर्वं चैन्द्रमेव च । सौम्यं [2]त्वथ [3]प्रजेशं च [4]ब्राह्मं चैवाष्टमं [5]ततः ॥ १३ ॥
अकृतं च कृतं चैव भैरवं ब्राह्ममेव च । [6]वैष्णवं त्वथ [7]कौमारमौमं श्रीकण्ठमेव च ॥ १४ ॥
वामदेवोऽथ भीमश्च उग्रश्चैव भवस्तथा । [8]सर्वेशानेश्वरौ चैव एकवीरः [9]प्रचण्डदृक् ॥ १५ ॥
[10]ईश्वरोऽथ [11]उमाभर्ता अजेशोऽनन्त एव च । ततस्त्वेकशिवश्चैव सर्वेषां मूर्ध्नि संस्थिताः [12] ॥ १६ ॥
क्रोधेशश्चण्डसंवर्तो [13]ज्योतिः पिङ्गलशूरकाः । पञ्चान्तकैकवीरौ च [14]शिखेदश्च [15]तदीश्वराः ॥ १७ ॥
अष्टावेते महात्मानो वीरभद्रात्परे स्थिताः[16] । [17]श्रीकण्ठानुमताः सर्वे देवानामधिदेवताः[18] ॥ १८ ॥
ऊर्ध्वतेजा महातेजा वामदेवो भवोद्भवौ । एकपिङ्गेक्षणेशानभुवनेशपुरःसराः ॥ १९ ॥

---

[1] यक्षगन्धर्वं—B. [2] चाथ—B; तथा—C. [3] प्रदेशं—B.
[4] ब्रह्म—B. [5] मतम्—A. [6] पौष्णवं चाथ कौमारौ—C.
[7] कौमारं भौमं—B. [8] शर्वेशानेश्वराश्चैव—B. [9] प्रचण्डधृक्—A, B et C.
[10] ईश्वरोऽधमभक्ता च अजेशो नन्दिरेव च—C. [11] उमाहर्ता—B.
[12] cf. *Suprabhedāgama*, IV. 3. 192-196:
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च । सौम्यं प्राजेश्वरं ब्राह्मं देवयोन्यष्टकं स्मृतम् ॥
एतत्पुर्यष्टकं विद्धि बुद्ध्यावरणमाश्रितम् । स्थानान्युक्तानि दिव्यानि सर्वैश्वर्ययुतानि च ॥
गुणावरणमूर्ध्वे तु बुद्धेर्दशगुणं स्मृतम् । अकृतं च कृतं चैव भैरवं ब्राह्म एव च ॥
वैष्णवं चाथ कौमारं कौमिश्चैकर्णमेव वा(?) । प्रोक्ता योगाष्टकं ह्येवं गुणावरणमाश्रितम् ॥
cf. *Mṛgendrāgama*, I. 13. 143-147:
सूक्ष्मामरपुराण्यष्टौ बुद्धौ पैशाचमादितः । राक्षसं याक्षगान्धर्वं माहेन्द्रं च महर्धिमत् ॥
सौम्यं प्राजेश्वरं ब्राह्मं दीप्तं परमया श्रिया । गौणे योगीशधामानि त्वकृतं कृतभैरवम् ॥
ब्राह्मवैष्णवकौमारमौमं श्रीकण्ठमन्तिमम् । वीरभद्रस्य रुचिमद्धाम योगिवरस्तुतम् ॥
स्वपदाधोऽधिकारस्थसर्वरुद्राधिकश्रियः । वामदेवभवानन्तभीमोमापत्यजेश्वराः ॥
सर्वेशानेश्वरावेकवीरैकशिवसंज्ञिताः । उग्रः प्रचण्डदृक् चेशः गुणानां मूर्ध्नि संस्थिताः ॥
cf. *Kiraṇāgama*, I. 8. 121: "तदूर्ध्वं बुद्धिसंज्ञकम् ।
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रसौम्यकम् । प्राजेशं ब्राह्मसंज्ञं च देवयोन्यष्टकं मतम् ॥
[13] ज्योतिः पिङ्गलशूरकः—A et B; ज्योतिः पिङ्गललूखलः—C. [14] शिखेतश्च—A; शिवेतश्च—C.
[15] तमीश्वरः—A. [16] परो स्थितः—C. [17] C omet les lignes suivantes.
[18] cf. *Suprabhedāgama*, IV. 3. 197-198:
अव्यक्तमत ऊर्ध्वे तु स्थितं दशगुणावृतम् । क्रोधश्चण्डश्च संवक्तो ज्योतिः पिङ्गलसूरकः ॥
पञ्चान्तकैकवीरश्च शिवेन सहितेश्वरः । महादेवाष्टकं ह्येवं तद्व्यक्तावरणे स्थितम् ॥
cf. *Kiraṇāgama*, I. 8. 122-123:
ततोऽव्यक्तं प्रधानं च महादेवाष्टकालयम् । क्रोधेशश्चण्डसंवर्तो ज्योतिः पिङ्गलशूरकौ ॥
पञ्चान्तकैकवीरश्च शिखेदश्च स्थितास्त्विह ।
cf. *Mṛgendrāgama*, I. 13. 149-150:
तेभ्यो दशगुणश्रीकान् प्रधानाधिपतीन् शृणु ।
क्रोधेशचण्डसंवर्तज्योतिःपिङ्गलशूरगाः । पञ्चान्तकैकवीरौ च शिखेद इति ते स्मृताः ॥

अङ्गुष्ठमात्रसहिता महादेवाष्टकाः शिवाः । मायाज्ञनविनिर्मुक्ताः [1]परमेशानसंमिताः[2] ॥ २० ॥
मण्डलाधिपतिभ्योऽथ[3] तत्त्वमार्गः प्रतिष्ठितः[4] । ऊर्ध्वं [5]भोगक्रियायोगे परमेशानभाषिते[6] ॥ २१ ॥
मज्जास्थिशुक्रसंघातस्नायु च [7]पितृजं स्मृतम् । रोमाणि लोहितं मांसं [8]मातृजं त्रिकमुच्यते ॥ २२ ॥
एतदन्नेन[9] सततं पानेन च [10]विवर्धितम् । सर्वं योनिशरीरं तु षड्भिः श्रितमहाह्रदम्[11] ॥ २३ ॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च । शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ॥ २४ ॥
पादौ पायुरुपस्थं च करौ वागिन्द्रियं तथा । श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका पुनरेव च[12] ॥ २५ ॥

---

[1] परमेशाग्निसंमिताः—A.

[2] cf. *Suprabhedāgama*, IV. 3. 200-202:

तत्प्रधानाच्छतगुणं पौरुषं तत्त्वमुत्तमम् । तत्र रुद्रो महातेजोवामदेवौ भवोद्भवौ ॥
एकलिङ्गेक्षणेशानभुवनैश्च(शाः)परस्परम् । अङ्गुष्ठमात्रास्ते देवास्त्वङ्गुष्ठात्मकसंज्ञकाः ॥
मायाज्ञानविनिर्मुक्ताः परमेशप्रभावकाः ।

cf. *Kiraṇāgama*, I. 8. 123-125:

अव्यक्ताद्रागतत्त्वं तु शतधा व्याप्य संस्थितम् । महातेजो वामदेवो भवोद्भवैकपिङ्गलौ ॥
एकेक्षणस्तथेशानो भुवनेश्वर एव च । अङ्गुष्ठमात्रसहिता रागस्था वीर्यसंयुताः ॥
तत्रैव पुरुषो ज्ञेयः प्रधानगृहपालकः ॥

cf. *Mṛgendrāgama*, I. 13. 152-153:

भुवनेशमहादेववामदेवभवोद्भवाः । एकपिङ्गेक्षणेशानाङ्गुष्ठमात्राश्च भास्वराः ॥
परमेशोपमा रागविद्यागर्भे कलापदे । महापुरचतुःषष्टिमण्डले मण्डलाधिपाः ॥

[3] यः pour अथ—A et B. [4] तत्त्वमार्गप्रतिष्ठितम्—C. तत्त्वमार्गप्रतिष्ठितः—B.

[5] योग pour भोग—A.

[6] Les MSS. consultés donnent le vers 22 immédiatement après 21. Mais il semble que plusieurs vers manquent ici, qui devraient s'intercaler entre 21 et 22. On ne trouve pas le passage cité par Aghoraśivācārya dans son commentaire *Dīpikā* sur *Mṛgendrāgama*, 1. 2. 5, et qui pourrait bien appartenir à cette portion manquante. Voici ces vers: श्रीमद्रौरवे—

अनन्तोपरमे तेषां महतां चक्रवर्तिनाम् । विहितं सर्वकर्तृत्वकारणं परमं पदम् ॥

[7] पद्मजं—C. [8] ममांक pour मातृजं—A; मातृकं—B. [9] एतदन्तेन—A.

[10] विवस्थितम्—A. [11] हृतम् pour ह्रदम्—A.

[12] cf. *Suprabhedāgama*, III. 1. 19-28:

तच्छरीरं द्विधा प्रोक्तं स्थूलं वै सूक्ष्ममेव च । पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥
शुक्रं बीजांशमित्युक्तं क्षेत्रांशं शोणितं स्मृतम् । अस्थि स्नायुश्च मज्जा च पितृजंस्त्रयमेव तु ॥
त्वङ्मांसशोणितं चैव मातृजं त्रिकमेव च । इत्थं षट् कौशिकं प्रोक्तं शरीरान्तैस्तु जायते ॥
नखदन्तश्च रोमाणि केशाश्च नाड्यस्तथा । शब्दस्पर्शश्च रूपश्च रसो गन्धश्च पञ्चधा ॥
एतैर्भूतगणैर्युक्तं स्थूलं शरीरकं भवेत् । . . . . श्रोत्रं त्वक् चक्षुर्जिह्वा च घ्राणं बुद्धीन्द्रियं विदुः ॥ . . .
प्राणः समानोदानश्च अपानो व्यान एव च । नागः कूर्मश्च ककरो देवदत्तो धनञ्जयः ॥
मनो बुद्धिरहंकारश्चित्तान्तःकरणं स्मृतम् । मदमात्सर्यमानादि सूक्ष्मशारीरकं विदुः ॥

अहंकारस्त्रिधा ज्ञेयो बुद्धिरष्टविधा स्मृता । गुणत्रयं च विज्ञेयं प्रधानपुरुषे[1]श्वराः[2] ॥ २६ ॥
परतश्च महामाया[3] विद्येशाना[4] व्यवस्थिताः[5] । सर्वविद्यापरिवृतः[6] सर्वैश्वर्यस्य वारिधिः[7] ॥ २७ ॥
जगतः प्रलयोत्पत्तिविभूतिनिधिरव्ययः[8] । मायोपरि महामाया सर्वकारणकारणम् ॥ २८ ॥
अष्टविद्येश्वरैर्युक्तो वीतमायो निरञ्जनः[9] । [10]सूक्ष्मः सर्वगतो नित्यो देवदेवो महेश्वरः ॥ २९ ॥
अनन्तेशश्च सूक्ष्मश्च तृतीयश्च शिवोत्तमः । एकनेत्रैकरुद्रौ च त्रिमूर्तिश्चानलद्युतिः ॥ ३० ॥
श्रीकण्ठश्च शिखण्डी च सूर्यकोटिसमप्रभौ[11] । विद्येशास्तु महात्मानः शिवशक्तिसमन्विताः[12] ॥ ३१ ॥
तिस्रस्तु शक्तयो ज्ञेयाः कारणस्याव्ययात्मनः । वामा ज्येष्ठा च रौद्री च शक्तयः समुदाहृताः ॥ ३२ ॥
ज्ञानशक्तिः क्रियाशक्तिः शक्तिद्वयमनन्तरम् । [13]ज्ञानशक्तिः शिवा [14]नित्यसृष्टिसंहारकृत्क्रिया ॥ ३३ ॥

---

[1] ईश्वरः pour ईश्वराः—A; ईश्वरम्—C.

[2] cf. *Suprabhedāgama*, III. 1. 86:

अहंकारं त्रिधा ज्ञेयं भूतवैकारितैजसम् । वक्ष्यते तु समासेन भूतसारसमुद्भवम् ॥
शब्दतन्मात्रमादौ तु गन्धतन्मात्रमर्थके । एतानि पञ्चमात्राणि भूतानां सृष्टिरुच्यते ॥
स्यात्तैजस अहंकारे इन्द्रियाणि समुद्भवम् । वैकारिक अहंकारे अधिदेवाः समुद्भवम् ॥
बुद्धिरष्टविधा ज्ञेया धर्माधर्मादिरष्टधा । चित्तमेकविधं ज्ञेयं तच्चान्तःकरणं विदुः ॥
चतुर्भिरन्तःकरणैश्चतुर्विंशतिरुच्यते । उपादानं तु तेषां वै चाव्यक्तमिति निन्दितम् ॥
अव्यक्तस्य तु धर्मः स्यात्त्रिगुणं संप्रकीर्तितम् । तामसं राजसं चैव सात्विकं च तृतीयकम् ॥ . . .
पञ्चविंशतितत्त्वानि समासात्कीर्तितानि तु । तेभ्य एकादशं तत्त्वं समासाच्छृणु सांप्रतम् ॥
पुंरागो नियती विद्या कला कालस्तथैव च । शुद्धविद्या शुद्धकला शुद्धमाया तथैव च ॥
आत्मतत्त्वं च विद्या च शिवतत्त्वमतः परम् ।

cf. aussi. *ibid.*, IV. 3. 231-232:

प्रकृतिः पुरुषश्चैव ईश्वरश्च त्रयो भवेत् । माया प्रकृति चात्मानं तत्त्वस्य पुरुषः स्थितः ॥
विद्यां चैवेश्वरः प्रोक्तः सर्वतत्त्वं हि तन्मयम् ॥

[3] महामायो—C.
[4] विद्येशान—A.
[5] व्यवस्थिता—C.
[6] परिवृता—A; परिव्राता—C.
[7] सर्वैश्वर्यभवारिणी—A; सर्वेश्वर्ये भवाहिणी—C.
[8] अव्ययः pour अव्ययः—A.
[9] पीतामायो निरजितः—C.
[10] सूक्ष्मकः सर्वतो नित्यो—C.
[11] प्रभः pour प्रभौ—A.

[12] cf. *Mṛgendrāgama*, I. 4. 3-4:

तेषामनन्तः सूक्ष्मश्च तथा चैव शिवोत्तमः । एकनेत्रैकरुद्रौ च त्रिमूर्तिश्चामितद्युतिः ॥
श्रीकण्ठश्च शिखण्डी च राजराजेश्वरेश्वराः । ईषदप्राप्तयोगित्वान्नियोज्याः परमेष्ठिनः ॥

cf. aussi le texte I. 2. 10-11.

cf. *Kiraṇāgama*, I. 8. 136-137:

अनन्तश्चैव सूक्ष्मश्च शिवश्चोत्तमसंज्ञितः । एकनेत्रैकरुद्रौ च त्रिमूर्तिरपरस्ततः ॥
श्रीकण्टश्च शिखण्डी च वामाद्या नव शक्तयः ।

[13] ज्ञानशक्तिद्वयान्नित्यसृष्टि—C.
[14] नीति pour नित्य—B.

सद्यो वामो[1]ऽप्यघोरश्च पुरुषेशान एव च । सकलस्तु [2]शिवो ह्येष निष्कलस्तु सदाशिवः ॥ ३४ ॥
सकलं निष्कलं चैव यो हि वेत्ति सदाशिवम्[3] । संसाराद्धि विनिर्मुक्तः शिवमेवाधिगच्छति[4] ॥ ३५ ॥
सर्वज्ञः सर्वकर्ता च [5]शिवः शक्तिसमन्वितः । विद्याराजाधिराजेशो जगद्भ्रमयतीच्छया ॥ ३६ ॥
अपावृत्तः सुसंपूर्णः [6]शुद्धस्त्वात्मा व्यवस्थितः । [7]परः परमनिर्वाणो ह्यव्ययः परमः शिवः ॥ ३७ ॥
[8]एनं यजन्ति मुनयो गुह्यमन्त्रैर्महामखैः[9] । मन्त्रपुष्पोपहारेण शिवं परम[10]मानसम् ॥ ३८ ॥
इष्ट्वा परमसद्भावं शिवतन्त्रविदुत्तमम्[11] । [12]कारणेशानकमलं शिवमभ्येति साधकः ॥ ३९ ॥
मन्त्रदीक्षाध्वरस्नातो मन्त्रालंकृतविग्रहः । ध्यायेत्पञ्चमहामन्त्रतनुमीशानमव्ययम् ॥ ४० ॥
प्रधानपुरुषेशानं परं हृद्व्योमसंस्थितम् । शुद्धस्फटिकसंकाशमधूमज्योतिरूपिणम्[13] ॥ ४१ ॥

---

[1] हि pour अपि—B. [2] शिवा—A.

[3] Ms. B indique une lacune après cette ligne.

[4] cf. *Suprabhedāgama*, IV. 1. 34, 38, 67-69:

अष्टत्रिंशत्कलायुक्तं सकलं त्विति विद्यते । ईशादिसद्यपर्यन्तं कल्पयेत्तु सदाशिवम् ॥ . . .
सद्यवाममघोरं च पुरुषेशकलास्स्मृताः । एवन्तु सकलं प्रोक्तं सकलं त्विति निश्चितम् ॥ . . . .
निष्कलं तु लयस्थानमधिकारं सनिष्कलम् । भोगः सकलमेवं स्याल्लयभोगाधिकारवान् ॥
परं निष्कलमित्युक्तं परमं सकलं स्मृतम् । परापरं तथा प्रोक्तं सकलं निष्कलं भवेत् ॥
परापरं यथा ज्ञात्वा स मुक्तः पाशहा भवेत् ।

[5] शिवशक्तिसमन्वितः—A. [6] शुद्धः स्वात्मा A. [7] परमापरनिर्वाणो—A; परात्परमनिर्वाणो—C.
[8] A corrompu; एनं तं मुनयो गुह्यतन्त्रमन्त्रैः—C. [9] महामुखैः—A.
[10] मानदम् pour मानसम्—B; मानयम्—C. [11] उत्तमः pour उत्तमम्—B et C.
[12] कारणेशान्तकमलं—A et B.

[13] Le chapitre se termine brusquement. Les MSS. continuent sans interruption et le *Rauravāgama* ou la deuxième section du *Rauravāgama* commence. Rien ne montre dans les MSS. que ce soient des chapitres distincts. Il est cependant évident qu'ils traitent de sujets différents et par conséquent nous les avons séparés ici. Il est possible que d'autres MSS. soient découverts plus tard, qui permettent de compléter ce chapitre.

C ajoute ce vers.

अथ दिव्यां पवित्रस्य विधानं लक्ष्यतेऽधुना । समयाचारनिष्ठानां पुंसां भोगापवर्गदम् ॥
स्वयतं प्रधानविधि चेत् प्रथमार्धपवित्रकम् । शिवेन सहिता सा चेत् किं तु तेन सहाचरेत् ॥

APPENDICE I

Dans les manuscrits de Kīlvelūr (A), de Dharmapuram (B) et de KuNRakkuḍi (C), utilisés pour l'édition de *Rauravāgama*, le *Vidyāpāda* est incomplet, il s'arrête au *paṭala* 4, vers 41 (voir note 13 page 16). Lors de l'examen de manuscrits d'āgama, à la bibliothèque de Mysore, " The Oriental Research Institute ", a été trouvé, dans le manuscrit intitulé *Āgamārthasaṃgraha* (S. N° 258), le texte complet du *Rauravasūtrasaṃgraha*. Le manuscrit, sur feuilles de latanier, est écrit en nandināgarī, alors que les manuscrits d'āgama trouvés jusqu'à présent, sont pour la plupart en grantha, quelques uns étant écrits en caractères télougous. Le *Rauravasūtrasaṃgraha* commence au folio 9 et se termine au folio 12*a* de ce manuscrit ; malheureusement par endroits les bords des feuilles sont brisés. Le texte correspond au *Vidyāpāda* de notre texte. D'ailleurs les manuscrits utilisés pour notre édition indiquaient déjà cette portion (Vidyāpāda), tantôt sous le nom de *Rauravasūtrasaṃgraha* tantôt sous celui de *Rauravatantra*. Nous avons constaté de semblables variations dans les titres donnés au *Svāyambhuvāgama*: le même ouvrage est indiqué aux colophons du manuscrit de Kīlvelūr comme *Svāyambhuvasūtrasaṃgraha*, et à ceux du manuscrit de Tirunelveli, comme *Svāyambhuvatantra*. De plus un certain nombre de vers appartenant à cette section de notre texte se trouvent cités par Aghoraśivācārya, Nirmalamaṇi, et d'autres, comme provenant du *Raurava* ou *Śrīmadraurava*, titre qu'ils donnent également en référence pour des citations de vers que nous avons identifiés comme appartenant au *kriyāpāda*. Toutes ces indications tendent à montrer que le *Rauravasūtrasaṃgraha* n'est pas un ouvrage distinct, mais une section, le *Vidyāpāda*, du *Rauravāgama*, à moins qu'il ne soit une version abrégée de ce même *Vidyāpāda*. Bien que les textes agamiques parlent de différents stades, au cours desquels les āgama auraient été donnés sous des formes de plus en plus abrégées, nous ne pouvons affirmer que ces versions détaillées aient jamais existé, ni que la portion en question de notre texte soit un résumé de quelque texte antérieur.

Comme la découverte de la portion manquante de ce *Vidyāpāda* a été faite alors que la plus grande partie de l'ouvrage était déjà imprimée, nous avons dû ajouter en appendice la fin du chapitre (vers 42 à la fin) et les chapitres cinq à dix.

[रौरवागमः]

[विद्यापादः]

[तुरीयः पटलः]

[४२–५२ श्लोकाः]

सर्वजीवकलाव्यापिसर्वज्ञं सर्वतोमुखम् । [1]तत्स्थो लीनस्वतत्त्वेन तां कलां चिन्तयेत्सदा ॥ ४२ ॥

---

[1] Les vers 42*b* et 43 sont cités par Bhaṭṭarāmakaṇṭha dans son commentaire sur *Mokṣakārikā*, p. 41.

[1]सर्वाज्ञनविनिर्मुक्तं शिवशक्तिकलैधितम्[2] । आत्मतत्त्वमिदं शुद्धं साधकानां प्रकीर्तितम् ॥ ४३ ॥
अणिमादिगुणैर्युक्ता योगैश्वर्यावलम्बिताः । यावत्यः कथिता विद्याः सर्वाः शिवकलान्विताः ॥ ४४ ॥
शिवशक्तिकलाः सर्वा एताः सर्वज्ञभाषिताः । योगमोक्षसुखैश्वर्यधनवीर्यप्रदाः शुभाः ॥ ४५ ॥
विद्यातत्त्वमिदं पुंसां तृतीयं सार्वकामिकम् । शिवतत्त्वविधानज्ञो ज्ञात्वा सिध्यति नेतरः ॥ ४६ ॥
शिवात्मविद्यातत्त्वानि त्रीण्येतान्यनुपूर्वशः । विदित्वा साधकः क्षिप्रं मन्त्रसिद्धिमवाप्नुयात् ॥ ४७ ॥
परार्धाः पञ्च विख्याता विद्येशवदनोद्गताः । विधिक्रिये कालयोगौ शिवश्चेति समासतः ॥ ४८ ॥
शिवः कला रागविद्ये पुरुषोऽव्यक्तमेव च । गुणा बुद्धिरहंकारस्तन्मात्राणीन्द्रियाणि च ॥ ४९ ॥
महाभूतानि चाप्यत्र पृथिव्यन्तानि पञ्च च । एषां संख्या समाख्याता शिवतत्त्वार्थकोविदैः ॥ ५० ॥
शिवतन्त्रमहा[3][विद्यासुसंस्कृत]महाधियः । शिवानलमहाज्वालादग्धबीजाः सुकेवलाः ॥ ५१ ॥
पारमेशानकिरणप्रकाशीकृतचक्षुषः । साधकाः परमं शान्तं प्रविशन्ति तनुक्षये ॥ ५२ ॥

इति श्रीरौरवसूत्रसंग्रहे अध्वपटलश्चतुर्थः

---

[1] Le vers 43 est cité par Aghoraśivācārya (cf. *Tattvasaṃgrahavyākhyā*, p. 30) et Nirmalamaṇi dans son commentaire sur l'*Aghoraśivācāryapaddhati*, p. 355 (édition Chidambaram). cf. तदुक्तं श्रीमद्रौरवे—सर्वाज्ञनविनिर्मुक्तं etc.

[2] शिवशक्तिकले स्थितम्—Aghoraśivācārya; शिवशक्तिकलेद्धितम्—Nirmalamaṇi; शिवशक्तिकलोत्थितम्—Bhaṭṭarāmakaṇṭha.

[3] Ce qui est entre crochets, manquant dans le manuscrit, a été reconstitué.

[पञ्चमः पटलः][1]

[मुद्रालक्षणम्]

अथातः संप्रवक्ष्यामि गुह्या मुद्राः शिवोद्भवाः । प्रयुज्यन्तेऽर्चनविधौ बलिकर्मजपेषु च ॥ १ ॥
नमस्कारो ध्वजश्चैव तथा च शशकर्णिका । मुकुला पद्ममुद्रा च तथा चावाहनी भवेत् ॥ २ ॥
निष्ठुरा कालकण्ठी च लिङ्गमुद्रा तथैव च । [2][अथ वक्ष्ये लक्षणानि मुद्रा]णामनुपूर्वशः ॥ ३ ॥
नमस्कारेण वन्देत ध्वजेन ध्यानमाचरेत् । शशकर्ण्या नियुञ्ज्येत मुकुल्या चासनाकृतिः ॥ ४ ॥
आसनं कल्पयेदत्र क्रमशः पद्ममुद्रया । आवाहन्यावाहनं च देवेशस्य प्रयोजयेत् ॥ ५ ॥
निष्ठुरया निरुद्धयेत विघ्नोत्सारणमेव च । कालकण्ठ्या प्रयुञ्जीत शिवपूजाप्रबोधका ॥ ६ ॥
योजना लिङ्गमुद्रायाः शिवरूपे ह्युदाहृता ।

[नमस्कारमुद्रा][3]

हृद्देशे तु निपीडयेत हस्तयोरुभयोस्तलम् ॥ ७ ॥
नमस्कारा तु विज्ञेया मन्त्रिणा मन्त्रवन्दने ।

[ध्वजमुद्रा][4]

वामहस्तस्य ग्रीवायां तर्जनीं दक्षिणेन तु ॥ ८ ॥
अङ्गुष्ठमुन्नतं कृत्वा ध्वजेन ध्यानमारभेत् ।

---

[1] Pour le *mudrālakṣaṇa* voir *Ajita, paṭala* 27, *Dīpta, paṭala* 70, *Svāyambhuva, paṭala* 13, *Vīra, paṭala* 33, *Suprebheda*, I, 9, *Kāraṇa*, I, 28, *Kiraṇa*, II, 3, *Yogaja*, ms. p. 156-159, *Mṛgendra, kriyāpāda, paṭala* 5.

[2] Ce qui est entre crochets, manquant dans le manuscrit, a été reconstitué.

[3] Pour la **नमस्कारमुद्रा** voir *Ajita*, 27, 17-18:

हस्ताभ्यामञ्जलिं कृत्वा हृद्देशेषु समाश्रिताम् । अङ्गुष्ठेन तु सव्येन वामाङ्गुष्ठं तु पीडयेत् ॥
नमस्कारा भवेदेषा सर्वेषां वन्दनोचिता ॥

[4] Pour la **ध्वजमुद्रा** voir *Svāyambhuva*, 13, 18-19:

अग्रं वामप्रदेशिन्या वेष्टयेत्सव्यपाणिना । कृत्वैवं तु ततोऽङ्गुष्ठं हृदये सन्नियोजयेत् ॥
वामाङ्गुष्ठं च वामाभिस्तिसृभिर्वेष्टयेत्ततः । ध्वजमुद्रा समाख्याता संयोज्या योगकर्मणि ॥

[शशकर्णिका][1]

मणिबन्धं निपीडयैव हस्तयोरुभयोरपि ॥ ९ ॥
अङ्गुष्ठां तर्जनीं चैव त्वेकामेकत्र योजयेत् । उत्तानौ तु करौ कृत्वा दर्शयेच्छशकर्णिकाम्[2] ॥ १० ॥

---

cf. *Dīpta*, 70, 22-24:

अग्रं वामप्रदेशिन्या वेष्टयेद्दक्षिणेन तु । अङ्गुष्ठमूर्ध्वतः कृत्वा हृदयेन नियोजयेत् ॥
मध्यमानामिकाग्रे तु वामाङ्गुष्ठ निधापयेत् । प्रसृतं स्यात्कनिष्ठा तु ध्वजमुद्रा प्रकीर्तिता ॥
दर्शयेद्देवसान्निध्ये ध्वजानां चाधिरोहणे ॥

cf. *Ajita*, 27, 25-27:

वामहस्ततले हस्ततलमन्यं प्रयोजयेत् । वामहस्ताङ्गुलीभिस्तु तत्पृष्ठमभिवेष्टयेत् ॥
अङ्गुष्ठं वामहस्तस्य दक्षिणे पीडयेत्ततः । दक्षिणस्याङ्गुलीरस्याश्लिष्टास्तिर्यगवस्थिताः ॥
चालयेद्ध्वजसंज्ञेयं मुद्रा वायोः प्रियावहा ॥

cf. *Suprabheda*, I, 9, 27-29:

वामे प्रदेशिन्यग्रं तु वेष्टयेत्सव्यपाणिना । कृत्वोर्ध्वे तु ततोऽङ्गुष्ठं हृदये संनियोजयेत् ॥
वामाङ्गुष्ठं च वामाभिस्तिसृभिर्वेष्टयेत्क्रमात् । ध्वजमुद्रा समाख्याता संयोज्या योगकर्मणि ॥

[1] Pour la **शशकर्णिकामुद्रा** voir *Ajita*, 27, 13-14:

तर्जन्यौ कुञ्चिते कृत्वा त्वङ्गुष्ठाभ्यां समाक्रमेत् । शेषास्तु ऋजवः प्रोक्ता मणिबन्धे नियोजयेत् ॥
शशकर्णी विदा ज्ञेया सर्वेषामृद्धिकारिणी ॥

cf. *Svāyambhuva*, 13, 7-8:

तर्जन्यौ कुञ्चिते कृत्वा तयोरग्रे निधापयेत् । द्वयोरङ्गुष्ठशिरसि शेषास्तु ऋजवो घनाः ॥
कृत्वा तु मणिबन्धे तु वामे सव्यं तथा न्यसेत् । मुद्रेयं शशिकर्णी तु विज्ञेया योगकर्मणि ॥

[2] Les vers qui donnent la définition des *mudrā* de la *mukulā* et de la *padmā*, manquent dans le manuscrit. Nous donnons ici des définitions qui se trouvent dans d'autres textes. Pour la **मुकुलमुद्रा** voir *Ajita*, 27, 12:

कराभ्यामञ्जलिं कृत्वा मध्ये तु सुषिरं नयेत् । सरोजमुकुलाकारा मुकुली द्रव्यसञ्चये ॥

cf. *Dīpta*, 70, 7-8:

द्वौ हस्तावेकतः कृत्वा चान्तरे सुषिरं तयोः । सरोजमुकुलाकारां दर्शयेन्मुकुलीं तथा ॥

cf. *Suprabheda*, I, 9, 16:

द्वौ हस्तावेकतः कृत्वा मध्ये तु सुषिरं तयोः । सरोजमुकुलाकारां मुकुलीं तु प्रदर्शयेत् ॥

pour la **पद्ममुद्रा** voir *Ajita*, 27, 16-17:

पूर्वोक्तमुकुली या तु सा हृद्देशे निवेशिता । व्याकोचकमलकारा विश्लिष्टप्रसृताङ्गुलिः ॥
पद्ममुद्रा भवेदेषा प्रोक्ता ह्यासनकल्पने ॥

cf. *Dīpta*, 70, 8-9:

उत्तानौ तु करौ कृत्वा मणिबन्धं तु बन्धयेत् । मध्यमे कुञ्चिताङ्गुष्ठौ शेषाः प्रविरलास्तथा ॥
पद्ममुद्रा भवेदेषा दर्शयेत्पीठकल्पने ॥

[आवाहनी][1]

अञ्जलिं नियतां कृत्वा हृद्देशे तु समाहिताम् । अङ्गुष्ठौ तु निपीडयेते मध्यतो निबिडाङ्गुलिम् ॥ ११ ॥
आवाहनी प्रयोक्तव्या देवदेवस्य चासने ।

[निष्ठुरा][2]

निपीडयेत्तथाङ्गुष्ठौ हस्तयोरुभयोरपि ॥ १२ ॥
तयोश्चाभिमुखं कृत्वा निष्ठुरां तु प्रयोजयेत् ।

[कालकण्ठी][3]

अङ्गुष्ठौ तु नतौ कृत्वा हस्तयोरुभयोरपि ॥ १३ ॥

---

cf. *Vīra*, 33, 34:

उभौ करौ च विप्रेन्द्र मणिबन्धे तु कारयेत् । मुकुलीकृतहस्तौ द्वौ पद्ममुद्रा इति स्मृता ॥

cf. *Suprabheda*, I, 9, 17:

पूर्वोक्तमुकुली या तु हृद्देशान्निस्सृताङ्गुलिः । व्याकोचमुकुलाकारां पद्ममुद्रां तु दर्शयेत् ॥

[1] pour la **आवाहनमुद्रा** voir *Ajita*, 27, 28-29:

हस्ताभ्यामञ्जलिं कृत्वा संमुखं तु तयोः पुनः । कनिष्ठमूलगौ तत्तदङ्गुष्ठाग्रे च कारयेत् ॥
आवाहनी भवेन्मुद्रा वेष्टयावाहनकर्मणि ॥

cf. *Dīpta*, 70, 18-20:

उत्तानौ तु करौ कृत्वा पाणिमूले तु बन्धयेत् । निधायाङ्गुष्ठशिरसि तर्जन्यग्रौ विचक्षणः ॥
अनामिकाग्रौ संलग्नौ सवक्रं स्याद्विशेषतः । कनिष्ठौ चोच्यते युक्तौ मध्यमौ प्रसृतौ तदा ॥
आवाहनीति विख्याता सिंहासनविधौ परा ॥

cf. *Svāyambhuva*, 13, 20:

हस्ताभ्यामञ्जलिं कृत्वा कनिष्ठाङ्गुलिपर्वयोः । अङ्गुष्ठौ स्थापयेदेषा मुद्रा त्वावाहनी स्मृता ॥

[2] pour la **निष्ठुरमुद्रा** voir *Ajita*, 27, 14-15:

मणिबन्धे च संविष्टौ करौ कृत्वा ततस्तयोः । अङ्गुष्ठौ गर्भगौ कृत्वा मुष्टिबन्धे कृते सति ॥
निष्ठुरेयं भवेन्मुद्रा सर्वेषां तु निरोधने ॥

cf. *Svāyambhuva*, 13, 9:

हस्ताभ्यामञ्जलिं कृत्वा द्वे मुष्टी साधयेत्सुधीः । अङ्गुष्ठाङ्गुष्ठनिक्षिप्तौ निष्ठुरां संप्रपूजयेत् ॥

[3] pour la **कालकण्ठीमुद्रा** voir *Ajita*, 27, 10-11:

कराभ्यां मुष्टिमाबध्य योजयेन्मणिबन्धकौ । मुष्टी कृत्वा ततोत्ताने तदा नाङ्गुलियोजिते ॥
अङ्गुष्ठाग्रौ च संलग्नौ कृत्वा स्यात्कालकण्ठिका । कालकण्ठी प्रयोक्तव्या द्रव्यलक्षणकर्मणि ॥

cf. *Svāyambhuva*, 13, 5:

कृत्वा मुष्टिं ततोत्ताने तदा नाङ्गुलियोजिते । अङ्गुष्ठाग्रे च संलग्ने कालकण्ठीं तु दर्शयेत् ॥

उभौ चाभिमुखौ कृत्वा [1]कालकण्ठीं प्रयोजयेत्।

[लिङ्गमुद्रा][2]

अङ्गुष्ठमुन्नतं कृत्वा मुष्टिं पाणौ तु दक्षिणे ॥ १४ ॥
प्रक्षिपेद्वस्तमध्ये तु वामहस्तस्य मन्त्रवित्। दक्षिणे तु तथा पाणौ शेषाः कुर्यात्तथोपरि ॥ १५ ॥
लिङ्गमुद्रा महावीर्या विज्ञेया शिवपूजने। एता एव महामुद्राः शिवस्य परमात्मनः ॥ १६ ॥
आनुपूर्व्या प्रयोक्तव्या मन्त्राणां च विशेषतः। इत्येताः साधकविधौ गुह्यमन्त्राः प्रकीर्तिताः[3] ॥ १७ ॥

[मुद्रामन्त्राः]

"ओं नमो नमः" नमस्कारः ॥ ओं उपकल्पाय ध्यानाधिपतये" ध्वजः ॥ "ओं शशकर्णी" [4]शशकर्णी ॥ "ओं मुकुली" मुकुला ॥ "ओं पद्मोद्भवे" पद्ममुद्रा ॥ "ओं "[5]अनन्तरूपाय जटिलाय" आवाहनी ॥ "ओं प्रपीडनाय" निष्ठुरा ॥ "ओं कालकल्पाशनि हुं फट्" कालकण्ठिका[6] ॥ "ओं नमः शिवाय शिवतराय नमो नमः" लिङ्गमुद्रा ॥ "ओं नमः सोमाय उग्राय छठ" सर्वमुद्राहृदयम् ॥ इति मुद्रामन्त्राः समाप्ताः ॥

इति [श्रीरौरवसूत्रसंग्रहे] मुद्रापटलः पञ्चमः

---

[1] कालकर्णी—ms.

[2] pour la लिङ्गमुद्रा voir *Ajita*, 27, 23-25:

शिथिलं दक्षिणं मुष्टिं बध्वा तस्योदरे क्षिपेत्। वामाङ्गुष्ठं ततोऽङ्गुष्ठं दक्षिणं चोच्छ्रितं नयेत् ॥
वामहस्ताङ्गुलीभिश्च सव्यमुष्टिं च वेष्टयेत्। लिङ्गमुद्रा भवेदेषा लिङ्गस्थापनकर्मणि ॥

[3] Après ce vers, le manuscrit donne le colophon indiquant la fin du cinquième *paṭala*. Après le colophon se trouvent les *mudrāmantra*. Comme cette partie n'a aucun rapport avec le *paṭala* suivant qui traite des *kalā*, elle pourrait appartenir au cinquième *paṭala*. Il est aussi possible qu'elle soit un extrait de commentaire, ajouté après le colophon par le copiste: nous savons par des citations que ces commentaires existaient: Aghoraśivācārya aurait lui-même fait un commentaire appelé *Rauravavṛtti*. Mais, par ailleurs, le dernier vers semble indiquer quelques *mudrāmantra* et il est très possible que les mantras donnés ici, fassent partie du texte lui-même. Le fait que le passage soit en prose n'exclut pas cette hypothèse, car notre texte présente des portions de forme similaire au *paṭala* 7 de ce même *pāda* et au *paṭala* 2 du *Kriyāpāda*. Nous avons choisi d'insérer ce passage avant le colophon.

[4] शशंकर्णी—ms.

[5] अनन्तपूरय—ms.

[6] कालकर्णिका—ms.

[अथ षष्ठः पटलः]

[पञ्चब्रह्मकलाविधिः][1]

अथ ब्रह्ममयं गुह्यं शिवकायात्मसंस्थितम् । कलाभेदं प्रवक्ष्यामि तच्छृणुध्वं यथाक्रमम् ॥ १ ॥

[कलासंख्या]

[2]अष्टौ त्रयोदशाष्टौ च चतस्रः पञ्च एव च । पञ्चानामानुपूर्व्येण कला भिन्ना यथाक्रमम् ॥ २ ॥
ताः प्रवक्ष्याम्यशेषेण कलाः शैवागमस्थिताः । [3]सद्यःकलाभिरष्टाभिर्वामदेवे त्रयोदश ॥ ३ ॥
अघोरमपि चाष्टाभिश्चतस्रः पुरुषे तथा । ईशानं पञ्चधा भित्त्वा सकलं विन्यसेच्छिवम् ॥ ४ ॥
आचार्ये च शिवेऽग्नौ च कला होताः प्रयोजयेत् ।

[सद्योजातकलाः]

[4]सद्योजातश्च सद्यश्च भवश्चाभव एव च ॥ ५ ॥
तथानादिभवश्चैव भजस्वेति भवोद्भवौ ।

---

[1] Pour les détails de *pañcabrahmakalā* voir *Rauravāgama, kriyāpāda, paṭala* 2 (p. 22-28) de notre texte; voir aussi *Kiraṇa*, IV, 5, et *Vātulaśuddha, paṭala* 7.

[2] cf. *Raurava, kriyāpāda, paṭala* 2, vers 1*b*-2*a*.

[3] cf. *Kāraṇa*, I, 27:

ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः । अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश ॥
अष्टौ सद्यकलाश्चैव मकुटादिक्रमान्न्यसेत् ॥

cf. *Surprabheda*, IV, 3, 240-241:

सद्यमन्त्रकलाश्चाष्टौ वामाख्यस्य त्रयोदश । अघोरस्य कलाश्चाष्टौ पुरुषस्य चतुष्कलाः ॥
ईशानस्य कलाः पञ्च पञ्चब्रह्मसमुद्भवाः ॥

[4] cf. *Kāraṇa*, I, 27, 8:

सद्योजातश्च सद्यश्च भवश्च भव एव च । तथानादिभवश्चैव भवस्वेति भवोद्भवः ॥

[वामदेवकलाः]

[1]वामो ज्येष्ठश्च रुद्रश्च कालश्चैव कलस्तथा ॥ ६ ॥
विकरणश्च बलश्चैव विकरणोऽथ बलस्तथा । प्रमथो दमनश्चैव मनश्चो[न्मन] एव च ॥ ७ ॥

[अघोरकलाः]

[2]अघोरश्चाथ घोरश्च घोरो घोरतरस्तथा । सर्वतः सर्व रुद्रश्च रूपश्च हृदयं विदुः ॥ ८ ॥

[तत्पुरुषकलाः]

[3]तत्पुरुषो महादेवो रुद्रश्चेति प्रचोदयात । चत्वार्येतानि वक्त्राणि कल्पयेन्नियतः शुचिः ॥ ९ ॥

[ईशानकलाः]

[4]ईशान ईश्वरो ब्रह्मा शिवश्चेति सदाशिवः । मूर्धानं पञ्चधा भित्त्वा शिवस्य परिकल्पयेत् ॥ १० ॥

[सद्योजातकलान्यासः]

[5]सद्यद्वयेन पादौ तु हस्तौ चापि भवाभवौ । नासानादिभवश्चैव भवस्वेति च वै शिरः ॥ ११ ॥
भवोद्भवौ तु बाहू तु ह्युभावेतौ प्रकीर्तितौ । सद्योमूर्तिकला ह्येताः शिवस्य परमात्मनः ॥ १२ ॥

[वामदेवकलान्यासः]

[6]वामदेवं न्यसेद्गुह्ये ज्येष्ठं लिङ्गे प्रकल्पयेत् । तस्योरू रुद्रकालौ तु नित्यमेव विनिर्दिशेत् ॥ १३ ॥
कलविकरणौ देवौ जानुनी तस्य कीर्तितौ । शिवस्य जङ्घे द्वावेतौ बलो विकरणस्तथा ॥ १४ ॥

---

[1] cf. *Kāraṇa*, I, 27, 6*b*-7:
वामो ज्येष्ठश्च रुद्रश्च कालश्चैव कलस्तथा । विकरणो बलश्चैव विकरणो बलस्तथा ॥
बलप्रमथनस्सर्वभूतश्च मन एव च ॥

[2] cf. *Kāraṇa*, I, 27, 5*b*-6*a*;
अघोरश्चाथघोरश्च घोरघोरतरस्तथा । सर्वतस्सर्व शर्वश्च रुद्रश्च घोरकस्य तु ॥

[3] cf. *Kāraṇa*, I, 27, 5*a*:
तत्पुरुषश्च महादेवो रुद्रश्चेति प्रचोदयात् ॥

[4] cf. *Kāraṇa*, I, 27, 4:
ईशानश्चेश्वरो ब्रह्मा शिवश्चेति सदाशिवः ॥

[5] cf. *Raurava*, II, 2, 2*b*-3*a* (p. 22-23) ; voir aussi *Kāraṇa*, I, 27, 18*b*-19*a*:
पादयोरुभयोश्चैव हस्तद्वितलयोरपि । बाह्वोरास्ये शिरसि च सद्योजातकलां न्यसेत् ॥

[6] cf. *Raurava*, II, 2, 3*b*-4*a* (p. 23-4); voir aussi *Kāraṇa*, I, 27, 17*b*-18*a*:
गुह्ये गुदे च मेढ्रे चाप्यूर्वोर्जान्वोश्च जङ्घयोः । स्फिग्द्वयोश्चैव कट्योश्च वामदेवकलां न्यसेत् ॥

बलः प्रमथनश्चैव स्फिचावेतौ प्रकीर्तितौ । दमनश्च कटिः पार्श्वे मनश्चोन्मन एव च ॥ १५ ॥
वामदेवकला ह्येता गुह्याङ्गेषु प्रकीर्तिताः ।

[अघोरकलान्यासः]

[1]अघोरो हृदयमथघोरो ग्रीवा प्रकीर्तिता ॥ १६ ॥
घोरो घोरतरश्चैव तस्यांसौ तु प्रकीर्तितौ । सर्वो नाभिश्च विज्ञेयः सर्वोऽस्य जठरं भवेत् ॥ १७ ॥
रूपाण्युरसि सर्वाणि पृष्ठे रुद्रं विनिर्दिशेत् । अघोरस्य कलान्यासः सकलस्य प्रकीर्तितः ॥ १८ ॥

[तत्पुरुषकलान्यासः]

[2]वक्त्रं तत्पुरुषः पूर्वं महादेवश्च पश्चिमम् । रुद्रो दक्षिणतश्चैव प्रचोदश्च तथोत्तरम् ॥ १९ ॥
चत्वार्येतानि वक्त्राणि कल्पयेन्नियतः शुचिः ।

[ईशानकलान्यासः]

[3]ईशानः पूर्वमूर्धानमीश्वरश्चैव दक्षिणम् ॥ २० ॥
ब्रह्म पश्चिमतश्चैव शिवश्चेति तथोत्तरम् । सदाशिवस्तथोर्ध्वं तु पञ्चधा परिकल्पयेत् ॥ २१ ॥
एष इत्थं क्रियाकाले ध्यायिनां सकलः शिवः । यो वेत्त्येवं शिवं देवं क्रियाकाले महेश्वरम् ॥ २२ ॥
शिवध्यानसमायुक्तः स गच्छति सदाशिवम् ।

इति [श्री]रौरवसूत्रसंग्रहे [पञ्चब्रह्मकलाविधिर्नाम] षष्ठः पटलः

---

[1] cf. *Raurava*, II, 2, 4*b*-5*a* (p. 24); voir aussi *Kāraṇa*, I, 27, 16*b*-17*a*:
हृदये कण्ठदेशे चाप्यंसयोरुदरेऽपि च । नाभौ पृष्ठेऽसोश्चैव घोरस्यैव कलां न्यसेत् ॥

[2] cf. *Raurava*, II, 2, 5*b*-6 (p. 24-25); voir aussi *Kāraṇa*, I, 27, 15*b*-16*a*:
पूर्वे च पश्चिमे याम्ये सौम्ये चैव क्रमेण तु । चतुष्टयेषु वक्त्रेषु पुरुषस्य कलां न्यसेत् ॥

[3] cf. *Raurava*, II, 2, 7*a*; voir aussi *Kāraṇa*, I, 27, 15*a*:
ईशानस्य कलाः पञ्च न्यसेदीशानमूर्धसु ॥

[सप्तमः पटलः]

[धारणाविधिः][1]

अथातः संप्रवक्ष्यामि ध्यानमार्गविधिक्रमम् । सकलो निष्कलश्चैव द्विविधस्तु शिवः स्मृतः ॥ १ ॥
सद्यो वामश्च घोरश्च पुरुषेशान एव च । कला ह्येताः समाख्याता निधनेशस्य सूरिभिः ॥ २ ॥
निष्कलस्तु परो देवो व्योमव्यापी महेश्वरः । प्रधानपुरुषेशानः परात्परतरः स्थितः ॥ ३ ॥
सर्वज्ञः सर्वकर्ता च सर्वगः सर्वतोमुखः । सर्वभूतात्मभूतस्थः शिवो ध्येयोऽथ शाश्वतः ॥ ४ ॥
[2]प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा । तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ ५ ॥

[आग्नेयी]

[3]प्रथमा धारणाग्नेयी नाभिमध्ये तु धारयेत् । तस्यां वै धार्यमाणायां पापं निर्दहति क्षणात् ॥ ६ ॥

[सौम्या]

[4]हृदये धारयेद्विद्वान् सौम्यां सोमसुतां कलाम् । तस्यां वै धार्यमाणायां सर्वत्राप्यायनं भवेत् ॥ ७ ॥

---

[1] Pour *dhāraṇāvidhi* voir *Kiraṇa*, *yogapāda*, *paṭala* 1 et *Svāyambhuva*, *yogapāda*, *paṭala* 36.

[2] cf. *Mataṅga*, *yogapāda*, p. 208, *Kiraṇa*, IV, 1, 3, et *Niśśvāsakārikā*, ms. p. 259.

[3] cf. *Kiraṇa*, IV, 1, 18-21:

संसिद्धयोगिनो मुख्यं धारणानां चतुष्टयम् । वह्निसौम्यामृता बाह्या पराख्या धारणास्तु ताः ॥
मूलं रेफपुटान्तस्थं पञ्चमस्थं च बिन्दुगम् । चलार्णसंयुता दीप्ता धारणा पावका मता ॥
सर्वोद्धारेऽरिरिंसादिपापः प्रागेव संक्षयेत् । त्रिकोणमण्डलस्थोऽयं कूटो वह्निस्स्वयं भवेत् ॥
वायुवेष्टितसर्वाङ्गो बीजदाहादिकृत्परः ॥

[4] cf. *Svāyambhuva*, 36, 3:

हृदये धारयेत्सौम्यां सदा सोमसमाश्रये । आप्याययति सर्वाणि यया योगपदस्थितः ॥

cf. *Kiraṇa*, IV, 22-23*a*:

पूर्वोक्तवारिसंयुक्तस्सौम्ये बिन्दुयुतस्स्वयम् । तोयमण्डलमध्यस्थः परितस्तेन वेष्टितः ॥
शान्तिपुष्टिकरी चेयमुपसर्गविसर्जनी ॥

[ऐशानी]

[1]ऐशानीं धारयेन्मूर्ध्नि सर्वसिद्धिकरीं नृणाम्। यया प्रयान्ति वै क्षिप्रं शिवस्य परमं पदम् ॥ ८ ॥

[अमृता]

[2]अमृता धारणा या तु व्यापिनी तु शिवंकरी। आप्याययति सर्वत्र सर्वं ज्ञानामृतेन च ॥ ९ ॥
ओंकारपूर्विका ह्येता नाभीहृदयसंस्थिताः। मूर्धन्या च तथा चान्या चामृता सर्वगा शुभा १० ॥

[धारणामन्त्राः]

ओं ज्वलद्दीप्तसहस्रे ज्वालामालिनि वस स्वैरं दीप्य दीप्य पशुपतिः। आग्नेयीधारणामन्त्रः ॥

ओं श्रीं ओं नमः शिवाय प्लावय अमृतायामृतयोनये। सत्ये सत्ये शान्तब्रह्मण्ये वरिष्ठयोगं धर धर प्लावयामृतेन। सौम्यां हृदि धारयेत् ॥

ओं ओं श्रीयोगरूपायानाश्रिताय सर्वप्रभवे ज्योतीरूपाय नमः ठ ठ। ऐशानीं शिरसि धारयेत् ॥

ओं नमः शिवाय अमृताय पशुतत्त्वानुग्रहकरायामृतायामृतरूपिणे अमृतीकुरु स्वाहा। अमृता सर्वव्यापिनी ॥

इति रौरवसूत्रसंग्रहे [धारणापटलः सप्तमः]

---

[1] cf. *Svāyambhuva*, 36, 4-5:

धारयेन्मूर्ध्नि चैशानीं सर्वेशानीं विचक्षणः। यया तु योगिनः सर्वे प्रयान्ति परमं पदम् ॥

cf. *Kiraṇa*, IV, I, 25-26:

अकारबिन्दुसंयुक्तो नादशक्तिसमन्वितः। बिन्दुरक्षितसर्वाङ्गो ललाटस्थानसंश्रितः ॥
तदा तपःस्थितो योगी भवेन्मृत्युबहिष्कृतः ॥

[2] cf. *Svāyambhuva*, 36, 5:

अमृता धारणा या तु सा सर्वत्र व्यवस्थिता ॥

cf. *Kiraṇa*, IV, 1, 23*b*-24:

स एवामृतसंयुक्तः प्रणवेनोर्ध्वयोजितः। बिन्दुगो बीजदाहादित्रिस्वरेण निवेष्टितः ॥
अमृतेयं सदा मूर्ध्नि व्यापिनी जीवकाङ्क्षया ॥

[अष्टमः पटलः]

दीक्षावर्गः [1]

[2][वचः श्रुत्वा] ततस्तस्य रुरोस्तु सुमहात्मनः । ऊचुः प्राञ्जलयो भूत्वा रुरुं मुनिवरोत्तमम् ॥ १ ॥
भगवन् सर्वधर्मज्ञ दीक्षया मुच्यते कथम् । कथं च शिवतां यान्ति छिन्नमायानिबन्धनाः ॥ २ ॥

रुरुरुवाच —

यथा सूर्योदयं प्राप्य तमः क्षिप्रं विनश्यति । एवं दीक्षां समासाद्य धर्माधर्मैर्विमुच्यते ॥ ३ ॥
यथा सूर्य इमाँल्लोकान् प्रकाशयति रश्मिभिः । तथा मन्त्राध्वरे देवः शक्तिभिस्तु प्रकाशते ॥ ४ ॥
विस्फुलिङ्गा यथा क्षुद्रा ह्युच्चरन्ति हुताशनात् । एवं शिवस्य देवस्य शक्तयः समुदाहृताः ॥ ५ ॥
व्याप्नुवन्ति शरीराणि साधकानां प्रयोजिताः । यथादित्यस्तु भूमिष्ठं रश्मिभिर्हरते मलम् ॥ ६ ॥
एवं शक्तिसमायोगाद्दीक्षितान्हरते विभुः । जलं जले यथा क्षिप्तं क्षीरे क्षीरमिवार्पितम् ॥ ७ ॥
तथैव ह्येकतां याति दीक्षामन्त्रेण मन्त्रवित् । यथा प्रदीप्ते ज्वलने तूलराशिः समर्पितः ॥ ८ ॥
दग्धो निर्याति सर्वत्र न भूयस्तूलतां व्रजेत् । एवं वै मण्डलं प्राप्य दीक्षामन्त्रसमुद्भवः ॥ ९ ॥
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः । भिन्ने देहे शिवो भूत्वा शिवधर्मैः समन्वितः ॥ १० ॥
शिवधर्ममनुप्राप्य ह्यविभागाय कल्पते । यथा समुद्रमासाद्य नदी मिष्टाम्बुवाहिनी ॥ ११ ॥
क्षारतोयत्वमायाति प्रभावाद्धि महोदधेः । एवं वै भिन्नदेहस्तु शिवतत्त्वमुपागतः ॥ १२ ॥
सकृत्समुद्रसंयोगाद्विभागो नैव कल्पते ॥ १३ ॥

इति रौरवसूत्रसंग्रहे दीक्षावर्गपटलो [ऽष्टमः][3]

---

[1] Pour les détails du *dīkṣāprasasti* voir *Cintya, paṭala* 31 et 32, *Yogaja*, ms. p. 365, *Suprabheda*, II, 4, *Matanga, paṭala* 35, et *Niśśvāsakārikā, paṭala* 20, 31, 32 et 42.

[2] Ce qui est entre crochets, manquant dans le manuscrit, a été reconstitué.

[3] दश: pour अष्टम:—ms.

[नवमः पटलः]

[आत्मसंक्रान्तिः][1]

अथ विद्यास्त्रविद्धीरः शिवाग्निगुरुपूजकः । निमित्तमशुभं दृष्ट्वा गजवाजिरथादिषु ॥ १ ॥
अस्त्राणामप्रसादं वा भृशं वा शस्त्रवीक्षितः । दीर्घानारोग्यसंतप्तो [2]गृहीतो वाथ भूभृता ॥ २ ॥
तथा पञ्चात्मकं देहं विद्यामन्त्रात्मसंस्कृतम् । महाभूतानि ज्ञानाग्नौ जुहुयादस्त्रसंभवे ॥ ३ ॥
महीतले शुचिर्भूत्वा मन्त्रयुक्तेन चेतसा । शरदर्भान्परिस्तीर्य रुद्रं ध्यात्वास्त्रविग्रहम् ॥ ४ ॥
जगत्संहारकर्तारं ब्रह्मास्त्रमपराजितम् । ध्यानी विज्ञानयोगेन [3]चास्त्रं ध्यात्वा विचक्षणः ॥ ५ ॥
आसनं रुचिरं बध्वा स्वस्तिकं पद्ममेव वा । ऊर्ध्वकाय ऋजुग्रीवो बध्वाधः करकच्छपम् ॥ ६ ॥
दन्तान्न पीडयेद्दन्तैर्नेत्रे [4]चार्धनिमीलिते । विषयोरगसंरुद्धां विगृह्येन्द्रियवाहिनीम् ॥ ७ ॥
निरुद्धप्राणसंचारो नाभेरूर्ध्वं वितस्तितः । बालसूर्यप्रतीकाशं हृदयं संप्रकाशते ॥ ८ ॥
मण्डलं तत्र सूर्यस्य तन्मध्ये सोममण्डलम् । सोममण्डलमध्ये तु विमलं वह्निमण्डलम् ॥ ९ ॥
वह्निमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम् । व . . . . . कं विद्याद्रक्षार्थं तु महेश्वरम् ॥ १० ॥
तस्मिन्साधकचैतन्यं विद्यास्त्रपदगोचरम् । तनोत्यस्त्रमय वह्निदग्धां वेगेन हृद्गुहाम् ॥ ११ ॥
अस्त्रं शिरः कपालं च भित्त्वा सूर्यं प्रपद्यते । निश्चलं मूर्ध्नि [5]देवस्य ज्योतिः परममन्त्रवित् ॥ १२ ॥
अस्त्रमायासमाकृष्टो रौद्रीशक्त्येकवीरयोः । मूर्ध्नि सन्धानयेद्योगधारणाभिश्च निष्क्रमेत् ॥ १३ ॥
निष्क्रम्य पादयोराभिः पुनर्मूर्धानमाश्रयेत् । [6]मूर्धनि तु ततो लोकालोकं बध्वा प्रभिद्य च ॥ १४ ॥
प्रकृतिं पुरुषं चैव सूक्ष्मतेजोमयो महान् । सर्वभूतात्मको भूत्वा विशेत्सूक्ष्मं महेश्वरम् ॥ १५ ॥
देहस्य [7]देहि दर्भास्त्रं वस्त्रेणाप्यथवासनम् । संहारायेति भूतानि हिरण्येति शिरः स्पृशेत् ॥ १६ ॥
विद्याधिपेन होमे च ध्यायीत विधिरात्मकः । एवमस्त्रसमायोगान्मुच्यते नात्र संशयः ॥ १७ ॥

इति रौरवसूत्रसंग्रहे आत्मसंक्रान्तिपटलो नवमः[8]

---

[1] Voir *Niśśvāsakārikā, paṭala* 33 pour les détails du *ātmasaṅkrānti*.
[2] गृहीत्वा—ms.
[3] अस्त्रं pour चास्त्रं—ms.
[4] चार्धं निमीलिते—ms.
[5] देहस्य—ms.
[6] मूर्धाने—ms.
[7] देवदत्तास्त्रं ?—ms.
[8] समाप्तः pour नवमः—ms.

[दशमः पटलः]

[मन्त्रार्थवर्णनम्][1]

अथ संख्या शिवस्योक्ता चाक्षराणां शतत्रयम्। अष्टषष्ट्यधिकं शम्भोर्गुह्यमन्त्रं विनिर्गतम् ॥ १ ॥
मन्त्रार्थश्च पुरा प्रोक्तो विद्येशानेन शम्भवे। स एव बहुधा व्यस्तः समासादुच्यते मया ॥ २ ॥
पदविग्रहधात्वर्थहेतुसाधनवर्जितः। व्यपेतपक्षदृष्टान्तः सिद्धवाक्यावभासितः ॥ ३ ॥
स्वभावपुरुषाव्यक्तकर्मजालात्मवादिभिः। यो न दृष्टो महामोहतिमिराक्रान्तदृष्टिभिः ॥ ४ ॥
तस्य देवादिदेवस्य वक्त्रामलविनिर्गतम्। प्रवक्ष्ये शिवसद्भावपरसत्ताप्रकाशकम् ॥ ५ ॥

---

[1] Ce *paṭala* donne l'explication des noms de Śiva contenus dans le *Vyomavyāpi-padamantra* que voici:

ओं हां ओं नमः। ओं हां व्योमव्यापिने नमः। ओं हां व्योमरूपाय नमः। ओं हां सर्वव्यापिने नमः। ओं हां शिवाय नमः। ओं हां अनन्ताय नमः। ओं हां अनाथाय नमः। ओं हां अनाश्रिताय नमः। ओं हां ध्रुवाय नमः। ओं हां शाश्वताय नमः। ओं हां योगपीठसंस्थिताय नमः। ओं हां नित्यं योगिने नमः। ओं हां ध्यानाहाराय नमः। ओं हां नमद्दिशवाय नमः। ओं हां सर्वप्रभवे नमः। ओं हां शिवाय नमः। ओं हां ईशानमूर्धाय नमः। ओं हां तत्पुरुष-वक्त्राय नमः। ओं हां अघोरहृदयाय नमः। ओं हां वामदेवगुह्याय नमः। ओं हां सद्योजातमूर्तये नमः। ओं हां ओं नमो नमः। ओं हां गुह्यातिगुह्याय नमः। ओ हां गोप्त्रे नमः। ओं हां अनिधनाय नमः। ओं हां सर्वयोगाधिकृताय नमः। ओं हां सर्वविद्याधिपाय नमः। ओं हां ज्योतीरूपाय नमः। ओं हां परमेश्वरपराय नमः। ओं हां अचेतनाचेतन नमः। ओं हां व्योमिन् व्योमिन् नमः। ओं हां व्यापिन् व्यापिन् नमः। ओं हां अरूपिन् अरूपिन् नमः। ओं हां प्रथम प्रथम नमः। ओं हां तेजस्तेजः नमः। ओं हां ज्योतिर्ज्योतिः नमः। ओं हां अरूप नमः। ओं हां अनग्नि नमः। ओं हां अधूम नमः। ओं हां अभस्म नमः। ओं हां अनादे नमः। ओं हां नाना नाना नमः। ओं हां धूधू धूधू नमः। ओं हां ओं भूः नमः। ओं हां ओं भुवः नमः। ओं हां ओं सुवः नमः। ओं हां अनिधन नमः। ओं हां निधन नमः। ओं हां निधनोद्भव नमः। ओं हां शिव नमः। ओं हां सर्व नमः। ओं हां परमात्मन् नमः। ओं हां महेश्वर नमः। ओं हां महादेव नमः। ओं हां सद्भावेश्वर नमः। ओं हां महातेज नमः। ओं हां योगाधिपते नमः। ओं हां मुञ्च मुञ्च नमः। ओं हां प्रथम प्रथम नमः। ओं हां शर्व शर्व नमः। ओं हां भव भव नमः। ओं हां भवोद्भव नमः। ओं हां सर्वभूतसुखप्रद नमः। ओं हां सर्वसान्निध्यकर नमः। ओं हां ब्रह्मविष्णुरुद्रपर नमः। ओं हां अनर्चितानर्चित नमः। ओं हां असंस्तुतासंस्तुत नमः। ओं हां पूर्वस्थित पूर्वस्थित नमः। ओं हां साक्षिन् साक्षिन् नमः। ओं हां तुरु तुरु नमः। ओं हां पतङ्ग पतङ्ग नमः। ओं हां पिङ्ग पिङ्ग नमः। ओं हां ज्ञान ज्ञान नमः। ओं हां शब्द शब्द नमः। ओं हां सूक्ष्म सूक्ष्म नमः। ओं हां शिव नमः। ओं हां शर्व नमः। ओं हां सर्वद नमः। ओं हां नमो नमः। ओं हां ओं शिवाय नमो नमः। ओं हां ओं नमः। (*Śivāgamaśekhara*, vol. II, p. 308-312)

ओमित्येकाक्षरं ब्रह्म मन्त्रतन्त्रादिलक्षणम्। महदादिविशेषान्तव्यापकं पदमव्ययम् ॥ ६ ॥
ओतं प्रोतं जगत्तेन मात्राभिः सर्वतो भृशम्। त्रिभिः पादैस्तु विभुना सदेवासुरमानुषम् ॥ ७ ॥
देवयज्ञतपोध्यानदानाध्ययनकर्मसु। ओंकाराद्यन्तसंबद्धो मन्त्रविद्भिः प्रकीर्तितः ॥ ८ ॥
तस्मादिहापि प्रणवमग्रे मन्त्रपदं विभोः।

[ओम्]।

न्यस्य पश्चात्कलानीकवर्जितं व्योम उच्यते ॥ ९ ॥
व्योमेत्याकाशसंज्ञेयं निमित्तात्परिभाष्यते। व्यापकत्वादमेयत्वाद्व्योम इत्यभिधीयते ॥ १० ॥
तद्वाचयति यस्मात्स भगवान्परमेश्वरः। शक्तिरश्मिसमूहेन तस्माद्व्योमापी सदाशिवः ॥ ११ ॥

[व्योमव्यापिने]।

तदेव रूपं भगवान् बिभर्ति प्रभुरव्ययः। तेन धर्मेण युक्तत्वाद्व्योमरूपेति चोच्यते ॥ १२ ॥
तस्मै शिवाय महते सर्वगाय महात्मने। व्यापिने व्योमरूपाय पराय प्रभवे नमः ॥ १३ ॥

व्योमरूपाय।

सर्वं निरवशेषं यद्व्योम उक्तं परापरम्। ततो यस्माद्भगवता सर्वव्यापी ततो भवः ॥ १४ ॥

सर्वव्यापिने।

शान्तत्वात्सर्वकर्तृत्वभावोपरतिकारणात्। शिव उक्तो महातन्त्रमन्त्रविद्भिः सदाशिवः ॥ १५ ॥
तस्मै शिवाय गुरवे वीतरागकलाय वै।

शिवाय।

अमेयत्वादनन्तोऽयमजत्वाच्च प्रकीर्तितः ॥ १६ ॥

अनन्ताय।

अनादिशिवसद्भावयुक्तत्वात्परमेश्वरः। सर्वेषां स्वामिभावाच्च अनाथ इति शस्यते ॥ १७ ॥

अनाथाय।

अनाश्रितस्वाश्रितत्वादन्याश्रयविवर्जितः। आश्रयो न समत्वाच्च अनाश्रित इति स्मृतः ॥ १८ ॥

अनाश्रिताय।

वैनाशिकत्वात्सर्वेषां भुवनानां सदाशिवे। ध्रुवेति संज्ञितं नाम सदाशिवत्वलक्षणम् ॥ १९ ॥

ध्रुवाय।

प्रशास्ति कारणत्वेन शास्यो यस्मान्न कस्यचित्। अतीतः शाश्वतत्वाच्च शाश्वतो भगवाञ्छिवः ॥ २० ॥

शाश्वताय।

योगोऽस्य शिवसद्भावः सदाशिवमनामयम्। तस्मिन् व्यवस्थितो यस्माद्योगपीठः स उच्यते ॥ २१ ॥
अनादिशिवसद्भावयोगयुक्तः सदाशिवः। मन्त्रयोगमये पीठे तत्रस्थस्तेन चोच्यते ॥ २२ ॥

योगपीठसंस्थिताय।

अभ्युत्थितेन योगेन शाश्वतेनानुरञ्जितः। नित्यं योगीति तेनोक्तः शिवस्तत्त्वार्थकोविदैः ॥ २३ ॥

नित्यं योगिने।

ध्यानं चिन्ता भावनार्थं कल्पना मनसः क्रिया। मनसः परिपूर्णत्वात्परितृप्तो भवोद्भवः ॥ २४ ॥

स्वस्थत्वात्सुप्रशान्तत्वात्परिनिर्वाणमुत्तमम् । ध्यानाहारं भगवति [भवती]त्युपलक्षणा ॥ २५ ॥
[ध्यानाहाराय][1]

प्रणवपूर्वमुद्दिश्य संशयच्छेदकारणम् । ओं नमः शिवाय शान्ताय सर्वस्य प्रभवे तथा ॥ २६ ॥
[ओं नमः शिवाय, सर्वप्रभवे]

इति संभाव्य देवेशगणः पूर्वमुदाहृतः ।
[शिवाय] ।

तनुं पञ्चमहामन्त्रलक्षणां संप्रचक्षते ॥ २७ ॥
ईष्ट अग्रे स भगवानीशानः प्रभुरव्ययः । जगत्कृत्स्नं महामन्त्रशक्तियोगमरीचिभिः ॥ २८ ॥
ईशानमूर्धा तेनायमुक्तो मन्त्रे सकारणम् ।
[ईशानमूर्धाय][2]

महामायोत्थजालेन व्यपेततनुरीश्वरः ॥ २९ ॥
परमं वदति ज्ञानं यत्तत्पूरकमुत्तमम् । सर्वज्ञं शिवसद्भावप्रकाशकरणं परम् ॥ ३० ॥
तेन मन्त्रेण मन्त्रेशो भगवान्परमेश्वरः । प्रयुक्तं पूरयेत्कृत्स्नं तेन तत्पुरुषः स्मृतः ॥ ३१ ॥
[तत्पुरुषवक्त्राय]

अघोररणशीलत्वादघोरः प्रोच्यते बुधैः । अघोरं शान्तमित्युक्तं सद्भावो हृदयं प्रभोः ॥ ३२ ॥
तेन चार्द्रेण युक्तत्वादघोरहृदयः शिवः ।
अघोरहृदयाय ।

वामोऽथ विपरीतत्वात्संसारोद्गिरणादपि ॥ ३३ ॥
सर्वभावेषु गूढत्वाद्गुह्यमित्यभिधीयते । देवो दिवि स्थितत्वाद्दीव्यति यस्माच्च तेन वा देवः ॥ ३४ ॥
परमतिगुह्यो गुह्यो मन्त्रेणैतेन गुह्योऽयम् ।
वामदेवगुह्याय ।

---

[1] Le bord du folio 11 du manuscrit N° 258 étant brisé, la dernière ligne du recto et la première ligne du verso manquent et l'explication de noms: नमः शिवाय, सर्वप्रभवे, शिवाय, ईशानमूर्धाय, तत्पुरुषवक्त्राय et अघोरहृदयाय est incomplète. Le texte complet a ultérieurement été trouvé dans un manuscrit N° B 776 p. 26-47 (manuscrit sur papier, en caractères Canarais) qu'a fait apparaître une nouvelle investigation du fond de la même bibliothèque (Oriental Research Institute, Mysore). Nous donnons ici le texte fourni par ce deuxième manuscrit. [Nous avons trouvé le manuscrit N° B 776 alors que l'impression de notre ouvrage avait dépassé la page 176, et nous regrettons de n'avoir pu le signaler à propos du texte imprimé sur les pages 173 à 176. Nous avons été obligé de reporter à la rubrique *addenda and errata* les lectures données par ce manuscrit].

[2] cf. *Mṛgendra, Vidyāpāda*, p. 136-139 (édition de Devakoṭai) et *Matańgapārameśvara, Vidyāpāda*, p. 12-14 pour l'explication des noms ईशानमूर्धा, तत्पुरुषवक्त्र, अघोरहृदय, वामदेवगुह्य et सद्योजातमूर्ति.

सद्यः प्रसाददानात् क्षिप्रतम आशुरिति च पर्यायाः ॥ ३५ ॥
गहनेन जायतेऽस्मिन् प्रधानपुरुषेश्वरान्तिके घोरे । यस्मात्तस्माद्भगवानजात इति चोच्यते देवः ॥ ३६ ॥
सद्योजातेन मन्त्रेण युक्तत्वात्परमेश्वरः । शिवमूर्तिविधानज्ञैः सा मूर्तिरि[ति] पठ्यते ॥ ३७ ॥

सद्योजातमूर्तये ।

एतैर्मन्त्रैर्महागुह्यैर्मूर्तिं भगवतोऽव्ययाम् । निर्गूढां सर्वतत्त्वेषु ध्यायेन्नित्यं समाहितः ॥ ३८ ॥

ओं[नमो]नमः ।

दुर्ज्ञेयत्वात्पदार्थानां तत्त्वानां गहनस्य च । स्थित्युत्पत्तिविनाशानां गुह्याद्गुह्येति वर्णितः ॥ ३९ ॥
गुह्यातिशययुक्तत्वादतिगुह्यो महेश्वरः ।

गुह्यातिगुह्याय ।

प्रकृतेर्गोपनाद्गोप्ता संसारस्य सदाशिवः ॥ ४० ॥

गोप्त्रे ।

निधनं नाशो जगतस्तस्य कर्ता महेश्वरः । तेनोक्तं निधनेत्येवं जगतः परमेश्वरः ॥ ४१ ॥

निधनाय[1] ।

सर्वासामेव विद्यानां विद्याराजां तथैव च । विधाता परमेशानो यस्मात्तस्माच्छिवोऽधिपः ॥ ४२ ॥

सर्वविद्याधिपाय[2] ।

ज्योतिः प्रकाशरूपाणां दर्शनाकृतिलक्षणम् । अशेषोद्भासकरणाज्ज्योतीरूपः शिवोऽव्ययः ॥ ४३ ॥

ज्योतीरूपाय ।

परमेश्वररुद्राणां स्थितिसंहारकर्मिणाम् । कारणेच्छाप्रवृत्तत्वात्परस्तस्मान्महेश्वरः ॥ ४४ ॥
तस्मै देवादिदेवाय पराय परमाय च । याथातथ्यगुणौघेन युक्ताय परमात्मने ॥ ४५ ॥

परमेश्वरपराय ।

चेतना सर्वभूतानां सुखदुःखादिलक्षणा । सा चेन्न विद्यते यस्मात्तेन देवो ह्यचेतनः ॥ ४६ ॥
चेतनानामसंपर्कादचेतन इतीरितः । अचेतनो ह्यचिन्त्यत्वात्सूक्ष्मत्वाच्चाप्यचेतनः ॥ ४७ ॥
चेतनानामगम्यत्वादचेतन इति स्मृतः ।

अचेतन अचेतन ।

द्विरभ्यासपदं चास्य संशयच्छेदकारणम् ॥ ४८ ॥

व्योमादिष्वपि बोद्धव्यं द्विरभ्यासपदेषु वै ।
परिभाषेयम् ।

---

[1] mais अनिधनाय selon l'usage actuel, et la version imprimée donnée dans notre première note au début de ce *paṭala*.

[2] Le ms. omet l'explication de nom सर्वयोगाधिकृत.

व्योमेति पूर्वमेवोक्तं गगनाख्या समासतः ॥ ४९ ॥
तेन धर्मेण युक्तत्वाद्भगवान् व्योम उच्यते । परं व्योमापरं चैव तन्त्रेऽस्मिन्समुदाहृतम् ॥ ५० ॥
मायातीतं परं व्योम साञ्जनं त्वपरं स्मृतम् । निरञ्जने परे व्योम्नि नित्यस्थः कारणोऽव्ययः ॥ ५१ ॥
साञ्जनं शक्तिकिरणैरधितिष्ठति शंकरः । व्योमव्योमेति तेनोक्तः कारणेन सदाशिवः ॥ ५२ ॥
व्योम व्योम[1] ।

व्यापकत्वाच्च सर्वस्य व्यापी संपरिकीर्तितः ।
व्यापि व्यापि[2] ।

रूपिणां परमेशानां ब्रह्मादीनां सदाशिवः ॥ ५३ ॥
अरूपि अरूपि[3] ।

ज्ञानगम्यो महामन्त्रयोगयोगी महेश्वरः । स्रष्टत्वात्सर्वभूतानां सर्वज्ञत्वाच्च कारणात् ॥ ५४ ॥
अनादिसत्त्वाद्भगवान् प्रथमस्तु निगद्यते ।
प्रथम प्रथम ।

प्रकाशकारणत्वाच्च तेजस्तेज इति स्मृतः ॥ ५५ ॥
तेजस्तेजः ।

सर्वेषां ज्योतिषामादिनिधिश्च भगवाञ्छिवः ।
ज्योतिर्ज्योतिः ।

यदिन्धनाग्निसंयोगात्सोमार्कमणिजं च यत् ॥ ५६ ॥
अरूप, अनग्नि ।

तेजस्तस्मात्सुसंपूर्णं कारणं ज्योतिरुत्तमम् । तद्धूमभस्मरहितं तेजसामनुरञ्जकम् ॥ ५७ ॥
अधूम, अभस्म ।

शैवं परमनिर्वाणमाद्यन्तं ज्योतिषां निधिः । अनादि निधनाभावान्नित्यत्वात्तेजसां निधिः ॥ ५८ ॥
अनादिरिति विज्ञेयं नाम देवस्य शाश्वतम् ।
अनादे ।

नानानेति च यत्प्रोक्तं गुह्यमन्त्रपदं विभोः ॥ ५९ ॥
परमेश्वर क्षेत्रज्ञ पितामह इति त्रिकम् । ना इति पुरुषस्याख्या प्रथिता परमेश्वरस्य पुरुषस्य ॥ ६० ॥
पूरयति पोषयति च यस्मात्तस्माच्छिवः पुरुषः । नानानासंहारः प्रोक्तः पुरुषत्रयकारणस्य देवस्य ॥ ६१ ॥
नानानाना ।

---

[1] mais व्योमिन् व्योमिन् selon l'usage actuel.

[2] mais व्यापिन् व्यापिन् selon l'usage actuel.

[3] mais अरूपिन् अरूपिन् selon l'usage actuel.

गुह्ये मन्त्रपदेऽस्मिन् संहारकरपदं प्रोक्तम् ।
धूधू धूधू ।

ओं भूः सत्यवाचित्वान्नित्यपदार्थस्य वाचकः शब्दः । शिवमन्त्रपदार्थानां संशयनिवृत्तिहेत्वर्थः ॥ ६२ ॥
ओं भूः ।

ओं भुव इति च प्रोक्तं भुवनानि यथाक्रमम् । शुद्धाशुद्धान्यशेषाणि निधनेशवशानि तु ॥ ६३ ॥
ओं भुवः ।

ओं सुवः प्रभोः पदमिदमपरं यत्प्रकीर्तितम् । तद्ध्येयं योगिभिर्नित्यं शिवतत्त्वार्थकोविदैः ॥ ६४ ॥
ओ सुवः ।

अनिधन इति यत्प्रोक्तं नित्यं वदन्ति देवस्य । न विनश्यतीति भगवाननिधन इति विशेषतः कथितः ॥
अनिधन[1] ।

संहरति देवदेवः सृजति यस्माच्च सर्वभूतानि । शिवतत्त्वविधानज्ञै रुद्रो निधनोद्भवो रुद्रः ॥ ६६ ॥
निधनोद्भव ।

शिव सर्वेति यदुक्तं त्वशिवाभावाच्छिवस्य देवस्य ।
[शिव, सर्व] ।

परमात्मनि स्थितत्वात्सर्वेषां तेन परमात्मा ॥ ६७ ॥
[परमात्मन्] ।

महतां परमेशानां सर्वेषां प्रलयसर्गकर्तृणाम् । पूज्येश्वरस्वभावत्वात्तेनेह महेश्वरः शम्भुः ॥ ६८ ॥
[महेश्वर] ।

महान्भवति सर्वेषां पूज्यत्वाद्योगिनां शिवः । देवो दिवि स्थितत्वाच्च महादेवस्ततो भवः ॥ ६९ ॥
[महादेव] ।

सर्वेश्वरप्रसङ्गादनीश्वरेऽपीश्वराभिधानाच्च । सद्भावेश्वरशब्दः सदाशिवे सूरिभिः प्रोक्तः ॥ ७० ॥
[सद्भावेश्वर] ।

महतामपि सर्वेषां परमशिवस्तेजसां महातेजः ।
[महातेजः] ।

योगी च योगिनामपि योगाधिपतिर्भवस्तस्मात् ॥ ७१ ॥
[योगाधिपते] ।

मुञ्चति गहननिबन्धान्मायाविषयित्वयोक्तृबन्धेन । मायाभिज्ञो भगवान् दीक्षानिपुणेन हस्तेन ॥ ७२ ॥

---

[1] L'explication du nom निधन manque; voir vers 39*a*.

मुञ्चति तेन[हि] गुह्यं मन्त्रपदं मुदा विप्रः ।
[मुञ्च मुञ्च] ।
प्रथयति पाशान्बहुशः प्रथमेत्यभिधीयते तेन ॥ ७३ ॥
[प्रथम प्रथम] ।

शरणार्थिनामणूनां त्राता महतो भयाद्यतः शर्वः । शरणाद्वरणाच्च देवः शर्व इति विभाव्यते तज्ज्ञैः ॥७४॥
[शर्व शर्व][1] ।

भावेन भवतीति च भावयितव्यो भवोद्भवः प्रकृतिकर्ता । आमन्त्रणादियुक्तैर्गुह्यपदैः स्तूयते शम्भुः ॥७५॥
[भवोद्भव] ।

सर्वेषां भूतानां संसारवियोजकं परं सूक्ष्मम् । सुखमात्यन्तिकमकृतकमनुपममुपयच्छते देवः ॥ ७६ ॥
[सर्वभूतसुखप्रद] ।

सान्निध्यं मन्त्रोऽयं स्मृतमात्रः साधकस्य शिवलिङ्गे । कुरुते यस्मात्तस्मात्सान्निध्यकरः शिवः प्रोक्तः ॥ ७७ ॥
[सर्वसान्निध्यकर] ।

ब्रह्मा विष्णुश्च रुद्रस्त्रयोऽपि सर्वस्य कारणं जगतः । तेभ्यः परः परज्ञैः परमशिवः प्रोच्यते कर्ता ॥ ७८ ॥
[ब्रह्मविष्णुरुद्रपर] ।

सूक्ष्माणां सूक्ष्मत्वाद्विकरणधर्मेषु विकरणो भगवान् । गुह्येष्वपि गुह्यत्वादचिन्त्यभावो ह्यचिन्त्यत्वात् ॥
ज्ञानानां सर्वेषां प्रगमत्वादनर्चितो देवः । तस्मादनर्चित इति भगवानुक्तश्च तन्त्रेऽस्मिन् ॥ ८० ॥
[अनर्चित अनर्चित] ।

न स्तूयते स्तुतो वा ब्रह्मादिभिरप्यदृष्टपूर्वत्वात् । तस्मादसंस्तुत इति भगवानुक्तश्च तन्त्रेऽस्मिन ॥ ८१ ॥
[असंस्तुत असंस्तुत] ।

संस्थाप्यते स्वतो वा नित्यस्थत्वाच्छिवः परे व्योम्नि । पूर्वस्थितोऽप्यभिहितः परमेशो मन्त्रतन्त्रज्ञैः ॥ ८२ ॥
[पूर्वस्थित पूर्वस्थित] ।

साक्षात्सर्वपशूनां धर्माधर्मादिकं कृतं कर्म । साक्षी च सर्वतोऽक्षः पश्यति भगवानतः साक्षी ॥ ८३ ॥
[साक्षिन् साक्षिन] ।

त्वरितं शिवसायुज्यं प्रयच्छते साधकस्य देवेशः । तुरु तुर्विति तन्त्रार्थोऽयं क्षिप्रत्वाच्चैव दीक्षायाः ॥८४॥
[तुरु तुरु] ।

तेजोमूर्त्यभिधानं पतङ्ग इति मन्त्रलक्षणं प्रोक्तम् ।
[पतङ्ग पतङ्ग] ।
पिङ्ग पिङ्गेति तेजस्थं प्रवदन्ति मन्त्रतन्त्रज्ञाः ॥ ८५ ॥
[पिङ्ग पिङ्ग] ।

---

[1] L'explication du nom भव भव manque dans le ms.

ज्ञानं शिवपदबोधः सम्यक् चेदं परापरं रूपम्। यच्चान्यस्मिन्तन्त्रे न विद्यते सर्वदर्शित्वात्॥ ८६॥
[ज्ञान ज्ञान]।

यावान्वर्णविवेकः संयोगविभागलक्षणः सूक्ष्मः। श्रोत्रेन्द्रियार्थपरमः शब्दोऽसौ कारणेशानः॥ ८७॥
[शब्द शब्द]।

सूक्ष्मो ह्यचिन्त्यरूपो व्याख्यातः पूर्वमेव तन्त्रेऽस्मिन्। द्विरभिहितः परमशिवः संशयविनिवृत्तिदर्शिभिः सर्वैः॥
[सूक्ष्म सूक्ष्म]।

सर्वज्ञः सर्वपरः सर्वेशः सर्वकृत् स्वतन्त्रश्च। सर्वात्मा सर्वेषां प्रभवस्थितिलयकृच्छिवः परमः॥ ८९॥
[शिव, शर्व]।

सर्वमिति निरवशेषं परापरज्ञानमुत्तमं गुह्यम्। मायाबन्धविमोक्षं ददाति सर्वप्रदस्तस्मात्॥ ९०॥
[सर्वद]।[1]

शिव इति समात्मकत्वाच्छान्तत्वादीश्वरः प्रोक्तः। तस्मै शिवाय कुरुते नम इति शान्ताय देवाय॥ ९१॥
नम इति प्रभुत्वेऽयं धात्वर्थः प्रोच्यते विकारज्ञैः। कारणकार्यविभागं कुरुते परमेशयोगं च॥ ९२॥
युग्मं प्रोक्तं तत्रैकं कारणस्य देवस्य। कार्यत्वस्य वियोगं कुरुते विनिवृत्तिहेत्वर्थम्॥ ९३॥
[शिवाय नमो नमः]।

एवं ब्रह्मादीनां युग्मायुग्मं पुनर्नमस्कारः। कारणकार्यविभागं छिनत्ति मायाञ्जनं सर्वम्॥ ९४॥
अन्यत्संयोगकरं नम इति युग्मं परस्य देवस्य।
[नमो नमः, नमः]।

अष्टावेते शुद्धाः कार्या मन्त्रे परा नमस्काराः॥ ९५॥
प्रणवाश्च नव प्रोक्ता मन्त्रशरीरे शिवस्य सर्वस्मिन्। दश चोक्ता मन्त्रपराः शुद्धाः परमा नमस्काराः॥९६॥
विंशतित्रीणि युतानि सप्तविंशतिसंप्रदानानि। शेषपदानि तु षड्विंशतिः पदानि बद्धानि सर्वतश्चान्तः॥

[तत्त्वानि]

त्रिंशत्तत्त्वानि प्रोक्तानि शंकरेण विभागशः। अस्मिन्माहेश्वरे तन्त्रे परिसंख्याय तत्त्वतः॥ ९८॥
विकाराः षोडश प्रोक्ता दश प्रकृतयस्तथा। पुरुषो विद्या रागतत्त्वं शिवतत्त्वं च त्रिंशकम्॥ ९९॥
कलाव्यक्तं गुणा बुद्धिरहंकारस्तथैव च। तन्मात्राणि तथा पञ्च एताः प्रकृतयो दश॥ १००॥

---

[1] Selon l'usage actuel l'ordre des noms dans le *Vyomavyāpipadamantra* est नमो नमः, शिवाय नमो नमः et नमः; mais ici dans le texte on trouve l'explication du nom नमो नमः après l'explication du nom शिवाय नमो नमः.

इन्द्रियाणि दशैकं च महाभूतानि पञ्च च। विकाराः षोडश त्वेते यैस्तु सर्वमिदं ततम् ॥ १०१ ॥
उक्तः समासतोऽर्थः परमार्थविदा शिवेन तन्त्रेऽस्मिन्। आत्रेयविशुद्धकुलान्वयाय गुरुणा प्रबोधाय ॥१०२॥

इदं पुरा कारणवक्त्रपद्माद्विनिःसृतं तद्बहुधा विभिन्नम्।
विद्येश्वरैः कारणतुल्यरूपैर्मन्त्रक्रियामण्डलसंप्रयोगैः ॥ १०३ ॥
कोट्या निबद्धं परमेश्वरेण शैवं पदं मातृगणैरुपेतम्।
तदेव सर्वं कृतवान्महात्मा भृगूत्तमो द्वादशभिः सहस्रैः ॥ १०४ ॥
तदेव बुद्ध्वा निखिलं हि भार्गवात् परापरज्ञानमनुक्रमेण।
सहस्रमेकं द्विशतं च सोऽवदद् रुरुर्महात्मा जगतो हिताय ॥ १०५ ॥
इदं [परं] परमशिवार्णवान्मुनिर्विमथ्य तन्त्रामृतमुत्तमं शिवम्।
शिवेरितो विदितपरापरो रुरुश्चकार तन्त्रार्णवसंग्रहं पुनः ॥ १०६ ॥
इमं हि यो रौरवसूत्रसंग्रहं पठेदणुर्व्यपगतपाशबन्धनः।
[1]विभिद्य लोकान् कनकाण्डजन्मनः स याति वै परमशिवान्तिकं बुधः ॥ १०७ ॥
ये चात्रासनमन्त्रजातनिरताः संसेवनात्प्राङ्मुखाः
शम्भोः पादनिपातहृष्टशिरसः प्रत्यग्रतापद्विषः।
तेषामाशु निगूढनूपुररवा चञ्चच्चलन्मेखला
संभ्रान्ताननपङ्कजोद्यतकरा पर्येति लक्ष्मीः पदम् ॥ १०८ ॥
शिवभक्तस्य शान्तस्य महोत्साहरतस्य च। त्रिवर्षाभ्यन्तरात्सिद्धिर्हस्तमेति न संशयः ॥ १०९ ॥
व्यक्ताव्यक्तकलापमालमतुलं त्यक्त्वास्पदं जन्मनो मोहायासजरादियोगकलिलं मायामयं बन्धनम्।
शैवज्ञानपदार्थवारिभिरलं प्रक्षालितात्मा शिवं सूक्ष्मं शान्तमजं प्रयाति परमं शम्भोः पदं निष्कलम् ॥११०॥

[इति रौरवसूत्रसंग्रहे मन्त्रार्थवर्णनं नाम दशमः पटलः]

इति रौरवसूत्रसंग्रहः समाप्तः

[इति श्रीमद्रौरवतन्त्रे विद्यापादः]

---

[1] विभज्य—ms.

Śivapūjā, ce qui serait effectivement sa place si nous étions surs qu'il appartînt au *Rauravāgama*, nous avons choisi de le placer ici en appendice.

[1][सौरपूजाविधिः][2]

अतः परं प्रवक्ष्यामि [3]सौरपूजाविधिं शृणु ।

[सौरपीठम्; तत्र स्थूलपीठम्]

[4]ब्रह्मक्षत्रियविट्छूद्रसौरपीठं तथा भवेत् ॥ १ ॥
[5]विप्रक्षत्रियतः प्रोक्तं त्रिभागेन तु कल्पयेत् । द्वादशाङ्गुलमानेन चतुरश्रं विचिन्तयेत् ॥ २ ॥
[6]इच्छाशक्तिज्ञानशक्तिक्रियाशक्त्यधिदैवतम् । [7]द्वादशाङ्गुलकं पीठं मध्यपीठं तथाष्टकम् ॥ ३ ॥
तदूर्ध्वे चतुरङ्गुल्यं विस्तीर्णं चतुरश्रकम् । पश्चाद्वैश्यश्च[8] शूद्रश्च [9]द्विमेखलया तु कल्पयेत् ॥ ४ ॥
[10]द्वादशाङ्गुलकं चैव चतुरश्रं विचिन्तयेत्[11] । अष्टाङ्गुलप्रमाणेन तदूर्ध्वं चतुरङ्गुलम् ॥ ५ ॥
विस्तीर्णं चतुरश्रं [12]चाप्यायामं चतुरश्रकम् । आयामविस्तरं प्रोक्तं [13]क्रियाशक्त्यधिदैवतम् ॥ ६ ॥
इच्छाशक्तेश्च[14] [15]विस्तीर्णं [16]त्वधिकारं विचिन्तयेत् । [17]आयामे [18]ज्ञानशक्तिश्चाप्यधिदैवमथ स्मृतम् ॥७॥

---

[1] cf. *Cintyāgama, paṭala* 10, *Acintyaviśvasādākhya, paṭala* 10, *Kāraṇāgama*, I, 54, *Makuṭa, paṭala* 5, *Sūkṣma, paṭala* 5, *Svāyambhuva, paṭala* 7 et *Ajitāgama, paṭala* 21.

[2] ms. C omet ce *paṭala*; dans le ms. A il est ajouté au début et dans le ms. B à la fin.

[3] B: सौरपूजाविधिक्रमम् .

[4] A et B: ब्रह्मक्षत्रियविट्छूद्राः सौरपीठं.

[5] B omet ce demi-vers ici et l'ajoute après le vers no. 8.

[6] B: इच्छाशक्तिक्रियाशक्तिज्ञानशक्त्यधिदैवतम् .

[7] A: द्वादशाङ्गुलयोः

[8] A omet श्च.

[9] B: द्विमेखला धातु; on peut lire mieux: द्विमेखलां तु कल्पयेत् .

[10] A: द्वादशांशाङ्गुलं चैव; B: तत्र वै द्वादशाङ्गुल्यं.

[11] Les mss. A et B lisent le demi-vers 6*b* après le demi-vers 5*a*.

[12] A: च आयामं; B: च त्वायामं.

[13] A: प्रोक्तं . . . . अधिदेवता; B: प्रोक्तं [त्रिशक्तिर] अधिदेवता.

[14] A: इच्छाशक्तिं च.

[15] A et B: विस्तीर्णं.

[16] A et B: अधिकारं

[17] A et B: आयामं.

[18] A: ज्ञानशक्तिं च अधिदैवमथ स्मृतम्; B: ज्ञानशक्तेश्चाप्यति(धि)देवमिति स्मृतम् .

[पद्मलक्षणम्]

नालमष्टाङ्गुलं प्रोक्तं [1]कन्दं च चतुरङ्गुलम्। [2]कन्दं तु कृष्णवर्णं [3]च नालं स्याद्रक्तवर्णकम्॥ ८॥
रक्ताम्बुजमिति ज्ञेयं [4]सहस्रपत्रं चिन्तयेत्। केसरं रक्तवर्णं च कर्णिका [5]पीतवर्णका॥ ९॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः। अधि[6]दैवमिति [7]प्रोक्तमिति पद्मं विचिन्तयेत्॥ १०॥
सौवर्णमुत्तमं [8]प्रोक्तं मध्यं ताम्रमिति स्मृतम्। उत्तमं शतविंशत्तु [9]मध्यमं षड्दश क्रमात्॥ ११॥
अधमं [10]त्रिंशमेवं तु सौरपीठविधिक्रमः[11]। स्थूलपीठमिति प्रोक्तं सूक्ष्मपीठमतः शृणु[12]॥ १२॥

[सूक्ष्मपीठम्]

[13]सूक्ष्मपीठं तु तन्त्रेण जातिभेदेन कारयेत्। दक्षिणाङ्गुष्ठ[14]हस्तेन [15]मध्याङ्गुलिबिलेन च॥ १३॥
वलयं नवभागे तु [16]एकभागे तथैव च। एकभागं तथा प्रोक्तं मध्यपीठं तथा भवेत्॥ १४॥
मध्यपीठे तु मध्येन कर्णिकाष्टदलाष्टकम्। [17]इच्छाशक्तिज्ञानशक्तिक्रियाशक्त्यधिदैवतम्॥ १५॥
विस्तीर्णं चतुरश्रं [18]चाप्यूर्ध्वपीठं तथा भवेत्। उत्तमं द्वादशं प्रोक्तं मध्यमं द्वादशार्धकम्॥ १६॥
तृतीयमिति विज्ञेयमधमं चेति[19] कल्पयेत्। श्वेतं वा ताम्रपीठं वा सौवर्णं पीठमुत्तमम्[20]॥ १७॥
[21]ताम्रं वा श्वेतपीठं वा सौवर्णं करयुक्तकम्।

[सौरचक्रम्]

[22]सौरचक्रं तु विधिवत् काम्यार्थमिह चोच्यते॥ १८॥
काम्यार्थमिति कर्तव्यं सूक्ष्मपीठमिति स्मृतम्। सर्वसिद्धिकरं [23]लाभसर्वकाम्यार्थमेव वा॥ १९॥
शास्त्रात्त चक्रं कर्तव्यमन्यथा[24] निष्फलं भवेत्। पीठं चक्रं तु कर्तव्यं पुत्रस्त्रीभूमिनाशनम्॥ २०॥
[25]पश्चाद्वस्म सुनिक्षिप्य पूर्वमन्त्रैर्विनिक्षिपेत्। प्राणायामत्रयं कुर्यात्सूर्यमन्त्रेण कृत्यवित्॥ २१॥

---

[1] A: स्कन्धं.
[2] A: स्कन्धं.
[3] B: स्यान्नालं pour च नालं.
[4] A: सहस्रपत्रं विचिन्तयेत्; B: शतपत्रं विचिन्तयेत्.
[5] A et B: पीतवर्णकम्.
[6] B: देव pour दैव.
[7] B ajoute: विप्रक्षत्रियतत् (विट्) प्रोक्तं त्रिभागेन तु कल्पयेत्.
[8] B: प्रोक्तमधमं ताम्रमुच्यते.
[9] A: मध्यमष्टादश रितु?
[10] B: विंश pour त्रिंश.
[11] A et B: क्रमम्.
[12] B: इति स्मृतम् pour अतः शृणु.
[13] B: सूक्ष्मपीठस्य pour सूक्ष्मपीठं तु.
[14] B: अङ्गुलि pour अङ्गुष्ठ.
[15] A: मध्याङ्गुलिबिलोचन; B: मधा(वामा)ङ्गुलिबिलेन च.
[16] A et B: एकभागं तथैव.
[17] B: इच्छाशक्तिक्रियाशक्तिज्ञानशक्त्यधिदैवतम्.
[18] A: च ऊर्ध्वपीठं; B: च दौर्ध्वा (दैर्ध्यं) पीठं.
[19] A: अधममिति pour अधमं चेति.
[20] A: कल्पयेत् pour उत्तमम्.
[21] A: ताम्रे.
[22] A: सौरचक्रं तु काम्यार्थं . . . . मिहोच्यते.
[23] A: लाभं pour लाभ; B: लाभं (काम्यं).
[24] B: न कृतं pour अन्यथा.
[25] A et B: पश्चात्तमं.

[करन्यासः]

[1]अस्त्रेण शोधितौ हस्तौ [2]मध्येन चासनं स्थितम्। [3]अङ्गुष्ठं मूर्तिमन्त्रेण [4]कनिष्ठा नेत्रमन्त्रकम्॥ २२॥
[5]कनिष्ठाद्यङ्गुलं प्रोक्तं नेत्रं नेत्रेण [6]योजितम्। द्विहस्तं पद्ममुद्रेण सूर्यमन्त्रं समुच्चरन्॥ २३॥
कनिष्ठां हृदयमन्त्रेण [7]चाङ्गुलान्तास्त्रमन्त्रवत्। करन्यासस्ततः प्रोक्तो देहन्यासमतः शृणु॥ २४॥

[अङ्गन्यासः]

आसनं नाभि [8]तत्कृत्वा[9] मूर्तिं हृदयमन्त्रवित्। [10]नेत्रे नेत्रेण विन्यस्य मूलं हृदयमन्त्रवित्॥ २५॥
[11]हृदादि कवचान्तं वा बीजाक्षरसमायुतम्। तत्स्थानमितियुक्तेन तन्मन्त्रेण समुच्चरन्॥ २६॥
[12]दिग्बन्धनावकुण्ठने चास्त्रमन्त्रं समुच्चरन्। [13]देहन्यास इति प्रोक्तः [14]पाद्यपात्रं तु स्थापयेत्॥ २७॥

[पाद्यादिपात्रपूजा]

शङ्खमुत्तमपात्रं च मध्यमं स्वर्णपात्रकम्। अधमं ताम्रपात्रं च पाद्यमाचमनार्घ्यकम्॥ २८॥
पश्चात्पाद्यस्य [15]पात्रं तु चादायास्त्रेण शोधितम्। भ्रूमध्येऽनाहत[16]स्थाना[17]न्नाराचमुद्रया स्थितम्॥ २९॥
[18]अमृतं [19]स्रावितं [20]चिन्त्य हृन्मन्त्रेण समुच्चरन्। [21]कुङ्कुमं चन्दनं तोयं दूर्वातुलसिपद्मकम्॥ ३०॥
प्रणवं [22]बीजमन्त्रेण [23]पाद्यं [24]तु पूजयेद्बुधः[25]। दिग्बन्धनावकुण्ठने चास्त्रमन्त्रं समुच्चरन्॥ ३१॥
पुष्पं शिरसि विन्यस्य [26]षडङ्गैर्मूलमन्त्रतः। [27]हस्ते तु पुष्पयुग्मेन [28]कलामन्त्रैस्तु शोधयेत्॥ ३२॥

---

1 Les vers 22, 23*b*, 24*a* et 25 sont cités dans la *Śaivasiddhāntasaṃgraha*, ms. p. 87.
2 B: मध्येनासनसंस्थितौ.
3 A: अङ्गुष्ठा मूर्तिमन्त्रेण ; B: अङ्गुष्ठान्मूर्ध्नि मन्त्रेण ; *Śaivasiddhāntasaṃgraha* (S): अङ्गुष्ठमूर्तिमन्त्रेण.
4 A: कनिष्ठादि नेत्रमन्त्रवित् ; B: कनिष्ठादिषु मन्त्रवित्.
5 A: कनिष्ठा द्व्यङ्गुलं प्रोक्तं.
6 B: शोभितम्.
7 A: वङ्गुलान्नस्त्रमन्त्रवत् ; B: अङ्गुलान्तास्त्रमन्त्रवित्.
8 B: तं pour तत्.
9 B: ज्ञात्वा pour कृत्वा.
10 A et B: नेत्रमन्त्रेण मन्त्रस्य.
11 B: हृदयात् pour हृदादि.
12 A: दिग्बन्धनावगुण्ठेन ; B: दिग्बन्धनावकुण्ठेन.
13 A et B: देहन्यासमिति प्रोक्तं.
14 B: स्थापयेत्पाद्यपात्रकम्.
15 B: पात्रेण pour पात्रं तु.
16 A: स्थानं pour स्थानात्.
17 B: स्थितं नाभौ च मुद्रया pour नाराचमुद्रया स्थितम्.
18 B: अमृतेन pour अमृतं.
19 A: धारितं pour स्रावितं.
20 A: चिन्त्यं pour चिन्त्य.
21 Les vers 30*b*, 31*a*, 35, 36*a*, 38*b* et 39 sont cités dans le *Śaivasiddhāntasaṃgraha*, p. 89.
22 A: सबीजमन्त्रेण.
23 S: पाद्ये pour पाद्यं.
24 B: सं pour तु.
25 S: ततः pour बुधः.
26 A: षडङ्गे मूलमन्त्रकम्.
27 A: हस्तं पुष्पं तु युग्मेन ; B: हस्ते पुष्पं तु युग्मेन.
28 A: कलामन्त्रं तु शुद्धयेत् ; B: कलामन्त्रं विशुद्धयेत्.

प्रोक्षयेच्छिरासे [1]न्यस्य पुष्पं शिरसि वर्जयेत्। पश्चाद्विशेषामत्रेण[2] [3]चादायास्त्रविशोधितम् ॥ ३३ ॥
निरीक्षणं प्रोक्षणं च[4] ताडनाभ्युक्षणे[5] तथा। तत्स्थानं तु [6]विचिन्त्यैवममृतेन [7]प्रसारितम् ॥ ३४ ॥
उशीरं [8]चैव कर्पूरं [9]लवङ्गमुरतोयकम्। जाती कुसुमपुष्पं च [10]श्रेष्ठमाचमनीयकम् ॥ ३५ ॥
[11]षडङ्गमन्त्रमुच्चार्य[12] [13]बीजेनैव प्रपूजयेत्। [14]प्रोक्षयेदस्त्रमन्त्रेण सर्वद्रव्यं [15]विशोधयेत् ॥ ३६ ॥

[अर्घ्यपात्रपूजा]

पश्चादर्घ्यस्य [16]पात्रं तु समादायास्त्रशोधितम्। [17]निरीक्षाभ्युक्षणं चैव [18]दिग्बन्धनावकुण्ठने ॥ ३७ ॥
[19]अमृतासारितं [20]चिन्त्य नाराचमुद्रया स्थितम्। चम्पकं च लवङ्गं च कुङ्कुमं जातिपुष्पकम् ॥ ३८ ॥
चन्दनं रक्तपुष्पं च तोयं [21]वै बिल्वपत्रकम्। मूलमन्त्रेण संपूज्य [22]दिग्बन्धनावकुण्ठने ॥ ३९ ॥

[विद्यादेहकल्पनम्]

सूक्ष्मदेहं तु तन्मध्ये विद्यादेहं प्रकल्पयेत्। [23]तद्देहस्य च मध्ये तु [24]क्रमात्पद्मं विचिन्तयेत् ॥ ४० ॥

[सहस्रदलपद्मम्]

द्वादशाङ्गुलविस्तीर्णं [25]कन्दं तु चतुरङ्गुलम्। नालमष्टाङ्गुलं ज्ञेयं नाभि[26]कन्दसमुद्भवम् ॥ ४१ ॥
पद्मं [27]सहस्रकं ज्ञेयं [28]कर्णिकाकेसराष्टकम्। [29]तत्पद्मकर्णिकामध्ये शुद्धदीपस्वरूपकम्॥ ४२ ॥
[30]शक्त्यष्टकेन संपूज्य [31]केसराग्रदलाष्टकम्। मानसं पूजयेद्धीमान् शिवसूर्यं [32]समाचरेत् ॥ ४३ ॥

---

[1] A: विन्यस्य.
[2] A et B: मात्रेण pour अमत्रेण.
[3] A: आदायमस्त्रशोधितम् ; B: आदायास्त्रविशोधितम् .
[4] A: चैव pour च.
[5] A et B: ताडनाभ्युक्षणं.
[6] A et B: विचिन्त्येन अमृतेन.
[7] A: सारितं बुधः .
[8] A: कर्पूरं चैव ; S: कर्पूरकं चैव.
[9] B: श्रेष्ठमाचमनीयकम् .
[10] B: लवङ्गमुरतोयकम् .
[11] B: षडङ्गं pour षडङ्ग.
[12] S: मन्त्रैरभ्यर्च्य pour मन्त्रमुच्चार्य.
[13] A et S: बीजानां तु pour बीजेनैव.
[14] S: समन्वितम् .
[15] B: विशोषयेत् .
[16] A et B: पात्रेण pour पात्रं तु.
[17] B: निरीक्षणं प्रोक्षणं च.
[18] A: दिग्बन्धनागुण्ठनम् ; B: दिग्बन्धं चावकुण्ठनम् .
[19] A: अमृताधानितं.
[20] A: चिन्त्यं.
[21] A et S : च pour वै.
[22] A: दिग्बन्धनावगुण्ठनम् ; B: दिग्बन्धं चावकुण्ठनम् .
[23] A et B: तद्देहेन तु मध्येन.
[24] A: पद्मं विचिन्तयेत्क्रमात् .
[25] A: स्कन्धं.
[26] A: कन्द pour स्कन्ध.
[27] B: साहस्रकं.
[28] B: कर्णिकां.
[29] A: तत्पद्मं.
[30] A: अष्टशक्त्येन.
[31] A: केसराग्रे दलाष्टकम् ; B: केसरं हृद्दलाष्टकम् .
[32] B: समर्चयेत् .

अष्टपुष्पेण संपूज्य [1]नित्यं संपूजयेत्क्रमात्। विप्रोपचारनैवेद्यं मानसं पूजयेत्समम् ॥ ४४ ॥
आभ्यन्तरं पूजयित्वा पश्चाद्बाह्यं प्रपूजयेत्।

[द्वारपालपूजा]

आसनं [2]पीठमध्ये तु [3]तद्द्वारे पूजयेच्छृणु[4] ॥ ४५ ॥

[दण्डिध्यानम्]

चतुर्वक्त्रं [5]त्रिणेत्रं च रक्तवर्णमिति स्मृतम्। [6]द्विपादं च चतुर्हस्तं जटामकुटधारिणम् ॥ ४६ ॥
शूलं डमरुकं चैव खड्गं शक्तिं च [7]दण्डिनम्। पीतवस्त्रमिति [8]ध्यात्वावाह्य संपूजयेच्छृणु ॥ ४७ ॥

[पिङ्गलध्यानम्]

पिङ्गलं कृष्णवर्णं चाप्येकवक्त्रं द्विनेत्रकम्। अभयं वरदं [9]चैव समावाह्य सुपूजयेत् ॥ ४८ ॥
[10]पाद्यमाचमनं चार्घ्यं दत्त्वा विज्ञापनं स्मृतम्।

[11][गणपतिपूजा]

पश्चाद्गणपतिं पूज्य पीतवर्णमिति स्मृतम् ॥ ४९ ॥
गजाननं त्रिणेत्रं च चतुर्हस्तं द्विपादकम्। [12]अक्षमालां च पाशं चाप्यभयं वरदं तथा ॥ ५० ॥
सर्वालंकारसंपूर्णमैशान्यां दिशि पूजयेत्।

[गुरुपूजा]

श्वेतवर्णं गुरुं ध्यात्वा पद्मासनमिति स्मृतम् ॥ ५१ ॥
अभयं वरदं चैव [13]विद्यामूर्तिं सुपूजयेत्।

---

[1] B: तन्नित्यं पूजयेत्क्रमात्.
[2] A et B: पीठमध्येन.
[3] A et B: तद्द्वारं.
[4] cf. *Acintyaviśvasādākhya, paṭala* 10, vers 11:
दण्डिनं पिङ्गलं चैव द्वारपालं समर्चयेत्। ओं अं दण्डिने नमः। ओं अं पिङ्गलाय नामः।
[5] B: त्रिनेत्रं.
[6] A: द्विपादं चतुर्हस्तं तु.
[7] B: दण्डकम्.
[8] A: ध्यात्वा आवाहनं सुपूजयेत्.
[9] A: चैव आवाहनं तु पूजयेत्.
[10] A: पाद्याचमनार्घ्यं दत्वा विज्ञापनमिति स्मृतम्; B: पाद्यमाचमनं दत्वा विज्ञापनमिति स्मृतम्.
[11] cf. *Acintyaviśvasādākhya, paṭala* 10, vers 11:
ईशान्यां तु गणेशानमाग्नेय्यां गुरुमावहेत्। ओं अं गणपतये नमः। ओं अं गुरुभ्यो नमः ॥
[12] A: अक्षमाल्यं.
[13] B: विमलं संप्रपूजयेत्.

[1][आसनपूजा]

[विमलासनम्]

[2]सिंहवक्त्रं द्विनेत्रं च [3]चतुर्हस्तं द्विपादकम् ॥ ५२ ॥
वृश्चिका[4]कण्ठमाल्यं च मुण्डिकासनसंस्थितम् । शूलं कपालं खट्वाङ्गं शक्तिं च श्वेतवर्णकम् ॥ ५३ ॥
[5]विमलध्यानमेवोक्तं [6]सारध्यानमतः परम् ।

[सारासनम्]

रक्तवर्णं त्रिणेत्रं च जटामकुटधारिणम् ॥ ५४ ॥
एकवक्त्रं द्विहस्तेन त्वभयं वरदं तथा ।

[आराध्यासनम्]

[7]चतुर्भुजं त्रिणेत्रं च [8]कृष्णवर्णमिति स्मृतम् ॥ ५५ ॥
पद्मं गदां च [9]घण्टां च चापेषुधारिणं बुधः । [10]आराध्याख्यमिति ध्यात्वा [11]सौरास्यं चतुर्हस्तकम् ॥५६॥

[परसुखासनम्]

[12]पश्चात्परसुखं ध्यात्वा जटामकुटमण्डितम् । एकवक्त्रं द्विनेत्रं चाप्यभयं वरदं तथा ॥ ५७ ॥
पीतवर्णं च [13]दंष्ट्रां च दीर्घमग्नं गतां बुधः ।

[पद्मासनम्]

पद्मासनं तु संपूज्य पद्ममुद्रां तु दर्शयेत् ॥ ५८ ॥

---

[1] cf. *Svāyambhuva, paṭala* 17, vers 20, 38-40:

प्रातःसन्धिविशेषेण सौरपूजाविधिं शृणु । इयं पूजा प्रकर्तव्या बेरे वा चक्रकेऽथवा ॥ . . .
पूर्वास्यश्चोत्तरास्यो वा भानुं संपूजयेत्ततः । दण्डिनं पिङ्गलं चैव गणेशं गुरुमेव च ॥
प्रभूतासनमेवं च विमलासनमेव च । सारासनमतश्चैव आराध्यासनमेव च ॥
सुखासनं परं प्रोक्तं पद्मासनमिति स्मृतम् ॥

[2] Les vers 52 à 58*a*, 59 à 62 et 64*b* à 69 sont cités dans la *Śaivasiddhānta-saṃgraha*, ms. p. 93-96.

[3] S: द्विपादं च द्विहस्तकम् .
[4] A et B: कर्ण pour कण्ठ.
[5] A: विमला pour विमल.
[6] A: सारा pour सार.
[7] S: चतुर्वक्त्रं.
[8] B: जटामकुटधारिणम् .
[9] A: घण्टानाश्चक्षुश्च धारितं बुधः ; B: घण्टां च चक्षुश्चं धारितं बुधः ; S: चण्डेन इषू च धारितं बुधः .
[10] A: आराध्यायमिति ज्ञात्वा ; B: आराध्यं च इति ध्यात्वा.
[11] A, B et S: सौराभ्यां.
[12] A: पश्चात् परं सुखां ध्यात्वा ; S: पश्चात्परं सुखं ध्यात्वा.
[13] A: दंष्ट्रा च दीर्घमग्नं गतं बुधः ; B: दंष्ट्रादीन् दीर्घमग्नं गतं बुधम् ; S: दीर्घमग्निगतं बुधः .

[1][अष्टशक्तिपूजा]

[दीप्ताध्यानम्]

[2]एकवक्त्रां त्रिणेत्रां च रक्तवर्णामिति स्मृताम्। [3]जटामकुटशोभां च [4]रक्तवस्त्रामिति स्मृताम्॥ ५९॥
वामहस्ते तु वरदं चामरं दक्षहस्तके। [5]दीप्ताया ध्यानमेवोक्तं [6]सूक्ष्माया ध्यानमुच्यते॥ ६०॥

[सूक्ष्माध्यानम्]

[7]त्रिवक्त्रां च द्विनयनां [8]बिन्दुरूपामिति स्मृताम्। [9]चतुर्हस्तां [10]द्विपादां च [11]पीताम्बरसमन्विताम्॥ ६१॥
दर्पणं चामरं [12]चैवाप्यभयं वरदं तथा। [13]सूक्ष्माया ध्यानमेवोक्तं [14]जयाध्यानमतः परम्[15]॥ ६२॥

* * * * * *

[विभूतिध्यानम्]

[16]द्विमुखां च द्विनेत्रां च कृष्णवर्णां कराम्बुजे। अभयं वरदं चैव सर्वाभरणभूषिताम्[17]॥ ६३॥
[18]विभूतिध्यानमेवोक्तं विमलाध्यानमुच्यते[19]।

[विमलाध्यानम्]

[20]रक्तवर्णां त्रिणेत्रां च पीतवस्त्रां चतुर्मुखाम्॥ ६४॥
दण्डं [21]कमण्डलुं चैव दर्पणं छत्रचामरम्। [22]विमलाध्यानमेवोक्तममोघाध्यानमुच्यते[23]॥ ६५॥

---

[1] cf. *Aṃśumad, nityapūjāvidhipaṭala,* ms. p. 43-45:
कर्णिकां च यजेन्मध्ये पूजयेत्तु यथाक्रमम्। दीप्तायै चैव सूक्ष्मायै जयायै च नमोऽन्तकम्॥
भद्रायै च विभूत्यै च विमलायै नमो नमः। अमोघां विद्युतां चैव सर्वतोमुख्यमेव च॥
गन्धैः पुष्पैश्च मध्यादि ईशानान्तं समर्चयेत्॥

[2] A et S: एकवक्त्रं त्रिणेत्रं च रक्तवर्णमिति स्मृतम्.
[3] B: जटामकुटसोमां च; S: जटामकुटसौभाग्यं.
[4] A: रक्तवर्णमिति स्मृतम्.
[5] A: दीप्ताध्यानमेवोक्तं.
[6] A: सूक्ष्मं चैवमिति स्मृतम्; S: सूक्ष्माध्यानमिति स्मृतम्.
[7] A: त्रिवक्त्रं च द्विनेत्रं च; S: त्रिवक्त्रं तु द्विनेत्रं च.
[8] A et S: बिन्दुरूपमिति स्मृतम्.
[9] A: चतुर्हस्तं; S: चतुर्हस्त.
[10] A, B et S: द्विपादेन.
[11] A et S: पीताम्बरसमन्वितम्.
[12] A, B et S: चैव अभयं.
[13] A: सूक्ष्मं च ध्यानमेवोक्तं; S: सूक्ष्माध्यानमेवोक्तं.
[14] S: विमलाध्यानमतः शृणु.
[15] Les vers qui donnent la définition des Jayā et Bhadrā manquent dans les manuscrits.
[16] A: द्विमुखं च द्विनेत्रं च कृष्णवर्णं कराम्बुजम्.
[17] A: भूषणम् pour भूषिताम्.
[18] B: विभूती pour विभूति.
[19] A: अतः परम् pour उच्यते.
[20] A et S: रक्तवर्णं त्रिणेत्रं च चतुर्मुखं पीतवस्त्रकम्.
[21] A: कमण्डलं.
[22] A: विमल pour विमला; S: विमलं.
[23] A: मोघाध्यानमतः परम् pour अमोघाध्यानमुच्यते; S: अमोघाध्यानतत्परम्.

[अमोघाध्यानम्]

पीतवर्णामिमां[1] ध्यात्वा [2]द्विनेत्रां च द्विहस्तकाम्। [3]जटामकुटसंयुक्तां चामरं चाभयं तथा ॥ ६६ ॥
[4]सर्वाभरणसंपूर्णामावाह्याथ प्रपूजयेत्। अमोघाध्यानमेवोक्तं [5]विद्युद्ध्यानमतः परम् ॥ ६७ ॥

[विद्युद्ध्यानम्]

[6]श्वेतवर्णामिति ज्ञेयामेकवक्त्रां त्रिणेत्रकाम्[7]। [8]चतुर्हस्तां द्विपादां च [9]सर्वाभरणभूषिताम् ॥ ६८ ॥
वामहस्तेन [10]कुम्भं च [11]दक्षहस्ते तु [12]चामरम्। अभयं वरदं चैव [13]पद्मासनस्थितां पराम् ॥ ६९ ॥
[14]अष्टशक्तीश्च संपूज्य चावाह्याथ प्रपूजयेत्। [15]संयोज्य विस्फुरां मुद्रां पश्चात्कर्णिकमध्यके ॥ ७० ॥
[16]षट्कोणस्य तु [17]मध्ये तु ह्रींकारं तु सुसंस्थितम्।

[18][सूर्यध्यानम्]

एकवक्त्रं [19]द्विनेत्रं च द्विहस्तं च द्विपादकम् ॥ ७१ ॥

---

[1] A et S: इदं pour इमां.
[2] A: द्विनेत्रं च द्विहस्तकम्.
[3] A: जटामकुटमिति ज्ञेयं; S: जटाचूडमिति ज्ञेयं.
[4] A et S: सर्वाभरणसंपूर्णमावाहनं तु पूजयेत्.
[5] A et S: विद्याध्यानम् pour विद्युद्ध्यानम्.
[6] A: श्वेतवर्णमिदं ज्ञेयम्; S: श्वेतवर्णमिति ज्ञेयम्.
[7] A et S: एकवक्त्रं त्रिणेत्रकम्.
[8] A: चतुर्हस्तं द्विपादं च; S: चतुर्हस्तद्विपादं च.
[9] A et S: सर्वाभरणभूषितम्.
[10] A et S: कुम्भेन.
[11] A et S: दक्षहस्तं तु.
[12] S: वाकरम्.
[13] A et S: पद्मासनस्थितं परम्.
[14] A: अष्टशक्त्येन संपूज्य आवाहनं प्रपूजयेत्.
[15] A: विस्फुरमुद्रां संयोज्य.
[16] A et B: षट्कोणेन.
[17] B: मध्येन.
[18] cf. *Acintyaviśvasādākhya, paṭala* 10, vers 17-20:
श्वेतपङ्कजसंरूढं जपापुष्पनिभं शुभम्। ज्वलद्रक्तादितेजौघं मण्डलान्तर्व्यवस्थितम् ॥
अनेकदीपसंकाशं मणिमौलिविराजितम्। रक्तांशुकपरीधानं रक्तचन्दनचर्चितम् ॥
बाहुमूलगतश्वेतपुण्डरीककरद्वयम्। हारकेयूरकटकं मुद्रायुक्ताङ्गुलिं शुभम् ॥
एकाननं विशालाक्षं द्विभुजं भास्करं विभुम्। सहस्ररश्मिसंयुक्तं चिन्तयेन्मूर्तिरूपिणम् ॥
cf. *Ajita, paṭala* 56, vers 41-43:
ततः सहस्रकिरणं प्रभामण्डलमण्डितम्। पुण्डरीकस्थितं शान्तं रक्तवर्णं द्विलोचनम् ॥
रक्ताम्बरपरीधानं सर्वाभरणभूषितम्। पुण्डरीकद्वयव्यापिकरपङ्केरुहद्वयम् ॥
ध्यात्वा सूर्यं तदा देवम्" ॥
cf. *Cintya, paṭala* 10, vers 21-25:
प्रभूतमासनं कल्प्यमाराध्यं पद्ममासनम्। कर्णिकां च यजेन्मध्ये पूजयेद् ध्यानरूपकम् ॥
सौकुङ्कुमधरं काशं सर्वाभरणभूषितम्। द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम् ॥
चतुर्भुजसमोपेतं वरहस्ताम्बुजद्वयम्। अभयवरदोपेतं प्रभामण्डलमण्डितम् ॥
उपवीतसमायुक्तमुषादेवीसमन्वितम्। पद्मस्थितं रथारूढमरुणेन समन्वितम् ॥
ध्यात्वाभ्यर्च्य षडङ्गेन परिवारसमन्वितम् ॥

रक्तवर्णमिति ज्ञेयं रक्ताम्बरमतः परम् । [1]श्वेताब्जे चोत्करोद्बद्धेनाब्जयुग्मेन संस्थितम् ॥ ७२ ॥
[2]रक्तमाल्यं च [3]पुष्पं च [4]रक्तालेपनधारिणम् । [5]इत्येतद्ध्यानमेवोक्तमावाह्यैनं तु पूजयेत् ॥ ७३ ॥

[आवाहनाद्युपचाराः]

न्यासं तालत्रयं कृत्वा दिग्बन्धं [6]चावकुण्ठनम् । [7]मूर्तिमन्त्रेण चावाह्य [8]मूलेनावाहनं पुनः ॥ ७४ ॥
तन्मूलमन्त्रमुच्चार्य चादित्यावाहनं तथा । स्थापनं सन्निधानं च सन्निरोधनयोजकम् ॥ ७५ ॥
अविघ्नं [9]लिङ्गमुद्रां च नमस्कारमुद्रया स्थितम् । पाद्याचमनार्घ्यं दत्त्वा नाराचमुद्रया स्थितम् ॥ ७६ ॥
हृदयादीनि संपूज्य दिग्बन्धनावकुण्ठनम्[10] । अभ्यङ्गलेपनं चैव विधिस्नानं प्रवेशकम् ॥ ७७ ॥
[11]आर्द्रवस्त्रं [12]विसृज्याथ धौतवस्त्रं [13]तु योजयेत् । [14]वस्त्राभरणं लेपः सर्वालंकार[15]भूषणम् ॥ ७८ ॥
अर्घ्यं तु मूर्ध्नि संयोज्य [16]धूपदीपं तु दापयेत् । हृदादिपूजां [17]विज्ञाप्यामृतमुद्रां तु योजयेत् ॥ ७९ ॥

[हृदादिषडङ्गपूजा]

[हृदयम्]

[18]एकवक्त्रं [19]च संचिन्त्य [20]द्विनेत्रं च चतुर्भुजम् । रक्तवर्णमिति ध्यात्वा शूलं खड्गं च दण्डकम् ॥८०॥

---

cf. *Aṃśumad, nityapūjāvidhipaṭala*, vers 46-48:
तदन्ते त्वासनं कल्प्य मूर्तिध्यानमनुस्मरन् । श्वेतारविन्दमध्यस्थं जपाकुसुमसन्निभम् ॥
भास्वद्रुधिरसङ्काशं तेजोमण्डलमध्यगम् । भुजासक्तसमुत्फुल्लसनालाब्जद्विहस्तकम् ॥
एकवक्त्रं रविं ध्यायेद्रक्तवस्त्रं द्विनेत्रकम् ॥

19 A: त्रिनेत्रं.

---

1 A: श्वेताब्जोत्करोश्वत्थमजयुक्तेन ; B: श्वेताब्जोत्करोबद्धमजयुक्तेन.
2 A: रक्तमाल्या च ; B: रक्तमाला च.
3 A et B: पुष्पेण.
4 A: रक्तालेपनधारितः ; B: रक्तलेपनधारितम् .
5 A et B: इत्येते ध्यानमेवोक्तमावाहनं तु.
6 A: चावगुण्ठनम् .
7 A: मूर्तिमन्त्रैस्त वामाह्य.
8 A et B: मूलमावाहनं.
9 A: लिङ्गमुद्रा च.
10 A: अवगुण्ठनम् pour अवकुण्ठनम् .
11 B: आर्द्रं वस्त्रं.
12 A: विसर्जेत.
13 B: सुयोजयेत् .
14 A et B: वस्त्राभरणलेपेन.
15 A: भूषितम् pour भूषणम् .
16 B: दीपधूपं.
17 B: विज्ञाप्य घृतमुद्रां.
18 Les vers 80 à 81, 82*b* à 87 et 88*b* à 90 sont cités dans le *Śaivasiddhāntasaṃgraha*, ms. p. 102-103.
19 A, B et S: एकवक्त्रेण.
20 A: द्विनेत्रं चतुर्हस्तकम् ; S: चतुर्हस्तं द्विनेत्रकम् .

[1]जटामकुटधारिणं [2]वरदमासने स्थितम् । अग्निकोणे तु संपूज्य हृदयादींस्तु [3]पूजयेत् ॥ ८१ ॥
[4]इत्येवं [5]हृदि संपूज्य पश्चाच्छिरसि पूजयेत् ।

[शिरः]

त्रिवक्त्रं च [6]द्विपादं च चतुर्हस्तं द्विनेत्रकम् ॥ ८२ ॥
कृष्णवर्णमिदं ध्यात्वा [7]नित्यं संपूजयेद्बुधः । पाशं चैवाक्षमालां चाप्यभयं वरदं तथा ॥ ८३ ॥

[शिखा]

[8]निर्ऋतिकोणे संपूज्य शिखां पश्चात्तथैव च । [9]पीतवर्णामिति ध्यात्वा [10]पीतवक्त्रां श्रियावहाम् ॥
अभयं वरदं चैव [11]द्विनेत्रां च द्विवक्त्रकाम् । शिखाया ध्यानमेवोक्तं [12]कवचध्यानमुच्यते ॥ ८५ ॥

[कवचम्]

चतुर्वक्त्रं त्रिणेत्रं च सप्तहस्तं द्विनासिकम् । जटामकुटसंस्थं च[13] वरदं चाभयं तथा ॥ ८६ ॥
पद्मं नीलोत्पलं चैव [14]कुम्भं चक्रमिति स्मृतम् । शङ्खं पद्मासनं चैवमैशान्यां[15] दिशि पूजयेत् ॥ ८७ ॥
कवचध्यानमेवोक्तमस्त्रध्यानमतः परम् ।

[अस्त्रम्]

पञ्चवक्त्रं त्रिणेत्रं च जटामकुटधारिणम् ॥ ८८ ॥
[16]इन्दुविस्तीर्णदंष्ट्रं च [रक्तास्यं र]क्तवर्णकम् । चतुर्हस्तं द्विपादं च[17] [18]सौभाग्यमश्ववाहनम् ॥ ८९ ॥
खड्गं चैवाक्षमालां चाप्यभयं वरदं तथा । [19]सहस्रार्कप्रतीकाशमावाह्यैनं तु पूजयेत्[20] ॥ ९० ॥
पाद्यमाचमनं चैवाप्यर्घ्यं शिरसि विन्यसेत् ।

[नवग्रहपूजा]

[21]पश्चाद्ग्रहाश्च संपूज्या [22]आपूर्वाद्युत्तरान्तकम् ॥ ९१ ॥

---

1 A, B et S: जटमकुटधोरण.
2 A et S: वरदमासनं स्थितम्; B: वरदमासनं तथा.
3 B: योजयेत्; S: हृदयार्घ्यं तु पूजयेत्.
4 A: इत्येते; B: इत्थं तु.
5 B: हृदयं पूज्य.
6 A B et S: द्विपादेन.
7 B: तन्नित्यं पूजयेद्बुधः; S: ईशे संपूजयेच्छिरः.
8 A: निर्ऋतिकोणेषु संपश्चाच्छिखायां च तथैव च; B: नैर्ऋते कोणके पूज्य शिखां पश्चात्तथैव च S: निर्ऋतिकोणके पश्चाच्छिखायां तु तथैव च.
9 A, B et S: पीतवर्णमिति ध्यात्वा.
10 A: पीतवक्त्रं; B: पीतवर्णं; S: पीतवक्त्र.
11 A, B et S: द्विनेत्रं च द्विवक्त्रकम्.
12 कवचाध्यानतत्परम्; S: कवचेन मतः परम्.
13 A et S: संस्थाश्च; B: संस्थां च.
14 A: कुम्भचक्रमिति; S: कुम्भश्चक्रमिति.
15 S: वायव्यां pour ऐशान्यां.
16 S: दुन्दु pour इन्दु.
17 A, B et S: द्विपादेन.
18 A: सौभाग्यं नश्ववाहनम्; B: सौभाग्यन्नेध्ववाहनम्; S: सौभाग्यस्य च वाहनम्.
19 A: सहस्राद्दिन pour सहस्रार्क; S: सहस्रादि.
20 A, B et S: आवाहनं तु पूजयेत्.
21 A et B: पश्चाद्ग्रहांश्च संपूज्य.
22 A: पूर्वादि उत्तरां दिशि.

एकवक्त्रं द्विनेत्रं च पीतवर्णमिति स्मृतम् । वामहस्ते तु नागं च दक्षहस्ते तु पद्मकम् ॥ ९२ ॥
सोमादीशानपर्यन्तमिति[1] रूपं विचिन्तयेत् । शनैश्चरादि[2]केत्वन्तानग्निकोणादि पूजयेत् ॥ ९३ ॥

[सोमध्यानम्]

ईशानदिशि [3]पूजेत्तु शुक्लवर्णमतः परम् । चतुर्वक्त्रं त्रिणेत्रं च [4]नमस्कारमुद्रया स्थितम् ॥ ९४ ॥
व्यालमुद्रां च [5]वरदं हृदयादीनि पूजयेत् । अक्षं त्रिशूलमुद्रां च [6]सोमे च व्यालमुद्रया ॥ ९५ ॥

[7][उषाध्यानम्]

[8]श्यामवर्णामिति ज्ञेयां द्विनेत्रां च द्विनासिकाम्[9] । नीलोत्पलं च वामेन दक्षहस्तेन पङ्कजम् ॥ ९६ ॥
सौभाग्यं पीतवस्त्रेण उषाध्यानं [10]ततः परम् । [11]भानोस्तु दक्षिणे भागे चावाह्याथ प्रपूजयेत् ॥ ९७ ॥
उषाध्यानमिति प्रोक्तं प्रत्युषाध्यानमुच्यते ।

[प्रत्युषाध्यानम्]

[12]एकाननां द्विनेत्रां च [13]द्विहस्तां च द्विपादकाम् ॥ ९८ ॥
[14]श्वेतवर्णामिति ज्ञेयां [15]सर्वाङ्गकुङ्कुमालयाम् । [16]सर्वाभरणभूष्यां च वामहस्तेन चम्पकम् ॥ ९९ ॥
[17]कुमुदं दक्षहस्तेन [18]विश्वरूपपरायणाम् । [19]आदित्यस्य वामभागे [20]चावाह्याथ सुपूजयेत् ॥ १०० ॥

---

[1] B: इत्थं pour इति.

[2] B: केत्वन्तम् pour केत्वन्तान्.

[3] On trouve fréquemment les mots पूजेत्, हुनेत्, ग्रहेत् etc., dans les textes des āgama ; voir note 6 p. 69.

[4] B: नमस्कारमुद्रान्वितम्.

[5] A omet वरदं.

[6] A et B: सोमेवं ? pour सोमे च.

[7] cf. *Acintyaviśvasādākhya, paṭala* 10, vers 32-34:

उषादेवीं दक्षभागे प्रत्युषां वामपार्श्वके । द्विभुजां च द्विनेत्रां च सरोजवदनान्विताम् ॥
सर्वाभरणसंयुक्तां सर्वलक्षणसंयुताम् । उभये सविधे ध्यात्वा पूजयेत्साधकोत्तमः ॥
ओं ह्रीं उषादेव्यै नमः ॥ ओं ह्रीं प्रत्युषायै नमः ॥

[8] Les vers 96, 97*a*, 98*b*, 99*b* et 100*a* sont cités dans le *Śaivasiddhāntasaṃgraha*, ms. p. 98.

[9] A, B et S: श्यामवर्णमिति ज्ञेयं द्विनेत्रं च द्विनासिकम्.

[10] B: अतः परम् ; S: इति स्मृतम्.

[11] A: भास्करं दक्षभागेन आवाहनं तु पूजयेत्.

[12] A et B: एकाननं द्विनेत्रं च ; S: एकाननद्विनेत्रा च.

[13] A et B: द्विहस्तं च द्विपादकम् ; S: द्विहस्ता श्वेतवर्णका.

[14] A et B: श्वेतवर्णमिति ज्ञेयं.

[15] A: सर्वाङ्गं कुङ्कुमालयम् ; B: सर्वाङ्गं कुङ्कुमाङ्कितम्.

[16] A: सर्वाभरणभूषेण ; B: सर्वाभरणभूष्यं च.

[17] S: कुमुदं दक्षिणे हस्ते वामहस्तेन चम्पकम्.

[18] A: विश्वरूपपरायणी ; B: विश्वरूपपरायणीम्.

[19] A et B: आदित्यवामभागेन.

[20] A: आवाहनं सुपूजयेत् ; B: आवाह्याथ सुपूजयेत्.

[1]धूपं दीपं च नैवेद्यं ताम्बूलं छत्रचामरम्। पाद्यमाचमनं [2]चैवाप्यर्घ्यं तु [3]मुखवासकम्॥ १०१॥
[4]दूर्वाक्षतांश्च पुष्पं च [5]मकुटे चैव योजयेत्। अष्टादशकसंख्याकनमस्काराः प्रदक्षिणम्॥ १०२॥
यथाशक्ति च दण्डेन [6]स्तोत्रं नृत्तं तु योजयेत्।

[अष्टपुष्पार्चनम्]

अष्टपुष्पं ददेत्पश्चान्मकुटे[7] मूर्ध्नि कर्णके॥ १०३॥
हृदये नाभिगुह्ये च जान्वधः पादयोरपि[8]।

[अष्टपुष्पाणि]

अर्कपङ्कजबिल्वानि नन्द्यावर्तं च पाटली॥ १०४॥
करवीरं चम्पकं च नीलोत्पलमथाष्टमम्। [9]अस्त्राद्यासनपर्यन्तं मन्त्रं जप्यात्तु देशिकः॥ १०५॥
[10]सर्वं देवादि संयोज्य पराङ्मुखार्घ्यं तु पूजयेत्। अर्घ्यं पराङ्मुखं दत्त्वा संहारमुद्रया स्पृशेत्॥१०६॥
[11]चण्डपूजने पश्चात्तदासनमिति कल्पयेत्। मूर्तिमन्त्रेण चावाह्य [12]मूलेनावाहयेत् पुनः॥ १०७॥
स्थापनं संनिधानं च [13]संनिरोधनकं ततः। वस्त्राभरणलेपं च सर्वद्रव्येण योजयेत्॥ १०८॥
पाद्यमाचमनं चैव नैवेद्यं [14]च प्रदापयेत्। [15]किंचिज्जपेन संस्कृत्य निर्माल्येन सुयोजयेत्॥ १०९॥
संहारमुद्रया चैतन्मन्त्रेण [16]च जपं तथा। भस्म निक्षिप्य [17]सर्वाङ्गे कृत्वा न्यासं प्रवेशयेत्॥ ११०॥
[18]सौरपूजा त्वियं प्रोक्ता [19]शिवपूजा ततः परम्॥ १११॥

इति [20]रौरवागमे [21]सौरपूजाविधिपटलः

---

1 A: धूपदीपं.
2 A et B: चैव अर्घ्यं.
3 A: मुखवासने.
4 A et B: दूर्वाक्षतं च.
5 A et B: मकुट.
6 A et B: स्तोत्रनृत्तं.
7 A et B: मुकुटे pour मकुटे.
8 B: पादमेव च pour पादयोरपि.
9 A: अस्त्रादि आसनान्तं च.
10 A: सर्वदेवादि.
11 A: चण्डपूजेन.
12 A: मूलमावाहनं ; B: मूलमावाहयेत्.
13 A: संनिरोधेन योजयेत्.
14 B: तु.
15 B: किंचिज्जप्त्वा तु मूलेन.
16 B: एव pour च.
17 A et B: सर्वाङ्गं.
18 B: प्रोक्ता तु सौरपूजेयं.
19 B: शिवपूजां.
20 B: रौरवे pour रौरवागमे.
21 B: सौरपूजाविधिर्नाम तृतीयः पटलः.

[[1]क्रियापादः]

[प्रथमः पटलः]

[मन्त्रोद्धारविधिः]

[रुरुरुवाच][1]—

[2]कैलासशिखरासीन देवदेव त्रिलोचन[3] । सर्वलोकहितार्थाय रौरवं वद मे प्रभो ॥ १ ॥

ईश्वर उवाच—

[4]अतः परं प्रवक्ष्यामि मन्त्रोद्धारविधिक्रमम् । कुर्यात्सदम्बुजं[5] पीठे साष्टपत्रं सकर्णिकम् ॥ २ ॥

[6]नालिकेरसमायुक्तं मध्ये[7] कूटाक्षरं न्यसेत् । षष्ठं त्रयोदशान्तं च बिन्दुनादसमन्वितम्[8] ॥ ३ ॥

---

[1] Les indications entre crochets ont été ajoutées par nous.

[2] Le ms. de Kīlvelur (A) ajoute au début deux vers que nous citons ci-dessous. Le ms. de Dharmapuram (B) omet le second, et celui de KuNRakuḍi (C) omet les deux. Ils semblent d'ailleurs être sans relations avec cet *āgama*, peut-être ajoutés par un copiste.

भवसंचितपापौघविध्वंसनविचक्षणम् । विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

*मुक्तकं वृषमारुह्य भिक्षामटति शंकरः । गुरुसेन [गरुडेन?] विना याति गगने मधुसूदनः ॥

*मुक्तकं मुच्यते स्मेति मुच्+क्तः = qui a été mis en liberté.

[3] कैलासशिखरासीनं देवदेवं त्रिलोचनम्—A.

[4] Ce passage montre qu'il y a une section précédant celle-ci; et nous pouvons penser que c'est du *Vidyāpāda* qu'il s'agit.

[5] कुर्यात्सदाम्बुजं—C; कुर्याद्धृदम्बुजे—B.

[6] नाळिकेर—A, B.

[7] मध्यकूटाक्षरं—A.

[8] Les *mantra-śāstra* répartissent les lettres en 8 classes:

1	अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ऌ	ए	ऐ	ओ	औ	अं	अः
2	क	ख	ग	घ	ङ										
3	च	छ	ज	झ	ञ										
4	ट	ठ	ड	ढ	ण										
5	त	थ	द	ध	न										
6	प	फ	ब	भ	म										
7	य	र	ल	व											
8	श	ष	स	ह	ळ	क्ष									

Le texte indique que le *mūla-mantra* doit être formé ainsi: "Joindre le sixième avec le treizième, et ceci avec *bindu* et *nāda*"; l'indication de la classe n'est pas donnée. Le treizième ne peut appartenir qu'à la classe I et c'est औ. Il serait naturel dans ce cas de comprendre sixième comme: sixième de la même classe, mais ce serait ऊ; le résultat serait वौ qui serait plutôt donné comme व + ओ; car les *mantra-śāstra* décomposent les syllabes en consonne + voyelle, plutôt qu'en voyelle + voyelle.

मूलमन्त्रमिदं प्रोक्तं ततोऽङ्गानि प्रकल्पयेत्। [1]हृदयादिषडङ्ग[2] च [3]पञ्चब्रह्मास्त्रराजकम् ॥ ४ ॥

Il semble que l'usage de l'école du sud des *mantra-śāstra* (où les mss. sont écrits en grantha et qui a ses conventions particulières) soit de se référer à la dernière classe (शवर्ग) lorsqu'il est impossible de prendre la première (अवर्ग) pour former un *mantra*.

Les *āgama* furent écrits en grantha dans l'Inde du sud et nous pouvons assumer que la même convention leur est applicable; dans ces conditions, le sixième sera क्ष and le *mantra* क्षौं. C'est un des *bīja-mantra* les plus importants des *āgama*.

[1] Les *Ṣaḍaṅga* (six *aṅga*) sont: hṛdaya, śiras, śikhā, kavaca, netra et astra. Ces six *aṅga* sont précédés par ओं suivi de हां, हीं, हूं, हैं, हौं et हः respectivement. Ils sont mis au datif et terminés normalement par नमः qui est remplacé par स्वाहा pour le sacrifice du feu (homa) et dans des cas exceptionnels (kāmya karma) par स्वधा, वषट्, वौषट्, हुं et फट्.

cf: ओंकारपूर्वका मन्त्रा नमस्कारान्तयोजिताः। (*Niśvāsakārikā*) et काम्यकर्मविधाने तु नमःस्वाहेत्यादिजातिषट्कयुतानुच्चारयेत् (मृगेन्द्रपद्धतिव्याख्याने)।

(Nirmalamaṇi, commentaire de l'*Aghoraśivācāryapaddhati*, p. 26)

La forme normale est donc: ओं हां हृदयाय नमः, ओं हीं शिरसे नमः, ओं हूं शिखायै नमः, ओं हैं कवचाय नमः, ओं हौं नेत्रेभ्यो नमः, ओं हः अस्त्राय नमः।

Noter la différence entre ces formules et celles qui sont utilisées par les tenants de l'école védique: ओं हृदयाय नमः, ओं शिरसे स्वाहा, ओं शिखायै वषट्, ओं कवचाय हुं, ओं नेत्रत्रयाय वौषट्, ओं अस्त्राय फट्।

Ici le dernier membre de chaque formule est fixe et ne dépend pas de l'utilisation du *mantra*, qui d'ailleurs est unique (aṅga nyāsa).

On explique l'usage actuel de placer au début des formules les syllabes हां etc., par le fait que हौं serait la syllabe-racine pour Śiva ; s'il en est ainsi, puisque la syllabe-racine pour Śiva semble être क्षौं d'après *Rauravāgama*, les *mantra* ici devraient avoir क्षां, क्षीं, क्षूं, क्षैं, क्षौं, क्षः au lieu de हां, हीं, हूं, हैं, हौं, हः।

Tous les prêtres de l'Inde du sud, en particulier dans le pays tamoul, suivent pour les questions rituelles les manuels écrits par Aghoraśivācārya (l'un des 18 *ācārya* śivaites) au 12e siècle et qui sont eux-mêmes basés sur l'ensemble des *āgama* et sur d'autres manuels antérieurs, tel *Somaśambhupaddhati*. Ces manuels d'Aghoraśivācārya traitent de tous les sujets relatifs au rite et sont suivis mot pour mot par les prêtres.

Ainsi les différentes écoles d'*āgama* semblent purement théoriques de nos jours, et nous ne pouvons espérer les trouver confirmées par la pratique actuelle.

[2] षडङ्गांश्च—B.

[3] **पञ्चब्रह्ममन्त्राः**

ओं हों ईशानमूर्धाय नमः
ओं हें तत्पुरुषवक्त्राय नमः
ओं हुं अघोरहृदयाय नमः
ओं हिं वामदेवगुह्याय नमः
ओं हं सद्योजातमूर्तये नमः

क्षुरिकाबीजमुख्यं च व्योमव्यापि[1] च चिन्तयेत् । अङ्गमन्त्रा[2] इमे प्रोक्ता मूलमन्त्रस्य[3] सुव्रत ॥ ५ ॥
नपुंसका अरहिता[4] एकादश[5] समन्विताः । एकादशाक्षरेष्वेषु द्वितीयं च चतुर्थकम् ॥ ६ ॥
षष्ठाष्टमं च दशममेकादशमतः[6] परम् । [7]प्रथमं च द्वितीयं च पूर्वतस्तु[8] प्रदक्षिणम् ॥ ७ ॥
दलमूले[9] न्यसेद्धीमान् द्वितीयावरणे ततः । पञ्चमं सप्तमं चैव नवमं च पुरादिषु ॥ ८ ॥
अभिधानं चतुर्थ्यन्तं [10]जातिषट्कसमन्वितम्[11] । विन्यसेद्धृदयादीनि[12] [13]सद्यादीनि क्रमादिषु ॥ ९ ॥
षष्ठस्य [14]च द्वितीयं च [15]चतुर्थाद्यक्षरान्वितम् । [16]ओंकारादिविसर्गान्तमेतत् पाशुपतास्त्रकम्[17] ॥ १० ॥

---

cf: *Kāraṇāgama* (cité dans le *Sakalāgamasārasaṃgraha*, p. 25):

सद्यं वाममघोरं तु तत्पुरुषेशानकौ द्विजाः । ब्रह्माण्यनुक्रमेणैव नमस्कारान्तकाणि तु ॥
हृदयं च शिरश्चैव शिखा कवचमेव च । नेत्रशस्त्रषडङ्गानि कीर्तितानि क्रमेण तु ॥
नमः स्वाहा वषड् वौषड् हुंफट्काराः क्रमेण तु । एते वै जातिषट्काश्च हृदाद्यस्त्राणुकैयुताः ॥

Les cinq *brahma-mantra* et les six *aṅga-mantra* sont appelés *Saṃhitā-mantra.*

[1] व्योमव्यापिमन्त्रम् (ou दशाक्षरमन्त्र)—ओं आं ईं ऊं व्योमव्यापिने ओं नमः । ou ओमामीमूं व्योमव्यापिने ओं नमः .

cf: *Kāraṇāgama*, I. 2. 32-34:

प्रणवः प्रथमं प्रोक्तं आ ई ऊ तदनन्तरम् । व्योमव्यापिन् चतुर्थं च तदूर्ध्वं प्रणवं भवेत् ॥
अस्मिन् तन्त्रे विशेषेण दशाक्षरमिति स्मृतम् । हुंफट्कारविसर्गान्तं मन्त्रं पाशुपतं स्मृतम् ॥

[2] अङ्गमन्त्रान्मते प्रोक्ता—C.
[3] मूलमन्त्रं च—B.
[4] नपुंसकोकारहिता—A ; नपुंसकाकारहिता—B.
[5] एकदश—A.
[6] ततः pour अतः—A.
[7] प्रथमस्य pour प्रथमं च—A.
[8] पूर्वारभ्य —A ; पूर्वबाह्य—C.
[9] दलं मूले—B.
[10] जाती pour जाति—A.
[11] जाति ici est un terme technique pour les mots suivants नमः, स्वाहा, स्वधा, वषट्, हुं et फट् qui terminent les mantras—cf. note 1, p. 18.
[12] C omet: विन्यसेद्धृदयादीनि ; हृदयादीनि = हृदयादिषडङ्ग ; voir note 1 p. 18.
[13] सव्यादीनि—B.
[14] यद् pour च—C.
[15] चतुर्थ्यादि pour चतुर्थादि—B.
[16] अंकारादि—A; अकारादि—B.
[17] **पाशुपतास्त्रम्**—"ओं श्रीं पं शुं हुं फट्" ou "ओं श्रीं पं शुं हुं पाशुपतास्त्राय फट् नमः" ।

Le vers qui donne les composantes du *pāśupatāstra* semble corrompu ; cf. *Kāraṇāgama* I, 2, 34 et *Īśānaśivagurudevapaddhati*, p. 33.

षष्ठवर्गद्वितीयं च चतुर्थाद्येन भूषितम् ।
द्वितीये प्रथमार्णं तु पञ्चमाद्येन संयुतम् ॥
एतत् पाशुपतास्त्रं स्यात् सोपदेशं यथाक्रमम् ॥

Īśānaśivagurudevapaddhati, p. 33

[1]अस्त्रराजं च नैर्ऋत्यां दले चोपदले न्यसेत् । षड्वर्गात् पञ्चमं[2] चैव प्रथमेऽष्टममक्षरम् ॥ ११ ॥
साग्निबीजमनुस्वारं[3] प्रथमं बीजमुच्यते । तृतीयं च [द्वाद]शं[4] [5]तदादौ [6]चैवाष्टमाक्षरम् ॥ १२ ॥
यान्तमारूढमत्रापि[7] सानुस्वारं [8]द्वितीयकम् । [9] षष्ठं चैवाष्टमे वर्गे यान्तं बिन्दुसमन्वितम् ॥ १३ ॥
. . . . [10]संयुक्तं तृतीयं बीजमुच्यते । बीजमुख्यमिदं ख्यातं वरुणादिदलत्रये ॥ १४ ॥
विन्यसेत्सोमपर्यन्तं[11] दले[12] [यार्धान्तरे तथा] । [13]ओं शिं छिं त्र्यक्षरं ह्येतल्क्षुरिकामन्त्रसंज्ञकम्[14] ॥ १५ ॥

---

[1] अस्त्रराजान नैर्ऋत्याद् दळेदुपदळे न्यसेत् ।—A; नैर्ऋत्यामस्त्रराजं च दले चोपदले न्यसेत्—B ; अस्त्रराजान नैर्ऋत्य . . . . दुपलं न्यसेत्—C.

अस्त्रराजः = पाशुपतास्त्रम् ; voir note 17, p. 19.

[2] पञ्चमे—D. [3] अनुस्वार pour अनुस्वारं—C. [4] तृतीयं च [तुर्थं]शं तु—B.

[5] तु आदौ pour तदादौ—A, B et C. [6] वै च pour चव—B.

[7] आरूढमात्रापि pour आरूढमत्रापि—B et C. [8] तृतीयकम्—C. [9] षष्ठमं चाष्टमे—C.

[10] संयुतं—C. [11] पर्यन्ते—B. [12] दले यान्तार्ध . . . . A et C; दले यान्तार्थ . . .—B.

[13] विश्रिश्छीश्रीमीक्षीकृत च वक्षीमघकामन्तसंज्ञकम्—A ; विनिश्रिश्रिमिक्षिकृत च . . .—B; विच्छिखि च मीक्षिकृत् . . चव क्षुरिकामन्त्रसंस्कृतम्—C.

क्षुरिकामन्त्रम्—"ओं शिं छिं क्षुरिकास्त्राय फट्"

Kāraṇāgama I, 2, 10-13 donne la formation de ce *mantra* et le considère comme *mantra* de Śiva: मन्त्रः प्रोक्तः शिवस्येह जगत्सृष्टिलयात्मकः ।

चिच्छचीच्छयक्षरं गृह्य कृद्वर्णसंयुता ।
क्षुरिकाद्यष्टवर्णं तु सर्वकार्येषु पूजितम् ॥
Kāraṇāgama, I, 2, 34-35

ओश्विविवीचिदिक्षि उत् क्षुरिकामन्त्रमुत्तमम् ।
Suprabhedāgama, 1, 3, 55

वातुले—शिकारं प्रथमं बीजं छिकारं तु द्वितीयकम् ।
क्षुकारः स्यात्तृतीयं तु रिकारं च चतुर्थकम् ॥
ककारं पञ्चमं बीजं स्त्रकारं षष्ठवर्णकम् ।
यकारं सप्तमं बीजं फट्कारं चाष्टमं भवेत् ॥
क्षुरिकास्त्रमनुश्चाष्टवर्णोऽयं स्याद्रसप्रदः ॥
Śivāgamaśekhara, II, p. 377

Tous les mss. de cet *āgama* et de tous les *āgama*, et les éditions imprimées des *āgama* déjà publiés tels que *Kāmika*, *Kāraṇa*, *Suprabheda*, donnent la formation de ce mantra dans des vers corrompus. Le texte est ici corrigé conformément à la pratique actuelle.

[14] B omet: क्षुरिकामन्त्रसंज्ञकम्

न्यसेदीशदले[1] विद्वान् दले [2]यार्धान्तरे विदुः । दलानामग्रपूर्वादि [3]ओं शिवाय नमो नमः ॥ १६ ॥
व्योमव्यापिन्निदं[4] मन्त्रं सर्वसिद्धिप्रदायकम् । नमः स्वाहा वषड् वौषड् हुं फट्कारान्[5] क्रमेण तु ॥ १७ ॥
हृदयादिषु[6] नेत्रान्तेष्वङ्गे[7] संयोजयेद्बुधः । अनुस्वारसमायुक्ता ब्रह्माङ्गाः परिकीर्तिताः ॥ १८ ॥
तथास्त्रं सविसर्गं [8]स्याद्विन्यसेदेवमेव तु । [9]अनन्ताद्यानुमाद्याश्च लोकेशांश्च क्रमेण तु ॥ १९ ॥
अस्त्राणामङ्गकानां च[10] वृषादीनां तथैव च । अन्येषामपि देवानामाद्यक्षरं[11] तु मन्त्रकम् ॥ २० ॥
प्रणवादिचतुर्थ्यन्त[12]स्वस्वनामसमन्वितम् । नमस्कारान्तसंयुक्तं सर्वेषां मन्त्रमुच्यते ॥ २१ ॥

[13]इति श्रीमद्रौरवतन्त्रे क्रियापादे मन्त्रोद्धारो नाम प्रथमः पटलः

---

[1] न्यसेदीशदलैर्विद्वान्—C. [2] याधोन्तरे—B. [3] द्रां pour ओं—B.
[4] व्योमव्यापि इदं—A; व्योमव्यापिरिदं—C. [5] हुं फट्कारक्रमेण तु—A, B et C.
[6] दु pour षु—C. [7] अन्ये pour अङ्गे—A, B et C. [8] च pour स्याद्—C.
[9] अनन्ताद्या उमाद्याश्च लोकेशा . . . .—A; अनन्ताद्यानुमाद्याश्च लोकेशा(श्च क्रमेण तु)—B; अनन्ताद्यानुमाद्याञ्च लोकेशान् . . . . .—C.
[10] अस्त्राणामङ्गलानां च—A; अस्त्राणां मङ्गलानां च—B et C.
[11] आद्याक्षरं pour आद्यक्षरं—A et B. [12] °चतुर्थ्यन्तं स्वस्व°—A.
[13] इति श्रीरौरवतन्त्रे मन्त्रोद्धारपटलः प्रथमः—A; इति रौरवतन्त्रे मन्त्रोद्धारो नाम प्रथमः पटलः—B; इति श्रीमद्रौरवतन्त्रे मन्त्रोद्धारः प्रथमः पटलः—C.

[द्वितीयः पटलः]

[कलान्यासविधिः][1]

अतः परं प्रवक्ष्यामि कलान्यासविधिक्रमम् । अष्टौ त्रयोदशाष्टौ च चतुःपञ्च तथैव च ॥ १ ॥
सद्यादीशानपर्यन्तं कलाभेदा[2] यथाक्रमम्[3] ।

[सद्योजातकलाः]

(१) [4]ओं[5] सद्योजातं प्रपद्यामि [6]सिद्धयै नमः । (२) ओं[7] सद्योजाताय[8][वै]नम ऋद्धयै नमः ।
(३) ओं[9] भवाय [10]मुदल्यै नमः । (४) [11]ओं भवाय लक्ष्म्यै नमः ।
(५) ओं अनादिभवाय[12] मेधायै नमः । (६) ओं[13] [14]भवस्व मां कान्त्यै नमः ।
(७) ओं[15] भवाय [16]स्वधायै नमः । (८) ओं[17] [18]उद्भवाय प्रजायै नमः ॥[19]

---

[1] Pour *kalānyāsavidhi* voir: *Kāmikāgama*, I, 4, 93-117, *Kāraṇāgama*, I, 27, *Cintyāgama*, *paṭala*, 8, *Ajitāgama*, *paṭala*, 21, *Yogajāgama*, ms. p. 50-52, *Acintyaviśvasādākhya*, *paṭala*, 13, *Makuṭāgama*, *paṭala* 4.

[2] कलाभेदो—B.

[3] cf. *Kriyādīpikā* p. 38-39.

सद्यः कलाभिरष्टाभिर्वामदेव्यैस्त्रयोदशैः । अघोराभिरथाष्टाभिश्चतसृभिर्वक्त्रकस्य च ॥
ऐशाभिः पञ्चभिश्चैव पादाद्य विन्यसेत्क्रमात् ॥
(citation de la *Santānasaṃhitā*)

[4] C omet: ओं सद्योजाताय à प्रजायै नमः । [5] B omet: ओं. [6] सिद्धे—A.
[7] B omet: ओं. [8] सद्योजाताय ऋद्धै नमः—A; सद्योजाताय नमो ऋद्धयै नमः—B.
[9] B omet: ओं.
[10] D'après la *Santānasaṃhitā*, la leçon serait ओं भवाय धृत्यै नमः, voir note 19.
[11] B omet: ओं. [12] अनादिभुवे—B. [13] B omet: ओं.
[14] ओं भवस्वमाय कान्तये नमः—A. [15] B omet: ओं. [16] A omet स्वधायै.
[17] B omet: ओं. [18] उद्भवाय नमो पूजायै नमः—B; ओं उद्भवाय प्रजायै नमः—A.
[19] cf. *Kriyādīpikā* p. 39 pour les huit *kalā-śakti* de Sadyojāta (citation tirée de la *Santānasaṃhitā*):

पादयोर्हस्तयोश्चैव [1]नासाग्रशिरसोस्तथा ॥ २ ॥ [2]बाहुद्वयोर्विशेषेण क्रमात्सद्यकला[3] न्यसेत् ।

[वामदेवकलाः]

(१) [4]ओं[5] वामदेवाय नमो रजायै नमः[6] । (२) [7]ओं ज्येष्ठाय रक्षायै नमः ।
(३) ओं[8] रुद्राय रत्यै नमः । (४) ओं[9] कालाय [10]पाल्यै नमः ।
(५) ओं[11] कलाय कामायै नमः । (६) ओं[12] [13]विकरणाय संयमिन्यै[14] [15]नमः ।
(७) [16]ओं [17]बलाय क्रियायै [18]नमः । (८) ओं विकरणाय [19]तृष्णायै [20]नमः ।
(९) ओं बलाय मोहायै [21]नमः । (१०) ओं प्रमथनाय क्षुधायै [22]नमः ।
(११) ओं सर्वभूत[दमन]ाय वित्तायै [23]नमः । (१२) ओं मनोन्मनाय भ्रामिण्यै [24]नमः ।
(१३) ओं उन्मनाय ग्रामण्यै नमः ।

सिद्धिर्ऋद्धिर्धृतिर्लक्ष्मीर्मेधा कान्तिः स्वधा प्रजा ।
सद्यस्याष्टकलाशक्तिरीरिता नन्दिकेश्वर ॥

à noter que les mss. A et B de *Rauravāgama* donnent मुदली comme l'une des *kalāsakti* au lieu de धृति. cf. note 10, p. 22.

[1] नासाग्रशिरसि तथा—A ; नासाग्रे शिरसि तथा—B. [2] बाहुद्वये विशेषेण—B.
[3] °कलां—C. [4] C omet: ओं वामदेवाय a ग्रामण्यै नमः. [5] B omet: ओं.
[6] ओं वामदेवाय नमो राजरायी नमः—A. [7] B omet: ओं. [8] B omet: ओं.
[9] B omet: ओं. [10] पाद्यै—A. [11] B omet: ओं ; A omet: कलाय कामायै नमः
[12] B omet: ओं. [13] बलविकरणाय—A; कलविकरणाय—B.
[14] संयभिनी—B. [15] B omet: नमः. [16] B omet: ओं.
[17] बलक्रियायै—pour बलाय क्रियायै—B. [18] B omet: नमः । et ओं. [19] मृष्णायै—A.
[20] B omet: नमः । et ओं. [21] B omet: नमः । et ओं. [22] B omet नमः । et ओं.
[23] B omet नमः et ओं. [24] B omet नमः et ओं.

La *Kriyādīpikā* qui fonde son autorité sur la *Santānasaṃhitā* donne pour les *śakti* associées à Vāmadeva l'ordre suivant:

[1] रजा [2] रतिः [3] पाल्यरक्षे [4] [5] कला [6] संयमिनी [7] क्रिया ।
[8] तृष्णा [9] मोहा [10] क्षया [11] चिन्ता [12] मोहिनी [13] भ्रामिणी तथा ।
वामदेवकलाशक्तिस्त्रयोदश समीरिता ॥

Mais dans notre texte leur ordre est:

[1] रजा [2] रक्षा [3] रतिः [4] पाली [5] कामा [6] संयामिनी [7] क्रिया [8] तृष्णा [9] मोहा [10] क्षुधा [11] वित्ता [12] भ्रामिणी [13] ग्रामणी ।

Noter les variantes: पाली pour पाल्या, कामा pour कला, क्षुधा pour क्षया, वित्ता pour चिन्ता et ग्रामणी pour मोहिनी ।

Le *Kiraṇāgama* (p. 171. 5-8) donne pour les treize noms de Śiva (Brahma) associés à Vāmadeva la liste suivante:

गुह्ये गुदे च ऊर्वोश्च जान्वोर्जङ्घाद्वयोरपि[1] ॥ ३ ॥ [2]स्फिक्कटिद्वयपार्श्वेषु वामदेवकला न्यसेत् ।

[अघोरकलाः]

(१) [3]ओं अघोरेभ्यस्तमायै नमः । (२) ओं अथ घोरेभ्यो [4]धरायै [5]नमः ।
(३) [6]ओं घोर रक्षायै नमः । (४) ओं [7]घोरतरेभ्यो [8]निष्ठायै नमः ।
(५) [9]ओं [10]सर्वतो [11]धृत्यै [12]नमः । (६) [13]ओं सर्व क्षान्त्यै नमः ।
(७) [14]ओं सर्वेभ्यो नमस्ते अस्तु [15]स्मृत्यै नमः । (८) [16]ओं रुद्ररूपेभ्यः क्षमायै नमः ।

हृदये कण्ठदेशे [17]चाप्यंसयोरुभयोरपि ॥ ४ ॥ [18]नाभ्यामुदरपृष्ठोरस्वघोरस्य कला न्यसेत् ।

(१) [19]ओं तत्पुरुषाय विद्महे निवृत्यै नमः । (२) [20]ओं महादेवाय धीमहि प्रतिष्ठायै [21]नमः ।
(३) [22]ओं तन्नो रुद्रः विद्यायै नमः । (४) [23]ओं प्रचोदयाच्छान्त्यै[24] [25]नमः ।

---

[1] वामदेव, [2] ज्येष्ठ, [3] श्रेष्ठ, [4] रुद्र, [5] काल, [6] कल, [7] विकरण, [8] बल, [9] विकरण, [10] बल, [11] बलप्रमथन, [12] सर्वभूतदमन, [13] मनोन्मन ।

Mais dans notre texte, श्रेष्ठ (N° 3) est omis, et उन्मन est ajouté comme treizième; remarquer les variantes: प्रमथन pour बलप्रमथन (N° 11) ; सर्वभूत pour सर्वभूतदमन (N° 12).

cf. *Suprabhedāgama*, 4, 3, 240-247.

सद्यमन्त्रकलाश्चाष्टौ वामाख्यस्य त्रयोदश । अघोरस्य कलाश्चाष्टौ पुरुषस्य चतुष्कलाः ॥
ईशानस्य कलाः पञ्च पञ्चब्रह्मसमुद्भवाः । अष्टत्रिंशत्कलाश्चैताः शृणु वै शैषिणः कलाः ॥
शशिनी चाङ्गदा इष्टा मरीची ज्वलिनी तथा । ईशानस्य कलाः पञ्च प्रोक्तास्तत्पुरुषे शृणु ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च । पुरुषस्य कला ह्येताश्चतस्रस्तु विशेषकाः ॥
तमो मोहः क्षया निष्ठा व्याधिमृत्युक्षुत्तृट् । कलाश्चाष्टौ त्वघोरस्य वामदेवकलाः शृणु ॥
रजो राक्षा रती पाल्या कामा संयमिनी क्रिया । हुं क्रोधिका च धात्री च ब्राह्मिणी मोहिनी वरा ॥
त्रयोदश कला ह्येताः सद्योजातकलाः शृणु । सिद्धिर्वृद्धिर्द्युतिर्लक्ष्मीर्मेधा कान्तिः स्वधा धृतिः ॥
सद्योजातकला ह्यष्टौ भूताक्षरसमन्विताः ॥

[1] जान्वोर्जङ्घाद्वयेऽपि च—B. [2] स्पृक्—A; स्फृक्—B.
[3] B omet: ओं; C omet les huit lignes suivantes. [4] मोहायै—B.
[5] B omet नमः. [6] B omet ओं. [7] घोरतरेभ्यश्च—B. [8] निद्रायै—B.
[9] B omet ओं. [10] सर्वेभ्यो—B. [11] मृत्यवे—B. [12] B omet नमः.
[13] B omet ओं. [14] B omet ओं. [15] भृतायै—B. [16] B omet ओं.
[17] A, B et C omettent च.
[18] A: नाभिपृष्ठोरुरसाश्चैव अघोराभ्यः कला न्यसेत् ।; C: नाभिपृष्ठोरसोश्चैव अघोरस्यकलां न्यसेत् ।; B: नाभिपृष्ठोरसोश्चैवं अघोरस्य कला न्यसेत् ।
[19] C omet les deux lignes suivantes ; B omet ओं. [20] B omet ओं.
[21] B omet नमः. [22] B omet ओं. [23] B omet ओं.
[24] A: प्रचोदयाश्चाज्यै. [25] B omet नमः.

ऊर्ध्वे च दक्षिणे वक्त्रे त्वपरे वामवक्त्रके ॥ ५ ॥
पुरुषस्य [1]कला हीष्टा प्रमाणं ह्यूर्ध्ववक्त्रके । विन्यसेत्तु क्रमणैव चैवं वक्त्रकला[2] रुरो ॥ ६ ॥

[ईशानकलाः]

(१) [3]ओं ईशानस्सर्वविद्यानां शशिन्यै नमः । (२) ओं[4] ईश्वरः सर्वभूतानाम् अङ्गदायै नमः ।
(३) ओं ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मेष्टायै[5] नमः । (४) ओं शिवो [6]मे अस्तु मरीच्यै नमः ।
(५) ओं [7]सदाशिवों ज्वालिन्यै नमः ।
[8]ऊर्ध्वमूर्धनि पूर्वादिमूर्धसूक्तक्रमान्न्यसेत् । [9]शिरसि स्याच्छिरोमन्त्रं शिखायां तु शिखां न्यसेत् ॥ ७ ॥
स्तनयोः कवचं [10]न्यस्य [11]नेत्रं नेत्रेषु विन्यसेत् । अस्त्रं हस्ततले [12]न्यस्य [13]सूक्ष्मदेहे शिवस्य तु ॥ ८ ॥
एवं क्रमेण विन्यस्य [14]देहाभ्यर्चनमाचरेत् । [15]स्थूलदेहं न्यसेदेवं देशिकस्य विशेषतः ॥ ९ ॥
[16]देवेशस्यार्चनार्हत्वाच्छिवदेहं तदुच्यते ।
[17]देव्यर्चने च [18]देवीनामुद्धारं ब्रह्मपञ्चकैः । [19]तत्तद्बीजैः षडङ्गैश्च सूक्ष्मदेहं तु विन्यसेत् ॥ १० ॥

[20] इति श्रीमद्रौरवतन्त्रे क्रियापादे कलान्यासविधिर्नाम द्वितीयः पटलः

---

[1] A: कला हीष्टा प्रमाणं ह्यूर्ध्ववक्त्रके; B: कला ह्यष्टप्रमाणादूर्ध्ववक्त्रके.

[2] Comparer ceci avec les तत्पुरुषकला de अघोरशिवाचार्य. L'ordre des kalā est ici निवृत्ति, प्रतिष्ठा, विद्या et शान्ति, mais dans l'autre texte il est inversé c. à. d शान्ति, विद्या, प्रतिष्ठा et निवृत्ति.

Lé texte semble corrompu; l'étude comparée des autres textes suggère de corriger les vers *5b* et *6a* de la façon suivante:

पूर्वे च दक्षिणे वक्त्रे तूत्तरे वामवक्त्रके । पुरुषस्य कला हीष्टा प्रमाणं नोर्ध्ववक्त्रके ॥

[3] C omet les cinq demi-vers suivants; B omet ओं. [4] B omet ओं.
[5] A: इष्टयै pour इष्टायै. [6] A: मेऽस्तु. [7] A: सदाशिवाय pour सदाशिवों.
[8] A: ऊर्ध्वमूर्धनि पूर्वादिषु मूर्धत्युक्तक्रमान्न्यसेत् ।; B: ऊर्ध्वमूर्ध्नां च पूर्वादिमूर्ध्नि चोर्ध्वे क्रमान्न्यसेत् ।; C: ऊर्ध्वमूर्धनि पूर्वादिमूर्धसु च क्रमान्न्यसेत् ।
[9] A: शिरस्याच्च शिरोमन्त्रे. [10] C: न्यस्त्वा. [11] A: नेत्रे. [12] A: न्यस्त्वा.
[13] A: सूक्ष्मदेहं. [14] A: देह्यर्चनमाचरेत्. [15] C: स्थूलदेहे न्यसेदेव.
[16] A देवेशमर्चनार्हस्याच्छिवदेहं. [17] A देव्यर्च्यान्यच्च. [18] A, B et C देवानाम् .
[19] A: षडङ्गैस्तत्तद्बीजैस्तु.
[20] A: इति श्रीरौरवतन्त्रे कलान्यासपटलः; B: इति श्रीरौरवतन्त्रे कलान्यासो नाम द्वितीयः पटलः; C: इति श्रीमद्रौरवतन्त्रे कलान्यासविधिर्नाम द्वितीयः पटलः.

Kalā-nyāsa consiste en ceci: attouchements rituels des différentes parties de son propre corps ou du corps de Śiva, avec accompagnement de formules ou *mantra* contenant les noms des 38 *kalā*. La base sur laquelle sont construits les 38 *mantra* utilises à cet effet est constituée par cinq *mantra* védiques tirés du *Taittirīya Āraṇyaka* (x, 43 à 47) et dont chacun est ici mis en relation avec l'un des cinq visages de Śiva: Sadyojāta, Vāmadeva, Aghora, Tatpuruṣa, Īśāna.

Voici ces versets:

सद्योजातं प्रपद्यामि सद्योजाताय वै नमः । भवे भवे नातिभवे भवस्व[1] मां भवोद्भवाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ।[2]

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः [3]शर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।
तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम् ।

Pour former les 38 *nyāsa-mantra*, chacun des 5 *mantra* précédents est divisé en un certain nombre de parties: respectivement 8, 13, 8, 4, 5. Chaque partie précédée de ओं et suivie du nom de la *kalā* au datif, puis de नमः, constitue un *mantra*. Ex: ओं सद्योजातं प्रपद्यामि सिद्ध्यै नमः.

De tous les *āgama* que nous avons pu reunir jusqu'ici, (et dont aucun n'est complet) le *Rauravagama* est le seul qui donne en prose *in extenso* les *kalā-nyāsa-mantra*; les autres donnent sous une forme versifiée, les indications nécessaires pour former les *mantra*, mais plusieurs interprétations sont possibles, et il est difficile dans ces conditions de comparer avec précision les différentes versions, on peut néanmoins apercevoir des différences assez importantes, dans la division en sections des *mantra* védiques, etc . . .

Mais les manuels de rituel utilisés de nos jours par les prêtres, tels la *Kriyākramadyotikā* d'Aghoraśivācārya, *l'Īśānaśivagurudevapaddhati*, etc., qui suivent apparemment le *Kāmikāgama* . . . donnent aussi une version complète des *Kalā-nyāsa-mantra*, à peu près la même dans tous (les variantes sont donnees en note) et puisque cette version gouverne la pratique actuelle, il est intéressant de la comparer avec celle du *Rauravāgama*.

Voici ce que dit la *Kriyākramadyotikā*:[4]

[ईशानकला]

[5]ओं ह्रीं ईशानस्सर्वविद्यानां शांशिन्यै नमः ऊर्ध्वमूर्ध्नि, ओं ह्रीं ईश्वरस्सर्वभूतानाम् अङ्गदायै नमः पूर्वमूर्ध्नि, ओं ह्रीं ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा इद्यायै नमः दक्षिणमूर्ध्नि, ओं ह्रीं शिवो मे अस्तु मरीच्यै नमः उत्तरमूर्ध्नि, ओं ह्रीं सदाशिवों ज्वालिन्यै नमः पश्चिममूर्ध्नि ।

इति एवमीशानकलापञ्चकम्

---

[1] Bhaṭṭaśobhākara, commentateur des Veda, lit भजस्व pour भवस्व qui a été adopté dans les autres *āgama* et manuels.

[2] Ces vers sont chantés dans l'Inde du Śud, specialement en pays tamoul selon la version suivante: वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः.

[3] La leçon adoptée par le ms. A est सर्वतः सर्व सर्वेभ्यो et per le ms. B est सर्वेभ्यः सर्व सर्वेभ्यो.

[4] Cité dans le *Parārthanityapūjāvidhi*, ed. de Devakoṭai.

[5] Īśānaśivācārya ajoute अङ्गुष्ठमूलाभ्यां avant ceci.

[तत्पुरुषकला]

[1]ओं हें अव्यक्तकलायै नमः ऊर्ध्ववक्त्रे,[2] ओं हें तत्पुरुषाय विद्महे शान्त्यै नमः पूर्ववक्त्रे, ओं हें महादेवाय धीमहि विद्यायै नमः दक्षिणवक्त्रे, ओं हें तन्नो रुद्रः प्रतिष्ठायै नमः उत्तरवक्त्रे, ओं हें प्रचोदयान्निवृत्त्यै नमः पश्चिमवक्त्रे।

इति तत्पुरुषकलाश्चतस्रः

[अघोरकला]

[3]ओं हुं अघोरेभ्यस्तमायै नमः हृदये, ओं अथ घोरेभ्यो मोहायै नमः ग्रीवायाम्, [4]ओं हुं अघोर रक्षायै[5] नमः दक्षिणांसे, ओं हुं घोरतरेभ्यः[6] निद्रायै[7] नमः वामांसे, ओं हुं [8]सर्वेभ्यस्सर्वमृत्यवे नमः नाभौ, ओं हुं सर्वेभ्यो मायायै नमः जठरे, ओं हुं नमस्ते अस्तु रुद्र भयायै नमः पृष्ठे, ओं हुं रूपेभ्यो जरायै[9] नमः उरसि।

इति [10]बहुरूपकलाष्टकम्

[वामदेवकला]

[11]ओं हिं वामदेवाय नमो जरायै[12] नमः गुह्ये, ओं हिं ज्येष्ठाय नमो रक्षायै नमः लिङ्गे, ओं हिं रुद्राय नमो रत्यै नमः दक्षिणोरौ, ओं हिं कालाय नमः पाल्यै नमः वामोरौ, ओं हिं कल वामायै[13] नमः दक्षिणजानुनि, ओं हिं विकरणाय नमस्संयमिन्यै[14] नमः वामजानुनि, ओं हिं बल क्रियायै नमः दक्षिणजङ्घायाम्, ओं हिं विकरणाय नमो बुद्ध्यै[15] नमो वामजङ्घायाम्, ओं हिं बल (कार्यै) कार्यायै[16] नमः दक्षिणस्फिचि, ओं हिं प्रथमनाय[17] नमो धात्र्यै

---

[1] Īśānaśivācārya ajoute अङ्गुष्ठतर्जनीभ्यां avant ceci.

[2] Ce *Kalāmantra* semble une addition, fondée sur *Ajitāgama* (*arcanāvidhi-paṭala*, vers 88-89); la leçon de l'Īśānaśivagurudevapaddhati est: ओं हें अव्यक्तकलाय शान्त्यतीतकलायै नमः

[3] Īśānaśivācārya ajoute अङ्गुष्ठमध्यमाभ्यां avant ceci.

[4] Īśānaśivācārya: ओं हुं घोरेभ्यश्च रिक्षायै नमः.

[5] निष्ठायै pour रक्षायै—autre leçon.

[6] Īśānaśivācārya: घोरतरेभ्यश्च.

[7] ,, : रिषायै pour निद्रायै; शक्त्यै autre leçon.

[8] ,, : सर्वतश्शर्वमृत्यवे.

[9] Śivārcanacandrikā: तरायै pour जरायै.

[10] Īśānaśivācārya: अघोर pour बहुरूप.

[11] ,, ajoute अङ्गुष्ठानामिकाभ्यां avant ceci.

[12] Īśānaśivācārya et *Śivārcanacandrikā*: रजायै pour जरायै.

[13] Īśānaśivācārya et *Śivārcanacandrikā* कामायै pour वामायै.

[14] *Śivārcanacandrikā*: संयामायै pour संयमिन्यै; Īśānaśivācārya: संयामिन्यै.

[15] Īśānaśivācārya: स्मृत्यै pour बुद्ध्यै.

[16] ,, : बलकायायै pour बलकार्यायै ou बलकार्यै.

[17] ,, : बलप्रमथनाय pour प्रमथनाय.

नमः वामस्फिचि, ओं हिं सर्वभूतदमनाय नमो भ्रामिण्यै [1] नमः कट्याम्, ओं हिं मनो मोहिन्यै नमः दक्षिणपार्श्वे, ओं हिं उन्मनाय नमो भयायै [2] नमः वामपार्श्वे ।

इति वामदेवकलास्त्रयोदश

[सद्योजातकला]

[3] ओं हं सद्योजातं प्रपद्यामि सिद्धयै नमः दक्षिणपादे, ओं हं सद्योजाताय वै नमः[4] ऋद्धयै नमः वामपादे, ओं हं भवे द्युत्यै [5] नमः दक्षिणपाणौ, ओं हं अभवे लक्ष्म्यै नमः वामपाणौ, ओं हं अनातिभवे मेधायै [6] नमः नासायाम्, ओं हं भवस्व [7] मां कान्त्यै नमः शिरसि, ओं हं भव स्वधायै [8] नमः दक्षिणबाहौ, ओं हं उद्भवाय नमो धृत्यै नमः वामबाहौ ।

इति सद्योजातकलाष्टकम्

इत्यष्टत्रिंशत्कलान्यासः

Les différences essentielles avec le *Rauravāgama* sont visibles:

1. Le *Rauravāgama* suit l'ordre même des *mantra* védiques: de *Sadyojāta* à *Īśāna*. Les manuels suivent l'ordre inverse, d'*Īśāna* à *Sadyojāta*.

2. Les manuels introduisent dans chaque *mantra*, après oṁ, les *bīja-mantra* de Śiva; respectivement hoṁ, heṁ, huṁ, hiṁ, haṁ pour les *mantra* des groupes d'*Īśāna*, *Tatpuruṣa*, *Aghora*, *Vāmadeva*, *Sadyojāta*. Rien de tel dans *Rauravāgama*.

3. *Aghoraśivācarya*, en découpant les *mantra* védiques, laisse tel quel chaque élément, avant de le faire suivre du nom de la *kalā* au datif. Le *Rauravāgama* par contre, met aussi parfois au datif le dernier mot du passage védique (quand il n'y est pas déjà).

4. En plusieurs endroits enfin le découpage est différent dans les deux versions, ainsi que les noms de quelques-unes des *kalā* (śakti).

Ces remarques ainsi que d'autres qui seront faites plus tard, suggèrent l'existence de deux traditions au moins dans le domaine des *āgama*; l'une d'elle, représentée par les manuels utilisés de nos jours est vivante dans la pratique actuelle; l'autre représentée en particulier par le *Rauravāgama* semble tombée en désuétude.

Voici un tableau comparatif des noms des *kalā* que l'on rencontre dans les différents *āgama* et les manuels les plus importants. Plusieurs *āgama* n'ont pas encore été publiés et les noms des *kalā* ont été pris dans les mss; quelques-uns peuvent être corrompus; d'autres manquent, les manuscrits étant souvent incomplets.

[1] Īśānaśivācārya: भ्रामण्यै pour भ्रामिण्यै; *Śivārcanacandrikā* et les autres: ब्राह्मण्यै.
[2] ,, : भवायै pour भयायै.
[3] ,, : ajoute अङ्गुष्ठानामिकाभ्यां avant ceci.
[4] ,, : सद्योजाताय वै नमो नमः.
[5] ,, : दूत्यै pour द्युत्यै.
[6] ,, : अनादिभव मेधायै.
[7] ,, : भजस्व pour भवस्व.
[8] ,, : भज स्वधायै pour भवस्वधायै.

[तृतीयः पटलः]

[शिवपञ्चाक्षरविधिः]

प्रवक्ष्यामि समासेन शिवपञ्चाक्षरं रुरो । अञ्जलौ[1] मूर्तिवर्णाः स्युर्व्योम कुर्याद्यथाक्रमम्[2] ॥ १ ॥
पञ्चपञ्चकषष्ठं च पञ्चमं [3]सप्तमं च यत् । [4]षडन्तात्पञ्चमं चैव षड्वर्गे क्षात्तु पञ्चमम् ॥ २ ॥
[5]आदावन्त्ये भवाद्युक्तं तृतीयं तत्स्वरान्वितम् । [6]तृतीयस्वरसंयुक्तं प्रणवादिशिवान्तकम् ॥ ३ ॥
शिवपञ्चाक्षरं [7]ह्येतदीशानाद्यधिदैवतम् । [8]अनुष्टुबादिछन्दांसि [9]अनाद्या ऋषयः स्मृताः ॥ ४ ॥
[10]शक्तयस्त्वम्बिकाद्याः स्युः [11]श्वेतासृक्पीतकृष्णकाः ।
[12]श्यामाभास्ता धरण्याद्याः [13]सिद्ध्यन्ते [14]संध्ययोर्जपात् ॥ ५ ॥
यो यं तु मनसा ध्यायेत्सैव नित्यमवाप्नुयात् ॥ ६ ॥

इति [15]श्रीमद्रौरवतन्त्रे [क्रियापादे] शिवपञ्चाक्षरविधिर्नाम [16]तृतीयः पटलः

---

[1] अजह्नौ—A; अजह्यौ—B.
[2] व्योमायातु यथाक्रमम्—A; व्योम यातुर्यथाक्रमम्—B; व्योम कुर्यादथाक्रमम्—C.
[3] सप्त पञ्चमम्—A et C.
[4] C omet cette ligne; षडङ्गात् pour षडन्तात्—B.
[5] आदावन्त्ये भवाद्युक्तं चतुर्थं प्रणवादिकम्—B; आदावत्यमपाद्युक्तं तृतीयं तत्स्वरान्वितम्—A. आदावत्यर्थमपाद्युक्तं तृतीयं तत्स्वरान्वितम्—C.
[6] तृतीयं स्वरसंयुक्तं—A et B.
[7] एवं pour एतद्—C.
[8] अनुष्टुभादि—A; अनुष्टार्दीश्च—C.
[9] अनद्युन्मर्षयः स्मृतेम्—B; अनामिन्मर्षयः स्मृताः—C.
[10] शक्तयस्त्वम्बिकादीनि—A; शक्तयस्त्वम्बकादीनि—C.
[11] श्वेतस्तत्पीतकृष्णका—B; श्वेतास्त्रपीतकृष्णकाः—C.
[12] श्यामलास्ते—B.
[13] सिद्धन्ते—A; सिद्धान्ते—B.
[14] संधयो जपान्—B; सन्द्धयो जपाम्—C.
[15] A omet श्रीमद्.
[16] द्विपञ्चाशत् पटलः—C.

[तुरीयः पटलः]

[जपविधिः][1]

अङ्गुलीदर्भयोर्ग्रन्थिर्गोवालग्रन्थिजं कुशम्[2] । स्फाटिकं[3] मौक्तिकं पाद्मं पुत्रजीव[4] शिवाक्षजम्[5] ॥ १ ॥
अधमाधमपूर्वं तु दशवृद्ध्युत्तरोत्तरम्[6] । फलसिद्धिमवाप्नोति चैकाक्षात् षण्मुखावधि[7] ॥ २ ॥
शतवृद्ध्युत्तरं विद्याद्धारणं[8] च तथैव हि[9] । शिवचिह्नं हि[10] रुद्राक्षं भस्म चैव तथैव हि ॥ ३ ॥
दर्शनं[11] पापनाशं तु स्पर्शनं[12] सर्वसिद्धिदम् । [13]रुद्राक्षधारणात्पुण्यमपमृत्युजयप्रदम् ॥ ४ ॥
प्रयाणकाले[14] त्वेवैकं[15] भक्षयित्वा तु याति यः[16] । स[17] रुद्रपदमाप्नोति पुनर्जन्म न विद्यते ॥ ५ ॥
रुद्राक्षमिव यत्तच्च यद्भस्म भस्मसादृशम्[18] । अमन्त्रं वा समन्त्रं[19] वा तौ धृत्वा[20] मुक्तिमाविशेत् ॥ ६ ॥

इति श्रीमद्रौरवतन्त्रे[21] [क्रियापादे] जपविधिर्नाम चतुर्थः पटलः[22]

---

[1] Pour *japalakṣaṇa* voir *Aṃśumadāgama, paṭala*, 58.

[2] A: अङ्गुले दर्भया ग्रन्ध गोवाग्रे ग्रन्धयोः कुशा ; B: अङ्गुले दर्भया ग्रन्थ गोवाग्रे ग्रन्थयोः कुशम् ; C: अङ्गुलैर्दर्भया ग्रन्थिर्गोवाग्रे ग्रन्थयोः कुशा.

[3] A: स्फटिकं.

[4] A: दीप pour जीव.

[5] B: शिखाक्षरम् pour शिवाक्षजम्.

[6] A: अथवा अधमं मात्रदशवृद्ध्युत्तरोत्तरम् ; B: अधमाधमादत्र दशवृद्ध्युत्तरोत्तरम् ; C: अथवा दशमं वाथ मात्रवृद्ध्युत्तरोत्तरम् .

[7] A: षण्मुखाविधिः pour षण्मुखावधि.

[8] A: विद्याधरणं pour विद्याद्धारणं.

[9] C: च pour हि.

[10] A: भीरु pour हि.

[11] B: दर्शनात् pour दर्शनं.

[12] B: स्पर्शनात् pour स्पर्शनं.

[13] A: उक्तानु pour रुद्राक्ष.

[14] C: प्रधानकाले.

[15] A: तावेकं.

[16] A: भक्षयित्वा त्रयं निये ; C: भक्षयित्वा त्रयं तु यः .

[17] A: ते pour स.

[18] C: भस्मसादृशाम् ; B: भस्मसादृशा.

[19] C: सुमन्त्रं pour समन्त्रम्.

[20] A: दौद्धृतां pour तौ धृत्वा; C: तौ धृता.

[21] A श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे.

[22] A: जपविधिचतुर्थः पटलः, C: जपविधिर्नाम त्रिचत्वारिंशत्पटलः .

[पञ्चमः पटलः]

[शौचविधिः][1]

अतः परं प्रवक्ष्यामि शौचमत्र[2] रुरो[3] शृणु । गत्वा ग्रामाद्बहिर्धीमान् सजले विजने भुवि[4] ॥ १ ॥
भानोर्नाभिमुखासीनो विण्मूत्रे च विसृज्य च[5] । [6]सव्यकर्णोपरि यज्ञसूत्रं धृत्वा तु वामके ॥ २ ॥
हस्तेन[7] शेफं[8] संगृह्य सव्यहस्ते मृदं[9] गृहेत् । जलाशयं समागम्य त्वासीनस्तु जलान्तिके ॥ ३ ॥
[10]दशकृद्गुदशुद्ध्यर्थं मेढ्रशुद्ध्यर्थकं[11] त्रयम् । [12]यावन्मात्रं मनःशुद्धिस्तावच्छौचं[13] समाचरेत् ॥ ४ ॥
हस्तौ पादौ च[14] संशोध्य [15]प्राग्वद्वस्त्रोपवीतधृक् । विसृज्य तत्तीरदेशमन्यत्र क्षालनं कुरु ॥ ५ ॥

इति श्रीमद्रौरवतन्त्रे [क्रियापादे] शौचविधिर्नाम पञ्चमः पटलः[16]

---

[1] Pour *śaucavidhi* et *ācamanavidhi* voir *Suprabhedāgama*, I, 4, *Cintyāgama*, *Paṭala*, 3, *Vīrāgama*, *paṭala*. 35, *Kumāra-tantra*, paṭala, 3, *Kāmikāgama*, I, 3 etc.

[2] A: शौचमन्त्र pour शौचमत्र. [3] A: रिरो pour रुरो. [4] A: सजलेपि जले भुवि.

[5] A: भानोऽनभिमुखासीने विण्मूत्रौ च विसृज्य च ; C: भानोरभिमुखासीने विण्मूत्रौ च विसृज्य च.

[6] C: सर्व pour सव्य. [7] B: हस्ते तु pour हस्तेन. [8] C: शेपिं pour शेफं.

[9] C: सव्यहस्तान्मृदं. [10] C: दशमृद् pour दशकृद्. [11] B: मेढ्रे शुद्ध्यर्थकं.

[12] A: यावन्मात्रमनःशुद्धिस्. [13] B: शुद्धिं pour शौचं.

[14] B: पादौ हस्तौ च pour हस्तौ पादौ च. [15] C: पार्श्वद् pour प्राग्वद्.

[16] A : इति श्रीरौरवतन्त्रे शौचविधि पञ्चमः फटलः ; B: इति शौचविधिर्नाम पञ्चमः पटलः ; C: इति श्रीमद्रौरवतन्त्रे शौचविधिर्नाम अष्टमः पटलः .

[षष्ठः पटलः]

[आचमनविधिः]

अतः परं प्रवक्ष्यामि शृणुष्वाचमनं रुरो। पादौ हस्तौ च संशोध्य जले[1] तीरे च पादकौ ॥ १ ॥
सर्वदा [2]प्राङ्मुखासीनोऽथवोदङ्मुखसंस्थितः। गोकर्णाकृतिहस्तेन [3]माषमग्नजलं गृहेत् ॥ २ ॥
आत्मविद्याशिवायेति[4] त्रिःकृत्वा प्राशयेत्क्रमात्। आस्यमङ्गुष्ठतो मृज्य [5]द्विःकृत्वास्यमधस्तथा[6] ॥ ३ ॥
[7]अङ्गुष्ठानामिकाभ्यां तु[8] चक्षुषी संस्पृशेद्बुधः। मध्यमाङ्गुष्ठकाभ्यां तु नासिकायाः [9]पुटं स्पृशेत् ॥४॥
तर्जन्यङ्गुष्ठकाभ्यां तु श्रोत्रे[10] चैव तु संस्पृशेत्। [11]अङ्गुष्ठाग्रेण मूर्धानं स्पृशेत्प्रागुक्तमन्त्रतः ॥ ५ ॥
शुध्यर्थं कारयेदेवं पुनरप्येवमाचरेत्[12] ॥ ६ ॥

इति[13] श्रीमद्रौरवतन्त्रे [क्रियापादे] [14]आचमनविधिर्नाम षष्ठः पटलः

---

[1] जलतीरे—B.

[2] प्राङ्मुखासीनः वोदङ्मुखश्च संस्थितः—B; प्राङ्मुखासीनोदङ्मुखो वापि संस्थितः—A; प्राङ्मुखासीनोदङ्मुखो वाथ संस्थितः—C.

[3] सर्षार्थं जलं संगृहेत्—A; कर्षार्थार्धं जलं संग्रहेत्—B; माषार्धं जलं संगृहेत्—C.

cf. *Suprabheda*, 1, 5, 15: "हस्ते गोकर्णवत्कृते। माषमग्नं तु यद्वारि etc.; cf. *Kriyādīpikā*, p. 3: शुद्धजलं गोकर्णवत् कृतपाणिना गृहीत्वा मुक्ताङ्गुष्ठकनिष्ठिकेन माषमग्नजलं . . . त्रिः पिबेत्.

[4] cf. *Kriyādīpikā*, p. 4. . . . जलं आत्मशुद्धयर्थं हूं आत्मतत्त्वाय स्वधा इति प्रथमं पिबेत्। हूं विद्यातत्त्वाय स्वधा इति द्वितीयं पिबेत्। हूं शिवतत्त्वाय स्वधा इति तृतीयं पिबेत्.

[5] द्विः कृत्वास्तमथोत्तथा—A; द्विः कृत्वास्तमधो तथा—B; द्विः कृत्यक्तमथोत्तथा—C.

[6] cf. *Kriyādīpikā*, p. 4. . . . . दक्षिणाङ्गुष्ठमूलेन दक्षिणपार्श्वोष्ठौ द्विः परिमृज्य मध्यमाङ्गुलित्रयेणास्यमधः सकृत् परिमृज्य etc.

[7] cf. *Suprabheda*, 1, 5, 17-18:
अङ्गुष्ठानामिकाभ्यां तु चक्षुषी संस्पृशेद्बुधः। अङ्गुष्ठतर्जनीभ्यां तु नासिकां संस्पृशेत्पुनः॥
अङ्गुष्ठकनिष्ठाभ्यां तु श्रोत्रे चैव तु संस्पृशेत्।
cf. *Kriyādīpikā*, p. 4 Section 12: अङ्गुष्ठानामिकाभ्यां घ्राणनेत्रश्रोत्रनाभिहृदयमूर्धबाहून् क्रमेण स्पृशेत्.

[8] च—C. [9] स्फुटां—C. [10] श्रोत्रौ—A. [11] अङ्गुष्ठाग्रेन—A.

[12] cf. *Kriyākramadyotikā*, p. 17-18: **आचमनविधिः**—बद्धचूडः प्रागास्य उदगास्यो वा अनावृतशिरा आसीनः फेनबुद्बुदरहितेन वीक्षितेनाम्भसा 'ओं हां आत्मतत्त्वाय स्वधा' 'ओं हीं विद्यातत्त्वाय स्वधा' 'ओं हूं शिवतत्त्वाय स्वधा' इति प्रत्येकं पाणिं प्रक्षाल्य ब्रह्मतीर्थेनाचम्य, ओष्ठावङ्गुष्ठमूलेनास्रेण द्विः परिमृज्य, हस्ततलेनाधोमुखं सकृत्परिमृज्य अङ्गुष्ठानामिकाभ्यां मुखनासिकाकर्णविवराणि नाभिहृदंसद्वयशिरांसि दक्षिणवामक्रमेण हृदा संस्पृश्य आचमनं भवति।

[13] इति रौरवतन्त्रे पटलः—A; इति श्रीमद्रौरवतन्त्रे—C.

[14] आचमनविधिपटलः षष्ठः—A; आचमनधिर्नाम षष्ठः पटलः—B; आचमनविधिर्नाम नवमः पटलः—C.

[सप्तमः पटलः]

[स्नानविधिः][1]

अतः परं प्रवक्ष्यामि स्नानं पापनिवृत्तये । उदङ्मुखः प्राङ्मुखो वा[2] गत्वा तीर्थजलाशयम् ॥ १ ॥
[3]आमलकीफलगन्धाद्यैर्देहमूर्धादि शोधयेत् । वक्त्रं दन्तांश्च[4] जिह्वां च निर्मलं [5]शोधयेद्बुधः ॥ २ ॥
[6]ततश्चाचमनं कुर्यादवगाहं ततश्चरेत् । शिवं ब्रह्माङ्गमुच्चार्य कारयेदघमर्षणम् ॥ ३ ॥
पुनराचम्य विधिवत्ततो नित्यं समाचरेत् । [7]सूर्यश्चाग्निश्च[8] मन्त्रैस्तु प्रातरादि जलं पिबेत् ॥ ४ ॥
ततश्चाचम्य विधिवद्दधिक्राव्णैस्तु[9] प्रोक्षयेत् । भूर्भुवःस्वेति[10] मन्त्रेण [11]त्रिसन्ध्यं [12]विसृजेज्जलम् ॥ ५ ॥
देवानां च ऋषीणां च [13]पितृणां तर्पयेत्क्रमात् । आर्द्रवस्त्रं [14]तथोत्सृज्य धौतवस्त्रं तु धारयेत् ॥ ६ ॥
अष्टोत्तरशतं वापि तदर्धं वा तदर्धकम् । दश पञ्च [15]त्रिरेकं वा सावित्रीं च जपेद्बुधः ॥ ७ ॥
[16]मित्रासत्ये इमं मेति[17] प्रातरादि समाचरेत् ॥ ८ ॥

[18]इति [19]श्रीमद्रौरवतन्त्रे [क्रियापादे] [20]स्नानविधिर्नाम सप्तमः पटलः[21] ।

---

[1] pour *snānavidhi* voir *Kāmikāgama*, I, 3, *Kāraṇāgama*, I, 29, *Kiraṇāgama, kriyāpāda, paṭala* 1, *Dīptāgama, paṭala* 55, *Yogajāgama*, ms. p. 26-30, *Suprabhedāgama*, I, 5, *Svāyambhuvāgama, paṭala* 5, *Cintyāgama, paṭala* 4, *Ajitāgama, paṭala* 30, *Vīrāgama, paṭala* 35.

[2] प्राङ्मुखोदङ्मुखो वापि—B; प्राङ्मुखोदङ्मुखो वाथ—C.

[3] आमलकीफलगन्धाद्यैर्देहं मूर्धानं च शोधयेत्—A; आमलकीफलकंकाद्यैर्देहमूर्ध्वं च शोधयेत्—C.
cf. *Suprabheda*: रजनीकणविष्ठैस्तु अङ्गप्रत्यङ्गघर्षणम् (I, 5, 11);
cf. *Kāmika*, I, 3, 37: सुगन्धामलकाद्यैस्तु स्नायाद्राजोपचारतः.

[4] दन्तं च—A.

[5] साधयेद्—B. [6] आचमनं ततः कुर्यादवगाहनमाचरेत्—A.

[7] सूर्यश्चाग्नेस्तु मन्त्रैस्तु—A; सूर्यश्चेत्यादिभिर्मन्त्रैः—B; सूर्यश्चाग्नी तु मन्त्रैस्तु—C.

[8] *Taittirīya-āraṇyaka*, 10. 25. 1: सूर्यश्च मा मन्युश्च etc.; 10. 24. 1: अग्निश्च मा मन्युश्च etc.

[9] *Ṛgveda*, 4. 39. 6: दधिक्राव्णो अकारिषम् etc.; च pour तु—B.

[10] *Taittirīya-saṃhitā*, I. 6. 2. 2. [11] आसन्ध्यं—B.

[12] विस्तृतं जलम्—A; विसृते जलम्—C. [13] विप्राणां—B et C.

[14] ततोत्सृज्य—A. [15] त्रियेकं—A; त्रिधैकं—C.

[16] मित्रा सत्ये इममेतिश्च—A; मित्रासन्त्योर्ममातिश्च—C; मित्रा सत्ये इमं मेत्यादि—B.

[17] *Ṛgveda*: 3. 59. 1: मित्रो जनान् यातयति etc., (voir aussi, *Taittirīya-saṃhitā*, 3. 4. 11. 5); *Taittirīya-saṃhitā*, 3. 4. 11. 2: आसत्येन रजसा etc; *Ṛgveda* 1. 25. 19 et *Taittirīya-saṃhitā*, 2. 1. 11. 6: इमं मे वरुण etc.

[18] इति श्रीमद्रौरवतन्त्रे—C. [19] B: omet श्रीमद्रौरवतन्त्रे.

[20] A omet विधि dans स्नानविधि. [21] पटलः सप्तमः—A; दशमः पटलः—C.

[अष्टमः पटलः]

[भस्मस्नानविधिः][1]

अतः परं प्रवक्ष्यामि भस्मस्नानविधिं परम् । गोशकृत्पद्मपत्रेषु[2] संगृह्य हृदयेन तु ॥ १ ॥
[3]कपित्थफलमात्रेण पिण्डमस्त्रेण[4] कारयेत् । [5]शोषयित्वार्कदिवसे दहेदस्त्रेण देशिकः ॥ २ ॥
[6]पञ्चब्रह्मशिवाङ्गैश्च [7]मूलैर्भस्माभिमन्त्रयेत्[8] । भस्म शिवाङ्गैरासाद्य शिरसीशानतो न्यसेत् ॥ ३ ॥
ब्रह्माङ्गानि[9] समुच्चार्य [10]भस्मना त्वभिषिच्य च । मूलमन्त्रं समुच्चार्य सर्वाङ्गं प्रोक्षयेद्बुधः[11] ॥ ४ ॥
एवं यः कुरुते मर्त्यः सर्वपापैः प्रमुच्यते ॥ ५ ॥

इति श्रीमद्रौरवतन्त्रे [क्रियापादे] भस्मस्नानविधिर्नामाष्टमः पटलः

---

[1] pour भस्मस्नानविधि voir *Makuṭāgama, paṭala*, 2, *Dīptāgama, paṭala*, 56, *Vīrāgama, paṭala*, 36, *Suprabhedāgama, paṭala*, 6, *Svāyambhuvāgama, paṭala*, 6, *Kāmikāgama*, I, 3 etc.

[2] पद्मपत्रे तु—C. [3] कापित्थ—C. [4] अत्रैव pour अस्त्रेण—B.
[5] शोचयित्वाक्षदिवसे—C. [6] पञ्चब्रह्मशिवाङ्गं च—A, B et C.
[7] मूलं pour मूलैः—A et C. [8] भस्मेऽभिमन्त्रयेत्—C. [9] ब्रह्माङ्गादि—C.
[10] भस्माभिरभिषिच्य च—A et C.

[11] En ce qui concerne les *mantra* utilisés pour recueillir la bouse de vache et préparer les cendres (bhasma) et ceux qui sont récités pendant l'ablution de cendres (bhasma snāna), le *Suprabhedāgama* donne la version ci-dessou, différente de la nôtre:

इत्थं गावः समालोच्य भस्मापि गोमयं ग्रहेत् । भूमावापतितं ग्राह्यं सद्यमन्त्रेण गोमयम् ॥
पिण्डानि वाममन्त्रेण ह्यघोरेण तु शोषयेत् । पुरुषेण तु तद्दग्ध्वा ईशानेनाभिमन्त्रयेत् ॥
केतकीपुष्पसंयुक्तं नवभाण्डेषु निक्षिपेत् । अथवा चाग्निहोत्रेषु भस्म ग्राह्यं विचक्षणैः ॥
जलस्नानं पुरा कृत्वा भस्मस्नानमतः परम् । जलस्नानं विना चोर्ध्वं भस्मस्नानं विधीयते ॥
शिवब्रह्माङ्गजप्तेन भस्मस्नानं समाचरेत् । ईशानेन कमुद्धृत्य वक्त्रं तत्पुरुषेण तु ॥
बहुरूपेण हृदयं नाभिं वामेन कीर्तितम् । सर्वाङ्गं सद्यमन्त्रेण समुद्धृत्य विचक्षणः ॥
उषितं वाससं त्यज्य शुद्धवस्त्रं परिग्रहेत् ॥

(*Suprabhedāgama*, 1, 6, 25-31)

Voir aussi *Kriyādīpikā*, pp. 10-11:

अथ भस्मस्नानक्रमः । पादौ प्रक्षाल्याचम्य हस्तौ अस्त्रेण संशोध्य कृष्णाजिनाद्यासने उत्तराभिमुख आसीनः शिवं गुरून् नमस्कृत्य कल्पानुकल्पोपकल्पादिवक्ष्यमाणलक्षणां विभूतिकोशस्थां विभूतिमभिवन्द्य आदाय वामहस्ते शिवमन्त्रेण दत्वा शक्तिमन्त्रेण वस्त्रपूतशुद्धजलं निनीय निरीक्षणादिसंस्कारं कृत्वा दक्षिणहस्तेन पिधाय पञ्चब्रह्मषडङ्ग-पञ्चकलाभिः संस्कारक्रमेणाभिमन्त्र्य अङ्गुष्ठानामिकाभ्यां किंचिद्विभूतिमाहृत्य "ज्योतिर्ज्योतिर्" इति पदमन्त्रमुच्चार्य पादाङ्गुष्ठादिमस्तकान्तं नीत्वा विकीर्याथ शिवमन्त्रेण सजलं विभूतिं लोलयित्वा पादादिजानुपर्यन्तं "हं सद्योजातमूर्तये निवृत्तिकलायै नमः"। जान्वादिनाभिपर्यन्तं, "हिं वामदेवगुह्याय प्रतिष्ठाकलायै नमः"। नाभ्यादिकण्ठपर्यन्तं, "हुं अघोरहृदयाय विद्याकलायै नमः"। कण्ठादिललाटपर्यन्तं, "हैं तत्पुरुषवक्त्राय शान्तिकलायै नमः"। ललाटादि-ब्रह्मरन्ध्रपर्यन्तं, "हौं ईशानमूर्ध्ने शान्त्यतीतकलायै नमः!" इत्युच्चरन् आलिप्य सद्योजातेन सव्यापसव्यहस्ताभ्यां पादादिमस्तकान्तं सर्वाङ्गं शनैः शनैरुद्धूल्य विधिवदाचामेत् ।

[नवमः पटलः]

[अर्चनाङ्गविधिः]

अतः परं प्रवक्ष्यामि [1]त्वर्चनाङ्गं रुरो शृणु[2]। सिद्धार्थश्चन्दनं दूर्वा [3]चोशीरं पाद्यमुच्यते ॥ १ ॥
लवङ्गजातीकर्पूरमेलालक[4]समन्वितम्। [5]द्रव्यमाचमनार्थं तु प्रोच्यते तु शिवाम्भसा[6] ॥ २ ॥
[7]जलं क्षीरं कुशाग्रं च यवसिद्धार्थतण्डुलम्। [8]तिलं व्रीहिसमायुक्तमर्घ्यमष्टाङ्गमुच्यते ॥ ३ ॥
साक्षतं यवव्रीहिं च सर्षपार्घ्यमितीरितम्। व्रीहितण्डुलसंमिश्र[9]मच्युतं तत्प्रकीर्तितम् ॥ ४ ॥
अगरुं चन्दनं कुष्ठं कुङ्कुमं मेघमेव च। कर्पूरेण समायुक्तं गन्धद्रव्यमिति स्मृतम् ॥ ५ ॥
श्वेतपुष्पं तु पूर्वाह्णे मध्याह्ने रक्तपुष्पकम्। [10]पूर्वरात्रौ[11] तु पीतं स्यादर्धरात्रौ[12] तु मालती ॥ ६ ॥
प्रशस्तं सर्वदा पत्रमुग्रगन्धादिवर्जितम्[13]। गुग्गुलं गोघृतं वापि अगरुर्वाथ धूपकम्[14] ॥ ७ ॥
गव्याज्यमुत्तमं दीपं तैलं मध्यममुच्यते। अनाज्यं कन्यसं ख्यातं पुन्नागं मधुकं तु वा ॥ ८ ॥
घटिका त्वभिषेकार्थं घटिका [15]त्वर्चने भवेत्। पादं धूपार्थमित्युक्तं [16]हविरर्थं त्रिपादकम् ॥ ९ ॥
पादं नित्याग्निकार्यार्थमुत्सवार्थं द्विनाडिकम्। तदन्ते नृत्तगेयार्थं घटिकाद्वयमुच्यते ॥ १० ॥

इति श्रीमद्रौरवतन्त्रे [क्रियापादे] अर्चनाङ्गविधिर्नाम नवमः पटलः[17]

---

[1] A et C omettent तु dans त्वर्चनाङ्गं.

[2] cf. *Suprabhedāgama*, 1, 7, 1-2:

पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम्। दीपं चैव निवेद्यं च लिङ्गनृत्तं दशैव तु ॥
दशाङ्गैस्तु समायुक्ता पूजा श्रेष्ठा शिवस्य तु।

Comparer ce *paṭala* avec le *Suprabhedāgama*, 1, 7, 4-27.

[3] A et C omettent च dans चोशीरं.

[4] Sens obscur. Le *Suprabhedāgama* a, pour अलक, त्रपु (étain) qui n'est pas plus satisfaisant; cf. *Kāraṇāgama*, I, 31, 42:

उशीरं जातिकर्पूरं त्रुटितं तु लवङ्गकम्। मुरेण सलिलोपेतं श्रेष्ठमाचमनीयकम् ॥

[5] दिव्य pour द्रव्य—A. [6] शिवाम्भसः—A et B. [7] जलक्षीर—A.

[8] तिलव्रीहि—B. [9] संयुक्त pour संमिश्र—B.

[10] cf. नन्द्यावर्तं तु पूर्वाह्णे मध्याह्ने करवीरकम्। साये तु मल्लिका प्रोक्ता ह्यर्धरात्रौ द्विकर्णिका ॥
(*Suprabhedāgama*, 1, 7, 11)

[11] पूर्वरात्रे—B. [12] अर्धरात्रे—B.

[13] उग्रगन्धविवर्जितम्—A; cf. उग्रगन्धैस्तु निर्गन्धैर्नार्चयेत्तु विशेषतः। (*Suprabhedāgama*, 1, 7, 20)

[14] गुग्गुलं गोघृतं वापि गुलं वा बिल्वधूपकम्। कुष्ठं वा चन्दनं वापि घृतमिश्रं सुधूपयेत् ॥
(*Suprabhedāgama*, 1, 7, 25-26)

[15] त्वर्चनं—A et C. [16] हविषार्थं—A et C.

[17] Pour अर्चनाङ्गविधि voir: *Makuṭāgama*, *paṭala* 3, *Ajitāgama*, *paṭala* 23, *Kāmikāgama*, I, 5, *Kāraṇāgama*, I, 31, *Cintyāgama*, *paṭala* 6, *Dīptāgama*, *paṭala* 26, *Suprabhedāgama*, I, 7, *Sūkṣmāgama*, ms. p. 66.

[दशमः पटलः]

[शिवार्चनविधिः[1]]

अतः परं प्रवक्ष्यामि [2]त्वर्चनाविधिमुत्तमम् । सदाशिवं यजेल्लिङ्गे [3]प्रतिमायां महेश्वरम् ॥ १ ॥
आदावेवात्मशुद्धिं[4] तु द्वितीयं [5]स्थानशुद्धिकम् । तृतीयं द्रव्यशुद्धिं [6]तु चतुर्थं लिङ्गशुद्धिकम् ॥ २ ॥
पञ्चमं मन्त्रशुद्धिं तु [7]क्रमात्कुर्वीत देशिकः[8] । जलस्नानं पुरा कृत्वा मन्त्रस्नानमतः परम् ॥ ३ ॥
भस्मस्नानं तृतीयं च[9] रेचकादि चतुर्थकम् । पञ्चमं तु कलान्यासमन्तर्यागं तु षष्ठकम् ॥ ४ ॥
[10]यद्यत्तु पूजयेन्मन्त्री तत्तदात्मनि भावयेत् । [11]हृदीशमर्चयेन्नित्यं मनसा हविषान्तकम्[12] ॥ ५ ॥
आत्मशुद्धिर्भवेदत्राप्यन्तर्यागस्तु[13] षट्क्रियः । [14]मार्जनालेपने चैव शिवाग्निः [15]प्रोक्षणं ततः ॥ ६ ॥

---

[1] Voir *Kāmikāgama* I, 4, *Kāraṇāgama*, I, 30, *Svāyambhuvāgama*, *paṭala* 7 et 8, *Mataṅgāgama*, *kriyāpāda*, *paṭala*, 29, *Citntyāgāma*, *paṭala*, 17, *Ajitāgama*, *paṭaḷa* 21, *Dīptāgama*, *paṭala*, 23, *Makuṭāgama*, *paṭala*, 4, *Yogajāgama*, p. 34-154, *Virāgama*, *paṭala*, 38, *Sahasrāgama*, *paṭala*, 4, et *Suprabhedāgama*, I, 8.

[2] A et B omettent तु dans त्वर्चना.

[3] A et C: महेशं प्रतिमे यजेत्.

[4] C: अत्र pour आत्म dans आदावेवात्मशुद्धिं.

[5] C: स्नान pour स्थान.

[6] B et C: च pour तु.

[7] A: क्रमेण कुरु देशिक ; C: क्रमेण गुरुदेशिकः.

[8] cf: *Suprabhedāgama*, I, 8, 17:

देहं स्थानं तथा द्रव्यं मन्त्रं लिङ्गं च पञ्चमम् । कुर्याच्छिवार्चनादौ तु तेषां क्रमं वदामि ते ॥

voir aussi *Kāmikāgama*, I, 4, 37-38.

आत्मशुद्धिस्तु पूर्वं स्यात्स्थानशुद्धिर्द्वितीयकम् । तृतीयं द्रव्यशुद्धिः स्याच्चतुर्थं लिङ्गशोधनम् ॥
पञ्चमं मन्त्रशुद्धिः स्यादित्येताः पञ्चशुद्धयः ॥

Kāraṇāgama, I, 30, 45-46.

[9] C: तु pour च.

[10] A et C: यद्यत्पूजयते मन्त्री.

[11] A: हृदि तमर्चयेन्नित्यं ; B: हृदि तत्त्वे च तन्नित्यं.

[12] cf: *Suprabhedāgama*, 1, 8, 10:

आत्मार्थयजने ख्याता यथायुक्त्या समर्चयेत् । दीपान्तं वा हविष्यान्तमात्मार्थे तु परार्थके ॥

[13] Les mss. omettent अपि dans अप्यन्तर्यागस्तु ; B et C: अन्तर्यागं तु.

[14] B: मर्जनालेपने.

[15] C: प्रोक्षणा स्मृता ; B: प्रोक्षणं स्मृतम्.

स्थानशुद्धिरिति ख्याता [1]द्रव्यं पाद्यादिकं ततः[2]। साधयित्वात्र पात्रेषु[3] शोधयेदस्त्रमन्त्रतः ॥ ७ ॥
प्रोक्षये[4]त्पुरुषेणैवमेतत्स्याद्द्रव्यशुद्धिकम्। लिङ्गं पीठं स्थलं सर्वं [5]शुद्धं कुर्याच्छिवाम्भसा ॥ ८ ॥
लिङ्गशुद्धिं [6]शिवास्त्रेण पीठं [7]पाशुपतास्त्रतः[8]। विद्याङ्गास्त्रेण मन्त्रेण स्थलशुद्धिं समाचरेत् ॥ ९ ॥
शिवाद्भिः [9]क्षाल्य शोष्यैस्तु[10] शिखिपिञ्छैर्विशेषतः। सोमेश्वरादिबिम्बं च[11] संमृजेद्बिम्बशुद्धिकम् ॥१०॥
अन्यूनाधिकवर्णं तु सर्वान् मन्त्रान् समुच्चरेत्। [12]ऊनवर्णेन मृत्युः स्यादधिके शोकसंभवः[13] ॥ ११ ॥
स्वरहीने विपत्तिः स्यात्तस्मान्मन्त्रं सुशोधयेत्। [14]पञ्चशुद्धिः समाख्याता [15]कृते पूजार्हको भवेत् ॥ १२ ॥
द्वारान्तिके [16]युगाग्रे च हस्तमात्रे तु मण्डले। ब्रह्माण्डमर्चयित्वा तु दीपान्तं ब्रह्ममन्त्रतः ॥ १३ ॥
[17]तदुद्वास्य [18]प्रवेशे तु [19]द्वारस्थांश्च समर्चयेत्। [20]दक्षिणेऽदक्षिणे [21]नन्दिकालौ च क्रमशो यजेत् ॥१४॥
[22]भुवङ्गं च पतङ्गं [23]चाप्यूर्ध्वाधस्तात्सुपूजयेत्। विमलं च सुवाहुं च पूजयेत्तु [24]कवाटयोः ॥ १५ ॥
स्कन्दं वै पट्टिकामध्ये विघ्नेशं दक्षिणे यजेत्। श्रीदेवीं [25]मध्यतो यष्ट्वा वागीशीमुत्तरे यजेत् ॥ १६ ॥
दीपान्तमर्चयेदेतान् स्वस्वमन्त्रमुदाहरन्। अस्त्रेण ताडयेद्घण्टां पटमस्त्रेण संवृजेत् ॥ १७ ॥
गर्भगेहं प्रविश्याथ [26]धूपं दीपं च दापयेत्। पुष्पाञ्जलिकरः [27]स्थित्वा [28]क्षुरिकेणैव[29] पूजयेत् ॥ १८ ॥
निर्माल्यमस्त्रमन्त्रेण [30]भूषणानि विसृज्य च। [31]चण्डेशाय स्वमन्त्रेण तत्सर्वं तु प्रदापयेत् ॥ १९ ॥
लिङ्गं पीठं स्थलं क्षाल्य प्राग्वच्च हृदयेन तु। अनन्तं सिंहयोगं च पद्मं च विमलासनम्[32] ॥ २० ॥

---

[1] A et C: द्रव्यान् पाद्यादिकांस्ततः.

[2] Pour plus de details au sujet de la purification (*śuddhi*) voir *Suprabhedāgama* I, 8, 17-75.

[3] A et C: साधयित्वास्त्रपात्रे तु.

[4] पुरुष = "ओं हें तत्पुरुषवक्त्राय नमः".

[5] Les mss. lisent शुद्धिं pour शुद्धं.

[6] शिवास्त्र = "ओं हः शिवास्त्राय नमः".

[7] C: पाशुपतास्त्रकम्.

[8] पाशुपतास्त्र = "ओं श्रीं पं शुं हुं फट् पाशुपतास्त्राय नमः"

[9] B: काल्य pour क्षाल्य.

[10] A et B: शोषैस्तु.

[11] A et C: बिम्बांश्च pour बिम्बं च.

[12] B: ऊनार्णेन तु; C: न्यूनवर्णेन.

[13] B: अधिके भूरिशोकदम्; C: अधिको भूरिशोकदः.

[14] A et B: पञ्चशुद्धयेवमाख्यातं.

[15] A: कृतं; C: कृतः.

[16] A: युगाग्रे; C: युगाश्रे.

[17] B: तमुच्चार्य.

[18] C: प्रवेशं तु.

[19] A et C: दौवारिकांश्च.

[20] A: दक्षिणे दक्षिणे.

[21] A: नन्दीकालौ.

[22] Ms. C omet les trois demi-vers suivants.

[23] A et C: च ऊर्ध्वादिस्तान्; B: च ऊर्ध्वाधस्तात्.

[24] B: कपाट्योः.

[25] A et C: ऊर्ध्वतो pour मध्यतो.

[26] C: धूपदीपं च.

[27] C: स्तुत्वा.

[28] C: क्षुधिकेनैव.

[29] क्षुरिकामन्त्र = "ओं शिं छिं क्षुरिकास्त्राय नमः".

[30] B: विसृज्य भूषणानि च.

[31] C: चण्डेशास्त्रमन्त्रेण; चण्डेशमन्त्र = "ओं हां ध्वनिचण्डेश्वराय हुंफण्णमः".

[32] cf: *Suprabhedāgama*, I, 8, 84-102:

संख्याय शुद्धयः पञ्च ततस्त्वासनकल्पनम्। आसने मूर्तिमावाह्य त्वेतद्द्वितयमध्वनि ॥

यथाक्रमेण संपूज्य चानेन विधिना बुधः । [1]ततोऽनन्तासनं प्रोक्तं वृत्ताभं सूर्यसंनिभम् ॥ २१ ॥
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च विशेषतः । आग्नेयादीशपर्यन्तं सिंहपादं प्रकल्पयेत् ॥ २२ ॥
[2]अधर्माज्ञानावैराग्यमनैश्वर्यं [3]तथैलिका[4] ।

व्याप्यव्यापकभावेन ज्ञात्वा यजनमारभेत् । इच्छाशक्त्युत्थितं पद्मं पृथिव्यादिशिवान्तकम् ॥
पार्थिवाण्डमयं स्क(क ?)न्दमाप्यान्तं नालमेव च । प्रधानतत्त्वपर्यन्तं तन्नालं कण्टकैर्युतम् ॥
अकारादिक्षकारान्तं शम्बरं कण्टकं स्मृतम् । श्यामाभं नालमित्युक्तं नालसूत्रं त्विदं स्मृतम् ॥
पुंस्तत्वादिकलान्तं च पीठं दलाष्टकान्वितम् । धर्मं ज्ञानं च वैराग्यमैश्वर्यं पादमेव हि ॥
आग्नेयादिक्रमेणैव सिंहरूपोग्रदंष्ट्रकाः । सितपीतरक्तकृष्णास्त्रिनेत्रा वज्रपीठकाः ॥
अन्योन्याभिमुखाः सर्वे सिंहकोटिसमायुताः । न्यस्तव्या भार्द्रमन्त्रेण भीमा भीमपराक्रमाः ।
अधर्माज्ञानवैराग्यानैश्वर्यान्वै क्रमेण तु । प्रागाद्युत्तरपर्यन्तान्नियतांश्च सितप्रभान् ॥
न्यस्त्वा गुणत्रयेणैव ऊर्ध्वश्छदमधश्छदम् । पीठस्योर्ध्वे महामाया ग्रन्थिस्तत्वं गजानन ॥
विद्यातत्त्वमयीं तस्य कर्णिकां परिचिन्तयेत् । इच्छाशक्त्यादिबीजानि विद्येशांश्च दलानि वै ॥
मन्त्रास्तत्केसरे प्रोक्तास्ते विद्यायां प्रतिष्ठिताः । सितरक्तासितांश्चैव मूलमध्याग्रकान् क्रमात् ॥
दलं श्वेतं विजानीयात् कर्णिका कनकप्रभा । पञ्चविंशतिकानीह बीजानि हरितानि वै ॥
तप्तचामीकरप्रख्यं शक्तिव्यूहं न्यसेत्ततः । केसरेषु च मध्ये तु वामादीन् पूर्वतः क्रमात् ॥
वामा ज्येष्ठा च रौद्री च काली कलविकरणी तथा । बलविकरणी बलप्रमथनी सर्वभूतदमनात्मिका ॥
मध्ये मनोन्मनीं देवीं कर्णिकायां निवेशयेत् । सूर्याख्यमण्डलं पात्रे केसरे सोममण्डलम् ॥
कर्णिकोपरि चाग्नेयं मण्डलस्थां मनोन्मनीम् । इच्छाशक्त्यादिनालान्तमनन्तासनमीरितम् ॥
गुणान्तं धर्मज्ञानादि सिंहाख्यमासनं विदुः । योगासनं तु तत्ख्यातं परमेशस्य सुव्रत ॥
पद्मग्रन्थिं समारभ्य केसरान्ताब्जमासनम् । शक्त्यन्तं केसरादूर्ध्वं कर्णिका विमलासनम् ॥
एवमब्जासनं कृत्वा पूजयेत्स्वस्वनामभिः ॥

[1] A: अनन्तासनं तु वृत्ताभं निवृत्तं सूर्यसंनिभम् ।

[2] C: अधर्मज्ञानवैराग्यानैश्वर्याश्च.

[3] A: तथैळिका; B: तथैलिका; C: तथैळका; *Kriyādīpikā* lit आलिका pour एलिका et *Parārthaśivālayanityapūjāsaṃgraha* lit एलका.

[4] cf: *Kāraṇāgama*, I, 30, 240-264:

गुणत्रयेण संछाद्य सिंहासनं प्रकल्पयेत् । भूतरूपेषु कोणेषु पादाः कृतयुगादयः ॥
श्वेतं रक्तं तथा कृष्णं पीतं त्रेतादिवर्णकम् । अव्यक्तो नियतिः कालो कला चेति चतुष्टयम् ॥
अव्यक्तः स्फटिकाभासो नियतिश्चाञ्जनद्युतिः । कालो दाडिमपुष्पाभः कला भिन्नाञ्जनप्रभा ॥
प्रागादिष्वेलका प्रोक्ता मध्यपादस्तु केशवः । एवं योगासनं प्रोक्तं पद्मासनं ततोपरि ॥
मायातत्त्वं बृहद्ग्रन्थिश्शुद्धविद्यात्मशोभितम् । विद्येश्वरदलच्छन्नं शक्तिकेसरसंयुतम् ॥
विद्यातत्त्वमयं तत्र कर्णिकायां प्रपूजयेत् । बीजं प्रवालवर्णाभमङ्कुरं रजतप्रभम् ॥
तस्य नालं तु वैडूर्यं कर्णिका रक्तपिङ्गलम् । शङ्खवर्णा दलाग्राश्च रक्ता श्वेतदला स्मृताः ॥
किंचिल्लोहितपीतानि मध्ये स्यात्केसराणि च । तन्मध्ये कल्पयेद्धीमान् कर्णिकां कनकप्रभाम् ॥
नवबीजानि तन्मध्ये हेमाभानि प्रकल्पयेत् । वामादिशक्तयश्चाष्टौ केसरेषु प्रकल्पयेत् ॥

[1]अव्यक्तो नियतिः [2]कालः कला चेति चतुष्टयम् ॥ २३ ॥
[3]भूताकाराङ्घ्रयः कोणेष्वनलादिषु कल्पयेत् । योगासनमिदं [4]ह्यूर्ध्वं कल्पयेत् पङ्कजासनम् ॥ २४ ॥
[5]विद्येशच्छन्नदलकानन्तानिन्द्रादिषु न्यसेत् । [6]वामाद्याः शक्तयश्चाष्टौ शक्रादिषु दलेषु च[7] ॥ २५ ॥
तन्मध्ये [8]कर्णिकायां तु नाभसं विमलाख्यकम् । मण्डलत्रयमत्रैव गुणत्रयात्मकं पुनः ॥ २६ ॥
पत्रेषु कर्णिकायां[9] च विन्यस्यार्चनमारभेत्[10] । तदूर्ध्वं[11] कल्पयेत्सौम्ये [12]गणाम्बिकां महातपाः ॥ २७ ॥
पूर्वे तु तन्नो [13]गौरीं तु विन्यसेद्याम्यगोचरे । प्रचोदयात् [14]पश्चिमे स्याद्विमलोपरि देशिकः[15] ॥ २८ ॥
[16]कर्णिकायाश्च मध्ये तु न्यसेत्कूटाक्षरं ततः । गन्धैः पुष्पैश्च [17]धूपैश्चाप्यासनं पूजयेत्क्रमात् ॥ २९ ॥

इन्द्रादीशानपर्यन्तं न्यसेन्मध्ये मनोन्मनीम् । आत्मतत्त्वं न्यसेत्सव्ये विद्यातत्त्वं तु वामके ॥
मध्यमे शिवतत्त्वं तु कल्पयेत्कल्पवित्तमः । एवं पद्मासनं प्रोक्तं तस्योर्ध्वे विमलासनम् ॥
मण्डलत्रयमत्रैव कल्पयेद्विमलासनम् । सिंहासनं चतुष्कोणमनन्तं च त्रिकोणकम् ॥
पद्मं च वर्तुलाकारं षट्कोणं विमलासनम् । योगासनं चाष्टकोणमासनं परिकल्पयेत् ॥
आवाहनासनं योगे स्नाने सिंहासनं भवेत् । अर्चनायां महापद्मं विमलाख्यं तु भोजने ॥
स्तोत्रसंगीतनृत्तेष्वनन्तासनमिहोच्यते ॥

[1] C: अव्यक्तं. [2] A: कलो ; voir aussi *Kāraṇāgama*, I, 30, 241. [3] B: भूताकाराश्रयः.

[4] A, B et C: ह्यूर्ध्वे.

[5] A et C: विद्यास्यच्छिन्नपलकानन्दादीन्द्रादिषु न्यसेत् ; B: विद्यास्यच्छन्नपलकानन्दादिद्रादिषु न्यसेत् .

[6] A et C: वामादिशक्तयश्चाष्टौ.

[7] A: दले स्मृताः; C: दलाः स्मृताः; वामादिशक्तयश्चाष्टौ केसरेषु प्रकल्पयेत्—*Kāraṇāgama*, I, 30, 248.

[8] A: कर्णिकाशान्ति तेनाभूसि विमलाख्यकाः ; B: कर्णिकायां तु द्वाभूसि विमलाख्यकम् ; C: कर्णिकाशान्तिर्नाभसी विमलाख्यकाम्.

[9] C: पत्रेष्वकर्णिकायां.

[10] cf: *Sakalāgamasārasaṃgraha*, p. 81:

पद्मासननिर्णयम् । चन्द्रज्ञाने—

अनन्तं पृथिवी ज्ञेयम् आपः सिंहासनं तथा । अग्नियोगमिदं प्रोक्तं वायुः पद्मं तथैव च ॥
आकाशं विमलं चैव पद्मासनविधिं शृणु । सिंहासनं चतुष्कोणम् अनन्ताख्यं त्रिकोणकम् ॥
पद्मं च वर्तुलाकारं षट्कोणं विमलासनम् । योगासनं चाष्टकोणमासनं परिकल्पयेत् ॥

योगजे—

अनन्ताख्यासनं पूर्वं सिंहासनमतः परम् । योगासनं तृतीयं तु तुर्यं पद्मासनं भवेत् ॥
पञ्चमं विमलं प्रोक्तं कल्पयेदुपरि क्रमात् ॥

[11] A, B et C: तदूर्ध्वे.

[12] A: गणाम्बिकां च महातपाम् ; C: गणाम्बिका महातपाः.

[13] A et B: गौरी तु.

[14] A: पश्चिमे यष्टया विमलोपरि.

[15] cf: *Kriyādīpikā*, p. 65 (no. 88)

विमलासनम् ॥ तदुपरि ज्योतीरूपं विमलासनं "गणाम्बिका महादेवी तन्नो गौरी प्रचोदयात् ।" हां विमलासनाय नमः इत्यर्चयेत् ।

[16] A: कर्णिकायां च ; C: कर्णिकाराश्च.

[17] A, B et C: धूपैश्च आसनं.

लिङ्गे शिवं समावाह्य मूलेन [1]सद्यमन्त्रतः । [2]अक्षिपञ्चदशोपेतं [3]पञ्चमूर्धसमन्वितम् ॥ ३० ॥
[4]द्विपादं दशबाहुं च यज्ञसूत्राम्बरैर्युतम्[5] । व्याघ्रचर्मोत्तरीयं च केयूरकटकान्वितम् ॥ ३१ ॥
कर्णिकाहारवलयं [6]कटिसूत्रोदरबन्धनम् । पञ्चवक्त्रयुतं देवं पञ्चास्यं पञ्चनासिकम्[7] ॥ ३२ ॥
[8]अभयं वज्रखड्गौ च शूलं [9]परशु दक्षिणे । वह्निं घण्टां च वरदं नागं खेटं च वामके ॥ ३३ ॥
जटामकुटसंयुक्तं नानापुष्पैरलंकृतम् । एवं सदाशिवं [10]ध्यायेदासनोपरि लिङ्गके ॥ ३४ ॥
[11]त्र्यक्षां चतुर्भुजां शान्तां तप्तकाञ्चनसंनिभाम् । दुकूलवसनोपेतां [12]द्विपादां पद्मसंस्थिताम् ॥ ३५ ॥
अभयं चोत्पलं सव्ये वामे वरदमम्बुजम्[13] । क्षाममध्याङ्गसंयुक्तां पीनोरुजघनस्तनाम्[14] ॥ ३६ ॥
[15]ध्यायेत्तन्मूलमन्त्रेण वामदेवस्य पार्श्वके । [16]सद्योजातेन मन्त्रेण [17]चावाहनमथाचरेत्[18] ॥ ३७ ॥
[19]वामदेवेन मन्त्रेण स्थापयेद्ध्यान[20]संयुतम्[21] । सन्निधानमघोरेण[22] [23]निरोधं पुरुषेण[24] तु ॥ ३८ ॥
[25]ईशेन स्वागतीकृत्य पाद्यादीन् पूर्ववद्ददेत् । वारुणे ब्रह्ममूर्तिं [26]च शिवं सौम्ये तु विन्यसेत् ॥ ३९ ॥
ईशानं पूर्वतो मूर्ध्नि [27]चेश्वरं दक्षिणे विदुः । सदाशिवं तदूर्ध्वे तु पञ्चमूर्तिरिति [28]स्मृता ॥ ४० ॥

---

[1] सद्यमन्त्र = "ओं हं सद्योजातमूर्तये नमः".
[2] A: अष्ट pour अक्षि; B: अक्ष.
[3] A: पञ्चमूर्ध्वं; C: पञ्चमूर्धा.
[4] C: पादं दश च बाहुं च.
[5] C: अम्बुजैः pour अम्बरैः.
[6] B: कटिसूत्रेण बन्धनम्.
[7] cf: *Suprabhedāgama*, I, 8, 104-109:
आसनोपरि मूर्तिं तु सदाशिवमनुत्तमम् । पञ्चवक्त्रशिरोपेतं पञ्चाधिकदशेक्षणम् ॥
दशदोर्दण्डसंयुक्तमष्टायुधसमुज्ज्वलम् । अभयं शूलपरशुं वज्रं खड्गं च दक्षिणे ॥
वरदं चाङ्कुशं पाशं घण्टां वह्निं च वामतः । अच्छस्फटिकसङ्काशमष्टत्रिंशत्कलात्मकम् ॥
पञ्चब्रह्माङ्गविद्याङ्गदशबीजात्मकं परम् । . . . . . सर्वाभरणसंयुक्तं न्यस्त्वा ह्यावाहयेत्ततः ॥
लिङ्गमूलपरीणाहे कल्पयेत्तु मनोन्मनीम् । तस्योपरि स्थिते लिङ्गे चले चैव सदाशिवम् ॥
[8] C: अस्त्रं वज्रं च दण्डं च शूलं.
[9] A: परशु; le mot परशु est masculin; à l'accusatif on devrait avoir परशुं mais le metre ne serait pas respecté, ce mot étant trop long d'une demi-*mātrā*.
[10] B: ध्यात्वा आसनोपरि लिङ्गके; A: ध्यायेदासनोपकलिङ्गके.
[11] A: त्रिणेत्रं चतुर्भुजं शान्तं तप्तकाञ्चनसंनिभम्.
[12] C: द्विपदां.
[13] A: अम्बुजाम् pour अम्बुजम्.
[14] B: स्तलाम् pour स्तनाम्.
[15] A: ध्यायेत्तु pour ध्यायेत्तद्.
[16] Voir note no° 1 sur le vers 30 pour सद्योजातमन्त्र.
[17] A, B et C omettent च dans चावाहनम्.
[18] A et C: समाचरेत् pour अथाचरेत्.
[19] वामदेवमन्त्रः = "ओं हिं वामदेवगुह्याय नमः".
[20] B: स्थान pour ध्यान.
[21] A et B: संयुताम् pour संयुतम्.
[22] अघोरमन्त्रः = "ओं हुं अघोरहृदयाय नमः".
[23] A: तिरोधां; C: तिरोधं.
[24] पुरुषमन्त्रः = "ओं हें तत्पुरुषवक्त्राय नमः".
[25] ईशमन्त्रः = "ओं हों ईशानमूर्धाय नमः".
[26] A: तु pour च.
[27] A, B et C omettent च dans चेश्वरं.
[28] C: स्मृताः.

गोक्षीरसदृशं [1]पूर्वे दक्षिणे [2]त्वञ्जनप्रभम् । पश्चिमे तु तटिज्ज्योतिरुत्तरे [3]कुङ्कुमप्रभम् ॥ ४१ ॥
ऊर्ध्वे [4]स्फटिकसंकाशमेवं [5]सादाख्यकल्पनम्[6] । एवं सूक्ष्मतनुं [7]ध्यात्वा [8]तस्मिन्नङ्गानि कल्पयेत् ॥ ४२ ॥
प्रत्यङ्गोपाङ्गकं [9]पश्चान्न्यस्य मूलं च विन्यसेत् । [10]मकुटात्पादपर्यन्तमष्टत्रिंशत्कला[11] न्यसेत् ॥ ४३ ॥
[12]तत्पूरुषेण मन्त्रेण संनिरोधनमाचरेत् । [13]पाद्यमाचमनं चार्घ्यं हृदयेन तु दापयेत् ॥ ४४ ॥
पञ्चब्रह्मशिवाङ्गैश्च व्योमव्यापीति मन्त्रतः । जलाभिषेकः कर्तव्यो गव्यं [14]वै सद्यमन्त्रतः ॥ ४५ ॥
[15]हरिद्रामलकं तैलं[16] लेपनं हृदयेन तु । वस्त्रमाभरणं चैव गन्धपुष्पं [17]सुधूपकम् ॥ ४६ ॥
हविष्यं चैव ताम्बूलं हृदयेनैव[18] दापयेत् । सोमेशायाभिषेकं चाप्यस्मिल्लिङ्गे समाचरेत् ॥ ४७ ॥
गन्धोदकं हिरण्यं च पुष्परत्नोदकं तथा । क्षीरं दधि घृतं चैव [19]मधु वै पञ्चगव्यकम् ॥ ४८ ॥
[20]व्योमव्यापिषडङ्गैश्चाप्यभिषेकं समाचरेत् ।

---

[1] C: पूर्वं. [2] C त्वञ्जनं भवेत्. [3] B: कुङ्कुमाभकम्.
[4] B: स्फाटिक pour स्फटिक. [5] C: कल्पने pour कल्पनम्.
[6] cf: *Kriyādīpikā*, p. 67-68:

अथ सदाशिवध्यानम् — . . . .

" पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम् । दृक्क्रियेच्छाविशालाक्षं ज्ञानचन्द्रकलान्वितम् ॥
धवलेशानवदनं पीततत्पुरुषाननम् । कृष्णाघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम् ॥
सुश्वेतपश्चिमास्यैकं सद्योजातं समूर्तिकम् । व्याघ्रचर्माम्बरधरं व्यालेन्द्रकटिसूत्रकम् ॥
नागोपवीतिनं शान्तं जटामकुटमण्डितम् ।
शूलं वज्रं च खड्गं परशुमभयदं सव्यभागे वहन्तं। नागं पाशं च घण्टामनलकरयुतं साङ्कुशं वामभागे ॥"

[7] A: त्वन्यं pour ध्यात्वा ; C: चिन्त्य. [8] A: तस्मिन्नङ्गान् प्रकल्पयेत्.
[9] A: पश्चान्यस्त्वा मूलं ; C: पश्चान्यस्तमूलं. [10] A: मकुटादि pour मकुटात्.
[11] C: कलां pour कला: ; voir *Rauravāgama, kriyāpāda, paṭala* 2 pour अष्टत्रिंशत्कलान्यास.
[12] A et C: तत्पुरुषेण. [13] A: पाद्यमाचमनार्घ्यं च ; B: पाद्यमाचमनार्घ्यं च.
[14] C: च pour वै. [15] cf. *Suprabhedāgama*, I, 8, 124-130:

तिलोद्भवेन तैलेन हस्तयन्त्रोद्भवेन वा । गोघृतेनैव वा लिङ्गमभ्यज्य हृदयाणुना ॥
मर्दयेच्छालिपिष्टेन हरिद्राचूर्णकेन वा । शिवेन पिण्डमन्त्रैश्च कलाभिर्मानमन्त्रकैः ॥
सहस्राक्षरमन्त्रेण व्योमव्यापिदशाक्षरैः । पञ्चाङ्गैश्चैव विद्याङ्गैः क्षुरिकाबीजमुख्यकैः ॥
सुगन्धिकुसुमोपेतं जलौघैरभिषेचयेत् । सद्योजातेन गोमूत्रं गोमयं गुह्यकेन तु ॥
क्षीरं तु बहुरूपेण दधि तत्पुरुषेण तु । ईशानेन घृतं स्नाप्य पञ्चगव्यमथैकतः ॥
समादायोक्तसंख्याभिः स्नापयेत्तु दशाक्षरैः । मधुनेक्षुरसेनैव नालिकेरजलेन च ॥
अच्छगोरोचनामिश्रजलैस्तं स्नापयेद्धृदा ॥

[16] A et C: हरिद्रामलतैलादि. [17] C: तु धूपकम् pour सुधूपकम्.
[18] C ajoute तु après हृदयेनैव. [19] C: मधुपैः pour मधु वै.
[20] A et C: व्योमव्याप्य षडङ्गैश्च अभिषेकं.

आज्यमुष्णोदकेनैव तैलं गन्धोदकेन तु । [1]भस्मानि रजनीतोयं[2] पञ्चकेनाभिषेचयेत् ॥ ५० ॥
ततः शुद्धोदकेनैव बीजमुख्येन [3]मन्त्रतः । उपवीतं च मकुटं कुण्डलं हारकर्णिकम् ॥ ५१ ॥
कवचेन तु मन्त्रेण [4]सोमेशाय प्रदापयेत् । [5]कटिसूत्रोदरबन्धं [6]च्छन्नवीरं तथैव च ॥ ५२ ॥
नूपुरं बाहुवलयं हृदयेन तु योजयेत् । अनेन चामरं छत्रं दर्पणं शिरसा विदुः ॥ ५३ ॥
गन्धं वै हृदयेनैव शिरसा पुष्पमुच्यते । धूपं तत्पुरुषेणैव [7]दीपमस्त्रेण दापयेत् ॥ ५४ ॥
[8]दद्यान्निवेदनं चैव ताम्बूलं हृदयेन तु । नृत्तगेयसमायुक्तं स्तोत्रं वाद्यं हृदा ददेत् ॥ ५५ ॥
अष्टपुष्पं त्रिगन्धं च सप्तवारि तथैव च । त्रिषु [9]चार्घ्यं तथा धूपो [10]रुरो शृणु यथाक्रमम्[11] ॥ ५६ ॥
आवाहनार्घ्यपाद्ये च स्नानधूपविलेपने । नैवेद्ये च विसर्गे च पुष्पमष्टसु योजयेत् ॥ ५७ ॥
अर्घ्ये विलेपने स्नाने त्रिषु [12]गन्धं सुयोजयेत् । आवाहने तथा चार्घ्ये पाद्ये [13]स्नाने तथैव च ॥ ५८ ॥
आचमने निवेद्ये [14]च विसर्गे सप्त वारि वै । [15]आवाहनान्ते पूजान्ते विसर्गे च [16]त्रिधार्घ्यकम् ॥ ५९ ॥
आसनार्चनकाले च पूजान्ते [17]च विशेषतः । [18]सप्तदशोपचारान्ते धूपकालास्त्रयः स्मृताः ॥ ६० ॥
स्नाने पुष्पार्चने काले [19]नैवेद्ये च तथैव च । शुद्धनृत्तावसाने [20]च प्रच्छन्नपटकालकः[21] ॥ ६१ ॥
[22]दिशाबलिर्निवेद्यान्ते होमान्ते [23]नित्य उत्सवः । अनन्तादिशिखण्ड्यन्तान्[24] प्रथमावरणे यजेत् ॥ ६२ ॥
[25]गौर्याश्चण्डेश्वरान्तं च द्वितीयावरणे यजेत् । [26]भवादिमूर्तयश्चाष्टौ[27] तृतीयावरणे यजेत् ॥ ६३ ॥

---

[1] A: भस्म रजनितोयं च.
[2] C: भस्मं रजनितोयं च ताम्बूलं हृदयेन तु । नृत्तगेयसमायुक्तं स्तोत्रवाद्यं हृदा ददेत् । पञ्चमेनाभिषेचयेत् .
[3] A: मन्त्रितम् .
[4] C: सोमेश्वराय दापयेत् ; A: सोमश्वर दधापयेत् .
[5] B: कटिसूत्रोदरं बद्धं च्छन्नवीरं ; A: कटिसूत्रोदरबन्धं च छन्नवीरं.
[6] C: चिह्नवीरं.
[7] C: दीपं चास्त्रेण.
[8] B: दहं निवेदनं ; C: हविषं निवे . . नं.
[9] A et B: चास्वं ; चास्यं—C ; mss lit आस्य pour अर्घ्य aux vers 56 et 59; corrigé sur la base de *Suprabhedāgama*, I, 8, 120.
[10] A: यथाकर्म रुरो शृणु ; C: यथाक्रमं रुरो शृणु.
[11] cf. *Suprabhedāgama*, I, 8, 120-122:

आवाहनान्ते पूजान्ते विसर्जनविधौ तथा । अर्घ्यं दद्यात्तु मन्त्रज्ञस्त्रिषु कालेषु बुद्धिमान् ॥
अर्घ्ये विलेपने स्नाने त्रिषु गन्धं प्रयोजयेत् । आवाहनार्घ्यपाद्येषु स्नानधूपविलेपने ॥
नैवेद्ये च विसर्गे च पुष्पमष्टसु योजयेत् । आवाहनं विना सप्त काले वारि सुयोजयेत् ॥

[12] B omet गन्धं.
[13] C: स्थाने pour स्नाने.
[14] C: न pour च.
[15] C: आचमान्ते तु pour आवाहनान्ते.
[16] A, B et C: विसर्गे च तृतीयकम् .
[17] C: तु pour च.
[18] A: सप्तादश pour सप्तदश.
[19] A: निवेद्यकाले तथैव च.
[20] A: न pour च.
[21] A: कालकम् pour कालकः.
[22] C: दिशाबलं निवेद्यान्ते.
[23] A, B et C: नित्यमुत्सवम् .
[24] A: शिखाण्डान्तान् pour शिखण्डयन्तान् .
[25] B: गौर्यादि चण्डदेवान्तं ; Le ms. C omet les trois demi-vers suivants.
[26] Le ms. C lit cet demi-vers après le vers suivant.
[27] A: अष्ट pour अष्टौ.

[1]इन्द्रादिलोकपालांश्च चतुर्थावरणे यजेत्। [2]वज्रादिपद्मपर्यन्तं पञ्चमावरणे यजेत्[3] ॥ ६४ ॥

---

[1] C omet cet demi-vers. [2] C: इन्द्रातिपद्मवर्त्यंतान्.

[3] En ce qui concerne le culte des différentes divinités dans les "cercles" [āvaraṇa] autour du *liṅga*—considéré comme étant Sadāśiva, le Seigneur—*Rauravāgama* donne une version qui diffère de celles que l'on trouve dans les Āgama que l'on peut se procurer ou dans les manuels śivaïtes — voir table ci-dessous.

Rauravāgama	Les autres *Āgama* et manuels
Āvaraṇa I: Vidyeśvara	*Avaraṇa I*: Garbhāvaraṇa
(Ananta, Sūkṣma, Śiva, Ekanetra, Ekarudra, Trimūrti, Śrīkaṇṭha, Śikhaṇḍin)	Brahmāṅga and Ṣaḍaṅga: Sadyojāta, Vāmadeva, Aghora, Tatpuruṣa, Īśāna Hṛdaya, śiras, śikhā, kavaca, netra et astra.
Āvaraṇa II: Gaṇeśvara	*Avaraṇa II*: Vidyeśvara
Gaurī, Nandin, Bhṛṅgin, Vṛṣabha, Mahākāla, Vināyaka, Skanda, Caṇḍeśvara	(Voir ci-dessus)
Āvaraṇa III: Aṣṭa-rudra ou Mūrtīśvara	*Āvaraṇa III*: Gaṇeśvara
Bhava, Śarva, Īśāna, Paśupati, Ugra, Rudra, Bhīma, Mahādeva	(voir ci-dessus)
Āvaraṇa IV: Dikpāla	*Āvaraṇa IV*: Dikpāla
Indra, Agni, Yama, Nirṛti, Varuṇa, Vāyu, Kubera, Īśāna.	
Āvaraṇa V: Astra	*Āvaraṇa V*: Astra
Vajra, Śakti, Daṇḍa, Khaḍga, Pāśa, Dhvaja (ou Aṅkuśa), Gadā, Triśūla, Cakra, Padma.	

Sadāśiva est au centre. Immédiatement autour, sont disposés les brahmāṅga et les ṣaḍaṅga, qui forment le *garbhāvaraṇa* des autres textes; *Rauravāgama* mentionne ces "aṅga" mais ne les considère pas comme formant un *āvaraṇa*; il donne les

[1]कालमुद्रां प्रदर्श्याथ बीजमुद्रां प्रदर्शयेत् । सोमेश्वरादिदेवानामेकावरणमेव तु ॥ ६५ ॥
आसनं प्रागिवैव स्यादन्यत्सर्वं समं भवेत् । एवं यः कुरुते मर्त्यः [2]शिवलोके महीयते ॥ ६६ ॥

इति [3]श्रीमद्रौरवतन्त्रे [क्रियापादे] [4]अर्चनाविधिर्नाम दशमः पटलः.

āvaraṇa I et II des autres textes, *vidyeśvara* et *gaṇesvara*; et il ajoute les *mūrtīśvara* comme forment *l'āvaraṇa* III. Pour les *āvaraṇa* IV et V il suit les autres textes. Autres divergences entre *Rauravāgama* et les autres écrits, en ce qui concerne: les noms et directions des cinq visages de *Pañcamūrti*, [vers 39-40] les directions de quelques divinités, et la description des *āsana*.

Il ne semble pas que le texte ait été corrompu. La seule explication que l'on puis se donner de ces divergences est l'existence de différentes écoles.

Pour l'école de *Kāmikāgama* voir *Kāmika*, I, 4, 392-418, *Suprabhedāgama*, I, 8, 136-149, etc. ; voir aussi *Tantra-sāra*, (cité dans le *Sakalāgamasārasaṃgraha*, p. 97):

पञ्चावरणसंग्रहम् । तन्त्रसारे—

ब्रह्माङ्कानां प्रथमावृतं स्याद् विद्येश्वराणां च गणेश्वराणाम् ।
दिक्पालकानां च दशायुधानामीशस्य पञ्चावरणक्रमेण ॥

Voir aussi, *Kriyādīpikā*, p. 76:

आवरणपूजा—

अनन्ताद्या दलाग्रेषु पीठकण्ठे गणादयः । पीठपादेषु लोकेशास्तदस्त्राणि शिलोपरि ॥

इति वचनाद् दलाग्रेष्वनन्तादीन् पूजयेत् । पीठकण्ठे गणेश्वरादीन् पूजयेत् । पीठपादे लोकेशान् पूजयेत् । तदस्त्राणि ब्रह्मशिलोपरि पूजयेत् ।

[1] Les mss. lisent ताळमुद्रां pour कालमुद्रां.

cf. *Suprabhedāgama*, I, 8, 150-151:

गर्भावरणमन्त्राणां बीजमुद्रां तु दर्शयेत् । विद्येशानां गणेशानां कालकण्ठं तु दर्शयेत् ।
लोकेशानामथास्त्राणां शूलमुद्राः प्रकीर्तिताः ॥

[2] B: ब्रह्मलोके.

[3] A: श्री pour श्रीमद् ; B omet श्रीमद्रौरवतन्त्रे.

[4] A: अर्चनविधिपटलो दशमः ; C: अर्चनविधिर्नाम त्रयोदशः पटलः .

[एकादशः पटलः]

[पश्चिमाभिमुखार्चनविधिः]

[1]पश्चिमाभिमुखे हर्म्ये विशेषं तु वदामि ते । [2]समे द्वारं च वक्त्राख्यं[3] मण्टपादीनि पश्चिमे ॥ १ ॥
[4]प्रागुक्तं च दिशामूर्तिं पश्चिमे तु प्रकल्पयेत् । पश्चिमोदितमूर्तानि [5]पूर्वस्यां दिशि विन्यसेत् ॥ २ ॥
स्थापयेन्मूललिङ्गं च पश्चिमाभिमुखं यथा । [6]गोमुखं चण्डिकां यां च सौम्याग्राञ्जलधारकाम् ॥ ३ ॥
[7]लिङ्गेऽर्चितं तु सादाख्यं महेशं वा विशेषतः । [8]पूर्वसूत्रं च नासां च हृदयं च स्तनोदरम् ॥ ४ ॥
नाभिं लिङ्गं च [9]जानू च पादयोरङ्गुलाग्रकम् । पश्चिमाभिमुखं [10]चिन्त्य कल्पयित्वार्चयेद्बुधः ॥ ५ ॥
अत्र [11]सद्यं पुरोवक्त्रं वामवक्त्रं तु दक्षिणे । [12]पुरुषं पश्चिमे वक्त्रमघोरं सौम्यदिङ्मुखम् ॥ ६ ॥
ईशानमूर्ध्ववक्त्रं स्यादिष्टं नैर्ऋतमाश्रितम्[13] । ध्यात्वैवमर्चयेत्प्राग्वत्[14] क्रियामन्त्रानुभेदवित्[15] ॥ ७ ॥
[16]मनोन्मनीमुमां याम्ये चण्डेशं शांकरेऽर्चयेत् । [17]अन्यान्स्वावरणान् देवान् प्रागिवैव समर्चयेत्[18] ॥ ८ ॥
वृषभं परिवारे तु पश्चिमे तु समर्चयेत् । महापीठं तथाभ्यर्च्य प्रथमं वृषभं यजेत् ॥ ९ ॥
शनैः प्रदक्षिणं कृत्वा प्राच्यां स्कन्दं समर्चयेत् । प्रदक्षिणक्रमादिष्ट्वा शांकरान्तं विशेषतः ॥ १० ॥
ततो विघ्नादिभूतानि ब्रह्मपीठे समर्चयेत् । स्नपने शिवकुम्भं तु स्थापयेत्पश्चिमाननम् ॥ ११ ॥
[19]वर्धनीं तस्य वामे तु [20]कुण्डान्यन्यानि पूर्ववत् । उत्सवे [21]यागशालां च कल्पयेत्पश्चिमाननाम् ॥ १२ ॥
वेदिकायां [22]घटं चैव शैवाख्यां वर्धनीं तथा । पश्चिमाभिमुखं स्थाप्य [5]तस्याग्रे त्वग्निकुण्डकम् ॥ १३ ॥

---

[1] B omet ce *paṭala* ; pour पश्चिमाभिमुखार्चन voir *Kāmikāgama*, II, 1.
[2] C: सत्वे भारं pour समे द्वारं.
[3] C: वक्त्राख्यमण्डपादीनि.
[4] A: प्राकमुक्तदिशामूर्ति.
[5] A: पूर्वायां.
[6] A: गोमुखाञ्चण्डिकायां च.
[7] A: लिङ्गार्चितं.
[8] C: पूर्वसूत्रं च ; A: पूर्वं सूत्राश्च.
[9] C: जानुं.
[10] A: चिन्त्यं.
[11] C: सद्यः ; A: सद्यं पुरेवक्त्रं.
[12] C: पुत्रषड् पश्चिमे.
[13] A: नैर्ऋत्यमाश्रितम् .
[14] A: प्राञ्च: pour प्राग्वत् .
[15] A: भेदितम् pour भेदवित् ; C: भेदवत् .
[16] C: मनोन्मनीमुमां ध्याये चण्डेशाय करेऽर्चयेत् .
[17] C omet les trois demi-vers suivants.
[18] cf. *Kāraṇāgama*, I, 30, 444-445:
पश्चिमद्वारहर्म्ये तु किञ्चिद्भेदं शिवार्चने । उपचाराणि सर्वाणि सद्यवक्त्रे प्रदापयेत् ॥
आसनावरणादीनि पूर्ववत् परिकल्पयेत् ॥
[19] A: वर्धनी.
[20] A: करिनान्त्यादि ; C: करीरान्यादि.
[21] C: यागशालाश्च.
[22] C: घटांश्चैव.
[23] A: तस्याग्रे अग्निकुण्डलम् .

कल्पयित्वा तु [1]भूताग्निं कृतमार्गं समाचरेत् । ध्वजोत्थाने [2]च तीर्थे च [3]चूर्णोत्सवे तथैव च ॥ १४ ॥
त्रिशूलं पश्चिमाग्रं स्यात्तस्याग्रे कलशादयः । स्थापयित्वा [4]यथान्यायं [5]सर्वकर्म समाचरेत् ॥ १५ ॥
एवं कृते नरेन्द्रस्य विजयायुष्यदं सदा । [6]राष्ट्रस्यार्तिनिवृत्तिः स्याद्विपरीते विपद्भवेत् ॥ १६ ॥
शिवं तु [7]शिवलिङ्गे तु मोक्षकामी समर्चयेत् । उभयार्थ्यत्र सादाख्यं महेशं वा यजेत्सदा ॥ १७ ॥
शिवार्चनं शिवे लिङ्गे [8]मिश्रं च सकलं विना । [9]सर्वेश्वरषडध्वात्मशिवायेत्यर्चनं कुरु ॥ १८ ॥
शेषं प्रागिव कर्तव्यमर्चनोक्तं विशेषतः ॥

इति [10]श्रीमद्रौरवतन्त्रे [11]क्रियापादे [12]पश्चिमाभिमुखार्चनविधिर्नाम [13]एकादशः पटलः

---

[1] A: भूतात्युक्ता नैव समाचरेत् .
[2] C: omet च.
[3] C: पूर्णोत्सवं.
[4] C: तथा pour यथा.
[5] C: सिद्धिं कर्म.
[6] A: राष्ट्रस्यासु निवृत्तं स्याद् .
[7] C: शिवलिङ्गोऽत्र.
[8] C: शिवं pour मिश्रं.
[9] C: सर्वेश्वर षडध्वात्मा ; A: सर्वेश्वरं षडध्वात्म.
[10] C: श्रीरौरवतन्त्रे.
[11] A: et C omettent क्रियापादे.
[12] A: पश्चिमाभिमुखार्चनविधिपटल एकादशः .
[13] C: एकोनचत्वारिंशत्पटलः .

[द्वादशः पटलः]

[नैवेद्यविधिः][1]

अतः परं प्रवक्ष्यामि नैवेद्यस्य विधिक्रमम् । हविर्वित्तानुसारेण भक्त्या चैवोचितेन च ॥ १ ॥
[2]शालीयं तण्डुलं श्रेष्ठं [3]मध्यमं यववैणवम् । [4]व्रीहिस्तु कन्यसः ख्यातः [5]प्रियङ्ग्वादिरथापि वा ॥ २ ॥
[6][सुदेशे न्यस्य संतप्तान् व्रीहींश्च रविरश्मिभिः । प्रक्षिप्त्वोलूखलेऽभ्युक्ष्य मुसलेन प्रहृत्य च ॥ ३ ॥
शूर्पादिकरणैस्तेषां तुषकम्ब्वादि वर्जयेत् । व्रीहीणां पञ्चकं गुञ्जा त्रिंशद्विन्दुस्तथा ह्युडु] ॥ ४ ॥
[7]उडुद्वयं तु शुक्तिः स्यात्तद्द्वयं तु तलं भवेत् । तलद्वयं [8]प्रकुञ्चः स्यात्तद्द्वयं[9] [10]कुडवो भवेत् ॥ ५ ॥
तद्द्वयं [11]प्रसृतिं विद्यात् [12]तद्द्वयं चाञ्जलिर्भवेत् । तदञ्जलिद्वयं [13]प्रस्थः प्रस्थस्य द्विगुणं चरुः ॥ ६ ॥
तद्द्वयं [14]चाढकं विद्यात्तद्द्वयं शिवमुच्यते । तद्द्वयं द्रोणमाख्यातं [15]खारी स्यात्तद्द्वयं विदुः ॥ ७ ॥

---

[1]pour नैवेद्यविधि voir *Kāmikāgama*, I, 6, *Kāraṇāgama*, I, 33, *Kumāratantra*, *paṭala* 6, *Cintyāgama*, *paṭala* 16, *Yogajāgama*, p. 339-347, *Vīrāgama*, *paṭala* 34.

[2] B: शालितण्डुलकौ श्रेष्ठौ ; C: शालीनां तण्डुलं श्रेष्ठं.

[3] A: वैणवं यवमध्यमम् ; C: वैष्णवं यवमध्यमम् .

[4] A: व्रीहीनां कन्यसं ख्यातं.

[5] A: प्रियङ्ग्वापिरथापि वा ; B: प्रियङ्गुरपि वा तथा.

[6] Les mss. A, B, et C sont corrompus et lisent:

देशिन्यास्त्रापितो जीवा त्रिंशद्विन्दुरिति दृढा (A)
देशिन्यास्तापितो जीवा त्रिंशद्विन्दुरिति दृढा (B)
देशिन्यास्त्रापितो जोवा त्रिंशद्विन्दुरित्यर्थाढकः (C)

D'après le contexte il semble qu'il y ait une lacune entre le premier *pāda* et le second. Le fait que cette lacune se présente dans les trois mss. permet d'inférer qu' ils reposent tous trois sur un méme manuscrit de base la présentant.

La portion entre crochets a été reconstiueè d'après la *Kāmikāgama*, I, 6, 14-15, le *Kāraṇa*, I, 33, 6-7, le *Suprabheda*, I, 10, 5-8, le *Yogaja*, ms. page 339, le *Kumāratantra*, 6, 13-15, le *Bhāvaprakāśa* et la *Śārṅgadharasaṃhitā*.

[7] A: उसु pour उडु. [8] C: प्रकुञ्चः. [9] C द्वयं च pour तद्द्वयं.

[10] A: कुरपं ; C: कुडुवं ; *Kāmika* et *Kāraṇa*: कुडुपं ; *Yogaja*: कुडुवं ; *Amarakośa*, *Bhāvaprakāśa*, *Caraka*, *Suśruta* etc: कुडवः.

[11] B: प्रसृतिः. [12] A: तद्द्वयमञ्जलिं भवेत् .

[13] A: प्रस्थं. [14] C: तु pour च dans चाढकं.

[15] B: खार्याख्यं तद्द्वयं भवेत् ; C: खारिस्स्यात् तद्द्वयं विदुः .

[1]खारित्रयं तु [2]भारं स्याच्छ्रेष्ठं [3]खारिचतुष्टयम्। मध्यमं तु [4]त्रिखारि स्यात् पञ्चद्रोणं [5]तु कन्यसम्[6] ॥
[7]उत्तमं त्रयमेवं स्याच्चतुरग्न्यक्षिद्रोणकम्[8]। [9]मध्यमं त्रयमाख्यातं [10]द्रोणशैवाढकं क्रमात् ॥ ९ ॥
[11]अधमं त्रयमाख्यातं [12]होमार्थं चरुरुच्यते। [13]अन्येषां दैवतानां [14]चाप्याढकं हविरुच्यते ॥ १० ॥
[15]देवीनां चैव सर्वासां [16]द्विप्रस्थं तु हविर्भवेत्[17]। तण्डुलं पञ्चपादं तु भूतादीनां बलिं विदुः ॥ ११ ॥
[18]सार्धभाराच्छतं यावद्धारार्धद्रोणवर्धनात्। महाहविःप्रमाणं [19]चाप्येवमेवमनेकधा ॥ १२ ॥
प्रोक्तं[20] तण्डुलमानं [21]तदुपदंशमथोच्यते। विविधं शिम्बमुद्राश्च [22]कुलत्थं [23]राजमाषकम् ॥ १३ ॥

---

[1] B: खारीत्रयं ; C: खारिद्वयं.
[2] B: भारः स्यात्.
[3] B: खारीचतुष्टयम्.
[4] B: त्रिखारी स्यात् ; C: द्विभारं स्यात्.
[5] C: पञ्चद्रोणं कनीयसम्.
[6] cf. sur le tableau ci-contre les différents noms des unités de poids ou capacité utilisées pour mesurer les grains etc. . .

cf. *Suprabhedāgama*, I, 10, 8-9:

द्विगुञ्जं माषकं विद्याद्धरणं माषविंशतिः। धरणाष्टौ पलं चैव पलं मुष्टिरिहोच्यते ॥
चतुर्मुष्टिस्तथा पादं प्रस्थं पादचतुष्ककम्। आढकं तच्चतुष्कं स्याद्द्रोणं तस्य चतुष्ककम् ॥

cf. *Kāmikāgama*, I, 6, 20-21:

द्विगुञ्जं माषकं विद्याद्धारणं माषविंशतिः। धारणाष्टौ पलं चैव पलं मुष्टिरिहोच्यते ॥
तच्चतुर्गुणितं प्रस्थं भवेत्पात्रादि पूर्ववत्। भारं खारित्रयं प्रोक्तं मानमेवं प्रकीर्तितम् ॥

[7] B et C: उत्तमत्रयमेवं.
[8] A: चतुरं न्यक्षद्रोणकम्.
[9] B et C: मध्यमत्रयमाख्यातं.
[10] A: द्रोणं शैवाधिकं क्रमात्.
[11] B et C: अधमत्रयमाख्यातं.
[12] B: होमार्धं हविरुच्यते.
[13] A: अन्यद्वा.
[14] A, B et C: तु आढकं pour चाप्याढकं.
[15] C: देवानां चैव सर्वेषां.
[16] A: द्विप्रस्थं हविषं भवेत् ; C: द्विप्रस्थं हविषा भवेत्.
[17] cf. *Kāraṇāgama*, I, 33, 12-19:

आढकेनैव नैवेद्यमधमाधममुच्यते। कनिष्ठमध्यमं शैवं द्रोणं स्यादधमोत्तमम् ॥
खारी मध्याधमं चैव सार्धार्धमथ मध्यमम्। मध्यमोत्तममित्युक्तं चतुर्द्रोणैः कृतं हविः ॥
उत्तमाधममित्युक्तं पञ्चद्रोणैः कृतं हविः। षड्द्रोणैस्तण्डुलैः सिद्धं भवेदुत्तममध्यमम् ॥
उत्तमोत्तममित्युक्तमष्टद्रोणैस्तु तण्डुलैः। एवं विशेषतः प्रोक्तं नित्यं नवविधं तथा ॥
अष्टद्रोणमथारभ्य यावद्वृद्ध्या नवोदिताः। यावद्द्वादशभारान्तमधमादित्रयं त्रयम् ॥
नैमित्तिकं तु नैवेद्यं नवधा समुदाहृतम्। प्रार्थितं यत्प्रमाणेन तत्प्रमाणं तु काम्यकम् ॥
ततः कुडुपयुक् प्रस्थं पैशाचाशनमुच्यते। पात्रं तु चरुरित्युक्तमाढकं हविरुच्यते ॥
न कल्पयेत्तु नैवेद्यमाढकार्धं न तण्डुलैः ॥

[18] A: सार्धभारश्च तं यावहारार्द्धद्रोणवर्धनात् ; C: सार्धभाराः शतं यावद्धारं तद्द्रोणवर्धनात्.
[19] A, B et C: तु एवम् pour चाप्येवम्.
[20] A: प्रोक्ततण्डलमानं.
[21] A, B et C: तु उपदंशमथोच्यते.
[22] A: कुलस्थं.
[23] A et C: लाजमाषकम्.

माषं चैव[1] रुरो विद्यात्सतुषं वितुषं [2]तु वा । कदली पनसं चैव सूरणं [3]कारवल्लिका ॥ १४ ॥
[4]उर्वारुर्जालिनी चैव [5]कालिका बृहती तथा । [6]कूष्माण्डालाबुनी चैव [7]त्रपुसं चूतमेव वा ॥ १५ ॥
[8]अन्यत्र च फलान्मूलं [9]तिन्त्रिण्याश्च फलं [10]ग्रहेत् । मृत्पात्रे ताम्रपात्रे वा हविःपाकं समाचरेत् ॥ १६ ॥
पात्रेषु तण्डुलादीनि [11]क्षुरिकेणैव निक्षिपेत् । त्रिःकृत्वा हृदयेनैव क्षालयेत्तु शिवाम्भसा ॥ १७ ॥
[12]तण्डुलद्वयधिकं तोयं बीजमुख्येन पूरयेत् । [13]तदोपदंशं संक्षाल्य पलं प्रत्यञ्जलिर्जलम् ॥ १८ ॥
लवणं प्रतिपलं निष्कं [14]तस्यार्धं तु मरीचिकम् । उद्धृत्य [15]सर्वपात्राणि [16]हृदा चुल्ल्यां परिन्यसेत् ॥१९॥
सद्येनैवेन्धनं [17]योज्य वह्निमस्त्रेण दीपयेत् । शनैः पाकमघोरेण पक्वापक्वं हृदा दृशेत् ॥ २० ॥
बाह्यशुद्ध्यर्थमस्त्रेण[18] न्यसेद्धस्म [19]चतुर्दिशि । मार्जनं प्रोक्षणं मार्गं [20]कृत्वा हविः समुद्धरेत् ॥ २१ ॥
शङ्खध्वनिसमायुक्तं [21]सर्पिश्च जलसेचनम् । मण्डपे [22]नैर्ऋतांशे तु स्थापयेत्परिचारकः ॥ २२ ॥
आस्यबन्धसमायुक्तो [23]नासाबन्धसमन्वितः । मार्जनं प्रोक्षणालेपं कृत्वा [24]वस्त्रं परिस्तरेत् ॥ २३ ॥
वस्त्रोपर्यग्निपादं तु तस्योर्ध्वे [25]दलिकां न्यसेत् । दर्वीं च [26]दलिकां क्षाल्य [27]त्रिपाद्या उपरि न्यसेत् ॥२४॥
[28]सौवर्णं राजतं कांस्यं [29]दलिकावरान्तराधमम् । अस्त्रेणाज्याभिघारं तु कृत्वान्नं पूरयेत्क्रमात् ॥ २५ ॥
[30]पादोनेऽष्टकभागे तु सप्तांशं हृदयेन तु । [31]पूरयेद् दलिकायां चाप्युपदंशं तदूर्ध्वतः ॥ २६ ॥
तदूर्ध्वं [32]दधि चापूर्य सिताज्यं चोपरि न्यसेत् । कदल्याम्रफलं चैव पनसस्य [33]फलादिकम् ॥ २७ ॥
[34]ओदनोपरि संस्तीर्य देवस्याग्रे निधापयेत् । हृदा निवेदयेद्धीमानास्ये वरदमुद्रया ॥ २८ ॥

---

[1] A: चैषा pour चैव.
[2] C: तथा pour तु वा.
[3] C: कारवल्लिकौ.
[4] A: उर्वात्रिजालिनी.
[5] A, B et C: कालिकी.
[6] B: कूष्माण्डालाबुकं चैव ; C: कूष्माण्डलाम्बुनी चैव.
[7] A: त्रपुषं.
[8] A: अन्यत्र सफला मूला.
[9] A et C: तिन्त्रिणी च.
[10] A: गृहेत्.
[11] par le क्षुरिकामन्त्र.
[12] C: तण्डुलाद्यर्थकं ; B: तण्डुलाद्द्वितयं.
[13] A: तद्देवोपदशंक्षाल्य ; C: पात्रेषु दंशान् संक्षाल्य ; B: तदेवापदशं क्षाल्य.
[14] A: तस्मात् सार्धमरीचिकम् ; C: तस्यार्धार्धं मरीचिकम्.
[15] C: सर्वशस्त्राणि.
[16] A: हृदा चूल्या निवेशयेत् ; B: चुल्लिकायां हृदा न्यसेत् ; C: हृदा चुल्लपरि न्यसेत्.
[17] C: योज्यं.
[18] A: मन्त्रेण pour अस्त्रेण.
[19] C: चतुर्दशी.
[20] B: हविः कृत्वा pour कृत्वा हविः.
[21] A: सर्पिं च जलसेवनम् ; C: स्रुवि च जलसेवनम्.
[22] B: नैर्ऋते देशे.
[23] A: नासापुटसमन्वितम्.
[24] A: वस्त्रोपरि व कार्यं तु.
[25] A, B et C: कलिकां.
[26] A, B et C: कलिकां.
[27] A: त्रिपाद्युपरि विन्यसेत्.
C: सुवर्णं.
[29] A: दलंकारवरान्तराधमम् ; B: दलिकां वरान्तराधमम् ; C: कलिका वरान्तराधमम्.
[30] A: पादोदनेऽष्टभागे तु.
[31] A et B: पूरयेद्दलिकायां तु उपदंशं ; C : पूरयेत्कलिकायां तु उपदंशं.
[32] A: दधिमापूर्य.
[33] A: फलादिका ; C: फलादिकान्.
[34] B: तदन्नोपरि.

[1]मनसैवौदनं भाव्य तन्मूर्तिध्यानतत्परः । [2]स्थानकं वासनं नृत्तं वैवाह्यं यानमूर्ति वा[3] ॥ २९ ॥
तद्रुद्रभावमेवं स्यात्त्वास्ये दद्यात्तु देशिकः । दक्षिणे [4]त्वभयेनास्ये दत्त्वौदनादि चिन्तयेत् ॥ ३० ॥
[5]पात्रशेषार्धमन्नं तु बलिं दद्यात्स्वमन्त्रतः[6] । वृषादिपीठपर्यन्तमक्षमात्रान्तपिण्डतः[7] ॥ ३१ ॥
[8]बलिदानं प्रकर्तव्यं [9]घण्टां दीपं सवाद्यकम् । [10]शेषान्नेन [11]घृताक्तेन नित्याग्निकार्यमाचरेत् ॥ ३२ ॥
[12]हृदादिना नमोऽन्तेन प्रत्येकाहुतिमाचरेत् । अन्ते पूर्णाहुतिं कुर्यादाज्येन हृदयेन तु ॥ ३३ ॥
ततः पानीयमुद्धृत्य दापयेद्धृदयेन तु । यावद्ग्रहोपशमनं मनसोच्छिष्टशुद्धिकम् ॥ ३४ ॥
तावत्पानीयकं दद्याच्छुद्धिं[13] चाचमनं कुरु । [14]निर्माल्यं पात्रेणादाय चण्डेशाय निवेदयेत् ॥ ३५ ॥
ताम्बूलं दापयेत्पश्चान्मुखवाससमन्वितम् । [15]शुद्धौदनं हरिद्रान्नं पायसान्नं [16]गुळौदनम् ॥ ३६ ॥
[17]मुद्गौदनं क्रमेणैव [18]चेशपञ्चमुखे यजेत् । [19]तेष्वेवं तु यथालाभं पूर्वे वा पश्चिमे मुखे ॥ ३७ ॥
हृदा निवेदयेद्धीमान् [20]पानीयादि च पञ्चसु । एवं यः कुरुते [21]मर्त्यस्त्विह लोके तु भोगकान् ॥ ३८ ॥
यथेष्टं विषयान [22]भुक्त्वा सोऽन्ते सायुज्यमाप्नुयात् ॥ ३९ ॥

[23]इति श्रीमद्रौरवतन्त्रे [क्रियापादे] नैवेद्यविधिर्नाम [24]द्वादशः पटलः

[1] B: मनसोदनदानं भाव्यता मूर्तिध्यानतत्परः ; C: मनसोदनमिदं भाव्य तन्मूर्तिध्यानतत्परः .
[2] A: स्थानकं वा सनृत्तं वा वैशाखं यानमूर्तें वा ; B: स्थानकं सनृत्तं वा वैशाखं यानमूर्तिं वा ; C: स्थानकं वासनं नृत्तं वैवान्यं यानमूर्तिनाम .
[3] स्थानकं = चन्द्रशेखरमूर्तिः ; आसनं = उमामहेश्वरमूर्तिः ; नृत्तं = नटराजमूर्तिः ; वैवाह्यं = कल्याणसुन्दरमूर्तिः ; यानमूर्तिः = भिक्षाटनमूर्तिः .
[4] A: त्वहयेनान्यत्तादानादि ; B: त्वयेनान्यदत्त्वा दानानि ; C: त्वभयेनान्यदत्तोदनानि.
[5] A: पात्रे शेषार्धमन्नं.
[6] A: समन्त्रतः pour स्वमन्त्रतः .
[7] C: पिण्डितम् pour पिण्डतः .
[8] cf. *Kāraṇāgama*, I, 33, 68-69, pour l'étymologie du mot *bali*:
बकारं बलदं विद्धि लिकारं ध्यानसंभवम् । बकारलिकारसंयुक्तो बलिशब्दः प्रकीर्तितः ॥
आदानध्यानसंबन्धाद्बलिशब्दः प्रकीर्तितः ।
[9] A: घण्टा दीपं स्ववाद्यकम् ; C: घण्टा दीपं तु वाद्यकम् .
[10] A: येषां तेन pour शेषान्नेन ; B: एवान्तेन ; C: शेषान्तेन.
[11] A, B et C: घृतान्तेन.
[12] A et B: हृदादीनां वनमोन ; C: हृदादीनामसामेन.
[13] A et C: शुद्धिः pour शुद्धिं.
[14] A: निर्माल्यपात्रेणादाय.
[15] C: शुद्धोदनं.
[16] A: गुळोदनं.
[17] C: मुद्गोदनं.
[18] A: ईशानं पञ्चमुखादयेत् ; C: ईशपञ्चमुखे ददेत् ; B: ईशात् पञ्चमुखे ददेत् .
[19] A: तेष्वेवं यावता लाभं.
[20] B: पानीयादिषु.
[21] A: मर्त्यः शिवलोकेऽनुभोगकान् ; B: मर्त्यः शिवलोके तु भोगवान् .
[22] B: भुङ्क्त्वा pour भुक्त्वा.
[23] A: इति श्रीरौरवतन्त्रे नैवेद्यविधिपटलो द्वादशः .
[24] C: षोडशः .

[त्रयोदशः पटलः]

[नवनैवेद्यविधिः][1]

अतः परं प्रवक्ष्यामि [2]नवनैवेद्यलक्षणम् । [3]प्रोष्ठपादं विसृज्यान्यमासेष्वाग्रयणं[4] परम् ॥ १ ॥
[5]उत्तमेषु मुहूर्तेषु शूलं चण्डेश्वरं तथा । सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् ॥ २ ॥
दध्यन्नपुष्पसंयुक्तं स्वक्षेत्रं प्रविशेत्ततः । [6]त्र्यक्षं च [7]द्विभुजं रौद्रं [8]श्यामवर्णं सदंष्ट्रकम् ॥ ३ ॥
खड्गं दक्षिणहस्ते तु[9] वामहस्ते गदाधरम् । कृष्ण[10]वस्त्रधरं चैव करण्डमकुटान्वितम् ॥ ४ ॥
क्षेत्रे [11]च शंकरांशे तु क्षेत्रं दृष्ट्वा [12]हि संस्थितम् । गन्धैः पुष्पैश्च धूपैश्च दीपैर्दध्योदनैरपि ॥ ५ ॥
क्षेत्रपालं समभ्यर्च्य [13]स्वनाम्नैव तु मन्त्रतः । [14]शूकमस्त्रेण [15]संच्छेद्य विविधैः [16]शूकभारकैः ॥ ६ ॥
[17]उपदंशादिभिश्चैव पुष्पैर्मृद्भाण्डकादिभिः । ग्रामप्रदक्षिणं कृत्वा प्रासादं प्रविशेत्ततः ॥ ७ ॥
[18]हत्वा [19]शूकांस्ततः [20]शालीन् [21]कुर्यादग्नसु तापयेत् । [22]मण्डपे मण्डले रम्ये शालिदर्भादि [23]संस्तरेत् ॥
[24]हृदा चोलूखलं स्थाप्य [25]प्राङ्मुखो वाप्युदङ्मुखः । शिरसा पूरयेच्छालिं[26] [27]ब्रह्माङ्गानभिमन्त्र्य च ॥९॥
मुसलं कवचेनैव गृह्यास्त्रेण तु कारयेत् । व्यपोह्य तुषकादीनि [28]पाषाणादीन् विसृज्य च ॥ १० ॥

---

[1] Voir *Suprabhedāgama*, I, 17, et *Kāmikāgama*, II, 19.

[2] B: नवनैवेद्यमुत्तमम् .

[3] A: प्रोष्ठमं सृज्यान्य pour प्रोष्ठपादं विसृज्यान्य.

[4] B: विसृज्यान्यदक्षमाग्रयणे pour विसृज्यान्यमासेष्वाग्रयणं.

[5] A: मुक्तकेषु pour उत्तमेषु ; C: उत्तरे शुक्लपक्षे तु pour उत्तमेषु मुहूर्तेषु.

[6] A: त्रियक्षं pour त्र्यक्षं च.

[7] C: त्रिभुजं.

[8] A: श्यामवर्णमिदं स्मृतम् ; B: श्यामवर्णं च दंष्टकम् .

[9] B: दक्षिणहस्तेन pour दक्षिणहस्ते तु.

[10] C: शालि pour वस्त्र.

[11] A, B et C: तु pour च.

[12] A: तु pour हि ; B omet हि.

[13] A: स्वनामैनैव मन्त्रितम् ; B: मन्त्रैश्च स्वस्वनामभिः .

[14] A: शुकम् pour शूकम् .

[15] B: संसेच्य ; C: सञ्छोद्य.

[16] B: शूक pour शाक ; C: शुक pour शाक.

[17] A: उपदंशादयं चैव ; B: उपदंशादयश्चैव.

[18] B: हृत्वा.

[19] A: शूलिं.

[20] A: शालिं.

[21] A et B: कुर्यादग्नौ सुदापयेत् .

[22] A: मण्डले मण्डपे रम्ये ; C: मण्टपे pour मण्डपे.

[23] A: संस्थलैः pour संस्तरेत् ; B: विस्तृते pour संस्तरेत् .

[24] A: हृदा वै लूखलं.

[25] A: प्राङ्मुखे.

[26] A: शालीं pour शालिं.

[27] B: ब्रह्माङ्गेनाभिमन्त्रयेत् .

[28] C: पाषाणानि विसृज्य च.

[1]द्रोण्यादिषु हृदापूर्य [2]शुद्धतोयेन पूरयेत् । [3]समुद्रान्ते जलं त्यक्त्वा [4]स्थण्डिले तु[5] गुळं न्यसेत् ॥ ११ ॥
नालिकेरफलं [6]चैवापीक्षुखण्डांश्च विन्यसेत् । संमिश्रयेद्घृदा मन्त्री हृदयेन निवेदयेत् ॥ १२ ॥
[7]अन्यत्र तण्डुलैः पाकं [8]कृत्वान्नं सोपदंशकैः । महाहविर्निवेद्याथ [9]बलिं चैव प्रदापयेत् ॥ १३ ॥
नित्याग्निकार्यं कृत्वाथ[10] [11]तण्डुलैश्चौदनैरपि । आचार्यं पूजयेत्तत्र भक्तांश्च परिचारकान् ॥ १४ ॥
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ १५ ॥

[12]इति श्रीमद्रौरवतन्त्रे [13]क्रियापादे [14]नवनैवेद्यविधिर्नाम [15]त्रयोदशः पटलः

---

[1] A: द्रोस्यादिषु.
[2] A, B et C: शुद्धतोयात् सुपूरयेत् .
[3] A: मात्रान्ते तु pour समुद्रान्ते.
[4] B: सलिले.
[5] B ajoute न après तु.
[6] A, B et C: चैव इक्षुखण्डांश्च.
[7] A: अन्यादितण्डुलैः ; B: अन्यार्द्रतण्डुलं.
[8] A: कृत्वा नव्योपदंशकैः .
[9] A: बलिं दद्यात् प्रदापयेत् .
[10] B omet अथ.
[11] C: तण्डुलैश्च तथैव च.
[12] A et B: इति श्रीरौरवतन्त्रे.
[13] B et C omettent क्रियापादे.
[14] A: नवनैवेद्यपटलस्त्रयोदशः.
[15] C: अष्टाविंशतिः pour त्रयोदशः .

[चतुर्दशः पटलः]

[कुण्डलक्षणम्][1]

अतः परं प्रवक्ष्यामि कुण्डानां लक्षणं परम् । वेदाश्रं [2]योनिखण्डेन्दुत्रिकोणं वृत्तमेव च ॥ १ ॥
पद्माश्रं च षडश्रं च सप्ताश्रं चाष्टकोणकम् । [3]पद्माकारं दशैतानि क्रमशो वक्ष्यतेऽधुना ॥ २ ॥
कर्तुर्दक्षिणहस्ते तु मध्यमाङ्गुलिमध्यमे[4] । [5]पर्व दीर्घं विशालं वा [6]कृतमात्रमुदाहृतम् ॥ ३ ॥
[7]तन्मात्रेण त्रिमात्रं[8] स्यात्कुण्डव्यासमुदाहृतम् । विस्तारसदृशं [9]निम्नं मध्यमन्यंशमेव च ॥ ४ ॥
चतुष्कोणसमायुक्तं [10]यत्तद्वेदाश्रमुच्यते । मेखलात्रयसंयुक्तमृक्षा[11]ग्नियुगमुन्नतम् ॥ ५ ॥
उत्सेधसदृशं [12]व्यासमूर्ध्वे[13] योनिरिभोष्ठवत्[14] । [15]वेदाक्षव्योममात्रं तु योनिव्यासार्धमुन्नतम्[16] ॥ ६ ॥
[17]अभ्यन्तरमुखां योनिं कुण्डमध्येऽम्बुजं लिखेत् । एवं हि [18]चतुरश्रं स्याद्योनिकुण्डमिहोच्यते ॥ ७ ॥
क्षेत्रव्यासात्तु[19] भूतांशे त्वेकांशं[20] पूर्वतो न्यसेत् । कर्णार्धार्धं परित्राह्य कर्णभूम्यर्धसीमगम्[21] ॥ ८ ॥
तस्मादग्रं क्रमात्क्षीणं[22] कुर्यात्पिप्पल[23]पत्रवत्[24] । क्षेत्रव्यासे[25] दशांशे तु पक्षांशं[26] दक्षिणोत्तरे ॥ ९ ॥

---

[1] cf. *Kāmikāgama*, I, 7, *Suprabhedāgama*, I, 12, *Kiraṇāgama*, I, 5, *Kāraṇagama*, I, 21, *Yogajāgama*, ms. p. 356-361, *Vīrāgama*, *paṭala*, 54, *Kumāratantra*, *paṭala*, 9.

[2] A: योनिखण्डे तु.

[3] C: पद्माकारा.

[4] B: मध्यत: pour मध्यमे.

[5] A: पद्मं दीर्घविशालं वा ; B: पद्मदीर्घविशालं वा.

[6] A et B: कृतमन्त्रमुदाहृतम् .

[7] C omet cette ligne.

[8] B: त्रिमात्रा: स्यु: pour त्रिमात्रं स्यात् .

[9] A: निम्नमध्यमन्यंशमेव वा ; B: निम्नमध्यमन्यांशमेव च.

[10] C: यद्यद् pour यत्तद् .

[11] C: अक्ष pour ऋक्ष.

[12] C: व्याध pour व्यास.

[13] A et C: ऊर्ध्व pour ऊर्ध्वे.

[14] A et B: विभोष्ठवत् pour इभोष्ठवत् .

[15] A et B: एतेषां pour वेदाक्ष ; C: वेदेक्ष pour वेदाक्ष.

[16] A: उत्तमम् pour उन्नतम् .

[17] A: अभ्यन्तरं मुखायोनिं ; B: अभ्यन्तरमुखं योनिं.

[18] A: चतुरं स्याद्यो अग्निकुण्डमिहोच्यते ; C: चतुरश्रं वा योनिकुण्डमिहोच्यते.

[19] C: क्षेत्रव्यासे तु.

[20] B: लेकांशं.

[21] A: कर्णभूम्यार्धसीमगम् ; B: कर्णभूम्यर्धसीमकम् .

[22] A: क्रमाक्षीणं.

[23] C: पिप्पलि pour पिप्पल.

[24] Les mss. A et B répètent les vers 8 et 9a.

[25] A: क्षेत्रव्यासं.

[26] C: पक्षांसं.

त्यक्त्वाष्टांशेन संवर्त्य रज्जुरुत्तरतः स्थिता । धनुराकृतिरेवं[1] स्याद् [2]द्वात्रिंशन्मात्रमानतः ॥ १० ॥
त्रिभुजश्च प्रकर्तव्यास्त्रिकोणं चात्र कल्पयेत् । क्षेत्रव्यासे दशाष्टांशे[3] त्वेकांशं बाह्यतो न्यसेत्[4] ॥ ११ ॥
मध्यात्तेन[5] च संवर्त्य वृत्तकुण्डमुदाहृतम् । पद्मकुण्डं च तद्वत्स्याद्बाह्येऽष्टद्वयकं दलम्[6] ॥ १२ ॥
मध्ये च[7] मेखलायां तु दलमन्ये तु मेखले[8] । वेदाश्रस्य परीणाहं पञ्चषट्सप्त [9]चाष्टकम् ॥ १३ ॥
भागं कृत्वैकभागं[10] तु [11]पञ्चाश्राद्ये भुजो भवेत् । पञ्चकोणादिकोणं च संभवेच्चतुरश्रजम्[12] ॥ १४ ॥
चतुरश्रस्य कुण्डस्यानाहतुल्यमशेषकम्[13] । युक्त्या संकल्पयेद्विद्वान् सर्वकुण्डं विशेषतः[14] ॥ १५ ॥
हस्तमात्रविशालेन [15]युगांशं [16]पांसुना कृतम् । षट्सप्तयवमात्रं [17]वा स्थण्डिलस्योदयं भवेत् ॥ १६ ॥
कुण्डे वा स्थण्डिले वापि होमकर्म समाचरेत्[18] ॥ १७ ॥

[19]इति श्रीमद्रौरवतन्त्रे क्रियापादे कुण्डलक्षणविधिर्नाम चतुर्दशः पटलः

---

[1] C: धनुषाकृतिरेवं.
[2] A: स्याद्वा pour स्याद् द्वा.
[3] A: क्षेत्रव्यासे दणाष्टांशे ; B: क्षेत्रव्यासादष्टमांशे.
[4] cf: *Siddhāntasārāvalī*, p. 270-273:

क्षेत्रांशपञ्चमविभागविनिर्गमेण **योनिश्च** कोणचतुरंशपरिभ्रमेण ।
आद्यन्तभागविरहान्नवधा विभक्ते मध्यस्थवारिधिपदैः स्फुट**मर्धचन्द्रम्** ॥
त्र्यश्रं त्रिभागपरिवृद्धिकृतत्रिमत्स्यैः कण्ठार्धकाष्टमविनाकरणेन वृत्तम् ।
षड्भागवृद्धया रचितैश्चतुर्भिर्मत्स्यैः **षडश्रं** रचयेत कुण्डम् ॥

[5] C: मध्याह्नेन.
[6] बाह्येषु द्वयकन्दलम् ; B: बाह्येष्टद्वयकान्दलम् .
[7] A: तु pour च.
[8] B et C: दलमन्यौ तु मेखलौ.
[9] B: क pour च.
[10] C: कृत्वात्मभागं ; B: कृत्वैकभागे.
[11] A: पञ्चाश्राद्यम्बुजं भवेत् ; C: पञ्चाश्राद्यम्बुजा भवेत् .
[12] A: शंभवेच्चतुरंश वै ; B: संभवेच्चतुजांश वै ; C: संभवेच्छम्बुजा च वै.
[13] A: कुण्डस्य नाहं तुलमशेषकम् ; B: कुण्डस्य नाहं कलमशेषकम् .
[14] cf. *Siddhāntasārāvalī*, p. 276:

चतुष्कृते वृत्तकमेखलांशे स्यात्कर्णिका सार्धविभागमानात् ।
पत्राष्टकं सार्धयुगेन **पद्मं** बहिर्दशांशाच्चतुरश्रकौर्तिः ॥

[15] B: युग्मांशं.
[16] B: वाम्बुना कृतम् .
[17] B: स्यात् pour वा.
[18] voir les planches ci-contre pour les formes des neuf sortes de *kuṇḍa* décrites dans le texte.
[19] A: इति श्रीरौरवतन्त्रे क्रियापादे कुण्डलक्षणचतुर्दशः पटलः ; B: इति कुण्डलक्षणविधिर्नाम चतुर्दशः पटलः ; C: इति श्रीमद्रौरवतन्त्रे कुण्डलक्षणविधिर्नाम चतुर्दशः पटलः .

[पञ्चदशः पटलः]

[अग्निकार्यविधिः][1]

अतः परं प्रवक्ष्यामि [2]त्वग्निकार्यविधिक्रमम् । गोमयालेपनं कृत्वा शोषणं पाचनं तथा ॥ १ ॥
प्रोक्षणं हृदयेनैव [3]कुशैस्तु शिवतोयकैः । [4]आसनं [5]कूर्चेनैकेन कवचेन [6]च विन्यसेत् ॥ २ ॥
प्रोक्षयेदस्त्रमन्त्रेण गन्धतोयेन देशिकः[7] । सूर्यकान्तोद्भवाग्निं वा [8]ह्यरण्युद्भवमेव वा ॥ ३ ॥
[9]मृद्भाण्डे त्वग्निं संगृह्य हृदा [10]कुण्डान्तिके न्यसेत्[11] । अस्त्रेण [12]शोधयेदग्निं कवचेनावकुण्ठयेत्[13] ॥ ४ ॥
नेत्रेणैवार्चयित्वा तु [14]वागीशीं कूर्चतो यजेत् । तस्यास्तु योनिमार्गेण प्रशान्तेनाग्निकं न्यसेत् ॥ ५ ॥
वामदेवेन मन्त्रेण [15]चाग्निबीजेन मन्त्रतः । [16]वागीश्वरौ [17]समभ्यर्च्यार्प्यग्निं चैव हृदा न्यसेत् ॥ ६ ॥
सद्योजातेन मन्त्रेण [18]दर्भैराच्छादनं कुरु । [19]गन्धं पुष्पं च धूपं [20]च दीपं चैव हृदा बुधः ॥ ७ ॥

---

[1] cf. *Kāmika*, I, 8, *Kāraṇa*, I, 22 et II, 20, *Svāyambhuva*, 50, *Mataṅga*, *kriyāpāda*, 30, *Ajita*, 22, *Kiraṇa*, II, 4, *Kumāratantra*, 7, *Cintya*, 30, *Dipta*, 33, *Makuṭa*, 6, *Yogaja*, p. 347-356, *Vīra*, 39, *Suprabheda*, I, 11.

[2] A et C omettent तु dans त्वग्निकार्य.

[3] A et B: कुशाद्भिः pour कुशैस्तु.

[4] A omet quatre lettres आसनं कू.

[5] B: चैककूर्चेन pour कूर्चेनैकेन.

[6] A et C: तु pour च.

[7] cf. *Kāraṇāgama*, I, 20, 9-10: कुण्डं चेत् शोधनं चैव क्षालनं शोषणं तथा । पावनं प्रोक्षणं चैव सद्यादिब्रह्मपञ्चकैः .

[8] A et B: तु pour हि.

[9] C: धुमुण्डे pour मृद्भाण्डे.

[10] B: कुण्डान्तिकं.

[11] cf. *Kāraṇāgama*, I, 22, 10-11:

सूर्यकान्तोद्भवं श्रेष्ठं काष्ठजं मध्यमं भवेत् । श्रोत्रियागारजं वह्निः कन्यसं चेति कीर्तितम् ॥
शरावे ताम्रपात्रे वा पावकं तु समानयेत् ॥

[12] C: कुण्डयेदग्निं pour शोधयेदग्निं.

[13] A: गु pour कु dans अवकुण्ठयेत् .

[14] Les mss. sont corrompus. A lit चार्मी वै, B lit चाम्भीवे et C lit वाग्नि वै. Les passages parallèles dans les autres āgama et le mot तस्यास्तु dans la ligne suivante suggèrent ici que le mot propre est वागीशीं.

[15] A et C omettent च.

[16] B: वागीश्वरौ ; C: वागीश्वरीं.

[17] C: समभ्यर्च्य अर्घ्यादीनि हृदा न्यसेत् .

[18] B: दर्भेण pour दर्भैर् .

[19] C: गन्धपुष्पं च.

[20] B omet च.

अर्घ्यं दत्त्वा तु वामेन गर्भाधानमिति स्मृतम्[1] । हृदयेनैव मन्त्रेण दर्भैरग्निं सुयोजयेत् ॥ ८ ॥
अभ्युक्ष्य शिरसा मन्त्री [2]कवचेनार्घ्यदायकः । पुंसवनमिदं[3] ख्यातं[4] सीमन्तमधुनोच्यते ॥ ९ ॥
[5]विस्तीर्य शिरसा दर्भानघोरेण समर्चयेत् । बीजमुख्येन [6]च हृदा गन्धैः पुष्पैः समर्चयेत् ॥ १० ॥
[7]सीमन्तमिति विख्यातं [8]जातकर्म त्वथोच्यते । [9]तत्पूरुषेण मन्त्रेण [10]कुशाग्रानुपरि न्यसेत् ॥ ११ ॥
ब्रह्माङ्गैश्च समभ्यर्च्य जननं हृदयेन तु । सद्योजातेन मन्त्रेण पाद्यं गन्धं च पुष्पकम् ॥ १२ ॥
दत्वा तु [11]धूप दीपं [12]चाप्यर्घ्यं वै शिरसा बुधः । [13]जातकर्म त्विदं प्रोक्त[14]मिन्धनैर्दीपयेद्बुधः[15] ॥ १३ ॥
[16]एकहृदयं द्विवक्त्रं द्विनासं च [17]षडक्षकम् । त्रिमेखलं त्रिपादं च सप्तजिह्वासमन्वितम् ॥ १४ ॥
[18]वृषारूढं चतुःशृङ्गं सप्तदोर्दक्षिणे चतुः । त्रिहस्तं वामपार्श्वे तु सर्वावयवसंयुतम् ॥ १५ ॥
शक्तिरग्निस्तथा स्रुक् च स्रुवो वै दक्षिणे करे । तोमरं व्यजनं वामे [19]घृतपात्रं विशेषतः ॥ १६ ॥

---

[1] cf. *Kāraṇāgama*, I, 22, 14-17:
नाभिमध्ये तु वागीशीं नीलोत्पलसमप्रभाम् । ऋतुस्नातां सकूर्चस्थां ध्यात्वा तन्मूलमन्त्रतः ॥
संपूज्याग्निं समादाय संभ्राम्यायतनं त्रिधा । योनिमार्गेण निक्षिप्य वह्निबीजमनुस्मरन् ॥
उपस्थानं च कृत्वा तु मन्त्रजुष्टो तदूनकम् । सदर्भैरिन्धनं क्षिप्त्वा दर्भाग्रैर्हृदयेन तु ॥
गर्भाधानमिदं प्रोक्तम् ।

[2] A: कवचेनार्घ्यं दापयेत् ; B: कवचेनार्घ्यदायकम् ; C: कवचेनार्घ्यं च दापयेत् .

[3] B: इति pour इदं.

[4] cf. *Kāraṇāgama*, I, 22, 17:
कुर्यात्पुंसवनं तथा । हृदयेन जपेदीशमेतत्पुंसवनं स्मृतम् ॥
cf. *Suprabhedāgama*, I, 11:
वामदेवेन मन्त्रेण रुद्राण्यभ्यर्चयेत्ततः । प्रोक्तं पुंसवनं ह्येवम् ॥

[5] A: शिरसा दर्भान् परिस्तीर्य अघोरेण ; C: शिरसा दर्भैः परिस्तीर्य अघोरेण.

[6] A et C: हृदिना pour च हृदा.

[7] cf. *Kāraṇāgama*, I, 22, 18-19:
अघोरेण यजेदर्घ्यं सीमन्तस्यादिकं तथा । अग्निं प्रज्वाल्य वक्त्रेण पुष्पाक्षतसमायुतम् ॥
निक्षिप्य शिरसा मन्त्री ॥
cf. *Suprabhedāgama* I, 11, 17:
सीमन्तं च ततः शृणु । शिरसा बहुरूपेण गन्धपुष्पादिभिर्युतम् ॥

[8] A: जातकर्म तथोच्यते; C: जातकर्ममिहोच्यते ; D: जातकर्म इहोच्यते (D: manuscrit de Melmaṅgalam).

[9] A et C: तत्पुरुषेण.

[10] C: कृशानुं च परिन्यसेत् .

[11] A: धूपदीपं.

[12] A et B omettent चापि dans चाप्यर्घ्यं.

[13] A: जातकर्ममिदं प्रोक्तम् ; C: जातकर्म इदं प्रोक्तम् .

[14] C: अधुना दापयेदधः pour इन्धनैर्दीपयेद्बुधः .

[15] cf. *Suprabhedāgama*, I, 11, 17:
वक्त्रेण चास्त्रमन्त्रेण जातकर्म समाचरेत् ।

[16] A et C: एकहृदयं द्विवक्त्रं ; B: एकं हृद् द्वितयं वक्त्रं.

[17] A: षडक्षरम् .

[18] D: वृद्धारूढं pour वृषारूढं.

[19] A: घृतपत्रे.

अग्निमध्येऽग्निरूपं[1] [2]चाप्येवं ध्यायेत्समाहितः[3] । पाद्यमाचमनं चार्घ्यमीशमन्त्रेण[4] दापयेत् ॥ १७ ॥
नामकर्म त्विदं प्रोक्तं पञ्चसंस्कार[5] एव हि । बीजमुख्येन मन्त्रेण तथोपस्थानकं[6] कुरु ॥ १८ ॥
[7]प्रागग्रमुत्तराग्रं च दर्भान् संस्तीर्य देशिकः । अधःस्थितानुदग्दर्भान् [8]सर्वेषामविशेषतः ॥ १९ ॥
दक्षिणे तु कुशान् सर्वान् [9]सर्वतश्चोर्ध्वगांस्तरेत् । अग्नेरुत्तरपार्श्वे[10] तु [11]दर्भान् संस्तीर्य देशिकः[12] ॥२०॥
[13]ईशानेन तु मन्त्रेण पात्रं तत्रैव [14]सादयेत् । प्रोक्षयेदस्त्रमन्त्रेण कुशाग्रानुपरि न्यसेत् ॥ २१ ॥
प्रोक्षणीमुद्धरेत्तेषु पूरयेदुदकेन तु । तस्मिन् कूर्चं हृदा[15]न्यस्य [16]ब्रह्माङ्गैरभिमन्त्रयेत् ॥ २२ ॥
सर्वद्रव्याणि पात्राणि प्रोक्षयेदस्त्रमन्त्रतः । अग्नेर्दक्षिणपार्श्वे तु ब्रह्मकूर्चं न्यसेद्बुधः ॥ २३ ॥
कुण्डस्योत्तरपार्श्वे तु [17]प्रणीतां विष्णुमर्चयेत्[18] । चतुर्दिक्परिधींस्तीर्य [19]चाघारावग्निशांकरे ॥ २४ ॥
[20]न्यस्य लोकेश्वरान् पूज्य गन्धाद्यैस्तु स्वनामतः । स्रुक्स्रुवौ क्षुरिकेणैव [21]दर्भमूलाग्रमध्यतः ॥ २५ ॥

---

[1] A: अनिरूपं pour अग्निरूपं.
[2] A: तु एवं pour चाप्येवं.
[3] cf. *Suprabhedāgama*, I, 11, 18-23:
हृदयैकं द्विवक्त्रं तु द्विनासी च षडक्षकम् । त्रिमेखलं त्रिपादं च चतुःशृङ्गं द्वयं शिरः ॥
सोपवीतं जटामौलिमुक्षारूढं सिताननम् । सप्तहस्तं सुदीप्ताङ्गं सप्तजिह्वासमावृतम् ॥
हिरण्या कनका रक्ता कृष्णा च सुप्रभा तथा । अतिरिक्ता बहुरूपा जिह्वा सप्त प्रकीर्तिताः ॥ . . .
अग्निरूपमिदं गुह्यं सर्वशान्त्यर्थमुच्यते । एवं रूपं स्मरन्नित्यं जातकर्म समाचरेत् ॥
[4] C: इमं मन्त्रेण pour ईशमन्त्रेण.
[5] A: संस्कारम् pour संस्कार.
[6] A et B: उपस्थापनं pour उपस्थानकं.
[7] B, C et D: प्रागग्रं चोत्तराग्रं च.
[8] A: सर्वेषां च विशेषतः.
[9] A: सर्वगश्चोर्ध्वगं स्तरेत् .
[10] B: भागे pour पार्श्वे.
[11] C: प्रणीतां विष्णुमर्चताम् pour दर्भान् संस्तीर्य देशिकः .
[12] cf: *Kāraṇāgama*, I, 22, 30-32:
दर्भेणेन्धनमग्नौ तु उपस्थानं हृदा क्षिपेत् । दर्भैश्चैव परिस्तीर्य प्रतिदिग्दशभिस्ततः ॥
दक्षिणाश्चोत्तराश्चैव उत्तराश्चाधरास्तथा । पूर्वाग्राश्चोत्तराग्राश्च प्रागादीनि क्रमात्क्षिपेत् ॥
देवस्य त्वेति मन्त्रेण पूर्वे चैव परिस्तरेत् ।
[13] Le ms. C omet les vers n° 21 à 24a.
[14] A et B: साधयेत् pour सादयेत् .
[15] A: न्यस्त्वा.
[16] D: ब्रह्माङ्गैरभिमन्त्रयेत् .
[17] B: प्रणीतं.
[18] A: अर्चितम् pour अर्चयेत् .
[19] B: आघारं वह्निशाङ्करे ; D: ईश्वरं वह्निशाङ्करे.
[20] cf: *Iśānaśivagurudevapaddhati*, vol. III, p. 130-131:
ततस्त्रिशद्दर्भैः कृतया प्रागुत्तराग्रया वेष्ण्या कुण्डं संवेष्टय यथोक्तपरिधीन् विन्यस्य तेषु परिधिविष्टरेषु प्राच्यां ब्रह्माणं, दक्षिणे शङ्करं, पश्चिमे विष्णुम्, उत्तरेऽनन्तमीश्वरं चावाह्य हृद्बीजपूर्वं स्वनामभिरभ्यर्च्य लोकपालांश्च स्वाशास्वस्त्राणि चेष्ट्वा शिवाज्ञां श्रावयेत् । "भो भो ब्रह्मेन्द्रविष्ण्वाद्या देवा साखाः शिवाज्ञया । शिवाग्निमेनं रक्षध्वं स्वावकाशेष्ववस्थिताः ॥" इति रक्षां विधाय स्रुक्स्रुवावस्त्रेण प्रक्षाल्यादाय दर्भचतुष्टयसहितो हृदा निरीक्ष्यास्त्रेण प्रताप्य शिरसा प्रक्षाल्य पुनः प्रताप्य संक्षाल्य स्रुवं विन्यस्य स्रुचमादाय दर्भाग्रैः स्रुचोऽग्रं ओं हां शिवतत्त्वायेति संमृज्य, मध्यं दर्भमध्येन विद्यातत्त्वायेति, अथ मूलं दर्भमूलेन आत्मतत्त्वायेति संमृज्य, पुनर्मूलमध्याग्रेषु ब्रह्मविष्णुरुद्रात्मतत्त्वाधिपतीन् संस्मृत्योल्लिख्य प्रक्षाल्य दक्षिणतः प्रस्तरदर्भेष्वधोमुखं विन्यस्य, तद्वत् स्रुवमपि संस्कृत्य स्रुचः समीपेऽधोमुखं दर्भेषु विन्यस्य, स्रुचि शक्तिं स्रुवे शिवं च स्वनाम्नाभ्यर्च्य च त्रिसूत्र्यावेष्टितग्रीवौ कर्मयोग्यौ भवतः ।
[21] A, B, C et D: मूलाग्रं मध्यदर्भया?

संमृज्यास्त्रेण मतिमामांस्ततोऽग्नौ स्पर्शनं कुरु[1] । स्रुवाज्यं च समापूर्य हृदयेन तु मन्त्रतः ॥ २६ ॥
[2]अस्त्रेणाप्लवनं कुर्यात्कुशैरग्नौ निधापयेत् । पर्यग्निकरणं [3]कुर्यात्कुशाग्रेणाग्निना सह ॥ २७ ॥
सप्तजिह्वासु जुहुयात् [4]सद्यादिशिरसोऽन्तकम् । [5]सप्तसप्ताहुतीर्हुत्वा परिषेचनमाचरेत् ॥ २८ ॥
[6]पञ्चब्रह्मशिवाङ्गैश्च व्योमव्यापीति मन्त्रतः । प्रत्येकं [7]दशसंख्यं तु जुहुयाच्च घृतेन तु ॥ २९ ॥
[8]गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च[9] पूजयेत् । समिदाज्यचरूँ[10]ल्लाजान्[11] सक्तु[12]माषतिलैरपि ॥ ३० ॥
[13]सर्षपैश्च यवक्षीरदधि सद्यादिभिः क्रमात् । अत्रावसानं जुहुयात्क्षुरिकाबीजमुख्यतः ॥ ३१ ॥
सर्वद्रव्यसमायुक्तं सकृद्धोमं [14]हृदा बुधः । पूर्णाहुतिं च शिरसा [15]स्विष्टमग्नेति मन्त्रतः ॥ ३२ ॥
[16]यद्देवार्थं तु यद्धोमं [17]तत्तदग्नौ तु भावयेत् । संपूज्य गन्धपुष्पाद्यैस्तत्तन्मन्त्रैस्तु होमयेत् ॥ ३३ ॥
स्थापने चोत्सवे [18]चान्येष्वेवमेव[19] समाचरेत् ॥ ३४ ॥

इति [20]श्रीमद्रौरवतन्त्रे [क्रियापादे] अग्निकार्यविधिर्नाम[21] [22]पञ्चदशः पटलः[23]

---

[1] D: ततोऽन्यासाधनं कुरु.
[2] B: अस्त्रेणोत्प्लवनं ; C: अस्त्रेण प्लवनं.
[3] A: कुर्यात् कृत्वाग्नेरग्निना सह ; B: कृत्वा कुर्याग्नेरग्निना सह ; C: कुर्यात्कुशाग्नेरग्निना सह.
[4] D: विद्यादि pour सद्यादि.
[5] A et C: सप्तसप्ताहुतिं हुत्वा.
[6] A: पञ्चब्रह्मशिवाङ्गं च.
[7] A et B: दशसंख्या तु.
[8] D: गन्धपुष्पैश्च.
[9] A: अर्घ्यं च pour अर्घ्यैश्च.
[10] A: चरुं pour चरून् .
[11] C: लाजासक्तु pour लाजान् सक्तु.
[12] A, B et C: वेणु pour माष dans सक्तुमाषतिलैरपि.
[13] A et C: सर्षपं च यवं क्षीरं दधि.
[14] A, B et C: सदा pour हृदा.
[15] *Taittirīyabrāhmaṇa*, 2, 4, 1, 4.
[16] C: यद्देवाज्यं.
[17] C: तदग्नौ pour तत्तदग्नौ.
[18] B: चान्येऽपि pour चान्येषु.
[19] C: एवं pour एव.
[20] A: श्रीरौरवतन्त्रे.
[21] A omet विधिर्नाम; D: अग्निकार्यविधिपटलः .
[22] A: पञ्चादशः .

[23] On trouvera ci-contre un tableau qui donne des détails au sujet des différentes formes d'Agni, selon les descriptions que l'on en trouve dans les divers *Āgama*.

On voit d'après ce tableau qu'*Agni* peut avoir:

1, 2, 4 ou 5	têtes	(*śiras*)
2 ou 4 flammes ressemblant à ces	cornes	(*śṛṅga*)
2, 3, 6 ou 15	yeux	(*netra*)
2, 4, 7 ou 10	bras	(*hasta*)
2 ou 3	jambes	(*pāda*)

Mais presque partout il y a 7 langues (*jihvā*), uniformité qui est interessante à noter. *Kāraṇāgama* seul donne 5 langues à la forme appelée *Śaivāgni*.

On trouve comme *vāhana* (monture): le Taureau (*vṛṣa*), le Bouc (*chāga*) et le Bélier (*meṣa*). Agni est parfois assis sur un lotus; il peut être assis en *padmāsana* ou *sukhāsana*.

En ce qui concerne le *vāhana*, l'iconographie du Sud de l'Inde présente Agni presque toujours sur le Bouc, très rarement sur le Bélier, et jamais (à notre connaissance) sur le Taureau. Peut-être faut-il conclure de cette remarque la nécessité de distinguer entre la forme de méditation utilisée dans le rituel śivaïte (Agni sur le Taureau) et la forme représentée par l'iconographie (Agni sur le Bouc et le Bélier). *Śivāgni* en particulier—qui est l'aspect d'*Agni* que le rituel invoque et adore avec des *mantra* śivaïtes—est tout à fait semblable à *Sadāśiva*; on doit le voir avec cinq visages, quinze yeux, dix bras, et avec le Taureau comme monture.

L'Āgama *Acintyaviśvasāda* (ms. p. 293-295) décrit trois différentes formes d'Agni:

Śaivāgni: dont le rituel se fait avec des *mantra* purement śivaïtes
Miśrāgni: ,, ,, ,, ,, śivaïtes et védiques
Vaidikāgni: ,, ,, ,, ,, purement védiques

Śaivāgni est semblable à Sadāśiva, sauf qu'il a sept langues. Tandis que *Miśrāgni* comme *Vaidikāgni* a deux têtes, six yeux, sept bras, sept insignes, trois jambes et sept langues; le premier a le Taureau comme monture, et le second le Bélier.

Dans le cas des formes à sept bras, l'un des insignes n'est pas constant; à la place du rosaire (akṣamālā) qu'indiquent la plupart des *Āgama*, certains textes à la suite de *Rauravāgama* (cf. vers 16) donnent la flamme (*agni*): *Dīptāgama*, *Aṃśumatkāśyapa* et *Cintyāgama* (tel qu'il est cité dans *Kriyādīpikā*; mais notons que la leçon du ms. de *Kiḷvelūr* de *Cintyāgama* est: *akṣamālā*). L'iconographie supporte les deux versions. La statue de pierre de *Banavāsi* (Kārvār dst., Mysore) et la sculpture qui se trouve sur le *gopura* de *Tirukurunkuḍi* (Tirunelveli dst., Madras) tiennent le rosaire; et la statue de bronze de *Kiranūr* (Nannilam Taluq, Tanjore dst., Madras) a la flamme, à la place du rosaire.

Remarquons que les statues de pierre et de bronze de *Tiruppugalūr* (Tanjore dst.) qui représentent Agni respectivement avec les bras pendants (*lolahasta*) et avec les mains jointes (*āñjalihasta*) ne répondent pas aux descriptions des *Āgama*, mais à la légende attachée au lieu, et qui est contée dans le *Sthalamāhātmya*: Agni là fait pénitence, pour se délivrer d'une malédiction (*śāpavimocana*).

[षोडशः पटलः]

[नित्योत्सवविधिः][1]

बलिं नित्योत्सवं चैव प्रवक्ष्यामि यथाक्रमम् । [2]पूर्वाह्णे पुष्पलिङ्गं तु मध्याह्ने त्वन्नलिङ्गकम् ॥ १ ॥
[3]सायाह्ने वाक्षतान् पुष्पं दलिकायां तु कल्पयेत् । [4]अस्त्रराजं यजेत्तस्मिन् [5]सर्ववाद्यादिसंयुतम् ॥ २ ॥
[6]हर्म्ये प्रदक्षिणं कृत्वा महापीठं [7]तथैव च । प्रदक्षिणं त्रिकाले च [8]कारयेद्वृद्धिकारणम् ॥ ३ ॥
[9]एवं बलिक्रमः प्रोक्तो नित्योत्सवस्त्वथोच्यते । प्रागुक्ता चास्त्रमूर्तिश्च प्रतिमा चन्द्रशेखरः ॥ ४ ॥
सौम्यं पाशुपतं वापि प्रतिमा [10]चैव ऋद्धिदा । [11]हैमं[12] राजतताम्रं वा कांस्यं वा बलिपात्रकम् ॥ ५ ॥

---

[1] cf. *Aṃśumad, paṭala,* 73, *Ajita, paṭala,* 26, *Kāmika,* II, 5, *Kāraṇa,* I, 140; *Vīra, paṭala,* 40, *Suprabheda,* I, 13.

[2] cf. *Suprabhedāgama,* I, 13 10-11:

ततस्त्रिकालमन्नेन बलिर्लिङ्गस्य चोत्तमम् । प्रातर्मध्याह्नमन्नेन मध्यमं तु विदुर्बुधाः ॥
मध्याह्ने चान्नलिङ्गं तु अधमं तु गजानन । पूर्वाह्णे पुष्पलिङ्गं तु साये तण्डुलमेव च ॥

[3] A: सायेऽक्षतं तु पुष्पं वा.

[4] cf. *Suprabhedāgama,* I, 13, 18*a*, 19*b*-20, 27*b*-28*a*, 35*a*:

एवं पाशुपतं ध्यात्वा बलिलिङ्गे सुपूजयेत् । . . . . गन्धपुष्पादिनाभ्यर्च्य तद्रूपं प्रतिमां बुधः ॥
पुरस्तात्प्रतिमा गच्छेदन्नादिकमनुव्रजेत् । दशायुधानि परितः सर्वालंकारसंयुतम् ॥ . . . .
पटहैर्मर्दलैश्चैव झल्लरीजयघण्टकैः । काहलैस्तालकैः शाङ्खैर्वीणावेणुरवैः सह ॥ . . . .
इत्येतैः कल्पितैस्तालैः प्रासादं त्रिः प्रदक्षिणम् । . . . .

[5] A: सर्ववन्द्यादिसंयुतम् .

[6] C: हर्म्यप्रदक्षिणं.

[7] A et C: तथा त्रयम् pour तथैव च.

[8] B: कारयेद्रक्षकारणम् .

[9] A: एवं बलिकर्म प्रोक्तं ; B: एवं बलिक्रमं प्रोक्तं.

[10] C: सर्व pour चैव.

[11] cf. *Suprabhedāgama,* I, 4:

सौवर्णं राजतं ताम्रं कांस्यं वा पात्रमुच्यते । चतुस्त्रिद्वियवं पात्रघनं स्यादुत्तमादिके ॥
विस्तारं हस्तमानं स्यादोष्ठं नवमथाङ्गुलम् । घनं नवचतुष्कं स्यात्तत्रमध्येऽब्जमुच्यते ॥
त्रिभागैकं तु विस्तारं पात्रं कांस्येन कारयेत् । तस्याब्जस्योच्चं द्वयङ्गुल्यमेकाङ्गुलमथापि वा ॥
कर्तव्यं कर्णिकाबाह्ये दलाष्टकमथार्धतः । उत्सेधार्धं तदर्धं स्याद्दलाग्रं तु नवोन्नतम् ॥
पात्रं वृत्तं प्रकर्तव्यं मध्यमे विंशदङ्गुलम् । अधमे षोडशाङ्गुल्यं पात्रविस्तारमुच्यते ॥
एवं कृत्वा बलेः पात्रं मण्डले विन्यसेत्सुधीः ।

[12] B: हैमराजतताम्रं वा; C: हैमं राजतं ताम्रं वा.

षट्त्रिंशदङ्गुलं तारमुत्तमं पात्रमुच्यते । [1]त्रिंशदङ्गुलविस्तारं मध्यमं [2]दलिका भवेत् ॥ ६ ॥
[3]गायत्र्या अङ्गुलं [4]व्यासमधमस्य विशेषतः । कर्णिकाव्यासमग्न्यंशमुत्सेधं शिवमात्रकम् ॥ ७ ॥
परितोऽष्टदलं पद्मं तद्बाह्ये [5]वेत्रवेष्टनम् । कर्णिकोपरि [6]कर्तव्यमन्नलिङ्गं विधानतः ॥ ८ ॥
पञ्चाङ्गुलं समारभ्य [7]चार्धाङ्गुलविवर्धनात्[8] । नवाङ्गुलावधि[9]र्यावन्नवधा लिङ्गमानकम् ॥ ९ ॥
[10]तन्मानद्विगुणं मूलं नाहमग्न्यंशमुच्यते । [11]नाहं स्यादङ्गुलिव्यासं [12]दधि चालिप्य कारयेत् ॥ १० ॥
[13]अस्त्रराजं समावाह्य लिङ्गे [14]पाशुपतास्त्रतः । चतुर्भुजं त्रिनेत्रं च [15]शिखाग्रं तु [16]समुज्ज्वलम्[17] ॥ ११ ॥
अभयं दक्षिणे वामे वरदं पुरतो विदुः । त्रिशूलं दक्षिणे हस्ते [18]त्वक्षमाला तु वामके ॥ १२ ॥
[19]उग्रदृष्टिं सुरक्ताङ्गं सर्वाभरणभूषितम् । [20]संदंष्ट्रास्याधरे दंष्ट्रं रक्तवस्त्रधरं[21] परम् ॥ १३ ॥
ध्यात्वैवं बलिलिङ्गं तु पूजयेदस्त्रमन्ततः । रौद्रं पाशुपतं [22]त्वेवं प्रतिमां [23]चैव कारयेत् ॥ १४ ॥
[24]स्नानद्वयसमायुक्तः सोष्णीषः सोत्तरीयकः । रौद्रमूर्तिं च सौम्यं च शिरसा तु [25]वहेद्धृदा ॥ १५ ॥
[26]दीपपिञ्छसमायुक्तं वितानच्छत्रसंयुतम् । नानावाद्यसमायुक्तं नृत्तगेयसमन्वितम् ॥ १६ ॥
प्रदक्षिणद्वयं कुर्याद्धर्म्यमादौ[27] विशेषतः । बलिपीठं प्रविश्याथ [28]दिशानृत्तसमन्वितम् ॥ १७ ॥

---

1 C: त्रिंशति pour त्रिंशद् .
2 A: दलिका ; D: स्तलिका ; C: दलिकं.
3 A: गायत्रियङ्गुलं pour गायत्र्या अङ्गुलं ; B: गायत्र्या चाङ्गुलं.
4 B: वासम् pour व्यासम् .
5 A et B: वेत्रमष्टकम् .
6 A: कर्तव्या पञ्चलिङ्गविधानतः .
7 A et C omettent च dans चार्धाङ्गुल.
8 C: विवर्धनम् pour विवर्धनात् .
9 C: विधिर् pour अवधिर् dans नवाङ्गुलावधिर् .
10 C: corrompu: मन्यानञ्चिगुणान्मूलन्नाग . . . मुच्यते ?
11 A: नाहः स्यादङ्गुलिव्यासं ; B: नाहं स्यादङ्गुलिव्यासा.
12 A: दधिमालिप्य ; B: अधिमालिप्य.
13 A: अस्त्रराजानमावाह्य.
14 C: पाशुपतः स्मृतः .
15 C: शिखोग्रं.
16 C: सकृज्वलम् .
17 cf. *Suprabhedāgama*, I, 13, 14-17:
दधिसर्पिफलैर्मिश्रं मर्दितं सुदृढं यथा । षोडशाङ्गुलमुत्सेधं मूलं तद्द्विगुणं भवेत् ॥
ऊर्ध्वं त्र्याङ्गुलन्नाहमानुपूर्वात्क्षयं भवेत् । मध्यमं द्वादशाङ्गुल्यमूर्ध्वं कुर्याद्द्व्याङ्गुलम ॥
अष्टाङ्गुलाधमं प्रोक्तमूर्ध्वमेकाङ्गुलं भवेत् । अस्त्रं पाशुपतं न्यस्त्वा रूपं तत्र विचिन्तयेत् ॥
त्रिणेत्रं चतुर्भुजं रौद्रं शिखाकोटिसमुज्ज्वलम् । वरदाभयदं हस्तं वामं सव्याक्षशूलधृत् ॥
एवं पाशुपतं ध्यात्वा बलिलिङ्गे सुपूजयेत् ।
18 A et B omettent तु dans त्वक्षमाला.
19 C: उग्रदृष्टिसमायुक्तं.
20 Les mss. corrompus; A: सदंष्ट्रास्यादरं दष्ट्रं ; B: सदंष्ट्रास्योदरे दंष्ट्रं ; C et D सदंष्ट्रास्यधरं दंष्ट्रं .
21 C: युतं pour धरं.
22 C: त्वेतत् pour त्वेवं ; A et B: त्वैव.
23 B: तु प्रकारयेत् pour चैव कारयेत् .
24 C: स्नानद्वयसमायुक्तौ सोष्णीषौ सोत्तरीयकौ ; B: स्नानद्वयसमायुक्तं सोष्णीषं सोत्तरीयकम् .
25 B: वहेद्दृदशा.
26 A: दीपपंच pour दीपपिञ्छ; C: दीपपुञ्छ.
27 C: हर्म्यदामौ pour हर्म्यमादौ.
28 C: दीपा pour दिशा; B: देश pour दिशा.

प्रदक्षिणत्रयं कृत्वा [1]पश्चादप्यालयं कुरु । द्वारान्तिके तु संप्राप्ते पादप्रक्षालनं कुरु ॥ १८ ॥
आलयाभ्यन्तरं गत्वा विष्टरे तु निधापयेत् । पादुकां विन्यसेदग्रे वृषमन्त्रेण पूजयेत्[2] ॥ १९ ॥
पाद्यमाचमनं चार्घ्यं गन्धं पुष्पं [3]सधूपकम् । दीपं चैव तु ताम्बूलं हृदयेन प्रदापयेत् ॥ २० ॥
अस्त्रेण [4]चास्त्रराजं च पुनरालयमाविशेत् । [5]प्रतिमापादुकादीनि [6]पूर्वस्थाने [7]निधापयेत् ॥ २१ ॥
[8]गर्भागारेऽस्त्रराजं चाप्यस्त्रस्थाने [9]सुयोजयेत् । [10]पतिते चान्नलिङ्गे तु [11]पात्रे च पतिते तथा[12] ॥ २२ ॥
भिन्ने [13]छिन्ने [14]विनष्टे वा प्रायश्चित्तं वदामि ते । शीघ्रं हर्म्यं प्रविश्याथ शान्तिहोमं समाचरेत्[15] ॥ २३ ॥
[16]अस्त्रेणेशानमन्त्रेण मूलेन हृदयेन च । [17]प्रतिदशाहुतिं कुर्यादन्नलिङ्गे[18] नवीकृते ॥ २४ ॥
[19]प्राग्वदेवार्चनं कृत्वा ततो नित्योत्सवं कुरु । उत्सवे दीपहीने च तत्र [20]सर्वं हि संस्थितम् ॥ २५ ॥

[1] B: पश्चाद्देव्याल्ये ; C: पश्चादर्घ्यालयं.

[2] cf. *Kāraṇāgama*, I, 140, 19-34:

परिचारौ समाहूय सोष्णीषौ चोत्तरीयकौ । सर्वलक्षणसंन्नौ सर्वाभरणभूषितौ ॥
पवित्रपाणिनौ सर्वगन्धमाल्यैरलंकृतौ । तले मूर्ध्नि न्यसेल्लिङ्गं प्रतिमां च विशेषत: ॥
वितानं छत्रसंयुक्तं पिञ्छचामरसंयुतम् । सर्वातोद्यसमायुक्तं गीतनृत्तसमाकुलम् ॥
नानादीपसमायुक्तं नानाभक्तजनैर्युतम् । पूर्वाह्णे ब्रह्मण: प्रीतिर्मध्याह्ने शिवमूर्तिनाम् ॥
विष्णो: प्रीतिकरं रात्रौ त्रि: कृत्वा तु प्रदक्षिणम् । तयो रौद्रं तु पुरतस्तदन्ते शान्तमेव च ॥
प्रथमं प्रदक्षिणं कुर्यान्मङ्कणीतालसंयुतम् । परिवाराणां द्वितीये तु प्रदक्षिणमथाचरेत् ॥
वृषस्य वृषतालं तु अग्नेर्मद्धावणं तथा । मातृणां भृङ्गितालं वै विघ्नशस्य तु ढक्करी ॥
षण्मुखस्योद्घट्टनं गीतं ज्येष्ठायां बलितालकम् । तटाग्रहायु दुर्गायामीशानस्योद्घटं भवेत् ॥
गोपुरे वाद्यनि:शब्दं शङ्खघोषसमन्वितम् । तत: पुर:स्थितं पीठं त्रि: कृत्वा तु प्रदक्षिणम् ॥
शबरीबलिपीठस्य प्रविश्याभ्यन्तरं तत: । . . . त्रीणि प्रदक्षिणं कृत्वा प्रविशेदालयं प्रति ॥ . . .
द्वारदेशं समानीय पादप्रक्षालनं कुरु । पादुकं वृषदैवत्यं पूजयेद् वृषमन्त्रत: ॥
पाद्यादिना समभ्यर्च्य लिङ्गं च प्रतिमां तत: । प्रविशेदालयं पश्चाद्विन्यसेत्पूर्वदेशके ॥

[3] B: सुधूपकम् .

[4] A: वास्त्रराजानं pour चास्त्रराजं च ; C: शास्त्राण्यादाय.

[5] A: प्रतिमां पादुकादीनि.

[6] B: पूर्वास्थाने.

[7] B: नियोजयेत् .

[8] A et D: गर्भावरणेऽस्त्रराजानमस्त्रस्थाने.

[9] A: तु pour सु; C: षु pour सु.

[10] C: प्रतीते pour पतिते.

[11] पात्रेण pour पात्रे च.

[12] Les manuscrits A, B, C et D ajoutent une ligne en plus en répétant le 2^{e} quart de cette ligne et le 1er quart de la ligne suivante: भिन्ने छिन्ने विनष्टे वा पात्रे च पतिते तथा.

[13] C: छिन्नेऽथ नष्टे वा.

[14] B: तथा नष्टे pour विनष्टे वा.

[15] cf. *Kāraṇāgama*, I, 140, 31:

प्रमादात् पतितं यत्तु अघोरेण शतं हुनेत् । नवलिङ्गं प्रकर्तव्यं पूर्वोक्तविधिना सह ॥

[16] A: अस्त्रेणैशानमन्त्रण.

[17] A: प्रतिदंशाहुतिं ; B: प्रतिदशाहुतिं.

[18] A et C: अन्नलिङ्गं नवीकृतम् .

[19] A, B et C: प्रागिवैवार्चनं.

[20] B: सर्वमहीस्थिता: ; A: सर्वं हि संस्थिता.

द्विगुणं दीपमुद्दिश्य [1]शेषं प्रदक्षिणं कुरु । [2]प्रतिमा [3]पतिता चेत्तु स्नपनं शान्तिहोमकम् ॥ २६ ॥
तदा [4]तत्प्रतिमां कृत्वा पुनरुत्सवमाचरेत् । अङ्गोपाङ्गे तु विच्छिन्ने शीघ्रं सन्धानमाचरेत्[5] ॥ २७ ॥
संप्रोक्षणं ततः कृत्वा सर्वालङ्कारसंयुतम् । उत्सवं कारयेद्धीमानुक्तमार्गेण [6]सुव्रत ॥ २८ ॥
वर्षाकाले महावाते [7]स्थानकं [8]वाद्यमाचरेत् । [9]वर्षे [10]छत्रसमायुक्तमस्त्रमूर्त्यैवमुत्सवम् ॥ २९ ॥
अथवा लिङ्गमावृत्य[11] विना [12]पीठं प्रदक्षिणम्[13] ॥ ३० ॥

इति [14]श्रीमद्रौरवतन्त्रे [15][क्रियापादे] नित्योत्सव[16]विधिर्नाम [17]षोडशः पटलः

---

[1] विशेषं pour शेषं.
[2] C: प्रतिमं.
[3] C: पतितं.
[4] C: तत्प्रतिमं.
[5] cf. *Kāraṇāgama*, I, 144, 65-66, 74-77, 84-87 (p. 705-707):

बलिलिङ्गविहीने च भिन्ने च पतितेऽपि च । भग्ने चैव तथा कर्तुर्विनाशं भवति ध्रुवम् ॥
कृत्वा तु शान्तिहोमं तु मूलेनैव शतं हुनेत् । नवलिङ्गं प्रकुर्वीत पश्चाद्बलि समाचरेत् ॥ . . .
बलिपात्रविहीने च क्षीयेतं धनधान्यकौ । शान्तिहोमं ततः कृत्वा नवपात्रं तु निक्षिपेत् ॥ . . .
बलिदीपविहीने च लक्ष्मीर्ग्रामाद्गता भवेत् । क्षुरिकाबीजमुख्यैश्च प्रत्येकं तु शतं जपेत् ॥
द्विगुणं दीपमारोप्य बलिशेषं समाचरेत् । . . .
प्रतिमायानकाले तु पतिते चाङ्गहीनके । वास्तुराष्ट्राधिपानां च नाशनं भवति ध्रुवम् ॥
स्नपनं तत्र कुर्वीत पुण्याहं वाचयेत्ततः । शान्तिहोमं ततः कृत्वा पुनर्यानं समाचरेत् ॥
शिरो बाहू तथा पादौ हीनस्यापि विवर्जयेत् । नखकर्णाङ्गुलीहीने भूषणास्त्रविहीनके ॥
पद्मबन्धविहीने च जटाहीने प्रजापते । पुनः सन्धानकं कृत्वा तदर्थं प्रोक्षणं कुरु ॥

[6] A: सुवृतः.
[7] C: स्थानीकं.
[8] B: पाद्यम् pour वाद्यम्.
[9] D: वषट् pour वर्षे.
[10] A: छत्रसमायुक्तं वस्त्रमूर्त्यैवम् ; B: छत्रसमायुक्तं वस्त्रमूर्तैवम् ; C: छत्रसमायुक्तमस्त्रमूर्त्यैवम् ; D: च्छत्र-समायुक्तमस्त्रमन्त्रैवम् .
[11] D: आवृत्या pour आवृत्य.
[12] A, B et C: पीठप्रदक्षिणम् .
[13] cf. *Kāraṇāgama*, I, 140, 37-38:

वर्षे चैव महावाते स्थानकं वाद्यमाचरेत् । लिङ्गप्रदक्षिणं कुर्यान्नित्योत्सवविशेषतः ॥

[14] A: श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्र ; D: रौरवागमे.
[15] A, B et C omettent क्रियापादे.
[16] A omet विधिर्नाम.
[17] C: सप्तदशः पटलः ; A et B: षोडशपटलः ; D: नित्योत्सवविधिपटलः .

[सप्तदशः पटलः]

[अङ्कुरार्पणविधिः][1]

अतः परं प्रवक्ष्यामि [2]चाङ्कुरार्पणमुत्तमम् । [3]स्थापने प्रोक्षणे चैव स्नपने मङ्गलेऽन्यके[4] ॥ १ ॥
नवाहे वाथ[5] सप्ताहे पञ्चाहे वा विशेषतः । शिवमाराधयित्वा तु बीजाङ्कुरं तु [6]रोहयेत् ॥ २ ॥
सर्वालङ्कारसंयुक्तं बिम्बास्त्रं चोत्सवं कुरु । गृहीत्वा पालिकादीनि ग्रामं कृत्वा प्रदक्षिणम् ॥ ३ ॥
[7]नदीतीरं तटाकं वाप्युद्यानं वा स गच्छति । भूमिशुद्धिं ततः [8]कुर्यात्क्षुरिकेणैव मन्त्रतः ॥ ४ ॥
कुशांस्तीर्य यजेद्भूमिं गन्धपुष्पादिभिः क्रमात् । [9]कुन्दालीं च समभ्यर्च्य त्वस्त्रमन्त्रमुदाहरन् ॥ ५ ॥

---

[1] cf. *Ajita*, *paṭala* 34, *Kāmika*, 1, 63, *Kāraṇa*, I, 20, et II, 12, ***Kumāratantra***, *paṭala* 40, *Dīpta*, *paṭala* 87, *Vīra*, *paṭala* 43, *Suprabheda*, I, 35.

[2] A, B et C omettent च.

[3] cf. *Kāraṇāgama*, I, 20, 1-5:

उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा । अन्यस्मिन् मङ्गले कार्ये मङ्गलाङ्कुरमुच्यते ॥
द्विविधं तत्समाख्यातं भद्रं क्षुद्रं तथैव च । सर्वेषु यागपूर्वेषु नवमे सप्तमेऽहनि ॥
पञ्चमे वा शिवं पूज्य कारयेदङ्कुरार्पणम् । अधिवासनानि रात्रौ तु तद्दिनात्पूर्वरात्रके ॥
अङ्कुरार्पणकार्ये तु निश्चित्य दिवसं तथा । नवाहे चैव सप्ताहे पञ्चाहेऽत्र त्र्यहेऽपि वा ॥
सद्योऽङ्कुरार्पणं वापि कारयेदङ्कुरार्पणम् ॥

[4] A: न्यसेत् pour अन्यके.

[5] C: अपि pour अथ.

[6] A: रोपयेत्.

[7] cf. *Suprabhedāgama*, I, 35, 12-14:

नदीतटाकतीरे वा केदारे पर्वते वने । स्थानं प्राप्य विशुद्धं च समुन्मृज्याथ भूतलम् ॥
हृन्मन्त्रेण समभ्युक्ष्य तेन गन्धादिनार्चयेत् । कुन्दाल्या खानयेन्मन्त्री शिवं स्मृत्वा हृदा ततः ॥
मृदं संग्राह्य वामेन प्रविशेदालयं प्रति ॥

[8] B: कृत्वा pour कुर्यात्.

[9] Le mot "Kundālī" ayant le sens de pic, ne se trouve pas dans les Lexiques sanskrits. Le *Medinīkośa* donne "Kuddāla" et le *Śabdakalpadruma* donne la dérivation comme suit: *kuṃ bhūmiṃ dālayati iti kuddālaḥ*. Le mot *Kundāli* dans le sens de pic, dérivant de la racinc *Kut* (percer) se trouve dans les Lexiques tamouls et il est très possible que ce mot soit emprunté de la littérature tamoule dans les textes de Śaiva āgama. Il est probable que le mot *Kuddāla* dérive de ce mot tamoul. Ce

खात्वा भूमिं हृदास्त्रेण [1]घटिकापालिकादिषु । संगृह्य शिरसा वाह्य गजारूढोऽथ [2]पादगः ॥ ६ ॥
ग्रामप्रदक्षिणं कृत्वा प्रविशेद्यागमण्टपम् । गोमयालेपनं [3]कृत्वा [4]पिष्टसूत्रेण [5]चित्रितम् ॥ ७ ॥
[6]प्रोक्षयेदस्त्रमन्त्रेण पञ्चविंशत्पदं कुरु । [7]मध्ये नवपदं पद्मं [8]कुर्याच्च शालितण्डुलैः ॥ ८ ॥
[9]तदाहृतकलांशेषु [10]महाशास्त्वेकमाहरेत् । कोणेषु त्रिपदं [11]ग्राह्यमुपादाय पदं रवेः ॥ ९ ॥
अस्त्रमन्त्रेण संप्रोक्ष्य दर्भैः पुष्पैः परिस्तरेत् । मध्ये च सोमकुम्भं तु सहिरण्यं सवस्त्रकम् ॥ १० ॥
गन्धतोयेन संपूर्णं स्थापयेत्सोममन्त्रतः । गन्धादिभिः समभ्यर्च्य पायसान्नं निवेदयेत् ॥ ११ ॥
पालिका घटिका चैव शरावं लोहजं तु वा । मृन्मयं वाथ[12] कर्तव्यं [13]भूतान्नन्दाङ्गुलावधि ॥ १२ ॥
अर्धाङ्गुलविवृद्धया तु [14]नवधोत्सेधमीरितम् । उत्सेधसमविस्तारं [15]मध्यच्छिद्रसमन्वितम्[16] ॥ १३ ॥
[17]आस्यव्यासमिदं त्वग्निभागेऽशं [18]मूलविस्तृतम् । डमरुकाकृतिं[19] कुर्याद्घटिका कलशाकृतिः ॥ १४ ॥

---

mot *Kuddāla* se trouve sans doute dans le *Mahābhārata*, mais personne n'est sûr de la date du *Mahābhārata* tel qu'on le trouve à présent. Ce mot n'est pas d'usage commun dans l'ancienne littérature sanskrite. *Amarakośa* donne ce mot comme synonyme de l'arbre "Kovidāra" alors que "Khanitra" est le mot sanskrit qu'on trouve employé normalement dans le sens de pic dans l'ancienne littérature sanskrite. cf. Rev. F. Kettel: *A Kannada English Dictionary*, 1894, p. xxxiii, no 266.

[1] A, B et C: दलिका pour घटिका.
[2] B: वाश्वगः pour पादगः.
[3] C omet कृत्वा.
[4] C: विष्ट pour पिष्ट.
[5] A: चित्रतः pour चित्रितम्.
[6] cf. *Kumāratantra, paṭala*, 40, vers 15-22:

प्रासादस्याग्रके वापि दक्षिणे चोत्तरेऽपि वा । गोमयालेपिते शुद्धे मण्टपे समलंकृते ॥
प्राक्सूत्रं पञ्चसूत्रं स्यादुदक्सूत्रं तथैव च । मध्ये चतुष्पदं त्यक्त्वा स्थण्डिलं तत्र कल्पयेत् ॥
ससूत्रं सापिधानं च द्रोणोदकप्रपूरितम् । कुम्भं न्यस्त्वार्चयेत्सोममोषधीशं महामुने ॥
शरावं पालिकां चैव घटिकां च यथाक्रमम् । शरावादि क्रमान्न्यस्त्वा हृदयेन तु मन्त्रतः ॥
संगृह्य तन्मृदं चैव पालिकादीनि पूरयेत् । मध्येग्रन्थिं पवित्रं च तेषां मध्ये न्यसेद्बुधः ॥
वैवस्वतो विवस्वांश्च रविर्मार्ताण्डभास्करौ । लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः
आदित्यश्चैव सूर्यश्च अंशुमाली दिवाकरः । दिशैता द्वादशादित्यानीशानादि यथाक्रमम् ॥
आसनैर्मूर्तिमूलैर्वा पूजयेत्स्वस्वनामभिः ॥

[7] C: मध्येर्तविपदं ?
[8] A: कुर्याच्छालिसतण्डुलैः ; B: प्रकुर्याच्छालितण्डुलैः.
[9] B: तदाहत pour तदामृत ; C: तदावृत.
[10] C: महाशास्तु pour महाशासु.
[11] A: गृह्य उपादाय पदं ; B: ग्राह्य उपादाय पदं ; C: गृह्यमपादाय पदं ; D: ग्राह्यमुपादेयः पदं.
[12] C: अधि pour अथ dans वाथ.
[13] B: भूतनन्दाकुलावधि ; C: भूतानन्दाङ्गुलावधिः.
[14] A: उदय pour उत्सेध dans नवधोत्सेधमीरितम्.
[15] A: अर्ध pour मध्य.
[16] A: समायुतम् pour समन्वितम्.
[17] A: आसस्यवासमिदं ; B: कुत्स्थवासन्निदत्वाग्निं मर्गांशं.
[18] B et C: मूलविस्मृतः.
[19] B: आकृति pour आकृतिं.

शुद्धयै [1]चतुर्दिशि [2]च्छिद्रयुग्मयुक्तं प्रकल्पयेत् । [3]पालिका ब्रह्मदैवत्या घटिका विष्णुदेवता ॥ १५ ॥
[4]शरावं रुद्रदैवत्यं निश्छिद्रं [5]दर्भकैः कुरु । मृदा संपूरयेद्विद्वान् हृदयेन तु मन्त्रतः ॥ १६ ॥
[6]आग्नेय्यां चैव नैर्ऋत्यां वायव्यामीशगोचरे[7] । स्थापयेत्पालिकाः [8]सव्ये घटिका वामपार्श्वके ॥ १७ ॥
शरावं क्रमशो [9]न्यस्य सोमं वीक्ष्य [10]हृदा बुधः । गन्धादिभिः समभ्यर्च्य स्वस्वमन्त्रेण देशिकः ॥ १८ ॥
[11]सर्षपं तिलमुद्गं च [12]माषबैणवव्रीहिभिः । क्षालयेत्तु हृदा मन्त्री [13]वपित्वा प्रोक्षयेत्क्रमात् ॥ १९ ॥

इति [14]श्रीमद्रौरवतन्त्रे [15]क्रियापादे अङ्कुरार्पण[16]विधिर्नाम [17]सप्तदशः पटलः

---

[1] A: चतुर्दिश. [2] B et C: च्छिद्रं pour च्छिद्र.
[3] cf. *Suprabhedāgama*, I, 35, 25*b*-26:

पालिका ब्रह्मदैवत्यं घटिका विष्णुरुच्यते । ईश्वरस्तु शरावाणां पात्राणामधिदेवताः ॥
तेषां मृद्भिः करीषैश्च वालुकैश्च सुपूरयेत् ॥

[4] B: शरावा रुद्रदैवत्या. [5] A: दर्भया.
[6] cf. *Suprabhedāgama*, I, 35, 23-25*a* :

पालिकाकोणभागेषु घटिकाश्च शरावकान् । पूर्वादिषु चतुर्दिक्षु विन्यसेत्क्रमयोगतः ॥
एवं संस्थापनं प्रोक्तमुत्तमं चाधमाधमौ । दिशश्च विदिशश्चैव पालिकास्थापनं भवेत् ॥
घटाश्चाभ्यन्तरे स्थाप्य शरावा मध्यमे स्मृताः ।

[7] B: पार्श्वके pour गोचरे. [8] A: सर्वाः pour सव्ये.
[9] A: न्यस्त्वा. [10] A: हृदां.
[11] cf. *Suprabhedāgama*, I, 35, 27-30:

तिलसर्षपमुद्गानि माषनिष्पावकौ तथा । शालिप्रियमपामार्गयवश्यामानि वै दश ॥
प्रक्षाल्य पयसा विद्वन् दशबीजेन वापयेत् । कुम्भस्थेन जलेनैव नित्यं संप्रोक्षयेत्सुधीः ॥
नित्यं संपूरयेद्गन्धतोयेनैव घटं पुनः । पिधाय च विधानेन स्वनुगुप्तन्निधापयेत् ॥
सितानि कोमलानीह कीर्तितानि शुभानि वै ।

[12] C: माषं वै नवव्रीहिभिः. [13] C: स पीत्वा pour वपित्वा ; A: वाबीत्वा ?
[14] A: श्रीरौरवतन्त्रे. [15] B omet क्रियापादे.
[16] A omet विधिर्नाम. [17] A: सप्तदशपटलः.

[अष्टादशः पटलः]

[महोत्सवविधिः][1]

अतः परं प्रवक्ष्यामि शिवोत्सवविधिक्रमम् । [2]आर्द्रान्तमुत्सवं कुर्यात्सर्वमासे शिवप्रियम् ॥ १ ॥
माघमासे मघान्तं वा [3]कृष्णाष्टम्यन्तमेव वा । फाल्गुने चोत्तरान्तं तु [4]चित्रान्तं चैत्रमासके ॥ २ ॥
वैशाखे तु विशाखान्तं [5]ज्येष्ठेऽष्टम्यन्तमूलकम् । आषाढे [6]चोत्तराषाढा श्रावणे तु श्रविष्ठकम् ॥ ३ ॥
पूर्वाभाद्रान्तकं [7]पूर्वप्रोष्ठे चाश्व्यन्तमाश्विने । कृत्तिकान्तं तु कार्तिक्यामार्द्रान्तं मार्गशीर्षके ॥ ४ ॥
पुष्यमासे तु पुष्यान्तं राज्ञो जन्मदिनान्तकम्[8] । कर्तुर्जन्मदिनान्तं वा वास्तु[9]ऋक्षान्तमेव वा ॥ ५ ॥

---

[1] Pour महोत्सवविधि (ou शिवोत्सवविधि) voir *Kāmika*, II, 6, *Kāraṇa*, I, 141, p. 654-670, et II, 24, *Ajita*, *paṭala* 25, *Yogaja*, ms. p. 171-243, *Sahasra*, *paṭala* 6, *Dīpta*, *paṭala* 83, *Svāyambhuva*, *paṭala* 37, *Suprabheda*, I, 14, *Makuṭa*, *paṭala* 5, *Candrajñāna*, *paṭala* 21.

[2] cf. *Suprabheda*, I, 14, 10-14:

कृत्तिकादिषु मासेषु कार्तिके कृत्तिकान्तकम् । मार्गशीर्षकमासेषु आर्द्रान्तं तु शिवोत्सवम् ॥
पुष्यान्तं पौष्यमासे तु मघान्तं माघमासके । फाल्गुने चोत्तरान्तं स्याच्चित्रान्तं चैत्रमासके ॥
विशाखान्तं हि वैशाखे ज्येष्ठे मूलान्तकं भवेत् । उत्तराषाढमाषाढे श्रावणे श्रवणान्तकम् ॥
पूर्वाभाद्रे तथा मासे पूर्वाभाद्रान्तमुच्यते । आश्वान्तमश्वयुङ्मासे उत्सवं कारयेद्बुधः ॥
आर्द्रान्तं सर्वमासेषु कर्तव्यं तु शिवोत्सवम् ।

[3] B: कृष्णाष्टम्यां तथैव च.

[4] A: चैत्रान्तं ; C: चैत्रान्ते.

[5] A: ज्येष्ठाष्टम्यन्तमूलकम् ; B: ज्येष्ठाष्टम्यां तु मूलकम् .

[6] B et C: चोत्तराषाढं.

[7] A: पूर्वे प्रोष्ठपान्ताश्वमासके ; B: पूर्वे प्रोष्ठपद्यन्तमाश्विने ; C: पूर्वे प्रोष्ठेश्व्यान्तश्वमासके.

[8] cf. *Kāmika*, II, 6, 3-4:

मासभं तीर्थनक्षत्रमार्द्रर्क्षं सर्वमासके । राज्ञां जन्मावसानर्क्षमभिषेकर्क्षमेव वा ॥
माघमासे तु षष्ठयन्तं पर्वान्तं सर्वमासके ।

voir aussi *Kāraṇa*, I, 141, 10:

नृपाणां जन्मभान्तं वा मरणर्क्षान्तमेव वा ।

cf. *Suprabheda*, I, 14, 14:

षष्ठ्यष्टमी ह्यमावास्यान्ते वान्यत्पुण्यऋक्षके । राज्ञो जन्मन्यपि लये युद्धारम्भे समारभेत् ॥

[9] A: रिक्ष pour ऋक्ष.

[1]एतेष्वेकेन कर्तव्यं [2]कर्तुरिष्टवशान्नयेत् । जीवशुक्रेन्दुसंचारे[3] सुवारे सुमुहूर्तके ॥ ६ ॥
प्रतिष्ठाद्युत्सवान्तानां [4]सर्वं कर्म समाचरेत् । तन्मासं चाब्दपूर्वं च कुर्यादेव[5] पुनः पुनः ॥ ७ ॥
[6]शान्तिकं पौष्टिकं चैव जयदं धनदं तथा ।[7]

---

[1] C: श्रितेष्वेके प्रकर्तव्यं.
[2] A: कर्तुर्निष्ठावशान्नयेत्; B et C: कर्तुरिष्टवशं नयेत्.
[3] B: संचारैः pour संचारे.
[4] A: सर्वं कर्माचरेद्बुधः; B et C: सर्वकर्म समाचरेत्.
[5] A et B: एवं pour एव.

[6] Le mot *utsava* et les mots qui s'y rapportent, tels que *śāntika, pauṣṭika, jayada, dhanada, sārvakāmika* etc. et aussi *dhvaja, aṅkura, dhvajāroha, yāga*, etc. se trouvent au neutre au lieu du masculin dans ce texte, comme aussi dans la plupart des autres textes āgamiques que l'on peut trouver. On ne peut pas considérer ceci comme une erreur de scribe, car on les trouve fréquemment au même genre, et en de nombreux endroits le vers n'est juste que lorsque ces mots sont au neutre. Dans bien d'autres cas, les textes des *Āgama* ne se conforment pas strictement à la grammaire de Pāṇini et aux genres donnés par les dictionnaires classiques. Les mots *yāga, dhvaja* ont été aussi employés an neutre dans l'ancienne langue. Aussi les mots tels que ceux-ci, bien que ne se conformant pas toujours à la grammaire de Pāṇini et aux genres donnés par les dictionnaires classiques, sont mis dans le texte comme ils ont été trouvés dans les manuscrits: notre but principal est de montrer la langue et le style des *Āgama*, non de fournir une version conforme à la grammaire de Pāṇini.

[7] cf. *Dīptāgama, paṭala* 83, vers 8-17 et 25-33:

शैवं गौणं भौतिकं च भौवनं दैविकं तथा । पैतृकं चैव कौमारं सावित्रं चान्द्रमेव च ॥
शैवमेकाहमित्युक्तं त्रयाहं गौणमुच्यते । पञ्चाहं भौतिकं प्रोक्तं सप्ताहं भौवनं तथा ॥
नवाहं दैविकं प्रोक्तं पैतृकं द्वादशाहकम् । त्रयोदशाहं कौमारं सावित्रं स्याच्चतुर्दश ॥
पक्षोत्सवं तु यत्प्रोक्तं तच्छस्त्र(तच्चान्द्र)मिति कीर्तितम् । शैवं गौणं भौतिकं च प्रोच्यते कन्यसत्रयम् ॥
भौवनं दैविकं चैव पैतृकं मध्यमत्रयम् । कौमारं चैव सावित्रं चान्द्रं वै चोत्तमत्रयम् ॥
केतुरोहणपूर्वं तु भेरीताडनपूर्वकम् । अङ्कुरार्पणपूर्वं च त्रिविधं समुदाहृतम् ॥
ध्वजमारोपयेत्पूर्वं भेरीघोषस्ततः परम् । उत्सवस्यादिरात्रौ तु बीजनिर्वापमुच्यते ॥
ध्वजारोहणपूर्वं तु प्रोक्तमेवं महानल ! । भेरीं तु ताडयेत्पूर्वं ध्वजमारोपयेत्ततः ॥
अङ्कुराण्यर्पयेत्पश्चाद्भेरीपूर्वक्रमात्कृतम् । अङ्कुरार्पणपूर्वं तु वक्ष्ये संक्षेपणाच्छृणु ॥
अङ्कुराण्यर्पयेत्पूर्वं ततो भेरीं तु ताडयेत् । ध्वजारोपणमन्ते तु कर्तव्यं प्रथमे निशि ॥
शैविकं शान्तिकं चैव द्विविधं चोत्सवं क्रमात् । शैवादि चोत्सवादीनां यावत्संख्या विधीयते ॥
तत्पूर्वरात्रिमारभ्य कारयेदुत्सवं बुधः । प्रतिष्ठा चोत्सवं यागं सायादिदिनमारभेत् ॥
प्रातःकाले ह्यवभृतं सायंकाले समारभेत् । रात्रिः सायं दिवा प्रातरिति शास्त्रस्य निश्चयः ॥
पक्षोत्सवविधाने तु त्रिंशद्बलिं समाचरेत् । अष्टाविंशच्चतुर्दश्यां षड्विंशत्स्यात्त्रयोदशे ॥
द्वादशाहे चतुर्विंशन्नवाहेऽष्टादशाहरेत् । चतुर्दश स्यात्सप्ताहे पञ्चाहे दश एव च ॥
त्र्यहे च षड्बलिं दद्यादेकाहे द्वितयं बलिः । एतच्छैविकमित्युक्तं शान्तिकं च ततः शृणु ॥
निर्दिष्टदिवसाद्रात्रिमारभ्योत्सवमाचरेत् । एकाहे चोत्सवारम्भे बलिमेकं समाचरेत् ॥

सार्वकामिकमित्येवमु[1]त्सवं पञ्चधा भवेत् ॥ ८ ॥
एकाहं शान्तिकं प्रोक्तं [2]त्र्यहं च पौष्टिकं [3]मतम् । पञ्चाहं जयदं प्रोक्तं सप्ताहं धनदं स्मृतम् ॥ ९ ॥
[4]सार्वकामिकमित्युक्तं [5]नवाहोत्सवकं परम् । [6]शान्तिके पौष्टिके चैव न ध्वजारोहणक्रिया ॥ १० ॥
सध्वजं [7]निर्ध्वजं [8]वापि [9]जयदं कारयेद्बुधः । [10]धनदे कामिके चैव सावश्यं [11]स्याद्ध्वजक्रिया ॥ ११ ॥
[12]तीर्थाङ्कुरं च [13]यागं च चूर्णोत्सवं तथैव च । तीर्थं च स्नपनं चैव [14]पञ्चाहादौ द्वयं विदुः ॥ १२ ॥
ध्वजाङ्कुरं ध्वजं चैव [15]प्रागुक्तपञ्चकान्वितम् । [16]सप्ताङ्गं जयदं प्रोक्तं ; भेरिकाताडनान्वितम् ॥ १३ ॥
[17]अष्टाङ्गं धनदं प्रोक्तं ; [18]ध्वजाङ्कुरं ध्वजं तथा । [19]यागाङ्कुरं च यागं च भेरिकाताडनं तथा ॥ १४ ॥
बलिदानं च चूर्णं च तीर्थं च स्नपनं तथा । मोहिन्या [20]सहितं स्नानं [21]पाषाणैस्तरणं तथा ॥ १५ ॥
दिशाहोमं [22]घृतस्नानं स्नपनं च तथैव च । [23]अपूपं च हविश्चैव शुद्धस्नानं तथैव च ॥ १६ ॥

त्र्यहे चैव च चत्वारि पञ्चाहे चाष्टमं बलिः । सप्ताष्टद्वादशं चैव नवाहे षोडशं बलिः ॥
द्वादशाहे यथा विंशच्चतुर्विंशत्त्रयोदशे । चतुर्दशाहे षड्विंशत् त्रिंशत्सख्याष्टविंशकम् ॥
एतद्वै शान्तिकं प्रोक्तम् ॥

cf. *Kāraṇāgama*, II, 24, 42-45:

साकल्यं पावनं शान्तं मङ्गल्यं च चतुर्विधम् । ध्वजारोहादि तीर्थान्तं साकल्यं चेति कीर्तितम् ॥
शेषं च पूर्ववत्कृत्वा पताकारोहणं विना । पावनं चेति विख्यातं शान्तं चैव ततश्शृणु ॥
हुत्वा होमं बलिं चैव पूर्वयामे द्वियामके । सायाह्ने चोत्सवं कुर्याच्छान्तिकं परिकीर्तितम् ॥
यजमानेच्छया कुर्यात् प्रातःकाले शिवोत्सवम् । मङ्गल्यमिति विख्यातम् ॥

cf. *Candrajñānāgama, paṭala* 21:

उत्सवं सप्तधा ज्ञेयं शृणुष्वैकाग्रमानसः । शाक्तं चार्षं[च]ब्राह्मं[च]मौक्तं शाम्भवमाणवम् ॥
अर्कजं त्विति विख्यातं संवदन्ति निशाकर । नवाहं शाक्तमित्युक्तं सप्ताहं चार्षकं भवेत् ॥
पञ्चाहं ब्राह्मकं प्रोक्तं त्रयाहं मौक्तमुच्यते । एकाहं शान्तिदं (शाम्भवं?) विद्याद् ब्राह्मणं (आणवं?) भ्रमणं भवेत् ॥
अर्कजं त्वर्कवारे तु सप्तधा चोत्सवास्त्विह ॥

[1] A: इत्येते pour इत्येवम् ; C: इत्येतद् .
[2] A: त्रियहं pour त्र्यहं च.
[3] C: भवेत् pour मतम् .
[4] B: सर्व pour सार्व.
[5] B: नवाहादुत्सवं परम् .
[6] C: शान्तिकं पौष्टिकं चैव.
[7] C: निध्वजं.
[8] C: वाथ.
[9] C: जयदां.
[10] C: धलकाममदे चेव ; C: धनकामादयश्चेव.
[11] B: तु pour स्याद् ; C: सा pour स्याद् .
[12] C omet ce demi-vers.
[13] A: कार्यं pour यागं.
[14] C: पञ्चार्हादौ.
[15] C: प्रागुक्तं पञ्चकान्वितम् .
[16] A: सप्ताहं.
[17] A: अष्टाहं.
[18] A: ध्वजाङ्कूरध्वजं तथा.
[19] C omet les trois demi-vers suivants.
[20] B: सहितस्नानं.
[21] B: पाषाणस्सरणं ; A: पाषाणैः स्मरणं.
[22] C: घृतं स्नानं.
[23] B: अपूपहविषं चैव ; C: अपूपा हविषं चैव; A: अपूपं हविषं चैव.

[1]सप्तदशाङ्गिकं प्रोक्तं सार्वकामिकमुत्सवम् । [2]प्रोक्तं ध्वजाङ्कुरं पूर्वं ध्वजारोहं द्वितीयकम् ॥ १७ ॥
तृतीयं भेरिकाघोषं [3]तथा यागाधिवासनम् । होमं बलिप्रदानं च चूर्णोत्सवमतः परम् ॥ १८ ॥
तीर्थं चण्डेशयागं च शुद्धस्नानं तथैव च । एवं [4]दशाङ्गिकं सार्वकामिकं द्विविधं भवेत्[5] ॥ १९ ॥
शान्तिकाद्युत्सवानां तु दिनं प्रति [6]बलित्रयम् । [7]पूर्वाह्णे ब्राह्मणप्रीतिर्मध्याह्ने [8]क्षत्रियस्य तु ॥ २० ॥
[9]वैश्येष्टं स्यान्निशादौ तु रात्रौ शूद्रादिवृद्धये[10] । [11]आरोहणावरोहस्य कालः शुभावहो भवेत् ॥ २१ ॥

[ध्वजस्थानम्]

[12]पीठगोपुरयोर्मध्ये वृषाग्रे वा [13]वृषोपरि । अन्तर्हाराग्रमध्ये वा [14]मध्यहारे तथैव च ॥ २२ ॥
ध्वजस्थानं समाख्यातं

[ध्वजलक्षणम्]

[15]शृणुष्व ध्वजलक्षणम् । पञ्चहस्तं समारभ्य [16]यावत्त्रयोदशावधि ॥ २३ ॥

---

[1] B: सप्तादशांशकं.
[2] A omet प्रोक्तं ; B: पूर्वं ध्वजाङ्कुरं प्रोक्तं ; C: अन्यध्वजाङ्कुरं पूर्वं.
[3] A: यागाधिवसनं तथा ; C: यागाधिवासनं ततः .
[4] C: दशान्तिकं सार्वं कामिकं.
[5] cf. *Dīptāgama, paṭala* 83, 2-6:

प्रथमं वृषयागं तु द्वितीयं रोपयेद्ध्वजम् । तृतीयं ताडयेद्भेरीं चतुर्थं चाङ्कुरार्पणम् ॥
पञ्चमं यागशाला स्यादस्त्रयागमतःपरम् । सप्तमं बलिदानं स्यात्तथा यानक्रमं परम् ॥
परिवेषं नावमं स्यान्नीराजनमथो दश । एकादशं कौतुकं च तीर्थसंग्रहणं परम् ॥
त्रयोदशं चूर्णकरणं तीर्थं चैव चतुर्दश । ध्वजावरोहणं पश्चात्षोडशं स्नपनं भवेत् ॥
एवं षोडशभेदेन शिवोत्सवं प्रकीर्तितम् ।

[6] A: बल pour बलि.
[7] A: पूर्वाह्णे.
[8] A: क्षत्रियादिकम् ; C: क्षत्रियार्हकम् .
[9] A: वैश्यानां pour वैश्येष्टं.
[10] A: वृद्धयेत् pour वृद्धये.
[11] A: पराणामवरोक्तं च कालं शुभावहं भवेत् ; B: पराणामपरोक्तश्च भवेत्कालः शुभावहः ; C: आरोहण वरोहं च कालं शुभावहं भवेत् .
[12] cf. *Kāraṇa*, I, 141. 40:

पीठगोपुरयोर्मध्ये पीठाग्रे वा वृषाग्रके । महामर्यादिमध्ये वा ध्वजस्थानं विधीयते ॥

voir aussi *Suprabheda*, I, 14, 29:

पीठगोपुरयोर्मध्ये वृषभस्याग्रतोऽपि वा । कलयेन्मध्यहारायां मध्यादेर्मध्यमेऽपि वा ॥

cf. *Īśānaśivagurudevapaddhati*, vol. IV, p. 459:

ध्वजस्थानं वृषाग्रे वा बलिपीठाग्रतोऽपि वा । कुर्यात्तु मध्यहारायां मर्यादामध्यमेऽथ वा ॥

[13] B: वृषापरे ; C: वृषां परे.
[14] A: मध्यभागे.
[15] B: शृणु त्वं pour शृणुष्व.
[16] A: यावत्त्रयोदशाकरम् ; B: त्रयोदशकरान्तकम् .

नवधा पटदैर्घ्यं [1]स्याच्चतुस्तालं [2]द्व्याङ्गुलम् । [3]प्रवृद्धया नवधा तारं विस्तारार्धं[4] तु [5]पुच्छकम् ॥ २४ ॥
पुच्छत्रयसमायुक्तं पुच्छद्वयमथापि वा । विस्तारसदृशं [6]वार्धं त्रिपादं [7]शिखरायतम् ॥ २५ ॥
[8]वेत्र[9]त्रयसमायुक्तं तान्तवं [10]सुदृढं भवेत् । पार्श्वैकदलिकोपेतं तदूर्ध्वे किङ्किणीयुतम् ॥ २६ ॥
तन्मध्ये वृषभं लिख्य दीपाधारं[11] तु पार्श्वयोः । [12]छत्रं च चामरे चोर्ध्वे पद्मपीठोपरिस्थितम् ॥ २७ ॥
[13]मङ्गलाष्टकसंयुक्तं ध्वजमालिख्य युक्तितः । ग्रामप्रदक्षिणं कृत्वा ध्वजस्थापनमाचरेत् ॥ २८ ॥

[ध्वजदण्डवृक्षाः]

[14]चन्दनं चम्पकं वापि खादिरं देवदारुकम् । [15]तरुं वा केतकं बिल्वं क्षीरिणं सप्तपर्णकम् ॥ २९ ॥
[16]वैणवं क्रमुकं वापि मुनिवृक्षमथापि वा ।

---

[1] A et B: वा pour स्यात् .
[2] C: द्वियङ्गुलम् .
[3] C: विवृद्धया.
[4] B: अर्थं pour अर्धं dans विस्तारार्धं.
[5] C: पुस्तकम् .
[6] A: अथ pour अर्धं dans वार्धं.
[7] C: शिखया द्वयम् .
[8] B: चित्र pour वेत्र.
[9] C: द्वय pour त्रय.
[10] C: स pour सु dans सुदृढं.
[11] B: दीपाधारे.
[12] C: छत्रचामरकौ चोर्ध्वे.
[13] cf. *Kāraṇa*, I, 141, 28-34:

श्लक्ष्णं शुक्लं तथा सूक्ष्मरन्ध्राष्टकरणानि च । उत्तमादीनि वस्त्राणि भूतभागैकविस्तृतम् ॥
तारार्धं शिखरं ज्ञेयं पुच्छं तारसमं भवेत् । पक्षवेत्रसमायुक्तं पुच्छद्वयसमायुतम् ॥
तत्पटं पञ्चधा भज्य मध्यभागे वृषं लिखेत् । वृषभः श्वेतवर्णस्तु रक्तास्सर्वेऽङ्कुराः स्मृताः ॥
सितकृष्णमयं चाक्षि हेमाभौ शृङ्गवर्णकौ । कर्णौ तु रक्तवर्णाभौ वालं पीतेन शोभितौ ॥
घण्टामाला सुवर्णाभा स्थितं वा शयितं तु वा । छत्रं च चामरौ चैव ऊर्ध्वभागे लिखेद्बुधः ॥
मध्यभागादधोभागे चाब्जपीठं समालिखेत् । दीपाधारे लिखेद्दीपं युक्तौ तौ पार्श्वयोरपि ॥

cf. *Suprabheda*, I, 14-15-16:

विस्तारेण समं पुच्छं त्रिपुच्छं वा द्विपुच्छकम् । मध्ये वृषममालिख्य स्थितं वा शयनं तु वा ॥
दर्भमालासमायुक्तं किङ्किणीवरकान्वितम् ॥

cf. *Īśānaśivagurudevapaddhati*, vol. IV, p. 460:

पताकायास्तथायामो नन्दाष्टमुनिकिष्कुभिः । तत्पञ्चांशेन तद्व्यासो व्यासार्धाच्छिखरं भवेत् ॥
पुच्छत्रयं द्वयं वा स्याद् व्यासाद्दीर्घं क्रमात्क्रशम् । स्वायामपञ्चभागैकभागान्मध्ये वृषं लिखेत् ॥

[14] cf. *Kāraṇa*, I, 141, 41:

चन्दनं चम्पकं चैव क्रमुकं वैष्णवं (वैणवं ?) तथा । बिल्वं च देवदारुं च असनं खदिरं तथा ॥

cf. *Īśānaśivagurudevapaddhati*, vol. IV, p. 459:

ध्वजदण्डतरुः पूगस्त्वक्सारः शाक एव वा । सालो वा चम्पकः शस्तो रक्तसारोऽसनस्तथा ॥

[15] A: तनुवाकेन कम्बल्यं क्षीरिणी सप्तपर्णकम् ।; B: तनुकाकेन कम्बल्यं क्षीरिणी सप्तपर्णकम् ।; C: तनु वा केतकं बल्य क्षीरिणी सप्तपर्णकम् ।
[16] C: वैष्णवं pour वैणवं.

[ध्वजदण्डमानम्]

[1]प्रासादत्रिगुणं दैर्घ्यं [2]पञ्चमात्रं [3]नवान्तकम् ॥ ३० ॥
अर्धमात्रविवृद्धया[4] तु नवधा [5]मूलविस्तृतिः । [6]मूलत्रिपादमर्धं वाप्यग्न्यशं चाग्रविस्तरम् ॥ ३१ ॥
[7]तत्तारत्रिगुणं नाहं मूलादग्रं क्रमात्कृशम् ।

[दण्डलक्षणम्]

[8]सुवृत्तं निर्व्रणं चैवाप्यवक्रं चाप्यकोटरम्[9] ॥ ३२ ॥
[10]अभिन्नमार्जवोपेतं [11]मृदुं च सुदृढं ग्रहेत् । अग्रे यष्टित्रयं योज्यं षोडशाङ्गुल[12]मायतम् ॥ ३३ ॥

---

[1] cf. *Iśānaśivagurudevapaddhati*, vol. IV, p. 459:

ध्वजदण्डस्य तुङ्गं तु विज्ञेयं द्वारतुङ्गतः । पञ्चपञ्चगुणं श्रेष्ठं मध्यमत्यष्टिसंमितैः ॥
कनिष्ठं स्याद्दशगुणमथ स्तूपिसमोच्छ्रयः । मुख्यं कण्ठमितं मध्यं नीचं वृषतलोच्छ्रितम् ॥
त्रिद्व्येकगुणकं वा स्याद् विमानादिति केचन । चत्वारिंशच्च षट्त्रिंशत् त्रिंशच्चैवाङ्गुलानि तु ॥
श्रेष्ठादिध्वजदण्डानां नाहाः स्युस्त्रिविधाः क्रमात् ।

cf. *Suprabheda*, I, 14, 19-28:

प्रासादत्रिगुणं दैर्घ्यं द्विगुणं वा ततस्समम् । शिखरग्रीवसीमान्तं वृषभस्थलसम्मितम् ॥
तथा द्वित्रितलान्तं वा गोपुरान्तमथापि वा । षट्त्रिंशदङ्गुलं नाहं ध्वजदण्डं विधीयते ॥
त्रिंशदङ्गुलकेनाथ चतुर्विंशं तु वाङ्गुलम् । उत्तमादधमं नाहं ग्राह्यमेवं सुदण्डके ॥
घटिकात्रयसंयुक्तं विस्तारेष्टाङ्गुलेन तु । तद्वनं चतुरङ्गुल्यं त्रिभिरङ्गुलिभिस्तु वा ॥
दैर्घ्यं तु द्वादशाङ्गुल्यं षोडशाङ्गुल्यकं तु वा । दण्डे तु सुषिरं कृत्वा सुस्निग्धं तु यथा तथा ॥
घटिकात्रयकं न्यस्य तेष्वन्तस्थं सवेणवम् । दण्डाग्रेण समं कुर्यादग्रं वैणवकस्य तु ॥
दण्डं चाप्यथवा कुर्याद्बह्व्यन्तस्थं सुनिश्चलम् । वैणवस्य तु दैर्घ्यं तु द्वादशं तालमुच्यते ॥
अथवा षोडशं तालं चतुर्दशं तालमेव वा । दशतालं तु वा ग्राह्यं द्वादशाङ्गुलनाहकम् ॥
तस्यार्धार्धश्च(स्य ?) मात्रे तु वलयं त्वायसेन तु । यन्त्रार्थं बन्धयेद्धीमानलाभे दारुणा भवेत् ॥
तदन्ते रज्जु संवेश्य द्विगुणं मूलमाश्रितम् । मध्यमाङ्गुलिनाहं तु तन्तुना सुदृढं कृतम् ॥

[2] C: पञ्चमात्रौ.
[3] A: नवांशकम् .
[4] C: निवृद्धयां.
[5] C: मूलविस्मृतः ; B: मूलविस्तृतः .
[6] C: मूलादिपाद pour मूलत्रिपाद.
[7] B: तत्ताद्दक् pour तत्तार.
[8] cf. *Kāraṇa*, I, 141, 42:

वक्रं भिन्नं च सुषिरं कृमिकोटरसंयुतम् । वर्जयेत्तान् प्रयत्नेन ग्राह्येल्लक्षणान्वितम् ॥

cf. *Iśānaśivagurudevapaddhati*, vol. IV, p. 459:

अकोटरो निर्व्रणः स्याद्दजुर्ग्रन्थ्यादिवर्जितः । सवल्कलौ वेणुपूगावन्ये सर्वेऽप्यवल्कलाः ॥

[9] A: सुवृत्तं निर्वृणं चैवाप्यवक्रमनकोटरम् ; C: सुवृत्तं चाग्निपञ्चैवाप्यवक्त्रमनेकवरम् .
[10] A et C: अभिन्नमार्जवं चैव.
[11] A: मार्दवं pour मृदुं च.
[12] A: अङ्कुर pour अङ्कुल dans षोडशाङ्कुलमायतम् .

[1]युक्त्या व्यासं घनं प्रोक्तं दण्डस्यानुगुणं भवेत् । [2]यष्टयन्तरं द्वितालं स्यादुपदण्डसमन्वितम् ॥ ३४ ॥
यंत्र यष्टयुपदण्डे तु योजयेद्[3]भूतमात्रतः[4] ।

[ध्वजदण्डस्थापनम्]

क्षीरोदकेन दण्डं तु क्षालयेद्धृदयेन तु ॥ ३५ ॥
दर्भान् [5]बध्वोपदण्डाग्रे [6]दर्भमालां तु दण्डके । [7]अग्रादामूलमावृत्य प्रादक्षिण्यक्रमेण तु ॥ ३६ ॥
खात्वोक्तदेशे[8] हस्तं तु पुष्पं धान्यं च[9] निक्षिपेत् । तस्मिन्संस्थापयेद्दण्डं प्रासादाभिमुखं तथा ॥ ३७ ॥
हस्तद्वयं तु विस्तारमुक्तं त्रिपादमुन्नतम् । [10]तदूर्ध्वेऽम्बुजमग्न्यंशं[11] केवलं [12]वेदिकां कुरु[13] ॥ ३८ ॥
युगाश्रं वाथ वृत्तं वा तन्मूले सोपवेदिकम् । कृत्वाश्मना वा सुधया मृदा वा [14]प्रोक्षयेद्धृदा ॥ ३९ ॥
[15]मण्डपे मार्जनं कृत्वा गोमयालेपनं [16]कुरु । प्रोक्षयेदस्त्रमन्त्रेण गन्धवारियुतेन च[17] ॥ ४० ॥
स्थण्डिलत्रितयं कृत्वा द्रोणत्रितयशालिभिः । तिलतण्डुललाजैश्च[18] दर्भैः पुष्पैः परिस्तरेत्[19] ॥ ४१ ॥

---

[1] A et B: युक्तव्यासघनं.
[2] B: ऋष्यन्तरं.
[3] A: भूतमामृतम् .
[4] cf. *Iśānaśivagurudevapaddhati*, vol. IV, p. 459:

ध्वजदण्डसजातीयस्तूपदण्डतरुर्भवेत् । ध्वजदण्डचतुर्थांशात्पञ्चांशाद्वा षडंशतः ॥
उपदण्डस्य तुङ्गं स्यात्तन्नाहो द्वादशाङ्गुलः । विकारमनुसूर्यांशैरायताः सार्धविस्तृताः ॥
सच्छिद्राग्रास्त्रयः स्कन्धाश्छिद्रप्रोतोपदण्डकाः । प्रविष्टा ध्वजदण्डाग्रे युक्त्या कार्याः समान्तराः ॥

[5] C: दर्भ pour बध्वा.
[6] C: दार्भमालं.
[7] C: अग्रादमूलम् .
[8] B: देशं pour देशे.
[9] B et C: तु pour च.
[10] A: तदूर्ध्वाम्बुजम् .
[11] C: अग्न्यंशा pour अग्न्यंशं.
[12] A: वेदितां कुरु ; B: वेष्टिताङ्कुरम् .
[13] cf. *Kāraṇāgama*, I, 141, 55-62:

दण्डशुद्धिं ततः कुर्यात्प्रोक्षयेद्धृदयेन तु । प्रदक्षिणक्रमेणैव दर्भमालां तु विन्यसेत् ॥
वृषभं षण्मुखं वायुं मूलमध्ये तदग्रके । गन्धपुष्पादिभिश्चैव तत्तद्बीजमनुस्मरन् ॥
चतुस्तालप्रमाणेन खातयेत्पृथिवीं ततः । शातकुम्भमयेनैव कच्छपं तत्र निक्षिपेत् ॥
पूजयेद्धृदयेनैव गन्धपुष्पादिभिर्बुधः । हर्म्यस्याभिमुखं तत्र कर्माणि स्थाप्य दण्डकम् ॥
सुस्निग्धं कारयित्वा तु तन्मूले वेदिकां कुरु । हस्तद्वयं तु विस्तारमुत्सेधं तु तदर्धकम् ॥
त्रिमेखलासमायुक्तमेकैकं पर्वताङ्गुलम् । तत्समं चैव विस्तारं वेद्यूर्ध्वेऽब्जं तु कारयेत् ॥
अथवान्यप्रकारेण वेदिकालक्षणं शृणु । हस्तमात्रप्रविस्तारं तत्समं चोच्छ्रयं भवेत् ॥
षडङ्गुलोच्छ्रयमानेन अब्जं तत्रैव कल्पयेत् ।

[14] A: प्रोक्षयेत्ततः .
[15] A: मण्डपं.
[16] A: तथा pour कुरु.
[17] A: वा pour च.
[18] B: लाजानां pour लाजैश्च.
[19] Dans C on trouve le vers 46 avant le vers 42.

प्रोक्षयेद्घोरमन्त्रेण सर्वालंकारसंयुतम् । पूर्वे तु स्थण्डिले भेरीं मध्यमे नवकुम्भकान्[1] ॥ ४२ ॥
पश्चिमे वृषभं स्थाप्य गन्धाद्यैरर्चयेद्धृदा । [2]एषां[3] पश्चिमभागे तु स्थण्डिलं शालिमिः कुरु ॥ ४३ ॥
तस्मिन् [4]शूलं तु संस्थाप्य गन्धैः पुष्पैः समर्चयेत् । [5]भेर्यास्तु पश्चिमे देशे कलशानां पुरोऽन्तिके ॥ ४४ ॥
स्थण्डिलं वालुकैः कुर्यादग्निकार्यं समाचरेत् । [6]अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ ४५ ॥
[7]समिदाज्यौदनैः पश्चाद् वृषगायत्रिमन्त्रतः । प्रत्येकं शतमर्धं वा तदर्धं वापि होमयेत् ॥ ४६ ॥
पूर्णाहुतिं ततः [8]कुर्याद् वृषस्य मूलमन्त्रतः । [9]वृषकुम्भस्य मध्ये तु वृषं [10]तन्मन्त्रतो यजेत् ॥ ४७ ॥
लोकेशानर्चयेद्धीमान्शक्रादिकलशेषु [11]वै । ततो वृषं [12]पटेऽभ्यर्च्य गन्धैः पुष्पैः सुधूपकैः ॥ ४८ ॥
[13]घृतं शिरोऽर्पणं कुर्यादङ्कुरैः साक्षतैर्बुधः[14] ॥

---

[1] cf. *Kāraṇāgama*, I, 141, 71-72:

ध्वजाग्रे स्थण्डिलं कृत्वा चाष्टद्रोणैश्च शालिभिः । तण्डुलैश्च तिलैर्दर्भैर्निर्मितं पद्मलाञ्छितम् ॥
तस्योपरि न्यसेद्भेरीं नववस्त्रेण वेष्टयेत् । रुद्रं संपूज्य विधिवद्विष्णुं वामे तु पूजयेत् ॥

[2] cf. *Īśānaśivagurudevapaddhati*, vol. IV, p. 462:

तदग्रे स्थण्डिले पद्मं विलिख्य शुभकर्णिकम् । तत्र शूलं प्रतिष्ठाप्य यथावदभिपूजयेत् ॥

cf. *Kāraṇāgama*, I, 141, 73:

तस्योर्ध्वे स्थण्डिलं कुर्यादष्टपत्रं सकर्णिकम् । शूलाग्रं हि यजेत्तत्र गन्धपुष्पादिभिः क्रमात् ॥

[3] B: एवं pour एषां.
[4] C: स्थलं pour शूलं.
[5] C: देवस्य pour भेर्यास्तु.
[6] A: अन्यथानादिकं; B: अन्यधानादिकं.
[7] C: सभिदाज्योदनैः .
[8] B: कुर्याद्वृषभस्य तु मूलतः .
[9] C: वृषकुम्भे तु मध्ये तु वृषमन्त्रं ततो यजेत् .
[10] B: तन्मूलतो pour तन्मन्त्रतो.
[11] A: वा pour वै.
[12] C: पदे pour पटे.
[13] B: धृतं pour घृतं; C: घृते.
[14] cf. *Īśānaśivagurudevapaddhati*, vol. IV, p. 460-461:

वृषाग्रे स्थण्डिलं कृत्वा शालिभिस्तण्डुलैरपि । तस्मिन्नवपदं कृत्वा कलशान्नव विन्यसेत् ॥
आपूर्य शुद्धसलिलैः कूर्चैर्हेमाम्बरान्वितम् । अलंकृत्य वृषं मध्य परितोऽष्टौ च दिक्पतीन् ॥
आवाह्य सम्यग्गन्धाद्यैरभिपूज्य यथाविधि । तारादिवृषमन्त्रेण स्वगायत्र्या वृषं यजेत् ॥
स्वैर्मन्त्रैरष्टलोकेशांस्तदग्रे स्थण्डिले पुनः । पताकां विन्यसेत्तस्मिन् वृषमन्त्रेण तां यजेत् ॥
तस्माद्धस्तद्वये कृत्वा मण्डलं चतुरश्रकम् । तत्राग्निं सम्यगाधाय कृत्वा कर्म शिवानले ॥
पलाशसमिधो हुत्वा वृषमन्त्रेण देशिकः । तिलाज्यं चरुं चापि पृथगष्टोत्तरं शतम् ॥
पूर्णां स्विष्टकृतं चापि हुत्वा वह्निं विसर्जयेत् ॥

[भेरीताडनम्]

[1]चन्द्रादित्यौ च भेर्यां तु[2] दक्षिणेऽदक्षिणे [3]मुखे ॥ ४९ ॥
भेरिकायां[4] [5]हरिं चैव [6]मातृः सप्त च कीलके । चर्मसूत्रेष्वनन्तादीन्पद्मान्तांस्तु[7] [8]विचिन्तयेत् ॥ ५० ॥
महापद्मं विजानीयाद्धारणासूत्रमस्य[9] तु । [10]प्रहारस्यानलं[11] विद्याद्धविष्यान्तं समर्चयेत् ॥ ५१ ॥
[12]प्रहारेणास्त्रमन्त्रेण त्रिः कृत्वा ताडयेद्बुधः । वादकस्ताडयेत्पश्चा[13]द्दशतालमुदाहरन्[14] ॥ ५२ ॥

[ध्वजारोहणम्]

[15]सर्वदैवतमावाह्य[16] ध्वजमारोहयेत्ततः[17] । अस्त्रेण वृषमूलेन रज्जुयन्त्रेण रोहयेत् ॥ ५३ ॥
[18]दण्डात्तु [19]द्विगुणो [20]रज्जुस्तान्तवः[21] [22]सुदृढो भवेत् । अथवा ध्वजदण्डेन बध्वा संस्थापयेद्ध्वजम् ॥५४॥
[23]आनीय [24]कलशान्स्थाप्य दण्डमूलेऽभिषेचयेत् । वृषमभ्यर्च्य गन्धाद्यैर्मुद्गान्नं तु निवेदयेत् ॥ ५५ ॥

---

[1] cf. *Suprabhedāgama*, I, 14, 42-45:

पटहं विष्णुदैवत्यं सुषिरं वायुदैवतम् । शब्दं तद्ब्रह्मरूपं स्याद्भूपाभावस्तथैश्वरम् ॥
वासुकी चर्मसूत्रं तु वलयौ रविचन्द्रकौ । मातरः सप्तकीलास्तु प्रहारः स्कन्ददैवतम् ॥
अर्चयित्वा सुगन्धाद्यैर्हृदयेन विचक्षणः । आचार्यं पूजयेत्पूर्वं वादकं तदनन्तरम् ॥
आचार्यो वाममन्त्रेण संताड्य त्रिप्रकारतः । वादकस्ताडयेत्पश्चाद्वलितालं विशेषतः ॥

[2] B: च pour तु.
[3] B: मुखः pour मुखे.
[4] C: भेरिकाया.
[5] A: हरिश्चैव.
[6] A et C: मातरः सप्त कीलके.
[7] A: पद्मान्तस्तु pour पद्मान्तांस्तु ; C: भस्मान्तांश्च.
[8] C: सुचिन्तयेत् .
[9] A: धारणस्सूत्रम् pour धारणासूत्रम् .
[10] A: प्रहारस्य तिलं ; B: प्रहारस्याविलं.
[11] आनलः = स्कन्दः .
[12] C: प्रहरणास्त्रेण मन्त्रेण.
[13] C omet les trois lettres: दृशता.
[14] B: उदाहरेत् pour उदाहरन् .
[15] cf. *Iśānaśivagurudevapaddhati*, vol. IV, p. 461:

ध्वजमुद्धृत्य यन्त्रेण वाहयेच्छिरसाथवा । शङ्खभेर्यादिनिर्घोषैः कृत्वा ग्रामप्रदक्षिणम् ॥
अन्तः प्रविश्य निर्दिष्टे ध्वजस्थाने तु विन्यसेत् । पुण्याहं वाचयित्वाथ तज्जलैः क्षालयेद्ध्वजम् ॥
दण्डस्य मूले मध्येऽग्रे वृषषण्मुखमारुतान् । तत्तन्मन्त्रेण संपूज्य गीतवाद्यादिमङ्गलैः ॥
वृषकुम्भं समानीय ध्वजोपान्ते तु विन्यसेत् । कुम्भस्थान्वृषमन्त्रांस्तु ध्वजे वृषहृदि न्यसेत् ॥
मङ्गलाङ्कुरदीपाद्यैरलंकृत्य यथाविधि । रज्ज्वा पताकासङ्घिन्या गायत्र्या वृषभस्य तु ॥
ध्वजमारोपयेत्सम्यग् रज्ज्वा दण्डं च वेष्टयेत् । लोकपालास्थितैः कुम्भैर्ध्वजमूलेऽभिषेचयेत् ॥
तन्मूले ध्वजमाराध्य निवेद्यान्तं यथाविधि ।

[16] C: सर्वदेवतमावाह्य.
[17] B: बुधः pour ततः .
[18] A: दण्डाय pour दण्डात्तु.
[19] A: द्विगुणं.
[20] C: रज्जुस्तम्भमास्य दृढं भवेत् .
[21] A: तान्तव्यः pour तान्तवः ; B: तान्तवं.
[22] B: सुदृढं.
[23] C: आनीये.
[24] B: तु कुशान् pour कलशान् .

ततस्त्रिशूलमस्त्रं[1] च [2]दध्योदनमथापि वा । सन्धिदेवान् समावाह्य बलिं दद्याद्विशेषतः ॥ ५६ ॥
[3]ब्रह्मादीशानपर्यन्तमिन्द्रादीशान्तमेव[4] वा[5] । ग्रामादिषु बलिं दद्याद्वासं गच्छेच्छिवालयम् ॥ ५७ ॥
अन्यत्प्राकारबाह्ये तु प्रासादवास्तुमार्गतः । [6]इन्द्रादीशानपर्यन्तं बलिं दद्यात्तु मन्त्रतः ॥ ५८ ॥
[7]दिवापि ध्वजमारोह्य भेरीं [8]निश्येव ताडयेत् ।

[यागमण्डपः]

[9]प्रासादस्याग्रतो [10]वैशे चाग्नेय्यां याम्यतोऽपि वा ॥ ५९ ॥
वायव्यां सौम्यतो वापि कृत्वा वै यागमण्डपम् । नवसप्तकरं वापि पञ्चहस्तविशालकम् ॥ ६० ॥
[11]समाश्रं [12]सकलास्तम्भं [13]पङ्क्तिर्व्यासोऽस्ति [14]तुङ्गकः । [15]अङ्घ्रितुङ्गात्र्यमग्न्यंशं पादांशं वा [16]तलोदयम् ॥
मण्डपं वा प्रपां वापि वितानाद्यैरलंकृतम् । दिशासु तोरणाढ्यं च कदलीक्रमुकान्वितम् ॥ ६२ ॥
तन्मध्ये वेदिकार्द्धांशं [17]व्यासं हस्तोत्तरं समम् । गुणाक्षमात्रविस्तारमुत्सेधमुपवेदिका ॥ ६३ ॥
[18]परितस्त्वग्निकुण्डानि नव पञ्चैकमेव वा । महाशासु युगाश्राणि वृत्तं कोणेषु कल्पयेत् ॥ ६४ ॥

---

[1] C: त्रिशूलमन्त्रं pour त्रिशूलमस्त्रं.
[2] A: दध्योदनमपार्थिवम् ; C: दध्योदनं सपार्थिवम् .
[3] A: ब्रह्माद्यैशान.
[4] B: इन्द्रादीनां तमेव वा.
[5] C omet इन्द्रादीशान्तमेव वा, les vers 57*b* et 58*a* et इन्द्रादीशानपर्यन्तं, et lit ब्रह्मादीशानपर्यन्तं बलिं दद्यात्तु मन्त्रतः.
[6] A: इन्द्राद्यैशानपर्यन्तं.
[7] C: द्विजापि.
[8] A: दिश्येव.
[9] cf. *Kāraṇāgama*, I, 141, 87-91:
ऐन्द्रे वा दक्षिणे वापि पश्चिमे चोत्तरेऽपि वा । ऐशान्ये पावके वाथ कारयेद्यागमण्टपम् ॥
रुद्रैरन्ध्रैर्विधिर्वाथ सहस्तं चतृतारकम् । युगाश्रं तु कलास्रैश्च श्रुतिद्वारसमायुतम् ॥
तालमात्रं तु तालोच्चं दर्पणोदरसन्निभम् । तन्मध्ये वेदिकां कुर्याद्गृहभागैकभागतः ॥
रत्निमात्रसमुत्सेधं मुष्टिमात्रमथापि वा । कुण्डानि परितः कुर्याद्दिशासु विदिशासु च ॥
[10] A: वैशेयाग्नेय्यां ; C: चैव आग्नेय्यां .
[11] C: समग्रं.
[12] B: सकलस्तम्भं.
[13] A: पंक्तिव्यासोऽस्ति ; C: पक्तिर्व्यासोऽस्ति.
[14] A: तुङ्गिकम् .
[15] A: अङ्घ्री तु गात्रमग्न्यंशं पादांशं.
[16] C: तपोदयम् .
[17] C: व्यासहस्तोत्तरं समम् .
[18] cf. *Kāraṇāgama*, I, 141, 91-96:
कुण्डानि परितः कुर्याद्दिशासु विदिशासु च । चतुरश्राणि वृत्तानि दिशासु विदिशासु च ॥
ईशानशक्रयोर्मध्ये वृत्तं प्राधानकं कुरु । हस्तमात्रप्रविस्तारं प्रागुक्तलक्षणं कुरु ॥
पञ्चाग्न्या वाथ कुर्वीत चतुर्दिक्षु तथापि वा । पूर्वे वा पश्चिमे वापि दक्षिणे चोत्तरेऽपि वा ॥
कारयेच्चतुरश्रं तु एकाग्नेस्तु विधीयते । गोमयालेपनं कृत्वा पर्यग्निकरणं कुरु ॥
युगतोरणसंयुक्तं दर्भमालासमायुतम् । अष्टदिग्ध्वजसंयुक्तं वितानोपरिशोभितम् ॥
पुष्पदामैरलंकृत्य मुक्तादामैः प्रलम्बयेत् । प्रोक्षयेत्पञ्चगव्यैश्च पुनः पुण्याहमाचरेत् ॥

[1]शक्रशांकरयोर्मध्ये कल्पयेदम्बुजाकृतिम् । एवं नवाग्निकार्यं चेत्पञ्चाग्नौ[2] [3]वृत्तहीनकम् ॥ ६५ ॥
वेद्यास्तु पूर्वतो [4]याम्ये वेदाश्रमम्बुजं[5] तु वा । गोमयालेपनं कृत्वा प्रोक्ष्य चूर्णैरलंकुरु[6] ॥ ६६ ॥
पर्यग्निकरणं कृत्वा [7]पुण्याहप्रोक्षणं कुरु । प्रोक्षयेदीशमन्त्रेण सर्वत्र सकुशोदकैः ॥ ६७ ॥
[8]प्रासादादीन्नवीकृत्य [9]प्रपास्थानं च मण्डपम् । वितानाद्यैरलंकृत्य यानादींश्च नवीकुरु[10] ॥ ६८ ॥
[11]शोधनं मार्जनं [12]वीथ्यां [13]वालुकास्तरणं कुरु । ग्रामादीनि गृहादीनि नवीकृत्य विचित्रयेत् ॥ ६९ ॥
[14]उत्सवादिदिनस्यादौ तदा वै वाधिवासनम् । यागद्रव्याणि सर्वाणि साधयित्वा [15]समाहितः ॥ ७० ॥
शोधनं क्षालनं शोषं कृत्वा [16]पात्रास्त्रकादि च । नित्योत्सवेन तत्सर्वं ग्रामं कृत्वा प्रदक्षिणम् ॥ ७१ ॥
अपरे दिवसे रात्रौ यागकार्यं समाचरेत् । [17]स्थण्डिलं कारयेद्वेद्यामष्टद्रौणैश्च शालिभिः ॥ ७२ ॥
तिलतण्डुलला जैश्च दर्भैः पुष्पैः परिस्तरेत् । मध्यमे शिवकुम्भं च[18] वर्धनीं वामभागतः ॥ ७३ ॥
परितोऽष्टौ[19] घटान्स्थाप्य नानागन्धाम्बुपूरितान् । सवस्त्रान्कूर्चसंयुक्तान्ससूत्रान्सापिधानकान् ॥ ७४ ॥

---

1 A: शक्रांशां करयोर्मध्ये.
2 A: पञ्चांशे ; C: पञ्चार्धे.
3 A: वृत्ति pour वृत्त.
4 C: यामे.
5 C: अब्जकं pour अम्बुजं.
6 A: अलंकरेत्.
7 A: पुण्याहं प्रोक्षणं कुरु.
8 C: प्रासादीनि विकृत्यं च.
9 C: सभा pour प्रपा.
10 A: नवीकरेत् .
11 cf. *Suprabhedāgama*, I, 14, 64-67:

ग्रामं वा नगरं वापि ह्यलंकृत्य विशेषतः । वीथयश्चोपवीथ्यश्च निम्नोन्नतविवर्जिताः ॥
शोधयित्वा समां भूमिं जलसेकोपलेपनैः । पातकाभिर्ध्वजैश्चापि तथाकाशध्वजैरपि ॥
कदलीभिर्धूपदीपैर्द्वारकुम्भैरथान्यकैः । साङ्कुरैश्छिद्रकुम्भैश्च पालिकाभिः समन्ततः ॥
वस्त्रैश्च गन्धमाल्यैश्च भवनं प्रति भूषयेत् ॥

12 C: वीधीन् pour वीथ्यां.
13 A: वृत्तमास्तरणं कुरु ; B: वृत्तं स्तरणं कुरु ; C: वालुकं स्तरणं कुरु.
14 A: उत्सवादीनां स्यात्तद्दालैवाधिवासनम् ; B: उत्सवादिनास्य तदालैवाधिवासनम् ; C: उत्सवादीनिनां स्याथा तदा वै वाधिवासनम् .
15 C: समाहितम् .
16 A: पात्रास्मृकादि च ?
17 cf. *Suprabhedāgama*, I, 14, 68-73:

वेदिमध्ये ततः कृत्वा स्थण्डिलं शालिकामयम् । षड्द्रोणैः पञ्चद्रोणैर्वा चतुर्द्रोणैस्तु वा पुनः ॥
तण्डुलैः समलंकृत्य तिलैर्दर्भैस्तथोपरि । ससूत्रं कूर्चवस्त्राढ्यं पञ्चरत्नसमन्वितम् ॥
शिवकुम्भं न्यसेन्मध्ये वर्धनीं तस्य वामतः । वस्त्रकूर्चसमायुक्तं हेमयुक्तं प्रकल्पयेत् ॥
ध्यात्वा सदाशिवं देवं शिवकुम्भे निवेशयेत् । मनोन्मनीं तु संचिन्त्य वर्धन्यां विन्यसेत्सुधीः ॥
परितोऽष्टौ घटान्न्यस्य विद्येश्वरसमन्वितान् । सकूर्चान् वस्त्रसंयुक्तान् सहेमान्वारिपूरितान् ॥
कलशाधिपतींस्तत्र स्वैः स्वैर्मन्त्रैः सुपूजयेत् ॥

18 C: तु pour च.
19 C: अष्ट pour अष्टौ.

सरत्नान्महिरण्यांश्च[1] स्थापयेत्सद्यमन्त्रतः । शिवकुम्भे शिवं ध्यात्वा वर्धन्यां [2]तु मनोन्मनीम् ॥ ७५ ॥
[3]विद्येशान्परितः कुम्भे स्वस्वमन्त्रैश्च पूजयेत् । शिवकुम्भान्तिके मध्ये स्थापयेदस्त्रमन्त्रतः ॥ ७६ ॥
तत्कुम्भेऽस्त्रं समभ्यर्च्य [4]हविरन्तं विशेषतः । विद्येशकुम्भाद्बाह्ये[5] तु [6]ह्यष्टमूर्तान्समर्चयेत् ॥ ७७ ॥
मङ्गलान्युपवेद्यां तु [7]स्थाप्याभ्यर्चनमारभेत्[8] ।

[अष्टमङ्गलम्][9]

दर्पणं वृषभो भेरी[10] [11]गजकुम्भौ च स्वस्तिकम् ॥ ७८ ॥

---

[1] C: सहिरण्यान्वा. [2] B: च pour तु.

[3] cf. *Dīptāgama*, *paṭala* 88, 25-30:

अभितः कलशानष्टौ केसरेषु विनिक्षिपेत् । सकूर्चान् सापिधानांश्च सवस्त्रानस्त्रसंयुतान् ॥
गन्धतोयेन संपूर्णान् लोकपालाधिदैवतान् । वेदिकोपरि मध्ये तु शूलं संस्थाप्य पूजयेत् ॥
अस्त्राणि वज्रकादीनि पद्मबाह्ये विनिक्षिपेत् । पूर्वे तु स्थापयेद्वज्रमाग्नेय्यां शक्तिमेव च ॥
दण्डं तु दक्षिणे स्थाप्य खड्गं निर्ऋतिगोचरे । पाशं तु पश्चिमे स्थाप्य वायव्यां चाङ्कुशं न्यसेत् ॥
गदां च सौम्यदिग्भागे शूलमीशानगोचरे । पूजयित्वा यथान्यायं गन्धपुष्पादिभिः क्रमात् ॥
अष्टमङ्गलरूपाणि वेदिबाह्ये तु पूजयेत् ॥

[4] A: हविषान्तं pour हविरन्तं. [5] A: विद्येशकुम्भान् pour विद्येशकुम्भाद् .

[6] A: अष्टमूर्तान् pour ह्यष्टमूर्तीन् . [7] B: स्थाप्याप्यर्चनम् . [8] C: आचरेत् pour आरभेत् .

[9] cf. *Śabdakalpadruma*, vol. I, p. 148:

अष्टमङ्गलम्—

मृगराजो वृषो नागः कलशो व्यजनं तथा । वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम् ॥
(इति बृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतौ)

voir aussi *Śaivāgamapaddhati*, ms. p. 653-654:

दर्पणः पूर्णकुम्भश्च वृषभो युग्मचामरम् । श्रीवत्सं स्वस्तिकं शङ्खो दीपो देवाष्टमङ्गलम् ॥
पताकाशङ्खचक्राणि पूर्णकुम्भश्च पद्मकम् । दण्डो लक्ष्मीः प्रदीपश्च द्विजानामष्टमङ्गलम् ॥
भेरी वृषो गजश्चैव केसरी[च घटो]ऽश्वः । पताका च प्रदीपश्च भूभुजामष्टमङ्गलम् ॥
शतपत्रं पताका श्रीर्भेरी कुम्भश्च दीपकः । नन्द्यावर्तं च धेनुश्च वैश्यानामष्टमङ्गलम् ॥
दर्पणः पूर्णकुम्भश्च पताका चित्रभेरिका । श्रीवत्सं स्वस्तिकं पद्मं शङ्खः शूद्राष्टमङ्गलम् ॥

cf. *Tamil Lexicon*, vol. I, p. 40:

"அட்டமங்கலம் aṭṭa-maṅkalam, n. < aṣṭan+. The eight auspicious objects, viz., கவரி, நிறைகுடம், கண்ணாடி, தோட்டி, முரசு, விளக்கு. பதாகை, இணைக்கயல்; எண்வகை மங்கலப் பொருள்கள் (பிங்கல நிகண்டு)."

On trouve dans différents textes une énumération des huit choses auspicieuses (*aṣṭamaṅgala*). Nous en avons dans ce texte une nouvelle: *vatsadvaya*. Ceci peut vouloir dire "deux veaux" (mâle et femelle), ou alors peut être une faute pour *śrīvatsa* ou *matsyadvaya*. Un *dhvaja* avec deux poissons est un signe auspicieux reconnu par les textes védiques ou *śaiva*. Le mot *iṇaikkayal* cité dans le *Tamil Lexicon* veut dire une bannière ornée de deux poissons. cf. *Tamil Lexicon*, vol. I, p. 290 (Brace of crap in gold or silver; an auspicious object carried before the kings or great personages).

[10] A: भेरीं. [11] A: कजकुम्भं; C: गन्धकुम्भं.

वत्सद्वयं [1]तु संयुक्तं[2] चामरं चाष्टमङ्गलम् । [3]तान्यभ्यर्च्य सुगन्धाद्यैरिन्द्रादीशावसानकम् ॥ ७९ ॥
ततो होमस्तु कर्तव्यश्चाग्निकार्योक्तमार्गतः ।

[होमद्रव्याणि]

[4]समिदाज्यचरूं[5]ल्लाजान्सर्षपांश्च[6] यवांस्तिलान्[7] ॥ ८० ॥
[8]सक्तुं च बिल्वपत्रं च कदलीफलमेव च । [9]कन्दमूलं च इत्येते [10]द्रव्यास्त्वेकादश[11] स्मृताः ॥ ८१ ॥
[12]हृदादीशानपर्यन्तै[13]र्मन्त्रैस्तु जुहुयात्क्रमात् । प्रत्येकं शतमर्धं वा पञ्चविंशतिरेव वा ॥ ८२ ॥
द्रव्यं प्रति विशेषेण व्याहृत्याहुतिमाचरेत् । सर्वद्रव्यसमायुक्तं जुहुयाद्धृदयेन तु ॥ ८३ ॥
अन्ते पूर्णाहुतिं कुर्यात्कवचेन तु मन्त्रतः ।

[बलिविधिः]

होमान्ते तु बलिं कुर्यादुक्तस्थाने[14] विशेषतः ॥ ८४ ॥

---

[1] C: च pour तु.
[2] C: संयुंक्तश्चामरः pour संयुक्तं चामरं.
[3] C: तानर्चने च गन्धाद्यैर् .
[4] cf. *Dīptāgama, paṭala* 88, 33-34:

होमद्रव्यमहं वक्ष्ये शृणु वह्ने विशेषतः । समिदाज्यचरूंल्लाजान् सर्षपांश्च यवांस्तिलान् ॥
वैणवं शालिमाषं च होमयेत्तु विशेषतः ॥

cf. *Kāraṇāgama*, I, 141, 119:

समिदाज्यचरूंल्लाजान् माषशालियवांस्तथा । तिलसर्षपदुग्धानि गुलस्त्वेकादशस्तथा ॥

[5] A: चरुं pour चरून् .
[6] C: सर्षपां च.
[7] A: तिलम् pour तिलान् ; C: तिलाः .
[8] C: सक्तूंश्च.
[9] C: स्कन्दमूलं.
[10] B: द्रव्या एकादश.
[11] C: एकादशा pour एकादश.
[12] cf. *Kāraṇāgama*, I, 141, 120-124:

सद्यादीशानपर्यन्तं मन्त्रैश्चैव क्रमाद्धुनेत् । शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥
अश्वत्थोदुम्बरप्लक्षवटं पूर्वादिदिक्षु वै । शमीखदिरबिल्वार्कं विदिक्षु क्रमशस्तथा ॥
प्रधानस्य पलाशं तु द्रव्यान्ते व्याहृतिं हुनेत् । घृतं मूलेन मन्त्रेण हुनेदष्टशतं सुधीः ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् । पश्चान्मन्त्रेण शिरसा स्रुचा पूर्णाहुतिं हुनेत् ॥
नैवेद्यं दापयेद्धीमान्होमान्ते यागमूर्तिनाम् । सायं प्रातर्बलिं दद्याद्धोमान्ते विधिना पुरा ॥

[13] B: हृदयादीशपर्यन्तैर् .
[14] A: स्थान pour स्थाने.

[1]सर्ववाद्यसमायुक्तं सर्वालंकारसंयुतम् । धूपदीपसमायुक्तं त्रिशूलेन [2]समायुतम् ॥ ८५ ॥
बलिपात्रसमायुक्तमन्नलिङ्गसमन्वितम् । रङ्गे वा शिबिकायां वा रथे वा [3]मर्त्यवाहने ॥ ८६ ॥
लोहजं [4]दारुजं वाथ [5]यन्त्रपीठं सलक्षणम् । [6]गायत्र्यङ्गुलविस्तीर्णमुत्सेधं भानुमात्रकम् ॥ ८७ ॥
[7]त्रिमेखलासमायुक्तमुपर्यम्बुजसंयुतम् । [8]त्रिमेखलोच्चनीचांशं प्रत्येकं तु गुणाङ्गुलम् ॥ ८८ ॥
[9]रथं[10] वा [11]यागशकटं[12] रज्जुना[13] यानमाचरेत् । तत्पीठे प्रतिसन्धिं [14]तु बलिं दद्याद्विचक्षणः ॥ ८९ ॥
वृषादिबलिपीठान्तं सन्धिदेवान्तरं यजेत् । [15]ब्राह्माद्यैशानपर्यन्तमैन्द्राद्यैशान्तमेव[16] च[17] ॥ ९० ॥
[18]यद्दिक् संभवति द्वारं तद्दिग्देवादि वार्चयेत् । [19]प्रथमं ब्रह्मरात्रं स्याद्द्वितीयं भूतरात्रकम् ॥ ९१ ॥

---

[1] cf. *Dīptāgama, paṭala* 89, 1-13:

अतः परं प्रवक्ष्यामि उत्सवस्य बलिक्रमम् । सायं प्रातर्बलिं दद्याद् ब्रह्मादीशानमन्त्रतः ॥
ग्रामे ब्राह्मादिके स्थाने पीठं कृत्वा विशोषतः । हस्तमात्रप्रविस्तारमुत्सेधः स्यात्तदर्धकः ॥
मेखलात्रयसंयुक्तमेकैकं चतुरङ्गुलम् । अथवा यन्त्रपीठं वा सारदारुमयं तथा ॥
आलेपनं तु कर्तव्यं पञ्चचूर्णैरलंकृतम् । द्रोणद्वयं च द्रोणं वा तदर्धं तण्डुलं भवेत् ॥
बलिपात्रं समादाय प्रक्षाल्यास्त्रेण मन्त्रवित् । अन्नलिङ्गं समादाय शालितण्डुलजं शुभम् ॥
द्वादशाङ्गुलमुत्सेधं नाहं तद्द्विगुणं भवेत् । अग्रद्वयं शूलतारमानुपूर्व्याक्षयं भवेत् ॥
सूत्रेण वेष्टयित्वा तु दध्ना चालिप्य सर्वतः । त्रिनेत्रं चतुर्भुजं चैव जटामकुटधारिणम् ॥
वरदाभयहस्तं च वामे चैवाक्षमालधृत् । दक्षिणे शूलधृच्चैव रौद्रदृष्टिसमन्वितम् ॥
नानाभरणसंयुक्तमूर्ध्वकेशमथापि वा । एतत्पाशुपतं दैवं लिङ्गमध्ये तु पूजयेत् ॥
दशायुधसमायुक्तं त्रिशूलेन समन्वितम् । बलियात्रां प्रकुर्वीताचार्यः शिष्येण संयुतः ॥
सर्वाभरणसंयुक्तो भस्मोद्धूलितविग्रहः । सोष्णीषः सोत्तरीयश्च परिचारकसंयुतः ॥
प्रदक्षिणं ततः कृत्वा सर्वालंकारसंयुतम् । वितानध्वजपताकैश्च मयूरध्वजसंयुतम् ॥
धूपदीपसमायुक्तं वृषध्वजसमन्वितम् । तालकाहलझल्लर्यो मर्दला जयघण्टिकाः ॥
ब्रह्मघोषसमायुक्तं बलिं दद्याद्विशोषतः ॥

[2] B: समन्वितम्.
[3] A: मूर्तिवाहने ; B: मत्तवाहने.
[4] C: दारुकं.
[5] A: यन्त्रपीठ सलक्षणम् .
[6] C: गायत्र्याङ्गुलव्यासमुत्सेधं.
[7] C: त्रिमेखलं pour त्रिमेखला.
[8] A: त्रिमेखलोच्चनीवेशं ; C: त्रिमेखलार्चनीवेश.
[9] C omet le vers 89.
[10] B: रथे pour रथं.
[11] A et B: त्याग pour याग.
[12] B: चकादं pour शकटं.
[13] B omet ना dans रज्जुना.
[14] B: सन्धित्वे pour सन्धिं तु.
[15] B: ब्राह्मादैशान pour ब्राह्माद्यैशान.
[16] A: ऐशानमेव pour ऐशान्तमेव.
[17] C: वा pour च.
[18] A: यदि संभवति द्वारौ तत्तद्देवादि वार्चयेत् ; C: यद्दिक्संभवते द्वारौ तद्दिक् देवादिनार्चयेत् .
[19] cf. *Suprabhedāgama*, I, 14, 82-86:

प्रथमं विश्वरात्रं तु द्वितीयं भूतरात्रकम् । तृतीयमृषिरात्रं स्याच्चतुर्थं चेन्द्ररात्रकम् ॥
पञ्चमं ब्रह्मरात्रं तु षष्ठं वै विष्णुरात्रकम् । सप्तमं रुद्ररात्रं स्यादष्टमं चैश्वरस्य तु ॥
सदाशिवस्य नवमं नवाहेष्वधिदेवताः । ऋषिरात्रं समारभ्य सदाशिवदिनान्तकम् ॥

[1]गाणेश्वरं तृतीयं स्याद्गान्धर्वं[2] [3]स्याच्चतुर्थकम् । [4]पञ्चमम् ऋषिरात्रं स्यात् षष्ठं स्यादिन्द्ररात्रकम् ॥ ९२ ॥
सप्तमं दानवं [5]रात्रमष्टमं राक्षसेश्वरम् । [6]नवमं चैश्वरं रात्रमित्येता[7] दिनदेवताः ॥ ९३ ॥
[8]ब्रह्मादीशानपर्यन्तं स्थानेष्वेतेषु [9]पूजिताः । [10]तासामुक्तदिने [11]रात्रावहन्यपि [12]समर्चिताः ॥ ९४ ॥
तद्दिनान्ते यथेष्टं तु [13]देशं गच्छन्त्यसंशयः । [14]कुशाम्बुजं पलाशं च प्रथमेऽहनि दापयेत् ॥ ९५ ॥

सप्ताहे तु प्रयोक्तव्यं ब्राह्मयात्सदाशिवान्तकम् । पञ्चाहे तु प्रयोक्तव्यं रुद्रात्सदाशिवान्तकम् ॥
त्रयहे त्विति चैकाहे सदाशिवपदान्तिकम् [दिनान्तकम्] ॥

cf. *Kāraṇāgama*, I, 141, 136-140:

प्रथमं विघ्नराजं स्यात्पैशाचं स्याद्द्वितीयकम् । तृतीयं ब्रह्मरात्रिः स्याद्गन्धर्वाणां चतुर्थकम् ॥
पञ्चमं भूतरात्रिः स्यात् षष्ठं तु गुहरात्रकम् । सप्तममृषिरात्रं स्यादष्टमं नागरात्रकम् ॥
नवमं चन्द्ररात्रं स्याद्दशमं विष्णुरात्रकम् । राक्षसं रुद्ररात्रं तु द्वादशं शिवरात्रकम् ॥
दिनाधिदेवतास्त्वेवं पैतृकस्योत्सवस्य तु । गन्धर्वदिवसादिः स्यात्सौख्यस्यैवं विधीयते ॥
श्रीकरं गुहरात्रादि नागरात्रादि पार्थिवम् । सात्त्विकं विष्णुरात्रादि शिवमेकं शिवं स्मृतम् ॥

[1] C: गणेश्वरं.
[2] C: गन्धर्वं pour गान्धर्वं.
[3] C: च pour स्यात्.
[4] B: ऋषिरात्रं पञ्चमं स्यात्.
[5] B: रात्रदष्टमं.
[6] B: ईशरात्रं तु नवमम् pour नवमं चैश्वरं रात्रम्.
[7] B et C: इत्यते pour इत्येता.
[8] A: ब्रह्माद्यैशान pour ब्रह्मादीशान ; B: ब्राह्मादीशान.
[9] B et C: पूजितः.
[10] A: तासां मुक्तिर्दिने ; B: तासां मुक्तिदिने.
[11] A: रात्रावहन्यमपि सर्पितः.
[12] C: समर्पिताः.
[13] A: देशांगश्चन्यसंशयम् ; B et C: देशं गच्छत्यसंशयः.
[14] cf. *Kāraṇāgama*, I, 141, 144-155:

मुद्गान्नं लड्डुकं सर्पिः कदलीगुलसंयुतम् । प्रथमेऽहनि दातव्यं विघ्नमन्त्रमनुस्मरन् ॥
रक्तान्नं मांससंयुक्तं कृसरापूपसंयुतम् । सघृतं मत्स्यसंयुक्तं जपाकुसुमसंयुतम् ॥
द्वितीयेऽहनि दातव्यं पैशाचं मन्त्रमुच्चरन् । पायसान्नं च सघृतं पद्मपुष्पसमायुतम् ॥
तृतीयेऽहनि दातव्यं ब्रह्ममन्त्रमनुस्मरन् । कृसरान्नं च सक्तुञ्च सघृतं लड्डुकैर्युतम् ॥
चतुर्थेऽहनि दातव्यं गान्धर्वं मन्त्रमुच्चरन् । इन्द्रवल्लीं हरिद्रान्नं सघृतं लाजसंयुतम् ॥
पञ्चमेऽहनि दातव्यं स्कन्दमन्त्रमनुस्मरन् । कुशाग्रे घृतसंयुक्ते शुद्धान्नं दधिसंयुतम् ॥
सप्तमेऽहनि दातव्यमृषीणां मन्त्रमुच्चरन् । क्षीरान्नं शालिपिष्टं च इक्षुखण्डसमायुतम् ॥
अष्टमेऽहनि दातव्यं नागमन्त्रमनुस्मरन् । दध्यन्नं च गुलोपेतं मातुलुङ्गफलैर्युतम् ॥
नवमेऽहनि दातव्यमैन्द्रमन्त्रमनुस्मरन् । गुलोदनं घृतोपेतं कदलीफलसंयुतम् ॥
दशमेऽहनि दातव्यं विष्णुमन्त्रमनुस्मरन् । रक्तान्नं मांससंयुक्तं सापूपं तिलचूर्णयुक् ॥
एकादशाहे दातव्यं राक्षसं मन्त्रमुच्चरन् । शाल्यन्नं दधिसंयुक्तं गुलखण्डफलैर्युतम् ॥
द्वादशाहे तु दातव्यं शैवं मन्त्रमनुस्मरन् । कपित्थफलमात्रेण बलिरेवं प्रकीर्तितम् ॥

cf. *Suprabhedāgama*, I, 14, 89-99:

शुद्धान्नं दधिसंमिश्रं लड्डुकापूपसंयुतम् । फलं च गुडसंमिश्रं गणेशस्य प्रियं त्विदम् ॥
बलयो रजनीचूर्णं घृतान्नं दधिसक्तुकम् । भूतक्रूरबलिः प्रोक्तस्तेन भूतबलिं हरेत् ॥
पञ्चमूलं कुशाग्रं च शाल्यन्नं चाज्यमिश्रकम् । कदलीफलसंयुक्तमृषीणां बलिरुच्यते ॥

मुद्गं [1]कुलत्थमाज्यं च द्वितीयेऽहनि दापयेत् । सक्तुप्रियङ्गुमाषान्नं [2]गणेश्वरगणप्रियम् ॥ ९६ ॥
[3]आम्रपल्लवदध्यन्नं [4]गन्धर्वाख्यगणप्रियम् । यवान्नं गुडसंयुक्तमृषीणां [5]तु प्रियं भवेत् ॥ ९७ ॥
इन्द्रवल्लीं च बृहतीमिन्द्रस्य [6]दिवसे विदुः । [7]रजनीं नालिकेरं च दानवानां प्रकल्पयेत् ॥ ९८ ॥
मधु मांसान्नसंयुक्तं राक्षसानां तु दापयेत् । अपूपं चैव शुद्धान्नमीश्वरस्य [8]गणप्रियम् ॥ ९९ ॥
प्रणवादि चतुर्थ्यन्तं[9] स्वनामपदमध्यमम्[10] । स्वाहान्तं बलिनिर्देशं सर्वेभ्य इति दापयेत्[11] ॥ १०० ॥
[12]एषामलाभे मुद्गान्नं शुद्धान्नं [13]वाथ दापयेत् ॥

[यात्रा][14]

उत्सवस्य [15]दिनान्ते तु [16]प्रतिमां शक्तिसंयुताम् ॥ १०१ ॥
बध्वा प्रतिसरं चोक्तमार्गेणैव तु देशिकः । सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् ॥ १०२ ॥
छत्रपिञ्छ[17]ध्वजाद्यैश्च [18]नृत्तगेयैः समन्वितम् । देवेश्वरं च देवीं च वस्त्रैराभरणैस्तथा[19] ॥ १०३ ॥
[20]नानामाल्यैः प्रभाभिश्च गन्धैरालेपनैरपि । कञ्चुकोष्णीषकाद्यैर्वाप्यलंकृत्य विशेषतः ॥ १०४ ॥

इन्द्रवल्लीं हरिद्रां च प्रियङ्गुघृतसंयुतम् । चतुर्थेऽहनि दातव्यमिन्द्रस्य बलिरुच्यते ॥
पद्मपुष्पं सरजनीपायसं लाजसंयुतम् । पञ्चमेऽहनि दातव्यं ब्रह्मणो बलिरुच्यते ॥
गुलोदनं घृतोपेतं बृहतीफलसंयुतम् । षष्ठेऽहनि च दातव्यं विष्णुप्रीतिकरं परम् ॥
साज्यं तु कृसरान्नं वै नालिकेरफलैर्युतम् । सप्तमेऽहनि दातव्यं रुद्रप्रीतिकरं भवेत् ॥
वेणुकं दधिसंयुक्तं कदलीफलसंयुतम् । अष्टमेऽहनि दातव्यमीश्वरस्य बलिस्तथा ॥
शुद्धान्नं दधिसंयुक्तं लाजापूपसमायुतम् । कदलीपनसोपेतं गुलखण्डसमिश्रितम् ॥
नवमेऽहनि दातव्यं सादाख्यस्य शिवस्य तु । सर्वेषामपि शुद्धान्नमाज्ययुक्तं दधिप्लुतम् ॥
दापयेद्वा विशेषेण तत्तन्मन्त्रेण देशिकः ॥

[1] B et C: कूलत्थ pour कुलत्थ.
[2] B et C: गणेशस्य pour गणेश्वर.
[3] C: आर्द्र pour आम्र.
[4] A: गन्धर्वाख्ये प्रदापयेत्.
[5] B: च pour तु.
[6] B: दिवसेशितुः.
[7] C: रजनी.
[8] B: प्रियं भवेत् pour गणप्रियम्.
[9] A: चतुर्थान्तं pour चतुर्थ्यन्तं.
[10] C: मध्यगम् pour मध्यमम्.
[11] cf. *Dīptāgama, paṭala* 89, vers 39:

प्रणवादिचतुर्थ्यन्तं स्वनामपदपूर्वकम् । स्वाहान्तं बलिनिर्देशं सर्वेभ्य इति योजयेत् ॥

cf. *Kāraṇāgama*, I, 141, 158:

प्रणवादिचतुर्थ्यन्तं स्वनामपदमध्यमम् । स्वाहान्ते बलिनिर्देशं सर्वेभ्य इति योजयेत् ॥

[12] A: अलाभैषां तु pour एषामलाभे; C: अलाभे चैषा.
[13] B et C: वापि pour वाथ.
[14] cf. *Kāraṇāgama*, I, 141, 163-192 et *Dīptāgama, paṭala*, 90 pour यात्राविधि.
[15] A: दिनेऽन्ते.
[16] C: प्रतिमं शक्तिसंयुतम्.
[17] A: द्विजाद्यैश्च pour ध्वजाद्यैश्च.
[18] A: नृत्तगेय pour नृत्तगेयैः.
[19] C: सह pour तथा.
[20] C: नानामाल्यप्रभैश्चैव ; A: नानामाल्यैः प्रभैश्चैव.

रथे वा शिबिकायां वा सम्यग्यानं समाचरेत् । शनैः प्रदक्षिणं कृत्वा प्रविश्यास्थानमण्डपम्[1] ॥ १०५ ॥
[2]परिवेषक्रमेणैव परिवेषं समाचरेत् । एवं प्रतिदिनं कुर्यादहर्निशि[3] विशेषतः ॥ १०६ ॥
तृतीयदिवसात्प्रात[4]र्भवानीसहितेश्वरम् । [5]याने प्रदक्षिणं कुर्याच्छीघ्रं शिवालयं विशेत् ॥ १०७ ॥

[वनयात्रा]

[6]तीर्थर्क्षात्पूर्वदिवसं [7]वनयात्रार्हकं भवेत् । तद्दिनात्पूर्वदिवसे [8]तीर्थर्क्षे [9]वापरे दिने ॥ १०८ ॥
[10]गन्धमभ्यसनालिप्य तत्परे वा विशेषतः । नृत्तमूर्ति[11] समभ्यर्च्य यानं प्रागुक्तमार्गतः ॥ १०९ ॥
परिवेषः प्रकर्तव्यः [12]सर्वलोकाभिवृद्धये । [13]अथ स्वर्क्षदिने वा तु युग्मायुग्मदिने तु वा ॥ ११० ॥
[14]पुनर्यानं च कर्तव्यं [15]ततः स्थाननिवेशनम् ।

[मृगयात्रा][16]

नृत्तोत्सवस्य काले तु मृगयां[17] वा समाचरेत् ॥ १११ ॥

---

[1] C: मण्टपम् pour मण्डपम् .

[2] cf. *Dīptāgama, paṭala* 91, vers 1-6 pour **परिवेषक्रम**—

अतः परं प्रवक्ष्यामि परिवेषक्रमं क्रमात् । प्रपामध्ये स्थितो देवदेवः सिंहासनोपरि ॥
देवस्य दक्षिणे भागे देशिकः सुखमास्थितः । देवस्योत्तरभागे तु नृपतिः सुखमास्थितः ॥
तयोः पृष्ठप्रदेशे तु परितश्चानुगाः स्थिताः । मृदङ्गादिमहाशब्दाः पूर्वायां दिशि संस्थिताः ॥
नर्तको मर्दलश्चैव दक्षिणे तु व्यवस्थिताः । गायका वंशकाश्चैव उत्तरे तु व्यवस्थिताः ॥
उभयोः पार्श्वयोश्चैव रुद्रस्य गणिकाः स्थिताः । तद्वाह्ये दक्षिणे . . . दण्डमात्रे समाश्रिताः ॥
उत्तरे दण्डमात्रे तु कापालव्रतधारकाः । देवस्याग्रे विशेषेण नृत्तं कुर्यात्सगेयकम् ॥

[3] C: अहर्निशं pour अहर्निशि.
[4] C: प्रातो pour प्रातर् .
[5] A: यानं तु भवाति कुर्यात् ; C: ध्यानं तु भवानीं कुर्यात् .
[6] B: तीर्थऋक्षात् pour तीर्थर्क्षात् .
[7] C: नवधात्रार्हकं.
[8] B: तीर्थर्क्षात् .
[9] A: चापरे.
[10] A: गन्धमाह्यिमालिप्य; C: गन्धमभ्यासनालिप्य.
[11] C: मूर्तं pour मूर्तिं.
[12] C: सर्वलोकादिवृद्धये.
[13] A: अथ श्वक्षादिना या तु ; C: अथ शुक्षादिना लिप्य.
[14] B: पुनर्याने.
[15] B et C: ततः स्वस्थानवेशनम् .

[16] cf. *Kāraṇāgama*, I, 141, 193-197:

तीर्थाहात्पूर्वदिवसे मृगयात्रां समारभेत् । किरातार्जुनरूपं वा त्रिपुरान्तकमेव वा ॥
किरातरूपवत्सर्वान् विशेषादेव धारयेत् । केचिद्वायुसमारूढाः केचिद्वायुधवाहनाः ॥
केचित्खड्गधराश्चैव केचिच्चापधरास्तथा । केचित्कुन्दधराश्चैव केचित्पाशधरास्तथा ॥
महाजनसमायुक्ताः केचिद्युद्धोन्मुखा नराः । गजं चैव मृगं चैव वराहं वा कपिं पुनः ॥
मयूरकुक्कुटादींनि पक्षिणो विविधान् ग्रहेत् ॥

[17] B: मृगवा pour मृगयां.

[1]काले वा [2]मृगयायास्तु तथा [3]नित्योत्सवं भवेत्। [4]व्यत्यासेनाशया चैतौ कल्पयेत्कल्पवित्तमः ॥ ११२ ॥
सुखासनादिबिम्बं[5] वा[6] [7]विशेषात्त्रिपुरान्तकम्। प्रतिसरं बन्धयित्वा[8] पूर्वोक्तविधिनैव[9] तु ॥ ११३ ॥
तथैव [10]च द्विगुणकामर्चां [11]कृत्वा विशेषतः। सर्वालंकारसंयुक्तं[12] दशायुधसमन्वितम् ॥ ११४ ॥
[13]गजाश्वादिसमारूढं [14]घोररूपं महारवैः। [15]यथेष्टकाष्टभागं वा [16]विशेषाख्यमभागकम् ॥ ११५ ॥
कारयेच्छीघ्रयानं च[17] नानाभक्तजनैस्सह। मृगादीनां [18]वधार्थाय घोररूपं भयावहम् ॥ ११६ ॥
तस्मिन्वै मृगयाने तु मृगा वा [19]यदि [20]वा नराः। हताश्चेत्प्राणिनः सर्वे शिवसायुज्यमाप्नुयुः ॥ ११७ ॥
ततः शमनहोमं च स्नपनादीनि कारयेत्। पूर्ववत्स्थापयेद्धीमान् स पुण्यां गतिमाप्नुयात् ॥ ११८ ॥

[तीर्थोत्सवः][21]

तीर्थर्क्षात्पूर्वरात्रे[22] तु [23]प्रतिमां च त्रिशूलकम्।

---

[1] C: कालेषु pour काले वा.
[2] C: मृगयायां तु.
[3] A: नित्योत्सवं.
[4] B: व्या pour व्य.
[5] C: बिम्बा pour बिम्बं.
[6] C omet वा.
[7] A: विशेषादि पुरान्तकम् .
[8] A ajoute वा après बन्धयित्वा.
[9] A: विधिनेव pour विधिनैव ; C: विधिरेव.
[10] A: ल pour च.
[11] A: कृत्य pour कृत्वा.
[12] C: °संयुक्तदशा°.
[13] C: गजाश्वाधिसमारूढं.
[14] B: घोररूपमहारवैः.
[15] C: यथेष्टकाष्टाभागं.
[16] C: विशेषाख्यं महागकम् .
[17] B: तं pour च.
[18] A: भयार्थे तु.
[19] A: यति pour यदि.
[20] A: वानरम् ; C: नेन्तराः pour वानराः .
[21] cf. *Kāraṇāgama*, I, 141, 197-210:

दिवाकाले प्रकर्तव्यं निशि कौतुकबन्धनम्। सौवर्णमुत्तमं सूत्रं तारेण मध्यमं भवेत् ॥
कार्पासं तु कनिष्ठं तु रक्षासूत्रं विधीयते। तण्डुलैः स्थालिकां पूर्य विन्यसेत्कौतुकं हृदा ॥
गन्धपुष्पादिभिश्चैव पूजयेत्तान् स्मृतान्सुधीः। शूलं च प्रतिमां चैव अस्त्राणि यागमूर्तिनाम् ॥
कौतुकं बन्धयेद्धीमान् हृदयेन विशेषतः। स्वस्तिसूक्तसमायुक्तं पुण्याहं वाचयेत्ततः ॥
भस्म दत्त्वा हृदा तेषां कुर्यात्तीर्थाधिवासनम्। मण्डपस्य तु मध्ये तु स्थण्डिलं शालिभिः कुरु ॥
ससूत्रान्सापिधानांश्च सकूर्चान् वस्त्रवेष्टितान्। सोदक्यान्पल्लवोपेतान् कलशान् वसुसंख्यकान् ॥
स्थण्डिलोपरि विन्यस्य पूजयेदधिदैवतान्। मध्ये मनोन्मनीं पूज्य ऐन्द्राशाद्युत्तरान्तकम् ॥
गङ्गादिसप्ततीर्थानि ऐशे दुर्गां च विन्यसेत्। सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् ॥
साधनैः कलशैर्युक्तं शूलेनैव समायुतम्। ग्रामप्रदक्षिणं कृत्वा तीर्थस्नानं समालिखेत् [समाचरेत्] ॥
अम्भोधौ वा तटाके वा नद्यां वा वापिके तथा। तीरे समतलं कृत्वा प्रपां कृत्वातिसुन्दराम् ॥
तन्मध्ये स्थण्डिलं कृत्वा कलशान् स्थाप्य पूर्ववत्। तस्यैव पश्चिमे भागे शूलं तु स्थण्डिलोपरि ॥
संस्थाप्य कलशांश्चैव गन्धपुष्पादिभिर्यजेत्। बीजानि सर्वतीर्थानामर्णवाद्यप्सु विन्यसेत् ॥
आहूय सर्वदेवांश्च शूलं वै स्थापयेत्ततः। प्रविशेदालयं पश्चाद्देवतीर्थाधिवासनम् ।

Voir aussi *Dīptāgama, paṭala* 93 (कौतुकबन्धनम्), *paṭala* 94 (तीर्थाधिवासनम्) et *paṭala* 96 (तीर्थविधिः).

[22] B et C: पूर्वरात्रौ pour पूर्वरात्रे.
[23] A: प्रतिमं च त्रिशूलकम् ; C: प्रतिमां चेतिशूलकम् .

[1]प्रतिसरं बन्धयित्वा तीर्थसंग्रहमाचरेत् ॥ ११९ ॥
तटाकतीरे नद्यां वा सागरे वा विशेषतः । स्थलं समतलं कृत्वा गोमयेनानुलेपयेत् ॥ १२० ॥
स्थण्डिलद्वितयं कृत्वा [2]दर्भैः पुष्पैः परिस्तरेत् । त्रिशूलं पश्चिमे स्थाप्य तस्याग्रे कलशान्नव[3] ॥ १२१ ॥
[4]ससूत्रान्कूर्चसंयुक्तान्सवस्त्रान् [5]वारिपूरितान् । [6]नवतीर्थाधिदैवत्यं[7] मध्यादिक्रमशो[8] न्यसेत् ॥ १२२ ॥
अभ्यर्च्य गन्धपुष्पाद्यैश्शूलं[9] तैरभिषेचयेत् । तत्र [10]शूलसमायुक्तं [11]जलावगाहनं कुरु ॥ १२३ ॥

[चूर्णोत्सवः][12]

प्रासादं प्रविशेत्पश्चाद्दिवा यानावसानके । चूर्णोत्सवं प्रकुर्वीत ह्यनेन विधिना बुधः ॥ १२४ ॥
[13]मार्जनप्रोक्षणालेपमास्थानमण्डपे कुरु । पञ्चचूर्णैरलंकृत्य स्थण्डिलत्रितयं कुरु ॥ १२५ ॥
[14]त्रिशूलं [15]पश्चिमे स्थाप्य [16]दलिकां तस्य पूर्वतः । [17]लूखलं पुरतः स्थाप्य मुसलं तस्य पार्श्वके ॥ १२६ ॥

---

[1] B: बध्वा प्रतिसरं धीमान् pour प्रतिसरं बन्धयित्वा.
[2] A: दर्भान् पुष्पान परिस्तरेत् ; C: दर्भात् पुष्पात् परिस्तरेत् .
[3] B et C: नवान् pour नव.
[4] A: ससूत्र pour ससूत्रान् .
[5] B: परि pour वारि.
[6] A: नवतीर्थानि दैवत्यं ; C: नवतीर्थादिदैवत्यान् .
[7] B: दैवत्य pour दैवत्यं.
[8] B: क्रमतो pour क्रमशो.
[9] B et C: शूलस्थैर् pour शूलं तैर् .
[10] A: शूला pour शूल.
[11] B: जलावागाहनं.
[12] cf. *Suprabhedāgama*, I, 14, 142-154:

होमबल्युत्सवान् प्रातः कृत्वा चूर्णोत्सवं ततः । प्रासादस्याग्रतो वापि याम्ये वा पावकेऽथवा ॥
गोमयालेपनं कृत्वा धूपदीपैस्समन्वितम् । पालिकाद्यैरलंकृत्य स्थण्डिलं तत्र कारयेत् ॥
शूलं पश्चिमतः स्थाप्योलूखलं मुसलं ततः । वस्त्रेणोलूखलं वेष्टय दर्भैरावेष्टयेत्पुनः ॥
गन्धाद्यैरर्चयित्वा तु त्रिशूलं लूखलं ततः । घृतं शिरोऽर्पणं कृत्वा हेमदूर्वाङ्कुराक्षतैः ॥
सुशुष्कां रजनीं पूर्वं चूर्णं चूर्णं तु लूखले । हृदा प्रक्षिप्य चास्त्रेण कुट्टयेद्देशिकस्त्रिभिः ॥
ततो भक्तजनैस्सार्धं चूर्णयेद्देशिकोत्तमः । संस्नाप्य लिङ्गं चूर्णेन पञ्चब्रह्म समुच्चरन् ॥
स्नापयेत्कौतुकं शूलं हृन्मन्त्रेण सतैलकम् । आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
ग्रामं वा नगरं वापि शीघ्रं गच्छेत्प्रदक्षिणम् । नदीतटाकतीरे वा स्थण्डिलद्वितये कृते ॥
शूलं तत्रैव संस्थाप्य तत्पूर्वे कलशान्न्यसेत् । अर्चयेत्स्वस्वमन्त्रेण शूलं वै कलशांस्तथा ॥
गङ्गा च यमुना चैव नर्मदा च सरस्वती । सिन्धुर्गोदावरी चैव कावेरी चैव सप्तकान् ॥
आवाह्य मध्यकलशे गन्धतोयसुपूरिते । अनन्तादिशिखण्ड्यन्तान्कलशेष्वभितो न्यसेत् ॥
पुण्याहं वाच्य शूलास्त्रदेवानभ्यर्च्य पूजयेत् । स्नापयेत्कलशैः पश्चात्स्नानं तीर्थे समाचरेत् ॥
त्रिशूलेन सहैवात्र ये तीर्थं कुर्वते नराः । मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नगाः ॥

[13] A: मार्जनं प्रोक्षणं लेपनास्थानं मण्डपं कुरु ; B: मार्जनं प्रोक्षणालेपनास्थाने मण्डपं कुरु ; C: मार्जन-प्रोक्षणालेपमास्थानमण्टपं कुरु.
[14] B: त्रिशूले.
[15] A: पञ्चमे.
[16] C: दधिकां.
[17] C: उलूखलं pour लूखलं. La première lettre du mot *ulūkhala* a été omise ici pour une raison mètrique. Selon une *kārikā* (वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।) de l'école de

नृत्तगेयेन[1] संयुक्तं [2]पूजयेच्छूलल्लूखले[3]। लूखले पूरयेद्रात्रिं हृदयेन समर्चयेत्॥ १२७॥
[4]कुट्टयेन्मुसलेनैव ह्यस्त्रमन्त्रमुदाहरन्। नानाभक्तजनास्सर्वे [5]चूर्णयेयुस्तु चूर्णकम्॥ १२८॥
मुसलं [6]स विसृज्याथ हृदा चूर्णं [7]समुद्धरेत्। [8]मुष्टया तु दलिकायां तु मध्ये [9]वामे दिशाष्टसु॥ १२९॥
[10]न्यस्य [11]दूर्वाङ्कुरं न्यस्य [12]ताम्बूलं भस्मसंयुतम्। संगृह्य मूललिङ्गं [13]च [14]सोमेश्वरं समर्चयेत्॥१३०॥
[15]दूर्वाङ्कुराभ्यां तैलं तु हृदा शिरसि योजयेत्। [16]चूर्णं सद्येनाभिषिच्य तथैवोत्सवबिम्बकम्॥ १३१॥
शूलं [17]चैव तथाभ्यर्च्य भक्तानां तु प्रदापयेत्। ततश्चूर्णोत्सवे शूलं शीघ्रं ग्रामप्रदक्षिणम्॥ १३२॥
कृत्वा जलाशयं शूलमुत्सवप्रतिमान्वितम्। [18]गत्वा च[19] प्राङ्मुखं स्थाप्य स्थण्डिले शालिभिः कृते[20]॥
देवस्य चाग्रतः शूलं तदग्रे कलशान्नव[21]। [22]तीर्थं संगृह्य संस्थाप्य समभ्यर्च्य यथाविधि॥ १३४॥
सर्वदेवान् समावाह्य कलशैः [23]स्नाप्य शूलकम्। [24]समभ्यर्च्य तमुद्धृत्य स्नानमात्रजले विशेत्॥ १३५॥
अवगाह्य समभ्यर्च्य प्रासादं प्रविशेत्ततः। यागमण्डपमाविश्य[25] ब्रह्माङ्गैर्जुहुयात्क्रमात्[26]॥ १३६॥
[27]स्विष्टमग्नेति मन्त्रेण पूर्णाहुतिं[28] समाचरेत्। [29]वेद्यास्तु कुम्भानुद्धृत्य हर्म्यं कृत्वा प्रदक्षिणम्॥ १३७॥
गर्भगेहं प्रविश्याथ [30]स्नापयेल्लिङ्गमूर्धनि। अर्चनोक्तं समभ्यर्च्य महाहविर्निवेदयेत्॥ १३८॥

Pāṇini, la première lettre des *upasarga*: *api* et *ava* pouvait tomber lorsque cela était nécessaire, mais il n'en est pas question pour les autres mots. L'omission de la première lettre, ou d'une lettre du milieu ou de la fin existe en tamoul: c'est ce qu'on appelle *mutaRkkuRai, iṭaikkuRai* et *kaṭaikkuRai,* (cf. *Nannūl* çūttiram, 156, commentaire d'ĀRumuka-Nāvalar) et la littérature des *āgama* pourrait avoir suivi cette règle en cas de nécessité.

[1] C: नृत्तगेयादि pour नृत्तगेयेन.
[2] B: पूजयेत उल्लूखलम्.
[3] C: लूखलै: pour लूखले.
[4] A: कुट्टयेत्स्व . . नैव pour कुट्टयेन्मुसलेनैव.
[5] C: चूर्णस्वदिति pour चूर्णयेयुस्तु.
[6] A: संविसृज्याथ pour स विसृज्याथ.
[7] B: समाचरेत्.
[8] A: अष्टानु pour मुष्टया तु.
[9] B: याम्ये pour यामे; A: यामे.
[10] A: न्यस्त्वा pour न्यस्य.
[11] A: पूर्वां कुरुन्यस्त्वा pour दूर्वाङ्कुरं न्यत्स्य ; C: दूर्वाङ्कुरं चैव.
[12] C: न्यस्त्वा ताम्बूलचर्वणम् pour ताम्बूलं भस्मसंयुतम्.
[13] B: तु pour च.
[14] B: सोमेशं तु pour सोमेश्वरं ; C: सोमेश्वरं च.
[15] A: पूर्वांकुराभ्य pour दूर्वाङ्कुराभ्यां.
[16] A: सद्यश्चूर्णमभीषिच्य ; C: सद्येन पूर्णाभिषिच्यं.
[17] B: तं च pour चैव.
[18] B: गत्वा प्राङ्मुखत: स्थाप्य.
[19] C omet च.
[20] C: कुरु pour कृते.
[21] B et C: नवान् pour नव.
[22] A: तीर्थसंग्रहसंस्थाप्य ; C: तीर्थसंग्रहे संस्थाप्य.
[23] A: स्थाप्य.
[24] A: समभ्यर्च्य समुद्धृत्य हर्म्यं कृत्वा प्रदक्षिणम्। गर्भगेहं प्रविश्याथ स्नानमात्रे जले विशेत्॥ pour समभ्यर्च्य तमुद्धृत्य स्नानमात्रजले विशेत्.
[25] A: आवेश्य pour आविश्य.
[26] B: तत: pour क्रमात्.
[27] cf. *Taittirīyabrāhmaṇa,* 2, 4, 1, 4.
[28] B: पूर्णाहुति pour पूर्णाहुतिं.
[29] A: वेद्यां तु ; B: वेद्यास्तु.
[30] A, B et C: स्थापयेल्लिङ्गमूर्धनि pour स्नापयेल्लिङ्गमूर्धनि.

[1]तीर्थं [2]त्वर्क्षे पर्वयुते समुद्रे तीर्थमाचरेत् । [3]अन्यर्क्षे वाथ पर्वे वा तीर्थं नद्यादिके कुरु ॥ १३९ ॥
[4]वैवाह्यस्त्वपरे त्वर्क्षे मोहिन्या [5]सह गच्छति । जलतीरे [6]सहासीनं स्थण्डिले शालिभिः कृते ॥ १४० ॥
नववस्त्रं तु [7]संवेष्ट्य [8]गन्धादिभिः समर्चयेत् । तदग्रे स्थण्डिलं कृत्वा नव कुम्भांश्च वर्धनीम् ॥ १४१ ॥
संस्थाप्य मध्यकुम्भे तु [9]वैवाह्यमूर्तिनं यजेत् । मोहिनीं चैव वर्धन्यां लोकेशान्परितो यजेत् ॥ १४२ ॥
[10]तत्कुम्भस्थोदकैर्धीमान्स्नाप्येशं[11] मोहिनीं[12] सह । जलाशये[13]ऽवगाह्याथ [14]ह्यर्चनोक्तं [15]समर्चयेत् ॥
मोहिनीं स्वगृहे गत्वा [16]वैवाह्यं स्वगृहेऽन्तिके । [17]पाषाणैस्तरणं कृत्वा पश्चादालयमाविशेत् ॥ १४४ ॥
शान्तिहोमं ततः कृत्वा स्नपनं कारयेत्ततः । घृताभिषेचनं कृत्वा [18]महास्नपनमाचरेत् ॥ १४५ ॥
अर्चनोक्तं समभ्यर्च्य [19]प्रभूतं च हविर्ददेत् । [20]चण्डयागं तु सप्ताहं [21]कृत्वा वा त्र्यहमौनकम् ॥ १४६ ॥
[22]शुद्धस्नानं ततः [23]कुर्यात्सर्वं तीर्थवदाचरेत् । [24]उत्सवप्रतिमाः सर्वाः [25]स्नपनं कारयेत्क्रमात् ॥ १४७ ॥
[26]हविरन्तं समभ्यर्च्य शेषं प्राग्वत्समाचरेत् ॥ १४८ ॥

इति [27]श्रीमद्रौरवतन्त्रे [28]क्रियापादे [29]महोत्सवविधिर्नाम [30]अष्टादशः पटलः

---

[1] B: तीर्थपूर्वयुते ऋक्षे pour तीर्थं त्वर्क्षे पर्वयुते.
[2] A: रिक्षे pour त्वर्क्षे ; B et C: ऋक्षे.
[3] A: अन्ये ऋक्षेऽथ सर्वे वा ; B: अन्यऋक्षेऽथ सर्वे वा.
[4] A: वैशाखे स्वपरे ऋक्षे ; C: वैशाखस्वपने ऋक्षे ; B: वेशस्वस्वपरे ऋक्षे.
[5] C: सम pour सह.
[6] C: महासीनौ ; B: समासीनः .
[7] C: तौ वेष्टय pour संवेष्टय.
[8] B: सुगन्धादिभिरर्चयेत् .
[9] A: वैवाह्यं मूर्तिनं ; C: वैवाह्यं मूर्तिजं.
[10] B: तत्कुम्भस्य pour तत्कुम्भस्थ.
[11] B: स्थाप्य pour स्नाप्य dans स्नाप्येशं.
[12] A: मोहिनी सह pour मोहिनीं सह ; B: सह मोहिनीम् .
[13] C: अवगृह्याथ pour अवगाह्याथ.
[14] A, B et C omettent हि dans ह्यर्चनोक्तं.
[15] B: समाचरेत् .
[16] C: वैवाह्य स्वगृहे.
[17] A: पाषाणैः सतृणं कृत्वा ; B: पाषाणैस्तरुणं कृत्वा ; C: पाषाणैस्तु रणं कृत्वा.
[18] C: महा . . . स्नानमाचरेत् .
[19] A, B et C: प्रभूतहविषं ददेत् .
[20] cf. *Ajitāgama, paṭala* 25, vers 320-324:

चण्डयागमथो वक्ष्ये सर्वकामार्थसाधनम् । गणानामपि सर्वेषां चण्डानां नायकस्तु यः ॥
चण्डेशस्तु भवेत्सोऽयं तस्य पूजा प्रकल्पिता । चण्डयागस्थितिस्तेऽत्र समासेनाभिधीयते ॥
धाम्नि चण्डेश्वरस्यार्चामभिषिच्य समाहितः । गन्धोदकेन तस्याग्रे कलशान्स्थण्डिले नव ॥
पूर्ववत्स्थापयित्वाऽथ तेषु मध्ये यजेत्सुधीः । चण्डेशमथ शेषेषु वसूनष्ट यजेत्क्रमात् ॥
गन्धादिभिः समभ्यर्च्य तैश्चण्डमभिषेचयेत् । हविर्दत्त्वा च ताम्बूलं दद्याच्चण्डे समाहितः ॥

[21] A: कृत्वा त्रियहमौनकम् ; B: त्र्यहं वाथ समाचरेत् ; C: कृत्वा त्र्यहमौनकम् .
[22] B: शुद्धिस्नानं.
[23] B: कृत्वा pour कुर्यात् .
[24] C: उत्सवप्रतिमं सर्वं.
[25] B: सिञ्चेत्स्नपनपूर्वकम् .
[26] A: हविषान्नं ; B: हविषाथ ; C: हविषान्तं.
[27] A: श्रीरौरवतन्त्रे.
[28] B et C omettent क्रियापादे.
[29] A: महोत्सवविध्यष्टादशपटलः .
[30] C: एकोनविंशः पटलः .

[एकोनविंशः पटलः]

[शुद्धनृत्तविधिः][1]

अवक्ष्यामि [2]समासेन शुद्धनृत्तं विशेषतः । स्नाने नित्योत्सवे चैवाप्युत्सवे स्नपने तथा ॥ १ ॥
स्थापने प्रोक्षणे काले कर्तव्यं शुद्धनृत्तकम्[3] । [4]संशुद्धा गणिका [5]शान्ता [6]त्वतिकान्ता [7]सुयौवना ॥ २ ॥
सर्वावयवसंपन्ना[8] [9]त्वलुब्धा नृत्तयोग्यका[10] । स्नानद्वयसमायुक्ता शुद्धवस्त्रधरा वरा ॥ ३ ॥
नानाभरणसंपूर्णा[11] श्वेतपुष्पसुमस्तका[12] । पादप्रक्षालनं कृत्वा प्रविशेन्नृत्तमण्डपम्[13] ॥ ४ ॥
[14]मण्डलं मण्डपे मध्ये कृत्वाभ्यर्च्य [15]नटेश्वरम् । तस्मात्पुष्पं विसृज्याथ [16]प्रोक्ष्य मण्डलमस्त्रतः ॥ ५ ॥

---

[1] pour *śuddhanṛttavidhi*, voir *Suprabheda*, I, 13, 44-51, *Kāmika*, I, 4, 391-399, *Makuṭa*, *paṭala* 6, vers 571-572, *Vīra*, *paṭala* 40, *Kāraṇa*, I, 31, 102-104 etc.

[2] C: महासेन pour समासेन.

[3] Ms. C ajoute:

रुद्रस्य गणिकानृत्तं नृत्तमुत्तममुच्यते । तद्दास्याश्च तु नृत्तं तु मध्यमं चेति कीर्तितम् ॥

[4] cf. *Suprabhedāgama*, I, 13, 47-5I:

सुस्नात्वा सम्यगाचम्य गन्धद्रव्यादिपूर्वकम् । शुक्लवस्त्रपरीधाना शुक्लमाल्योपशोभिता ॥
सर्वाभरणसंपूर्णा नृत्तगेयसुपेशला । पूर्वसन्ध्यां तु गान्धारं षाडवं च ततः परम् ॥
मध्याह्ने नट्टरागं स्यात्कौशिकं च ततः परम् । साये तु चेदकं [चैन्दलं] प्रोक्तमर्धरात्रे तु पञ्चमम् ॥
भरतोक्तं यथानृत्तं सन्धिं प्रति सुकारयेत् । एवं नृत्तं कृतं यत्र सुभिक्षं लोकशान्तिकम् ॥
दुर्निमित्तानि नश्यन्ति क्षेत्रमाराधकं नृणाम् ॥

[5] A: जाता pour शान्ता.

[6] B omet तु dans त्वतिकान्ता.

[7] C: च यौवनी pour सुयौवना.

[8] B et C: संपूर्णा pour संपन्ना.

[9] B: त्वलब्दा pour त्वलुब्धा.

[10] cf. *Nāṭyaśāstra* (éd. Bombay) 24, 31-33:

यौवनादिगुणोन्मत्ता नृत्तगीतविचक्षणा । सदा प्रगल्भा च तथा त्यक्तालस्या जितश्रमा ॥
समागतासु नारीषु रूपयौवनकान्तिषु । न दृश्यन्ते गुणैस्तुल्या नर्तकी सा प्रकीर्तिता ॥

[11] A: संभूष्या pour संपूर्णा.

[12] A: समस्तका pour समस्तका.

[13] C: मण्टपम् pour मण्डपम्.

[14] C: मण्टपं मण्डले मध्ये ; B: मण्डपं मण्डले मध्ये.

[15] C: अमृतेश्वरम् pour नटेश्वरम्.

[16] A: प्रोक्षयेन्मण्डलास्त्रतः ; C: प्रोक्षयेन्मण्डलास्त्रकः.

गणिकां प्रोक्षयेत्पश्चात्पुष्पं हस्ते निधापयेत् । तत्पुष्पं मण्डले [1]न्यस्य प्रणम्य परमेश्वरम् ॥ ६ ॥
[2]पुष्पाञ्जलिं कराभ्यां तु पद्ममुद्रां प्रदर्शयेत्[3] । [4]नृत्तमभ्यारभेत्पश्चाद्भरतोक्तं विशेषतः[5] ॥ ७ ॥
[6]मृदङ्गाद्यैर्दिशातालै[7]र्दिशागानै[8]र्विशेषतः । [9]शुद्धनृत्तानि [10]गेयानि ह्यपमृत्युजयार्थकम् ॥ ८ ॥

इति [11]श्रीमद्रौरवतन्त्रे [क्रियापादे] [12]शुद्धनृत्तविधिर्नामैकोनविंशः पटलः

---

[1] A et C: न्यस्त्वा.

[2] cf. *Bharatakośa*, p. 375:

प्रणतोन्मुखकोदण्डसमानमुकुलाकृतिः । श्लिष्टाङ्गुलिकरद्वन्द्वं **पुष्पाञ्जलि**रिति स्मृतम् ॥ (औमापतम्)

[3] cf. *Kāraṇāgama*, I, 28, 37-38:

उत्तानौ तु करौ कृत्वा मणिबन्धं तु कारयेत् । मध्यमे कुञ्चिताङ्गुष्ठौ शेषाः प्रविरलास्तथा ॥
पद्ममुद्रा भवेदेषा तलोपरि तलं न्यसेत् ॥

cf. *Vīrāgama*, *paṭala* 33, 33-34:

उभौ करौ च विप्रेन्द्र मणिबन्धं तु कारयेत् । मकुलीकृतहस्तौ द्वौ **पद्ममुद्रा** इति स्मृता ॥

[4] C: नृत्तं समारभेत् .

[5] cf. *Vīrāgama*, *paṭala* 40, 58-62:

प्रविशेदालयं तत्र विन्यसेत्पूर्वमण्डले । विसर्जयेत्तु चास्त्रेण नमस्कारं तु कारयेत् ॥
तदन्ते कारयेन्नृत्तं भरतोक्तेन मार्गतः । गणिकां स्नापयेत्तत्र गन्धपुष्पादिनार्चयेत् ॥
तदग्रे मण्डलं कृत्वा शिवं संपूजयेत्ततः । तस्य दक्षिणपार्श्वे तु ब्रह्माणं पूजयेत्ततः ॥
मध्ये न लङ्घनं लङ्घनात्स्खलनं भवेत् । अष्टोत्तरशतं नृत्तं भावयेद् गणिका ततः ॥
नृत्तस्यान्ते तु विप्रेन्द्र देवदेव्यौ विसर्जयेत् ॥

[6] cf. *Kāmikāgama*, II, 6, 114-118:

बलिदानावसाने तु तालस्वरसमायुतम् । नर्तनेन समायुक्तं कारयेत्स्वस्वदिक्षु च ॥
ब्रह्मणि ब्रह्मतालं स्यान्मेघरागसमन्वितम् । समतालं च गान्धारं कोल्ली बद्धावणं ततः ॥
भृङ्गिणी कौशिकं नट्टभाषया मल्लतालकम् । श्रीकामरं नवाख्येन तक्केश्या बलितालकम् ॥
कोटिकं तक्करागेण शालापाण्या तु डक्करी । पूर्वादिदिक्षु संयुक्तं पूर्वतालं यथा तथा ॥

[7] C: दिशान्तालैर् pour दिशातालैर् . [8] A: दिशागायैर् pour दिशागानैर् .

[9] A: दिशानृत्तानि. [10] A: गेयार्थं स्यादपमृत्युजयार्थकम् ; C: गेयार्थमपमृत्युं जयार्थकम् .

[11] A: श्रीरौरवतन्त्रे ; B omet श्रीगौरवतन्त्रे.

[12] A: शुद्धनृत्तकैकोनविंशतिपटलः ; C: शुद्धनृत्तं नाम चत्वारिंशत्पटलः .

[विंशः पटलः]

[नवकलशस्नपनविधिः][1]

नवसंख्यैर्घटैः[2] स्नानमादौ वक्ष्ये गुरो शृणु । [3]प्रागग्रमुदगग्रं[4] च युगसूत्रं [5]प्रपातयेत् ॥ १ ॥
[6]स्थण्डिलं कारयेत्तस्मिञ्शालिभिर्विमलैः शुभैः । तिलतण्डुललाजांश्चास्तीर्य[7] दर्भान्परिस्तरेत् ॥ २ ॥
द्रोणाम्बुपूरितं कुम्भं सूत्रवस्त्रसमन्वितम् । [8]कूर्चरत्नसमायुक्तं गन्धतोयैः [9]सुपूरितम् ॥ ३ ॥
स्थापयेत्कर्णिकायां तु मूलमन्त्राभिमन्त्रितम् । परितोऽष्टौ घटान्स्थाप्य विद्येशानभिमन्त्रयेत्[10] ॥ ४ ॥
ध्यात्वा गन्धादिभिः पूज्य वर्धन्यां हेमपङ्कजम् । [11]पाद्यमाचमनं चार्घ्यं [12]गन्धं पुष्पं च गव्यकम्[13] ॥५॥

---

[1] cf. *Vīrāgama*, *paṭala* 85, *Kāmika*, II, 4, *Makuṭa*, *paṭala* 9, *Suprabheda*, I, 15, *Svāyambhuva*, *paṭala* 18, *Ajita*, *paṭala* 28, *Kāraṇa*, I, 48.

[2] C: नवसंख्ये घटे स्नानम् .

[3] cf. *Suprabheda*, I, 15, 25:

प्रागुदग्भ्यां चतुःसूत्रं मार्गैर्नवपदं विदुः ॥

mais dans le *Vīrāgama*, *paṭala* 85 vers 5 on trouve la version différente:

सूत्रपातः प्रकर्तव्यः षट्सूत्रं प्राक्छिरो भवेत् । उदगग्रं तथैव स्यादष्टद्वारसमन्वितम् ॥

[4] B: प्रागग्रं चोत्तराग्रं च ; C: प्रागग्रं चौदगग्रं च.

[5] A: प्रतापयेत् ; B: प्रमन्त्रयेत् .

[6] cf. *Vīrāgama*, *paṭala* 85, vers 6-7:

शालिना विकिरेत्तत्र आढकं कलशं प्रति । शाल्यर्धास्तण्डुलान्न्यस्य तण्डुलार्धास्तिलान्न्यसेत् ॥
परिस्तरेत्तु दर्भैश्च पद्ममष्टदलं लिखेत् ॥

[7] A: लाजान्यास्तीर्य pour लाजांश्चास्तीर्य ; B: लाजैश्च तिर्यग् ; C: लाजानां तीर्थ.

[8] pour les détails de *ratna* voir *Suprabheda*, I, 15, 38-39:

वज्रं मरकतं चैव वैडूर्यं च प्रवालकम् । मौक्तिकं पञ्चरत्नानि शिवकुम्भे तु विन्यसेत् ॥
रत्नाभावे ततो हेमं नवानां हेममेव च ॥

[9] A: सुपूजितैः .

[10] A: अभिमन्त्रितान् pour अभिमन्त्रयेत् .

[11] cf. *Suprabheda*, I, 15, 40:

पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् । क्षीरं दधि घृतं चैव प्रथमावरणं विदुः ॥

[12] A: गन्धपुष्पं.

[13] pour les détails de *gavya* ou *pañcagavya* voir *Suprabheda*, I, 15, 41-42:

प्रस्थपादं घृतं प्रोक्तं द्विपादं दधि उच्यते । त्रिपादं क्षीरमित्युक्तं प्रस्थं चैव तु गोमयम् ॥
षड्गुणं चैव गोमूत्रं पञ्चगव्यमिति स्मृतम् ॥

[1]लाजान्सक्तुं क्रमेणैव [2]शक्रादिकघटे न्यसेत् । स्नापयेत्परमेशानमर्चनोक्तं समर्चयेत् ॥ ६ ॥
हविश्च दापयेत्पश्चात्ताम्बूलं च[3] निवेदयेत्[4] । एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥७॥

इति [5]श्रीमद्रौरवतन्त्रे [6]क्रियापादे [7]नवकलशस्नपनविधिर्नाम [8]विंशः पटलः[9]

---

[1] A: लाजं सक्थुं ; B: लाजं सक्तु ; C: लाजं सकृत् .

[2] B: शक्तादौ च घटान्न्यसेत् ; C: शक्रादिषु घटे न्यसेत् .

[3] C: तु pour च.

[4] cf. *Vīrāgama, paṭala* 85, vers 8-18 pour les détails de नवकलशस्नपनविधिः—

शिवकुम्भं न्यसेन्मध्ये प्रासादेन तु मन्त्रतः । सवस्त्रं पञ्चरत्नं च सकूर्चं सापिधानकम् ॥
वर्धनीं गौरीबीजेन विन्यसेद्देशिकोत्तमः । सवस्त्रान्सहिरण्यांश्च गन्धोदकेन पूरितान् ॥
पूर्वादीशानपर्यन्तं विन्यसेदष्टकुम्भकान् । पूर्वे गोमूत्रकं चैव गोमयं चाग्निदेशके ॥
क्षीरं दक्षिणतो न्यस्य पश्चिमे तु दधि न्यसेत् । आज्यं चोत्तरतः स्थाप्य नैर्ऋते तु कुशाम्बु च ।
वायव्यां फलतोयं च ऐशान्यां रोचना भवेत् । पूर्वादीशानपर्यन्तमष्टविद्येश्वरान्न्यसेत् ॥
गन्धपुष्पादिना चैव स्वस्वमन्त्रेण पूजयेत् । ततो होमं प्रकुर्वीत पलाशसमिधा सह ॥
समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् । सप्तद्रव्येण संयुक्तं पञ्चब्रह्मेण संयुतम् ॥
हृदयं च शिरोयुक्तं क्रमेण परिहूयते । हुत्वान्ते तु यदस्येति स्विष्टकृद्धूयते क्रमात् ॥
अष्टमङ्गलरूपाणि परितो विन्यसेत्ततः । आचार्यदक्षिणां दद्याद्वस्त्रहेमाङ्गुलीयकैः ॥
व्योमव्यापिं जपित्वा तु स्नापयेच्छिवकुम्भकम् । गौरीबीजेन वर्धन्यामनन्तादिस्वमन्त्रकैः ॥
हविर्निवेदयेत्पश्चात्ताम्बूलं दापयेत्ततः ॥

[5] A: श्रीरौरवतन्त्रे.

[6] B omet क्रियापादे.

[7] A: नवकलशस्नपनविंशतिः पटलः.

[8] C: विंशतिः पटलः .

[9] Les détails des rituels du नवकलशस्नपन (bain aux neuf pots) donnés dans un manuscrit prêté par J. Viśvanātha gurukal de Melmangalam (District de Madurai) sont donnés ci-dessous. On y trouve quelques mots tamouls que nous avons traduits en sanskrit.

नवकलशस्नपनस्य प्राक्सूत्रम् ४ उदक्सूत्रम् ४ आहत्य लब्धपदम् ९ ॥ **कर्मक्रमः**—सकलीकृत्य, विनायकमभिपूज्य, शिवस्याभिषेकार्थं नवकलशस्नपनं करिष्ये इति संकल्प्य, पुण्याहं वाचयित्वा, पञ्चगव्यं साधयेत् । अस्त्रेण भूमिं—ओं हः अस्त्राय नमः इति शोध्य क्षालयेत् । ओं हिं वामदेवाय नमः इति लेपयेत् । अघोरेण सूत्रन्यासं कृत्वा, ओं हीम् इति पदविन्यासं कारयेत्—पिष्टसूत्रेण मण्डपे प्रागग्रसूत्रम् ४ उदगग्रसूत्रम् ४ ओं हें तत्पुरुषाय नमः इति पुरुषेण स्थण्डिलं शालिभिस्तण्डुलैस्तिलैर्यवैश्च परिकल्प्य, तत्र भित्तिमुद्रां प्रदर्श्य, कुशकाशैर्यवैः पुष्पैश्च युक्तितः प्रस्तरेत् । तन्मध्ये पद्मं विलिख्य, पद्ममध्ये विशेषेण प्रासादं विन्यस्य, ओं हां हौं इति अधोमुखान् कुम्भान् संस्थाप्य, ओं हां हृदयाय नमः इति हृदयेन प्रोक्षयेत् । उत्तानानथ तान्दृष्ट्वा वस्त्रपूतैर्जलैः शिवकुम्भं वर्धनीं च प्रपूरयेत् । अत्र द्रव्याणि—चन्दनम्, उशीरम्, उत्पलम्, कोष्ठम्, एला, लवङ्गम्, ओं हां हृदयाय नमः इति द्रव्याणि विन्यस्य, कुम्भमध्ये ओं हां हृदयाय नमः इति पद्मं विन्यस्य, ओं हौं ईशानाय नमः इति कूर्चं न्यस्य, माणिक्यं, वैडूर्यम्, मुक्ताफलम्, इन्द्रनीलः, प्रवालम् इति पञ्चरत्नं कुम्भे विन्यस्य, पादनिष्केन निर्मितं स्वर्णकमलम् ओं हां हृदयाय नमः इति विन्यस्य, ओं हां आधारशक्तये नमः । ओं हां शिवासनाय

नमः। ओं हां हं हां शिवमूर्तये नमः। ओं हां हौं शिवाय नमः। ओं हों सद्योजाताय नमः इत्यावाहनादि कृत्वा, शिवमन्त्रमनुस्मृत्य, हस्तेन शिवकुम्भं पिधाय, शिवं ध्यायेत्। विधिवत्सकलीकृत्य, तत्तत्पञ्चावरणमन्त्रैः पञ्चावरणमभ्यर्च्य, ततः पल्लवनालिकेराभ्यामलंकृत्य, ओं हूं ज्रूं क्ष्मूं नमः इति पिधानेन पिधाय, हृदयाय नमः इति वस्त्रं दत्त्वा, ओं हों ईशानाय नमः इति गन्धादिभिरभ्यर्च्य, ओं हैं कवचाय नमः इति धूपदीपं दद्यात्। ओं हुं अघोराय नमः इति अस्त्रमुद्रां दद्यात्। ओं हैं तत्पुरुषाय नमः इति प्रोक्षयेत्। अथ लिङ्गमुद्रां पद्ममुद्रां नमस्कारमुद्रां च दर्शयेत्। वर्धन्यामपि जलमापूर्य, हरिद्राचूर्णं निक्षिप्य, स्वर्णनीलोत्पलं क्षिप्त्वा, मनोन्मनीं ध्यात्वावाह्य, ओं हां मनोन्मन्यासनाय नमः। ओं हां मनोन्मनीमूर्तये नमः ओं ह्रीं मनोन्मन्यै नमः इत्यभ्यर्च्य, वस्त्रादिभिरलंकृत्य, विद्येशानां पृथक् पृथगष्टौ कलशान् विन्यसेत्। तान् जलैरापूर्य तत्र पाद्यम्, आचमनम्, अर्घ्यम्, पञ्चगव्यम्, कुशोदकम्, क्षीरं, दधि, घृतम् एतानि द्रव्याणि क्रमेण विन्यस्य, ओं हां अनन्तेशाय नमः। ओं हां सूक्ष्माय नमः। ओं हां शिवोत्तमाय नमः। ओं हां एकनेत्राय नमः। ओं हां एकरुद्राय नमः। ओं हां त्रिमूर्तये नमः। ओं हां श्रीकण्ठाय नमः। ओं हां शिखण्डिने नमः। इत्यभ्यर्च्य, शिवादीन् निवेद्यं समर्प्य, धूपदीपौ दत्त्वा, नमस्कुर्यात्। तदनु कुम्भाग्रे कुण्डे वा स्थण्डिले वा शान्तिहोमं कृत्वा, पूर्णाहुतिं दत्त्वा, अग्निस्थदेवाय निवेद्यं दापयित्वा, होमं समर्प्य, अग्निस्थदेवं कुम्भे संयोज्य, अभ्यर्च्य, नैवेद्यादिकं दद्यात्। ततो द्वारपूजादिलिङ्गशुद्धयन्तं कृत्वा, प्रणवेन घटमुत्थाप्य, धामप्रदक्षिणं कृत्वा, गर्भगृहं प्रविश्य, धूपदीपनीराजनादीन् दत्त्वा, शिवकुम्भमुद्धृत्य, पञ्चब्रह्मषडङ्गैर्मूलमन्त्रेण वा शिवं संस्नाप्य, वर्धन्यां मनोन्मनीमन्त्रेण पीठमभिषिच्य, परितोऽनन्तादिमन्त्रैः क्रमेण तत्तत्कलशैर्यथास्थानमभिषेचयेत्। एवमभिषिच्य, अलंकृत्य, अभ्यर्च्य, महाहविर्दत्त्वा, ताम्बूलं मुखवासं च समर्प्य, धूपदीपौ दत्त्वा, छत्रचामरनृत्तादिभिः सन्तोष्य, स्तोत्रैः स्तुत्वा, नमस्कुर्यात्। इष्टकामार्थं संप्रार्थ्य, दण्डवत्प्रणिपत्य, क्षमस्वेति ब्रूयात्।

यागोपकरणं सर्वमाचार्याय प्रदापयेत्। भक्तियुक्तो यथाशक्त्या यः कुर्यात्स्नपनानि तु॥
सर्वपापविनिर्मुक्तः सर्वयज्ञफलं भवेत्। इति नवकलशस्नपनपद्धतिः॥

Le nom des choses à mettre sous les pots et le nom des divinités correspondant à chaque pot changent suivant les *Āgama*, ainsi que la façon de placer les pots. Même la forme du *maṇḍala* est différente suivant les *Āgama*: par exemple, le *Suprabheda l'Ajita* et le *Makuṭa* etc. prescrivent un *maṇḍala* carré, tandis que le *Sahasrāgama*, et le *Svāyambhuvāgama* le prescrivent rond; d'autres tels que le *Kāmika*, le *Kāraṇa* et le *Vīra* le prescrivent suivant les cas soit rond, soit carré, ou bien encore laissent le choix entre les deux. Nous avons ajouté à la fin de chacun des *paṭala* traitant du *snapana* le dessin correspondant au texte du *Rauravāgama*.

[एकविंशः पटलः]

[पञ्चविंशतिस्नपनविधिः][1]

अतः परं प्रवक्ष्यामि स्नपनं पञ्चविंशतिम्[2] । [3]मण्डपं [4]शकृतालिप्य वितानाद्यैरलंकुरु[5] ॥ १ ॥
प्रागग्रं वसुसूत्रं [6]स्यादुदगग्रं[7] तथैव च । मध्ये नवपदं [8]गृह्य परितः पदमाहरेत् ॥ २ ॥
द्वाराष्टकसमायुक्तं [9]पञ्चविंशत्पदं तु तत् । स्थण्डिलं कारयेत्पश्चाच्छालिभिः कलशं प्रति ॥ ३ ॥
[10]प्रस्थं शालि [11]शिवे [12]कुम्भे वर्धन्यां चाढकं भवेत् । तिलतण्डुललाजैश्च[13] दर्भैः पुष्पैः परिस्तरेत् ॥ ४ ॥
स्थण्डिलं[14] तु समभ्यर्च्य पुण्याहप्रोक्षणं कुरु । शिवकुम्भं न्यसेन्मध्ये सद्योजातमुदाहरन् ॥ ५ ॥
[15]गौरीगायत्रिमन्त्रेण वर्धनीं वामतो न्यसेत्[16] । कूर्चं वस्त्रं च सूत्रं च सहिरण्यपिधानकम् ॥ ६ ॥

---

[1] cf. *Kāraṇāgama*, I, 36, *Vīrāgama*, *paṭala* 83, *Kāmikāgama*, II, 4, *Suprabhedāgama*, I, 15, *Ajita*, *paṭala* 28, *Makuṭa*, *paṭala* 9, *Svāyambhuva*, *paṭala* 18.

[2] C: पञ्चविंशतिः .

[3] cf. *Vīrāgama*, *paṭala* 83, vers 2-5:

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् । चतुस्तोरणसंयुक्तं दर्भमालाविभूषितम् ॥
वितानोपरिसञ्छन्नदिग्ध्वजैश्च प्रलम्बितम् । सर्वालंकारसंयुक्तं मण्डपं कारयेत्ततः ॥
गोमयालेपनं कृत्वा सूत्रपातं तु कारयेत् । प्रागग्रमष्टसूत्रं स्यादुदगग्रं तथैव च ॥
मध्ये नवपदं स्थित्वा बाह्य एकपदं त्यजेत् । अष्टवीथिसमायुक्तं शालिना विकिरेत्ततः ॥

[4] A: शकृदालिप्य ; C: सकृदालिप्य.

[5] A: अलंक्रियात् ; C: अलंकृते.

[6] A: च pour स्याद् .

[7] B: उत्तराग्रं ; C: उदग्रं च.

[8] C: ग्राह्य.

[9] A: पञ्चविंशतिकं पदम् ; B: पञ्चविंशत्पदैर्युतम्.

[10] cf. *Vīrāgama*, *paṭala* 83, vers 6-9:

आढकं वा तदर्धं वा प्रस्थं वा शालि विन्यसेत् । कलशान् प्रति विप्रेन्द्र तस्योर्ध्वे तण्डुलं न्यसेत् ॥
तण्डुलार्धतिलं न्यस्य दर्भैश्चैव परिस्तरेत् । शिवकुम्भं न्यसेन्मध्ये वस्त्रयुग्मेन वेष्टयेत् ॥
पञ्चरत्नसमायुक्तं सकूर्चं सापिधानकम् । गौरीबीजेन वर्धन्यां सवस्त्रं सहिरण्यकम् ॥

[11] A: शिवं ; C: शर्वे.

[12] A: कुम्भं.

[13] A: लाजानि ; C: लाजानां.

[14] B: स्थण्डिले.

[15] C: गौरि pour गौरी.

[16] cf. *Kāraṇāgama*, I, 36, 8-15:

शालिभिः स्थण्डिलं कृत्वा प्रोक्षयेद्धृदयेन तु । तन्मध्ये नलिनं लिख्य साष्टपत्रं सकर्णिकम् ॥
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलरपि । लाजपुष्पैश्च दर्भैश्च विकिरेत्तु विशेषतः ॥

वामदेवेन मन्त्रेण [1]गन्धाम्भः [2]संप्रपूरयेत् । घृतं मधु तथा लाजान् [3]सक्तुं पुष्पोदकं तथा ॥ ७ ॥
[4]भस्म रजनीचूर्णं [5]च कदलीफलमेव च । तिलं वै सर्षपं चैव पनसं नालिकेरकम् ॥ ८ ॥
[6]दाडिमं [7]मातुलुङ्गं द्विनारङ्गाम्बु यथाक्रमम् । [8]पूरितान्सूत्रकाद्याढ्यान् [9]कलशान्सकलान्न्यसेत्[10] ॥ ९ ॥
[11]धर्मादीनि चतुर्दिक्षु [12]त्वधर्माद्यनलादिषु । प्रथमावरणेऽभ्यर्च्य विद्येशान्लोकपालकान् ॥ १० ॥

पुण्याहं वाचयित्वा तु पश्चात्स्थापनमारभेत् । मण्डपस्योत्तरे भागे कलशान् स्थापयेत्ततः ॥
तन्तुना वेष्टयेत्कुम्भान् गवाक्षसदृशान्तरम् । प्रक्षाल्य सद्यमन्त्रेण कुम्भान् सर्वानधोमुखान् ॥
दर्भोपरि न्यसेत्तत्र प्रोक्षयेत्पुरुषेण तु । शिवाख्यं कलशं मध्ये स्थापयेत्तण्डुलोपरि ॥
वर्धनीं चोत्तरे तस्य स्थापयेत्तु विचक्षणः । शिवाख्यं पञ्चरत्नाम्बु वर्धनी हेमसंयुता ॥
सकूर्चौ सापिधानौ च वस्त्रयुग्मेन वेष्टितौ । सदाशिवं यजेत्कुम्भे वर्धन्यां तु मनोन्मनीम् ॥
पूजयित्वा विशेषेण गन्धपुष्पादिभिः क्रमात् ॥

[1] C: गन्धाम्बु.
[2] B: परिपूरयेत्.
[3] A: सक्थुं.
[4] B: भस्मापि pour भस्म.
[5] B omet च.
[6] B: दाडिमी.
[7] B: मातुलिङ्गं.
[8] B: पूरिताम्बून् सूत्रकाढ्यान्.
[9] A: कलशान्यस्तु कलान्यसेत् ; B et C: कलशांस्तु कला न्यसेत् .
[10] cf. *Vīrāgama*, *paṭala* 83, vers 9-14:

पूर्वादीशानपर्यन्तमष्टकुम्भांश्च विन्यसेत् । स्वर्णं तत्र च निक्षिप्य विद्येश्वरसमन्वितम् ॥
पञ्चगव्यसमायुक्तं सवस्त्रं सापिधानकम् । चतुर्दिक्षु च विप्रेन्द्र द्वादशान्कलशान्न्यसेत् ॥
आग्नेयादिषु कोणेषु चत्वारः कुम्भमुच्यते । चन्दनं कुङ्कुमं चैव उशीरं मुद्गमेव च ॥
एलालवङ्गतक्कोलं तिन्दु जातिफलं गुलम् । लघुमांसीमुरं चैव कुष्ठं कुङ्कुममेव च ॥
दान्ता दूर्वा च तक्कोलं पुन्नागं जातिपाटली । लोध्रं चैव प्रियङ्गुश्च नालिकेरसमन्वितम् ॥
यथाक्रमेण विन्यस्य पूर्वादीशानमन्तकम् ॥

[11] cf. *Kāraṇāgama*, I, 36, 17*b* et 20-25:

वामादिशक्तयश्चाष्टौ शक्रादिषु क्रमान्न्यसेत् । लोकपालांस्तथा दिक्षु विद्येशानष्टदिक्षु वै ॥
पूजयेद्गन्धपुष्पाद्यैः स्वनाम्ना देशिकोत्तमः । गर्भगेहं ततः प्राप्य निर्माल्यं तु विसर्जयेत् ॥
लिङ्गशुद्ध्यादिकं सर्वमर्चनोक्तं समाचरेत् । शिवकुम्भं तथोद्धृत्य स्नापयेत्परमेश्वरम् ॥
वर्धनीं तु तथोद्धृत्य पिण्डिकामभिषेचयेत् । व्योमव्यापि समुच्चार्य पञ्चब्रह्मषडङ्गकैः ॥
संस्नाप्य कलशाद्भिस्तु पूजयेत्तु सदाशिवम् । प्रभूतं हविषं दत्त्वा निर्माल्यं तु विसर्जयेत् ॥
निवेदयेत्तु ताम्बूलं मुखवाससमन्वितम् ॥

[12] B: अधर्माननलादिषु.

द्वितीयावरणेऽभ्यर्च्य गन्धपुष्पादिभिर्बुधः । ततः शिवादीनुद्धृत्य मूललिङ्गेऽभिषेचयेत् ॥ ११ ॥
अर्चनोक्तं समभ्यर्च्य [1]प्रभूतं च हविर्ददेत्[2] ।

इति [3]श्रीमद्रौरवतन्त्रे [4]क्रियापादे पञ्चविंशतिस्नपनविधिर्नामैकविंशः पटलः[5]

---

[1] A, B et C: प्रभूतंहविषं ददेत् .

[2] cf. *Vīrāgama, paṭala* 83, vers 15-23:

अजः कपाली बुद्धिश्च वज्रदेहः प्रमर्दनः । विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः । ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकौ ॥
याम्यमृत्युहरो धाता विधाता कर्तृकारकः । कालरुद्रश्च विप्रेन्द्र कलशस्याधिदेवताः ॥
गन्धपुष्पादिनाभ्यर्च्य स्वस्वनाम्ना च मन्त्रतः । ततो होमं प्रकर्तव्यं पलाशसमिधा सह ॥
स्थण्डिलं कारयेत्तत्र लक्षणेन समन्वितम् । समिदाज्यचरूँल्लाजान् सर्षपांश्च यवांस्तिलान् ॥
शालिनीवारगोधूमयववेणुसमन्वितम् । पञ्चब्रह्मषडङ्गेन यथाक्रमेण हूयते ॥
हुत्वान्ते तु यदस्येति पूर्णाहुतिमथाचरेत् । आचार्यदक्षिणां दद्याद्वस्त्रहेमाङ्गुलीयकैः ॥
प्रासादेन तु मन्त्रेण स्नापयेच्छिवकुम्भकम् । गौरीबीजेन वर्धन्यां स्नापयेत्तु विशेषतः ॥
व्योमव्यापि समुच्चार्य स्नापयेत्कलशांस्ततः । पञ्चवर्णहविर्दद्यात्ताम्बूलं दापयेत्ततः ॥

[3] A: श्रीरौरवतन्त्रे. [4] B omet क्रियापादे.

[5] A: पञ्चविंशतिस्नपनैकविंशतिपटलः; C: पञ्चविंशतिस्नपनविधिर्नामैकविंशतिः पटलः .

[द्वाविंशः पटलः]

[एकोनपञ्चाशत्स्नपनविधिः][1]

[2]अतः परं प्रवक्ष्यामि पञ्चाशत्स्नपनं [3]रुरो[4]। पिष्टचूर्णैरलंकृत्य प्रोक्षयेद्वयोमव्यापिना ॥ १ ॥
[5]प्रागग्रं चोदगग्रं च [6]सूत्रद्वादशकल्पितम्। मध्ये नवपदं कल्प्य [7]लोपयेदभितो द्वयम् ॥ २ ॥

---

[1] cf. *Kāraṇāgama*, I, 37, *Vīrāgama, paṭala* 82, *Kāmika*, II, 4,; *Suprabheda*, I, 15, *Dīpta, paṭala* 62, *Ajita, paṭala* 28.

[2] cf. *Kāraṇāgama*, I, 37, 1-6:

मन्दिरस्याग्रतः कुर्यान्मण्टपं चतुरश्रकम्। नवहस्तं चाष्टहस्तं सप्तहस्तमथापि वा ॥
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्। वितानदर्भमालाभ्यां मुक्तादामविभूषितम् ॥
अष्टमङ्गलसंयुक्तं मङ्गलाङ्कुरशोभितम्। गोमयालेपनं कृत्वा निम्नोन्नतविवर्जितम् ॥
सद्येन प्रोक्ष्य तन्मध्ये सूत्रपातं तु कारयेत्। प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च ॥
मध्ये नवपदं ग्राह्य लेपयेत्परितः पदम्। द्वाराष्टकसमायुक्तं तालमात्रपदं भवेत् ॥

[3] B: परम् pour रुरो; C: कुरु.

[4] D'après le colophon des manuscrits A et C, le nombre des pots prescrits pour le bain est de 49 dans ce *paṭala*. Le manuscrit B donne seul le nombre de 50, mais, comme on l'expliquera plus tard dans l'introduction, les leçons de ce manuscrit ne sont pas toujours sûres et il y a des raisons de penser que le copiste a souvent changé des mots dans le texte. Nombre d'autres textes donnent aussi le nombre de 49. Le petit pot appelé *vardhanī*, représentant la *śakti* et placé près du pot principal représentant Śiva (la divinité principale; le pot est appelé *śivakumbha*), n'est pas compté généralement. Si on le comptait, le nombre exact serait de 50 et non pas de 49. Mais l'idée est que la *śakti* n'est pas distincte de Śiva et qu'ils ne forment qu'un. La première ligne donne ici le nombre de 50. Cela est dû peut-être au fait que ce chiffre est le plus près de 49. Pour 1009 pots, de nombreux textes disent 1000. Mais il serait mieux de lire: अथ प्रवक्ष्ये ह्येकोनपञ्चाशत्स्नपनं रुरो.

[5] cf. *Suprabhedāgama*, I, 15, 29-31:

पादानां तालमात्रं स्यात् सूत्रद्वादशकल्पितम्। उदक्सूत्रं तथा कल्प्य ह्यष्टद्वाराणि योजयेत् ॥
मध्यमे पञ्चविंशच्च द्विपदं त्यावृतं त्यजेत्। पञ्चविंशत्पदं कृत्वा तेष्वेकं गृह्य यत्नतः ॥
इदमेकोनपञ्चाशद्" ॥

[6] A et B: सूत्रं वा दशकल्पितम्.

[7] C: लोभयेद्.

[1]द्वाराष्टकसमायुक्तं गोमयेन तु वारिणा । पदषट्कं महाशासु कोणं प्रति चतुष्टयम् ॥ ३ ॥
[2]पदान्येकोनपञ्चाशत्कृत्वैवं तालमात्रतः । प्रक्षाल्य कलशान्पश्चाच्छिवकुम्भं च वर्धनीम् ॥ ४ ॥
[3]दर्भान्स्तीर्योपरि [4]न्यस्य हृदा [5]सूत्रं तु वेष्टयेत् । स्थण्डिलं [6]चाधमं प्रोक्तं प्रत्येकं प्रस्थशालिभिः ॥ ५ ॥
द्विप्रस्थं मध्यमं ख्यातं त्रिप्रस्थं [7]वरमुच्यते । शिवं वै शिवकुम्भस्य [8]वर्धन्यास्त्वाढकं भवेत् ॥ ६ ॥
स्थण्डिलं तु हृदा कुर्यादर्भैः[9] पुष्पैः[10] परिस्तरेत् । हृदयेन तु मन्त्रेण गन्धाद्यैः स्थण्डिलं यजेत् ॥ ७ ॥
सरत्नं शिवकुम्भं तु कूर्चवस्त्रपिधानकम् । न्यसेदीशानमन्त्रेण शिवकुम्भं तु मध्यमे ॥ ८ ॥
ध्यात्वा शिवं समूलं तु पूजयेद्ब्रह्मपञ्चकैः । तस्योत्तरे [11]न्यसेन्मन्त्री वर्धनीं [12]सहिरण्यकाम् ॥ ९ ॥
ध्यात्वा मनोन्मनीं [13]तस्यां [14]गणाम्बिकेति पूजयेत् ।[15]

[प्रथमावरणे द्रव्याणि देवताश्च]

[16] पाद्यं द्रव्यं न्यसेदैन्द्रे [17]त्वग्नौ त्वाचमनं [18]घटे ॥ १० ॥

---

[1] B: द्वि pour द्वा.
[2] A et B: पाद्यानि pour पदानि.
[3] A: दर्भास्तीर्य.
[4] A: न्यस्त्वा pour न्यस्य.
[5] A: सूत्रेण pour सूत्रं तु.
[6] C: तु pour च dans चाधमं.
[7] B: परमुच्यते ; C: वाथ उच्यते.
[8] A: वर्धन्यामाढकं ; B: वर्धन्याश्चाढकं.
[9] A et C: दर्भान् पुष्पान् pour दर्भैः पुष्पैः.
[10] B: पुष्पं pour पुष्पैः.
[11] B: न्यसेद्धीमान् .
[12] C: सहिरण्यकम् .
[13] C: तस्य pour तस्यां.
[14] B: अम्बिकादीः प्रपूजयेत् pour गणाम्बिकेति पूजयेत्.
[15] cf. *Kāraṇāgama*, I, 37, 6-12:

स्थण्डिलं शालिभिः कुर्यात्तन्मध्येऽब्जं समालिखेत् । लाजपुष्पतिलैर्दर्भैर्विकिरेत्तु विशेषतः ॥
कलशाल्लँक्षणोपेतांश्चतुःप्रस्थेन पूरितान् । सूत्रेण वेष्टयेत्सर्वान् गवाक्षसदृशान्तरान् ॥
कलशान् क्षालयेत्पश्चात्तन्मन्त्रेण सुवृत्ततः । पुण्याहं वाचयेद्धीमान्स्थापनं तु समारभेत् ॥
मध्यमे शिवकुम्भं तु गन्धतोयेन पूरितम् । पञ्चरत्नसमायुक्तं सकूर्चं सापिधानकम् ॥
वस्त्रयुग्मेन संवेष्टय पूजयेत्तु सदाशिवम् । वर्धनीं चोत्तरे स्थाप्य स्थण्डिलोपरि विन्यसेत् ॥
सकूर्चां सापिधानां च वस्त्रहेमाम्बुपूरिताम् । मनोन्मनीं यजेत्तत्र गन्धपुष्पादिभिः क्रमात् ॥
स्थापयेत्कलशान्पश्चाद्द्रव्येण सह पूरयेत् ॥

[16] B et C: पाद्यद्रव्यं.
cf. *Kāraṇāgama*, I, 37, 13:

पाद्यमाचमनं चार्घ्यं गव्यं पूर्वादिदिक्षु वै । क्षीरं दधि घृतं चैव मध्वन्नादि विदिक्षु च ॥

voir aussi *Suprabhedāgama*, I, 15, 40:

पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् । क्षीरं दधि घृतं चैव प्रथमावरणं विदुः ॥

[17] A: त्वग्नेर्याचमनं ; C: दाग्नेयाचमनं.
[18] B: घटम् .

अर्घ्यं वै याम्यकुम्भे[1] तु नैर्ऋत्यां तु कुशोदकम्। वारुणे पञ्चगव्यं [2]तु क्षीरं [3]वायौ निधापयेत्॥ ११॥
दधि सौम्ये[4] घटे [5]पूर्यमैशान्यां तु घृतं भवेत्। [6]अष्टविद्येश्वरान्ध्यात्वा स्वस्वमन्त्रेण पूजयेत्॥ १२॥

[द्वितीयतृतीयावरणयोर्द्रव्याणि]

मधु लाजाम्बु [7]सक्तुं च [8]गन्धोदकं हरिद्रकम्। बिल्वतोयं च कदलीं [9]हरिबेरोदकं तिलम्॥ १३॥
सिद्धार्थं पञ्चतोयं च [10]नालिकेराम्रदाडिमम्। लिकुचं [11]मातुलुङ्गं च नारङ्गद्वयमेव च॥ १४॥
एलाम्बु जातिपुष्पं च [12]कुष्ठं लोहं च चन्दनम्। [13]लवङ्गं द्रोणपुष्पं च धातकीं कुङ्कुमं तथा॥ १५॥
विष्णुक्रान्तिं सहां चैव [14]तगरं [15]रोचनामुरे। यवं [16]दूर्वां च [17]तक्कोलं [18]लक्ष्मीं [19]धुत्तूरमल्लिके॥ १६॥
तुलसीं[20] करवीरं च [21]चत्वारिंशतिं बाह्यतः। [22]कलशाभ्यन्तरे [23]शक्राद्दिन्यसेत्तु यथाक्रमम्[24]॥ १७॥

---

[1] A: याम्यकुम्भं.
[2] B: च pour तु.
[3] C: वाय्वां.
[4] B: सौम्यघटे.
[5] C: घटेत् पूर्वे pour घटे पूर्यम्.
[6] cf. *Kāraṇāgama*, I, 37, 19-22:

इन्द्राद्यानष्टविद्येशान्प्रथमावरणे न्यसेत्। तत्तत्स्वनाममन्त्रैश्च गन्धपुष्पादिभिर्यजेत्॥
लोकपालान्वसूंश्चैव द्वितीयावरणे न्यसेत्। विघ्नेशं द्वादशादित्यांस्तथैकादशरुद्रकान्॥
पूर्वादिषु क्रमेणैव तृतीयावरणे न्यसेत्। तत्तत्स्वनाममन्त्रैश्च गन्धपुष्पादिभिः क्रमात्॥
पूजयेत्तु [illegible]षेण पदं प्रति पदं प्रति॥

[7] A: सक्थुं · B: सक्तु द्वि.
[8] A: गन्धोदकहरिद्रकम्.
[9] C: हरिचेरो[illegible]; हरिबेरः peut-être ह्रीबेर devenu हिरिबेर, puis हरिबेर ; cf. par exemple चन्द्र devenu चन्दिर en tamoul.
[10] A: नालिकेरं च दाडिमम्.
[11] B: मातुलिङ्गं.
[12] C: कोष्ठं pour कुष्ठं.
[13] C: लवङ्गं pour लवङ्गं.
[14] C: तरङ्गं.
[15] B: रोचनं मुरा ; A: रोचनामुरम्.
[16] B: दूर्वा pour दूर्वां.
[17] C: तत्कोलं.
[18] C: लक्ष्मी pour लक्ष्मीं.
[19] A: धुर्धूरमल्लिकाम्.
[20] A: तुल्सी pour तुलसीं.
[21] A: चत्वारिंशत्रि बाह्यतः ; C: चत्वारिंशति बाह्यतः.
[22] C: कलशेऽभ्यन्तरे.
[23] A: चक्राद्दिन्यसेत्तु.
[24] cf. *Kāraṇāgama*, I, 37, 14-19:

तक्कोलं भस्मनिर्यासं गिरिवेरं च मञ्जरीम्। नालिकेरं च बिल्वं च जम्बू कच्चोलमेव च॥
पाटली चैव पुन्नागं शङ्खपुष्पं तथैव च। लक्ष्मी व्याघ्री नखी सिंही धुत्तूरं चैव षोडश॥
द्रव्याण्येतानि सर्वाणि द्वितीयावरणे न्यसेत्। दूर्वा च सर्षपं त्वाम्रं नारङ्गं पनसं तथा॥
कदली शतपत्रं च धातकी श्वेतपङ्कजम्। इक्षुसारश्च लाजाश्च चम्पकं गन्धतैलकम्॥
नीवारं कुङ्कुमं चैव तिलमाञ्जिमुरं तथा। सक्तुर्वै मातुलुङ्गं च चन्दनं चागरुस्तथा॥
उशीरं च निशाचूर्णं तृतीयावरणस्य तु॥

[द्वितीयावरणदेवताः]

[1]इन्द्रं भवं तथाग्निं च[2] शर्वं चैव यमं तथा। पशुपतिं निर्ऋतिं चैव उग्रं च वरुणं तथा ॥ १८ ॥
रुद्रं वायुं तथा भीमं सोमं[3] चैव [4]हरेश्वरौ। ईशानं च [5]तथैशान्यां द्वितीयावरणे यजेत् ॥ १९ ॥

[तृतीयावरणदेवताः]

कपालीशो[6] ह्यजो बुद्धो हुताशी[7] पिङ्गलस्तथा। मृत्युहारी [8]विधाता च [9]कलशाक्षश्च मारणः ॥ २० ॥
[10]शास्ता च क्रूरदृष्टिश्च बलो ह्यतिबलस्तथा। [11]पाशहस्तस्तथा [12]शीघ्रो लघुर्वै वायुवेगकः ॥ २१ ॥
जटामकुटधारी च नानारत्नधरस्तथा। निधीशो रूपवान्धन्यः [13]सौम्यो धर्मस्तथैव च ॥ २२ ॥
तृतीयावरणे [14]देवान् ध्यायेच्छक्रादिषु क्रमात्। स्वस्वनाम्ना तु मन्त्रेण गन्धाद्यैरर्चयेद्बुधः[15] ॥ २३ ॥

---

voir aussi *Suprabhedāgama*, I, 15, 42-46, pour les choses à mettre dans les 16 pots du second *āvaraṇa* et les 24 du 3e.

मधु इक्षुरसं चैव पनसाम्रफले तथा। कदलीनालिकेरौ च सर्षपं च तिलं तथा ॥
बिल्वं च मातुलुङ्गं च नारङ्गद्वयमेव च। यवनीवारलाजं च तस्य चूर्णं गुलं तथा ॥
चन्दनं लघुकुष्ठौ च कच्चोलं पुष्पपत्रकम्। कर्पूरं हिमबेरं च जटामांसी मुरं तृणम् ॥
शमी दूर्वा च श्वेतार्कं बिल्वपत्रं च चम्पकम्। शङ्खपुष्पं त्वपामार्गं विष्णुक्रान्तिश्च धुर्तुरम् ॥
नन्द्यावर्तं श्वेतपद्मं पुन्नागं च .... ॥

1 cf. *Kāraṇāgama*, I, 37, 20:

लोकपालान् वसूंश्चैव द्वितीयावरणे यजेत्।

cf. *Ajitāgama, paṭala* 28, 267-268:

विद्येशान् प्रथमे यष्ट्वा द्वितीयावरणे ततः। लोकपालान् स्वदिक्संस्थान् तत्पार्श्वस्थान्भवादिकान् ॥
तृतीयावरणे चापि वज्रादिदिक्पदाश्रितान्। वसूंश्च मरुतश्चाष्टकलशेष्वपि पूजयेत् ॥

2 A: इन्द्राम्भसस्तथाग्निं च.
3 A: सामं.
4 A: हरेश्वरम्.
5 A: तथैशानं.
6 A: कपालीजो.
7 C: हुताशीः.
8 A: विधातव्यः pour विधाता च.
9 C: कलशाक्षं च.
10 A: शास्तरक्रूरदृष्टिं च.
11 C omet पाशहस्तस्तथा.
12 C: वेगः pour शीघ्रः.
13 C: सर्व pour सौम्यो.
14 A: देवं pour देवान्.
15 C: क्रमात् pour बुधः.

उद्धृत्य शिवकुम्भादीन्मूललिङ्गेऽभिषेचयेत्। [1]अर्चनोक्तं समभ्यर्च्य [2]प्रभूतं च हविर्ददेत्॥ २४॥

इति [3]श्रीमद्रौरवतन्त्रे क्रियापादे [4]एकोनपञ्चाशत्स्नपनविधिर्नाम[5] [6]द्वाविंशः पटलः

---

[1] Nous donnons ci-dessous le rituel selon le *Suprabhedāgamapaddhati*. Noter la différence des noms des divinités correspondant aux pots des divers *āvaraṇā*.

अर्चनाक्रमः—शिवकुम्भे शिवाय नमः। वर्धन्यां मनोन्मन्यै नमः।

प्रथमावरणे अष्टकलशेषु—अनन्ताय नमः। सूक्ष्माय नमः। शिवोत्तमाय नमः। एकनेत्राय नमः। एकरुद्राय नमः। त्रिमूर्तये नमः। श्रीकण्ठाय नमः। शिखण्डिने नमः।

द्वितीयावरणे षोडशकलशेषु—भवाय नमः। शिवाय नमः। हराय नमः। रुद्राय नमः। पुष्कराय नमः। पुरुषोत्तमाय नमः। अग्रगण्याय नमः। सदाचाराय नमः। शर्वाय नमः। शम्भवे नमः। महेश्वराय नमः। ईश्वराय नमः। स्थाणवे नमः। ईशानाय नमः। सहस्राक्षाय नमः। सहस्रपदे नमः।

तृतीयावरणे चतुर्विंशतिकलशेषु—वरीयसे नमः। वरदाय नमः। वन्द्याय नमः। शंकराय नमः। परमेश्वराय नमः। गङ्गाधराय नमः। शूलधराय नमः। परार्थैकप्रयोजनाय नमः। सर्वदेवाय नमः। गिरिधन्विने नमः। जटाधराय नमः। चन्द्रापीडाय नमः। चन्द्रमौलये नमः। अप्रमेयाय नमः। गौरीशाय नमः। विदुषे नमः। वेदान्तसारसन्दोहाय नमः। कपालिने नमः। नीललोहिताय नमः। ध्यानाधाराय नमः। अपरिच्छेद्याय नमः। गौरीभर्त्रे नमः। गणेश्वराय नमः। अष्टमूर्तये नमः।

एवमभ्यर्च्य, शान्तिहोमं कृत्वा, पूर्ववत् समाचरेत्।

[2] A, B et C: प्रभूतहविषं ददेत्.

[3] A: श्रीमद्रौरवतन्त्रे; B omet श्रीमद्रौरवतन्त्रे क्रियापादे.

[4] B omet एकोन.

[5] B: पञ्चाशत्कलशस्नपनविधिर्नाम विंशः पटलः; A: एकोनपञ्चाशत्स्नपनपटलो द्वाविंशः.

[6] C: द्वाविंशतिः पटलः.

[त्रयोविंशः पटलः]

[अष्टोत्तरशतस्नपनविधिः][1]

[2]अष्टोत्तरशतैः कुम्भैः स्नपनं शृणु [3]वच्मि ते। [4]संक्रान्तौ [5]विषुवे [6]चैवाप्ययने ग्रहणे तथा ॥ १ ॥
राजाभिषेकसमये [7]चान्यमङ्गलकार्यके। कर्तव्यं स्नपनं ह्येतत्सर्वेष्टफलसिद्धये[8] ॥ २ ॥
[9]मण्डपं तु वितानाद्यैर्भूषयित्वा विशेषतः। गोमयालेपनं कृत्वा [10]पिष्टसूत्रैर्विचित्रयेत् ॥ ३ ॥

---

[1] cf. *Kāraṇāgama*, I, 38, *Vīrāgama*, *paṭala* 80, *Ajita*, *paṭala* 28, *Kāmika*, II, 4, *Suprabheda*, I, 15, *Sūkṣma*, *paṭala* 12, *Svāyambhuva*, *paṭala* 18.

[2] cf. *Kāraṇa*, I, 38, 1-4:

अष्टोत्तरशतं वक्ष्ये स्नपनं भुक्तिमुक्तिदम्। अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ॥
प्रोक्षणान्ते प्रतिष्ठान्ते चोत्सवान्ते विशेषतः। सङ्क्रान्तौ वाप्यमावास्यां षडशीतिमुखेऽपि वा ॥
सिनीवाल्यां कुहौ चैव ह्याद्यायां तु विशेषतः। राजाभिषेकसमये तस्य जन्मदिनेऽपि च ॥
अन्यस्मिन्मङ्गले कार्ये प्रायश्चित्ते विशेषतः। स्नपनं कारयेद्धीमान् सर्वपापनिकृन्तनम् ॥

[3] A: पश्चिमे pour वच्मि ते; B: पश्चिम.
[4] A, B et C: सङ्क्रान्ते.
[5] C: वैष्णवे.
[6] A, B et C: चैव अयने.
[7] A: चान्ये pour चान्य; B: अन्यस्मिन् pour चान्य.
[8] C: सिद्धिदम् pour सिद्धये.

[9] cf. *Kāraṇa*, I, 38, 5-10:

भवनस्याग्रतः कुर्यान्मण्टपं चतुरश्रकम्। द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकौ ॥
विप्रादीनां क्रमाद्ब्राह्यं षोडशस्तम्भसंयुतम्। पङ्क्तित्रयसमायुक्तं पङ्क्तिमानमथोच्छ्रयम् ॥
तलोत्सेधं युगाङ्गुल्यं दर्पणोदरसन्निभम्। युगद्वारसमायुक्तं वेदतोरणभूषितम् ॥
वितानदर्भमालाभिः स्नपनैर्विविधैर्युतम्। वितानध्वजसंयुक्तं मुक्तादामविराजितम् ॥
अष्टमङ्गलसंयुक्तं मङ्गलाङ्कुरशोभितम्। गोमयालेपितं कृत्वा तरङ्गेणैव वेष्टयेत् ॥
शिवाम्भसा तु संप्रोक्ष्य सूत्रपातं तु कारयेत् ॥

[10] A: विषु pour पिष्ट.

[1]प्रागग्रं चोदगग्रं च मनुसूत्राणि कल्पयेत् ।

---

[1] Comme nous l'avons déjà expliqué à la fin du *paṭala* 20, les textes **āgamiques** ne s'accordent pas sur la façon de dessiner le *maṇḍala* pour le *snapana* **avec 108 pots** (*kalaśa*) et aussi sur d'autres détails tels que la formation des *āvaraṇa*, **la façon de** placer les pots, les choses que l'on y met (*dravya*) et les divinités qui y **président.** Nous donnons ci-dessous des extraits de quelques textes relatifs à la façon **de dessiner** le *maṇḍala* pour montrer à quel point les textes diffèrent les uns des autres. **Plus loin,** comme dans les *paṭala* précédents, nous ne citerons qu'un seul des textes.

cf. *Ajita*, 28, 218-225:

अष्टोत्तरशतैर्वक्ष्ये कलशैः स्नपनं परम् । प्रागग्रं मनुसूत्रं स्यादुदगग्रं तथैव च ॥
नवषष्टिशतं सम्यक् पदमेकत्र मण्डितम् । पदप्रमाणं सर्वत्र तालमात्रमिति स्मृतम् ॥
तत्र मध्ये नवपदं पद्मार्थं परिलोपयेत् । बाह्ये तु षोडशपदैः प्रथमावरणं भवेत् ॥
परितश्च ततो वीथी पदं प्रत्येकधा भवेत् । अष्टद्वाराणि वीथ्यग्रे कोणपार्श्वेषु कल्पयेत् ॥
त्रिभिस्त्रिभिः पदैरेवं कृते तत्र भवन्ति हि । पदप्रदास्तु मध्यादिनवसंख्या जनार्दन ॥
तेषु पूर्वादिसंस्थेषु प्रान्तेष्वथ चतुर्ष्वपि । तिथिसंख्यापदेष्वन्तर्वीथी पार्श्वेषु मध्यमम् ॥
पदमेकं परित्यज्य स्थण्डिलं तेषु कल्पयेत् । एवं कृते महादिक्षु चतुर्दशपदं भवेत् ॥
कोणेष्वपि नव प्रोक्तास्ततः स्थापनमारभेत् ॥

cf. *Kāraṇa*, I, 38, 10-13:

पूर्वाग्रं तु कलासूत्रं शालिपिष्टात्करज्जुना । उदगग्रं तथैव स्याद्रन्ध्रतालप्रमाणतः ॥
पञ्चपञ्चपदं मध्ये परितोऽपि पदं त्यजेत् । एकविंशतिकोणेषु द्वारायान्यानि वर्जयेत् ॥
मध्यमे तु शिवव्यूहमाग्नेयादिविदिक्षु च । व्यूहाश्चैव तु चत्वारो धर्मज्ञानादयः क्रमात् ॥

cf. *Vīra*, 80, 5-13:

सूत्रपातं प्रकर्तव्यं तालमात्रेण चान्तरम् । द्विविधं सूत्रपातं तु शान्तिकं पौष्टिकं तथा ॥

[शान्तिकम्]

चतुर्दशानि सूत्राणि पूर्वाग्रं चैव विन्यसेत् । उत्तराग्रं तथैव स्यात्सूत्रस्यैतानि निर्दिशेत् ॥
मध्ये नवपदं स्थित्वा परिच्छेदपदं न्यसेत् । चतुर्दिक्षु च विप्रेन्द्र द्वारार्थं तु पदं ततः ॥
तद्बाह्यावरणाद्बाह्ये परितो वीथिरुच्यते । तस्य बाह्ये तु परितः पददयस्थितानि तु ॥
एवमेव क्रमेणैव शान्तिकं प्रविधीयते ॥

[पौष्टिकम्]

इदमन्यत्प्रवक्ष्यामि चक्रस्थापनमुच्यते । पूर्वाग्रे चैव विप्रेन्द्र युग्मसूत्रं प्रदापयेत् ॥
उत्तराग्रं तथैव स्यात्तालमात्रेण चान्तरम् । तालत्रयप्रमाणेन भ्रामयेत्पूर्णचन्द्रवत् ॥
तासां पूर्वदिशो विप्र तालमात्रेण चान्तरम् । अष्टवृत्तं ततो भ्राम्य वीथीचत्वार एव च ॥
चतुर्भिः कलशान्यस्य पौष्टिकं त्विह चोच्यते । द्वारार्थं च चतुर्दिक्षु ह्रासयेत्तु विशेषतः ॥

पञ्चविंशत्पदं मध्ये तन्मध्ये नवकं [1]त्यजेत् ॥ ४ ॥
एकमेकं त्यजेद्दिक्षु [2]ह्युपादेयोऽर्कभागकः । [3]बाह्ये चैकपदं त्यक्त्वा द्वाराष्टकसमन्वितम् ॥ ५ ॥
दिशासु [4]पक्षभागाः स्युः कोणं प्रति नवांशकम् । [5]मध्ये नन्दांशमम्भोजं[6] दलाष्टकसमन्वितम् ॥ ६ ॥
कर्णिकाकेसरोपेतं शालितण्डुललाजकैः । [7]तदावृताष्टभागेषु प्रतिदिक्पक्षभागके ॥ ७ ॥
कोणं प्रति नवांशेषु प्रत्येकं प्रस्थशालिभिः[8] । स्थण्डिलं प्रति कर्तव्यं दर्भान्सूत्रेषु [9]संस्तरेत् ॥ ८ ॥
तिलतण्डुललाजैश्च नानापुष्पैः परिस्तरेत् । [10]पञ्चब्रह्म समुच्चार्य [11]कुशाद्भिः प्रोक्षयेद्बुधः[12] ॥ ९ ॥

---

cf. *Sūkṣma*, 12, 6-7:

प्रागग्रं मनुसंख्या च उदगग्रं तथैव च । सूत्रात्सूत्रान्तरं तालं कल्पयेत्कल्पवित्तमः ॥
पञ्चपञ्चपदं मध्ये बाह्ये त्वेकपदं त्यजेत् । कोणेऽनन्तपदं ग्राह्य मध्ये चार्कपदं ग्रहेत् ॥

cf. *Svāyambhuva*, 18, 74-75:

प्रागग्रमुदगग्रं च द्विद्विसूत्रं प्रसारयेत् । मध्ये शङ्कुं न्यसेद्धीमान् भ्रामयेत्तु शनैः शनैः ॥
सूत्रात्सूत्रान्तरं तालं दशसूत्रेण कारयेत् । बाणसंख्याक्रमेणैव शेषसूत्राणि लोपयेत् ॥

cf. *Suprabheda*, I, 15, 32-34:

प्रागग्रं षोडशं सूत्रमुदगग्रं तथैव च । पञ्चविंशत्पदं तेषु मध्ये संग्राह्य यत्नतः ॥
विदिक्षु नवकं ग्राह्यं द्वारत्वाद्द्विपदं त्यजेत् । चतुर्दिक्तिथिकोष्ठेषु तृतीये संत्यजेत्त्रयम् ॥
एवं कृते पदां सम्यक् शिवाधिक्यं शताष्टकम् ॥

[1] B: न्यसेत् pour त्यजेत् ; C: यजेत् .
[2] A: उपादेयार्कभागकम् ; C: उपादेयागभागकम् .
[3] A: तद्बाह्ये तु पदं ; C: तद्बाह्येकपदं.
[4] A et C: पक्षभागासु pour पक्षभागाः स्युः .
[5] A: मध्य pour मध्ये.
[6] A: अम्भोज pour अम्भोजं.
[7] A: तथावृत्तकभागेषु.
[8] A: शालिना pour शालिभिः .
[9] B: संस्मरेत्.
[10] C: पञ्चब्रह्माङ्गमुच्चार्य.
[11] C: कुशैश्च pour कुशाद्भिः .
[12] cf. *Sūkṣma*, 12, 8-15:

स्थण्डिलं कल्पयेत्तत्र ह्यष्टद्रोणैश्च शालिभिः । तण्डुलैस्तिललाजैश्च दर्भैः पुष्पैः परिस्तरेत् ॥
नैवेद्यं दापयेच्छम्भोः स्नानं विज्ञाप्य देशिकः । महेशं पूजयेद्विद्वान् गन्धपुष्पस्रगादिभिः ॥
शिबिकोर्ध्वे समारोप्य ग्रामप्रदक्षिणं कुरु । स्नानार्थमण्डपं चैव कल्पयेत्त्वैन्द्रदेशके ॥
एकत्र स्थण्डिलं कल्प्य स्थापयेत्कलशान् पृथक् । आवाहनादिधूपान्तमर्चनादि यथाक्रमम् ॥
स्थण्डिले स्थापयेत्पश्चाद्द्वियोगमिति कथ्यते । नवाधिकशतान्कुम्भानुपकुम्भसमन्वितान् ॥
पदमध्ये स्थितान् कुम्भान्सूत्रमध्योपकुम्भकान् । शिवकुम्भस्य वर्धन्यामुपकुम्भं विसर्जयेत् ॥
ससूत्रान् सापिधानांश्च सवस्त्रान् वारिपूरितान् । सकूर्चान् हेमसंयुक्तान् फलपल्लवसंयुतान् ॥
मध्यमे शिवकुम्भं तु वर्धनीं तस्य वामके ॥

voir aussi *Ajita*, 28, 225-227:

प्रोक्षयित्वास्त्रजप्तेन वारिणा देशिकस्ततः । तेषु सर्वेषु मध्येषु स्थण्डिलं पूर्ववद्भवेत् ॥
ततः शिवाख्यकलशं पूर्ववत्कल्पयेत्सुधीः । कर्णिकायां तु विन्यस्य वर्धनीं तस्य चोत्तरे ॥

गन्धैः पुष्पैश्च धूपैश्च स्थण्डिलं तु समर्चयेत्। सूत्रादिभिस्समायुक्तं शिवकुम्भं तु मध्यमे[1] ॥ १० ॥
तस्योत्तरे न्यसेद्धीमान्वर्धनीं च तथैव [2]हि। पदं प्रति [3]घटान् स्थाप्य [4]सूत्राद्यैस्तूक्तद्रव्यकैः[5] ॥ ११ ॥
[6]पञ्चरत्नं हिरण्यं वा शिवकुम्भे तु विन्यसेत्। वर्धन्यामम्बुजं [7]हैमं विन्यसेन्मूलमन्त्रतः ॥ १२ ॥
सद्यमन्त्रमनुस्मृत्य शिवकुम्भे [8]सदाशिवम्। हृदयेन[9] तु [10]संध्याय वर्धन्यां तु मनोन्मनीम् ॥ १३ ॥
[11]गन्धं पुष्पं च धूपं च दीपं चैव हृदा ददेत्। विविधं वा यथालाभं फलं तयोर्निवेदयेत् ॥ १४ ॥
पञ्चब्रह्म[12] समुच्चार्य [13]पञ्चमुद्राः प्रदर्शयेत्। [14]तालं शिखरपद्मे च निष्ठुरं लिङ्गमेव च ॥ १५ ॥

---

[1] cf. *Kāraṇa*, 38, 36-37:

मध्यमे शिवकुम्भं तु पञ्चरत्नाम्बुसंयुतम्। मध्यव्यूहस्य सौम्ये तु वर्धनीं स्थापयेद्दृढा ॥
हेमतोयसमायुक्तं कल्पयेत्कल्पवित्तमः। स्थापयेत्कलशान् सर्वान् पश्चाद्द्रव्याणि विन्यसेत् ॥

[2] B: च pour हि. [3] A: घटं pour घटान्.

[4] A: सूत्राद्यैस्तोत्रद्रव्ययुक्.

[5] सूत्राद्यैः, वेष्टय इति शेषः, आदिपदेन वस्त्रयुग्मस्य ग्रहणम्। उक्तद्रव्यकैः, पूरयित्वा इति शेषः.

[6] cf. *Kāmika* II, 4, 34 pour les *pañcaratna*:

माणिक्यं चेन्द्रनीलं च वैडूर्यं च प्रवालकम्। मुक्ता च पञ्चरत्नं स्यादभावे हेम संमतम् ॥

[7] C: हेमं pour हैमं.

[8] B: सदाशिवे. [9] B omet न dans हृदयेन.

[10] A, B et C: संध्यात्वा pour संध्याय.

[11] A: गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव हृदा चरेत्; B गन्धैः पुष्पैश्च दीपैश्च धूपैश्चैव हृदा चरेत्; C: गन्धैः पुष्पैश्च धूपैश्च दीपं चैव हृदा ददेत्.

[12] C: पञ्चब्रह्मं. [13] A: पञ्चमुद्रां.

[14] cf. *Kāraṇa*, I, 28 pour les *pañca-mudrā*:

तालमुद्रा—

हस्ताभ्यां ताडयेत्तालमुद्रां कुर्यात्तु शोधने ॥

(I, 28, 9)

शिखामुद्रा—

उत्तानौ तु करौ कृत्वा वेणीबन्धं तु कारयेत्। प्रसार्य मध्यमे ज्ञेया शिखाख्या स्थापने तथा ॥

(I, 28, 19-20)

पद्ममुद्रा—

उत्तानौ तु करौ कृत्वा मणिबन्धं तु कारयेत्। मध्यमे कुञ्चिताङ्गुष्ठौ शेषाः प्रविरलास्तथा ॥
पद्ममुद्रा भवेदेषा तलोपरि तलं न्यसेत् ॥

(I, 28, 37-38)

[1]पञ्चमुद्राश्च विख्याताःस्सर्वकामार्थसाधिकाः[2] ।

[प्रथमावरणे द्रव्याणि]

[3]पाद्यमाचमनं चार्घ्यमाग्नेय्यां तु[4] [5]घटादिषु ॥ १६ ॥
कुशाम्बु पञ्चगव्यं च क्षीरं च [6]निर्ऋतौ त्रिषु । दधि सर्पिर्मधू [7]चैव वायव्यां तु घटेषु वै ॥ १७ ॥
गन्धं पुष्पोदकं भस्म [8]चैशान्यां त्रिषु विन्यसेत् । प्रथमावरणं [9]ह्येवं द्वितीयावरणं शृणु ॥ १८ ॥

[द्वितीयावरणे द्रव्याणि]

[10]लाज[11]सक्तु[12]शकृत्तोयमिक्षुतोयं हरिद्रकम् । कदली [13]नालिकेराम्बुनारङ्गद्वयसर्षपम्[14] ॥ १९ ॥

निष्ठुरमुद्रा—

मुष्टिं कृत्वा तु हस्तौ च करपृष्ठौ तु योजयेत् । कनिष्ठौ प्रसृतौ दीर्घौ निष्ठुरा सन्निरोधने ॥
(I, 28, 14-15)

लिङ्गमुद्रा—

अङ्गुष्ठं चोर्ध्वगं मुष्टिं कृत्वा वामेन वेष्टयेत् । लिङ्गमुद्रा तु विख्याता प्रच्छन्नेति प्रदर्शयेत् ॥
(I, 2, 28, 7-8)

[1] A: पञ्चमुद्रेति विख्याता सर्वकामार्थसाधिका. [2] B: सिद्धिदा pour साधिकाः; C: साधिताः.

[3] cf. *Ajita*, 28, 227-230 pour les choses à mettre dans les 16 pots du 1*er āvaraṇa*:

ततश्चावरणे त्वाद्ये पूर्वादिक्रमयोगतः । पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ॥
क्षीरं दधि घृतं चैव दिक्षु चान्यासु विन्यसेत् । मधु भस्मेक्षुसारं च लाजचूर्णमतः परम् ॥
लाजांश्च रजनीचूर्णं तिलसर्षपमेव च । विन्यस्याथ च सर्वेषु शेषेष्वावरणक्रमात् ॥
गन्धोदपूरितान्यस्त्वा कलशांस्तेषु निक्षिपेत ॥

[4] B: अग्न्यादिषु pour आग्नेय्यां तु. [5] C: घटान्तिषु.
[6] C: निर्ऋतां. [7] A: सर्पिमधु ; B et C: सर्पिर्मधु.
[8] B: त्रिषु चैशान्यके न्यसेत्. [9] B: ह्येतत् ; C: हेम.

[10] cf. *Ajita*, 28, 231-234 pour les choses à mettre dans les 20 pots du 2*e āvaraṇa*:

द्वितीयावरणे त्वेतान् वक्ष्यमाणान् यथाक्रमम् । पनसं मातुलुङ्गं च दाडिमं चाम्रमेव च ॥
नालिकेरंजलं चापि नारङ्गद्वयमेव च । कदली च विडङ्गं च जम्बूफलमतः परम् ॥
द्राक्षा च नवनीतं च ह्रीबेरं मुस्तकं ततः । वक्रं राम्ना नतं चापि दान्तकं च मुरं तृणम् ॥
ज्योतिष्मच्च द्वितीयेषु विंशेषु कलशेषु च ॥

[11] A: सक्थु pour सक्तु. [12] A: सकृत् pour शकृत् .
[13] C: नारिकेलाम्बु pour नालिकेराम्बु. [14] C: सर्षपाः pour सर्षपम् .

तिलसिद्धार्थ[1]वकुलदाडिमं[2] मातुलुङ्गकम्। [3]आमलं बिल्वपनसं [4]क्षीरवृक्षचतुष्टयम् ॥ २० ॥
लिकुचाम्रफले चैव द्वितीयावरणे [5]न्यसेत्।

[तृतीयावरणे द्रव्याणि]

[6]कुष्ठं [7]कुङ्कुमलोहौ च चन्दनं रक्तचन्दनम् ॥ २१ ॥
[8]मांसीमुरे च तगरमुशीरं तृणदीपकम्[9]। कर्पूरैलालवङ्गं च [10]त्रिफलां च [11]मनःशिलाम् ॥ २२ ॥
[12]अपः क्षीरं च [13]कस्तूरीं चम्पकं करवीरकम्। [14]दूर्वातक्कोलजम्बूकमपामार्गं च बिल्वकम् ॥ २३ ॥
धात्रीं हरीतकीं पीतां [15]माञ्जिष्ठं च पलाशकम्। पुन्नागं वकुलं चैव [16]तृतीयावरणे न्यसेत् ॥ २४ ॥

[चतुर्थावरणे द्रव्याणि]

[17]नागं च सरलं कृष्णमल्लिकाब्जैकपत्रकम्[18]। विष्णुक्रान्तिं च लक्ष्मीं च दूर्वां तुलसिमल्लिके[19] ॥ २५ ॥

---

[1] A: बकुल pour वकुल.
[2] C: दाडिमी pour दाडिमं.
[3] A: आमलीं पनसं चैव; C: आमलं पनसं चैव.
[4] C: क्षीरवृक्षं चतुष्टयम्.
[5] B: यजेत् pour न्यसेत्.
[6] cf. *Ajita*, 28, 234-238 pour les choses à mettre dans les 32 pots du 3[e] *āvaraṇa*:
शालिनीवारकौ चैव प्रियङ्गुयववेणु च। रोचना कुङ्कुमं चैव गैरिकं च मनःशिला ॥
तालमञ्जनकं श्यामं रक्तचन्दनमेव च। श्रीवेष्टं गन्धकरसौ सल्लकी च ततः परम् ॥
तुरुष्कं च विडङ्गं च ततश्चेन्द्रियकाह्वयम्। चव्यं सिद्धार्थकं चैव जीरकद्वयमेव च ॥
माञ्जिष्ठं च जटामांसी तालीसं चाप्यवेणुकम्। कर्पूरं फलिनी लोध्रं माक्षिकं च ततः परम् ॥
तृतीयावरणे न्यस्त्वा तद्बाह्ये तु जनार्दन ॥
[7] C: कोष्ठं pour कुष्ठं.
[8] A: मांसीरमुरं च तगरम्; B: मुरं माञ्जीरतकरम्; C: मांसीरमुशीरं चतुरम्.
[9] A: उशीरह्मणदीपकम्; B: उशीरं ज्ञणदीपकम्; C: उशीरन्तृणदीपकम्.
[10] A: त्रिफलं.
[11] B: मनःशिला.
[12] A: आपक्षीरं.
[13] A: कस्तूरी.
[14] C: दुर्वारं pour दूर्वा.
[15] A: मञ्जिष्ठं; C: मजूलीं.
[16] A: तृतीयावरणं.
[17] cf. *Ajita* 28, 239-244 pour les choses à mettre dans les 40 pots du 4[e] *āvaraṇa*:
पद्मं नीलोत्पलं चैव रक्तमुत्पलमेव च। चम्पकं जातिपुन्नागवकुलं चतुरं गुलम् ॥
करवीरं तथा द्रोणं नन्द्यावर्तं च मल्लिका। धुत्तूरं चैव बन्धूकं जपाकुसुममेव च ॥
कर्णिकारं शमी चैव सहा विष्णुवधूस्तथा। दूर्वा च भृङ्गराजं च चक्रवल्ली वराहिका ॥
भद्रा लक्ष्मीस्तथा चैव गिरिकर्णिद्वयं तथा। अपामार्गद्वयं चैव गोक्षुरं तुलसी तथा ॥
नागपुष्पं च तक्कोलमुशीरं भद्रमेव च। त्रुटि चैलालवङ्गं चाप्यगरुं चन्दनं तथा ॥
एवं द्रव्याणि विन्यस्य चतुर्थावरणे क्रमात् ॥
[18] A: वक्त्रकम् pour पत्रकम्.
[19] A: मल्लिकाम्; B: मल्लिका.

करवीरं श्वेतपद्मं रक्तपद्मं तथैव च । श्वेतार्कं चैव रक्तार्कं भद्रां चैव [1]कृताञ्जलिम् ॥ २६ ॥
वासन्तीं [2]वटशृङ्गं च प्लक्षं चाश्वत्थशृङ्गकम् । भृङ्गराजं च नीवारं मालतीं [3]लोध्रशीर्षकम् ॥ २७ ॥
उत्पलं पाटलं चैव नन्द्यावर्तं [4]तपस्विनीम् । [5]यववेणू प्रियङ्गुं च शालिनीवारश्यामकम्[6] ॥ २८ ॥
[7]कुस्तुम्बरीं च [8]षाष्टिं च [9]कृष्णां नीलोत्पलं[10] शमीम् । [11]चतुर्थावरणे [12]ह्येताञ्शक्रादिक्रमशो न्यसेत् ॥२९॥

[प्रथमावरणदेवताः]

[13]अनन्तो [14]धर्मः सूक्ष्मश्च [15]ज्ञानं चैव शिवोत्तमः । [16]एकनेत्रश्च रुद्रश्च [17]वैराग्यं च [18]त्रिमूर्तिकः ॥३०॥
[19]श्रीकण्ठश्चैश्वरं चैव [20]शिखण्डी [21]प्रथमावृतौ । पाद्यादिकलशानां तु [22]ह्यधिदेवा इति स्मृताः ॥ ३१ ॥

[द्वितीयावरणदेवताः]

[23]वामदेवो[24] भवः सर्वः सर्वज्ञो वरदो [25]हरः । [26]शम्भुरीशो विरूपाक्षो विश्वरूपो महेश्वरः ॥ ३२ ॥

---

1 C: कृताञ्जलिः.
2 A: घट pour वट.
3 A: चोत्र pour लोध्र.
4 A: तपस्विनम् ; C: तपस्विनः .
5 C: यवो वेणुः प्रियङ्गुश्च.
6 A: श्यामकाः pour श्यामकम् .
7 C omet कुस्तु dans कुस्तुम्बरीं.
8 C: काष्ठं pour षाष्टिं.
9 A: कृष्णा pour कृष्णां ; B: कृष्ण.
10 C: नीलोत्पलां pour नीलोत्पलं.
11 A: चतुर्थावरणं.
12 A: ह्येता pour ह्येतान् .
13 cf. *Ajita*, 28, 244-245 pour les divinités correspondant aux 16 pots du 1*er* *āvaraṇa*:

शिवं गौरीं तयोर्यष्ट्वा कुम्भयोस्तदनुक्रमात् । प्रथमावरणे दिक्षु लोकपालान् समर्चयेत् ॥
अन्येष्वष्टसु विद्येशान् पदेषु क्रमशो यजेत् ॥

4 A: धर्मसूक्तिं च ; B: धर्मसूक्ष्मश्च.
15 A: शिवोक्तं ज्ञानमेव च pour ज्ञानं चैव शिवोत्तमः ; B: शिवोक्तज्ञानमेव च.
16 A: एकनेत्रे च रुद्रश्च ; B: एकनेत्रैकरुद्रौ च.
17 B: वैराग्यश्च.
18 A: त्रिमूर्तिकम् ; C: त्रिमूर्तयः .
19 A: श्रीकण्ठं चेश्वरं चैव ; C: श्रीकण्ठे चेश्वरश्चैव.
20 C: शिखण्डीं.
21 A: प्रथमा व्रजे ; C: प्रथमावृते.
22 A omet हि dans ह्यधिदेवाः ; C: अधिदेवधृता स्मृताः .
23 cf. *Ajita*, 28, 244-246 pour les divinités correspondant aux 20 pots du second *āvaraṇa*:

वैकर्तनं विवस्वन्तं भवं शर्वमतः परम् । मार्ताण्डं भास्करं चैव रविं रुद्रं तथैव च ॥
उद्बीजमुग्रनामानं लोकभासकमेव च । लोकसाक्षिमनन्तं च महान्तं भीममेव च ॥
त्रिविक्रमं तथादित्यं सूर्यमंशुमता सह । दिवाकरं तथैशानं द्वितीयावरणे क्रमात् ॥

24 A: वामदेवोद्भवं सर्वं ; C: वामदेवोद्भवः शर्वः .
25 C: भवेत् pour हरः .
26 C: हरः शम्भुर्विरूपाक्षो.

अग्रः पशुपती रुद्रो महादेवः [1]कपर्दिकः । [2]वामोद्भवौ च शर्वश्च सर्वज्ञो वरदोऽन्तकः ॥ ३३ ॥
असंभवोऽरजाश्चैव द्वितीयावरणाधिपाः ।

[तृतीयावरणदेवताः]

[3]जटाधरः शूलधरो विश्वमूर्तिस्त्रिलोचनः ॥ ३४ ॥
अक्षरः शंकरः स्थाणुरीशानः[4] कामशासनः । कालकण्ठः [5]कालकारी सद्गतिः शिव ईश्वरः ॥ ३५ ॥
अग्रगण्यः सदावर्तो वागीशो जटिलः प्रभुः । श्रीकण्ठः कालहारी च [6]पटुरव्यय ईश्वरः ॥ ३६ ॥
गङ्गाधरश्चन्द्रमौलिः[7] कपालीशो गणेश्वरः । पिनाकी धूर्जटिर्नागरूपी[8] विश्वेश्वरस्तथा[9] ॥ ३७ ॥
एते [10]महाष्टरुद्रास्तु [11]तृतीयावरणाधिपाः ।

[चतुर्थावरणदेवताः]

[12]भवश्चोग्रश्च[13] शर्वश्च महादेवश्च रुद्रकः ॥ ३८ ॥
भीमः पशुपतिर्देव[14] ईशानश्च तथैव च । अनन्तश्च सहस्राक्षः सुभगः पुरुषोत्तमः ॥ ३९ ॥
सकलो [15]घण्टाधारी च धूर्जटिः[16] करुणालयः । त्रिशूली च बलोन्मत्तो [वीरभद्र]स्तथैव च ॥ ४० ॥
[[17]अनामयस्तीर्थकरः सत्कृतिर्जीवितेश्वरः ।]

---

[1] A: कपर्दिन: .

[2] A: वमाद्भवेशशर्वश्च ; B: भवोद्भवेश: सर्वश्च ; C: वामोद्भवश्च शर्वश्च.

[3] Le ms. de *Ajitāgama* omet les noms des divinités correspondant aux 32 pots du 3[e] *āvaraṇa*.

[4] A: ईशानां pour ईशान: .

[5] A: कलंकारी.

[6] A: वटम् pour पटुर् ; B: पटम् .

[7] A: चन्द्रमौली.

[8] B: नागविरूपी विश्वर: स्थित: .

[9] A: स्थिता pour तथा.

[10] C: देवाष्टरुद्रास्तु.

[11] B et C: तृतीयाववरणेऽधिपा: .

[12] cf. *Ajita*, 28, 247-252 pour les divinités des 40 pots du 4[e] *āvaraṇa*:

वरदं वीरभद्रं च विमलं विश्वगोचरम् । वेदनिष्ठं पुरानन्दं परमेशं महद्युतिम् ॥
महोरस्कं गुरुं रम्यमेधमानमुखं शुचिम् । त्रिलोचनमनौपम्यं टङ्कपाणिं महागतिम् ॥
शूलपाणिं महोत्साहं महाभैरवरूपिणम् । दंष्ट्रालं च दुराधर्षं हारभूतिं च वज्रिणम् ॥
दण्डिनं शिपिविष्टं च व्याघ्रचर्मधरं हरम् । अनालस्यमलक्ष्यं च सर्वलक्षणलक्षितम् ॥
दुःसहं च त्रयीरूपं देवारिमनलं तथा । गणेशं च सुरेशं च व्यालयज्ञोपवीतिनम् ॥
दुर्गां च सुरसेनाद्यं पूजयेत्क्रमशः सुरान् ॥

[13] C: भवांश्चोग्रश्च.

[14] A: चैव pour देव: .

[15] B: गन्ध pour घण्टा ; A: घण्ट pour घण्टा.

[16] B: धूर्जटी.

[17] Ce qui est entre crochets, manquant dans les manuscrits, a été restitué à partir de vers semblables du *paṭala* précédent.

भद्रो विमोचनश्चैव [1]पाण्डुराङ्गद्युतिः स्मृतः। [2]सामगेयप्रसन्नश्च देवदेवश्च [3]पाण्डुरः॥ ४१॥
[4]संछेद्यो ध्यानधारी च विदिशेशः[5] [6]पराशरः। [7]बृहद्भर्भस्वरोगी च [8]तिमिरघ्नस्त्वमोहकः॥ ४२॥
[9]सर्वगश्च [10]धृतौ कुम्भावुभयोर्हस्तयोरपि। चतुर्थावरणे [11]ह्येतान् [12]स्वस्वनाम्ना तु पूजयेत्॥ ४३॥
[13]गन्धादिभिः समभ्यर्च्य गेयैर्नृत्यैश्च[14] वाद्यकैः। शिवब्रह्माङ्गविद्याङ्गव्योमव्यापित्रियम्बकैः[15]॥ ४४॥
[16]उद्धृत्य शिवकुम्भादीन् मूललिङ्गेऽभिषेचयेत्। अर्चनोक्तं समभ्यर्च्य [17]प्रभूतं च हविर्ददेत्॥ ४५॥
शान्तिहोमं ततः कुर्यादभीष्ट[18]फलसिद्धये॥

इति [19]श्रीमद्रौरवतन्त्रे क्रियापादे [20]अष्टोत्तरशतस्नपनविधिर्नाम त्रयोविंशः पटलः[21]

---

[1] A: पाण्डुरङ्गाद्युतिः; B: पाण्डुरागस्तथैव.
[2] A: समी गेयप्रसन्नश्च.
[3] B: पाण्डरः.
[4] A: संचेद्य ध्यानधारी च; B: संछेद्यध्यानधारी च.
[5] B: विदिशेशाः.
[6] A: परापरः.
[7] A: बृहद्गजस्वरोही च; C: बृहद्गजस्वरोभी च.
[8] A: तिमिरस्वपरोपगः.
[9] C: शर्वाश्च धृतकुम्भास्तदुभयोर्हस्तयोरपि; B: सवेगः pour सर्वगः.
[10] A: घृता कुम्भा; B: धृतोकुम्भान्.
[11] A: ह्येषां pour ह्येतान्.
[12] A: स्वस्वनामानुपूजयेत्.
[13] cf. *Vīrāgama*, 80, 52-55:

उत्थाप्य शिवकुम्भं तु स्नापयेल्लिङ्गमूर्धनि। वर्धनीं तस्य वामे तु स्नापयेद्वौरिमन्त्रतः॥
व्योमव्यापि जपेत्तत्र शिवकुम्भेन स्नापयेत्। पञ्चब्रह्मषडङ्गेन स्नापयेत्कलशांस्ततः॥
प्रथमावरणं स्नाप्य द्वितीयं च तृतीयकम्। चतुर्थं पञ्चमं स्नाप्याप्येवमेव क्रमेण तु॥
पञ्चवर्णहविर्दद्यात्ताम्बूलं च निवेदयेत्। एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात्॥

[14] A: नृत्तैश्च pour नृत्यैश्च.
[15] A: व्योमव्याप्या त्रियम्बकाः.
[16] A: शिवकुम्भादिनोद्धृत्य.
[17] A, B et C: प्रभूतहविषं ददेत्.
[18] B: सर्वेष्ट pour अभीष्ट.
[19] A: श्रीरौरवक्रियापादे; B omet श्रीमद्रौरवतन्त्रे क्रियापादे.
[20] A: अष्टोत्तरशतस्नपनपटलस्त्रयोविंशः; B: अष्टोत्तरशतकलशस्नपनविधिर्नाम.
[21] Le *maṇḍala* pour le *snapana* avec 108 pots n'a que 4 *āvaraṇa* selon le *Rauravāgama*. Selon le *Suprabhedagama*, ce *maṇḍala* en a 5. Pour donner une idée du rituel, nous citons ci-dessous la façon de faire ce *snapana* selon une oeuvre intitulée *Suprabhedāgamapaddhati* d'après un ms. sur feuille de palmier.

अर्चनाक्रमः—शिवकुम्भे ओं हां शिवाय नमः। वर्धन्याम् ओं ह्रीं मनोन्मन्यै नमः।

प्रथमावरणे अष्टकलशेषु—अनन्ताय नमः। सूक्ष्माय नमः। शिवोत्तमाय नमः। एकनेत्राय नमः। एकरुद्राय नमः। त्रिमूर्तये नमः। श्रीकण्ठाय नमः। शिखण्डिने नमः।

द्वितीयावरणे षोडशकलशेषु—भवाय नमः। शिवाय नमः। हराय नमः। रुद्राय नमः। पुष्कराय नमः। पुरुषोत्तमाय नमः। अग्रगण्याय नमः। सदाचाराय नमः। शर्वाय नमः। शम्भवे नमः। महेश्वराय नमः। ईश्वराय नमः। स्थाणवे नमः। ईशानाय नमः। सहस्राक्षाय नमः। सहस्रपदे नमः।

तृतीयावरणे विंशतिकलशेषु—वरीयसे नमः। वरदाय नमः। वन्द्याय नमः। शङ्कराय नमः। परमेश्वराय नमः। गङ्गाधराय नमः। शूलधराय नमः। पराय॑कप्रयोजनाय नमः। सर्वदेवाय नमः। गिरिधन्विने नमः। जटाधराय

नमः। चन्द्रापीडाय नमः। चन्द्रमौलये नमः। अप्रमेयाय नमः। गौरीशाय नमः। विदुषे नमः। वेदान्तसारसन्दोहाय नमः। कपालिने नमः। नीललोहिताय नमः। ध्यानाधाराय नमः।

चतुर्थावरणे अष्टाविंशतिकलशेषु—अपरिच्छेद्याय नमः। गौरीभर्त्रे नमः। गणेश्वराय नमः। अष्टमूर्तये नमः। विश्वमूर्तये नमः। त्रिवर्गाय नमः। स्वर्गसाधनाय नमः। ज्ञानगम्याय नमः। दृढाय नमः। प्रज्ञाय नमः। देवदेवाय नमः। त्रिलोचनाय नमः। वामदेवाय नमः। महादेवाय नमः। पटवे नमः। परिवृढाय नमः। मृडाय नमः। विश्वरूपाय नमः। विरूपाक्षाय नमः। वागीशाय नमः। श्रुतिमत्तराय नमः। सर्वप्रमाणाय नमः। सर्वादये नमः। वृषाङ्काय नमः। वृषवाहनाय नमः। ईशाय नमः। पिनाकिने नमः। खट्वाङ्गिने नमः।

पञ्चमावरणे षट्त्रिंशत्कलशेषु—चित्रवेषाय नमः। चिरन्तनाय नमः। मनोहराय नमः। महायोगिने नमः। गोघ्ने नमः। ब्रह्माङ्गभुवे नमः। जटिने नमः। कालकालाय नमः। कृत्तिवाससे नमः। सुभगाय नमः। प्रणवात्मकाय नमः। ऊर्ध्वचूडाय नमः। चक्षुषे नमः। सुदुर्वाससे नमः। पुरशासनाय नमः। दिगायुधाय नमः। स्कन्दगुरवे नमः। परमेष्ठिने नमः। परार्पणाय नमः। अनादिमध्यनिधनाय नमः। गिरिशाय नमः। गिरिबान्धवाय नमः। कुबेरबन्धवे नमः। श्रीकण्ठाय नमः। लोकवर्णाय नमः। उत्तमाय नमः। गुरवे नमः। सामान्यदेवाय नमः। कोदण्डिने नमः। नीलकण्ठाय नमः। परश्वधिने नमः। विशालाक्षाय नमः। मृगव्याधाय नमः। सुरेशाय नमः। करुणाकराय नमः। धर्मधाम्ने नमः।

एवमभ्यर्च्य, शान्तिहोमं कृत्वा, पूर्ववत् सर्वं समापयेत्।

TABLE DES ĀVARAṆA ET DES KALAŚA DANS CHAQUE ĀVARAṆA SELON LES ĀGAMA

Rauravāgama

	centre:	1	*Śivakumbha*
āvaraṇa	I:	12	*kalaśa*
	II:	24	,,
	III:	32	,,
	IV:	40	,,
	Total	109	,,

Ajitāgama

	centre:	1	*Śivakumbha*
āvaraṇa	I:	16	*kalaśa*
	II:	20	,,
	III:	32	,,
	IV:	40	,,
	Total	109	,,

Vīrāgama

	centre:	1	*Śivakumbha*
āvaraṇa	I:	8	*kalaśa*
	II:	12	,,
	III:	20	,,
	IV:	28	,,
	V:	40	,,
	Total	109	,,

Svāyambhuva

	centre:	1	*Śivakumbha*
āvaraṇa	I:	8	*kalaśa*
	II:	12	,,
	III:	24	,,
	IV:	28	,,
	V:	36	,,
	Total	109	,,

Sūksmāgama

	centre:	1	*Śivakumbha*
āvaraṇa	I:	8	*kalaśa*
	II:	16	,,
	III:	12	,,
	IV:	36	,,
	V:	36	,,
	Total	109	,,

Kāmika

	centre:	1	*Śivakumbha*
āvaraṇa:	I:	8	*kalaśa*
	II:	16	,,
	III:	12	,,
	IV:	32	,,
	V:	40	,,
	Total	109	,,

Suprabheda, Kāṃika, et *Kāraṇa*

	centre:	1	*Śivakumbha*
āvaraṇa	I:	8	*kalaśa*
	II:	16	,,
	III:	20	,,
	IV:	28	,,
	V:	36	,,
	Total	109	,,

[चतुर्विंशः पटलः]

[1][नवाधिकसहस्रस्नपनविधिः][2]

[3]अतः परं प्रवक्ष्यामि नवाधिकसहस्रकम् ।

---

[1] cf. *Kāmika*, II, 4, *Kāraṇa*, I, 39, *Suprabheda*, I, 15, *Vīra*, *paṭala* 77, *Svāyambhuva*, *paṭala* 18, *Makuṭa*, *paṭala* 9.

[2] Les textes āgamiques ne s'accordent pas non plus sur les détails du *snapana* avec 1009 pots. Selon le texte de *Rauravāgama*, il y a 11 *āvaraṇa* dans le *maṇḍala* pour le *snapana* avec 1009 *kalaśa*.

La répartition des *kalaśa* (pots) se fait ainsi:

centre:	1	*śivakumbha* avec *vardhanī*:
āvaraṇa I:	8	*kalaśa*
II:	64	,,
III:	72	,,
IV:	80	,,
V:	88	,,
VI:	96	,,
VII:	104	,,
VIII:	112	,,
IX:	120	,,
X:	128	,,
XI:	136	,,
Total	1009	*kalaśa*.

Il manque de nombreux vers dans ce *paṭala*. Sur les 64 noms de choses à mettre dans les 64 pots du 2*ème āvaraṇa*, on trouve seulement 40 noms, et les vers donnant les 24 autres noms manquent, semble-t-il. De même, sur les 72 noms des divinités qui président aux 72 pots du 3*ème āvaraṇa*, on en trouve 50: il en manque donc 22. Dans le 4*ème āvaraṇa*, on trouve 70 noms; il en manque 10. Il manque également le vers qui marque la fin des noms dans le 5*ème āvaraṇa*. Sur les 104 noms du 7*ème āvaraṇa*, on n'en trouve que 21 et le reste manque. Sur les 136 noms de divinités du 11*ème āvaraṇa*, on n'en trouve que 119, les 17 autres manquent.

Le texte indique 1000 noms de divinités pour les 1000 pots à placer dans les *āvaraṇa* 2 à 11. Il semble que cette liste de noms suive une certaine version d'un *Śivasahasranāmastotra*. La version que l'on trouve dans notre texte est différente de celles trouvées dans le *Suprabhedāgamapaddhati* et le *Dīptāgama*, ainsi que de celles du *Mahābhārata*, du *Liṅga-purāṇa* et du *Śiva-purāṇa*. Tant que l'on n'aura pas trouvé un bon manuscrit de cet *āgama* ou un *Śivasahasranāmastotra* qui suive l'ordre donné ici, il sera impossible de reconstituer la portion manquante. Nous n'avons pu que signaler en note les absences des vers, chaque fois qu'elles semblaient se produire.

[3] cf. *Ajitāgama*, 28, 1-3:

स्नपनं [1]सर्वकामार्थसाधनं शृणु [2]सुव्रत ॥ १ ॥
[3]त्रिपञ्चहस्तमारभ्य [4]त्रिविंशत्स्यात्करावधिः । एकैकहस्तवृद्ध्या तु नवधा मण्डपं स्मृतम् ॥ २ ॥
समाश्रं [5]वायताश्रं वा षण्णवत्यङ्घ्रिसंयुतम् । [6]मध्ये तन्तु नवांशं स्यात्तूष्यारोहितशीर्षकम् ॥ ३ ॥
[7]एकाशीतिपदं तस्मिन्मध्ये नन्दांशमम्बुजम् ।

अतः परं प्रवक्ष्यामि शिवस्य स्नपनं हरे । अकालमृत्युशमनं सर्वरोगभयावहम् ॥
सर्वपापप्रशमनं शोकमोहविनाशनम् । सर्वाभीष्टप्रदं पुंसां सर्वारिष्टनिवारणम् ॥
आयुःश्रीकीर्तिजयदं तुष्टिपुष्टिप्रदं सदा ॥

[1] C: सर्वकाम्यार्थ साधनं. [2] A: सुव्रतम्.

[3] cf. *Vīrāgama*, 77, 4-7:

प्रासादस्याग्रतश्चैव मण्डपं चतुरश्रकम् । त्रिहस्तं पञ्चहस्तं वा षट्सप्ताष्टनवं तथा ॥
एकादशकरं वाथ त्रयोदशकरं तु वा । पञ्चदशकरं वाथ मण्डपं कारयेत्ततः ॥
अधमं पूर्वत्रयं सिद्धं मध्यमं चापरं भवेत् । प्रोक्तं तु नवभेदेन चोच्यते तन्मया द्विज ॥

voir aussi *Ajitāgama*, 28, 11-13:

त्रयोदशकरैः श्रेष्ठं मध्यं सप्तकरैरपि । अधमं पञ्चहस्तैश्च चतुष्षष्टयङ्घ्रिसंयुतम् ॥
प्रथमं मध्यमन्यच्च द्वादशस्तम्भसंयुतम् । रुद्रतालोच्छ्रया हस्ताः प्रथमस्य प्रकीर्तिताः ॥
शेषयोर्नवतालोच्चं मण्डपानां विधिर्भवेत् ।

[4] A: त्रिविंशः pour त्रिविंशत्; C donne त्रयोभीतमशीर्वकम् et omet les demi-vers 2*b*, 3*c* et 3*b*. Ce mot, dépourvu de sens, semble provenir de la fusion de त्रिविंश avec la dernière partie du demi-vers 3*b*.

[5] B: वासमाश्रं pour वायताश्रं. [6] A: मध्येकं तु तवांशं स्याल्लूपालोहितशीर्षकम् .

[7] cf. *Ajita*, 28, 49-55:

पूर्वोक्तमण्डपे सम्यक् सूत्रपातं तु कारयेत् । अष्टभिर्द्विगुणैः सूत्रैः प्राङ्मुखैर्व्यूहसप्तकम् ।
उदङ्मुखैस्तथा सूत्रैर्व्यूहसप्तकमेव हि । व्यूहप्रमाणं प्रादेशैः पञ्चभिस्समुच्यते ॥
सूत्रात्सूत्रान्तरं चापि द्विप्रादेशप्रमाणतः । सूत्रद्वयान्तरं सर्वं लेपयेद्गोमयाम्बुना ॥
सूत्राणि च सुलुप्तानि वीथयोऽत्र भवन्ति हि । प्राङ्मुखा वीथयश्चाष्ट अष्ट चोदङ्मुखा अपि ॥
वीथीनां संङ्गमस्थाने मध्यस्तम्भस्थितिर्भवेत् । व्यूहान्येकोनपञ्चाशद् वीथिमध्यगतानि वै ॥
एवमास्फालिते सूत्रे ततो मन्त्री शिवाम्बुना । प्रोक्षयित्वा हृदा व्यूहान् स्थण्डिलांस्तेषु कारयेत् ॥

cf. *Vīra*, 77, 20-27:

सुमुहूर्ते सुलग्ने च सूत्रपातं तु कारयेत् । रज्जुना शालिपिष्टेन कर्तव्यं लक्षणान्वितम् ॥
अष्टाधिकं च विप्रेन्द्र चत्वारिंशच्च संयुतम् । सूत्रपातं प्रकर्तव्यं प्रागग्राणीह विन्यसेत् ॥
उत्तराग्रं तथैव स्यादेवमेव क्रमेण तु । मात्राङ्गुलेन विप्रेन्द्र अन्तरं तालमात्रकम् ॥
मध्यमे पञ्चविंशत्तु तद्द्वयावृतवीथिकान् । बाह्ये पञ्चदशं स्थित्वा पदद्वयं तु वीथिका ॥
बाह्ये पदद्वयं न्यस्त्वा पञ्चपञ्चपदान्तरे । पूर्वं च दक्षिणं चैव पश्चिमं चोत्तरं तथा ॥
एवमेव क्रमेणैव वीथीनां लोपयेत्क्रमात् । मध्यमात्परितो विप्र अष्टव्यूहान्व्यपोह्य च ॥
व्यूहान्तरे प्रकर्तव्यं व्यूहस्थापनमाक्रमात् । तद्बाह्ये परितो विप्र कलशस्थानमुच्यते ॥

cf. *Suprabheda*, I, 15, 97-101:

प्रागग्रं द्वादशं सूत्रमुदगग्रं तथैव च । एकविंशच्छतं कृत्वा पदं तत्र विनायक ॥
चतुष्कोणेषु मतिमांश्चतुःसूत्राणि विन्यसेत् । आग्नेयादिसमारभ्य पदैकान्तरितं यथा ॥

तदावृताष्टभागेषु[1] शान्तिहोमं समाचरेत् ॥ ४ ॥
[2]तद्बाह्यैका तु वीथी स्याद्द्वाराष्टकसमन्विता । तद्बाह्ये तु महाशासु दिशं प्रति रसांशकम् ॥ ५ ॥
कोणं प्रति युगांशं स्याच्चत्वारिंशत्पदावृतम्[3] । पञ्चतालप्रमाणेन प्रत्येकं पदविस्तृतम् ॥ ६ ॥
तत्पदं पञ्चपञ्चांशं चत्वारिंशच्च कारयेत् । मध्येऽम्बुजं नवांशं स्यात् [4]कर्णिकासदलाष्टकम् ॥ ७ ॥
एवं कृते [5]नवाधिकसहस्र[6]पदमुच्यते । शेषाणि लेपयेद्धीमान्गोमयेन तु वारिणा ॥ ८ ॥
गव्यैरष्ट[7]मृदद्भिश्च प्रोक्षयेदस्त्रमन्त्रतः । क्षालितैः [8]शोधितैः शुष्कैः पाषाणादिविवर्जितैः ॥ ९ ॥

[स्थण्डिलविधिः]

[9]शालिभिः स्थण्डिलं कुर्यात् प्रस्थं प्रतिपदं विदुः । प्रत्येकं स्थण्डिलं कुर्याद्युगाश्रं वाथ वृत्तकम् ॥ १० ॥

षट्त्रिंशद्वात्रसंयुक्तं गात्रस्थानावृतं त्यजेत् । द्वारे द्वे द्वे पदं त्यक्त्वा चत्वारिंशत्पदं स्थितम् ॥
तेषां मध्यमकोष्ठं तु कृत्वा नवपदं ततः । एकैकं पदमध्ये तु पञ्चविंशतिसंख्यया ॥
कलशानि ततोऽप्यष्ट सहस्रैकादशावृतौ ॥

cf. *Svāyambhuva*, 18, 8-10:

प्रथमं सूत्रसंख्याश्च कुम्मसंख्यास्ततः शृणु । प्रागग्रमुदगग्रं च द्विद्विसूत्रं प्रसारयेत् ॥
तस्य मध्ये न्यसेच्छङ्कुं भ्रामयेत्तु विचक्षणः । एकविंशतिसूत्राणि वृत्तवद्भ्रामयेत्ततः ॥
सूत्रात्सूत्रान्तरालं च विंशत्यावरणं भवेत् । श्रुतिद्वारसमायुक्तं भूतसूत्राणि सैत्यजेत् ॥

[1] A: तु pour षु.
[2] A, B et C: तद्बाह्यैकन्तु.
[3] B: पदैर्वृतम् pour पदावृतम् .
[4] A: कर्णिकासदलाचकम् .
[5] A: नवाधिक्य pour नवाधिक.
[6] A: पाद pour पद.
[7] A: मृदाद्रिश्च pour मृदद्रिश्च.
[8] C: साधकैः pour शोधितैः .
[9] cf. *Svāyambhuva*, 18, 11-16:

रजनीपिष्टचूर्णं च पदं द्रोणैश्च शालिभिः । तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् ॥
तदर्धैस्तण्डुलैर्भूय्य तदर्धैश्च तिलैरपि । तदर्धलाजसंयुक्तं दर्भैः पुष्पैः परिस्तरेत् ॥
स्थण्डिलं कल्पयेद्धीमान्पदं प्रति पदं प्रति । प्रस्थखार्याढकान्तं च कलशानां पृथक् पृथक् ॥
तन्तुना वेष्टयेद्धीमान् कलशांश्चैव चित्रितान् । पूर्वं प्रक्षाल्य चास्त्रेण प्रोक्षयेत्पुरुषेण तु ॥
शिवकुम्भं च तन्मध्ये तस्य वामे मनोम्मनीम् । पञ्चरत्नं सुवर्णं च निक्षिपेद्धृदयेन तु ॥
वर्धनीं स्वर्णपुष्पं च वस्त्रयुग्मेन वेष्टयेत् । गन्धपुष्पादिभिः पूज्य चोपदेशक्रमाद्यजेत् ॥

cf. *Vīra*, 77, 27-32:

पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत् । शालिना विकिरेत्तत्र लक्ष्मणेन समन्वितम् ॥
कलशान्प्रति निक्षिप्य आढकं चोत्तमं भवेत् । द्विप्रस्थं मध्यमं प्रोक्तं प्रस्थं चाधममुच्यते ॥
एवमेव प्रकारेण हीनं चापि न कारयेत् । हीनं चेच्छिवविप्रेन्द्र व्याधिरोगभयंददेत् ॥
शाल्यर्धतण्डुलं न्यस्य तण्डुलार्धतिलं न्यसेत् । तिलतण्डुलहीने तु ज्वरादिपीडनं भवेत् ॥
पद्ममष्टदलं चैव दर्भैश्चैव परिस्तरेत् । पुण्याहं वाचयेत्तत्र शुद्धैरुत्थैरिति ब्रुवन् ॥

[1]प्रत्येकमम्बुजं च स्यात्साष्टपत्रं सकर्णिकम् । कर्णिकायां न्यसेत्कूर्चं[2] [3]पश्चिमाग्रं विशेषतः ॥ ११ ॥
तण्डुलैः समलंकृत्य [4]तिलैर्लाजैश्च दर्भकैः । [5]प्रोक्षयेत्पञ्चगव्येन [6]पञ्चब्रह्माण्युदाहरन् ॥ १२ ॥

[व्यूहेष्वक्षरन्यासः]

[7]यकरादिहकारान्तं प्रथमावरणे न्यसेत् ।[8] चत्वारिंशतिव्यूहेषु [9]कादिमान्तानि विन्यसेत् ॥ १३ ॥
सर्वव्यूहे[10]ऽक्षरानेतान्विन्यसेत्तु पदं प्रति । [11]ओंकारादि नमोऽन्तं च [12]मध्ये न्यस्याक्षरं न्यसेत् ॥ १४ ॥
अन्यद्वा मूलमन्त्रं तु कर्णिकायां [13]प्रविन्यसेत् । [14]विद्येशानां तु मूलानि प्रथमावरणे न्यसेत् ॥ १५ ॥
[15]सहस्राक्षरं न्यसेत् [16]सर्वं परेषु [17]च पदादिषु । गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ॥ १६ ॥
ततो [18]मज्जनशालायां[19] जलद्रोणीष्वनेकशः[20] । वस्त्रपूतं सुशुद्धाम्बु [21]महानद्या गृहीतकम् ॥ १७ ॥

---

1 A: प्रत्येकमम्बुजस्य स्यात् ; C: प्रत्यम्बुजस्य नन्दांशं.
2 C: कुम्भं pour कूर्चं.
3 C: पश्चिमाग्रे.
4 A: तिलैर्लाजैः सदर्भकैः .
5 cf. *Ajita*, 28, 58-63:

प्रोक्षयित्वा शिवास्त्रेण विलिखेदक्षराणि तु । पद्ममध्ये लिखेत्कूटमकाराक्षरसंयुतम् ॥
प्रथमावरणे दिक्षु यकारादिचतुष्टयम् । शकारादिहकारान्तान्विदिक्षु चतसृष्वपि ॥
स्वरषोडशकं पश्चाद् द्वितीयावरणे न्यसेत् । तृतीयावरणे चैव कवर्गं पूर्वपञ्चके ॥
चवर्गं दक्षिणे चापि टवर्गं पश्चिमे भवेत् । तवर्गमुत्तरे तस्मात्पकारं वह्निगोचरे ॥
फकारं नैर्ऋते प्रोक्तं बकारं मारुतेऽपि च । भकारं विन्यसेदैशे व्यूहे मन्त्री गतत्वरः ॥
कलशस्थापनं कुर्यात्तेषु पश्चादतन्द्रितः ॥

6 A: पञ्चब्रह्ममुदाहरन् .
7 C: यकारादिहकारान्तान् .
8 A, B et C ajoutent: विद्येशानां तु मूलानि प्रथमावरणे न्यसेत् ; voir note 14.
9 B: कादियान्तानि.
10 Le mot *akṣara* dans le sens la ' syllabe ' ou ' lettre ' est généralement au neutre, mais on le trouve comme ici au masculin dans la *Rāmatāpanī Upaniṣad*.
11 cf. *Kāmika*, II, 4, 141-143:

विद्येशा मध्यमे देवास्त्वन्यत्र शिव एव हि । स च नाम्नां सहस्रैस्तु पठ्यते तद्विशेषतः ॥
पठन्वा पूजयेदीशं शिवनाम्नाथ केवलम् । कूटाक्षरादिसंयुक्तं चतुर्थ्यन्तसमन्वितम् ॥
स्वाहान्तं वा नमस्कारप्रान्तं प्रणवपूर्वकम् ॥

12 A: मध्येऽक्षरं न्यसेच्चयेत् .
13 A: तु pour प्र.
14 Les mss. A, B et C répètent ce demi-vers après le demi-vers n° 13*a*.
15 A: ससृक्षीरान्यसेत् .
16 A: सर्वपादेषु.
17 A: पुरतादिषु pour च पदादिषु ; B: पुरदादिषु.
18 C: मन्डन pour मज्जन.
19 A: शालाय pour शालायां.
20 A: अनेकसु pour अनेकशः ; B: अनेकासु.
21 C: तीर्थानद्या pour महानद्या.

[1]वरालतुटिकर्पूरोशीरादिचूर्णमिश्रितम्[2] । पञ्चब्रह्मशिवाङ्गैश्च [3]मूलमन्त्रैश्च मन्त्रितम् ॥ १८ ॥
शिवतोयमिदं ख्यातं [4]सुगन्धिकुसुमान्वितम् । साधयित्वा [5]पुरो गीतं कलशान् साधयेत्ततः ॥ १९ ॥
[6]श्रेष्ठान्तराधमान् लोहैर्मृद्भिर्वा कलशान्कुरु । वेदाग्निपक्षप्रस्थैस्तु[7] पूर्णं [8]श्रेष्ठान्तराधमम्[9] ॥ २० ॥
[10]भिन्नं कालं[11] च सुषिरं वर्ज्य निर्दोषकान् ग्रहेत्[12] । [13]त्रिगुणीकृतसूत्रेण वेष्टयेत्तु यवान्तरम् ॥ २१ ॥

---

[1] cf. *Kāmika*, II, 4, 63-64:

वरालत्रुटिकर्पूरत्वगेलोशीरजातयः । एभिर्युक्तं शिवाम्भः स्याच्छिवमन्त्राभिमन्त्रितम् ॥
तेनैव पूरयेत्कुम्भान् वर्धनीं कलशानपि ॥

[2] A: वरालतुटिकर्पूरो चीराद्यैश्चूर्णमिश्रितम् ; B: वरालत्रुटिकर्पूरोशीराद्यैश्चूर्णमिश्रितम् ; C: परालतुनुकर्पूरोशिराद्यैश्चूर्णमिश्रितम् .

[3] A: मूलमन्त्रं समन्त्रकम् ; B: मूलमन्त्रादिमन्त्रितम् .

[4] B: सुगन्ध pour सुगन्धि ; C: हुगन्धं.

[5] A: पुरो शीतं.

[6] A: श्रेष्ठान्नराधमे ; C: श्रेष्ठान्तरेऽधमैर् .

[7] A: प्रस्तै तु pour प्रस्थैस्तु.

[8] B: श्रेष्ठान्तरामयम् .

[9] cf. *Vīra*, 77, 32-33:

कलशानां विधिं वक्ष्ये चोत्तमं द्रोणपूरितम् । शिवपूरितं मध्यममाढकेनाधमं भवेत् ॥

cf. *Ajita*, 28, 24-25:

सौवर्णं राजतं वाथ ताम्रजं मृण्मयं तु वा । वेदाग्निनयनप्रस्थं संपूर्णं स्याद्यथाक्रमम् ॥
श्रेष्ठमध्यकनिष्ठास्तु कलशाः स्नपनोचिताः ॥

[10] cf. *Vīra*, 77, 33-34:

अपक्वमतिपक्वं च हीनं कालं च वर्जयेत् । एवमेव प्रकारेण कलशान् गृह्य यत्नतः ॥

voir aussi *Kāraṇa*, I, 38, 17-21:

कालं भिन्नं च सुषिरं भेदं छेदं च लीनकम् । दुर्गन्धं च पुराणं च वर्जयेद्देशिकोत्तमः ॥
कालं च कलहं विद्याद् भिन्नं चैव कुलक्षयम् । महावातप्रकोपं च सुषिरं च विशेषतः ॥
छेदं विच्छेदनं कुर्याद् भेदं भेदाय वै तथा । लीनं व्याधिकरं चैव दुर्गन्धं बालनाशनम् ॥
स्त्रीनाशं स्यात्पुराणं तु संग्रहेद्विम्बसन्निभम् । तस्मात्सर्वप्रयत्नेन दोषयुक्तं विवर्जयेत् ॥

[11] C: भिन्नकारं.

[12] A: गृहेत् pour ग्रहेत् .

[13] cf. *Kāraṇa*, I, 38, 21-24:

कलशान् वेष्टयेद्विद्वानेकद्वित्रिकतन्तुभिः । एकद्वित्रियवान्तं स्याच्छिवकुम्भं च वर्धनीम् ॥
अन्यांश्च कलशांश्चैव गवाक्षसदृशान्तरान् । मण्डपस्योत्तरे विद्वान् दर्भैश्चैव परिस्तरेत् ॥
क्षालयेत्कलशांस्तत्र प्रोक्षयेत्पुरुषेण तु । अधोमुखांश्च कलशान्स्थापयेत्तु कुशोपरि ॥

voir aussi *Vīra*, 77, 34-35:

एवमेव प्रकारेण कलशान् गृह्य यत्नतः । त्रिगुणीकृतमेकं वा वेष्टयेत्कुञ्जराक्षवत् ॥
क्षालयेद्वारिणा विप्र दर्भोपरि न्यसेद्दृढा ॥

गवाक्षं कुञ्जराक्षं वा वेदाश्रं वा [1]प्रयोजयेत् । [2]क्षालयेल्लेपिते भौमे कुशोपर्यवकुण्ठयेत्[3] ॥ २२ ॥
[4]वर्धनीं शिवकुम्भं च शिवकार्याभिपूरितौ । प्राग्वत्सूत्रं तु संवेष्टय [5]भागं प्रत्यवकुण्ठयेत्[6] ॥ २३ ॥
[7]दर्भानुपरि संस्तीर्य प्रोक्षयेत्तु हृदाम्भसा । शिवकुम्भं [8]तथोद्धृत्य [9]पूरयेत्तु शिवाम्भसा ॥ २४ ॥
[10]कर्णिकायां न्यसेत्कुम्भं पञ्चरत्नसमन्वितम् । हिरण्यं वा विनिक्षिप्य नववस्त्रेण वेष्टयेत् ॥ २५ ॥
[11]कूर्चं [12]न्यस्योत्तरे तस्मिन्न्यस्य कूटाक्षरं ततः । [13]चतुर्भुजं त्रिनेत्रं च चन्द्रार्धकृतशेखरम् ॥ २६ ॥
जटामकुटसंयुक्तं भस्मोद्धूलितविग्रहम् । [14]कृष्णापरशुसंयुक्तं पद्मपीठोपरि स्थितम् ॥ २७ ॥
ध्यात्वा सदाशिवं [15]देवं शिवकुम्भे [16]तु पूजयेत् । [17]वर्धनीमुत्तरे स्थाप्य वस्त्रहेमादिसंयुताम्[18] ॥ २८ ॥

---

[1] B: प्रयोजकम् .

[2] A: क्षालयेलौपिते भूमं ; C: क्षालयेल्लेपनं भूमौ ; B: क्षालिते लेपिते भूमौ.

[3] A: अवगुण्ठयेत् pour अवकुण्ठयेत् .

[4] cf. *Ajita*, 28, 64-68:

वस्त्रेण शोधयेत्पूर्वं गन्धचूर्णयुतं जलम् । तेनैव पूरयित्वादौ शिवकुम्भं च वर्धनीम् ॥
सकूर्चौ रत्नहेमाढ्यौ गन्धचन्दनचर्चितौ । वस्त्रेणावेष्टितग्रीवौ सापिधानौ च साक्षतौ ॥
मालापल्लवसंयुक्तौ शिवयोः कुम्भकाबुभौ । अस्त्रेण प्रोक्षयित्वाब्जं कर्णिकायां शिवेन तु ॥
गौरीमन्त्रेण जाप्यं तु स्थापयेत्स्थापकोत्तमः । शिवकुम्भोत्तरे भागे वर्धन्याः स्थानमुच्यते ॥
उत्तराभिमुखां तस्या नासिकां परिकल्पयेत् ॥

[5] A: भावप्रत्यावगुण्ठयेत् .

[6] C omet le vers n° 23.

[7] B: हृदा दर्भान् परिस्तीर्य.

[8] A, B et C: ततोद्धृत्य.

[9] B: पूरयेत.

[10] cf. *Kāmika*, II, 4, 34-35:

माणिक्यं चेन्द्रनीलं च वैडूर्यं च प्रवालकम् । मुक्ता च पञ्चरत्नं स्यादभावे हेम संमतम् ॥

[11] cf. *Ajita*, 28, 40-42:

कूर्चः स्याच्छिवकुम्भस्य पञ्चविंशाङ्गुलायतम् । दशभिर्मध्यमं तत्स्यात्सप्तभिश्चाधमं भवेत् ॥
नवभिस्सप्तभिश्चैव पञ्चभिश्च यथाक्रमम् । गौरीकुम्भस्य कूर्चं स्याच्छ्रेष्ठमध्यकनीयसम् ॥
सप्तभिः पञ्चभिश्चैव त्रिभिश्चापि क्रमेण तु । पूर्ववत्कूर्चमुद्दिष्टं कलशानां जनार्दन ॥

[12] A: न्यसोत्तरस्तस्मिन्न्यस्त्वा ; C: न्यस्त्वोत्तरं तस्मिन्न्यस्त्वा.

[13] cf. *Ajita*, 28, 105-107:

श्वेतं त्रिलोचनांशं तु जटामकुटसंयुतम् । चन्द्रावयवलक्ष्माणं सर्वाभरणभूषितम् ॥
चतुर्भुजं प्रसन्नास्यं वरदाभयहस्तकम् । कृष्णापरशुसंयुक्तं ध्यात्वा चावाहनादिभिः ॥
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यान्तं स्वमन्त्रतः ॥

[14] B: कृष्णं pour कृष्णा.

[15] B: ह्येवं pour देवं.

[16] A: शिवकुम्भेन pour शिवकुम्भे तु.

[17] cf. *Ajita*, 28, 67-68:

शिवकुम्भोत्तरे भागे वर्धन्याः स्थानमुच्यते । उत्तराभिमुखां तस्या नासिकां परिकल्पयेत् ॥

[18] B: संयुतम् pour संयुताम् .

[1]तस्यां[2] मनोन्मनीं [3]ध्यायेद्द्विभुजां च द्विलोचनाम्। नीलालकसमायुक्तां दुकूलवसनान्विताम्॥ २९॥
उत्पलं दक्षिणे हस्ते धृत्वा [4]वामे प्रसारितम्। करण्डमकुटोपेतां किंचित्प्रहसिताननाम्॥ ३०॥
[5]सुस्थितां देवपार्श्वेऽङ्घ्रिं चान्यत्कुञ्चितमम्बुजे। [6]गणाम्बिकेतिमन्त्रेण ध्यात्वा गन्धादिभिर्यजेत्॥ ३१॥
[7]लिङ्गं [8]च योनिमुद्रां च [9]देवदेव्योः प्रदर्शयेत्।

[प्रथमावरणे द्रव्याणि देवताश्च]

[10]पाद्यमाचमनार्घ्ये च पञ्चगव्यं कुशोदकम्॥ ३२॥
क्षीरं दधि घृतं चैव स्थापयेत्प्रथमावृते[11]। [12]अनन्तादिशिखण्ड्यन्तांस्तेषु गन्धादिभिर्यजेत्॥ ३३॥

[द्वितीयावरणे द्रव्याणि]

[13]मधु चेक्षुरसं चैव [14]यवं वेणुं कुशोदकम्। तिलसर्षपलाजं च [15]कदलीं पनसं तथा॥ ३४॥
नालिकेरं च लिकुचं [16]रजनीं [17]मातुलुङ्गकम्। [18]सक्तुं च दाडिमं चैव [19]नारङ्गद्वयमेव च॥ ३५॥
[20]आम्रं भस्म च जम्बूकं [21]शकृच्चूर्णं तथैव च। गोमूत्रं रजनीसारं शुद्धाम्बु तुलसीद्वयम्॥ ३६॥

---

[1] cf. *Ajita*, 28, 107-108:

हेमवर्णां द्विनेत्रां च पूर्णचन्द्रनिभाननाम्। द्विभुजां सर्वदृष्टाङ्गीं सर्वाभरणभूषिताम्॥
वर्धन्यां तु यजेद्देवीं स्वनामपदमन्त्रतः॥

[2] C: तस्मिन् pour तस्यां. [3] B: ध्यात्वा pour ध्यायेद्.

[4] A: घर्मे pour वामे.

[5] A: सुस्थिता देवपार्श्वाङ्घ्रिमन्यं कुञ्चितं बुजे; B: सुस्थितां देवपार्श्वे तु अन्याङ्घ्रिं कुञ्चिताम्बुजे; C: सुस्थितां देवपार्श्वे च प्रामान्यं कुञ्चितं भुजे.

[6] A: गणाम्बिकायेति मन्त्रेण; B: अम्बिकेत्यादिमन्त्रेण.

[7] cf. *Ajita*, 28, 109-110:

कर्णिकायां ततो मुद्रां शिवयोः कुम्भयोरपि। लिङ्गमुद्रां शिवे चाथ वर्धन्यां च मनोरमाम्॥
दर्शयेत्सुरभिं मुद्रामुभयोर्देशिकस्सदा॥

[8] pour लिङ्गमुद्रा voir *Kārana*, I, 28, 7-8. [9] A: देवदेव्ये.

[10] cf. *Kāmika*, II, 4, 95:

पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम्। क्षीरं दधि घृतं चैव प्रथमावरणे न्यसेत्॥

voir aussi *Ajita*, 28, 110:

पाद्यादिषु ततोऽष्टौ च विद्येशांश्च प्रपूजयेत्। स्वनामपदमन्त्रैस्तान् सुसंस्कृतांस्ततोऽर्चयेत्॥

[11] B: प्रथमावृतौ. [12] A: अनन्तादिशिखण्ड्यन्तं तेषु.

[13] A: मधुरिक्षुरसं; B: मधु त्विक्षुरसं. [14] B et C: यववेणुकुशोदकम्.

[15] A: कदलीपनसस्तथा. [16] A: रजनी.

[17] B: मातुलिङ्गकम्. [18] A: सकूर्चदाडिमं चैव.

[19] B: तथा नारङ्गमेव च. [20] A: आम्रभस्मं; B: आम्रभस्म.

[21] A: सकृच्चूर्णं; B: सकुचूर्णं.

[1]अपामार्गद्वयं चैव विष्णुक्रान्तिं च [2]धुर्तुरम्। [3]तपस्विन्यब्जकं चैव [4]चम्पकद्वयमेव च ॥ ३७ ॥
[5]मल्लिकां [6]वामनां चैव [7]मदयन्तीं तथैव च। [8]द्वितीयावरणे ह्येवं चतुष्षष्टिं च विन्यसेत्[9] ॥ ३८ ॥

[तृतीयावरणे द्रव्याणि]

[10]माणिक्यं पद्मरागं च वैडूर्यं च प्रवालकम्। मौक्तिकं स्फटिकं वज्रमिन्द्रनीलं तथैव च ॥ ३९ ॥
[11]पुष्परागमपीत्येतन्नवरत्नमुदाहृतम्। [12]तृतीयावरणे [13]त्वेतन्नवरत्नाम्बु [14]चेष्यते ॥ ४० ॥

---

[1] A, B et C: अपामार्गदलं.
[2] A: धूर्धुरम्.
[3] A: तपस्वं त्र्यम्बकं चैव ; B: तपस्वी त्र्यम्बकं चेव ; C: तपस्त्रियम्बकं चैव.
[4] A, B et C: द्वयं चम्पकमेव च.
[5] A: मल्लिका.
[6] B: वामनं.
[7] B: मदयन्ती.
[8] C omet les deux vers n° 38 et 39.
[9] Sur 64 noms des choses (*dravya*) à mettre dans les 64 pots (*kalaśa*) du second *āvaraṇa*, on n'en trouve que 40. Les vers qui donnaient les 24 autres noms manquent ici. Généralement, dans les autres textes āgamiques ou dans les compilations, les noms des divinités et des choses donnés dans les chapitres précédents traitant du *snapana* sont répétés et mis dans un ordre convenable dans les chapitres suivants chaque fois qu'il en est besoin. Dans ce texte, nous trouvons dans les vers 16 à 29 du chapitre précédent (*snapana* avec 108 pots) les noms des choses à mettre dans les 108 pots. Une étude comparée pourrait peut-être nous aider à trouver les 24 choses manquantes, mais il resterait encore à mettre ces noms en ordre, problème qui ne peut être résolu qu'en trouvant un manuscrit complet. On pourrait par exemple retrouver hypothétiquement les noms des choses qui manquent comme nous l'avons fait ci-dessous, mais il faudrait être sûr de leur ordre:

[धात्रीं हरीतकीं बिल्वं क्षीरवृक्षचतुष्टयम्। करवीरं पलाशं च पुन्नागं वकुलं तथा ॥
नागं च सरलं कृष्णमल्लिकां चैकपत्रकम्। वासन्तीं चोत्पलं लक्ष्मीं नन्द्यावर्तं च पाटलीम् ॥
श्वेतार्कं चैव रक्तार्कं भद्रां चैव कृताञ्जलिम् ॥]

[10] cf. *Kāmika*, II, 4, 101-102:

माणिक्यं चेन्द्रनीलं च मुक्तावैडूर्यवज्रकम्। पुष्यरागं प्रवालं च स्फटिकं मरकतं तथा ॥
पद्मरत्नमिति शेयमाद्याभावे द्वितीयकम्। रत्नोदकमिति प्रोक्तम्.

voir aussi *Suprabheda*, I, 15, 86-87:

पद्मरागं च वैडूर्यं वज्रं पुष्यं तथैव च। स्फटिकं मौक्तिकं नीलमिन्द्रनीलं प्रवालकम्।
एतेषु नवरत्नाम्बु.

[11] B: पुष्यरागं.
[12] C: द्वितीयावरणे.
[13] B: हि pour तु dans त्वेतन्नवरत्नाम्बु.
[14] A omet च dans चेष्यते.

[चतुर्थावरणे द्रव्याणि]

[1]सुवर्णं रजतं ताम्रमायसं त्रपु सीसकम्। [2]आरकूटं च कांस्यं च लोहाष्टकमुदाहृतम्॥ ४१॥
चतुर्थावरणे [3]त्वेतल्लोहाम्बु संप्रपूरितम्।

[पञ्चमावरणे द्रव्याणि]

[4]सौराष्ट्रमञ्जनं [5]श्यामा [6]हरितालमनःशिलाः॥ ४२॥
गैरिकं [7]रोचनं चैव [8]धात्वम्बु पञ्चमावृते।

[षष्ठावरणे द्रव्याणि]

[9]शालि [10]नीवारमुद्गं च प्रियङ्गुतिलसर्षपम्॥ ४३॥
[11]श्यामा षष्टिर्यवो वेणुर्धान्योदं[12] षष्ठकावृते[13]।

---

[1] cf. *Kāmika*, II, 4, 103:
सुवर्णं रजतं ताम्रमायसं त्रपु सीसकम्। आरकूटं ततः कांस्ययुक्तं लोहोदकं स्मृतम्॥

[2] A: आरकूटककांस्यं च ; C: आरकूटं च कोंसं च.

[3] A: तत्वे लोहाम्बुजं सुपूरितम् ; B: तत्वं लोहाम्बु सुप्रपूरितम्.

[4] cf. *Kāmika*, II, 4, 104:
सौराष्ट्रमञ्जनं श्यामा हरितालं मनश्शिला। गैरिकं रोचनं चान्ते धातूदकमिदं स्मृतम्॥

voir aussi *Suprabheda*, I, 15, 89-90:
हरितालं तथा माक्षिमञ्जनं च मनश्शिला। लोध्रं च सीसकं चैव गैरिकं तु ततः परम्॥
" कुम्भेषु सप्त धात्वम्बुना सह॥

[5] B: सामा pour श्यामा.

[6] A et B: हरितालं मनश्शिला.

[7] A, B et C: लोचनं.

[8] B: धात्वम्भः पञ्चमावृतौ ; C: धात्वम्बुजश्चरुमावृते.

[9] cf. *Kāmika*, II, 4, 105:
शालिकोद्रवनीवारप्रियङ्गुतिलसर्षपाः। श्यामाष्टकं यवो बीजो बीजोदकमिहोदितम्॥

voir aussi *Suprabheda*, I, 15, 79-80:
यवनीवारमुद्राश्च तिलं सर्षपमेव च। श्वेतशाली महाशाली रक्तशाली तथैव च॥
सौगन्धी हेमशाली च दशबीजमिति स्मृतम्॥

[10] A: नीवाश pour नीवार.

[11] B: श्यामषष्टियवाः.

[12] B: धान्याकं pour धान्योदं.

[13] A et C: षष्ठमावृते ; B: षष्ठमावृतौ.

[सप्तमावरणे द्रव्याणि]

[1]नवनीतं च कर्पूरं[2] [3]चैलापत्रमुशीरकम् ॥ ४४ ॥
[4]चन्दनं लघु कुष्ठं च [5]वरालं मेघमेव च । कुङ्कुमं हरिबेरं च [6]कक्कोलं [7]जातिरेव च ॥ ४५ ॥
[8]एभिर्गन्धोदकैः [9]सर्वैः सप्तमावरणे विदुः ।

[अष्टमावरणे द्रव्याणि]

[10]पर्वते च नदीतीरे वल्मीके [11]कुलिरावटे ॥ ४६ ॥
वृषशृङ्गे तथा क्षेत्रे समुद्रे [12]चेभदन्तके । [13]एभिरष्टमृदां तोयैरष्टमावरणे न्यसेत् ॥ ४७ ॥

[नवमावरणे द्रव्याणि]

[14]गोक्षुरं[15] [16]सहदेवीं च विष्णुक्रान्तिं कृताञ्जलिम् । [17]शिरीषं [18]चन्द्रवल्लीं च नवमावरणे [19]विदुः ॥४८॥

---

[1] cf. *Kāmika*, II, 4, 106-107:
नवनीतं च कर्पूरं त्वगेलापत्रसंयुतम् । चन्दनं लघुकुष्ठं च वरालोशीरमुस्तकाः ॥
कुङ्कुमं हरिबेरं च कक्कोलं जातिरेव च । एभिस्तु चूर्णितैर्युक्तं गन्धोदकमिति स्मृतम् ॥

[2] C ajoute च après कर्पूरं.
[3] A et C: जेलापत्रकोशीरम् .
[4] C: चन्दना लघुकोष्ठं च.
[5] A et C: वनालं pour वरालं.
[6] A, B et C: कच्चोलं.
[7] B: चति pour जाति.
[8] B: बहिर् pour एभिर् .
[9] A: सर्वे.
[10] cf. *Kāmika*, II, 4, 108-109:
पर्वते च नदीतीरे वल्मीके कर्कटावटे । वृषशृङ्गे च सत्क्षेत्रे समुद्रे गजदन्तके ॥
अष्टभिश्च समायुक्तं मृदम्भः परिकीर्तितम् ॥
voir aussi *Suprabheda*, I, 15, 114-115:
दर्भाधो नागदन्ताग्रे वराहस्य च कर्षणे । वल्मीके वृषशृङ्गाग्रे नद्यां वै पर्वतेऽपि च ॥
समुद्रे चैव मेधावी मृदं ग्राह्य विशोधयेत् ॥
[11] A: कुळिराटके.
[12] A: शुभदन्तके.
[13] A et C: एभिरष्टामृतैस्तोयैर् .
[14] cf. *Kāmika*, II, 4, 109-110:
गोक्षुरं सहदेवी च विष्णुकान्ता कृताञ्जली । शिरीषेन्दीवरं रात्रिरेभिर्मार्जनमुच्यते ॥
[15] C: गोक्षीरं ; B: गोक्षुरां.
[16] A: सहदेवी च विष्णुक्रान्तिः कृताञ्जलिः ; C: सहदेवीं च विष्णुक्रान्तिकृताञ्जलीम् .
[17] B: शीर्षं च pour शिरीषं.
[18] A: चन्द्रवल्ली च.
[19] B: यजेत् ; C: न्यसेत् .

[दशमावरणे द्रव्याणि]

[1]दूर्वाङ्कुरं च पद्मं च [2]कुशगोक्षुरसर्षपम्। [3]भद्रां चैव [4]महाभद्रां दशमावरणे न्यसेत्॥ ४९॥

[एकादशावरणे द्रव्याणि]

[5]तुलसीं[6] बिल्वपत्रं [7]चाप्यपामार्गं तपस्विनीम्। शमी [8]दूर्वाकुशैरम्बु [9]पूरयेद्रुद्रकावृते॥ ५०॥
द्रव्यमेवं समाख्यातमधिदैवं[10] वदामि ते।

[द्वितीयावरणाधिदेवताः]

वामदेवं भवं शर्वं सर्वज्ञं वरदं हरम्॥ ५१॥
[11]शम्भुमीशं विरूपाक्षं विश्वरूपं महेश्वरम्। उग्रं पशुपतिं रुद्रं महादेवं कपर्दिनम्॥ ५२॥
जटाधरं शूलधरं विश्वमूर्तिं त्रिलोचनम्। शङ्करं पुष्करं स्थाणुमीशानं कामशासनम्॥ ५३॥
कालकण्ठं [12]च कालारिं सद्गतिं शिवमीश्वरम्। [13]उग्रदण्डं सदाचारं वागीशं जटिलं प्रभुम्॥ ५४॥
श्रीकण्ठं लोकपालं च [14]वह्निमव्ययमीश्वरम्। [15]पिनाकिनं नागधारिनागहारिकपर्दिनः॥ ५५॥
विश्वं विश्वात्मकं चैव विश्वरूपं विलोचनम्। [16]विमोहं मोहनं शान्तं शङ्कितं सकलेश्वरम्॥ ५६॥
[17]सार्विकं [18]सर्वकामं च [19]सन्धिं विक्रममक्रमम्। वैदेहं [20]देहरहितं [21]वदन्तं [22]दन्तुरं [23]परम्॥ ५७॥
[24]सचक्रं च [25]चतुष्षष्टिरुद्रांस्तु [26]द्वितयावृते।

---

[1] cf. *Kāmika*, II, 4, 110-111:
दूर्वाङ्कुरं च पद्मं च कुशाग्रं गौरसर्षपम्। भद्राकृताञ्जलीयुक्तं परिमाणं तदुच्यते॥

[2] A: कुशा pour कुश ; B: कुशं.

[3] A: भद्रा.

[4] A: महाभद्रा.

[5] cf. *Kamika*, II, 111-112:
तुलसी बिल्वपत्रं च तमालं च तपस्विनी। अपामार्गशमीयुक्तं पत्रतोयमिहेरितम्॥

[6] A: तुलसी.

[7] A, B et C omettent अपि dans चाप्यपामार्गं.

[8] A: दूर्व pour दूर्वा ; B: दूर्वा.

[9] A: भूर्ज रुद्र उमावृते ; B: क्रूररूप उमावृते ; C: पूरयेद्रुद्रतावृते.

[10] B: अधिदेवं pour अधिदैवं.

[11] B: शम्भुरीशं.

[12] A: कालहारिं pour च कालारिं ; C: कामारिं ; pour le nom कामारि voir vers 81.

[13] A: अग्रदण्डं; C: व्यग्रदण्डं.

[14] C: परम् pour वह्निम्.

[15] A et B: पिनाकी नागधारी च नागहारी कपर्दिनम् ; C: पिनाकी नागधारी च नागहारिकपर्दिनम्.

[16] A: विमोहनं pour विमोहं.

[17] A: सार्वकं ; C: सर्वकं.

[18] A: सर्वकामी च ; C: सर्वगामी च.

[19] A, B et C: सन्धिर् pour सन्धिं.

[20] A: देहि pour देह.

[21] A et B: वदन्ते.

[22] A et C: दन्दुरं.

[23] A et C: पुरम्.

[24] C: सवक्रं ; il vaut mieux lire सुवक्त्रं.

[25] C: चतुष्ठुं च रुद्रस्तु pour चतुष्षष्टिरुद्रांस्तु.

[26] A et C: द्वितीयावृते ; B: द्वितीयावृतौ.

[तृतीयावरणाधिदेवताः]

गङ्गाधरं [1]चन्द्रमौलिं [2]कपालीशं गणेश्वरम् ॥ ५८ ॥
अष्टमूर्तिं सहस्राक्षं सुभगं पुरुषोत्तमम् । सकलं खण्डपरशुं धूर्जटिं करुणाकरम् ॥ ५९ ॥
अनामयं तीर्थकरं [3]सत्कृतिं जीवितेश्वरम् । [4]शूलपाणि[5]बलोन्माथि[6]वीरभद्र[7]विमोचकान् ॥ ६० ॥
[8]पाण्डुराङ्गं द्युतिधरं [9]सामगेयं प्रयत्नगम् । देवदेवं [10]पुरश्छेद्यं [11]ध्यानाधारं द्विजेश्वरम् ॥ ६१ ॥
[12]पराशरं बृहद्गर्भमरोगं [13]तिमिरापहम् । [14]अमोहं विक्रमं [15]तत्त्वं सकलागमपारगम् ॥ ६२ ॥
महावीरं सुवीरं च पुरुहूतं [16]पुरुष्टुतम् । व्याघ्रचर्माम्बरधरं महिमानं जनार्दनम् ॥ ६३ ॥
महाभूतं महाकायं धर्माधर्मविशारदम् । श्मशाननिलयं तिष्यं [17]स्फुटालोकं त्रियम्बकम् ॥ ६४ ॥
तृतीयावरणे ह्येतान् [18]साक्षसप्रतिरुद्रकान्[19] ।

[चतुर्थावरणाधिदेवताः]

[20]ज्ञानगम्यं [21]महायोगि[22]चित्रवर्षि[23]परापरान् ॥ ६५ ॥
[24]त्रिवेदिवेदविच्छास्त्र[25]तत्त्वज्ञान्[26] दान्तशासनौ[27] । [28]आज्ञं [29]प्रबुद्धं [30]तत्त्वज्ञं [31]सर्वसिद्धिं [32]विमोचनम्॥
[33]सहस्राङ्घ्रिमपादं [34]चाप्यनर्घं चामृताशनम् । महानिधिं निधीशं च [35]विधिं विश्वनिवेशनम् ॥ ६७ ॥

---

[1] A: चन्द्रमौळीं.
[2] A: कपालिकगणेश्वरम् .
[3] C: सत्कृती.
[4] A: शूलपाणिं.
[5] A: बलोन्मायी ; B: बलं मायी.
[6] A: वीरभद्रं.
[7] A: विमोचकम् ; C: विलोचनम् .
[8] A: पाण्डुरङ्ग द्वितिधरं ; B et C: पाण्डुरङ्गद्युतिधरं.
[9] A: समं गेयप्रयत्नकम् ; B: समं गेयप्रयत्नगम् ; C: सरं गेयं प्रयत्नकम् .
[10] A: पुरश्चेद्यं.
[11] A, B et C: ध्यानहारं.
[12] A: पशाशरं ; B: पाराशरं.
[13] A: तिमिरार्हकम् .
[14] B: अमोद्यं.
[15] A: तन्वं.
[16] C: पुरुष्कृतम् .
[17] A: स्फुटलोचं ; C: स्फुटालोचं.
[18] B: साष्ट pour साक्ष ; C: साक्षात् .
[19] Sur 72 noms de divinités présidant dans le troisième *āvaraṇa*, on n'en trouve que 50; les 22 autres manquent.
[20] B: ज्ञानहर्म्यं .
[21] A: महायोगी ; B: महायोगिं.
[22] A: चित्रवर्षी ; B: चित्रवर्णिं.
[23] C: परात्परम् ; A et B: परापरम् .
[24] A: त्रिवेदी.
[25] B: शास्त्री pour शास्त्र.
[26] A: तत्त्वज्ञो ; B: उत्त्वज्ञः .
[27] B: दान्तशासतः ; B: शान्तशासकः .
[28] A: आज्ञा ; C: आज्ञ.
[29] A: प्रबुद्धा ; B: प्रबुद्धः .
[30] A: तत्त्वज्ञ ; B: तत्त्वज्ञः .
[31] A: सर्वसिद्धिर् ; C: सर्वसन्धि.
[32] A: विमोचन; B: विमोचकः ; C: विमोचनः .
[33] A: सहस्राधिकपादं च ; C: सहस्रमङ्घ्रिपादं च.
[34] A: च अनर्घं ; B: च अनर्घं ; C: च अनन्तं.
[35] A: विधिवद्विश्ववेशनम् .

[1]वीतदोषं महाबीजं प्रियभक्तं दयाकरम् । [2]संवत्सरकरं सिद्धं व्याप्तं संवत्सरं तथा ॥ ६८ ॥
[3]विश्वात्मकं [4]महाज्योतिर्भास्करं भक्तवत्सलम् । [5]सन्दाहं [6]सर्वदेवादिं वामं [7]धाम जगत्पतिम् ॥ ६९ ॥
[8]मङ्गलं बाणहस्तं च [9]प्रियवादिनमच्युतम् । विजयं बालरूपं च मुकुन्दं वामनं प्रभुम् ॥ ७० ॥
[10]बुधं पतिं [11]परंधाम पुण्यश्रवणकीर्तनम् । [12]जन्ममृत्युमहेन्द्रांश्च [13]विभूतिं रुचिराकृतिम् ॥ ७१ ॥
[14]अनाद्यन्तं महाज्ञानममेयं[15] [16]सदसन्मयम् । अनादिनं च [17]जन्मादिं जननं मेघलीनकम् ॥ ७२ ॥
[18]उपेन्द्रं [19]सुगतं कृष्णं लोकचूडामणिं तथा । [20]इत्युक्ताशीति[21]रुद्रांस्तांश्चतुर्थावरणाधिपान्[22] ॥ ७३ ॥

[पञ्चमावरणाधिदेवताः]

शुद्धात्मानं [23]विदम्भं च वज्रहस्तं निशाकरम् । [24]महानिशं च विश्वेशं [25]सर्वगम्भीरगुप्तगान् ॥ ७४ ॥
ब्रह्मप्रियं निराकारं त्रिलोकेशं [26]विशांपतिम् । देवनाथं विरूपाक्षं [27]कीर्तिहस्तं विकम्पितम् ॥ ७५ ॥
भक्तं [28]विभक्तं कायस्थं सुवर्णं [29]प्राणवर्धनम् । शान्तं भद्रं [30]महात्यागं वरदं श्रुतिसागरम् ॥ ७६ ॥
विश्वामरेश्वरं [31]धन्यं त्रिवर्गं [32]स्वर्गसाधनम् । समानं [33]दिव्यचक्षुष्यं भास्करं [34]नागभूषणम् ॥ ७७ ॥
जीवितान्तकरं [35]सत्यं शास्तारं त्रिदिनं क्रमम् । [36]लोकोत्तमं मखद्वेषं [37]पुण्यकीर्तिं सुलोचनम् ॥ ७८ ॥

---

[1] A: पीतं दोषं.
[2] A: ...सरकरं.
[3] A: विश्वात्मिकं.
[4] A: महाज्योतिं भास्करं.
[5] A: सदाहं.
[6] A: सर्वदेवादिवाम.
[7] A: धामं.
[8] A: मङ्गल्यं.
[9] A: प्रियवादनम् ; C: पृथिव्यादिनम् .
[10] B: बुधापतिं.
[11] A: परं धाम्यं ; C: परं याम्यं.
[12] A: जन्ममृत्यु महेन्द्रं च.
[13] C: विभूती.
[14] B: अनाद्यन्त महाज्ञानं.
[15] A: मेधं pour अमेयं ; B: मेधां.
[16] A: सदसदन्मयम् ; B: सदसदं मयम् .
[17] A, B et C: जन्मादि pour जन्मादिं.
[18] A: उपन्द्रं.
[19] B: सुखदं.
[20] B: मृत्युग्राशीति pour इत्युक्ताशीति ; C: मृत्युग्राणीति.
[21] A, B et C: रुद्रास्ते चतुर्थावरणाधिपाः .
[22] Sur 80 noms de divinités présidant dans le quatrième *āvaraṇa*, on n'en trouve que 70; les 10 autres manquent.
[23] B: द्विदं पंच pour विदम्भं च.
[24] C: महानीशं.
[25] A: सर्वगम्भीर उतगम् ; B: सर्वगम्भीरदतगम् .
[26] C: जगत्पतिम् .
[27] A et B: कीर्तिसंभ्रमकम्पितम् .
[28] B: विभक्तकायस्थं.
[29] B: प्रियवर्धनम् ; C: प्रीतिवर्धनम् .
[30] B: महात्यागी.
[31] B et C: वन्द्यं.
[32] C: स्वर्गदायकम् .
[33] C: दिव्यचाक्षुष्यं.
[34] C: चाङ्गभूषणम् .
[35] C: सत्य शास्तायन्त्रिदिनं क्रमम् ; B: सत्यर्थं शास्तारं त्रितिनं क्रमुम् .
[36] B: लोकोत्तममखद्वेषी ; C: लोकोक्तममखद्वर्षि.
[37] B: पुण्यकीर्तिं सुलोचनम् .

[1]गणराशिं महाकायं प्रकृतिं कमलेश्वरम् । [2]प्रमाणभूतं सुफलं स्थविष्ठं [3]समदर्शनम् ॥ ७९ ॥
सर्वपापहरं शान्तं वेदाङ्गं [4]मङ्गलावृतम् । अतीन्द्रियं महाशक्तिं मत्तकं बलवाहनम् ॥ ८० ॥
व्यवसायं महाभक्तं शिपिविष्टं महाबलम् । [5]अमोघदण्डिकामारीन् शान्तं [6]रात्रिं निवारितम् ॥ ८१ ॥
पवित्रपाणिमुद्योगं [7]शुक्रं देवं [8]दिवस्पतिम् । विश्वामित्रं [9]महाज्योतिरक्षयं कुशलागमम् ॥ ८२ ॥
व्यालकल्पमसंघट्टं [10]प्रमाथिविश्वभोगदौ । वृषमश्वं [11]सुनिष्पन्नं निर्मोघं शिरसात्मकम् ॥ ८३ ॥
[इत्यष्टाशीतिरुद्रांस्तान् पञ्चमावरणे न्यसेत् ॥][12]

[षष्ठावरणाधिदेवताः]

व्यवाहनिभं योनिं वसन्तं बीजवाहनम् । [13]क्षेत्रभावं चतुर्भावं क्षेत्रज्ञं विश्ववाहनम् ॥ ८४ ॥
[14]दानवारिं समाम्नायं सर्वरूपं निरञ्जनम् । [15]नीलस्त्रियं [16]परंज्योतिर्देवदेवं सुरेश्वरम् ॥ ८५ ॥
नन्दीश्वरं सुराध्यक्षं विश्वसेनं धनाधिपम् । [17]विबुधाग्रं वरं दिव्यं ज्ञानगम्यं युगावहम् ॥ ८६ ॥
[18]गङ्गाप्लवोदकं भाव्यं [19]सर्वज्ञं सर्वगोचरम् । अव्यक्तलक्षणं हंसं [20]स्थपतिं छिन्नसंशयम् ॥ ८७ ॥
[21]सप्तजिह्वं कृतानन्दं ब्रह्मण्यं भुवनेश्वरम् । देवप्रियं महाकोशं [22]सुप्रीतिं [23]व्यञ्जनान्नदौ ॥ ८८ ॥
एकबन्धं [24]गुणग्राहिभृशदौ दक्षिणानिलम् । अनुत्तमं निरातङ्कमेकज्योतिरशृङ्खलम्[25] ॥ ८९ ॥
महाभुजमसंख्येयमाराध्यं[26] [27]नृत्तसुन्दरौ । वर्णात्मकं विशालाक्षं वृषाङ्कं कीर्तिवाससम् ॥ ९० ॥

---

1 B: गणराशिमहाकायप्रकृतिं.
2 A: प्रणाम्भूतं.
3 B: स्पन्द pour सम.
4 A: मङ्गलव्रतम्.
5 A: अमोघदण्डिकामारीं ; B: अमोघदण्डीकासारी ; C: कामोचदण्डिकामारिं.
6 B: रात्रिन्निवारितम्.
7 A: शुकं.
8 B: बृहस्पतिम्.
9 A, B et C: महाज्योतिमक्षयं.
10 A: प्रमाथिं विश्वभोगदम् ; B: प्रमाथिं विश्वभेदकम् ; C: प्रमाथिं विश्वभोगतः.
11 A: सुनिल्पं च निर्मोघं ; B et C: सुनिष्पन्नममोघं.
12 Nous ne trouvons pas ici le demi-vers habituel qui annonce que l'on va donner les noms (en l'occurence 88) des divinités qui président à cet *āvaraṇa*. Le passage manquant est reconstitué d'après un distique similaire dans le texte d'après les contextes précédents.
13 B: क्षेत्रबाहुं चतुर्बाहुं.
14 B: दानवारिसमाम्नायं.
15 A: नीलं स्त्रियं.
16 A et C: वरं ज्योतिं.
17 A et B: विधृताग्रं.
18 A: गङ्गां प्लवोदकं.
19 C: सर्वगोचरसंज्ञितम्.
20 C: स्थपतिच्छिन्नसंशयम्.
21 C: सर्वजिह्वं.
22 A: सुप्रतिं.
23 A: व्यञ्जरत्नकम् ; B: व्यञ्जरत्नहम् ; C : व्यञ्जनान्नदम्.
24 A: गुणत्राहिं मृशदं ; B: गुणग्राहिं मृशदं C: गुणग्राहिममृशं.
25 A: एकज्योतिश्शृशंखलम् ; B: एकज्योतिश्च शङ्खलम् ; C: एकज्योति चशंखलम्.
26 A: सारथ्यं pour आराध्यं ; B: साराध्यं.
27 A et B: च त्रि pour नृत्त ; C: नृत्तसुन्दरम्.

[1]कुबेरबन्धुं विद्धारं दुर्वासं प्रणवात्मकम्। नीलकण्ठं मृगव्याधं निरीशं पुरशासनम्॥ ९१॥
मनोभवं लोकनाथं समावृत्तं सदाशिवम्। पुरान्तकं [2]धनुर्वेदं पद्मनाभं धनुर्धरम्॥ ९२॥
दुर्लभं लोकसारङ्गं [3]गोवर्णं वायुवाहनम्। [4]वर्णाश्रमं गुरुं शूरं जगदीशं प्रभञ्जनम्॥ ९३॥
[5]अनन्तं वृष्टिं कल्पादिमानन्दं विद्रुमं शिवम्। [6]आवृतं लोकनेतारं कमण्डलुधरं मुनिम्॥ ९४॥
राजराजप्रियं[7] सिद्धं [8]षण्णवतिघटावृते।

[सप्तमावरणाधिदेवताः]

[9]सत्येश्वरं जगन्नाथं वीरेशं विमलोद्भवम्॥ ९५॥
[10]मानातीतं च मानज्ञं विश्वदेहं परं जयम्। लोकाध्यक्षं [11]लोकचारिद्विजाध्यक्षौ निराश्रयम्॥ ९६॥
महाबलं च भोक्तारं [12]बहुरूपं नियोधकम्। [13]नृत्तप्रियं युगावर्तं [14]सर्वहार्यं शिवाकृतिम्॥ ९७॥
सप्तमावरणे [15]रुद्रान् [16]वेदाधिकशतं रुरो[17]।

[अष्टमावरणाधिदेवताः]

[18]कालयोगं महावीर्यं [19]सर्वावासं सुखागतम्॥ ९८॥
चक्रहस्तं तु बाहुल्यं कर्तारं विविधाश्रयम्। हिरण्यकवचं [20]वाद्यं [21]वीरासनविधौ गुहम्॥ ९९॥
[22]भानुं चोमाधिपं चैव [23]योगाचारं त्रयीतनुम्। विश्वावासं [24]सुधाज्योतिर्द्रुहिणौ च जनेश्वरम्॥ १००॥
अमृतं [25]कपिलाचार्यं [26]गणकाख्यं विरोचनम्। शब्दब्रह्म दुराधर्षं [27]शरण्यं च [28]सतांगतिम्॥ १०१॥

---

1 A: कुबेरं बन्धुविद्धारं ; B: कुबेरबन्धुविद्धार ; C: कुबेरबन्धुरविद्धार.
2 A: धनुर्वेदी.
3 A: गावर्णं ; C: गार्पणं.
4 B: वर्णाश्रमगुरुं.
5 B: अनन्तं सृष्टिकल्पादिमानन्दं.
6 A: अवृतं.
7 B: श्रियं pour प्रियं.
8 A: षण्णवतिर्घटावृते ; C: षण्णवत्यघटावृते.
9 C: विद्येश्वर.
10 C: मनोतीतं.
11 A: लोकशारीं द्विजाध्यक्षं ; B: लोकचारीं द्विजाध्यक्षं ; C: लोकचारीं चिराध्यक्षं.
12 A: बहुरूपानियोद्धरम् ; B: बहुरूपानिरर्थकम्.
13 A: हृक्तप्रियं.
14 B: सर्वहार्यं शिवाकृतिम्.
15 A, B et C: रुद्रा pour रुद्रान्.
16 C: देवाधिक pour वेदाधिक.
17 Sur 104 noms, nous n'en trouvons que 21; les vers qui donnaient les 83 autres manquent.
18 B et C: कालयोगी.
19 B et C: सर्ववासं.
20 B et C: वाद्य pour वाद्यं.
21 A et C: वीरासनं विधिं.
22 A: भानुमुमाधिपं ; B et C: भानुं जन्माधिपं.
23 A: योगचारं.
24 A: सुयोज्योतिं द्रुहिणं ; C: सुयोज्यातिद्रोहिणीं.
25 A: कपिलं चारिं ; B: कपिलाचारं.
26 B et C: गणकाव्यं.
27 A: शरणं.
28 A: सदागतिम्.

[1]प्रशान्तशुद्धनिर्व्यग्रान् [2]धन्यं नारायणप्रियम्। [3]कालपक्षं सुरेशं च [4]व्यूढोरस्कमनाकुलम्॥ १०२॥
निर्मलं निष्कलं चैव [5]तेजोराशिं स्तवप्रियम्। अमृत्युं संभ्रमं [6]धान्यं [7]सर्वमारं मुनीश्वरम्॥ १०३॥
[8]संसारसारथिं [9]वेद्यं मधुरं [10]कार्यकोविदम्। [11]मृगबाणार्पणं केतुनिलयं[12] लोकपालकम्॥ १०४॥
[13]गोप्तारं [14]सर्वलोकानामभिवन्द्याभिवन्दितौ[15]। पञ्चविंशतितत्त्वार्थं[16] [17]शुभाङ्गं सुतनुं विभुम्॥ १०५॥
अनिर्देश्यवपुर्मित्रं[18] महानादं निशाचरम्। [19]नित्यज्ञानं महाबुद्धिं [20]स्वस्वाष्टांशं महानिधिम्॥ १०६॥
[21]वीरचूडामणिं रामं वक्तारं[22] [23]वरदानृणौ। [24]उत्तारकं [25]वररुचिं ललाटाक्षं विरोचनम्॥ १०७॥
[26]वैवस्वतं विश्वसहं [27]मध्यस्थं रविलोचनम्। [28]पार्थिवातीतकल्याणं [29]रुचिं दुःस्वप्ननाशनम्॥ १०८॥
[30]उदारकीर्तिं प्रद्युम्नं [31]भाग्यं नक्षत्रनाडिकम्[32]। [33]पूषाणं [34]कपिलश्मश्रुं ज्ञानस्कन्धं [35]नभोगतिम्॥१०९॥
[36]ज्वरादिशमनं [37]ग्रीष्ममनिरुद्धं निजेश्वरम्। [38]जमदग्निं नगगुरुं निर्जल्पं चिद्वरं प्रभुम्॥ ११०॥
[39]नादगम्यं महारूपं [40]तथा निश्रेयसालयम्। सहस्रमूर्तिनामानं बहुरूपं चराचरम्॥ १११॥
तीर्थदेवं[41] चतुर्वेदं शिवालयमनिन्दितम्। [42]सभानुशत[43]रुद्रांस्तानष्टमावरणे यजेत्॥ ११२॥

---

[1] A: प्रशान्तं शुद्धं निर्व्यग्रं ; B: प्रशान्तशुद्धनिर्व्यग्रं ; C: प्रशान्तं शुद्धनिर्व्यग्रं.
[2] C: स्तन्यं.
[3] B: कालवक्षं.
[4] B: रूढो रक्तम् pour व्यूढोरस्कम्.
[5] C: तेजोराशि pour तेजोराशिं.
[6] A et B: धन्यं.
[7] B: सप्तमं र pour सप्तमारं ; C: सप्तामरं.
[8] C: संसारं सारथिं.
[9] C: वेद्यमयूरं.
[10] B: काव्य pour कार्य.
[11] A: मृगपाणार्पकं.
[12] C: नियमं pour निलयं.
[13] A et C: गुहारं.
[14] A: सर्वलोकात्मम् pour सर्वलोकानाम्.
[15] B: अभिवन्द्यपदान्वितम् ; C: अभिवन्द्यमवन्दितम्
[16] C: तत्त्वस्थं pour तत्त्वार्थं.
[17] A: शुभाङ्गं रतनुन्निभम् ; B: शुभाङ्गारतनुन्निभम् ; C: शुभाङ्गं सुतनुर्नियम्.
[18] C: मन्त्रं pour मित्रं.
[19] A: नित्यज्ञानं ; C: नित्यनृत्तं.
[20] B: स्वस्वष्टारं महानिधिम् ; C: सुस्पष्टकममन्विधिः.
[21] A: वीरचूडामणिं राजवक्तारं.
[22] B: वक्त्रारं pour वक्तारं.
[23] A, B et C: व दरानृणम्.
[24] A et C: उत्तारणं.
[25] C omet वररुचिं.
[26] B omet ce demi-vers.
[27] C: मध्यस्थान्यत्रिलोचनम्.
[28] C: पार्थिवादिककल्याणं.
[29] A, B et C: रुचि pour रुचिं.
[30] C: उदारकीर्तिंप्रद्युम्नं.
[31] C: भागं.
[32] A: नाडिकाम् pour नाडिकम्.
[33] A: पूषं च ; C: पूषकं च.
[34] A: कपिलं श्मश्रुं ; B et C: कपिलं श्मश्रुं.
[35] C: नभोगतः.
[36] C: ज्वरादीशमनं.
[37] C: ग्रीष्मं मतिरुद्धं.
[38] C: यमदग्निनगगुरुन्निजस्यञ्च चरप्रभुम्.
[39] A: नायगम्य pour नादगम्यं ; C: नाधगम्यं.
[40] A et C omettent तथा.
[41] C: वेदं pour देवं.
[42] C: संभानुpour समानु ; B: संमातु.
[43] B: रुद्रान्तान् pour रुद्रांस्तान्.

[नवमावरणाधिदेवताः]

विश्वगर्भकरं व्याघ्रं पिङ्गलाक्षं विचक्षणम् । [1]धर्मपारिं सुरमयं सामगं हव्यवाहनम् ॥ ११३ ॥
धनुर्धरं महाकोपं कामपालं [2]सुराकृतिम् । श्रीवल्लभं सर्वसङ्गं विकलं [3]हयशोधनम् ॥ ११४ ॥
महालयं [4]प्रेतपारिं गम्भीरं सारसंपुटम् । [5]महामायं बहुमयं विशिष्टं [6]सर्वबोधकम् ॥ ११५ ॥
[7]अभिरामं [8]खलोन्माथिस्थापनौ [9]कुन्दवत्सलम् । [10]जयं कालविदाराध्यं [11]परार्धं भोजनं तथा ॥ ११६ ॥
वाचस्पतिं महापीतं कौशिकं च किरीटिनम् । [12]यज्ञपतिं [13]प्रभुं स्निग्धं [14]प्रकारं प्रासकं शिवम् ॥ ११७ ॥
शास्त्रनेत्र[15]मणुज्योति[16]र्महाभागं [17]महोत्तमम् । [18]सुप्रदीप्तं प्रतप्तारं रोचिष्णुं [19]शिपिसारथिम् ॥ ११८ ॥
[20]सुखासीनमहल्यं च रोहितं पादपाशनम् । अनुत्तरं च देवेन्द्रं [21]पुरीजानन्तनायकौ ।
[22]न्यायं निर्वासकं श्रेष्ठं विरूपं विश्वकारणम् । [23]सहस्रबाहुं विकृतं [24]पद्मगर्भं गुणोत्तमम् ॥ ११९ ॥
पराशरं च सर्वेशममोघं लोककारकम् । [25]अञ्जनं [26]बलिप्रीणं च देवकं वृषवर्धनम् ॥ १२० ॥
अनघं भूपतिं चैव भस्मोद्धूलितविग्रहम् । [27]इष्टं ग्रहपतिं चैव पूर्णपक्षं तथैव च ॥ १२१ ॥
[28]विषमाक्षं [29]गुणग्राहि[30]सत्यप्रकृतिदक्षिणान् । महीधरं [31]स्कन्दधरं [32]महामानिसमञ्जसौ ॥ १२२ ॥
विद्याराशिमनुद्विग्नं[33] मध्यस्थं भूतवाहनम् । शिवारम्भं [34]कलाज्ञानिमघवन्मखनाशनान् ॥ १२३ ॥

---

[1] C: धर्मवारिं.
[2] A et C: सुरागतिम् .
[3] B: भयशोधनम् .
[4] A: प्रोतपारिं ; C: प्रेतवारिं.
[5] B: बहुमायं महामायं ; C: महामायं बहुमायं.
[6] A: सर्वबाधकम् .
[7] A, B et C: अपरामं.
[8] A, B et C: खलोन्मार्थि स्थापनं.
[9] C: रुद्रवत्सलम् .
[10] A: जयकालविदाराध्यं ; B: जयकाल वितराध्यं ; C: जयकालं विताराध्यं.
[11] B: पर धं; C: पराधरं.
[12] A: यज्ञपतिं ; C: यज्ञः पतिः .
[13] A: पतिः pour प्रभु.
[14] C: प्राकारं pour प्रकारं.
[15] C: अणुं ज्योतिं pour अणुज्योतिर् .
[16] C: अनामक pour महाभागं ; B: महागमम् .
[17] B: अनुत्तमम् pour महोत्तमम् ; C: तनुत्तमम् .
[18] B: सुप्रतीकं ; C: सुप्रतीपं.
[19] A et B: शिवसारथिम् .
[20] B: सुखासीनं नहस्यं च ; C: सुखासी[न]ञ्च भव्यञ्च.
[21] A: पुरीजनयानकम् ; B: पुरीजन्मनयानकम् ; C: पुरीजानन्नायकम् .
[22] B: न्यायनिर्वासकं.
[23] C: सहस्रबाहुविकृतं.
[24] C: पद्मगर्भगुणोत्तमम् .
[25] C: जञ्जनुं.
[26] A: बलिव्रीणं ; C: बकवीणं.
[27] B: इदं.
[28] B: विषण्याक्षं.
[29] B: गुणग्राहिं ; C: गुणग्राही.
[30] A: सत्यं pour सत्य.
[31] A et C: स्कन्धधरं.
[32] A et B: महामानी समञ्जसम् ; C: महामानि समञ्जसम् .
[33] A: अनुद्विण्णं ; C: अनुत्तीर्णं.
[34] A: कलाकारीमघावं मघनाशनम् ; B: कलाज्ञारिं मघापं मघनाशनम् ; C: कलाज्ञानी मघावान्मखनाशनम्.

[1]परमार्थगुरुं शर्वं [2]व्यक्तमूर्तिमकृत्रिमम् । श्रुतिप्रकारं[3] शत्रुघ्नं [4]ग्रामण्यं शर्वरीपतिम् ॥ १२४ ॥
चन्द्रशीर्षं पराशं च [5]पाण्डुराङ्गमनोरमम् । दिशायुधं सुरेशं च [6]सुकुमारं कलापरम् ॥ १२५ ॥
दयापरं स्कन्दगुरुं कृतज्ञं [7]दैन्यराधकम् । प्रसन्नात्मानमक्रूरमज्ञेयं[8] कीर्तिभूषणम् ॥ १२६ ॥
नवमावरणे रुद्रान्सविंशतिशतं[9] विदुः ।

[दशमावरणाधिदेवताः]

[10]शुचिस्मितं चतुर्बाहुमक्षरं तनुवर्धनम् ॥ १२७ ॥
[11]भस्मशुद्धिकरं व्याप्तं दुर्ज्ञेयं शत्रुतापनम् । [12]वर्णाश्रमगुरुं क्षौमं भक्तिगम्यं विशारदम् ॥ १२८ ॥
सर्वेश्वरं [13]महादेवं कल्याणं भूतवाहनम् । [14]शिवास्त्रधं व्यवस्थानं राजचूडामणिं हरम् ॥ १२९ ॥
[15]पुरावारं शरण्यं च बुद्धिं बृन्दारवन्दितम् । हिरण्यकवचं [16]सिद्धं विद्यात्मकं जरातिगम् ॥ १३० ॥
[17]गायत्रीवल्लभं [18]यज्ञं जिष्णुमाश्रितवत्सलम् । दुर्धर्षं च [19]विभोक्तारं यज्ञान्तं विमलोदयम् ॥ १३१ ॥
कैलासपतिमादित्यं नित्यं भीमपराक्रमम् । हिरण्यवर्णं योगीशं कुमारं सिंहवक्त्रकम् ॥ १३२ ॥
[20]आत्मज्योतिर्बृहद्गर्भं नरकारिमचञ्चलम् । [21]चामुण्डार्चितमुच्चण्डं मधुरं सत्पराक्रमम् ॥ १३३ ॥
अलंकरिष्णुमात्रेयं [22]महाकल्पं कुलाधरम् । [23]भृगुं शब्दपतिं शक्तं सर्वं[24]शस्त्रप्रभञ्जनम् ॥ १३४ ॥
कल्पवृक्षं [25]महाकारं [26]शुक्लं परपुरञ्जयम् । परापरं [27]महागर्भं [28]ब्रह्मचारिदिवाकरौ ॥ १३५ ॥

---

[1] A: परमार्थं गुरुत्सर्वं ; B: परमार्थं गुरुः सर्वं ; C: परमार्थं गुरुं शर्वं.
[2] C: व्याप्तं मूर्तिरकृत्रिमम् .
[3] B et C: प्रकार pour प्रकारं.
[4] A: ग्रामर्णी ; B et C: ग्रामणिं.
[5] A: पाण्डराङ्गं मनोरमम् ; C: पाण्डुराङ्गं मनोहरम् .
[6] C: सुकुमारकलापरम् .
[7] A: धैन्यरायणम् ; B et C: दैन्यरायणम् .
[8] A: अनतुराज्ञेयं pour अक्रूरमज्ञेयं ; C: अक्रूरं दज्ञेयं.
[9] C: विंशत्रिशतं pour विंशतिशतं.
[10] C: शुचिस्तनं.
[11] A et B: पद्मशुद्धिकरं.
[12] A: वर्णाश्रमं गुरुं.
[13] B et C: महाकायं.
[14] A: शिवास्त्रयं ; B: शिवास्तयं.
[15] C: दुर्वारं च pour पुरावारं.
[16] B: सिद्धविद्यात्मगजरात्रिकम् ; C: सिद्धविद्यात्मकजरत्रिकम् .
[17] A: गायत्रिवल्लभं.
[18] A: यज्ञं जिष्णुमास्थितवत्सलम् ; B: यज्ञं जिष्णुवत्थितवत्सलम् ; C: यज्ञजिष्णुपस्थितवत्सलम् .
[19] C: विभक्तारं.
[20] B: आत्मज्योतिं बृहद्गर्भं.
[21] A: चामुण्डार्चनमुच्चण्डमधुरं सत्यपराक्रमम् ; B: चामुण्डं चुनमुच्चण्डं मधुरं सत्पराक्रमम् ; C: चामुण्डार्चन-मुर्चण्डं मधुं सत्यपराक्रमम् .
[22] A: महाकल्पं कुलाश्वरम् ; C: महाकल्पकुलाधरम्.
[23] A: मृगं.
[24] B: शास्त्र pour शस्त्र.
[25] B: अहङ्कारं pour महाकारं.
[26] C: शुक्लमम्बरपं जयम्.
[27] C: बृहद्गर्भं.
[28] A et C: ब्रह्मचारी दिवाकरम् ; B: ब्रह्मचारिदिवाकरम्.

देवासुरगुरुं [1]नन्दिदेवसिंहकलापरान् । स्वभावभद्रमक्षुद्रं [2]निदिध्यासं पराजितम् ॥ १३६ ॥
ज्योतिष्मन्तं [3]दक्षहं च लवनं विक्रमोन्नतम् । [4]उन्नद्धचूडं [5]कोदण्ड[6]लोकमार्गसमर्दनान् ॥ १३७ ॥
[7]संज्ञापनं महाकायं [8]मासवक्त्रं महाधिपम् । [9]चतुष्पादमधिष्ठानं [10]धर्मपुङ्गं दुरासनम् ॥ १३८ ॥
[11]संवत्सरकरं [12]सत्यं सुब्रह्मण्यं महाह्रदम् । [13]देवान्तसञ्जनिलयान्[14] दातारं वृषवाहनम् ॥ १३९ ॥
दक्षप्रियपदं [15]निष्ठं सर्वशास्त्र[16]कृतादरम् । [17]अन्धकारिं लोकबन्धुं [18]सेनाकृतपुरञ्जयम् ॥ १४० ॥
[19]ब्रह्मज्योतिः पुलस्त्यं च [20]जानुकर्मधनागमौ । अगस्त्यं [21]नयनाध्यक्षं नागेशं च वृषाधिपम् ॥ १४१ ॥
[22]हिरण्यगर्भमतिथिं कामदेवं च पुष्कलम् । [23]भूतेशं [24]पूर्वजं शुद्धं [25]भूतवाहनसारथी ॥ १४२ ॥
[26]उपकारप्रियं कान्तं [27]धनुर्ज्ञं [28]व्यग्रनाशनम् । दशमावरणे [29]रुद्रान्साष्टविंशतिकं शतम् ॥ १४३ ॥

[एकादशावरणाधिदेवताः]

सत्यव्रतमनेकाक्षं[30] सात्त्विकं [31]दक्षिणानिधिम् । भूषणं [32]सूर्यसंवेद्यं निष्ठाशान्तिपरायणान् ॥ १४४ ॥
सारङ्गं [33]तरणिं सिंहं किङ्किणीकृतवाहनम् । विवृतं [34]वृषभं सूत्रं साधुसत्त्वावलम्बनम् ॥ १४५ ॥
बलवन्तं [35]सुकर्णं च [36]श्रुतिकन्दं महामणिम् । [37]विडङ्गं शिल्पिनं भूतं [38]वराकाख्यैकपण्डितौ ॥ १४६ ॥

---

[1] A et C: नन्दी देवसिंहं कलापरम् ; B: नन्दि देवसिंहं कलापरम् .
[2] A: नितिध्यासं ; C: नितिर्यासं.
[3] A: द . . . हं च ; B: दक्षहनं.
[4] A: उन्नद्यचूढं ; C: उन्नद्यपूर्णं.
[5] A et C: रोदण्डं pour कोदण्डि.
[6] A: लोकसन्मार्गसमर्थनम् ; B: लोकमार्गसमर्दनम् ; C: लोकमार्गं समर्दनम् .
[7] B: संजवनं ; C: ससञ्जयं.
[8] A: आसवक्त्रं ; C: कुण्डवक्त्रं.
[9] C: चतुष्पदम् .
[10] C: धार्मपच्छं.
[11] A: सवत्सरकरं.
[12] C: सद्यं.
[13] C: वेदान्त pour देवान्त.
[14] A, B et C: निलयं pour निलयान् .
[15] C: निष्टयं.
[16] A et C: हृत pour कृत.
[17] A: अन्धकारीं.
[18] A: अस्त्राकृतपरंजयम् ; B: अस्त्रैः कृतपरंजयम् .
[19] B et C: ब्रह्मज्योतिं.
[20] A: जानुकर्मधमागमम् ; B: जानुकर्मधमाधमम् ; C: जानुकर्मन्धमागमम् .
[21] A: अगत्स्यनयनाध्यक्षं ; B: अगस्त्ययवनाध्यक्षं.
[22] A: हिरण्यगर्भितं तीर्थिं ; B: हिरण्यगर्दितमतिं.
[23] A: भूदेवं.
[24] C: सर्वगं.
[25] A: भूतवाहनदाढनम् ; B: भूतवाहनसाधनम् ; C: भूतवाहनसारथिम् .
[26] C: उपहारप्रियं.
[27] A: धनज्ञं ; B et C: धनुज्ञं.
[28] A et B: द्रव्य pour व्यग्रः .
[29] A: रुद्रा pour रुद्रान् ; B: रुद्राः .
[30] A: अनेकाष्टं pour अनेकाक्षं ; C: अनेर्वष्टं.
[31] A: दक्षिणानियम् ; B: दक्षिणाञ्चितम् .
[32] B: सूर्यकं वेद्यं ; C: सूर्यखं वेद्यान् .
[33] A: नरणिं B: नारणिं.
[34] A: वृषतं.
[35] C: सुखेणं.
[36] B: श्रुतिकन्दमहामणिम् .
[37] A et B: विदङ्गशिल्पिनं ; C: विदङ्गशिल्पिनां.
[38] A: पराकाख्यैकपण्डितम् ; B: पराकाव्यैकपण्डितम् ; C: पराकाव्येकपण्डितम् .

सद्योगिनं हंसगतिं [1]धृष्टमाश्रितवत्सलम्। अजातशत्रुं स्तोतारं सुरेशं परमं [2]बलम्॥ १४७॥
शिवज्ञानरतं [3]श्रेष्ठं दिव्यं [4]देवासुरेश्वरम्। शरण्यं वरदं शम्भुं देवासुरवरप्रदम्॥ १४८॥
अचिन्त्यं [5]वैधसं बुद्धिं देवासुरनमस्कृतम्। [6]पद्मासीनं [7]च [8]देवर्षिमलिनं[9] च निरामयम्॥ १४९॥
[10]तापसं [11]मानसं वीरं सर्वभूतमहेश्वरम्[12]। सग्रमाणं च[13] वादीन्द्रं [14]डम्भं [15]परिवृढं [16]मृडम्॥१५०॥
[17]परमेशं [18]परावासं [19]गोहन्तृनीललोहितौ। [20]अयनं चाक्षयं [21]गौणं कारणं च [22]वसुप्रदम्॥ १५१॥
हिरण्यरेतसं सूर्यं ज्ञानवन्तं तपस्विनम्। [23]घृताचलं [24]वितानात्मभ्राजिष्णू च पुरन्दरम्॥ १५२॥
[25]संवत्सरगणं [26]ज्ञानमूर्तिं चैव तु पिङ्गलम्। तेजस्विनं विकर्तारं [27]मघवन्तं [28]स्रुवं तथा॥ १५३॥
अनन्तं च तथा [29]योग्यं गोमन्तं [30]मलयाचलम्। उन्मत्त[31]वेषमोजस्वि[32]विमिश्रौ[33] [34]शुद्धविग्रहम्॥१५४॥
[35]तेजोवरं च संभूतं लोकभूतं कपर्दिनम्। [36]अनपायं च [37]मृष्टं च [38]तरणिं कामशासनम्॥ १५५॥
[39]पिनाकिनं दयाक्षेत्रं पञ्चयज्ञमकल्पकम्[40]। प्रयोजनं [41]चाग्निधनं [42]पुण्यात्मप्रतिमाकृती॥ १५६॥

---

1 B: द्रष्टमान्नीतिवत्सलम्; C: द्रष्टमान्नीतिवत्सलम्.
2 C: फलम्.
3 B: श्रेष्ठमीड्यं pour श्रेष्ठं दिव्यं.
4 B: देवं सुरेश्वरम्.
5 A: वैशलं; B: पैशालं.
6 A: पद्मासनं.
7 B omet च.
8 B: देवऋषिं.
9 A: अकिरं pour अलिनं; B: अलीरं.
10 C: तामसं.
11 C: मुनिसंवीरं pour मानसं वीरं.
12 B: मनोहरम् pour महेश्वरम्.
13 A, B et C: सवादीन्द्रं pour च वादीन्द्रं.
14 C: सर्वं.
15 A et B: परिवृषं; C: परिप्रुषं.
16 A, B et C: मृदम् pour मृडम्.
17 A et C: परमेश्वरं pour परमेशं.
18 A, B et C: परीवासं.
19 A: गेहन्ता नीललोहितम्; C: गोहान्ता नीललोहितम्.
20 A: अयं चाक्षयं; B: अयं चा अक्षयं.
21 A: गणं; B: गाणं; C: गौण pour गौणं.
22 B: वसुव्रतम्.
23 A: घृताशालं; B: धृतशालं.
24 A: वितानात्मा ननीचचिष्टेष्टमम्। भ्राजिष्णुं च पुरंदरम्; B: वितानात्मा भ्राजिष्टुं च पुरान्तकम्; C: वदीतात्मा भ्राजिष्णुं च पुरंदरम्.
25 A: सवत्सरगणं; B: संवत्सरगन.
26 B: ज्ञानं मूर्तिं.
27 A: मघवर्कं; B: अघवर्तं; C: मेघवन्तं.
28 B: ब्रुव.
29 C: मो योग्य म गोम . . . चाचलम्.
30 B: अमलाचलम्.
31 C: मेष pour वेष.
32 B: ओजस्वं pour ओजस्वि.
33 A, B et C: विमाश्रं pour विमिश्रौ.
34 C: शुद्धि pour शुद्ध.
35 B: तेजोवरं च संभूतं; C: तरणिं कामसंभूतं.
36 B: अनभायं.
37 A: धृष्टं; B: द्रष्टं.
38 A: तरणीकामशासनम्.
39 B: पिनाकिनं तथा क्षेत्रं; C: पिनाकीनरस्तथा क्षेत्रं.
40 A et B: अकल्पनम् pour अकल्पकम्
41 B: च निधनं pour चाग्निधनं.
42 A: पुण्यात्मा प्रतिमाकृतिम्; B: पुण्यात्मप्रतिमाकृतिम्.

[1]प्रतापवन्तं श्रीमन्तं गौरी[2]भर्तारमुत्तमम् । [3]नीतिमन्तं विकामं च [4]व्याप्तकामं तथैव च ॥ १५७ ॥
[5]सवितारं च [6]विश्वादिं [7]वैकल्यं चैकनायकम् । एकादशावृते [8]रुद्रान्षट्त्रिंशदधिकं शतम्[9] ॥ १५८ ॥

---

[1] C: प्रतपन्तं च श्रीमन्तं.
[2] A: भक्तारम् pour भर्तारम् .
[3] A: श्रीतिमन्तं.
[4] A: व्याप्तं कामं ; C: व्याप्यं कान्तं.
[5] A: सवित्तारं ; C: सविताणुं.
[6] A: विन्वादिं ; B: विन्द्वादिं.
[7] A: शैकल्प्यं ; B: शैवकल्प्यं ; C: शंकल्यै.
[8] A et B: रुद्रा pour रुद्रान् ; C: रुद्राः .
[9] Sur 136 noms, nous n'en trouvons que 119; les vers qui donnaient les 17 autres manquent.

Comme on l'a déjà expliqué dans la note 2, p. 113 au début de ce *paṭala*, ici finit la liste des 1000 noms de Śiva qui sont donnés comme les noms des divinités qui président aux 1000 *kalaśa* des *āvaraṇa* II à XI. Nous avons fait remarquer, a la fin de chaque *āvaraṇa*, que quelques vers semblaient manquer ici ou là et qu'ainsi quelques noms manquaient. Comme nous n'avons pas pu trouver une liste semblable de ces noms, nous donnons ci-dessous un *śivasahasranāma* tel qu'on le trouve dans un *patala* 77 du *Dīptāgama*. Cette version des *sahasranāma* est aussi utilisée pour donner les noms servant aux 1000 *kalaśa* dans un manuscrit du *Suprabhedāgama* (appartenant à la bibliothèque de M. K. Sundaresa Baṭṭar, Madurai) que nous avons recopié. Un manuscrit appelé *Suprabhedāgamapaddhati* (appartenant à J. Viśvanātha gurukal, Melmangalam, district de Madurai) donne encore les noms des divinités qui président aux 1000 pots dans son chapitre sur les détails du rituel de ce *snapana* avec 1008 pots. Mais cette version, bien que semblable en son début à celle du *Dīptāgama*, suit en fait celle du *Liṅga-purāna*. Malheureusement, il y a de nombreuses lacunes dans ce manuscrit. Il peut être intéressant de remarquer que la façon de donner les noms dans l'édition imprimée du *Suprabheda* (édition en caractères *grantha*) est différente a la fois du manuscrit de Madurai et de la *paddhati* notéc ci-dessus.

On peut trouver des *śivasahasranāma* dans le *Mahābhārata* (*anuśāsanaparvan*, 48, 31-153, edition de Kumbhakonam), le *Liṅga-purāṇa* (*adhyāya* 65 et 98), le *Saurapurāṇa* (*adhyāya* 41, édition de Ānandāśrama), le *Skandapurāṇa*, (*śaṅkara-saṃhitā*, *śivarahsya-khaṇḍa*, *upadeśakāṇḍa*, *adhyāya* 83, et *sanatkumārasaṃhitā*, *prabhāsakhaṇḍa*, *adhyāya* 14), le *Padmapurāṇa* (*uttarabhāga*, *adhyāya* 89, notre mss n° 10, 831), le *Rudrayāmala*, (*śivarahasya*, *saptamāṃśa*, *adhyāya* 1, Mysore Palace publication), le *Vāyavīya* ou *Śaiva-purāṇa*, (*dharma-saṃhitā*, *adhyāya* 28, et *jñānasaṃhitā*, *adhyāya* 71) et le *Śivapurāṇa* (*koṭirudrasaṃhitā*, *adhyāya* 35), ainsi que dans le *Mantramahārṇava*, p. 119 à 122 (tiré du *Liṅga-purāṇa*, *adhyāya* 98, mais sans mentionner la source). Parmi ceux-ci, celui du *Mahābhārata*, celui de la *dharma-saṃhitā* du *Śaivapurāṇa* et celui de l'*adhyāya* 65 du *Liṅga-purāṇa* sont semblables (avec de legeres variantes); celui du *Śiva-purāṇa*, du *Liṅga-purāṇa* (*adhyāya* 98), du *Saurapurāṇa*, de la *jñānasaṃhitā* du *Śaivapurāṇa* et du *Mantramahārṇava* appartiennent à la meme famille, mais les variantes sont nombreuses. Le *śivasahasranāma* que l'on trouve dans le manuscrit *Suprabhedāgamapaddhati* semble suivre la version que l'on trouve dans le *Liṅga-purāṇa*, et le *Śiva-purāṇa*, bien que dans

[1]चतुर्भुजास्त्रिनेत्राश्च [2]द्विपादा दिव्यभूषिताः । कलशं वामतो धृत्वा दक्षिणेन [3]पिधानकम् ॥ १५९ ॥
टङ्कं शूलं [4]करैर्धृत्वा [5]देवास्त्वभ्यन्तराननाः । एवं [6]ध्यात्वा तु रुद्रांश्च विद्येशांश्चेश्वराम्बिके ॥ १६० ॥
गन्धैः पुष्पैश्च धूपैश्च दीपैर्नाम्ना समर्चयेत् । [7]पुण्याहप्रोक्षणं कृत्वा शान्तिहोमं च कारयेत्[8] ॥ १६१ ॥

नन्दी नन्दीश्वरो नन्दो नग्नव्रतधरश्शुचिः । लिङ्गाध्यक्षः सुराध्यक्षो लोकाध्यक्षो युगावहः ॥
स्ववशः स्वागतः स्वर्गः स्वरः स्वरमयः स्वराट् । बीजाध्यक्षो बीजकर्ता धर्मकृद्धर्मवर्धनः ॥
दम्भोऽदम्भो महादम्भः सर्वभूतमहेश्वरः । लोककर्ता मृगपतिर्महाकर्ता महौषधिः ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः । नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी ॥
सोमपोऽमृतपः सौम्यो महानीतिर्महामतिः । अजातशत्रुरालोकः संभाव्यो हव्यवाहनः ॥
लोककारो वेदकारः सूत्रकारः सनातनः । महर्षिः कपिलाचार्यो विश्वदीप्तिर्विलोचनः ॥
पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिकृत्स्वधा । त्रिसामा सामगः सर्वः सर्वगः सर्वगोचरः ॥
उपहारप्रियोऽमोघः कर्णिकारप्रियः कविः । श्रीपतिः श्रीनिवासश्च शीलवान् भिषगुत्तमः ॥
गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थितः । विजितात्मा विधेयात्मा भूतवाहनसारथी ॥
सगुणो गुणकार्यश्च सुकीर्तिश्छिन्नसंशयः । कामरूपः कामपालो भस्मोद्धूलितविग्रहः ॥
भस्मप्रियो भस्महस्तो भस्म स्कन्दः कृतागमः । ज्योतिर्मयो निराकारो जलनाथो जलेश्वरः ॥
तुम्बवीणो महाकामोऽप्यशोकः शोकनाशनः । त्रिलोकात्मा त्रिलोकेशः शुद्धः शुद्धिरधोक्षजः ॥
अव्यक्तलक्षणो व्यक्तो व्यक्ताव्यक्तो विरूपकः । परशीलः परगुणो मारो मारधनो मयः ॥
ब्रह्मा विष्णुः प्रजापालो हंसो हंसपतिर्मखः । वेधा विधाता धाता च स्रष्टा भर्ता चतुर्मुखः ॥
कैलासशिखरावासी सर्ववासः सदागतिः । हिरण्यगर्भो बृहिणः पुरुषः पूर्वजः पिता ॥
भूतालयो भूतपतिर्भूतिदो भुवनेश्वरः । सद्योजातोऽर्थविद्ब्राह्मो ब्रह्मण्यो ब्राह्मणप्रियः ॥
वेदप्रियो वेदनाथो देवको देवचिन्तकः । विषमाक्षो विशालाक्षो विषदो विषवर्धनः ॥
निर्ममदो निरहंकारो निर्मोहो निरुपद्रवः । दर्पहा दर्पदो दृप्तः सनर्तः परिवर्तकः ॥
सप्तजिह्वः सहस्रांशुः स्निग्धः प्रकृतिदक्षिणः । भूतभव्यो भवन्नाथः प्रभावान्भ्रान्तिनाशनः ॥
अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः । निष्कलङ्कः कृतानन्दो निर्व्याजो व्याजमर्दनः ॥
सत्त्ववान् सात्त्विकः सत्यः कीर्तिस्तम्भः कृतागमः । पुण्यवन्द्यो गुणग्राही नैकाक्षो नैकधर्मकृत् ॥
सुप्रीतः सुमुखः सूक्ष्मः सुखण्डो दक्षिणो नयः । नन्दः स्कन्दधरो धुर्यः प्रकटः प्रीतिवर्धनः ॥
अयाचितः सर्वसहो विदग्धः सर्ववाहनः । अमृतश्चेति विख्याताः पदं प्रति नमोऽन्तकम् ॥

[1] A et C: त्रिणेत्रश्चतुर्भुजाः सर्वे pour **चतुर्भुजास्त्रिनेत्राश्च**.
[2] B: द्विपादादिविभूषिताः.
[3] A et C: पिधाय च pour पिधानकम् .
[4] A: करे pour करैर् ; C: परे.
[5] B: देवतास्त्वन्तराननाः.
[6] C: धृत्वा pour ध्यात्वा.
[7] A: पुण्याहं प्रोक्षणं.
[8] voir *Vīrāgama*, *paṭala* 55, vers 2-10 pour les détails du *śāntihoma* :

शान्तिहोममहं वक्ष्ये शृणुष्व कमलासन । पूर्वोक्तमण्डपं वापि अग्निशालामथापि वा ॥
अग्निकुण्डेषु होतव्यं स्थण्डिले वापि कारयेत् । चतुरश्रं वाथ वृत्तमग्निकुण्डं तु कारयेत् ॥
त्रिमेखलासमायुक्तमथवाप्येकमेखला । एवं तत्रैव संकल्प्य दर्पणोदरवत्कृतम् ॥
शोधनं क्षालनं चैव शोषणं पाचनं तथा । मथित्वा तु गृहीत्वा च हृदयेन प्रतिष्ठितम् ॥

[1]स्तोत्रनृत्तरवैर्वाद्यैः[2] स्नापयेत्परमेश्वरम् । दौवारिकान्समभ्यर्च्य गर्भगेहं समाविशेत् ॥ १६२ ॥
[3]लिङ्गं पीठं स्थलं सर्वं [4]शुद्धं कृत्वाम्भसा ततः । [5]आसनाधिपानभ्यर्च्य [6]चावाहनमथाचरेत् ॥ १६३ ॥
[7]संध्याय सकलीकृत्य विज्ञाप्य स्नपनं ततः । शिवकुम्भं[8] तथोद्धृत्य लिङ्गाग्रे तु निधापयेत् ॥ १६४ ॥

काष्ठं तु शिरसा दद्याज्ज्वालयेदस्त्रमन्त्रतः । उपस्थानं च शिरसा परिस्तरणमेव च ॥
दशदर्भैः समायुक्तं पूर्वे चैव परिस्तरेत् । दक्षिणे पश्चिमे चैव उत्तरे च परिस्तरेत् ॥
परिधीन्दक्षिणे न्यस्य पश्चिमे चोत्तरे न्यसेत् । पात्राणां साधनं चैव हूयते क्रमशस्ततः ॥
समिधा पञ्चब्रह्मेण आज्यं चैव षडङ्गकैः । अघोरेण चरुं हुत्वा जुहुयात्तु शताहुतीः ॥
द्रव्यं प्रति विशेषेण व्याहृतिं जुहुयात्ततः । शान्तिहोम इति ख्यातः ॥

voir aussi *Kāraṇāgama*, I, 144, 1-9 (p. 710-711) :

अथातस्संप्रवक्ष्यामि शान्तिहोमविधिक्रमम् । सर्वदोषविनाशार्थं सर्वसम्पत्सुखावहम् ॥
भवनस्याग्रतः कुर्यान्मण्टपं चतुरश्रकम् । भूमिशुद्धिं पुरा कृत्वा गोमयेनोपलेपयेत् ॥
प्रोक्षयेच्छिवमन्त्रेण शालिपिष्टैर्विचित्रयेत् । तन्मध्ये स्थण्डिलं कुर्याच्छुद्धतोयेन पांसुना ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् । पलाशसमिधा सद्योजातमन्त्रेण हूयते ॥
आज्यं हुत्वा तु वामेन चरुं वै घोरमन्त्रतः । पुरुषेण हुनेल्लाजं श्रीपत्रं शिखया हुनेत् ॥
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा । अष्टोत्तरशतं वापि प्रत्येकं जुहुयात्क्रमात् ॥
द्रव्यान्ते व्याहृतिं हुत्वा यदस्येति ततो हुनेत् । जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
पूर्णाहुतिं ततो दत्त्वा शिवमन्त्रेण देशिकः । सद्योजातेन मन्त्रेण पावकं तु विसर्जयेत् ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः । शान्तिहोम इति ख्यातः सर्वदोषनिकृन्तनः ॥

[1] voir *Svāyambhuva*, *paṭala* 18, vers 29-39 pour les détails du *snapana*:

कुम्भमध्ये क्रमेणैव सदाशिवं यजेद्बुधः । वर्धनीं चैव संपूज्य उपदेशक्रमान्न्यसेत् ॥
सर्वगन्धं समाहृत्य सर्वगन्धेषु निक्षिपेत् । गन्धतोयेन संपूर्य कलशान्प्रतिसंस्थितान् ॥
पिधानकूर्चवस्त्राढ्यान् प्रत्येकं कल्पयेत्क्रमात् । धूपदीपसमायुक्तं यथावत्संप्रपूजयेत् ॥
प्रथमावरणं पूज्य तत्तदावरणेषु च । गुलान्नं पायसान्नं च तत्तद्देवान्निवेदयेत् ॥
ताम्बूलं च निवेद्याथ निरोधार्घ्यं ददेद्गुरुः । होमं कुर्यात्तदन्ते तु महाशासु पुरोक्तवत् ॥
दशाहुतिः प्रकर्तव्या तत्तन्मूलमनुस्मरन् । पूर्णाहुतिश्च शिरसा कलशे तु सुयोजिते ॥
कलशानपि सर्वांश्च स्थापनस्य क्रमेण तु । द्वारपूजां पुरा कृत्वा लिङ्गशुद्धिं तदन्तके ।
स्नानद्रव्यं च पूर्वोक्तं तत्काले स्नानमाचरेत् । शिवकुम्भं वर्धनीं च बाह्ये वादौ प्रदक्षिणम् ॥
कुम्भाद्बीजं समादाय शिवस्य हृदि विन्यसेत् । वर्धन्या बीजमादाय पीठे वामे सुयोजयेत् ॥
कलशानपि सर्वांश्च स्थापनस्य क्रमेण तु । एवं स्नानं प्रकर्तव्यं नैवेद्यं धूपदीपकम् ॥
महाहविः क्रमेणैव तोषयेत्परमेश्वरम् ॥

[2] C: स्तोत्रनृत्तं च वाद्यैर्वा.
[3] B: लिङ्गपीठस्थलं सर्वं ; C: लिङ्गं पीठस्थलं सर्वं.
[4] C: शुद्धिं pour शुद्धं.
[5] A: आस्नानाधिपमभ्यर्च्य ; B: आसनाधिपतीनार्च्य.
[6] A, B et C omettent च dans चावाहनम्.
[7] A, B et C: संध्यात्वा pour संध्याय.
[8] A et C: ततोद्धृत्य pour तथोद्धृत्य.

समभ्यर्च्य हृदा मन्त्री कुम्भादेवं [1]समन्त्रकम् । मूललिङ्गे तु संयोज्य ब्रह्माङ्गैरभिषेचयेत् ॥ १६५ ॥
वर्धनीं पिण्डिकायां तु स्नाप्य [2]गौरीमिमायतः । [3]आदौ प्रणवमुच्चार्य रुद्राभिधानमध्यमम्[4] ॥ १६६ ॥
नमस्कारान्तमुच्चार्य [5]प्रतिकुम्भं च मूर्धनि । [6]अभिषेकः प्रकर्तव्यः शिवध्यानसमन्वितम् ॥ १६७ ॥
[7]प्रत्यावरणमन्ते तु [8]शुद्धोदकाभिषेचनम् । ततो गन्धोदकैः स्नाप्य [9]चार्चनोक्तं समर्चयेत् ॥ १६८ ॥
[10]हविश्च दापयेत्पश्चाच्छ्रद्धाभक्तिसमन्वितम् । नित्यं तु स्नपने काले [11]दापयेत्तद्विशेषतः ॥ १६९ ॥
वर्धनीं शिवकुम्भं [12]च [13]प्रथमावरणं तथा । मूललिङ्गे समारोप्य नित्यकर्म समाचरेत् ॥ १७० ॥
ततो नित्यार्चनान्ते तु स्नपनं शेषमाचरेत् ॥ १७१ ॥

इति [14]श्रीमद्रौरवतन्त्रे [15]क्रियापादे [16]नवाधिकसहस्र[17]कलशस्नपन[18]विधिर्नाम [19]चतुर्विंशः पटलः[20]

---

[1] A: समन्तकम् ; B: समन्ततः .

[2] गौरीमिमायतः = " गौरीमिमाय सलिलानि तक्षती " इत्यादिमन्त्रतः ; cf. *Taittirīyāraṇyaka*, I, 9, 4 ; *Rgveda*, I, 164, 41 (गौरीर्मिमाय) .

[3] A: प्रणव त्वादितोच्चार्य ; B et C: प्रणवं त्वादितोच्चार्य.

[4] A: मध्यगम् pour मध्यमम् ; B: मध्यगम् .

[5] B et C: प्रतिकुम्भे.

[6] A, B et C: अभिषेकं प्रकर्तव्यं.

[7] cf. *Ajitāgama, paṭala* 28, vers 142-147:

अभिषेकसमाप्तौ तु कृत्वा शुद्धोदसेचनम् । शालिपिष्टेन वा लिङ्गं माषचूर्णेन वा पुनः ॥
आलिप्योद्वर्तनं कृत्वा बहुशश्च सपीठकम् । शुद्धं प्रक्षालनं कृत्वा गन्धोदैरभिषेचयेत् ॥
अर्चनोक्तं समभ्यर्च्य यथाविभवविस्तरम् । प्रभूतं च हविर्दत्त्वा भारमानसमन्वितम् ॥
मुखवाससमायुक्तं ताम्बूलमथ दापयेत् । ततः प्रदक्षिणं कृत्वा नमस्कृत्वा पुनः पुनः ॥
क्षमस्वेति समुच्चार्य निर्गच्छेत्तदनन्तरम् । दापयेद्देशिकादीनां दक्षिणां श्रद्धया ततः ॥
इत्येवं स्नपनं प्रोक्तमष्टाधिकसहस्रकम् ॥

voir aussi *Suprabheda*, I, 15, 134-135:

स्नपनानां च सर्वेषामन्ते हारिद्रचूर्णकैः । संस्नाप्याभ्यर्चयेद्विद्वान् प्रभूतहविषं कुरु ॥

[8] B: शुद्धोदैरभिषेचनम् .

[9] A, B et C omettent च dans चार्चनोक्तं.

[10] A, B et C: हविर्ष pour हविश्च.

[11] A: प्रापी चैतद्विशेषतः ; B: प्रापयेत्तु विशेषतः ; C: पि ते च तद्विशेषतः .

[12] C: तु pour च.

[13] C: प्रथमावरणे.

[14] A: श्रीरौरवतन्त्रे.

[15] B et C omettent क्रियापादे.

[16] A: अष्टोत्तर pour नवाधिक.

[17] A et C omettent कलश.

[18] A: विधिपटलः चतुर्विंशः.

[19] C: चतुर्विंशत् pour चतुर्विंशः .

[20] Les autres *āgama*, tels que l'*Ajita* (*paṭala* 28, vers 68-131), *Makuṭa* (*paṭala* 9, vers 62-69), *Vīra* (*paṭala* 77, vers 35-75), *Suprabheda* (I, 15, 79-125) et *Kāmika* (II, 4, 95-100, 123 et 138) prescrivent aussi un *maṇḍala* carré (*caturaśra*) pour le

snapana avec 1008 (1009) pots. Selon chacun d'entre eux, le *śivakumbha* et la *vardhanī* seraient au centre, les 8 *kalaśa* présidés par les Vidyeśvara autour d'eux, et ceci est compté comme premier *āvarana*; puis, autour de cet *āvarana*, il y en aurait encore 10 dans lesquels on place les 1000 *kalaśa* qui restent. En ce qui concerne le nombre des pots à placer dans chacun de ces 10 *āvarana* (c'est à dire les *āvaraṇa* II à XI), *Ajita*, *Vīra*, *Makuṭa*, et *Kāmika* s'accordent avec notre texte pour donner les chiffres de 64, 72, 80, 88, 96, 104, 112, 120, 128 et 136; mais le *Suprabheda* donne les chiffres de 44, 52, 60, 68, 76, 124, 132, 140, 148 et 156. De plus, meme lorsque les *āgama* s'accordent sur le chiffre de *kalaśa* à placer dans chaque *āvaraṇa*, la forme du *maṇḍala* qu'ils prescrivent peut être différente. Nous avons déjà fait remarquer au début de ce *paṭala* que les textes ne s'accordent pas au sujet des noms des divinités qui president aux 1000 *kalaśa* et au sujet des choses à mettre dans ces *kalaśa*.

On peut remarquer que des *āgama* tels que *Kāmika*, *Makuṭa* et *Suprabheda* indiquent les choses a mettre dans les *kalaśa* et les divinites qui y president dans l'ordre où on place les *kalaśa* dans les *āvaraṇa*. C'est aussi la methode qu'emploie notre texte, bien que les choses et les divinités soient différentes. Mais l'*Ajita* et le *Vīra* indiquent ces mêmes choses d'une autre façon; ils divisent les *kalaśa* en trois groupes: 1° le *Śivakumbha* au centre, avec les huit *kalaśa* présidés par les Vidyeśvara; 2° les pots placés dans les *āvaraṇa* II à VI, lesquels sont divisés encore en 16 sous-groupes de 25 *kalaśa*; 3°, le reste, c'est à dire les pots des *āvaraṇa* VII à XI, divisés en 24 sous-groupes de 25 *kalaśa*. Les 50 lettres de l'alphabet (16 *svara*, 33 consonnes et le *praṇava oṁ*) sont distribuées ainsi: le premier groupe en reçoit 10, et les deux autres en reçoivent 40, à raison d'une par sous-groupe. Les matériaux et les divinités sont répartis suivant les lettres.

Le *Svāyambhuvāgama* (*paṭala* 18, vers 19-29), le *Kāmikāgama*, II, 4, le *Kāraṇāgama* et le *Sahasrāgama* prescrivent un *maṇḍala* rond (*vṛtta*). Selon ces textes, excepté le *Sahasra* il y a 14 *āvaraṇa* autour du *Śivakumbha* qui est placé au centre. Le nombre de pots à placer dans chaque *āvaraṇa* est respectivement du premier au quatorzième de: 8, 16, 24, 32, 56, 64, 72, 84, 96, 100, 104, 108, 116 et 128. Dans le *Sahasra* il y a 16 *āvaraṇa* et le nombre de pots est, respectivement, du premier au seizième de: 8, 16, 24, 32, 40, 48, 56, 64, 72, 80, 88, 96, 84, 92, 100 et 108. Nous donnons ci-dessous, pour permettre de comparer, quelques extraits de ces textes āgamiques, dont la plupart ne se trouvent qu'en manuscrits; quelques autres sont imprimés en caractères *grantha*; il est inutile de dire que tous sont très corrompus et présentent des lacunes. Nous donnons aussi à la fin de ce *paṭala* un tableau comparatif donnant le nombre des *āvaraṇa* et des pots, selon les textes de base (*mūlāgama*) que nous avons pu trouver.

cf. *Ajitāgama*, *paṭala* 28, vers 68-131:

पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् । क्षीरं दधि घृतं चैव दलाग्रेषु च विन्यसेत् ॥
चत्वारिंशत्सु चान्येषु व्यूहः परिवृतः क्रमात् । प्रतिव्यूहं शतार्धार्धान्कलशान्स्थापयेत्सुधीः ॥
क्षौद्रमिक्षुरसं चैव यवदर्भोदकं तथा । तिलं कदलिकायास्तु फलं सर्षपमेव च ॥
नालिकेरं फलं रात्रिरजो वै मातुलुङ्गकम् । लामज्जं दाडिमी लाजचूर्णं पनसमेव च ॥
भस्म चाम्रफलं चैव षोडशैतान् क्रमेण हि । पूर्वादि विन्यसेद्विष्णो स्वरावरणमध्यमे ॥

तेषामेव तथैवेह प्रथमावरणस्य च । द्रव्याणि क्रमशो वक्ष्ये तानि संक्षेपतः शृणु ॥
काश्मीरं रोचना कुष्ठं कर्पूरं च लवङ्गकम् । लाजास्तिलफलं चान्यत्पत्रमष्टकमुच्यते ॥
प्रथमावरणस्योक्तं द्वितीयस्याधुनोच्यते । सहा दूर्वा तथा लक्ष्मीर्भद्रा विष्णुवधूयुताः ॥
इन्द्रवल्ली तथा काशो वाराही शृङ्गमेव च । गोक्षुरं च शमीपत्रं तथैवाञ्जलिकारिका ॥
अपामार्गद्वयं चैव गिरिकर्णीद्वयं तथा । षोडशैतानि वस्तूनि द्वितीयेषूदके न्यसेत् ॥
द्वितीयावरणेष्वेवं स्वरावरणकीर्तितान् । बाह्यस्यापि तृतीयस्य मध्यस्थं वक्ष्यतेऽधुना ॥
पद्मं नीलोत्पलं चैव रक्तमुत्पलमेव च । एतैस्त्रिभिस्समायुक्तं ककारे पुष्पवारि तत् ॥
तुलसीबिल्वधुर्धूरपत्रैः पत्रोदकं खगम् । पलाशाश्वत्थयोश्चैव कपित्थस्य च वल्कलैः ॥
वल्कलोदकमुद्दिष्टं गकारपदमध्यगम् । आम्राश्वत्थपलाशानां पल्लवैः पल्लवोदकम् ॥
घकारे विन्यसेत्तच्च ह्रीबीरोशीरमुस्तकैः । मूलोदकं ङकारस्थं तदुक्तं पूर्वपञ्चकम् ॥
नारङ्गलिकुचाख्याम्रफलैर्युक्तं फलोदकम् । चकारे विन्यसेच्छालिनीवाराभ्यां प्रियङ्गुना ॥
बीजोदकं छकारस्थं विन्दारोत्पलपद्मकैः । कन्दैः कन्दोदकं तच्च जकारे विन्यसेद्बुधः ॥
चन्दनागरुकर्पूरैर्युक्तं गन्धोदकं तथा । झकारे विन्यसेद्धीमान्गन्धोदकमिति स्मृतम् ॥
ञकारे तिलसिद्धार्थयवैस्सिद्धोदकं तथा । एवं याम्यगतं प्रोक्तं व्यूहानां पञ्चकं पदम् ॥
माणिक्यमुक्तावैडूर्यैष्टकारे रत्नवारि तत् । ताम्ररूप्यसुवर्णैस्तु युक्तं लोहोदकं भवेत् ॥
ठकारे विन्यसेत्पश्चाद् डकारे कान्तवारि च । सूर्यकान्तमयस्कान्तं चन्द्रकान्तमिति स्मृतम् ॥
मक्षिकात्रयसंयुक्तं मक्षिकाख्यं ढकारगम् । अग्रकाम्भो णकारे तु युक्तं तत्रैभिरग्रकैः ॥
सौराष्ट्राञ्जनताक्ष्यैस्तु तकारे क्षारवारि तत् । धातूदकं थकारे स्याद् धातुसिन्दूरगैरिकैः ॥
रक्तचन्दनसंयुक्तं हरितालसमन्वितम् । मनश्शिलायुतं चापि दकारे रक्तवारि तत् ॥
सरित्पतिसरित्तीरक्षेत्रसंभवया मृदा । युक्तं मृदम्भ इत्युक्तं धकारे तत्समादिशेत् ॥
त्रिफलासंयुतं वारि कषायोदं नकारके । पकारे विन्यसेत्क्षीरं फकारे दधि विन्यसेत् ॥
बकारे विन्यसेत्सर्पिर्भकारे तैलमुच्यते । बाह्यस्थेषु पदेष्वेवमुक्तद्रव्यं तु मध्यमे ॥
तदनन्तरमष्टानां कथ्यतेऽत्र समासतः । फेनं च देवदारुं च मांसीतालीसपत्रकैः ॥
अर्थवक्त्रं तथा स्नानागारे तु रसमेव च । प्रथमावरणस्यैतान् पूर्वादिक्रमशो न्यसेत् ॥
चम्पकं जातिपुन्नागमल्लिकाकरवीरकम् । श्वेतार्क बकुलं चैव चतुरं गुल्मसंयुतम् ॥
माधवी कुरवं चव केतकी पाटली तथा । नन्द्यावर्तं च जम्बूकं जपाहोमाख्यमेव हि ॥
प्रागादिक्रमशो द्रव्यं षोडशेष्वपि विन्यसेत् । एवं द्रव्यं समाख्यातं शृणु देवानतः परम् ॥
ओंकारे व्यूहमध्ये तु शम्भुं गन्धादिभिर्यजेत् । देवदेवं महादीप्तं वरिष्ठं परमेष्ठिनम् ॥
सत्यरूपमनन्तं च परानन्दमनिन्दकम् । प्रथमावरणे तस्य कलशेष्वभितो यजेत् ॥
पाद्यादिषु ततोऽष्टौ च विद्येशांश्च प्रपूजयेत् । स्वनामपदमन्त्रैस्तान् नमोऽन्तैश्च ततोऽर्चयेत् ॥
द्वितीये कामदं कालनाशनं कपिलाम्बरम् । कपर्दिनं पुरारातिं खगं खड्गधरं विभुम् ॥
विबुधं विबुधाधीशं ज्ञानं विज्ञानलोचनम् । श्रीकण्ठमनघं वैद्यं वेदवेद्यं च षोडश ॥
तद्बाह्ये षोडस्वेतान्पूर्वादारभ्य पूजयेत् । रुद्रं भवं महादेवं वामदेवं हरं शिवम् ॥
ईशानं गिरिशं शर्वं शर्वोक्तममराधिपम् । कपर्दिनं करालाक्षं कालनाशनमव्ययम् ॥
त्रिनेत्रं च यजेद्धीमानकारादिषु मध्यजे । यकारावरणे प्रोक्ता अष्टरुद्रास्तथैव च ॥
व्यूहेष्वेतेषु सर्वेषु चाकारादिक्रमाद्यजेत् । तृतीयावरणे पश्चात्पूर्वादिक्रमतो यजेत् ॥
मनोजवं यजेन्मध्ये ततोऽष्टसु यथाक्रमम् । अनन्तमतिरिक्तं च विरक्तं वेदलोचनम् ॥
वेदान्तसारसन्दोहं विमलं विश्वभावनम् । विश्वशं चैव पूर्वादिक्रमाद्रुद्रान्समर्चयेत् ॥

द्वितीयावरणं पश्चात् षोडशस्वभितः क्रमात्। स्थाणुं सहस्रबाहुं च धूर्जटिं ज्वलनद्युतिम्॥
विद्युत्पिङ्गं जटामारं परमेश्वरमुन्नतम्। गर्भं भीमं हिमाभं च सर्वगं च विभीषणम्॥
कृत्तिवाससमाराध्यं पूर्वगं च क्रमाद्यजेत्। ततो ककारव्यूहे च क्रमाद्रुद्रान्समर्चयेत्॥
तत्तन्मध्यगतानेतान् संशृणुष्व समाहितः। .... महाकायं गकारे तु शूलिनं तु घकारके॥
ङकारे पूजयेद्भीमं चकारेऽत्युग्रमेव च। छकारेऽत्युग्रनामानं जकारे चेश्वरं तथा॥
झकारे पुनरीशं तु पुराणं तु ञकारके। लोकसाक्षी टकारे स्यात् ठकारे त्र्यम्बको भवेत्॥
गङ्गाधरं डकारे तु ढकारे चेन्दुमर्दनम्। णकारे सर्वदं पूज्य सर्वगं तु तकारके॥
थकारे तत्त्वविच्चैव दकारे शंकरो भवेत्। धकारे शान्त इत्युक्तं सर्वदस्तु नकारके॥
शाश्वतः स्यात्पकारे तु फकारे शुचिरुच्यते। बकारे भसितप्रीतो भकारे वदनस्तथा॥
मकारे वृषवाहश्च पूज्या रुद्राः प्रकीर्तिताः। तेषामनन्तरेऽष्टासु षोडशी चाथ तद्बहिः॥
पूर्वोक्तक्रमतो रुद्राः पूर्वोक्तान्पूर्ववद्यजेत्॥

cf. *Suprabhedāgama*, I, 15, 101-104, 79-95, 105-125:

विद्येशोमाशिवाख्यांश्च कुम्भान्विन्यस्य पूर्ववत्। विद्येशावरणं त्यक्त्वा तच्छृणुष्व दशावृतान्॥
प्रथमे चैव बीजानि लोहान्येव द्वितीयके। तृतीये चैव रत्नानि धातूंश्चैव चतुर्थके॥
पञ्चमे पञ्चगव्यानि षष्ठे चैव फलोदकम्। गन्धाश्चौषधयस्सर्वे सप्तमे च तथा भवेत्॥
अष्टमृच्चाष्टमे चैव कषाया नवमावृतौ। दशमे चैव पुष्पाणि एकैकं तु शृणु क्रमात्॥ ....
यवनीवारमुद्गाश्च तिल्सर्षपमेव च। श्वेतशाली महाशाली रक्तशाली तथैव च॥
सौगन्धी हेमशाली च दशबीजमिति स्मृतम्। द्वात्रिंशत्कलशे पूर्ये प्रथमावरणे न्यसेत्॥
उपरत्नानि नीतानि तावत्संख्यानि विन्यसेत्। चत्वारिंशच्च चत्वारि कलशानि समन्ततः॥ ....
प्रथमावरणं प्रोक्तं द्वितीयावरणं शृणु। चामीकरं तथा हेमं शातकुम्भमतः परम्॥
जाम्बूनदं च तप्तं च जातिसप्तादिमिश्रितम्। षड्विंशत्कलशेष्वेवमुदकैस्सह विन्यसेत्॥
तावत्संख्या भवेत्तेषु कलशेष्वन्तरोदकम्। कलशानि द्विपञ्चाशच्चतुष्कोणेषु चैव हि॥
द्वितीयावरणे न्यस्त्वा ब्रह्ममन्त्रैश्च देशिकः। द्वितीयावरणं प्रोक्तं तृतीयावरणं शृणु॥
पद्मरागं च वैडूर्यं वज्रं पुष्यं तथैव च। स्फटिकं मौक्तिकं नीलमिन्द्रनीलं प्रवालकम्॥
एतेषु नवरत्नाम्बु त्रिंशत्सु कलशेषु वै। तावत्संख्या भवेत्तानि कलशेष्वन्तरोदकम्॥
कलशानि भवेत् षष्टिश्चार्चयित्वाऽस्त्रविद्यया। तृतीयावरणं प्रोक्तं चतुर्थावरणं शृणु॥
हरितालं तथा माक्षिमञ्जनं च मनश्शिला। रोध्रं च सीसकं चैव गैरिकं तु ततः परम्॥
चतुस्त्रिंशत्सु कुम्भेषु सप्तधात्वम्बुना सह। तावद्भाण्डं भवेत्तानि कलशेष्वन्तरोदकम्॥
अष्टोत्तरं तथा षष्टिः कलशानां विशेषतः। प्रत्येकमर्चयेत्तानि विद्याङ्गैश्च विशेषतः॥
पञ्चमावरणे पञ्चगव्याधानमतः शृणु। गोमूत्रं गोमय क्षीरं दधि सर्पिः कुशोदकम्॥
गोमूत्रादिषडेतैस्तु अष्टत्रिंशद्घटे न्यसेत्। विन्यसेद्ब्रह्मपञ्चानामष्टत्रिंशत्कलाः क्रमात्॥
यावत्संख्या भवेत्तानि प्रत्येकं चान्तरोदकम्। द्रव्यान्कुम्भेषु संयोज्य शतरुद्रान्विशेषतः॥ ....
पञ्चमावरणं प्रोक्तं षष्ठमावरणं शृणु। कदलीबिल्वचूतांश्च मातुलुङ्गं च दाडिमी॥
नालिकेरं च नारङ्गं लिकुचं पनसं तथा। फलोदकानि तानीह द्वे षष्टीत्यभिधीयते॥
प्रत्येकं विन्यसेत्तानि कलशेष्वन्तरोदकम्। कलशानि शतानीह चतुर्विंशति चोत्तरम्॥
प्रत्येकमर्चयेत्तानि प्रशान्तायेति मन्त्रतः। गन्धैरोषधिभिश्चैव सप्तमावरणं शृणु॥
उशीरं चन्दनं चैव कर्पूरं जातिरेव च। शङ्खपुष्पं च श्रीदेवी विष्णुक्रान्ती शतावरी॥

गन्धांश्चाष्टौ च धातूंश्च षष्टयुत्तरशतेन च । तावत्संख्या तु विज्ञेया द्रुपस्नानविशेषतः ॥
द्वात्रिंशदुत्तरं प्रोक्तं शतमेकं समासतः । ओषधीनां लतानां च वृक्षाणां च समासतः ॥
फलानां कुसुमानां च मूलादीनां समाहरेत् । सप्तमावरणं प्रोक्तमष्टमावरणं शृणु ॥
दर्भाग्रे नागदन्ताग्रे वराहस्य च कर्षणे । वल्मीके वृषशृङ्गाग्रे नद्यां वै पर्वतेऽपि च ॥
समुद्रे चैव मेघानी मृदं ग्राह्य विशोधयेत् । प्रत्येकं कलशेष्वेवं सप्ततिः परिसंख्यया ॥
उदकेन समापूर्य तत्संख्या चान्तरोदकम् । चत्वारिंशत्समायुक्तं शतमेकं प्रकीर्तितम् ॥
अर्चयेत्पार्थिवार्णेन नवमावरणं शृणु । आम्रोऽथ पनसश्चैव न्यग्रोधोदुम्बरौ तथा ॥
अश्वत्थश्च शिरीषश्च मधुकोऽथ पलाशकः । अष्टवृक्षत्वचश्चूर्णं विन्यसेद्वारिणा सह ॥
प्रत्येकं पूरयित्वा तु सप्ततिश्चतुरुत्तरम् । तावत्संख्या भवेत्तानि उपस्नानोदकानि च ॥
चत्वारिंशत्तथा चाष्टौ शतैकेन समायुतम् । अर्चयेच्छिखया धीमान्गन्धपुष्पादिभिः क्रमात् ॥
दशमावरणे प्रोक्तं पुष्पाणि च ततश्शृणु । पङ्कजांश्च पलाशांश्च नन्द्यावर्तांश्च मल्लिकाः ॥
करवीरं चम्पकं च नीलोत्पलं तथाष्टकम् । कलशेषु विनिक्षिप्य सप्तत्यष्टाधिके स्मृताः ॥
पुष्पाणि कलशेष्वेवं निक्षिप्याद्भिः प्रपूर्य च । तावत्संख्या भवेत्तानि उपस्नानानि विन्यसेत् ॥
एवं दशावृतान्स्थाप्य गन्धपुष्पाक्षतैर्युतम् । प्रत्येकं कलशान्सर्वान्सूत्रेणावेष्टय यत्नतः ॥
द्रव्येषु शतरुद्रांश्च अप्सु तीर्थानि कल्पयेत् ॥

cf. *Kāmikāgama*, II, 4, 127-137:

वृत्तक्रममथो वक्ष्ये शिवकुम्भं तु मध्यतः । तद्वामे वर्धनी ज्ञेया रत्नान्यष्टसु विन्यसेत् ॥
माणिक्यं शिवकुम्भे तु पञ्चरत्नसमन्वितम् । कर्णिकाबाह्यदेशे तु दलमध्येऽष्टदिक्षु वा ॥
पाद्यादिकं सहस्रं तु तद्बहिर्विन्यसेत्क्रमात् । पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ॥
क्षीरं दधि घृतं चैव प्रथमावरणे न्यसेत् । द्वितीयावरणे स्वर्णं पदे षोडशसंख्यके ॥
चतुर्विंशतिसंख्याते नालिकेरफलं बहिः । द्वात्रिंशत्संख्यके प्रोक्तस्त्विक्षुसारश्च पञ्चमे ॥
षट्पञ्चाशद्घटे प्रोक्तो मधु षष्ठे ततः परम् । चतुःषष्टियुते बाह्ये नानापुष्पं च कीर्तितम् ॥
द्विसप्ततिसमायुक्ते सप्तमे सर्वबीजकम् । अष्टमे चतुराशीत्ये विन्यसेत्कदलीफलम् ॥
नवमे षण्णवत्यन्ते भस्मितं तदनन्तरम् । दशमे शतसंयुक्ते पञ्चगव्यं प्रकीर्तितम् ॥
चतुर्युक्ते शते पञ्चगव्यमेकादशांशके । अष्टोत्तरशतं बाह्ये कषायोदकमुच्यते ॥
धातुलोहोदकं पश्चाच्छते षोडशसंयुते । शतेऽष्टविंशतियुक्ते बाह्ये मृद्वारि कीर्तितम् ॥
सर्वगन्धं च सर्वेषु कलशेषु विनिक्षिपेत् ॥

cf. *Svāyambhuvāgama, paṭala* 18, vers 19-29:

अष्टौ षोडशसंख्या च चतुर्विंशतिसंख्यया । द्वात्रिंशत्संख्यया चैव षट्पञ्चाशन्निधीयते ॥
चतुष्षष्टिश्च कर्तव्यं द्विसप्ततिर्यथाक्रमम् । चतुरशीतिसंख्याता घटाः षण्णवतिस्तथा ॥
शतसंख्याश्च कर्तव्यं कलशाश्च चतुश्शतम् । अष्टोत्तरशतं चैव षड्भिर्दश शतं तथा ॥
अष्टाविंशच्छतं चैव एवमेव क्रमेण तु । प्रदक्षिणक्रमेणैव पूजयेत्तु विचक्षणः ॥
आग्नेयादिषु कोणेषु नवरत्नानि विन्यसेत् । पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ॥
क्षीरं दधि घृतं चैव प्रथमावरणे न्यसेत् । हेमं च नालिकेरं च इक्षुसारं मधु क्रमात् ॥
पुष्पं च सर्वबीजं च कदलीफलमेव च । भस्मितं पञ्चगव्यं च कषायोदकमेव च ॥
धातुतप्तुलकं चैव अष्टमृन्निरिति क्रमात् । विघ्नेशाद्यैव चण्डेशो नन्दीशः काल एव च ॥

विघ्नेशो वृषभश्चैव भृङ्गीशः स्कन्द एव च। नन्दः पिनाकपाणिश्च जयभद्रस्तथैव च ॥
विरूपाक्षः सूक्ष्मरूपः पिङ्गलाक्षः क्रमेण तु। एवमावरणादीनां देवता द्रव्यमुच्यते ॥

cf. *Mukuṭāgama*, *paṭala* 9, vers 62-69:

त्रिशतं साष्टकं प्रोक्तमुत्तमोत्तममुच्यते। प्रागग्रं द्वादशं सूत्रमुदगग्रं तथैव च ॥
एकविंशच्छतं कृत्वा पदं तत्र महेश्वर!। षट्सूत्रं च समायुक्तं सूत्रस्यावृत्तकं त्यजेत् ॥
चतुर्द्वारं न्यसेद्भीमाञ्चत्वारिंशत्पदस्थितम्। मध्ये शिवपदं ग्राह्य नवपदं तत्र कारयेत् ॥
एकैकपदमध्ये तु पञ्चविंशतिसंख्यया। कलशाश्च तथा प्रोक्ताः सहस्रं तु दशावृते ॥
शिव धिक्याष्टसाहस्रं क्रमाद्वक्ष्ये महेश्वर!। प्रथमे चैव बीजानि लोहान्येव द्वितीयके ॥
तृतीये चैव रत्नानि चतुर्थे धातवः क्रमात्। पञ्चमे पञ्चगव्यानि षष्ठे चैव फलोदकम् ॥
गन्धाद्योषधयः सर्वे सप्तमे च प्रकीर्तिताः। मृदम्भश्चाष्टमे चैव कषायाम्भस्ततः परम् ॥
दशमे चैव पुष्पाम्भः प्रत्येकं च शृणु क्रमात् ॥

I

TABLE DES ĀVARAṆA ET DES KALAŚA SELON LES ĀGAMA

I *Maṇḍala*: *caturaśra* (carré)

Raurava, Ajita, Kāmika, Makuṭa et *Vīra*

centre		:	1	*śivakumbha*
āvaraṇa	I	:	8	*kalaśa*
,,	II	:	64	,,
,,	III	:	72	,,
,,	IV	:	80	,,
,,	V	:	88	,,
,,	VI	:	96	,,
,,	VII	:	104	,,
,,	VIII	:	112	,,
,,	IX	:	120	,,
,,	X	:	128	,,
,,	XI	:	136	,,
	Total		1009	,,

Suprabheda

centre		:	1	*śivakumbha*
āvaraṇa	I	:	8	*kalaśa*
,,	II	:	44	,,
,,	III	:	52	,,
,,	IV	:	60	,,
,,	V	:	68	,,
,,	VI	:	76	,,
,,	VII	:	124	,,
,,	VIII	:	132	,,
,,	IX	:	140	,,
,,	X	:	148	,,
,,	XI	:	156	,,
	Total		1009	,,

Vyūha

madhyavyūha	:	1	+ 8 =	9	*kalaśa*
antarvyūha	:	16	× 25 =	400	,,
bahirvyūha	:	24	× 25 =	600	,,
		Total		1009	,,

Vyūha

madhyavyūha	:	1	+ 8 =	9	*kalaśa*
antarvyūha	:	12	× 25 =	300	,,
bahirvyūha	:	28	× 25 =	700	,,
		Total		1009	,,

II *Maṇḍala*: *vṛtta* (rond)

Kāmika, Kāraṇa et *Svāyambhuva*

centre		:	1	*śivakumbha*
āvaraṇa	I	:	8	*kalaśa*
,,	II	:	16	,,
,,	III	:	24	,,
,,	IV	:	32	,,
,,	V	:	56	,,
,,	VI	:	64	,,
,,	VII	:	72	,,
,,	VIII	:	84	,,
,,	IX	:	96	,,
,,	X	:	100	,,
,,	XI	:	104	,,
,,	XII	:	108	,,
,,	XIII	:	116	,,
,,	XIV	:	128	,,
	Total		1009	,,

Sahasra

centre		:	1	*śivakumbha*
āvaraṇa	I	:	8	*kalaśa*
,,	II	:	16	,,
,,	III	:	24	,,
,,	IV	:	32	,,
,,	V	:	40	,,
,,	VI	:	48	,,
,,	VII	:	56	,,
,,	VIII	:	64	,,
,,	IX	:	72	,,
,,	X	:	80	,,
,,	XI	:	88	,,
,,	XII	:	96	,,
,,	XIII	:	84	,,
,,	XIV	:	92	,,
,,	XV	:	100	,,
,,	XVI	:	108	,,
	Total		1009	,,

[पञ्चविंशः पटलः]

[पवित्रारोपणविधिः][1]

[पवित्रारोपणकारणम्]

[2]अतः परं प्रवक्ष्यापि पवित्रारोपणं परम्। सर्वपापहरं चैव सर्वसिद्धिप्रदायकम् ॥ १ ॥

---

[1] pour पवित्रारोपणविधि voir *Aṃśumad*, *paṭala* 14 et 43, *Kāraṇa*, I, 122, *Kāmika*, II, 18, *Kiraṇa*, III, 6, *Dīpta*, *paṭala* 58, *Makuṭa*, *paṭala* 11, *Yogaja*, p. 282-295, *Sahasra*, *paṭala* 26, *Suprabheda*, II, 7, *Sūkṣma*, *paṭala* 11.

Il y a deux *paṭala* qui traitent du *pavitrāropaṇavidhi*, le 25° et le 46°; le premier contient 85 vers et le second, plus détaillé, en contient 133. Le *Pavitrotsavavidhi* cite de nombreux vers des deux *paṭala*, mais quelques uns des vers du 46^{o} *paṭala* sont cités comme provenant d'un *Rauravottara*, au lieu du *Raurava*. Ainsi, il semble qu'il y ait eu quelque confusion dans les citations de cette compilation, car les vers du même *paṭala* ne peuvent appartenir à la fois au *Raurava* et au *Rauravottara*. Une autre conclusion serait que le second *paṭala* traitant *pavitrārohaṇa* appartient non à la première moitié de l'*āgama* (ou *pūrva-raurava*), mais à la seconde (ou *raurava-uttara*). Dans ce cas, on pourrait donner les citations comme provenant soit du *Raurava*, soit du *Rauravottara*. Ce qui pourrait appuyer notre hypothèse (cf. note 11, p. 8), c'est que le *Rauravottara* ne semble pas être un *upāgama*, mais une partie du *Raurava* lui même.

Mais il faudrait alors qu'un changement ait eu lieu dans l'ordre des *paṭala*. On verrait bien ces 2 *paṭala* traitant du même sujet dans 2 sections différentes. Cependant, les manuscrits que nous avons pu voir donnent ces 2 *paṭala* dans le *Raurava* où la première partie du *Raurava* lui-même ; d'autre part, le second *paṭala* porte le numéro 46. Une des raisons que l'on peut trouver à la nécessité d'avoir placé ces deux *paṭala* dans la même section est la suivante: le 25^{o} *paṭala* traite du *pavitrāropaṇa* à faire chaque année comme le *mahotsava*, et en tant que tel, il suit le *mahotsava* et le *snapana*; le 46^{o} *paṭala* est donné après la *pratiṣṭhā* des statues et la construction des temples: il pourrait donc décrire un *pavitrāropaṇa* spécial qui doit être fait en certains cas seulement. Ce serait donc ceci qui aurait motivé le changement dans l'ordre des *paṭala* et ainsi ce 46^{o} *paṭala* aurait été ramené de l'*Uttara-raurava* où il se trouvait primitivement, dans le *Pūrva-raurava* où il peut logiquement se placer. Ceci n'est qu'une explication possible, car une étude comparée des textes āgamiques ne laisse voir aucune différence dans les *pavitrāropaṇa*.

Enfin, nous avons un exemple semblable dans l'*Aṃsumadāgama* où nous trouvons deux *paṭala*, le 14^{o} et le 43^{o}, qui traitent du *pavitrāropaṇa*.

[2] cf. *Kāraṇa*, I, 122, 1-3:

पवित्रारोहणं वक्ष्ये भुक्तिमुक्तिफलप्रदम्। सर्वलोकहितं पुण्यं सर्वसंपत्करं परम् ॥
पूजासंकर्षणं चैव विश्वकृत्रिमनाशनम्। निर्माल्यसंकरं यत्तत्पूजायां वत्सरे कृतम् ॥
तद्दोषशमनार्थं तु पवित्रारोहणं कुरु ॥

आचार्यसंकरं चैव [1]तन्त्रसंकरमेव च । [2]निर्माल्यसंकरं चैव [3]मन्त्रलोपं च संकरम् ॥ २ ॥
क्रियालोपं च पूजाङ्गहीनं चैव तथान्यकम् । संवत्सरकृतं सर्वं पवित्रेण विनश्यति ॥ ३ ॥
पवित्रं कारयेत्तस्मात्प्रतिसंवत्सरं गुरो ।

[पवित्रारोपणकालः][4]

आषाढादिचतुर्मासं [5]प्रशस्तं चास्य विद्यते ॥ ४ ॥

---

voir aussi *Yogaja*, p. 282:

अथ वक्ष्ये विशेषेण पवित्रारोहणं कुरु । पवित्रं नाम यत्प्रोक्तं शुद्धमित्यभिधीयते ॥
देवदानवगन्धर्वाः पिशाचा ब्रह्मराक्षसाः । सर्वे ऋषिगणाश्चैव क्षेत्रपालमरुद्गणाः ॥
सर्वेषां च प्रियार्थं तु पवित्रारोहणं कुरु ॥

voir aussi *Aṃśumad, paṭala* 43, 1-4:

अथ वक्ष्ये विशेषेण पवित्रारोहण शृणु । मनोवाक्कायकृत्येन रौरवादि विशेत्क्रमात् ॥
तत्पापं पतनं प्रोक्तं तद्भेदो बहुधा भवेत् । पतनात् त्रायते यस्मात्तस्मादेतत्पवित्रकम् ॥
स्थण्डिलं परसिद्धं च आत्मार्थं च परार्थकम् । वर्णाश्रमविभेदत्वात्स्वसिद्धिर्बहुधा भवेत् ॥
स्वायम्भुवादिभेदैश्च परसिद्धिस्तथैव च । आवश्यकमिदं कर्म तस्माद्भेदस्त्विहोच्यते ॥

voir aussi *Suprabheda*, II, 7, 1-2:

अथातः संप्रवक्ष्यामि पवित्रारोहणं शृणु । सर्वपूजासमृद्ध्यर्थं व्रतपूर्णार्थमेव च ॥
सर्वकर्मसु हीनेषु पूर्णार्थं कारयेद्बुधः ।

[1] A: तान्त्र pour तन्त्र. [2] C: निर्माल्यं संकरं.

[3] A: मन्त्रलोपस्य pour मन्त्रलोपं च.

[4] cf. *Makuṭa, paṭala* 11, 3-7:

आषाढे शुक्लपक्षे तु श्रावणे वा विशोषतः । नभस्ये वाश्वयुङ्मासे कृष्णपक्षेऽथवा पुनः ॥
द्वितीयादि चतुर्थ्यादि तथाष्टम्यादि वा पुनः । अष्टम्यन्तं प्रकर्तव्यं पवित्रं सर्वसिद्धिदम् ॥
अष्टम्यादि दशम्यादि द्वादश्यादि च वा बुधः । चतुर्दश्यन्तकं कुर्यात्पवित्रारोहणक्रियाम् ॥
सप्ताहं नवपञ्चाहं त्र्येकाहं वापि कारयेत् । सप्तम्यां वा त्रयोदश्यां रेवत्यां कृत्तिकान्विते ॥
आर्द्रायां रोहिणीयुक्ते कारयेत्तु पवित्रकम् ॥

voir aussi *Sahasra, paṭala* 26, 1-6:

अथातः संप्रवक्ष्यामि पवित्रोत्सवविधिक्रमम् । आषाढे शुक्लपक्षे तु श्रावणे वा विशोषतः ॥
नभस्ये वाश्वयुङ्मासे कृष्णपक्षेऽथवा पुनः । द्वितीयादि चतुर्थ्यादि तथा षष्ठ्यादि वा पुनः ॥
अष्टम्यन्तं प्रकर्तव्यं पवित्रं सर्वसिद्धिदम् । अष्टम्यादि दशम्यादि द्वादश्यादि च वा पुनः ॥
चतुर्दश्यादिकं कुर्यात्पवित्रारोहणोत्तमम् । सप्तम्यां वा त्रयोदश्यां रेवत्यां कृत्तिकान्वितम् ॥
आर्द्रायां रोहिणीयुक्ते कारयेत्तत्पवित्रकम् । एकाहं वा त्रयाहं वा पञ्चाहं वा नवाहकम् ॥
सप्ताहं वा प्रकर्तव्यं पवित्रोत्सवमाचरेत् ॥

voir aussi *Aṃśumad, paṭala* 43, 5-9:

चान्द्रादिमासषट्के च अथवा कृत्तिकान्तकम् । सितपक्षे चतुर्दश्यामेवाषाढे पवित्रकम् ॥
इतरेषु च मासेषु शुक्लकृष्णद्वयोरपि । चतुर्दश्यामथाष्टम्यां पवित्रविधिमाचरेत् ॥
यत्पक्षे पूर्वमुद्दिश्य तत्प्रत्यब्दं समाचरेत् । पक्षे तिथौ च यत्पूर्वं तथैव परिकल्पयेत् ॥
तन्मासे चण्डपूजान्तं सर्वसिद्धिकरं परम् । अष्टम्यां वा चतुर्दश्यां पवित्रविधिमाचरेत् ॥
विपरीतं कृतं चेत्तु अभिचाराय तन्नृणाम् ।

[5] A: प्रशस्तमस्य ; C: प्रसिद्धमद्य.

[1]तेष्वष्टम्यां सिते पक्षे चतुर्दश्यां विशेषतः। [2]कृष्णपक्षे तु वा तद्वत्सुमुहूर्ते विशेषतः ॥ ५ ॥
सुलग्नकरणे[3] ऋक्षे [4]पवित्रारोपणं कुरु।

[पवित्रसूत्राणि][5]

दुकूल[6]पट्टकार्पाससूत्रं [7]श्रेष्ठान्तराधमम् ॥ ६ ॥

---

[1] B: तेष्वष्टम्यसिते.
[2] A et C: कृष्णपक्षेषु वा.
[3] C: सुलग्नकरणं.
[4] B et C: पवित्रारोहणं.
[5] cf. *Kāraṇa*, I, 122, 6-9:

द्विजकन्याकृतं सूत्रमुत्तमं त्विति कीर्तितम्। मध्यमं नृपकन्यातः कन्यसं शूद्रया कृतम् ॥
सूत्रमूर्णामयं वाथ सूत्रं कार्पाससम्भवम्। यथासम्भवसूत्रं वा द्रव्यात्कृतमथापि वा ॥
समं श्लक्ष्णं दृढं सूत्रं निष्केशं तृणवर्जितम्। तत्सूत्रं त्रिगुणीकृत्य तेनैव त्रिगुणीकृतम् ॥
तत्सूत्रं चैव सूत्रं तु कुर्यात्तेन पवित्रकम् ॥

cf. *Kāmika*, II, 18, 9-10:

क्षौमकार्पासजं सूत्रं मौञ्जं वा तदसम्भवे। दर्भं सवल्कलोत्थं वा समाहृत्याधिवासयेत् ॥

cf. *Aṃśumad*, 43, 9-10:

दर्भजं वल्कलोत्थं वा क्षौमं कार्पासजं तु वा। यथासंस्कारमार्गेण संग्रहेद्देशिकोत्तमः ॥

cf. *Yogaja*, p. 283:

उत्तमं हेमसूत्रं तु मध्यमं रौप्यमेव च। अधमं ताम्रसूत्रं त्वलाभे कार्पासमेव च ॥
कुशाश्च वल्कलं चैव ऋषीणां समुदाहृतम्। नेत्रपट्टोद्भवं चैव पद्मसूत्रं तथोत्तमम् ॥
अलाभे कार्पासमुक्तं तन्तुना सुदृढं कुरु। ब्राह्मणा क्षत्रिया वैश्या शूद्रकन्याऽथ सूत्रवित् ॥
सूक्ष्मतन्तु तथा कुर्याद्रोमदुष्टं तु वर्जयेत् ॥

pour les détails du *sūtra* voir *Aṃśumadāgama*, 43, 10-18:

तन्तुना त्रिगुणीकृत्य तदेकं प्रथममुच्यते। एकतन्तुविवृद्धया तु नवसंख्यावसानकम् ॥
एवं सप्तविधं प्रोक्तमेकमेकमिदं मतम्। वामाद्या भूतिदेवाश्च नवसूत्रेषु कल्पयेत् ॥
तन्तुना द्विगुणीकृत्य दशवृद्धया ततः क्रमात्। शतमष्टोत्तरं ज्ञेयमन्यथा च निगद्यते ॥
तारद्वादशवृद्धया चाप्यष्टोत्तरशतं भवेत्। एवं सप्तविधं कृत्वा तत्तत्सूत्रेण कल्पयेत् ॥
पूर्वतन्तुक्रमेणैव पदसंख्या च मध्यमम्। पञ्चाशत्तन्तुसंख्या चाप्यधमं परिकीर्तितम् ॥
उत्तमत्रयमेवोक्तं मध्यमत्रयमुच्यते। षट्त्रिंशत्पञ्चविंशाच्च कलासंख्याक्रमेण तु ॥
मध्यमत्रयमेवोक्तं कन्यसत्रयमुच्यते। त्रिसूत्रादिनवान्तं च द्विद्विसूत्रेण योजयेत् ॥
अधमत्रितयं प्रोक्तं सप्तभेदं पृथक् पृथक्। तन्तुसंख्या समाख्याता ॥

[6] C: पट pour पट्ट.
[7] B: श्रेष्ठान्तरायमम्.

[1]चातुर्वर्ण्योद्भवस्त्रीभिः[2] सूत्रितं [3]सूत्रमुत्तमम् । तदलाभे तु [4]वाणिज्यगृहे सूत्रं तु [5]संग्रहेत् ॥ ७ ॥
[6]भिन्नं जटिलछिन्नाग्रं [7]जीर्णं वर्णान्तराश्रितम् । अतिस्थूलातिसूक्ष्मं च त्यक्त्वान्यत्तु परिग्रहेत्[8] ॥ ८ ॥

[सूत्रग्रहणविधिः][9]

सद्येन शोषयेत्सूत्रं क्षालयेत्कवचेन तु । शिरसा शोषयित्वा तु ततो नेत्रेण [10]संग्रहेत् ॥ ९ ॥
[11]सद्योजातेन मन्त्रेण त्रिगुणीकृतकुब्जकम् । प्रोक्षयेदस्त्रमन्त्रेण[12] बीजमुख्येन शोधयेत् ॥ १० ॥
[13]अस्त्रेणैव तु मन्त्रेण पिण्डवत्संप्रकल्पयेत् ।

[यन्त्रलिङ्गम्]

[14]यन्त्रिकां फलकां कृत्वा [15]यन्त्रस्य द्विगुणायतम् ॥ ११ ।

---

[1] Les vers 7 et 8 sont cités dans le *Pavitrotsavavidhi*, p. 123.

[2] B: चातुर्वर्ण्योद्भवैः स्त्रीभिः ; C: चातुर्वर्ण्योद्भवेत्स्त्रीभिः . [3] B: सूत्रकं वरम् ; C: सूत्रतद्वरम् .

[4] A: वाणिज्यगृहसूत्रं ; C: वाणिज्यग्रहे ; *Pavitrotsavavidhi*: तत्पाणिग्रहसूत्रं.

[5] A: संगृहेत् ; *Pavitrotsavavidhi*: विन्यसेत् .

[6] A: भिन्नं . . . छिन्नाग्रं ; B: भिन्नं जटिं च छिन्नाग्रं ; C: भिन्नं जटिलछिन्नोग्रं ; *Pavitrotsavavidhi*: पङ्कं जटिलछिन्नं च.

[7] A: जीर्णवर्णाश्रितान्तरम् ; B: जीर्णवर्णान्तराश्रितम् ; C: तीर्थवर्णाश्रितान्तरम् ; *Pavitrotsavavidhi*: जीर्णं वर्णान्तदूषितम् .

[8] Le vers suivant, donné dans la citation du *Pavitrotsavavidhi* manque dans notre texte:

सूत्रं प्रागेव संगृह्य निर्मितं द्विजकन्यया । अथवा निर्मितं चान्यैः क्षालयेदस्त्रवारिणा ॥

[9] cf. *Kāraṇa*, I, 122, 9-10:

प्रोक्षयेद्बीजमुख्येन शोधयेत्सूत्रमादरात् । क्षालयेत्कवचेनैव कम्बलं वर्मणा कुरु ॥

cf. *Kāmika*, II, 18, 10-11:

त्रिगुणं त्रिगुणीकृत्य शोधयेदस्त्रमन्त्रतः । रोमाद्यं शुद्धतोयैश्च क्षालयेदस्त्रमन्त्रतः ॥
शुष्कं कृत्वा हृदा तेन पवित्रं कारयेद्गुरुः ॥

cf. *Sūkṣma*, 11, 7-9 et *Aṃśumad*, 14, 13-14:

क्षौमं कार्पासकं वाथ सूत्रमेवं परिग्रहेत् । त्रिगुणं त्रिगुणीकृत्य चास्त्रमन्त्रेण शोधयेत् ॥
रोमाद्यं तु विसृज्याथ क्षालयेदस्त्रमन्त्रतः । शोषणं हृदयेनैव पवित्रं कारयेत्सुधीः ॥

[10] A: संगृहेत् .

[11] Ce demi-vers est cité dans le *Pavitrotsavavidhi*, p. 123.

[12] B: प्रोक्षयेद्द्विस्त्रिरस्त्रेण ; C: प्रोक्षयेद्धाममन्त्रेण.

[13] Ce demi-vers est cité dans le *Pavitrotsavavidhi*, p. 124.

[14] Ce demi-vers est cité dans le *Pavitrotsavavidhi*, p. 125.

[15] *Pavitrotsavavidhi*: यन्त्री स्यात्त्रिगुणायतम् .

[1]द्विगुणं लिङ्गविष्कम्भं घनमेकाङ्गुलं भवेत्। तस्मिन् [2]सुयोजयेच्छङ्कूनर्क[3]मात्रायतान्वितान्[4] ॥ १२ ॥
[5]व्योममात्रविशालाढ्यान्[6] [7]सुवृत्तानार्जवान्दृढान्[8]। वसुमात्रायतं वापि [9]हृदं वेदाङ्गुलं तु वा ॥ १३ ॥
[10]पूजांशोत्सेधसदृशं लिङ्गपीठे [11]ह्यरान्तकम्। [12]लिङ्गविष्कम्भविस्तारे [13]शङ्कून् संस्थापयेद्दृढम् ॥१४॥
[14]प्रतिमानां कृकाद्यादि [15]श्रोण्यन्तं च विशेषतः। [16]कृकाद्याः कटिपार्श्वान्तं [17]प्रभाग्रात्तु स्थलान्तकम् ॥१५॥
[18]स्तूप्यग्राज्जघनान्तं च शङ्कुस्थापनसीमकम्[19]। [20]आचार्यनृपकर्तॄणां भक्तानां च विशेषतः ॥ १६ ॥
गणिकादासिकादीनां [21]कृकाद्यान्नाभिसीमकम्। [22]पवित्रकरणार्थं तु [23]यन्त्रिकां फलकां कुरु ॥ १७ ॥
[24]रत्नलोहजपाषाणलेख्यलिङ्गान्विशेषतः। यन्त्रलिङ्गं तु कर्तव्यं वेणुरज्जुससूत्रकैः[25] ॥ १८ ॥
पक्षादियुगयामोच्चमुच्चद्विगुणनाहकम्। [26]चक्राकृति शिरः कुर्यान्नववस्त्रेण वेष्टयेत् ॥ १९ ॥
[27]लिङ्गं संस्थापयेत्पीठे यन्त्रलिङ्गं ततो न्यसेत्।

---

[1] C: द्विगुणाल्लिङ्गविष्कम्भाद्.
[2] C: संयोजयेत् pour सुयोजयेत्.
[3] A: शङ्कुं तर्क pour शङ्कूनर्क.
[4] A: अन्वितम् pour अन्वितान्.
[5] B: व्याम pour व्योम.
[6] C: विशालं स्यात् pour विशालाढ्यान्.
[7] C: सुवृत्तं pour सुवृत्तान्.
[8] A: आर्जवाद्दढान् pour आर्जवान् दृढान्.
[9] A: हृदा.
[10] A: पूजां शोधयेत् सदृशे; C: पूजांशोदस्रसदृशे.
[11] A: अरान्तकम्; C: अरान्तके.
[12] C: लिङ्गं pour लिङ्ग.
[13] C: सकृत् pour शङ्कून्; A: शकृन्.
[14] A: प्रतिमाणं; C: प्रतिमाणां.
[15] B: श्रोष्यन्तं; C: श्रेण्यन्तं.
[16] B: कुकाद्याः.
[17] A: प्रभायाग्रात्; C: प्रभायाग्रान्; B: भ्रभयाग्रात्.
[18] A: स्तूप्यग्रं जघनान्तं च; B: स्तूप्यग्रात्तु घनान्तं च: C: स्तूप्यग्रा तु घनान्तं च.
[19] C: सीमतः pour सीमकम्.
[20] A: आचार्यान्नृपकन्तुश्च; B: आचार्यनृपकङ्कुश्च; C: आचार्यनृपकर्तुश्च.
[21] B: कृकाद्यां नाभसीमकम्.
[22] A: पवित्रकारणार्थं तु.
[23] A: यन्त्रकां फलकां; B et C: यन्त्रिकाफलकान्.
[24] A: रत्नलोहजपुष्पाणां लेख्यलिङ्गं विशेषतः; B: रत्नलोहजपाषाणान् लिप्य लिङ्गे विशेषतः.
[25] A et C: सरस्कलैः pour ससूत्रकैः; B: सरक्तकैः.
[26] C: चित्राकृति pour चक्राकृति.
[27] cf. *Dīpta*, 58, 72-75:

मृण्मया लिङ्गपूजा चेद्यन्त्रलिङ्गं तु कारयेत्। वेणुरज्जुसमायुक्तं यन्त्रलिङ्गैकहस्तकम् ॥
छत्राकारद्वयशिरं लिङ्गं वै स्थापयेत्क्रमात्। अथवा चन्दनं लिङ्गे तालमात्रेण कारयेत् ॥
उत्सवस्य तु नालं स्याद्यन्त्रपीठोपरिस्थितम्। याज्ञिकैः संस्कृतं पीठं त्रिगुणेन समन्वितम् ॥
दुकूलपट्टकार्पासैश्चित्रवस्त्रैश्च वेष्टयेत्। शेषं पूर्वोक्तवत्कुर्यात्पूजाङ्गं गुरुणा सह ॥

voir aussi *Kāraṇa*, I, 122, 78-81:

आलये वा गृहे वापि कारयेद्विधिपूर्वकम्। आत्मार्थं लिङ्गपूजा चेद्यन्त्रलिङ्गं प्रकल्पयेत् ॥
एकहस्तप्रमाणेन वेणुरज्जुं समारभेत्। छत्राकारं शिरः कुर्याल्लिङ्गं वै स्थापयेत्क्रमात् ॥
दुकूलपट्टकार्पासैश्चित्रवस्त्रैश्च वेष्टयेत्। शेषं पूर्वोक्तवत्कुर्याद्गुरुणा सह पूजनम् ॥

[पवित्रसूत्रसंख्या][1]

नवसूत्रैकसूत्रेण [2]शतसूत्रं [3]वरं भवेत् ॥ २० ॥

तदर्धं मध्यमं ख्यातं तस्यार्धं स्यात्कनीयसम् ।

[पवित्रग्रन्थयः]

ग्रन्थिश्चाष्टशतं श्रेष्ठं तस्यार्धं मध्यमं भवेत् ॥ २१ ॥

सप्तविंशतिग्रन्थिः स्यादधमं परिकीर्तितम् । [4]अन्यद्दशाङ्गुले ग्रन्थिरष्टपञ्चाङ्गुलेऽपि[5] वा ॥ २२ ॥

त्र्यङ्गुले[6] द्वयङ्गुले[7] वापि ग्रन्थिरेकाङ्गुलेऽपि[8] वा । [9]अन्यलिङ्गस्य विस्तारे [10]ग्रन्थींस्तु परिकल्पयेत् ॥

[पवित्राधिदेवताः][11]

सूत्राणां नवशक्तिः स्याद्ग्रन्थीनां रुद्रतोऽधिपाः[12] ।

---

[1] cf. *Kāmika*, II, 18, 12-20:

द्विगुणास्तन्तवो हास्ते दशवृद्ध्या ततः क्रमात् । शतमष्टोत्तरं तेषां तन्तूनामुत्तमोत्तमे ॥
द्वादशोत्तरया वृद्ध्या द्वादशाभ्यस्तदन्तिकाः । तन्तवो वाथ संसिद्धाः कन्यसादिषु सिद्धिषु ॥
यवीयसां कला संख्या मध्यानां वर्णलक्षिताः । ज्येष्ठानां पदसंख्यातास्तन्तवो मानुषे मताः ॥
स्वायम्भुवादिलिङ्गेषु बाणे वा रत्नजेऽपि वा । स्थण्डिले मण्डले वापि चले वा प्रतिमासु च ॥
संख्यास्सर्वाश्च संग्राह्यास्समा वा विषमाश्च वा । समा एव गृहस्थस्य परिवारामरादिषु ॥
तथैव हीनवित्तेषु लिङ्गादिषु मुनीश्वराः ! । एकाद्यैकैकवृद्ध्या तु तन्तवो द्वादशान्तिकाः ॥
ग्रन्थयस्तन्तुसंख्याताः स्निग्धगर्भा मता नव । यथेष्टग्रन्थयो वापि समाः सर्वत्र संस्थिताः ॥
एकद्वित्र्यङ्गुलं वापि ग्रन्थिमानमिहागमे । ग्रन्थयो वेष्टदेशेऽथ विधातव्या विचक्षणैः ॥

[2] A: शतं सूत्रं.
[3] C: परं.
[4] C: अन्तर्दशाङ्गुले ; B: अन्यद्दशाङ्गुलो.
[5] B: पञ्चाङ्गुलोऽपि pour पञ्चाङ्गुलेऽपि.
[6] B: त्र्यङ्गुलो ; C: त्रियङ्गुले.
[7] B: द्वयङ्गुलो.
[8] B: अष्टाङ्गुलोऽपि pour एकाङ्गुलेऽपि.
[9] A, B et C: अन्यलिङ्गस्य.
[10] A et B: ग्रन्थयः.

[11] cf. *Kāmika*, II, 18, 12:

शक्तयो नव वामाद्या नवसूत्राधिपा मताः ।

cf. *Kāraṇa*, I, 122, 16:

ग्रन्थीनामधिदेवाः स्युर्ब्रह्मविष्णुमहेश्वराः ।

cf. *Suprabheda*, II, 7, 17 et 23 et *Sahasra*, 26, 21 et 26:

वामाद्याः शक्तयस्तत्र नवसूत्राधिदेवताः । . . .
इन्द्रादिलोकपालाश्च ग्रन्थीनामधिदेवताः ॥

[12] C: अधिपः pour अधिपाः.

[अधिकारिभेदेन पवित्रसूत्रसंख्या][1]

सप्तविंशतिसूत्रेणाप्याचार्याय[2] प्रकल्पयेत् ॥ २४ ॥
[3]भक्तानां नवसूत्रेण परिचाराणां तथैव च । त्रयस्त्रिंशतिसूत्रेण नृपतेः परिकल्पयेत् ॥ २५ ॥

[गन्धद्रव्यम्][4]

[5]कृष्णागरु[6] च कर्पूरं कस्तूरी नवनीतकम् । [7]घनं कुष्ठमुशीरं च चन्दनं च फलत्रयम् ॥ २६ ॥
एलालवङ्गतक्कोलं[8] [9]पत्रं गोरोचनं तथा । गन्धद्रव्यमिति प्रोक्तं [10]रागद्रव्यमथोच्यते ॥ २७ ॥

[रागद्रव्यम्]

गैरिकं जातिलिङ्गं च कुङ्कुमं रोचनं तथा । रक्तचन्दनसंयुक्तं कर्पूरेण विमिश्रितम् ॥ २८ ॥
[11]मनःशिला च रजनी [12]मञ्जिष्ठा [13]दार्विरेव च । [14]रागद्रव्यमिति[15] प्रोक्तं रञ्जयेत्तु पवित्रकम् ॥ २९ ॥

---

[1] cf. *Kāraṇa*, I, 122, 19-20:
एकं तु परिवाराणां प्रासादस्य त्रिसूत्रकम् । शतार्धं सूत्रितं सूत्रं नृपाणां परिकल्पयेत् ॥
पञ्चविंशतिसूत्रैश्च कृतं तत्स्थापकाय वा । परिचारकभक्तानां रन्ध्रसूत्रेण सूत्रितम ॥

[2] A, B et C omettent अपि dans अप्याचार्याय.

[3] Ce demi-vers est cité dans le *Pavitrotsavavidhi*, p. 135.
cf. *Dīpta*, 58, 2:
भक्तानां परिचाराणां नवसूत्रं प्रकल्पयेत् ।

[4] cf. *Dīpta*, 58, 4-7 pour les गन्धद्रव्य et रागद्रव्य—
रक्तचन्दनकर्पूरं कस्तूरी नवनीतकम् । घनं कोष्ठमुशीरं च चन्दनं च फलत्रयम् ॥
एलालवङ्गकच्चोलं जाती च शतपत्रकम् । गन्धद्रव्याणीमानीह यथालाभं परिग्रहेत् ॥
गैरिकं कुङ्कुमं चैव दरदं रोचनं तथा । रक्तचन्दनकाश्मीरं हरिद्रा च मनश्शिला ॥
रक्तद्रव्याणि चोक्तानि रञ्जयेद्देशिकोत्तमः ॥
cf. *Kāmika*, II, 18, 20-21:
रक्तचन्दनकाश्मीरगैरिकागरुचन्दनैः । कुष्ठकर्पूरसंयुक्तं हरिद्राकृष्णगन्धयुक् ॥
रञ्जयेद्धृदयेनैव रक्तसूत्रादिभिस्तु वा ॥

[5] Les vers 26-30 sont cités par Nirmalamaṇi dans son commentaire *Prabhā* sur la *Kriyākramadyotikā* d'Aghoraśivācārya, p. 178-179 (éd. Chidambaram).

[6] A: कृष्णागरुं च ; C et *Prabhā*: कृष्णागरुश्च.

[7] A: घनं कुष्ठौशिरं चैव ; B: घनकुष्ठमुशीरं च ; C et *Prabhā*: वनं घोषोशिरश्चैव.

[8] A et C: कच्चोलं pour तक्कोलं.

[9] C: पात्रं ; *Prabhā* घात्रं.

[10] A: राजद्रव्यमथोच्यते ; C et *Prabhā*: रञ्जद्रव्यमथोच्यते ; B: रागद्रव्यमिहोच्यते.

[11] C et *Prabhā*: मनोशिला रजनी चैव.

[12] B: माञ्जिष्ठं ; C: मञ्जिष्ठो.

[13] A: दाब्धिरेव च.

[14] A, C et *Prabhā* : रञ्ज pour राग.

[15] B: इदं pour इति.

त्रिगुणीकृतसूत्रेण रज्जुं कृत्वा तु रज्जयेत्। [1]बन्धयेत्तेन रज्ज्वा तु [2]ग्रन्थयेत्तु रुरो विदुः॥ ३०॥
[3]हृदा शङ्कुषु सूत्रं च कवचेन तु बन्धयेत्। अधिवासं[4] ततः कृत्वा [5]पूर्वरात्रे विशेषतः॥ ३१॥

[यागमण्डपः][6]

प्रासादस्याग्रतो [7]वेशे [8]मण्डपं चतुरश्रकम्। वितानाद्यैरलंकृत्य [9]मध्ये त्वक्षकरेण तु॥ ३२॥
व्यासं [10]तु [11]वेदिकायाश्च [12]तद्वेदांशेन तुङ्गकम्। दर्पणोदरसंकाशं कर्तव्यं [13]सोपवेदिकम्॥ ३३॥

[अग्निकुण्डम्][14]

[15]वेदिकायाश्चतुर्दिक्षु शांकरे चाग्निकुण्डकम्। युगाश्रं वाथ वृत्तं वा कल्पयेल्लक्षणान्वितम्॥ ३४॥
गोमयालेपनं कृत्वा [16]पिष्टचूर्णैर्विचित्रितम्। पुण्याहप्रोक्षणं कृत्वा [17]कुशाद्यग्रेण प्रोक्षयेत्॥ ३५॥

[स्थण्डिलम्][18]

स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः।

---

[1] A: गन्धयत्तेन रध्वा तु ?; B: गन्धद्रव्येण रक्त्वा तु. [2] B: गूहयेत्तु.
[3] A: हृदयांशंकुनी सूत्रं pour हृदा शङ्कुषु सूत्रं च; B: हृदयांशंकुनी सूत्रं; C: हृदा शङ्कुनि सूत्रत्वात्.
[4] C: अधिवासनं. [5] A et C: पूर्वरात्रौ.
[6] cf. *Dīpta*, 58, 7-11:
अधिवासं प्रकुर्वीत ग्रन्थिसूत्रैश्च सूत्रयेत्। प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्॥
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्। स्तम्भषोडशसंयुक्तं द्वादशस्तम्भमेव वा॥
चतुर्द्वारसमायुक्तं वितानध्वजशोभितम्। चतुस्तोरणसंयुक्तं दर्भमालासमायुतम्॥
अष्टमङ्गलसंयुक्तं दिग्ध्वजैश्च प्रलम्बितम्। पालिकातृणसंयुक्तं पूर्णकुम्भैरलंकृतम्॥
मण्डपस्य तु तन्मध्ये वेदीं कुर्यात् त्रिहस्तकाम्॥
[7] B: वेशे. [8] C: मण्टपं.
[9] A: मध्ये त्वक्षणरेण तु. [10] B: च pour तु.
[11] A: वेदिकायां च. [12] C: तद्दशांशेन.
[13] A: सोपवेदिका.
[14] cf. *Kāraṇa*, I, 122, 25-28:
चतुर्दिक्षु च कुण्डानि तुर्याश्रं पद्ममेव वा। वृत्तकुण्डं तथैशान्ये कारयेद्विधिपूर्वकम्॥
तोरणैश्च ध्वजैश्चैव दर्भमालाङ्कुरैस्तथा। मङ्गलाष्टकसंयुक्तं स्तम्भवेष्टनसंयुतम्॥
गोमयालेपनं कृत्वा शालिपिष्टेन चित्रयेत्। प्रोक्षयेत्पञ्चगव्येन मण्टपं कुशवारिणा॥
[15] A: वेदिकायां pour वेदिकायाः. [16] A: पिष्टचूर्ण pour पिष्टचूर्णैर्.
[17] C: कुशान्यग्रेण.
[18] cf. *Dīpta*, 58, 14-21:
स्थण्डिलं तत्र कर्तव्यमष्टद्रोणेन शालिना। तण्डुलैः समलंकृत्य तिलदर्भैः सपुष्पकैः॥
गन्धादीनि समभ्यर्च्य पात्रं वेद्युपरि न्यसेत्। सौवर्णं राजतं ताम्रं कांस्यं पात्रं तदुच्यते॥

तण्डुलैर्लाजपुष्पैश्च [1]तिलैर्दर्भैरलंकुरु[2] ॥ ३६ ॥
गन्धाद्यैरर्चयेत्तस्मिन्[3] विधातारं द्विजोत्तमः[4] ।

[पवित्रपूजा]

[5]शिरसा प्रोक्षयेत्तस्मिन् सौवर्णं रजतं तु वा ॥ ३७ ॥
कांस्यं वा [6]दलिकां [7]न्यस्य कर्णिकायां च शक्रके । [8]पात्रे तु कर्णिकायां तु न्यसेच्छुद्धपवित्रकम् ॥ ३८ ॥
[9]पवित्रे गन्धमालिप्य शक्रपात्रे निधापयेत् । संछाद्य नववस्त्राभ्यां गन्धाद्यैरर्चयेद्भृदा ॥ ३९ ॥
[10]ब्रह्माङ्गमभिमन्त्र्याथ मूर्तिकुम्भावृतं न्यसेत् । सूत्रवस्त्रसमायुक्तान् गन्धाद्भिः[11] संप्रपूरितान् ॥ ४० ॥
[12]पिधानकूर्चसंयुक्तान् स्वर्णपुष्पसमन्वितान् । [13]तथा मूर्त्यधिदैवत्यान्स्थापयित्वा तु पूजयेत् ॥ ४१ ॥
[14]दिशास्वध्ययनं कुर्याद्विदिशासु जपं कुरु । नृत्तगेयादिभिश्चैव होमकर्म समाचरेत् ॥ ४२ ॥

अथवा मृण्मयं पात्रं कालं भिन्नादि वर्जयेत् । तन्मध्ये विन्यसेत्सूत्रं नववस्त्रेण वेष्टितम् ॥
कृष्णाजिनादिनाच्छाद्य मन्त्रसंहितयालभेत् । गन्धादिभिः समभ्यर्च्य प्रोक्षयेत्पुरुषेण तु ॥
लिङ्गपीठं तु संस्पृश्य शिवमष्टोत्तरं जपेत् । जप्त्वान्ते चैव नादाख्यं पञ्चाशत्संख्यया जपेत् ॥
तद्वन्महेश्वरं जप्त्वा चाङ्गब्रह्मसमन्वितम् । दिक्षु मन्त्रजपं कुर्याद्विदिक्ष्वध्ययनं तथा ॥
सूत्रस्य परितः स्थाप्य कलशान्वारिपूरितान् । कुम्भांस्तु तोयसंपूर्णान् सकूर्चान्सापिधानकान् ॥
वस्त्रान्हिरण्यसंयुक्तान्वसुदेवसमन्वितान् । गन्धादिभिः समभ्यर्च्य हविस्तेषां निवेदयेत् ॥

[1] B: तिल pour तिलैर्.
[2] A: अलंक्रियात् pour अलंकुरु.
[3] A: कुम्भे pour तस्मिन्.
[4] B: द्विजोत्तमम्.
[5] Les demi-vers 37*b*, 38*a* et 38*b* sont cités dans le *Pavitrotsavavidhi*, p. 147.
[6] B: दालिकां ; C: दलिका ; *Pavitrotsavavidhi*: तिलका.
[7] A, C et *Pavitrotsavavidhi*: न्यस्त्वा.
[8] A: पत्रे.
[9] A: पावित्रग्रन्थिमालिप्य ; B et C: पवित्रगन्धमालिप्य.
[10] A: ब्रह्माङ्गान् pour ब्रह्माङ्गम्.
[11] C: गन्धाद्यैः pour गन्धाद्भिः.
[12] B: वितान pour पिधान.
[13] B: तव मूर्त्यधिदैवत्या ; C: भवादिमूर्त्यधिदेवत्यान.
[14] Ce demi-vers est cité dans le *Pavitrotsavavidhi*, p. 147.

[होमविधिः][1]

मदाज्य[2]चरूँल्लाजान्सर्षपांश्च[3] [4]यवांस्तिलान् । [5]समिधं सद्यमन्त्रेण [6]ह्याज्यं [7]च हृदयेन [8]तु ॥ ४३ ॥
चरुं वै वामदेवेन शिरसा लाजहोमकम् । सर्षपं [9]त्वथ घोरेण शिखया तु[10] तिलाहुतिः ॥ ४४ ॥
[11]यवांश्च पुरुषेणैव प्रत्येकं तु शताहुतिः । द्रव्यान्ते व्याहृतिं हुत्वा ततो होमं जयादिभिः ॥ ४५ ॥

[पवित्रारोपणम्][12]

देवांस्ततोऽभ्यर्च्य पवित्रं च ततो यजेत् ।

---

[1] cf. *Yogaja*, p. 284-285:
पश्चाद्धोमं प्रकल्प्याथ कुण्डे वा स्थण्डिलेऽपि वा । समिदाज्यचरूँल्लाजान् सर्षपांश्च यवांस्तिलान् ॥
होमद्रव्याणि सर्वाणि यथाक्रमेण हूयते । समिधं सद्यमन्त्रेण चाज्यं वामेन हूयते ॥
अघोरेण चरुं हुत्वा लाजांस्तत्पुरुषेण तु । ईशानेन सर्षपांश्च यवांश्च हृदयेन तु ॥
तिलं तु शिरोमन्त्रेण शिखया गुलमेव च । कवचेन मुद्गं हुत्वा त्वपूपान्नेत्रकेण तु ॥
अक्षतैरस्त्रमन्त्रेण क्रमाद्धुत्वा विशेषतः । पूर्णां तु मूलमन्त्रेण चैवं होमं प्रकल्पयेत् ॥
cf. *Sūkṣma*, 11, 45-47 et *Aṃśumad*, 14, 54-55:
अग्निकार्योक्तमार्गेण चाग्निकार्यं समाचरेत् । समिदाज्यचरूँल्लाजांस्तिलापूपफलांस्तथा ॥
मुद्गं गौलं यवं चैव सक्तुं सर्षपमेव च । संहितयैव जुहुयान्मूलेन सर्षपं हुनेत् ॥
voir aussi *Dīpta*, 58, 39-46:
पादप्रक्षालनं कृत्वा चाचम्य विधिना पुनः । कुण्डान्तिकं ततो गत्वा होमकर्म समाचरेत् ॥
ईशानश्चेश्वरो ब्रह्मा विष्णुः सदाशिवस्तथा । एते वै पञ्चहोमेषु आर्याः देवाः प्रकीर्तिताः ॥
पलाशखदिराश्वत्थप्लक्षोदुम्बरमेव च । अग्न्याधानादिकं सर्वं पूर्वोक्तविधिना कुरु ॥
समिदाज्यचरूँल्लाजान् सर्षपांश्च यवांस्तिलान् । सक्तुं क्षीरं दधि ह्येवं लघु कर्पूरमेव च ॥
कन्दमूले फलं चापि विधिदृष्टेन होमयेत् । शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥
अयं त इध्ममन्त्रेण इध्मं हुत्वा विशेषतः । त्र्यम्बकेन घृतं हुत्वा देवस्य त्वा चरुं हुनेत् ॥
लाजादिसक्तुपर्यन्तं पञ्चब्रह्मेण होमयेत् । क्षीरादिमूलपर्यन्तं शिवाङ्गैरेव हूयते ॥
गणानां त्वेति मन्त्रेण फलं हुत्वा विचक्षणः । द्रव्यान्ते व्याहृतिं हुत्वा हुनेत्पूर्णाहुतिं हृदा ॥

[2] A: चरुं pour चरून्.
[3] B et C: लाजसर्षपाश्च pour लाजान् सर्षपांश्च.
[4] C: यवं pour यवान्.
[5] C: समिधा.
[6] A, B et C: आज्यं pour ह्याज्यं.
[7] C: तु pour च.
[8] B: हि pour तु.
[9] C: च त्वघोरेण pour त्वथ घोरेण.
[10] C: शिखयान्तु.
[11] B: यवास्तु पुरुषेणैव ; C: यावत्तपुरुषेणैव.

[12] cf. *Yogaja*, p. 285:
लिङ्गे वा कौतुके वाऽपि शुद्धस्थाने च पूजयेत् । षोडशप्रतिमाश्चैव गन्धपुष्पादिनार्चयेत् ॥
स्थाने मण्डपके वापि प्रतिमामर्चयेत्क्रमात् । महानैवेद्यकं पश्चात्ताम्बूलं तु निवेदयेत् ॥
स्तोत्रमङ्गलपाठैश्च वेदाध्ययनघोषकैः । शङ्खभेर्यादिघोषैश्च जयशब्दादिमङ्गलैः ॥
गेयं तत्र तु कर्तव्यं पवित्रमधिवासयेत् । निद्राभङ्गं निशि कुर्यात्समाधिकृतयोगतः ॥

[1]प्रविश्य गर्भगेहं तु पूजापर्युषितं [2]त्यजेत् ॥ ४६ ॥
[3]लिङ्गं पीठं स्थलं चैव [4]शुद्धं कुर्वम्भसा ततः । आसनं पूजयित्वा तु [5]चावाहनमथाचरेत् ॥ ४७ ॥
[6]अर्चनोक्तं समभ्यर्च्य [7]पवित्रारोपणं कुरु । [8]पूर्वोक्तगन्धद्रव्याणि पेषयित्वा तु सूक्ष्मकम् ॥ ४८ ॥
हिमतोयेन संलोड्य ब्रह्माङ्गैरभिमन्त्र्य च । लिङ्गं च पिण्डिकां चैव लेपयेद्यवमानकम् ॥ ४९ ॥
[9]गन्धाद्यैरर्चयित्वा तु बध्वा प्रतिसरं ततः । सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् ॥ ५० ॥
[10]गृह्य गन्धपवित्रं तु पात्रेण सह देशिकः । [11]हर्म्यप्रदक्षिणं कृत्वा वहित्वा [12]तत्स मूर्धनि ॥ ५१ ॥
त्रिपाद्युपरि लिङ्गाग्रे पूजयित्वा पवित्रकम् । हृदयेन तु मन्त्रेण दन्तकाष्ठं प्रदापयेत् ॥ ५२ ॥
[13]मृद्भस्म [14]पञ्चगव्यं च गन्धपुष्पं [15]सुधूपकम् । दीपं चैव हृदा दत्त्वा लिङ्गमुद्रां तु दर्शयेत् ॥ ५३ ॥
ततः प्रासादमुच्चार्य पवित्रं [16]रोप्य [17]मुक्तिदम् । [18]प्रागुक्तानां च सर्वेषां पवित्रं दापयेत्ततः ॥ ५४ ॥

[देवतादिसूत्रग्रन्थिनिर्णयः][19]

[20]भस्मालये तु घण्टायां धूपदीपप्रमाणकम्[21] । [22]वलयाकारसूत्रं[23] च सप्तग्रन्थि तु सुक्सुवम् ॥ ५५ ॥

---

[1] Les vers 46*b*, 47 et 48*a* sont cités dans le *Pavitrotsavavidhi*, p. 171-172.
[2] B: यजेत् .
[3] A: लिङ्गपीठस्थल ; B: लिङ्गपीठं स्थलं.
[4] A: सर्वे शुद्धं कृताम्भसा ; C: सर्वे शुद्धिकृताम्भसा.
[5] A et C: आवाहनं समारभेत् .
[6] C: अर्चनेन.
[7] A: पवित्रारोहणं.
[8] A: पूर्वोक्तगन्धान् द्रव्यांश्च ; C: पुरोक्तं गन्धद्रव्यांश्च.
[9] Le *Pavitrotsavavidhi*, p. 145 cite ce demi-vers et l'attribue au *Raurava*, mais il le fait suivre par ces 2 *śloka* et demi qui manquent dans notre texte:

विशेषपूजनं कृत्वा नमस्कृत्य शिवाग्रतः । मया कृतानि दानानि धर्मानि प्रयतानि च ॥
मन्त्राणि च क्रियातन्त्रबुद्ध्यादिकरणानि च । अनया पूजया सर्वाः संपूर्णाः सन्तु मे प्रभो ॥
एवं विज्ञाप्य देवाय नमस्कृत्य तु भक्तितः ॥

[10] C: ग्राह्य.
[11] A: हर्म्ये.
[12] A: तं स pour तत्स.
[13] A: तद्भस्म pour मृद्भस्म ; C: मृद्भसं.
[14] C: च सर्वं ग्राह्यं pour पञ्चगव्यं च.
[15] A: सधूपकम् .
[16] C: योप्य.
[17] C: युक्तितः .
[18] A: प्रागुक्तानां च . . . . ष्टग्रन्थिकम् ; B: प्रागुक्तानां च सर्वेषां . . . सुकाष्टग्रन्थिकम् .
[19] cf. *Kāmika*, II, 18, 24-28:

आजानुशोभिव्यक्तेषु त्रिपूर्वं स्वेष्टतन्तुयुक् । यन्त्रलिङ्गप्रमाणं वा पुष्पलिङ्गयुतं तु वा ॥
क्षुद्रलिङ्गे पवित्रं स्यात्स्थण्डिलादौ यथामतम् । आष्टकमेकं वृषभे ककुदः खुरगं परम् ॥
पवित्रमेकं सर्वेषामाहृतानां विधीयताम् । एकैकमेव दातव्यं चण्डेशक्षेत्रपालयोः ॥
लोकेशानां लोकपूज्यः सूत्रमेकं प्रदक्षिणम् । यागशालाहवनप्रासादानलसंश्रयान् ॥
परिवाराणि च सर्वाणि त्रिसूत्रेण वेष्टयेत् । एवं विधिवत् पूर्वपूरधिवासनमारभेत् ॥

[20] C omet les vers 55 à 73*a*.
[21] A: [illegible]ज्यं तु घण्टेन धूपदीपप्रमाणकम् .
[22] Les vers 55-58 sont cités dans le *Pavitrotsavavidhi*, p. 134-135.
[23] A et B: ग्रन्थि pour सूत्रं.

पञ्चग्रन्थिं च[1] कृत्वा [2]चाप्यष्टमङ्गलसूत्रकम्। [3]द्वारतोरणं षड्ग्रन्थि दर्पणं छत्रचामरम् ॥ ५६ ॥
[4]शङ्खं शृङ्गं तु पादेन [5]चार्घ्यं पाद्यं च [6]पादिकम्। [7]भूते पवित्रबन्धेन नवग्रन्थिं तु बुद्धिमान् ॥ ५७ ॥
वामादिशक्तिदेवानां दशग्रन्थिं [8]च लोकपे। [9]दशायुधं सप्तग्रन्थि [10]सुसूत्रमिति कल्पयेत् ॥ ५८ ॥

[मण्डलविधिः][11]

यागगृहं प्रविश्याथ[12] [13]वेदिकासु च निक्षिपेत्। वेदिकोपरि सूत्रेण [14]वर्णेन च विनिक्षिपेत् ॥ ५९ ॥

---

[1] A: तु pour च.

[2] A: च अष्टमङ्गलसूत्रकम्; B: तु अष्टमङ्गलसूत्रकम्.

[3] A et B: द्वारतोरणषड्ग्रन्थि.

[4] A: शङ्खं तु . . . पादेन; B: शङ्खं चैव तु पादेन; *Pavitrotsavavidhi*: शङ्खशङ्खं तु वामेन.

[5] A: अर्घ्यपात्रं; B: अर्घ्यपाद्यं.

[6] *Pavitrotsavavidhi*: पातिकम्.

[7] A: आते; *Pavitrotsavavidhi*: एते.

[8] A et B: लोकपालयन् pour च लोकपे; *Pavitrotsavaviddhi*: च लोकपान्.

[9] *Pavitrotsavavidhi*: दशायुधान्.

[10] *Pavitrotsavavidhi*: ससूत्रमिति.

[11] cf. *Aṃśumad*, 43, 40-47:

देवदेवं नमस्कृत्वा स्थापयेत्तु पवित्रकम्। यागधाम प्रविश्याथ भान्वादिगुरुकान्तकम् ॥
गौरीतिलकभद्रं च राशिस्वस्तिकमेव च। आत्मार्थमिति कर्तव्यं परार्थमधुना शृणु ॥
शिलालिङ्गोद्भवं चैव गौरीतिलकमेव वा। पार्वतीकान्तमेवं च लिङ्गाब्जस्वस्तिकं तथा ॥
मण्डलं षण्णवत्यन्तं स्वायंभुवे प्रकल्पयेत्। दैविकादिषु लोकेषु नन्द्यावर्तं च स्वस्तिकम् ॥
सुन्दरीतिलकं चैव श्रीकान्तं पद्ममेव वा। लिङ्गाब्जं स्वस्तिकं चैव शृङ्गारतिलकं मतम् ॥
दैविकादि समाख्यातं मानुषं मण्डलं शृणु। कल्याणतिलकं चैव भौमकल्पं च कुक्षिकम् ॥
मण्डलेश्वरसोमं च वह्निमण्डलसूर्यकम्। केसरीमण्डलं चैव हस्तिमण्डलमेव वा ॥
एवं मानुषमाख्यातं मण्डलाधिपतिं यजेत् ॥

[12] B: यागगृहप्रवेशेन.

[13] A: वेदिकासूत्रं विक्षिपेत्.

[14] A: वर्णेनन्तुं च निक्षिपेत्.

[1]सर्वतोभद्र[2]पार्वती[3]श्रीरुद्र[3]गौरीमण्डलम्। लिङ्गोद्भवं च [4]लिङ्गाब्जं यथाविभवं निक्षिपेत्॥ ६०॥

---

[1] Pour les détails des *maṇḍala* voir la *Śaivāgamapaddhati*, p. 570-592 (ms. de J. Viśvanātha gurukal de Melmaṅgalam, District de Madurai.)

सर्वतोभद्रमण्डलम्

चतुर्भिः स्वस्तिकैरेव सर्वतोभद्रमुच्यते। सर्वतोभद्रमेवं हि भोगमोक्षफलप्रदम्॥

पार्वतीकान्तमण्डलम्

प्रागग्रमुदगग्रं च द्वात्रिंशत्पदसंयुतम्। तस्य मध्ये तु नलिनमष्टावष्टपदैर्युतम्॥
तद्बहिस्त्रिविधैः पीठैस्तद्बाह्येन विधानतः। निर्गमाग्रं विवर्णं स्यान्नानाचित्रविचेष्टितम्॥
अग्न्यादिपद्मपर्यन्तं श्वेतवर्णैश्च भूषितम्। लिङ्गानि कृष्णवर्णानि द्वाराणि मुखवर्णकैः॥
एतच्च पार्वतीकान्तं सर्वकर्मसु योग्यकम्॥

श्रीमण्डलम् ou **लक्ष्मीमण्डलम्**

षट्त्रिंशत्सूत्रमध्ये नवपदकमलं तद्बहिर्वीथिरेका दिक्षु द्वादश पङ्कजानुभयतस्तस्यैः पदैः पार्श्वयोः।
कुर्यालिङ्गचतुष्टयं रसवरैः कोणैकलिङ्गं सुरैरन्तः कोणचतुष्टये पदपदैश्चत्वारि लिङ्गानि च॥
चारूक्तवक्त्रं किल भानुपद्मं मध्येऽरुणं षोडशकृष्णलिङ्गम्।
कोणेषु लिङ्गं मुखवर्णयुक्तं लिङ्गार्धयुक्तं कमलासनस्था॥
लक्ष्मीमण्डलमाख्यातम्"।

रुद्रमण्डलम् ou **शिवमण्डलम्**

द्विरष्टपदपङ्कजं खपदवीथिबाह्ये चतुष्पङ्क्तिनयनाब्धिषट्पदकृताष्टलिङ्गावृतम्।
विदिक्शरपदाम्बुजं मनुपदप्रवेशं बहिर्वदन्ति शिवमण्डलं विधिवदक्षसूत्रैः कृतम्॥

गौरीमण्डलम् ou **गौरीतिलकमण्डलम्**

प्राक्सूत्रं सप्तदशकमुदक्सूत्रं तथैव च। मध्ये वेदपदं श्वेतं चतुर्लिङ्गं चतुर्दिशि॥
लिङ्गं पीठं च कम्पं च कुण्डकं पञ्चपीठकम्। चतुष्पङ्क्तिभिः पदैः क्रमात्॥
मुखवर्णैश्च संभूष्य वेदवेदपदैः पुनः। विदिक्षु कर्णपुष्पाणि भिन्नवर्णैः प्रकल्पयेत्॥
प्रत्येकं सर्वकोणेषु पञ्चविंशत्पदैः क्रमात्। नानाविधैः प्रकर्तव्या लता वर्णैर्मनोरमैः॥
गौरीतिलकमाख्यातं भोग एव फलं भवेत्॥

लिङ्गोद्भवमण्डलम् ou **लतालिङ्गोद्भवमण्डलम्**

लतालिङ्गोद्भवं वक्ष्ये मण्डलानां महत्तरम्। प्रागग्रमुदगग्रं च त्रिंशत्सूत्रं नवाधिकम्॥
आस्फालिकर्णसूत्रे च मध्ये द्विद्विपदं क्रमात्। पञ्च वृत्तानि कृत्वान्तः कर्णिकां केसराणि च॥
दलाष्टकं दलाग्राणि पीतैस्ताम्रैश्च पिङ्गलैः। स्थितैः कृत्वान्तरालानि रक्तैर्द्रव्यैश्च पूरयेत्॥
दिग्विदिक्सूत्रदेशेषु दलानि रचयेद्यथा। तृतीये दलवृत्ते तु सूत्रं तद्वृत्तविस्तृतम्॥
भ्रामयेदर्धचन्द्राभं मध्ये रेखानतिक्रमात्। आस्फालयेद्दलाग्रार्धं दलानां पार्श्वयोस्तथा॥
विभज्य पञ्चमं वृत्तं त्रिधा शुक्लारुणासितैः। पूरयित्वा चतुष्कोणं बहिरेकेन वीथिकाम्॥
सितेन कृत्वा कोणानि पूरयेदरुणप्रभैः। द्वाराणि तद्बहिः कुर्यान्मध्ये सूत्रचतुष्टयम्॥

[1][द्रव्यसंग्रहणम्]

[2]पश्चात्तु मण्डपे शुद्धे गोमूत्रं गोमयं तथा । [3]दन्तकाष्ठं च पात्रेषु [4]शलाकाञ्जनपात्रकम् ॥ ६१ ॥
[5]कुङ्कुमं चन्दनं चैव पादुकां [6]छत्रदर्पणम् । [7]कर्त्रिकां [8]वेणुदण्डं च [9]कौपीनं भैक्षपात्रकम् ॥ ६२ ॥

तथाष्टकं च लिङ्गानां पञ्चवर्णैः प्रकल्पयेत् । कम्पौ कण्ठं च कम्पौ च लिङ्गांशं चानुपूर्वशः ॥
षट्चतुर्भिश्चतुष्षड्भिः कुर्याद्वा पञ्चविस्तृतम् । द्वारेऽप्येषां ततस्तुल्यपदेनैव समुन्नतिः ॥
किं तु लिङ्गोन्नतिर्द्वाभ्यां द्वारकण्ठोन्नतिस्त्रिभिः । पार्श्वदेशेषु लिङ्गानां लताखण्डास्त्रिभिः पदैः ॥
त्रयोदशपदैर्बाह्य अन्त्यैकं पीठपार्श्वयोः । वेदाश्रनवभिर्दिक्षु निर्गमैकपदं शृणु ॥
द्वारे चाप्यन्तरालेषु कुर्यात्सप्तपदैर्लताम् । धर्मादिवर्ण वह्न्यादिकोणेषु पदसप्तकम् ॥
विविधा वज्रवद्वल्लीस्तत्पार्श्वेषु द्विसप्ततिः । पिण्डैः षड्भिर्लता वापि भिन्नवर्णैस्तदन्तरे ॥
कम्पकण्ठाकृतिः पिण्डी वज्रायुधाकृतिर्लता । द्वालिङ्गादीनि पीतानि ताम्रैस्ताम्राणि पिङ्गलैः ॥
सितानि चासितैस्तानि सितैर्वापि लतादिभिः । विदध्यात्परितश्शिष्टं पद्मं श्वेतेन पूरयेत् ॥
लतालिङ्गोद्भवं ह्येवं भुक्तिमुक्तिफलप्रदम् ॥

लिङ्गाब्जमण्डलम् ou **लिङ्गाब्जस्वस्तिकमण्डलम्** (ou लताब्जस्वस्तिकमण्डलम्)

सप्तविंशतिभिः सूत्रैर्निर्हितैः प्रागुदङ्मुखम् । सषट्सप्ततिसंख्याभिः षट्शतं पदमुद्भवेत् ॥
चतुष्षष्टिपदं मध्ये सर्वतोभद्रवत्कृतम् । एकेन परितो वीथी द्वारं द्वाभ्यां तु वीथये ॥
चतुर्दिक्षु क्रमादेव द्वारस्योभयपार्श्वतः । लिङ्गानि कारयेद्धीमान् वाचवीरविधैः(?) क्रमात् ॥
लिङ्गं पट्टसरोजं च कण्ठं पद्मं च पीठकम् । चतुर्भिः पद्मवत्कुर्यात्कर्णपुष्पाणि षोडश ॥
विदिक्षु स्वस्तिकं चैव पञ्चविंशतिभिः पदैः । पदेन बहिरेकेन परितो वीथिका भवेत् ॥
पदानि तानि शेषाणि भिन्नवर्णैर्विभूषयेत् । लताब्जस्वस्तिकं नाम मण्डलं भोगमोक्षदम् ॥

[2] A: सर्वाहं तत्र pour सर्वतोभद्र ; B: सर्वाहतेत्र.
[3] A: मण्डलगौरिकम् pour गौरीमण्डलम् ; B: मण्डलगैरिकम्.
[4] A et B: लिङ्गाम्बु pour लिङ्गाब्ज.

---

[1] cf. *Sūkṣma*, 11, 38-44 et *Aṃśumad*, 14, 47-53:
कर्त्रिकां दन्तकाष्ठं च तालुशोधनमेव वा । सूचिकां श्रोत्रशोधं च नखशोधनमेव च ॥
पूर्वभागे न्यसेद्धीमान्पौरुषं मन्त्रमुच्चरन् । कौपीनं खण्डवस्त्रं च तैलमामलकं तथा ॥
रजनीं पञ्चगव्यं च पञ्चामृतं च दक्षिणे । बहुरूपमनुस्मृत्य चार्चयेद्देशिकोत्तमः ॥
ईक्षाहरं यूकहरं केशशोधनमञ्जनम् । वस्त्रयज्ञोपवीतं च पुष्पमाभरणं तथा ॥
चन्दनं पश्चिमे देशे स्थापयेत्सद्यमन्त्रतः । ओड्याणं योगपट्टं च भिक्षापात्रं कमण्डलुम् ॥
व्याघ्राजिनं वेणुदण्डं चामरं छत्रदर्पणम् । भसितं पादुकां चैव मात्रादण्डं च खड्गकम् ॥
उत्तरे विन्यसेद्धीमान्वामदेवमनुस्मरन् ॥

[2] A et B: पश्चान्मण्डप शुद्धेन.
[3] A et B: अञ्जनेन तु पात्रेण.
[4] A: शशो येन जत्रकम् ; B: शशो येन च छत्रकम्.
[5] A et B: अञ्जनेन चलाङ्गं च.
[6] A et B: पादुकक्षितम्.
[7] A: कलके ; B: कन्दुकं.
[8] A: वी . . दण्डं च ; B: वीणदण्डं च.
[9] A: कौ . . . पात्रकम् ; B: कौपीनाय पोषकम्.

[1]केशशोधं भस्म चर्म [2]योगपट्टं कुशोदकम्। संग्रहादीनि संपाद्य चैशान्यामधिसंस्थितम्[3] ॥ ६३ ॥

[गङ्गावतारादिपवित्रम्][4]

[5]पश्चाद्गङ्गावतारादि प्रमाणं विधिपूर्वकम्। [6]अष्टादशादि ग्रन्थीनां[योजयेद्] देशिकोद्भवः॥ ६४॥
पश्चाद्गन्धपवित्रेण विंशतिं चैव त्रिंशकम्। [7]नवग्रन्थिं वा तदन्ते शुद्धपात्रे तु निक्षिपेत्॥ ६५॥
पश्चात्स्नानं तु [8]मन्त्रेण [9]प्रासादस्य प्रवेशनम्। [10]पादौ प्रक्षाल्य चाचम्य [11]पश्चाद्भस्म विनिक्षिपेत्॥६६॥
सकलीकरणं कृत्वा चान्तर्यागमतः परम्। [12]विशेषार्घ्यं च संकल्प्य तन्मन्त्रेणाभिमन्त्रयेत्॥ ६७॥
तत्त्वत्रयेण संपूज्य [13]स्वशिरोपरि देशिकः। [14]शिवं हस्तेन संस्पृश्य शिवोऽहमिति भावयेत्॥ ६८॥
[15]द्रव्यपात्राणि संप्रोक्ष्य [16]द्रव्यस्थानानि [17]शुद्धिदम्। [18]गन्धकुङ्कुमकस्तूरीसहितं तु पवित्रकम्॥ ६९॥
[19]नवपात्रे तु निक्षिप्य रक्षयित्वा तु तद्बुधः। [20]नित्यया पूजया तोष्य [21]विशेषात्पूजयेत्ततः॥ ७०॥
[22]कृत्वा नैमित्तिकं होमं तत्फलं तु निवेदयेत्। पश्चात्तत्तद्विशुद्ध्यर्थं [23]पलाशागरुकाष्ठकम्॥ ७१॥
[24]अङ्गुलीपरिणाहं तु द्वादशाङ्गुल[25]दीर्घकम्। [26]नवपात्रे च निक्षिप्य मूलमन्त्रं समुच्चरेत्॥ ७२॥
तस्योपरि [27]कुशान्यस्य [28]चास्त्रमन्त्रं जपेत्ततः। [29]हवींषि दापयित्वा तु नानाभक्ष्यं निवेदयेत्॥ ७३॥

---

[1] A et B: घनशो ये मही भस्म चर्म. [2] A: योगं वेष्टी च केशवम्; B: योगे वेष्टि च केशवम्.
[3] B: दधिसंस्थितम् pour अधिसंस्थितम्.
[4] cf. *Aṃśumad*, 14, 22-23:
ग्रन्थयस्तन्तुसंख्या वा गङ्गावतारमेव च। कुर्यादष्टादशग्रन्थियुक्तं गौर्यवतारकम्॥
गङ्गावतारमात्मार्थयजने तु पवित्रकम्। परार्थयजनार्थाय तन्तु गौर्यवतारकम्॥
[5] A: पश्चाद्गङ्गावतारेण; B: पश्चाद्गङ्गावनीरेण. [6] A: अष्टादशं तु ग्रन्थी च . . . देशिकोद्भवः.
[7] A: नवग्रन्थिं वान्तबन्धेन; B: नवग्रन्थिं वान्ते च धेन.
[8] A et B: मात्रेण. [9] A et B: प्रासादं तु प्रवेशकम्.
[10] A: पादप्रक्षालनं. [11] A: पश्चाद्भस्मनि निक्षिपेत्.
[12] A: विशेषार्घ्येण. [13] A: शिरसोपरि.
[14] B: वहं pour शिवं. [15] A: द्रव्यपात्रेण.
[16] A: द्रव्यस्थानेन. [17] B: शुद्धिदः.
[18] A: चन्दनं कुङ्कुमं स्तूरीं सद्रव्यन्तु पवित्रकम्.
[19] A: नवपात्रेण. [20] A: नित्यपूजादि संतोष्य.
[21] A: पश्चाद्विशेषं पूजयेत. [22] A: कृत्वा नैमित्यजोमेन; B: कृत्वा नैमित्तिहोमेन.
[23] A: पलाशाकानिष्ठकम्. [24] A: अङ्गुलीपरिणाहत्वा.
[25] A: अङ्गुलि pour अङ्गुल. [26] A: नवपात्रेण.
[27] A: कृशालस्य. [28] A: अस्त्रमन्त्रेण येत्ततः; B: अस्त्रमन्त्रेण संयुतः.
[29] Ce demi-vers est cité dans le *Pavitrotsavavidhi*, p. 162.

[1]ततश्चाचमनं [2]दत्त्वा ताम्बूलं च निवेदयेत् ।

[शुद्धपवित्रारोपणम्]

[3]एवं जागरणं [4]रात्रौ प्रभाते [5]सुमुहूर्तके ॥ ७४ ॥
पूजयित्वा तु शुद्धाख्यं पवित्रं च घटानपि । [6]अग्निमभ्यर्च्य विधिना ब्रह्माङ्गैर्जुहुयाच्छतम् ॥ ७५ ॥
पूर्णाहुतिं ततः कृत्वा [7]स्विष्टमग्नेति मन्त्रतः । निर्माल्यं तु विसृज्याथ पञ्चगव्याभिषेचनम् ॥ ७६ ॥
दन्तकाष्ठादिकं दत्त्वा पञ्चब्रह्ममुदाहरन् । स्नपनं कारयित्वा तु [8]पूजयेदर्चनोक्तवत् ॥ ७७ ॥
[9]स्थापितं वेदिकायां तु शुद्धाख्यं तु पवित्रकम् । उद्धृत्य हृदयेनैव सर्वालंकारसंयुतम् ॥ ७८ ॥
त्रिपाद्युपरि लिङ्गाग्रे निधायास्त्रमुदाहरन् । पवित्रं पूजयित्वा तु गन्धपुष्पादिना[10] बुधः ॥ ७९ ॥
[11]त्रियम्बकेन मन्त्रेण पवित्रं लिङ्गमूर्धनि । [12]न्यस्य लिङ्गे पवित्रं तु [13]छन्नमालम्बयेत्समम् ॥ ८० ॥

---

[1] A: आचमनं ततः कृत्वा. [2] B: कृत्वा pour दत्त्वा.

[3] cf. *Suprabheda*, II, 7, 38-52:
प्रभाते विधिवत्स्नात्वा सकलीकृतविग्रहः । पर्युषितानि पुष्पाणि पवित्राणि विसर्जयेत् ॥
पूजनं पूर्ववत्कृत्वा स्नपनान्ते विशेषतः । मृच्चूर्णलेपनं पूर्वं भस्मना लेपनं ततः ॥
दन्तकाष्ठेश्च दन्तानि धावयेद्देशिकोत्तमः । पूर्णकुम्भोदकैः स्नानं कृत्वा गन्धादिभिः पुनः ॥
वस्त्रैराभरणैश्चैव मूलमन्त्रेण देशिकः । संपूज्य देवदेवेशं नृत्तगेयसमन्वितम् ॥
सदाशिवमनुस्मृत्य मूलमन्त्रं समुच्चरेत् । पवित्रारोहणं कृत्वा देवेशं पिण्डिकान्वितम् ॥
मण्डलस्थं शिवं यष्ट्वा गन्धाद्यैरनुपूर्वशः । सहस्राक्षरमन्त्रेण हुत्वान्तेऽग्निं समर्च्य वै ॥
पवित्रं वह्निमारोप्य परिशेषमथाचरेत् । पञ्चावरणदेवानां पवित्रं हृदयेन तु ॥
अन्येषां चैव देवानां दापयेत्तु पवित्रकम् । कर्तुश्च देशिकस्यैव तयोः पत्न्योश्च देशिकः ॥
शिष्याणां परिचाराणां दत्त्वा वै तत्पवित्रकम् । गन्धपुष्पैस्तु संपूज्य धूपदीपैर्विशेषतः ॥
प्रभूतहविषं पश्चात्पायसादीनि दापयेत् । होमं तथैव कर्तव्यमाद्यन्तं मुनिभोजनम् ॥
जनानां सर्वदानानि दत्त्वा तत्र यथार्हकम् । वस्त्रैराभरणैश्चान्यैराचार्यं पूजयेत्ततः ॥
यतीनां शुद्धशैवानामन्यान्माहेश्वरानपि । विशेषभोजनं दानं कृत्वा तत्र स्वशक्तितः ॥
संश्राव्य समयान्पश्चाद्देवदेवस्य चाग्रतः । एतानि व्रतदानानि संपूर्णानि प्रसीदतु ॥
एवं विज्ञापयेद्देवं समाप्तिनयनं तथा । पाशजालानि संछिद्य मोक्षं तद्दातुमर्हसि ॥
प्रणम्य दण्डवद्भूमौ नमस्कृत्वा विशेषतः ॥

[4] B: कृत्वा pour रात्रौ. [5] B: तु pour सु.

[6] B: अग्निरभ्यर्च्य.

[7] स्विष्टमग्नेति=" स्विष्टमग्ने अभि तत्प्रणीहि " इत्यादिमन्त्रेण ; cf. *Taittirīyabrāhmaṇa*, 2, 4, 1, 4 etc.

[8] B: पूजयेद्विधिनोक्तवत् . [9] B omet ce demi-vers.

[10] B et C: गन्धपुष्पादिभिर् .

[11] Les vers 80 et 81 sont cités dans le *Pavitrotsavavidhi*, p. 188.

त्रियम्बकेन मन्त्रेण=" त्रियम्बकं यजामहे " इत्यादिमन्त्रेण ; cf. *Ṛgveda*, 7, 15, 9, *Taittirīyasaṃhitā*, 1, 8, 6, 2 etc.

[12] A et C: न्यस्त्वा. [13] B: छन्नमालां नयेत्समम् ; C: छन्नमाला नयेत्समम् .

तथैव [1]पिण्डिकां छाद्य [2]लिङ्गमूले तु बन्धयेत्। सुखासनादिदेवानां पवित्रं दापयेत्ततः॥ ८१॥
[3]सर्वेषां [4]परिवाराणां [5]विमानानां च रोपयेत्। ततः शक्तियुतं बिम्बं [6]युक्तियुक्तवदाचरेत्॥ ८२॥
अ,स्थानमण्डपे पश्चात्परिवेषं समाचरेत्। भक्तानां परिचाराणां नृपादीनां यथाक्रमम्॥ ८३॥
दापयेत्तु पवित्रं तु [7]श्रद्धाभक्तिसमन्वितम्। एवं यः कुरुते मर्त्यो [8]निर्मलत्वमव,प्नुयात्॥ ८४॥
विसृज्यास्त्रेण मन्त्रेण पवित्राणि विसर्जयेत्। तत्सर्वं च[9] गृहीत्वा तु चण्डेशाय [10]प्रद,पयेत्॥ ८५॥

इति [11]श्रीमद्रौरवतन्त्रे क्रियापादे [12]पवित्रारोपणविधिर्नाम [13]पञ्चविंशः पटलः॥

---

[1] C: पिण्डिकाद्याश्च.
[2] B: लिङ्गमूलं.
[3] Le vers 82 est cité dans le *Pavitrotsavavidhi*, p. 192.
[4] A: परिचाराणां.
[5] C: समानानां.
[6] A: यातमुक्ता pour युक्तियुक्त.
[7] A: शुद्ध pour श्रद्धा.
[8] C: अमृत pour निर्मल.
[9] B: सं pour च.
[10] B: निवेदयेत्.
[11] B omet श्रीमद्रौरवतन्त्रे क्रियापादे.
[12] A: पवित्रारोपणपटलः पञ्चविंशः.
[13] C: षड्विंशतिः.

[षड्विंशः पटलः]

[1][कृत्तिकादीपविधिः]

अथ संक्षेपतो वक्ष्ये कृत्तिकादीपलक्षणम् ।

[2][दीपारोहणकालः]

[3]वृश्चिकेऽर्कगते चन्द्रे [4]चाग्निऋक्षं गते सति ॥ १ ॥
[5]सपौर्णमास्यां वा रात्रौ कृत्तिकादीपमाचरेत् । प्रागेवाङ्कुरकार्यं च [6]सद्मादीन्यप्यलंकुरु[7] ॥ २ ॥

---

[1] Pour le कृत्तिकादीपविधि voir *Aṃśumad*, *paṭala* 28, *Kāmika*, II, 8, *Kāraṇa*, I, 111-112, et II, 27, *Makuṭa*, *paṭala* 8, *Yogaja*, p. 278-282, *Vīra*, *paṭala* 88, *Suprabheda*, I, 18, *Sūkṣma*, *paṭala* 8, et *Svāyambhuva*, *paṭala* 44.

[2] cf. *Svāyambhuva*, 44, 1-10:

अथ वक्ष्ये विशेषेण कृत्तिकादीपलक्षणम् । कार्तिकाख्ये तु मासे तु तद्दक्षे तिथिसंयुते ॥
उत्तमादित्रयं प्रोक्तं तद्भदं शृणु सुव्रत । तन्मासे चव कर्तव्यं योगयुक्तविशेषतः ॥
एकमासे द्विपक्षे तु पूर्णयुक्तं समाचरेत् । तस्मिन्पर्वणि तत्रैव कृत्तिकर्क्षयुतं यदि ॥
तत्र दीपं प्रकर्तव्यं विशेषं किंचिदस्ति हि । पर्वयुक्तं विना चेत्तु पूर्वपक्षं समाचरेत् ॥
वारद्वयगते ऋक्षे तिथेर्वा योगसंभवे । पर्वयुक्तं विना द्वौ तु अपरे दीपमाचरेत् ॥
पर्वऋक्षसमायुक्तमुत्तमं तु प्रशस्यते । मध्यमं चैव विज्ञेयं चतुर्थं चाधमं भवेत् ॥
एवं क्रमेण कर्तव्यं धनधान्याभिवृद्धिदम् । सामान्यमुत्तमं प्रोक्तं सर्वप्राणिहितावहम् ॥
आदित्ये गलिते चाग्निनक्षत्रे च हरिद्रके । दीपारोहः प्रकर्तव्यो वारापेक्षा न विद्यते ॥
रव्यस्तमयवेलायां दीपारोहणमाचरेत् । कर्तुरष्टमराश्यादिलग्नदोषनिरीक्षणम् ॥
विष्टिवैनाशिकर्क्षादिप्रेक्षणं नात्र संमतम् । तद्दिनात्पूर्वदिवसे अङ्कुरं पूर्ववत्कुरु ॥

[3] A: वृश्चिकं तु गते चन्द्रे.
[4] A: चाग्निऋक्षगते.
[5] A: संपूर्णमासि ; B: संपूर्णे मासि.
[6] A: सत्य pour सद्म.
[7] A: अलंकरे pour अलंकुरु ; C: अलंकरेत् .

[1][दीपदण्डवृक्षाः]

सालं वा नालिकेरं वा तालं वा क्रमुकं तथा। [2]नातिदीर्घं च भिन्नं च सूर्यशोषितपातितम् ॥ ३ ॥
[3]अतिबालातिवृद्धं च [4]बहुफलं विवर्जयेत्।

[5][दीपदण्डमानम्]

पञ्चहस्तं समारभ्य यावन्नवकरावधि[6] ॥ ४ ॥

---

[1] cf. *Vīra*, 88, 7-8:
दीपदण्डं प्रवक्ष्यामि शृणुष्व चतुरानन!। जातीं वा चम्पकं वापि क्रमुकं वैणवं तु वा ॥
कदलीं नालिकेरं वा असनं बिल्वमेव वा ॥
cf. *Svāyambhuva*, 44, 32-34:
क्रमुकं नालिकेरं च चम्पकं चन्दनं तथा। वंशं वार्जुनं वापि तिन्त्रिणीं शिंशुपां तथा ॥
मयूरं वकुलं वापि तालस्तम्भमथापि वा। दीपदण्डमिति प्रोक्तं सारद्रुममथापि वा ॥
cf. *Sūkṣma*, 8, 20-21:
असनं वैणवाशोकौ मधूकं वकुलं तथा। क्रमुकं नालिकेरं च तालं चम्पकमर्जुनम् ॥
तिलकं खदिरं वापि दीपदण्डं प्रगृह्यताम् ॥
cf. *Makuṭa*, 8, 3-4:
खदिरं चम्पकं चैव नालिकेरमथापि वा। तालं बिल्वं च वेणुं च यज्ञवृक्षोद्भवं तु वा ॥
cf. *Kāraṇa*, II, 27, 21-24:
"खादिरं चम्पकं तथा।
नालिकेरं च बिल्वं च वेणुं वा यज्ञवृक्षकम्। अर्जुनं शिंशुपां चैव मधूकं वकुलं तथा ॥
तालं तमालं हिन्तालं करञ्जं देवदारुकम्। सत्वचं छिद्रपुष्पं च दीपदण्डतरुं तथा ॥
अवक्रं निर्व्रणं स्निग्धमृजुं वा दण्डमाहरेत्। अतिदीर्घं नातिह्रस्वं न भिन्नं परिकीर्तितम् ॥
अतिबालमतिवृद्धं तरुं महाबिलं त्यजेत् ॥

[2] C: न दीर्घं न च भिन्नं च. [3] B: अतिबालोऽतिवृद्धश्च.

[4] A: बहुफली; B: बहुफाली; C: बहुफल्यपि.

[5] cf. *Aṃśumad*, 28, 11-12:
चतुर्विंशाङ्गुलं नाहमधमं प्रविधीयते। अष्टत्रिंशच्च नाहं स्यान्मध्यमं त्विति विद्यते ॥
चतुश्चत्वारि चाङ्गुल्यमुत्तमं नाहमुच्यते ॥
cf. *Vīra*, 88, 8:
प्रासादसदृशं वापि गलान्तं वापि कारयेत्। कपोतोत्सेधमानं वा पञ्चहस्तोच्चमेव वा ॥
cf. *Svāyambhuva*, 44, 35-36:
नवहस्तं समारभ्य द्विद्विहस्तविवर्धनात्। यावद्विंशतिहस्तान्तमुत्तमं मध्यमाधमम् ॥
पक्षाङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात्। चत्वारिंशाङ्गुलं यावद्दण्डनाहं क्रमेण तु ॥
cf. *Makuṭa*, 8, 4:
प्रासादस्य समं दण्डमर्धं वा पादमेव वा।

[6] A: अवधि; pour अवधि.

अर्धहस्तविवृद्ध्या तु नवधा दण्डदीर्घकम् । [1]स्वभावनाहसंयुक्तं [2]मूलादग्रं क्रमात्कृशम् ॥ ५ ॥

[3][दीपदण्डस्थापनम्]

प्रासादाग्रे [4]पुरे वाऽपि [5]द्वारायतनबाह्यतः । [6]साङ्घ्रिदण्डाधिविस्तारमवटस्य विशालकम् ॥ ६ ॥
[7]तद्व्यासत्रिगुणं निम्नं खात्वा [8]वेदगुणं तु वा । [9]हृदा संस्थापयेद्दण्डं पांसुना सुदृढं कुरु ॥ ७ ॥

[10][दण्डे यष्ट्यादियोजनम्]

[11]आमूलाग्रं च दण्डे तु [12]यष्टिकास्तु सुयोजयेत् । चत्वारिंशदमारभ्य [13]सविंशतिशतद्वयम् ॥ ८ ॥

---

[1] A: स्वभावनाहं संयुक्तं.
[2] C: कुलादग्रं.
[3] cf. *Makuṭa*, 8, 3:

प्रासाददक्षिणे पूर्वे दीपदण्डं तु विन्यसेत् ।

cf. *Kāmika*, II, 8, 6 et 23-24:

देवाग्रे स्थापयेद्दण्डं प्रतिगोपुरमेव वा । अष्टदिक्षु चतुर्दिक्षु त्रिष्वेकत्र च वा द्वयोः ॥ . . . .
अस्त्रेण शोधयेद्दण्डं प्रणवेन तु पूजयेत् । षट्चतुःपञ्चतालेनावटं भूमौ समाचरेत् ॥

cf. *Kāraṇa*, I, 112, 6-7:

हर्म्याग्रे वृषपृष्ठे वा पीठबाह्ये तथाग्रके । मध्यमे मध्यहारायां स्थापयेद्दीपदण्डकम् ॥
पञ्चतालप्रमाणेन खानयेत्पृथिवीं ततः । . . . .

cf. *Kāraṇa*, II, 27, 20-21:

वृषपृष्ठे च वीराग्रे गोपुराग्रे तथैव च । वास्तुमध्येन्द्रसन्ध्योश्च पञ्चशालाग्रमध्यमे ॥
शिवाग्रे स्थापयेद्दण्डम् " ।

[4] A: परे.
[5] C: द्वारायञ्च बाह्यतः.
[6] A: साङ्घ्रिदण्डाधिविस्तारादवटस्य ; B et C: साङ्घ्रिदण्डादिविस्तारादवटस्य.
[7] C: तद्व्यासद्विगुणं.
[8] B: वेदाङ्गुलं तु वा ; C: वेदशतद्वयम् .
[9] C omet les vers 7*b* et 8.
[10] cf. *Kāmika* II, 8, 8-20:

. . . . . तत्र कीलांश्च योजयेत् । द्वादशाङ्गुलमारभ्य व्योमाङ्गुलविवृद्धितः ॥
पञ्चाशत्करजातं तु दण्डात्कीलविनिर्गमः । द्विमात्रात्पादवृद्ध्या तु षडङ्गुलसमावधि ॥
विस्तारः स्याद्घनस्तस्य त्र्यंशमर्धं त्रिपादकम् । दण्डप्रोता भवेयुर्वा लग्ना वा कीलपादपाः ॥
नवकीलं समारभ्य व्योमकीलविवृद्धितः । सप्तविंशतिकीलान्तं दिश्येकस्यां नियोजयेत् ॥
तिसृष्वन्यासु दिक्ष्वेवं कीलांश्च विनिवेशयेत् । त्रिकीलं वा चतुष्कीलमिष्टमानसमन्वितम् ॥
तदग्रे स्थापयेत्पात्रधारणार्थं विशेषतः । दारूद्भवानि चक्राणि प्रतिकीलं तु योजयेत् ॥
दीपिकाः प्रतिचक्रं तु वसुद्वादशषोडश । योजयेद्वा बहिश्शुष्कैर्नालिकेरदलादिभिः ॥
छादयेद्वाथ चक्राणि तन्नि ष्ठं यथा भवेत् । एकहस्तविशालं तु द्विगुणायतसंयुतम् ॥
दक्षिणे कल्पयेद्द्वारं दण्डारोहणसिद्धये । कल्पमेतत्समाख्यातमनुकल्पमथोच्यते ॥
हित्वा चक्राणि सर्वाणि प्रतिकीलं तु दीपिकाः । योजयेदुपकल्पं स्याद्धोमकूटविवर्जितम् ॥

[1]तावद्युगविवृद्धया तु यष्टिसंख्या[2]स्सुयोजयेत्। [3]रुद्राङ्गुलं समारभ्य [4]द्विद्व्यङ्गुलविवर्धनात्॥ ९॥
सप्तविंशति[5]मात्रान्तं नवधा यष्टिर्दीर्घकम्। [6]यथाबलपरीणाहं व्यासं तेषां दृढैर्द्रुमैः॥ १०॥
दण्डस्य तु चतुर्दिक्षु दृढं यष्टिं सुयोजयेत्। तेष्वग्रे वलयं बध्वा [7]त्वार्जवं तु त्रयं दृढम्॥ ११॥
[8]तैलाद्यैस्सेचितैर्वस्त्रैर्वेत्रोपरि सुवेष्टयेत्। तालपत्रादिभिर्वाथ मुष्टिदीपानि [9]धारयेत्॥ १२॥

दण्डं विहाय यत्कल्पमकल्पमिति कथ्यते। दीपकूटान्नयेद्दिक्षु विदिक्ष्वपि तदन्तरे॥
प्रतिदेवं तु कर्तव्या दीपिका बहुसंख्यया। स्थापयेद्दीपदण्डांश्च मालाकारेण वा बहून्॥
तोरणाकारतो वापि वृत्ताकारेण वा बहून्। प्रभाकारांश्च वा कृत्वा तत्र दीपांश्च योजयेत्॥

cf. *Kāraṇa*, II, 27, 30-38:

षट्त्रिंशत्सुषिरं मध्ये चतुर्विंशति षोडश। छन्नं भिन्नं तु सुषिरं तन्मध्ये किल जायते॥
आमूलाग्रं किलालिख्य चक्राकारं तु बन्धयेत्। चक्राकारां च यष्टिं च यष्टिकीलं च बन्धयेत्॥
दण्डस्य च चतुर्दिक्षु दृढयष्टिं सुयोजयेत्। तेष्वग्रे बन्धयेच्छाखां दण्डाग्रे मध्यमे तथा॥
दीपाधारश्च निम्नः स्यान्निचुलाकृतिरुत्तमम्। नालिकेरसुपर्णं च खर्जूरीतालपत्रकम्॥
क्रमुककदलीपर्णं केतकीपर्णमेव वा। यष्टयग्रे बन्धयेच्छुष्कं धौतवस्त्रेण वेष्टयेत्॥
चित्रवस्त्रैरलंकृत्य स्थूललिङ्गाकृतिर्भवेत्। यष्टिहीने महाव्याधिः पत्रहीने धनक्षयः॥
चित्रहीने दरिद्रं स्यात्तन्मूले वेदिकां कुरु। पर्णोपरिवेष्टितं वस्त्रं सर्वकामफलप्रदम्॥
पूर्वे वा दक्षिणे वापि द्वारं कल्प्य विशेषतः। त्रिर्द्वारैकस्य विस्तारं द्विगुणायाममुच्यते॥
दण्डमूले चित्रदीपाः सहस्रं च तदर्धकम्। तदर्धं शतदीपं च दण्डमूले ह्यलंकृतम्॥

cf. *Sūkṣma*, 8, 22-26:

प्राकारमध्ये संस्थाप्य दण्डं क्षुद्रमिति स्मृतम्। वास्तुमध्ये तु संस्थाप्य दण्डं भद्रमिति स्मृतम्॥
क्षुद्रदण्डे समारोप्य यष्टीर्नक्षत्रसंख्यया। भद्रदण्डस्य परितः पञ्चहस्तप्रमाणतः॥
कूटाकारं तु संकल्प्य चतुर्भागांशहीनकम्। कूटस्योच्चमिदं प्रोक्तं कदलीक्षुदलादिभिः॥
निच्छिद्रं कारयेद्विद्वान् वस्त्रमाज्येन सेचयेत्। तद्वस्त्रं शिथिलीकृत्य तस्योर्ध्वे धारया क्षिपेत्॥

[11] A et B: मूलादग्रं pour आमूलाग्रं. [12] A et B: षष्ठियासीत् pour यष्टिकास्तु.
[13] B: संशति pour सविंशति.

---

[1] A: तावद्रयुकधिवृद्धया; B: तावद्धयधिकवृद्धया.
[2] A: त्म pour स्सु; B: य pour स्सु. [3] C omet les vers 9*b*, 10 et 11*a*.
[4] A: द्वियङ्गुलवर्धनात्; B: द्विद्वि अङ्गुलवर्धनात्. [5] A: मात्रान्त pour मात्रान्तं.
[6] B: तथा pour यथा.
[7] A: त्वार्जवं तु त्रियं; B: त्वाज्यवन्तु त्रयं; C omet त्वार्जवं तु त्रयं.
[8] A: तैलाद्यैः सेचिता त्वस्त्रि तेन्वत्रोपरि सुवेष्टयेत्; B: तैलाद्यैः सेचिता त्वस्त्री त्वन्वेत्रोपरि वेष्टयेत्; C: तैलाद्यैः सेविता त्वस्त्र नत्रोपरि सुवेष्टयेत्.
[9] A: वा धरेत्; B: वा यजेत्; C: वा धारयेत्.

[1][दण्डाग्रे दीपपात्रम्]

दण्डाग्रे विन्यसेत्पात्रं[2] द्वात्रिंशत्प्रस्थपूरितम्[3]। द्रोणं वा शिवपूर्णं[4] वा तस्मिन्कार्पासबीजकम्॥ १३॥
वार्धक्यवस्त्राण्यापूर्य[5] तैलंदीप्पूरयेत्ततः।

[6][होमकुण्डानि]

चतुष्कुण्डमष्टकुण्डं वा परितः परिकल्पयेत्॥ १४॥
[7]निर्वर्त्य कोणकुण्डानि [8]चतुर्होमो विशेषतः। [9]सर्वं वेदाश्रकुण्डं स्यात्सकूटं परिकल्पयेत्॥ १५॥

[10][दीपदण्डमूले वेदिका]

[11]दण्डत्रिगुणविस्तारां[12] वेदिकां[13] दण्डमूलतः। दण्डविस्तारतुल्योच्चां[14] दर्पणोदरसन्निभाम्[15]॥ १६॥

---

[1] cf. *Makuṭa*, 8, 5-6:
तदूर्ध्वे विन्यसेत्पात्रं द्वात्रिंशत्प्रस्थपूरितम्। अर्धं तदर्धमात्रं वा घृतं वा तैलमेव वा॥
कार्पासबीजसंयुक्तं नववासं च निक्षिपेत्॥

cf. *Suprabheda* I, 18, 5-6:
घृतं पात्रे समानीय शोधितं तैलमेव वा। कार्पासबीजसंयुक्तं वाससश्छिन्नसंयुतम्॥
घृतमध्ये सुविन्यस्य स्तम्भमूर्ध्नि सुदीपयेत्॥

[2] A: पात्री pour पात्रं; B: पात्रीं

[3] B: पूरिताम् pour पूरितम्.

[4] B: पुण्यं pour पूर्णं.

[5] A: आंकुर्यात् pour आपूर्य.

[6] cf. *Sūkṣma*, 8, 7:
वृत्तं वा चतु श्रं वा कुण्डमैन्द्रे तु कल्पयेत्।

cf. *Kāraṇa*, I, 112, 15:
दीपदण्डस्य परितः कोणेषु च चतुर्ष्वपि। पञ्चहस्तप्रमाणेन कूटं वापि प्रकल्पयेत्॥

[7] A et B: निवर्त्य; C: निवृर्त्य.

[8] A, B et C: सर्वहोमे.

[9] A: सर्वदेवाश्रकुण्डं स्यात्.

[10] cf. *Svāyambhuva*, 44, 46:
दण्डाग्रे दक्षिणे वापि मण्डपं कारयेत्सुधीः। कूटं वापि प्रपां कुर्यात्सप्तपञ्चत्रिहस्तकम्॥

cf. *Aṃśumad*, 28, 14:
तन्मूले वेदिकां कुर्यात्समां च चतुरश्रकाम्। विस्तरार्धसमुत्सेधां मेखलात्रयसंयुताम्॥

cf. *Kāraṇa*, I, 112, 9-11:
स्थापयेद्दीपदण्डं तु तन्मूले वेदिकां कुरु। त्रिकरं चोत्तमं विद्धि मध्यमं द्विकरं भवेत्॥
अधमं चैकहस्तं वा विस्तारं संप्रकीर्तितम्। हस्तमात्रसमुत्सेधं कन्यसस्य विधीयते॥
षडङ्गुलस्य वृद्ध्या तु मध्यमस्योत्तमस्य तु॥

cf. *Sūkṣma*, 8, 5-6:
देवाग्रे मण्डपं कल्प्य पञ्चहस्तप्रमाणतः। चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥
वितानाद्यैरलंकृत्य मध्ये वेदीं प्रकल्पयेत्। हस्तमात्रसमुत्सेधां दर्पणोदरसन्निभाम्॥

[11] C: दण्डं pour दण्ड.

[12] A, B et C: विस्तारं pour विस्तारां.

[13] A, B et C: वेदिका.

[14] A: तुल्योच्चं; B: तुल्यं च.

[15] A, B et C: सन्निभम् pour सन्निभाम्.

गोमयालेपनं कृत्वा [1]पिष्टसूत्रैर्विचित्रयेत् । पुण्याहप्रोक्षणं कृत्वा स्तोत्रमङ्गलवाचकैः ॥ १७ ॥
सर्वातोद्यसमायुक्तं नृत्तगेयरवैरपि । [2]पक्ष्याद्यनाहतं वस्त्रं दण्डमूले तु वेष्टयेत् ॥ १८ ॥

[3][प्रासादादिषु दीपः]

देवदेवं[4] समभ्यर्च्य [5]प्रासादे स्तूपिकोपरि । [6]दीपाधारांस्तु विन्यस्य [7]चैलतैलादिसंयुतान् ॥ १९ ॥
[8]परिवाराग्रालये च गोपुरेषु च [9]स्तूपिषु । [10]दीपाधारांस्तु विन्यस्य [11]नानापुष्पैः सुपूजयेत् ॥ २० ॥

[12][लिङ्गाग्रे दीपः]

लिङ्गाग्रे स्थण्डिलं कृत्वा [13]शालिभिस्तण्डुलैः शुभैः । लोहजं [14]मृन्मयं वाथ स्थापयेन्नवपात्रकम् ॥ २१ ॥

---

[1] A et B: पिष्टसूत्रैर्विचित्रितम्; C: पिष्टसूत्रे विचित्रयेत्. [2] A et B: पक्षाद्युग्माहतं; C: पक्षद्रुमाहतं.

[3] cf. *Yogaja*, p. 280:
दण्डमूले तु संयोज्य नववस्त्रसमायुतम् । प्रासादे मण्डपे चैव गोपुरे दीपरोपणम् ॥

cf. *Suprabheda*, I, 18, 7-9:
प्रासादमिह सर्वत्र दीपमाल्यैरलंकरेत् । क्षुद्रनास्यां महानास्यां कुम्भे चैव कपोतके ॥
पालिकासु गृहास्वत्र दीपयन्त्रैः सुदीपयेत् । प्रासादमूर्धदेशेषु मण्डपे गोपुरे तथा ॥
प्राकारेषु विशेषेण दीपं सर्वत्र योजयेत् ॥

cf. *Kāmika*, II, 8, 21-23:
प्रासादे गोपुरे शालापरिवारालयादिषु । मण्टपे बलिपीठादौ कूपे वाथ गृहेऽपि वा ॥
वृषे महानसे कुर्यात्पुष्पमण्डपिकादिषु । बहिर्वा कल्पयेद्दीपान् ग्रामादिष्वपि सर्वतः ॥
दीपावलिरियं कार्या अधिवासनपूर्वकम् ॥

[4] B: देवदेव. [5] B: प्रासादस्थूपिकोपरि.
[6] A: दीपाधारं तु; B: दीपाधाराणि; C: दीपाराधनं. [7] A et C: नानापुष्पैः सुपूरितम्.
[8] B: परिवाराग्रयाले च; C: परिवाराग्रमाले च. [9] B: स्थूपिषु.
[10] A et C: दीपाधाराणि; B: दीपाघाराणि. [11] A: चेलतैलाग्निसंयुतम्; C: चेलकैलादिसंयुतम्.

[12] cf. *Kāmika*, II, 8, 25-36:
शिल्पिनं मोचयित्वान्ते पुण्याहं वाचयेत्ततः । दीपेन पूजयेद्दण्डं गन्धपुष्पादिसंयुतम् ॥
बध्वा प्रतिसरं चान्तः प्रविश्येदं समाचरेत् । आलये मण्डपे वापि यागमण्डप एव वा ॥
मनोरमे शुभेऽन्यत्र गोमयेनोपलेपिते । स्थण्डिलं तत्र संकल्प्य शस्त्रेण प्रोक्षयेद्गुरुः ॥
नव वा पञ्च पात्राणि वक्रं वा तत्र विन्यसेत् । नीराजनविधौ देवास्ते सर्वेऽत्रापि संमतम् ॥
पात्रे प्रभाव इत्युक्तश्चन्दनाद्यैस्समर्चयेत् । कुण्डं वा स्थण्डिलं वापि तत्पूर्वस्मिन्प्रकल्पयेत् ॥
शिवाग्निं तत्र संपाद्य शिवं साङ्गं च तर्पयेत् । समिदाज्येन चरुणा ततः कार्पासबीजतः ॥
क्षीरेण शतमर्धं वा तदर्धं वा समाचरेत् । मूलेनाङ्गैर्दशाङ्गेन वह्निबीजमनुस्मरन् ॥
शतमष्टोत्तरं हुत्वा पूर्णामन्ते विधाय च । देवं साङ्गं विसृज्याथ दीपानारोपयेद्गुरुः ॥
तैलेनाज्येन वा पूर्यं पात्रं सर्वात्मकं स्मरन् । वह्निबीजमनुस्मृत्य मध्यादिभ्यः क्रमेण तु ॥
गन्धपुष्पादिभिश्चेष्ट्वा शिवाग्निं च विसर्जयेत् । गृहीत्वा मध्यपात्रं तु दीपदीपिकया गुरुः ॥
सर्वालंकारसंयुक्तं तरुणाख्यं तु दीपकम् । दण्डोर्ध्वे स्थण्डिले वापि हृदयेन निवेशयेत् ॥
होमान्ते दीपदण्डस्य कौतुकं वा समाचरेत् ॥

[13] B et C: शालिभिर्विमलैः. [14] A et C: मृण्मयं.

घृतेन पूरयेत्पात्रं तेषु वर्तिं निधापयेत् । प्राङ्मुखं सर्वदीपं [1]च दीपयेदग्निबीजतः[2] ॥ २२ ॥
तेष्वग्नि[3]मूर्तीरभ्यर्च्य तदग्रे शान्तिहोमकम् । कृत्वा [4]होमावसाने [5]चाप्यादित्यास्तमयान्तकम् ॥ २३ ॥
प्रासादे पूर्वनास्यां [6]च गोपुरेऽपि तथैव च । रोपयेद्बालदीपं तु दण्डमूले तथैव च ॥ २४ ॥

[7][होमकर्म]

कृत्वैवं [8]पूर्वरात्रे तु [9]नापरीते तु चन्द्रके । अपराह्णे [10]च कुण्डे तु होमकर्म समाचरेत् ॥ २५ ॥
समिदाज्य[11]चरूँल्लाजांस्तिल[12]सर्षपमुद्गकान् । अग्निबीजसमायुक्तं मूलमन्त्रेण होमयेत् ॥ २६ ॥
शतद्वयं तदर्धं वा प्रत्येकाहुतिमाचरेत् । [13]स्विष्टमग्नेतिमन्त्रेण पूर्णाहुतिमथाचरेत् ॥ २७ ॥

[दीपारोपणम्][14]

आदित्यास्तमये काले सर्वालंकारसंयुतम् । [15]प्रागधिवासदीपेषु [16]मध्यं [17]स्तूप्यां तु योजयेत् ॥ २८ ॥

---

[1] C: तु pour च.
[2] B: बीजकम् pour बीजतः.
[3] B: भूतिम् pour मूर्तीन्.
[4] B: होमावसानं.
[5] A, B et C: तु आदित्यास्तमयान्तकम् .
[6] C: च pour तु.
[7] cf. *Kāraṇa*, I, 112, 33-37:

चतुष्कोणेषु कुण्डेषु होमं कुर्याच्छिवद्विजः । कुण्डे वा स्थण्डिले वापि कारयेत्तु प्रमाणतः ॥
अग्न्याधानादिकं सर्वं पूर्वोक्तविधिना कुरु । ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च क्रमेण तु ॥
होमाधिदेवताः प्रोक्ता दीपदण्डे सदाशिवः । पलाशवटशम्यर्कसमिधः पावकादिषु ॥
पूर्वोक्तैश्चैव मन्त्रैश्च द्रव्यैश्चैव पृथक् पृथक् । होमयेत्तु विशेषेण स्विष्टान्तं देशिकोत्तमः ॥

[8] C: पूर्वरात्रौ.
[9] A: अपरेते सचन्द्रिके ; B: नापरे तं च चन्द्रके ; C: नापरे ते च चन्द्रके.
[10] A et C: तु pour च.
[11] A: चरुं pour चरून् .
[12] C: लाजतिल pour लाजांस्तिल.
[13] cf. *Taittirīyabrāhmaṇa*, 2, 4, 1, 4 etc.
[14] cf. *Kāraṇa*, I, 112, 37-44:

आदित्यास्तमने चैव दीपारोहणमारभेत् । सर्वालंकारसंयुक्तं सर्वातोद्यसमायुतम् ॥
नृत्तगेयसमायुक्तं पिञ्छचामरसंयुतम् । वितानध्वजसंयुक्तं नानाभक्तजनैर्युतम् ॥
प्रतिमां तु नयेत्तत्र पूजयेद्देशिकोत्तमः । देशिकं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
पूजयेन्मूर्तिधारांश्च भक्तांश्च परिचारकान् । विज्ञाप्य देवदेवानां दीपारोहणमुत्तमम् ॥
शक्तिदीपानि सर्वाणि एकीकृत्य सुबन्धयेत् । ग्रहस्थो ब्रह्मचारी वा तद्दीपं गृह्य पाणिना ॥
दण्डं तु शीघ्रमारुह्य अग्रं तूत्तरदिङ्मुखः । पुत्तले रोपयेद्दीपं दीपकीलेषु रोपयेत् ॥
अग्रादिमूलपर्यन्तं ज्वालामालाविभूषितम् । पालिकेषु कपोतेषु महानासितले कुरु ॥
प्रासादमूर्धपर्यन्तं दीपं सर्वत्र रोपयेत् ॥

[15] A: प्रागाययासदीपेषु ; B: प्रागाघयासदीपेषु.
[16] B: मध्ये.
[17] B: स्थूप्यां.

[1]दण्डे तु रोपयेत्प्राच्यां[2] [3]याम्यदीपं तु गोपुरे । [4]पश्चिमं परिवाराणां [5]सौम्यं देवालये[6] कुरु ॥ २९ ॥
कोण[7]पात्रस्थदीपानि[8] [9]विन्यस्यास्थानमण्डपे । आरामे पुष्करिण्यां च क्रमेणैव निधापयेत् ॥ ३० ॥
सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् । सोमास्कन्देश्वरं [10]भूष्य [11]शिबिकायां [12]तु रोपयेत् ॥ ३१ ॥
[13]दत्त्वा दण्डान्तिकं दीपं रोपयेद्दण्डमूर्धनि[14] । [15]दण्डावृततरङ्गं च [16]होमकूटं तथैव च ॥ ३२ ॥
[17]दीपयित्वा,र्चयेदेतल्लिङ्गोद्भवं[18] विचिन्तयेत्[19] । [20]प्रदक्षिणत्रयं कृत्वा [21]तद्ग्रामं च प्रदक्षिणम् ॥ ३३ ॥
आस्थानमण्डपं गत्वा [22]परिवेषं समाचरेत् । प्रभूतं च हविश्चैव पृथुकांश्च निवेदयेत् ॥ ३४ ॥
[23]प्रतिसंवत्सरं ह्येवं [24]कार्यं वृद्धिमिहेच्छता । [25]एवं कर्तुमशक्तश्चेत्स्तूप्यग्रे[26] [27]दीपरोपणम् ॥ ३५ ॥

---

[1] A: दण्डात्तु ; B: दण्डं तु.
[2] B: पश्चात् pour प्राच्यां.
[3] A et B: साम्य pour याम्य ; C: याम्या.
[4] A et B: फलिमं.
[5] B: सौम्य pour सौम्यं.
[6] B: देवालयं pour देवालये.
[7] B: पार्श्वस्थ pour पात्रस्थ ; C: पात्रेस्तु.
[8] C: दीपारि pour दीपानि.
[9] C: शिवमास्थानमण्डपे.
[10] C: भूष्यं.
[11] B: शिबिकादौ.
[12] A: सुयोजयेत् ; B: तु योजयेत् .
[13] A: दण्डाद्दण्डान्तिकं.
[14] B: मूलकम् pour मूर्धनि.
[15] A: दण्डावृततरङ्गश्च ; B: दण्डोद्वृततरङ्गं च.
[16] C: हेमकूटं.
[17] A: दीपं दत्वा pour दीपयित्वा ; B: दीपयित्वार्चयित्वैतद् ; C: दीपं दत्वार्चयेदेतद् .
[18] A et B: लिङ्गोद्भावं.
[19] cf. *Kāmika*, II, 8, 52:
वस्त्राद्यैर्देशिको धीमानुत्तराभिमुखं स्थितः । ज्योतिर्लिङ्गमनुस्मृत्य दहेत्कूटचतुष्टयम् ॥
[20] cf. *Kāraṇa*, I, 112, 47-49:
प्रदक्षिणत्रयं कृत्वा प्रविशेदालयं प्रति । परिवेषक्रमं कुर्यात्प्रविश्यास्थानमण्टपम् ॥
स्नपनं कारयेच्छम्भोः प्रभूतहविषं ददेत् । उत्सवं कारयेत्तत्र यथावित्तानुसारतः ॥
दीपदण्डयुतं चेत्तु एवमेव समाचरेत् । हर्म्याग्र वा वृषाग्रे वा कूटाग्रे रोहणं तु चेत् ॥
तानि कार्याणि सर्वाणि कुर्याच्चेव,धिवासिनाम् ॥
[21] C: तं ग्रामं.
[22] A: परिवेष्टं.
[23] cf. *Kāraṇa*, I, 112, 50-51:
एवं कृतं महापुण्यं सर्वसस्यविवर्धनम् । राष्ट्रग्रामनृपाणां च वर्धनं रोगनाशनम् ॥
सर्वदेवप्रियार्थं स्यात् प्रियं पातालवा,सिनाम् ॥
[24] A: कुर्याद्वृद्धिमितिश्चतः ; B: कुर्याद्वृद्धिं ततस्ततः ; C: प्रकुर्याद्वृद्धिमिच्छतः.
[25] cf. *Kāraṇa*, I, 112, 45-46:
अलाभे दीपदण्डस्य स्तूप्यग्रे तु विनिक्षिपेत् । गोपुरे चेव हर्म्याग्रे वृषाग्रे चैव दीपयेत् ॥
वृषालाभे तु हर्म्याग्रे दीपकूटं तु कारयेत् । तदग्रे रोपयेद्दीपमलाभे देशिकोत्तमः ॥
[26] B: अस्त्राग्रे pour स्तूप्यग्रे.
[27] C: दीपरोपणे.

[1]स्तूप्यभावे तु वृक्षेषु [2]स्कन्धाग्रे मुष्टिदीपकम् । [3]बन्धयित्वार्चयेद्देवं नानादीपैरलंकुरु[4] ॥ ३६ ॥

इति [5]श्रीमद्रौरवतन्त्रे क्रियापादे [6]कृत्तिकादीपारोपणविधिर्नाम [7]षड्विंशः पटलः

---

[1] A: स्तूप्यभावेषु ; B: स्थूप्यभावे तु.
[2] B: स्कन्दाग्रे.
[3] A: बन्धयित्वा च यद्देवं ; C: बन्धयित्वार्चयेदेवं.
[4] A et C: अलंकरेत् pour अलंकुरु.
[5] A: श्रीरौरवतन्त्रे ; B omet श्रीमद्रौ वतन्त्रे क्रियापादे.
[6] A: दीपारोपणपटलः षड्विंशः; B: कृत्तिकादीपविधिर्नाम.
[7] C: सप्तविंशतिः पटलः.

ADDENDA ET ERRATA

Page	7,	note	3,			: au lieu de: lire, lire: lit				
„	11,	„	8,	ligne	2	: supprimer "le" avant "Aghoraśivācārya"				
„	16,	„	13,	„	2	: au lieu de: le *Rauravāgama* lire: le *Rauravottara*				
„	22,			„	7	: lire: (४) (ओं) अभवाय लक्ष्म्यै नमः				
„	23,			„	8	: lire: (१२) ओं मन भ्रामिण्यै नमः				
„	26,	„	2,	„	1	: au lieu de: Śud lire: Sud				
„	„	„	3,			: „ per lire: par				
„	29,	śloka	5 b			: lire: श्यामाभास्ता धरण्याद्याः				
„	„	„	6 b			: au lieu de: यं lire: यां				
„	30,	„	6 b			: „ तौ lire: ते				
„	33,	„	1 a			: „ उदङ्मुखो	lire:	उदङ्मुखः		
„	„	„	6 a			: „ पितृणां	„	पितॄणां		
„	34,	note	11,	„	3	: „ ci-dessou	„	ci-dessous		
„	38,	śloka	13 b			: „ ब्रह्माण्डमर्चयित्वा	„	ब्रह्माणमर्चयित्वा		
„	„	note	2,	„	1	: „ details	„	détails		
„	40,	śloka	27 a			: „ विन्यस्यार्चनमारभेत्	„	विन्यस्यार्चनमारभेत्		
„	43,	note	9,	„	1	: „ lit	„	lisent		
„	„	„	26			: „ cet	„	ce		
„	44,	„	1			: „ „	„	„		
„	46,	śloka	3 b			: „ चण्डिकां यां	„	पिण्डिकायां		
„	48,	note	6,	„	7	: „ méme	„	même		
„	„	„	„	„	8	: „ reconstiuée	„	reconstituée		
„	51,	śloka	30 b			: „ दत्त्वौदनादि	„	दत्तौदनादि		
„	55,	note	18,	„	1	: „ neuf	„	dix		
„	58,	śloka	20 a			: „ सर्वतश्चोर्ध्वगांस्तरेत्	„	सर्वतश्चोर्ध्वगान्स्तरेत्		
„	„	„	24 b			: „ चतुर्दिक्परिधींस्तीर्य	„	चतुर्दिक्परिधीन्स्तीर्य		
„	59,	„	26 a			: „ मतिमामांस्ततोऽसौ	„	मतिमांस्ततोऽसौ		

Page	59,	śloka	30 a	ligne	: au lieu de:	दीपैरध्यैंश्च	lire:	दीपैरर्घ्यैश्च
,,	65,	,,	5 a		: ,,	कुशांस्तीर्थे	,,	कुशान्स्तीर्थे
,,	69,	note	6,	,, 9	: ,,	an neutre	,,	au neutre
,,	119,	śloka	31 a		: ,,	सुस्थितां	,,	सुस्थितं
,,	133,	note	9,	,, 19	: ,,	notéc	,,	notée
,,	134,	ligne	9		: ,,	*Śivapuṛāṇa*	,,	*Śivapurāṇa*
,,	,,	,,	10		: ,,	celle de	,,	celle des
,,	,,	,,	11		: ,,	noms pou	,,	noms pour
,,	136,	,,	14		: ,,	अधर्मशत्रु क्षोभ्यः	,,	अधर्मशत्रुरक्षोभ्यः
,,	147,	śloka	1 a		: ,,	प्रवक्ष्यापि	,,	प्रवक्ष्यामि
,,	174,	,,	43 b		: ,,	प्रकीतितम्	,,	प्रकीर्तितम्
,,	,,	,,	48 a		: ,,	परार्धाः	,,	पदार्थाः
,,	,,	,,	51 a		: ,,	विद्या	,,	यज्ञ
,,	175,	,,	5-6		: lire:	आसनं विभजेन्मन्त्रं क्रमशः पद्ममुद्रया । आवाहन्यार्घ्यपाद्यादि धूपान्तं च प्रयोजयेत् ॥ ५ ॥ निष्ठुरया निरुध्येत विघ्नान् सौभाग्यमेव च । कालकण्ठ्या प्रचाटेत सर्वस्थानप्रबाधकान् ॥ ६ ॥		
,,	,,	note	1,	ligne 2	: au lieu de:	*Suprebheda*	lire:	*Suprabheda*
,,	187,	śloka	8 b		: ,,	ओंकाराद्यन्तसंबद्धो	,,	ओंकाराद्यन्तसंबन्धो
,,	188,	note	1,	,, 10	: ,,	*addenda and errata*	,,	*addenda et errata*
,,	189,	,,	1,	,, 2	: ,,	de	,,	du
,,	198,	śloka	20 a		: ,,	शास्त्रात्त	,,	शास्त्रात्तु
,,	205,	ligne	10		: ,,	हृदादिषडङ्गपूजा	,,	हृदाद्यङ्गपूजा

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE N° 18

RAURAVĀGAMA

VOL. I

édition critique

par

N. R. BHATT

INTRODUCTION:

LES ĀGAMA ÇIVAÏTES

par

JEAN FILLIOZAT

Deuxième tirage

INSTITUT FRANÇAIS D'INDOLOGIE

PONDICHÉRY

1985

श्रीः

रौरवागमः

[क्रियापादः]

[सप्तविंशः पटलः][1]

[बाललिङ्गस्थापनविधिः][2]

[बाललिङ्गस्थापने द्वैविध्यम्][3]

अतः परं प्रवक्ष्यामि बालस्थानविधिं परम्[4] । द्विविधं [5]तद्विनिर्दिष्टमाद्यं चैव[6] द्वितीयकम् ॥ १ ॥
आद्यमादौ[7] तु बालस्य[8] [9]स्थापनं मुक्तिहेतुकम् । [10]प्रायश्चितार्थकं यत्तु स्थापितं [11]तद्द्वितीयकम् ॥ २ ॥

[बालस्थापनस्यावश्यकता][12]

[13]मूलालयं तु निश्चित्य बालस्थानं ततः कुरु । बालस्थानं विना मूलस्थापनं मृत्युहेतुकम् ॥ ३ ॥
आदौ तु [14]तरुणं कल्प्य मूलं पश्चात्प्रकल्पयेत्[15] । भोगमोक्षप्रदं विद्यात्तयोस्त्विष्टं[16] समाचरेत् ॥ ४॥

---

[1] A la suite du *paṭala* 26, et avant le *paṭala* 27, tous les manuscrits utilisés pour cette édition, à l'exception de deux, E et F (manuscrits R No 16840 et R No 11362 déposés à la Madras Government Oriental Manuscripts Library), contiennent deux *paṭala* intitulés *Pañcasādākhyavidhiḥ* et *Piṇḍikāsthāpanam*. Le premier d'entre eux sera publié comme Appendice No 1, et nous donnerons alors en note les raisons de ce rejet. Le second sera placé après le *paṭala* suivant, *Liṅgasthāpanavidhiḥ*. En effet le premier *śloka* de ce *paṭala* contient la déclaration suivante : प्रागुक्तलक्षणोपेतं पीठं कुर्यात्तु शैलजम्. Or la définition de *pīṭha* se trouve dans les *śloka* 71a-80 du *Liṅgasthāpanavidhipaṭala*. Il apparaît donc que le *Piṇḍikāsthāpanavidhipaṭala* doit venir après le *Liṅgasthāpanavidhipaṭala* et non avant.

[2] Pour बाललिङ्गस्थापनविधि voir *Aṃśuma.ʾāgama, paṭala* 46, *Kāmika* I 32, *Kāraṇa* I 135, *Cintya, paṭala* 20, *Yogaja, paṭala* 18, *Vīra, paṭala* 90, *Suprabheda* I 26, et *Sūkṣma, paṭala* 58

[3] Cf. *Aṃśumadāgama* 26, 1-4a:

बालस्थानविधिं वक्ष्ये श्रूयतां रविसत्तम । आद्यं द्वितीयमेवं तु द्विविधं तरुणालयम् ॥
आद्यं बालगृहं कल्प्य मूलगेहमतः परम् । मूलबिम्बं प्रतिष्ठाप्य पश्चाद्बालगृहं त्यजेत् ॥
एवमाद्यगृहं प्रोक्तं द्वितीयं चाधुना शृणु । प्रायश्चित्तार्थकं यत्र स्थाप्यते बालबिम्बकम् ॥
द्वितीयमिति विज्ञेयम्"

cf. *Kāraṇāgma* I 135, 1-5a:

बालस्थानप्रतिष्ठां तु प्रवक्ष्यामि विशेषतः । द्विधा बालालयं प्रोक्तं प्रथमं च द्वितीयकम् ॥
ग्रामे वा नगरे वापि पत्तने राजधानिके । एतेष्वन्येषु देशेषु मूलस्थानस्य यत्पुरा ॥
वास्तुनिर्देशनादन्ते कल्पितं प्रथमं भवेत् । विश्लिष्टे च तथा पीठे लिङ्गे च पतिते तथा ॥
शिल्पिना कारिते हर्म्ये भिन्ने च पतितेऽपि च । यन्नवीकरणार्थं तु कर्तव्यं बालहर्म्यकम् ॥
द्वितीयमिति विख्यातं बालालयं प्रजापते ।

cf. *Yogajāgama* 18, 1-5a:

द्विधा बालालयं प्रोक्तं प्रथमं च द्वितीयकम् । ग्रामे वा नगरे वापि पट्टणे राजधानिके ॥
एतेष्वन्येषु देशेषु वास्तु निश्चित्य कालके । देवालयं तु निश्चित्य सद्यो बालालयं कुरु ॥
प्रथमं तरुणाख्यं च द्वितीयं सौम्य वक्ष्यते । विश्लिष्टे च तथा पीठे लिङ्गे तु चलिते तथा ॥
जीर्णोद्धारे तु कर्तव्यं लिङ्गपीठविहीनके । शिल्पिकर्मान्तरे हर्म्ये भिन्ने च पतितेऽपि वा ॥
एतेष्वन्यतमे तेषु द्वितीयं तरुणालयम् ।

[4] B (manuscrit de Dharmapuram) विधिक्रमम् pour विधिं परम्

[5] B et F (manuscrit n° 11362 de Madras Government Oriental Manuscripts Library) तत्समुद्दिष्टम्

[6] C (manuscrit de Kunrakkuḍi) omet व dans चैव

[7] A (manuscrit de Kīlvelūr) : आद्यौ pour आदौ

[8] C : बाल्यस्य [9] A et B : स्थापनस्य विशेषत:

[10] C et F omettent le demi-*śloka* 2b. [11] B : स्याद् pour तद्

[12] Cf. *Kāmikāgama* I 32, 1b-3a:

बाललिङ्गं विना विद्वान्मूलस्थानं न कारयेत् । बाललिङ्गादिहीनं तु मूललिङ्गादिकं न हि ॥
अयं विभागो ग्रामस्य प्रारम्भेऽन्यत्र चान्यथा । बाललिङ्गादिहीनं वा तद्युक्तं वा समाचरेत् ॥

cf. *Kāraṇāgama* I 135, 8-9:

निश्चित्य मूलहर्म्यं तु कारयेत्तरुणालयम् । बाललिङ्गं प्रतिष्ठाप्य मूलं तु स्थापयेत्ततः ॥
बालहर्म्यं विना पूर्वं मूलस्थानं न कारयेत् । विना चेद्बालहर्म्येण पुत्रपौत्रविनाशनम् ॥

cf. *Cintyāgama* 20, 11b-13a:

लिङ्गसंस्थापनात्पूर्वं स्थापयेद्बाललिङ्गकम् । बाललिङ्गं विना कुर्यान्मूललिङ्गं न कारयेत् ॥
अन्यासां देवतानां च हर्म्ये चाङ्गविहीनके । शिल्पिकर्मप्रवृत्ते तु स्थापयेद्बाललिङ्गकम् ॥

cf. *Suprabhedāgama* I 26, 4-6a :

मूलस्थानं विनिश्चित्य बालस्थानं तु कारयेत् । बाललिङ्गं प्रतिष्ठाप्य पश्चान्मूलं प्रतिष्ठयेत् ॥
बालस्थानं विना पूर्वं मूलस्थानं न कारयेत् । बालस्थानं विना यत्र पुत्रपौत्रविनाशनम् ॥
तस्मात्सर्वप्रयत्नेन बालस्थानं तु कारयेत् ।

[13] C et F omettent le *śloka* no 3 [14] A et E : तरणं [15] A, C, E, F : प्रकल्पितम

[16] A ; तयो: स्विष्टं pour तयोस्त्विष्टं

[तरुणालयस्थानं तल्लक्षणं च[1]]

मूलालयाग्रतो वैशे[2] कल्पयेत्तरुणालयम्। [3]त्रिचतुःपञ्चहस्तं वा [4]तरुणालयविस्तृतम्॥ ५॥
[5]समाश्रं तत्समं तत्र [6]त्रिपादं [7]वाग्रमण्डपम्। [8]विस्तारसममुत्सेधं त्रिपादं [9]वार्धमेव वा[10] ॥ ६॥
मृदा [11]पक्वेष्टकाभिस्तु कल्पयेदेवमेव तु। उच्चार्धं [12]कुडयतुङ्गः [13]स्यात्तत्समं [14]तु लुपोदयम्॥७॥
तृणाद्यैरूर्ध्वमाच्छाद्य कवाटार्गलसंयुतम्।

---

[1] Cf. *Kāmikāgama* I 32, 3b-8a:
मूलस्थानस्य चैशान्यामुत्तरे पूर्वयाम्ययोः। आग्नेय्यामिष्टदेशे वा कुर्याद्बालगृहं गुरुः॥
नवदण्डं व्यपोह्यैव कुर्याद्धाम महान्तरम्। त्रियुगेन्द्रियषड्ढस्तैः सप्तहस्तेन वा गृहम्॥
यद्वा करद्वयेनैव मूलस्थानं प्रकल्पयेत्। बालस्थानमथार्धेन गर्भगेहात्तथा भवेत्॥
मूलभागविशालेन भित्तिर्द्वित्रिगुणा मता। शेषं तु गर्भगेहस्य मण्डपं वा सभाकृति॥
cf. *Kāraṇāgama* I 135, 10-12:
मूलस्थानाग्रके कुर्यादीशाने वाथ सौम्यके। प्राकारे तु तृतीये वा चतुर्थे पञ्चमेऽपि वा॥
मध्यमे तु प्रकर्तव्यं बालस्थानं क्रमेण तु। त्रिहस्ताभ्यां[धार्ति?]समारभ्य द्वादशाङ्गुलवर्धनात्॥
सार्धसप्तकरान्तं तु बालालयमिति स्मृतम्। तेष्वेकं तु समारभ्य कारयेत्तरुणालयम्॥
cf. *Cintyāgama* 20, 13b-14a:
मूलहर्म्यस्य चैशान्ये पावके याम्यसौम्ययोः। बालबिम्बस्य हर्म्यं तु लक्षणोक्तं तु कारयेत्॥
cf. *Vīrāgama* 90, 10-12a:
प्रासादस्यैशदिग्भागे आग्नेय्यां पुरतोऽपि वा। वारुणे वापि कर्तव्यं बालस्थानमिहोच्यते॥
कटं वा मण्टपं वापि प्रासादं वाथ कारयेत्। त्रिहस्तं पञ्चहस्तं वा सप्तहस्तमथापि वा॥
समं त्रिपादमर्धं वा मुखमण्टपमिष्यते।
cf. *Suprabhedāgama* I 26, 6b-7, 13b:
यस्मिन्काले यदा क्षेत्रे कृते भूमिपरिग्रहे। तस्याग्रे चोत्तरे वापि अग्रे वामेऽग्रदक्षिणे॥
ईशाने वा विशेषेण कारयेत्तरुणालयम्। ···सप्तपञ्चत्रिहस्तं वा कर्तव्यं तरुणालयम्॥
cf. *Sūkṣmāgama* 58, 4:
प्रासादपूर्वदिग्भागे दक्षिणे चोत्तरेऽथ वा। ईशाने पावके वाथ बालगेहं प्रकल्पयेत्॥

[2] A, B, E : अग्रतश्चैव pour अग्रतो वैशे
[3] B : त्रिश्चतुः
[4] A : तरुणालयमिति स्मृतम् ; B : तरुणालयमुच्यते
[5] A : समन्तात्तत्समं ; B : तत्समन्तात्समं ; C, G : (manuscrit de Vāraṇāsi) समग्रं तत्समं
[6] B : त्रिपदं [7] B : च pour वा [8] A : विस्तारं सममुत्सेधं [9] C, F, G : वा स एव वा
[10] A : च pour वा [11] B : पक्वेष्टकायां तु ; C. F, G : पक्वेष्टकाभ्यां तु
[12] A, B : तुङ्गकुण्डं pour कुडयतुङ्गः [13] B : तु pour स्यात्
[14] A : तुल्यपोदयम् ; B : कल्पयोदयम

[बाललिङ्गम्[1]]

सप्ताङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ॥ ८ ॥
त्रयोविंशतिमात्रान्तं लिङ्गोच्चं नवधा भवेत् । आयामसदृशं नाहं [2]सुवृत्तं छत्रशीर्षकम् ॥ ९ ॥
याश्मिकैस्तरुभिर्वाथ [3]शिलाभिर्वाथ कारयेत् । [4]तन्नाहसदृशं [5]पीठं व्यासं चैवोच्छ्रयं समम् ॥ १० ॥
[6]पीठोच्चदीर्घभागं वा[7] [8]भूमिनिम्नं तु मध्यतः । [9]लिङ्गव्याससमव्यासं दारुजं सौधजं तु वा ॥ ११ ॥
[10]किञ्चिन्नालसमायुक्तं छादितं तु [11]दलादिभिः ।

[मण्डपः[12]]

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ १२ ॥

---

[1] Cf. *Kāraṇāgama* I 135, 13-18 :
शिलादारुमृण्मयं वा लिङ्गं बालगृहस्य तु । अश्वत्थोदुम्बरप्लक्षैः शमीवृक्षैश्च खादिरैः ॥
मधुकेनाथ वा कुर्याद्बाललिङ्गं सलक्षणम् । विकाराङ्गुलिमायाममधमाधममुच्यते ॥
अङ्गुलाङ्गुलवृद्ध्या तु रन्ध्रलिङ्गानि कल्पयेत् । लिङ्गोदयं तु नाहं स्यात्सर्ववृत्तमिहोच्यते ॥
शिरसो वर्तनं कुर्याच्छत्राकारं विशेषतः । सतुर्याश्राब्जवृत्तं मा त्रिधा पीठाकृतिः स्मृता ॥
लिङ्गनाहं तु विस्तारमुत्सेधं स्यात्तदर्धकम् । इष्टकाभिः सुपक्वाभिः पीठं कुर्यात्तु तद्द्वयोः ॥
रत्नन्यासं प्रकर्तव्यं पादशैलादिवर्जितम् । ब्रह्मसूत्रं विना कुर्याद्देवस्य प्रथमस्य तु ॥
cf. *Vīrāgama* 93, 3b-9:
शैलजं दारुजं वापि बाललिङ्गं करोत्विह । द्वारोच्चं नवधा भज्य एकैकं प्रतिमोच्छ्रयम् ॥
पूजांशोच्चं न वा कुर्याद्विष्णुभागान्विते तु वा । तालमानं प्रवक्ष्यामि चतुस्तालं तु चोत्तमम् ॥
त्रितालं मध्यमं प्रोक्तमधमं तु द्वितालकम् । एवमेव प्रकारेण बाललिङ्गं तु कारयेत् ॥
तेन मानेन कर्तव्यं लिङ्गस्य भागमुत्तमम् । लिङ्गतारत्रिभागस्तु पीठविस्तार उच्यते ॥
अधमो ब्रह्मभागः स्यान्मध्यमो विष्णुरुच्यते । ऊर्ध्वं तु शिवभागः स्याच्छत्राकारः शिरो भवेत् ।
लिङ्गसूत्रं तु कर्तव्यं नालं चैव तु कल्पयेत् । अश्वत्थोदुम्बरं वापि बिल्वं चैव शमी तथा ॥
बाललिङ्गं प्रकर्तव्यमेवमेव क्रमेण तु ।

[2] A, B, E : सुवृत्तं च त्रिशीर्षकम् [3] C : भूरुहैः pour तरुभिः [4] C : तन्नाक ;cur तन्नाह
[5] A : पीठव्यासं ; C : व्याससमं ; F : व्यासं चैवाच्छ्रायसमं भवेत् [6] A : पीठोच्चे pour पीठोच्च
[7] B : दीर्घभागं स्याद् ; K, G: दीर्घभांशं वा pour दीर्घभागं वा ; F : दीर्घभागांशं
[8] B : भूमिनिम्नान्तमध्यत ; F : भूमिनाम्नान्तमध्यतः [9] C, F, G : लिङ्गं व्याससमं व्यासं
[10] E : कञ्चिन्नाल pour किञ्चिन्नाल [11] A : तलादिभिः; E : जलादिभिः
[12] Cf. *Kāraṇāgama* I 135, 21-26a :
बालालयाग्रे कर्तव्यं मण्टपं चतुरश्रकम् । विकारस्तम्भसंयुक्तं भानुस्तम्भयुतं तु वा ॥
पङ्क्तित्रयसमायुक्तं चतुर्द्वारं सतोरणम् । दर्भमालासमायुक्तं वितानध्वजसंयुतम् ॥

दर्भमालासमायुक्तं वितानध्वजभूषितम् । मण्डपं तु त्रिधा भज्य मध्ये [1]वेदिविशालकम् ॥ १३ ॥
[2]तत्तिभागैकभागं तु तुङ्गं दर्पणसन्निभम् । [3]वेदाग्निविस्तृतोच्चं[4] तु मात्रं स्यादुपवेदिका ॥ १४॥
[5]तुर्याश्रं तु धनुर्वृत्तं[6] त्रिकोणं पद्ममेव वा[7] । [8]इन्द्राद्यैशानपर्यन्तमग्निकुण्डानि कल्पयेत्[9] ॥ १५॥

मध्यांशे वेदिकां कुर्यात्तच्चतुर्थांशकोन्नताम् । वेदिकायाश्च परितश्चोपवेदिं प्रकल्पयेत् ॥
वस्वङ्गुलं तु विस्तारमुत्सेधं चतुरङ्गुलम् । तस्याश्च परितश्चाष्टदिक्षु कुण्डानि कल्पयेत् ॥
दिशासु चतुरश्राणि कोणेष्वब्जानि कल्पयेत् । ईशानशक्रयोर्मध्ये प्रधानं वृत्तकुण्डकम् ॥
मण्टपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत् ।

cf *Virāgama* 90, 12b-13:

बालस्थानस्य चाग्रे तु प्रपां कृत्वा तु पूर्ववत् । मध्यमे वेदिकां कुर्यात्परितः कुण्डमुच्यते ॥
वृत्तं वा चतुरश्रं वा अष्टकुण्डानि कारयेत् ।

cf. *Sūkṣmāgama* 58, 14-17a :

बालधामाग्रके कुर्यान्मण्डपं चतुरश्रकम् । षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम् ॥
चतुस्तोरणसंयुक्तं दर्भमालाभिरावृतम् । मण्डपं पञ्चधा भज्य मध्यभागेन वेदिकाम् ॥
अरत्निमात्रमुत्सेधं दर्पणादरसंनिभम् । उपवेदीं ततः कृत्वा चतुरङ्गुलतः समाम् ।।
नवपञ्चैककुण्डं वा स्थण्डिले वापि होमयेत् ।

[1] B : वेदी pour वेदि

[2] C : तं त्रिभागं तु . . तुङ्ग० ; E : तत्रिभागं तु . . . तुङ्गं ; F : तत्तिभागं तु तुङ्गोच्च मध्यं

[3] C, G : वेदाग्निं pour वेदाग्नि [4] C, G : ऊर्ध्वं pour उच्चं ; F : ऊर्ध्वं

[5] A : तुर्याग्रं ; B : तुर्याग्निं [6] A, B : धनुर्मूर्तिं [7] A, B : च pour वा [8] A : इन्द्रादैशान०

[9] Les vers qui donnent la définition du *jalādhivāsa* manquent dans les manuscrits. Nous donnons ici en note des passages correspondants d'autres āgama.

cf. *Kāmikāgama* I 32, 31-35 :

पश्चाच्छिल्पिनमुद्वास्य पुण्याहं वाचयेत्ततः । जलमध्ये प्रपां कुर्यात्सर्वलक्षणसंयुताम् ।।
प्रक्षाल्य पञ्चगव्येन लिङ्गं चास्त्रेण देशिकः । शुद्धतोयेन गन्धाद्यैः संस्नाप्य च हृदार्चयेत् ।।
वस्त्रयुग्मेन संवेष्ट्य लम्बकूर्चसमन्वितम् । जले तु शाययेल्लिङ्गं सद्येनैव कुशोपरि ।।
त्रिरात्रं द्व्येकरात्रं वा वेदयामावसानकम् । प्रभूतपञ्चगव्येन स्नपनं वा समाचरेत् ।।
परितः कलशानष्टौ लोकपालाधिदैवतान् । सवस्त्रान्सहिरण्यांश्च ससूत्रान्सापिधानकान् ।।

cf *Kāraṇāgama* I 135, 26b-30a :

ततः शिल्पिनमुद्वास्य पुण्याहं तत्र कारयेत् । जलमध्ये प्रपां कुर्यात्सर्वालंकारसंयुताम् ।।
प्रक्षाल्य पञ्चगव्यैश्च लिङ्गं चास्त्रेण देशिकः । शुद्धतोयेन संस्नाप्य गन्धादिभिर्हृदार्चयेत् ।।
वेष्टयेद्वस्त्रयुग्मेन लम्बकूर्चसमायुतम् । जलेषु शाययेल्लिङ्गं सद्येनैव कुशोपरि ।।
त्रिरात्रं चैकरात्रं वा वेदयाममथापि वा । जलाधिवासनं कुर्यात्कण्ठमात्रजलेषु च ।।

cf *Suprabhedāgama* I 26, 24b-25a, 28b:

पीठस्य मध्यमे न्यस्त्वा कण्ठमात्रे जले तथा । त्रिरात्रमेकरात्रं वा जले चैवाधिवास्य च ।।
उषितं लिङ्गम्"

[शयनाधिवासः, कुम्भस्थापनं च[1]]

पर्यग्निकरणं कृत्वा पुण्याहं कारयेत्ततः । स्थण्डिलं शालिभिः कृत्वा [2]तण्डुलैः समलंकृतम् ॥ १६ ॥

---

cf. *Sūkṣmāgama* 58, 20b-21 :

बालबिम्बं समादाय जले चैवाधिवासयेत् । पञ्चरात्रं त्रिरात्रं वा एकरात्रमथापि वा ॥
यामं वा चार्धयामं वा जले स्नानमथापि वा ।

[1] Cf. *Kāmikāgama* I 32, 36-51:

ब्राह्मणान्भोजयेत्तत्र मण्डपे समलंकृते । वास्तुहोमं ततः कुर्यात्प्रासादे मण्डपेऽपि वा ॥
पर्यग्निकरणं कृत्वा वास्तुहोमस्थवह्निना । जलादानीय लिङ्गं तु स्थानश्चभ्रोपरि न्यसेत् ॥
वस्त्रं विसृज्य लिङ्गे तु पूर्ववच्छुद्धिमाचरेत् । कौतुकं बन्धयेद्धीमान्हृदयेन तु मन्त्रतः ॥
वस्त्रेण वेष्टयेल्लिङ्गं वामदेवेन देशिकः । शालिभिर्वेदिकामध्ये अष्टद्रोणार्धनिर्मितैः ॥
तण्डुलैश्च तिलैर्दर्भैः पुष्पैश्च सुपरिस्तरेत् । शयनं कल्पयेन्मध्ये चर्मजाद्यैरनुक्रमात् ॥
सर्वातोद्यसमायुक्तं स्तोत्रमङ्गलवाचकैः । सर्वलक्षणसंयुक्तस्त्वादिशैवः सशिष्यकः ॥
दिव्यगन्धानुलिप्ताङ्गः पुष्पमालाविभूषितः । शुक्लवस्त्रश्च सोष्णीषः शुक्लवस्त्रोत्तरीयकः ॥
पञ्चाङ्गभूषणोपेतः सकलीकृतविग्रहः । ईदृशैर्लक्षणैर्युक्तस्त्वाचार्यश्चोत्तराननः ॥
वेद्यूर्ध्वे शाययेल्लिङ्गं प्राक्शिरस्कमधोमुखम् । अभ्यर्च्य हृदयेनैव गन्धाद्यैरुपचारकैः ॥
द्रोणाम्बुपूरितं सूत्रवेष्टितं कूर्चसंयुतम् । पञ्चरत्नसमायुक्तं सापिधानं सवस्त्रकम् ॥
शिवकुम्भं न्यसेत्तस्य मूर्ध्निदेशे तु वर्मणा । वर्धनीं वामतः स्थाप्य सूत्रकादिभिरन्विताम् ॥
शिवमन्त्रं न्यसेद्धयात्वा देवदेवं सदाशिवम् । अष्टत्रिंशत्कलोपेतं पूजयेन्मूलमन्त्रतः ॥
पूजयेत्तु स्वमन्त्रेण वर्धनीं तु मनोन्मनीम् । मुकुलीं पद्ममुद्रां च लिङ्गमुद्रां प्रदर्शयेत् ॥
अभितस्तु घटानष्टौ द्रोणार्धोदकपूरितान् । सूत्रादिभिः समोपेतान्हेमटङ्कसमायुतान् ॥
इन्द्रादिषु क्रमेणैव स्थापयेद्देशिकोत्तमः । अनन्तादिशिखण्डयन्तान्स्वस्वमन्त्रैर्घटेषु च ॥
विन्यस्य गन्धपुष्पाद्यैर्नैवेद्यान्तं हृदार्चयेत् । परिवारघटानष्टौ चोपवेद्युपरि न्यसेत् ॥

cf. *Sūkṣmāgama* 58, 17b-25a :

गोमयालेपनं तत्र भूसुरान्भोजयेत्ततः । वास्तुहोमं ततः कृत्वा पर्यग्निकरणं नयेत् ॥
पुण्याहप्रोक्षणं कुर्यान्मण्डपं संप्रपूजयेत् । वेद्यूर्ध्वे स्थण्डिलं कृत्वा चाष्टद्रोणैश्च शालिभिः ॥
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि । लाजैः पुष्पैः परिस्तीर्य शयनं संप्रकल्पयेत् ॥
बालबिम्बं समादाय जले चैवाधिवासयेत् । पञ्चरात्रं त्रिरात्रं वा एकरात्रमथापि वा ॥
यामं वा चार्धयामं वा जले स्नानमथापि वा । कौतुकं बन्धयेद्विद्वाञ्शयने चाधिवासयेत् ॥
नवकुम्भान्समादाय तन्तुना वेष्टयेद्बुधः । क्षालयेदस्त्रमन्त्रेण जलेनैव तु पूरयेत् ॥
सहिरण्यं सवस्त्रं च सकूर्चं पल्लवान्वितम् । कुम्भान्विन्यस्य वेद्यूर्वे पूजयेद्देशिकोत्तमः ॥
मध्यकुम्भे शिवं यष्ट्वा वर्धन्यां च मनोन्मनीम् । अभितः कलशानष्टौ विद्येशावरणान्यजेत् ॥

[2] A : तण्डुलैश्च समं करेत् ; B : तण्डुलैश्च समं कुरु ; C, F, G : तण्डुलैः समलंकृते

अर्चयित्वा तु गन्धाद्यैः [1]पञ्चब्रह्मेण मन्त्रतः । [2]अण्डजाद्यैः सुसंस्तीर्य[3] प्रोक्षयेद्घोरमन्त्रतः ॥ १७ ॥
लिङ्गं [4]गव्यैः कुशाद्भिश्च क्षालयेद्धृदयेन तु । [5]कूर्चवस्त्रसमायुक्तं गन्धैः पुष्पैरलंकृतम्[6] ॥ १८ ॥
शयने शाययेल्लिङ्गं प्राक्शिरश्चोर्ध्ववक्त्रकम् । [7]शिरोऽन्ते शिवकुम्भं तु वस्त्रकूर्चसमन्वितम् ॥ १९ ॥
[8]पञ्चरत्नसमायुक्तं [9]सूत्रयुक्तं सुपूरितम् । नानागन्धसमायुक्तं सापिधानं निधापयेत् ॥ २० ॥
वर्धनीं तस्य सौम्ये तु[10] तद्वदेव विशेषतः । परितश्च[11] घटानष्टौ विन्यसेत्सहिरण्यकम् ॥ २१ ॥
[12]सवस्त्रं कूर्चसंयुक्तं [13]सतोयं गन्धसंयुतम् । [14]पद्ममुद्रां प्रदर्श्याथ [15]लिङ्गमुद्रां प्रदर्शयेत् ॥ २२ ॥
[16]शिवं ध्यायेच्छिवे कुम्भे गन्धादिभिस्समर्चयेत् । [17]वर्धन्यां चाप्युमां ध्यात्वा [18]विद्येशानावृते घटे ॥ २३
ध्यात्वा गन्धादिभिः पूज्य [19]तत्तन्मूलमुदाहरेत् । [20]दिशास्वध्ययनं कुर्याद्ऋग्यजुस्सामाथर्वणः ॥ २४ ॥

---

[1] La forme grammaticale correcte est पञ्चब्रह्मणा ; mais le mètre ne serait pas respecté. La meilleure lecture semble être पञ्चब्रह्माख्यमन्त्रेण.

[2] Pour अण्डजादि voir *Rauravāgama, kriyāpāda, paṭala* 28 *śloka* 39b-40 et *Ajitāgama paṭala* 18 *śloka* 117–121.

[3] A : अण्डजाद्यैस्तु तत्तीर्य

[4] A, B, C, G : गव्यकुशाद्भिश्च

[5] A : कूर्चं चैव pour कूर्चवस्त्र ; B : कूर्चेनैव

[6] A : अलंकरेत् ; F : अलंकृते

[7] A, F : शिरोन्तिके pour शिरोन्ते ; C : शिरोन्त्ये

[8] Pour पञ्चरत्न voir *Ajitāgama, paṭala* 22, *śloka* 49b-50a

[9] A : सूत्रयुक्ताम्बुपूरितान् ; B : सूत्रयुक्तं प्रपूरितम् ; सूत्रयुक्त्याम्बुपूरितम्

[10] A : च pour तु

[11] A : तु pour च

[12] B : सवस्त्रकूर्चं

[13] A : सतोयं सहिरण्यकम् ; B : सतोयं च सरत्नकम्

[14] Pour la पद्ममुद्रा voir *Ajitāgama, paṭala* 27 *śloka* 16-17

[15] Pour la लिङ्गमुद्रा voir *Ajtāgama, paṭala* 27, *śloka* 23-25

[16] B : शिवकुम्भे शिवं ध्यायेद्

[17] A, B : वर्धन्यां तु उमां

[18] A : विद्येशानामृते घटे

[19] A : तत्तद्ब्रह्ममुदाहरन् ; B : तत्तन्मूलमुदाहरन्

[20] Cf. *Kāmikāgama* I 32.35 :

ऋगाद्यध्ययनं कुर्युः संस्कृता वेदवित्तमाः । एकं वा सर्ववेदांश्च पठेत्स्वस्वदिशि स्थिताः ॥
तदभावे त्वजाताद्या जप्तव्या मूर्तिपैः सह । सद्योजातस्तु ऋग्वेदो वामदेवो यजुः स्मृतः ॥
अघोरः सामवेदस्तु अथर्वः पुरुषः स्मृतः । अष्टोत्तरशहस्रं वा तदर्धं वा तदर्धकम् ॥
अष्टोत्तरशतं वापि जपेद्वैदिकसिद्धये । मूर्तिधारायलाभे तु देशिकः सर्वमाचरेत् ॥

[1]पञ्चब्रह्म [2]शिवस्याङ्गं [3]क्षुरिकाबीजमुख्यकम् । कोणेष्वध्ययनं कुर्याच्छिवव्रत[4]शिवद्विजाः ॥ २५ ॥

[होमः[5]]

ततो होमं प्रकुर्वीत पञ्चसंस्कारपूर्वकम् । समिदाज्यचरूँल्लाजान् [6]सक्तुबिल्वतिलांस्तथा[7] ॥ २६ ॥
[8]सर्षपांश्च यव[9]व्रीहीन्कदलीफलमेव च । हृदादीशानपर्यन्तैः[10] प्रत्येकं तु शताहुतिः ॥ २७ ॥
[11]व्याहृतीश्च ततो हुत्वा बीजमुख्येन संस्पृशेत् । क्षुरिकेण ततो हुत्वा द्रव्यान्ते पञ्चविंशतिः ॥ २८ ॥

---

[1] **पञ्चब्रह्म**मन्त्राः-ओं हों ईशानमूर्धाय नमः, ओं हें तत्पुरुषवक्त्राय नमः, ओं हुं अघोरहृदयाय नमः, ओं हिं वामदेवगुह्याय नमः, ओं हं सद्योजातमूर्तये नमः

[2] **शिवस्याङ्गमन्त्राः**—ओं हां हृदयाय नमः, ओं हीं शिरसे नमः, ओं हूं शिखायै नमः, ओं हैं कवचाय नमः ओं हौं नेत्रेभ्यो नमः, ओं हः अस्त्राय नमः ।

[3] क्षुरिकाबीजम्—ओं शिं छिं क्षुरिकास्त्राय फट् । [4] B : शिवमन्त्र pour शिवव्रत

[5] Cf. *Kāraṇāgama* I 135, 50-56 :

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् । खादिराश्वत्थ बिल्वाश्वोदुम्बरश्च वटस्तथा ॥
मायूरार्कपलाशाश्च पूर्वादिसमिधः क्रमात् । पलाशश्च प्रधानस्य सर्वेषामिध्ममुच्यते ॥
समिदाज्यान्नसिद्धार्थं तिललाजयवांस्तथा । सक्तुं माषं च शालिं च वैणवं च क्रमेण तु ॥
सद्यादीशानपर्यन्तं मन्त्रैरेवं क्रमाच्चरेत् । शतमर्धं तदर्धं वा प्रत्येकं होममाचरेत् ॥
द्रव्यं प्रति विशेषेण व्याहृत्याहुतिमाचरेत् । त्रयम्बकेण मन्त्रेण हुत्वा स्पृष्ट्वा तु लिङ्गकम् ॥
आपो राजेतिमन्त्रेण हुत्वा लिङ्गं स्पृशेत्ततः । पूर्णाहुतिं च शिरसा स्विष्टमग्नेति होमयेत् ।
स्तोत्रमन्त्रजपध्यानै रात्रिशेषं व्यपोहय च ॥

cf. *Suprabhedāgama* I 26, 37b-42b :

नव पञ्च तथा त्रीणि एकहोममथापि वा । कृत्वाग्निमुखसंस्कारं पूर्वोक्तविधिना ततः ॥
खदिरं वटबिल्वौ च प्लक्षाश्वत्थावुदुम्बरम् । शमीवैकङ्कतं चैव समित्पूर्वादितः क्रमात् ॥
पलाशस्तु प्रधानस्य होमयेद्धृदयेन तु । औदुम्बरसमिद्भिर्वा सर्वेषां चैव कारयेत् ॥
समिदाज्यान्नकैर्मन्त्रैर्होमं कृत्वा पृथक् पृथक् । समिधं हृदयेनैव मूलेनैव घृतं हुनेत् ॥
शिवगायत्रिमन्त्रैश्च चरुं हुत्वा विशेषतः । स्पर्शाहुतिं शिवाङ्गेन हुत्वाङ्गानि च संस्पृशेत् ॥
शिवाग्नियजनं कुर्यात्समिदाज्यान्नलाजकैः । माषशालितिलैर्विद्वान्हुत्वा सद्याच्छिरोऽन्तिकम् ॥
खादिरं बिल्वमश्वत्थं पालाशं वह्निशाखिकम् । पूर्वादिषु चतुर्दिक्षु समिद्धोमं प्रकल्पयेत् ॥
आग्नेय्यां वटवृक्षं स्यान्नैर्ऋत्यां प्लक्षशाखया । औदुम्बरं वायुदेशे त्वर्कमीशानगोचरे ॥
औदुम्बरसमिद्भिर्वा सर्वहोमं समाचरेत् । द्रव्यं प्रति विशेषेण पूर्णाहुतिमथाचरेत् ॥
सर्वद्रव्यैः सकृद्धुत्वा हव्यवाहेति मन्त्रतः ॥ रात्रौ जागरणं कुर्यात् ”

[6] A : सक्थुं pour सक्तुं [7] B : तिलैः सह pour तिलांस्तथा [8] B : सर्षपैश्च
[9] B, C, E : व्रीहि pour व्रीहीन [10] A : पर्यन्ते pour पर्यन्तैः ; B : पर्यन्तं [11] A : व्याहृतिं च

पूर्णाहुतिस्तु कर्तव्या कवचेन तु मन्त्रतः । [1]प्रासादाभ्यन्तरे पूर्वं वास्तुहोमं [2]समाचरेत् ॥ २९ ॥

[वास्तुहोमः[3]]

स्थण्डिलं पांसुभिः कुर्याद्धस्तमात्रप्रमाणतः । संप्रोक्ष्य [4]व्योमव्याप्याग्निं हृदयेनैव निक्षिपेत् ॥ ३० ॥
समिधो [5]हृदयेनैवाप्याज्यं वै शिरसा विदुः । चरुं वै [6]शिखया हुत्वा प्रत्येकं तु शताहुतिः ॥ ३१ ॥
ततो ब्रह्मादिदेवानां पापराक्षसिकान्तकम् [7] । पूजयेद्गन्धपुष्पाद्यैः [8]स्वस्वनाम्नैव मन्त्रतः ॥ ३२ ॥
स्वस्वानम्नैव मन्त्रेण [9]प्रतिसप्ताहुतिं चरेत् । ततः पूर्णाहुतिं कुर्यात्पर्यग्निकरणं ततः ॥ ३३ ॥

[अधिवासानन्तरकृत्यम्[10]]

एवं जागरणं रात्रौ प्रभाते स्नानमाचरेत् ।

---

[1] A : प्रादादाभ्यन्तरे पूर्वं ; B : पादादारभ्य पूर्वे वा [2] C, E, F : तु कारयेत्

[3] Cf. *Aṃśumadāgama* 7, 24-34a:
बलिमण्डलपूर्वे तु अग्निकार्यं समाचरेत् । आधानादि विवाहान्तमग्निकार्येण मार्गतः ॥
वह्निमध्ये विशेषेण कल्पयेदासनं क्रमात् । ब्रह्मादिवास्तुदेवानां समभ्यर्च्य विशेषतः ॥
दशाहुतिं प्रधानस्य अन्येष्वेकैकमाहुतिम् । पलाशसमिधेनैव हुत्वा ब्रह्मादिमन्त्रतः ॥
त्रयाधिकं च पञ्चाशद्देवानां स्वस्वनामतः । घृतं तत्संख्यया हुत्वा चरुं तत्संख्यया तथा ॥
तण्डुलं तिलमिश्रेण हुत्वा तत्संख्यया बुधः । द्रव्यान्ते व्याहृतिं हुत्वा महास्त्रेण शतं हुनेत् ॥
सर्वद्रव्यं तु संगृह्य स्विष्टकृद्धोममाचरेत् । जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
समिदाहुतिं च जुहुयाद्व्याहृतिभिश्च होमयेत् । यदस्य कर्मणश्चेति हुनेत्पूर्णाहुतिं पुनः ॥
अश्वत्थोदुम्बरान्ब्रह्मपत्राञ्शुष्कान्सदर्भकैः । तद्वास्तु शोधयेद्वह्ना सिद्धार्थं तिलसंयुतम् ॥
वह्निस्थं च पदस्थं च कुम्भस्थं हृदये यजेत् । तद्वास्तुशोधनं कृत्वा संप्रोक्ष्य हृदयेन तु ॥
तदग्ने वह्निमारोप्य संप्रज्वाल्याग्निबीजतः । प्राकारनगरादीनां भवनं यागमण्टपम् ॥
जयघण्टारवोपेतं पर्यग्निकरणं कुरु ।
voir aussi *Ajitāgama, paṭala* 8, *śloka* 35-33.

[4] La forme grammaticale correcte est व्योमव्यापिन्या ; mais le mètre ne serait pas respecté.

[5] A : हृदयेनैव आज्यं [6] A, B : शिरसा [7] A, B, C : अन्तिकम् pour अन्तकम्

[8] A : स्वस्वनाम्नैवमन्ततः ; C : स्वनाम्नैव तु मन्त्रतः ; E, F : स्वनामेनैव मन्त्रतः

[9] Il semble qu'une meilleure lecture pourrait être प्रतिसप्ताहुतीश्चरेत् au lieu de प्रतिसप्ताहुतिं चरेत्

[10] cf. *Kāmikāgama* I 32, 62b–70a :
अपरे दिवसे धीमान्स्नातो मूर्तिपैः सह । सकलीकृतदेहस्तु द्वारद्वाराधिपान्यजेत् ॥
संपूज्य देवकुम्भाग्नीन्कुण्डमस्त्रेण चार्चयेत् । संस्कृत्य स्रुक्स्रुवाभ्यां तु ब्रह्मादीन्परिधौ यजेत् ॥
पूर्णाहुतिं ततो दत्त्वा मन्त्रानावाह्य तर्पयेत् । प्रायश्चित्तास्त्रमन्त्रैस्तु होमं सम्यक्समाचरेत् ॥
अघोरेण शतं हुत्वा जयाद्यैर्दुरितक्षये । पूर्णाहुतिं ततः कुर्याद्देशिको मूर्तिपैः सह ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः । अधमा पञ्चनिष्कं वा द्विगुणा मध्यमा भवेत् ॥

भस्मस्नानं ततः [1]कुर्यात्सकलीकृतविग्रहः ॥ ३४ ॥
लिङ्गं च कलशं चाग्निं गन्धपुष्पादिभिर्यजेत् । जयादिरभ्याधानं च[2] [3]राष्ट्रभृच्चैव होमयेत् ॥ ३५ ॥
आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः । दैवज्ञं पूजयेत्तत्राप्यध्येतॄन् पूजयेत्ततः[4] ॥ ३६ ॥

[बाललिङ्गस्थापनम्, कुम्भाभिषेकश्च[5]]

गर्भगेहे[6] तु पुण्याहं [7]कारयेत्प्रोक्षयेत्तदा । पीठमध्ये हिरण्यं तु विन्यसेद्धृदयेन तु ॥ ३७ ॥

त्रिगुणा चोत्तमा प्रोक्ता त्वधमत्रयकल्पने । द्विगुणा मध्यमे कल्पे त्रिगुणा चोत्तमे भवेत् ॥
दशभागैकभागं तु मूर्तिधारकदक्षिणा । तदर्धं मन्त्रजप्तॄणां वैदिकानां तु तत्समम् ॥
दैवज्ञे तत्समं विद्याद्द्विगुणं वास्तुहोमिनः । आचार्यस्य चतुर्थांशाच्छिल्पिने दक्षिणा मता ॥

cf *Suprabhedāgama*, I 26, 42b-43 :

प्रभाते विमले होमं कृत्वा पूर्णां शिवेन तु । आचार्यं पूजयित्वा तु मूर्तिपानथ पूजयेत् ॥
दैवज्ञं पूजयित्वा तु अध्येतॄन्परिचारकान् ।

cf. *Sūkṣmāgama* 58, 30b-41a :

" प्रभाते स्नानमाचरेत् ।
तोरणान्कलशान्कुम्भान्यजेत्तु पूर्ववर्त्मना । अग्निमभ्यर्च्य गन्धाद्यैर्हुत्वा चित्रादिमन्त्रतः ॥
यदस्य कर्ममन्त्रेण पूर्णाहुतिमथाचरेत् ॥

[1] B : कृत्वा pour कुर्यात्　[2] A : अभ्युधानैश्च pour अभ्याधानं च ; C, F, G : अभ्याधानैश्च
[3] B : राष्ट्रभृच्च हुनेत्क्रमात्　[4] B : अध्येतारं च पूजयेत्
[5] cf. *Kāraṇāgama* I 135, 62b-76:

मुहूर्तनाडिकापूर्वं लिङ्गस्थापनमारभेत् । उत्थाप्य शयनाल्लिङ्गं बालस्थानं प्रवेशयेत् ॥
पीठस्यावटके देशे नवरत्नानि विन्यसेत् । स्थापयेत्पिण्डिकामध्ये ईशानेन तु पूजयेत् ॥
लिङ्गायामं त्रिधा कृत्वा भागं पीठे प्रदर्शयेत् । स्थापने तु विशेषेण लिङ्गं तु द्वारदिङ्मुखम् ॥
शर्करासर्जचूर्णं च समं संग्राह्य देशिकः । माहिषं नवनीतं च यथायुक्तया तु योजयेत् ॥
प्रक्षिप्योलूखले धीमान्विवरे तस्य योजयेत् । मुहूर्ते समनुप्राप्ते गुरवे संनिवेदयेत् ॥
शङ्खदुन्दुभिनादैश्च गीतनृत्तसमाकुलम् । ब्रह्मघोषसमायुक्तं नानाभक्तजनैर्युतम् ॥
छत्रध्वजवितानैश्च वीणापटहनादयुक् । ढक्कापणववाद्यैश्च घटमर्दलनादयुक् ॥
झल्लरीजर्झरीनादैर्धूपदीपसमायुतम् । वर्धनीस्रावसहितं मङ्गलाङ्कुरसंयुतम् ॥
कुम्भानुद्धृत्य शिरसा बाह्यधामप्रदक्षिणम् । कृत्वा तु गर्भगेहे तु स्थापयेत्स्थण्डिलोपरि ॥
आसनं कल्पयेत्तत्र पूर्वोक्तविधिना सह । अष्टत्रिंशत्कलान्यासं कृत्वा लिङ्गं विशेषतः ॥
ध्यायेत्सदाशिवं तत्र ईशानेनार्चयेद्बुधः । कुम्भाद्बीजं समादाय लिङ्गमध्ये तु विन्यसेत् ॥
पिण्डिकायां न्यसेच्छक्तिबीजं लिङ्गस्य गोचरे । लिङ्गं कुम्भोदकैः स्नाप्य पिण्डिकां करकोदकैः ॥
अष्टविद्येश्वरांस्तत्र पीठे पूर्वादिषु न्यसेत् । अर्चनोक्तं समभ्यर्च्य शेषं युक्तया समाचरेत् ॥
परिवारघटेभ्यस्तु स्वस्थानेषु क्रमान्न्यसेत् । स्नपनं कारयेत्पश्चात्प्रभूतहविषं ददेत् ॥
नित्योत्सवादिकान्सर्वान्बालस्थाने तु कारयेत् ॥

गन्धैः पुष्पैश्च धूपैश्च [1]दीपैरघ्यैश्च पूजयेत् । [2]धर्मं ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम् ॥ ३८ ॥
[3]सिंहपादं तु [4]तत्रैवाप्यधर्माद्यलिका[5] न्यसेत् । [6]अनन्तासनादियोगान्तं [7]विष्टरैः कल्पयेद्बुधः॥ ३९ ॥
तदूर्ध्वं स्थापयेल्लिङ्गं सद्येनैव तु मन्त्रतः । स्थापितान्वेदिकायां तु कुम्भानानीय देशिकः ॥ ४० ॥
लिङ्गाग्रे स्थापयेत् [8]प्राग्वद् गन्धपुष्पादिभिर्यजेत् । [9]घृतशिरोऽर्पणं कुर्याद्धृदयेन तु देशिकः ॥ ४१ ॥
[10]कुम्भादेवं समानीय मूलमन्त्रमनुस्मरन् । योजयेल्लिङ्गमध्ये[11] तु [12]हृदयेन समन्वितम् ॥ ४२ ॥
[13]वर्धन्या गौरीमादाय पिण्डिकायां तु वामके । अनन्तादिशिखण्डयन्त [14]प्रागाद्यावरणं न्यसेत् ॥ ४३
पञ्चब्रह्मशिवाङ्गैश्च [15]कुम्भाद्भिरभिषेचयेत् । [16]गौरीगायत्रिमन्त्रेण [17]गौरीं पीठेऽभिषेचयेत् ॥ ४४ ॥
अनन्तादिशिखण्डयन्तांस्तन्मन्त्रेणाभिषेचयेत्[18] । अर्चनोक्तं समभ्यर्च्य परिवारगणैः सह ॥ ४५ ॥
एवं तु विधिना कुर्यात्प्रथमं तरुणालयम् ।

---

cf. *Sūkṣmāgama* 58, 30b-40a, 41b:

शङ्खध्वनिसमायुक्तं ब्रह्मघोषसमन्वितम् । छत्रचामरसंयुक्तं वाद्यध्वनिसमन्वितम् ॥
बालबिम्बसमोपेतं प्रदक्षिणमथाचरेत् । बालगर्भगृहं गत्वा पुण्याहं वाचयेत्ततः ॥
मुहूर्ते समनुप्राप्ते स्थापयेद्बालमूर्तिनम् । अष्टबन्धं त्रिबन्धं वा योजयेत्पीठरन्ध्रके ॥
शिवकुम्भं समादाय कृत्वा धामप्रदक्षिणम् । विन्यस्य बालबिम्बाग्रे स्थण्डिलोर्ध्वे विचक्षणः ॥
मन्त्रन्यासं ततः कृत्वा चलमार्गेण मन्त्रवित् । कुम्भाद्देवं समादाय लिङ्गमध्ये प्रकल्पयेत् ॥
कुम्भोदकेन संस्नाप्य पायसान्नं निवेदयेत् । स्थापितैः सर्वकलशैरभिषिच्येन्दुशेखरम् ॥
नैवेद्यं दापयेद्विद्वान्पानीयाचमनं ददेत् । पीठान्तं वा वृषान्तं वा बलिदानं समाचरेत् ॥
धूपदीपं ततो दत्त्वा ताम्बूलं दापयेद्बुधः । नृत्तगीतादिभिस्तोष्य प्रणम्य परमेश्वरम् ॥
बालालिङ्गविधिस्त्वेवम्"

[6] A : गर्भगेहं [7] B : कृत्वा pour कारयेत्

[1] A : अर्घ्यैश्चापूजयेत्ततः ; B : अर्घ्यैः संपूजयेत्ततः [2] B : धर्मे pour धर्मं [3] C : सिंहे पादं
[4] C, G : तत्रैव अधर्मं तु दले न्यसेत् ; F : तत्रैव अधर्मादि दलान्यजेत्
[5] Pour plus de détails au sujet de l'आसन voir *Rauravāgama*, vol. I, p. 38-39.
[6] B : अनन्तासादि [7] A : विष्टरे
[8] C : पश्चाद् pour प्राग्वद् [9] A, B : घृतं शिरोऽर्पणं [10] C : कुम्भादेर्देवमानीय
[11] F : मूर्ध्नि pour मध्ये [12] C, F, G : सद्येनैव तु मन्त्रतः
[13] A : वर्धन्यां गौरीमाशाय ; B : गौरीमादाय वर्धन्यां ; C, F, G : वर्धन्यां गौरिमादाय
[14] F : प्रागाद्यावरणान् यजेत् [15] B : ब्रह्माद्भिः ; pour कुम्भाद्भिः C : कुम्भाद्यैः
[16] C : गौरि pour गौरी ; **गौरीगायत्री** = ओं महादेव्यै च विद्महे रुद्रपत्नी च धीमहि । तन्नो गौरी प्रचोदयात्
[17] B ; F : गौरीपीठे pour गौरीं पीठे ; गौरी ici est un terme technique pour le mot वर्धनी
[18] C, F, G : मन्त्रेणैवाभिषेचयेत् pour तन्मन्त्रेणाभिषेचयेत्

[द्वितीयतरुणालये विशेषः[1]]

प्रासादे पतिते भिन्ने पीठे स्थानादिभिन्नके[2] ॥ ४६ ॥
एवमादिसमुत्पन्ने द्वितीयं तरुणालयम् । पूजाभागसमोत्सेधं[3] बाललिङ्गोदयं भवेत् ॥ ४७ ॥

---

[1] cf. *Kāmikāgama* I 32, 85-94a :

" विशेषः कश्चिदस्ति हि ।
द्वितीये स्थापनार्हस्तु पूर्ववत्रौ मुनीश्वराः । मूलगेहाग्रके तत्र पूर्ववत्स्थण्डिलोपरि ॥
कुम्भं तु स्थाप्य पूर्वोक्तविधिना देशिकाधिपः । मूललिङ्गं तु संपूज्य गन्धाद्यैर्हविषा सह ॥
प्रणम्य देवदेवेशं कर्ता कर्मविचक्षणः । एकवत्सरमारभ्य यावत्स्याद्दादशाब्दकम् ॥
तेष्वन्तरे नवीकृत्य पुनः संस्थापयाम्यहम् । इति विज्ञाप्य तत्कर्ता देशिकेन सहैव तु ॥
लिङ्गाद्देवं समावाहय कुम्भमध्ये न्यसेद्गुरुः । पीठाद्देवीं समावाहय वर्धन्या मध्यमे न्यसेत् ॥
तदग्रे स्थण्डिलं कृत्वा प्राग्वदग्निमुखं नयेत् । समिदाज्यान्नलाजैश्च तिलैरष्टोत्तरं शतम् ॥
मूलेन होमयेद्विद्वानङ्गानां च दशांशतः । त्रिर्मधुप्लुतदूर्वाभिर्मृत्युजिन्मन्त्रमुच्चरन् ॥
सहस्रं वा तदर्धं वा शतमष्टोत्तरं तु वा । एवं हुत्वा तदन्ते तु क्षणहोमं समाचरेत् ॥
वारैश्च रविपूर्वैश्च नक्षत्रैस्तुरगादिभिः । मेषादिमासकैश्चैव तिथिभिः प्रथमादिभिः ॥
जुहुयादेकया हुत्वा प्रतिवत्सरमाचरेत् । वत्सरे वत्सरे कार्यमथवान्ते समाचरेत् ॥
पूर्णाहुतिं ततो दत्त्वा देवे सर्वं समर्पयेत् । कुम्भानुद्धृत्य वेद्यां तु स्थापयेत्सर्वमङ्गलैः ॥
सकलानां तु सर्वेषां कर्तव्यं बालबिम्बकम् । प्रतिमायां तु कुम्भे वा पीठे वा चेष्टकामये ॥
परिवारेऽपि चैवं स्याद्बालबिम्बं प्रकल्पयेत् । अन्यत्सर्वं समानं स्यात्पूर्वेणैव समाहितः ॥

cf. *Suprabhedāgama* I 26, 2b-3 ; 14-19 ; 32b-34 ; 48b-49 :

पुनः प्रासादकरणे भिन्ने छिन्ने नवीकृते । यत्कृतं तद्द्वितीयाख्यं तरुणालयमुत्तमम् ॥
अन्यानि सर्वकर्माणि समानमिति भाषितम् ॥ . . . .
द्वितीये तरुणालये । पूजायामसमायामं त्रिपादं वार्धमेव वा ॥
आयामसदृशं नाहं लक्षणोद्धारणं विना । नतौ विष्णुविरिञ्चांशौ तच्छिरो मूललिङ्गवत् ॥
लिङ्गमेवं समापाद्य मूलगर्भार्धमानतः । त्रियंशं वा चतुर्थांशं प्रोक्तं बालगृहं त्विह ॥
बालगेहान्तरे पीठं बाललिङ्गसमोन्नतम् । उच्छ्रायसमविस्तारं सावटं सप्रणालकम् ॥
लिङ्गयामं त्रिधा कृत्वा भागं पीठे निवेशयेत् । वृत्तं वा चतुरश्रं वा षोडशांशेन योजितम् ॥
रत्नन्यासं न कर्तव्यं पादशैलादिकानि च । प्रतिलिङ्गं न कर्तव्यं सूत्रं चैव तथा भवेत् ॥
मूललिङ्गे तु देवेशं द्वितीयश्चेत्समावदेत् । विज्ञाप्य देवदेवेशं क्षणकालं विचक्षणः ॥
एकाब्दाद्दादशाब्दान्तं बालस्थाने स्थिरो भव । एतयोरब्दयोर्मध्ये कुर्यान्मूलप्रवेशनम् ॥
विज्ञापयेद्द्वितीये तु चाद्ये विज्ञापनं विना । . . .
.....द्वितीये तरुणालये । बल्यन्तं पूजयेन्नित्यमुत्सवं न समाचरेत् ॥
बालस्थानविधिः प्रोक्तः"

[2] A : स्थाप्वादिभिन्नके ; B : स्थानादिहीनके ; C : स्थलादिभिन्नकैः ; G : स्थलविभिन्नके

[3] A, B : समुत्सेधं pour समोत्सेधं

[1]तत्तुङ्गसदृशं नाहं सुवृत्तं [2]छत्रशीर्षकम् । [3]तन्नाहसदृशं [4]पीठविस्तारं चोदयं समम् ॥ ४८ ॥
[5]शेषं प्रागिव कर्तव्यं सकलेऽपि तथैव च । [6]द्वितीयस्थे घटस्थे वा [7]मासान्ते तु नवीकृते ॥ ४९ ॥
नित्यनैमित्तिकं सर्वं कर्तव्यं तरुणालये । द्वादशाब्दात्तु पुरतो [8]मूलगेहं प्रवेशयेत् ॥ ५० ॥

[बाललिङ्गविसर्जनम्[9]]

तरुणाख्यं विसृज्याथ दारुमन्नौ निधापयेत् । शैलजं तरुणं लिङ्गं समुद्रे तु निधापयेत् ॥ ५१ ॥
तद्बाललिङ्गं [10]संगृह्य न स्थाप्यं मूललिङ्गके । कृतं चेद्राज[11]राष्ट्रं च ग्रामं [12]नश्यत्यसंशयः ॥५२॥
तस्मात्सर्वप्रयत्नेन बाललिङ्गं विसर्जयेत् ॥ ५३ ॥

इति [13]श्रीमद्रौरवतन्त्रे [क्रियापादे] [14]बाललिङ्गस्थापनविधिर्नाम सप्तविंशः पटलः

---

[1] A : उत्तुङ्ग pour तत्तुङ्ग [2] A, B : च त्रिशीर्षकम्
[3] B : तद्दीर्घ pour तन्नाह [4] C : पीठं pour पीठ
[5] cf. *Kāraṇāgama* I 135, 91-97a:
सकलानां तु सर्वेषां कर्तव्या बालबिम्बके । दारुणा प्रतिमा वापि पीठं वा चेष्टकामयम् ॥
जान्वन्तं कन्यसं प्रोक्तं बाहून्तं मध्यमं भवेत् । तन्मानमुत्तमं प्रोक्तं बालबिम्बस्य कीर्तितम् ॥
षोडशाङ्गुलमानेन पीठं चेत्संप्रकल्पयेत् । विस्तारं तत्समं ज्ञेयं मेखलात्रयसंयुतम् ॥
एकैकं त्र्यङ्गुलं तारमुत्सेधं तु शराङ्गुलम् । वेदाङ्गुलेन पद्मोच्चं द्व्यङ्गुलं कर्णिकोच्छ्रयम् ॥
कारयेदिष्टकाभिश्च सुस्निग्धसुधया सह । द्वितीयस्योक्तवत्सर्वं कुर्वंस्तं षड्विशेषकम् ॥
प्रतिमां वाथ पीठं वा दैविके स्थापयेद्बुधः । मन्त्रभेदो भवेदत्र क्रियाभेदो न विद्यते ॥
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।
[6] A : द्वितीयस्थघटस्थं वा ; B : द्वितीयस्थं घटस्थं वा ; C : द्वितीयस्सघटस्थं वा
[7] A : वामान्ते [8] C : मूले गेहं
[9] cf. *Suprabhedāgama* I 36, 70b-71a :
तरुणं लिङ्गमुत्थाप्य शैवालौघे जले क्षिपेत् । दारुजं चाग्निना दग्धमथवाप्सु विनिक्षिपेत् ॥
[10] A, B, C, E, F, G : संग्राह्य [11] A : राजा pour राज
[12] A : नश्यत्यसंशयम् ; F : नश्यन्ति संशयः [13] B omet श्रीमद्रौरवतन्त्रे
[14] B : बाललिङ्गस्थापनं नाम एकोनत्रिंशः पटलः; C : बालस्थापनविधिर्नाम तृतीयः पटलः; F : बालस्थापनपटलस्तृतीयः

[अष्टाविंशः पटलः]

[लिङ्गस्थापनविधिः[1]]

[लिङ्गस्थापनफलम्[2]]

अतः परं प्रवक्ष्यामि लिङ्गस्थापनमुत्तमम् । सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ १ ॥
तत्फलं लभते तेन भोगमोक्षफलप्रदम्[3] । राजराष्ट्राभिवृद्धिश्च धनधान्यसुखावहम् ॥ २ ॥

[लिङ्गमानम्[4]]

नवाष्टसप्तहस्तं [5]चाप्युत्तम[6]त्रयमानकम् । षट्पञ्चचतुर्हस्तं च [7]मध्यमत्रयमुच्यते[8] ॥ ३ ॥
त्रिहस्तं द्व्येकहस्तं च [9]कन्यसत्रयमानकम् । प्रासादे गर्भगेहस्य विशालं नवधा [10]भजेत् ॥ ४ ॥

---

[1] Pour लिङ्गस्थापनविधि voir *Aṃśumatkāśyapa, paṭala* 51, 52 et 54, *Ajita, paṭala* 4, 16 et 18, *Kāmika* I 62 et 64 et II 35, 37 et 42, *Kāraṇa* I 9 et 59 et II 7 et 21, *Kiraṇa* III 21, 23 et 26, *Cintya, paṭala* 20, *Dipta, paṭala* 13, 14, 20 et 21, *Makuṭa, paṭala* 10, *Mataṅga-pārameśvara, kriyāpāda, paṭala* 39, *Yogaja, paṭala* 4, *Vira, paṭala* 61, *Santānasaṃhitā, paṭala* 19, *Suprabheda* I 33 et 36, *Sūkṣma, paṭala* 42 et *Svāyambhuva, paṭala* 51.

[2] Pour लिङ्गस्थापनफल voir *Ajitāgama, paṭala* 18, *śloka* 1a ; voir aussi *Mataṅgapārameśvara, kriyāpāda*, 39, 1-2 :

अथातः सर्वमन्त्रादेर्लिङ्गसंस्थापनं शुभम् । अस्मिन्संनिहितः क्षिप्रं फलं यच्छत्यनिन्दितम् ॥
भगवान्परमेशानो मन्त्राश्चामोघशक्तयः । स्वरूपाराधनाविष्टाः साधकस्य वरप्रदाः ॥

[3] B : फलादिकम् pour फलप्रदम्

[4] Pour लिङ्गमान voir *Ajitāgama. paṭala* 4 *śloka* 5-10; cf. *Kāraṇāgama*, I 9, 100-108a :

गर्भं विंशतिभागैश्च भजेद्दशाधमं भवेत् । रुद्रांशं मध्यमं ज्ञेयं रव्यंशं चोत्तमं भवेत् ॥
ज्येष्ठकन्यसयोर्मध्ये एतद्गर्भमिति स्मृतम् । विभजेदष्टधा गर्भं समं सूत्रविचक्षणः ॥
एवं कृते भवेद्यत्र नव लिङ्गानि सुव्रत । गर्भमानमिति प्रोक्तं हस्तमानमथ शृणु ॥
एकादि नवहस्तान्तं षडङ्गुलविवर्धनात् । आयास्तु त्रयस्त्रिंशत्संख्यया परिकीर्तिताः ॥
एकहस्तप्रमाणं तु हीनलिङ्गं न कारयेत् । पञ्चहस्तं समारभ्य हर्म्यमानं विशेषतः ॥
हस्तमानेन लिङ्गं तु कारयेद्दैशिकोत्तमः । एवं लिङ्गोच्छ्रयं प्रोक्तं वक्ष्ये लिङ्गस्य विस्तरम् ॥
लिङ्गस्योत्सेधमानार्धमष्टधा विभजेत्ततः । विष्कम्भः पञ्चभागः स्यादधस्ताच्चतुरश्रकम् ॥
अधस्ताच्चतुरश्रं तु ब्रह्मभागं तदुच्यते । अष्टाश्रं मध्यमे ज्ञेयं विष्णुभागं तदुच्यते ॥
ऊर्ध्वं सुवृत्तभागं तु रुद्रांशमिति कीर्तितम् ॥

[5] C, G : वा pour च

[6] A : उत्तमं pour उत्तम ; B : उन्नत

[7] A : मध्यमं pour मध्यम ; B : कन्यस

[8] B : त्रयमानकम् pour त्रयमुच्यते

[9] A : कन्यसं pour कन्यस

[10] A : भवेत्

श्रेष्ठान्तरकनिष्ठाशां[1]प्रत्येकं त्रित्रिमानकम् । एवं नवविधं ख्यातं लिङ्गमानं रुरो विदुः ॥ ५ ॥
[1]श्रेष्ठत्रीणि द्विजानां च नृपाणां चाभिवृद्धये । द्वयन्तराणि [2]विशां चैव शूद्राणां कन्यसश्रयम् ॥ ६ ॥
[3]परेषामपरं शस्तमपरेषां परं विना ।

[समखण्डलिङ्गम्[4]]

[5]लिङ्गोच्चे तु गुणांशे तु ब्रह्मविष्णवीश्वरान्तकम् ॥ ७ ॥
[6]तुङ्गं प्रत्येकभागेन [7]वेदाश्राष्टाश्रवृत्तकम् । ब्रह्माद्यानां क्रमात्कल्प्य [8]लिङ्गोच्चसमनाहकम् ॥ ८ ॥
भागत्रयेऽपि कर्तव्यं समखण्डं तदुच्यते ।

[वर्धमानलिङ्गम्[9]]

लिङ्गायामे चतुर्विंशद्भागं तत्र प्रकल्पयेत् ॥ ९ ॥
[10]पूजाभागो नवांशः स्यान्मध्ये त्वष्टांशमुन्नतम्[11] । अधस्तात्सप्तभागं तु [12]तेषां भूतांशतारकम्[13] ॥ १० ॥
[14]षोडशांशपरीणाहं वर्धमानमुदाहृतम् ।

---

[1] A : श्रेष्ठं त्रीणि [2] A : विशानां तु
[3] A, B : परेषां परमं शस्तं परेषां परमं विना
[4] cf. *Aṃśumatkāśyapa* 51, 122b-123:
लिङ्गायामत्रिभागे तु एकांशं चतुरश्रकम् । मध्ये व्योमं तु वस्वश्रमग्रे वृत्तं शिवांशकम् ॥
समलिङ्गमिति ख्यातं विप्रादीनां तु वृद्धिदम् ॥
cf. *Suprabhedāgama* 1 33, 83b-84:
चतुरश्रमधो भागमष्टाश्रं मध्यमं तथा । तदूर्ध्वं वृत्तमेवं स्यात्त्रिभागं सर्वतः समम् ॥
समलिङ्गमिति प्रोक्तम्"
voir aussi *Ajitāgama, paṭala* 4, *śloka* 34a
[5] A : लिङ्गोच्चं तु गुणोच्चं तु ; B : लिङ्गे चतुर्णांशे तु ; C : लिङ्गोनर्चगुणांशे तु ; F : लिङ्गं चतुर्गुणांशे तु
[6] B omet le *śloka* 8 ; C, G : तुङ्ग pour तुङ्गं
[7] C, G : वेदाश्च pour वेदाश्र
[8] C, G : लिङ्गोच्चाख्यमनाहकम् ; E : लिङ्गोचास्यमनाहकम् , F : लिङ्गोचख्यं मनाहकम्
[9] cf. *Kāraṇāgama* I 9, 118b-119a:
चतुष्पञ्चषडंशं तु पञ्चषट्सप्तभागिकम् । वर्धमानमिति प्रोक्तं विप्रादीनामनुक्रमात् ॥
cf. *Suprabhedāgama* I 33, 85-86a:
चतुर्विंशतौ चायामे सप्तांशं चतुरश्रकम् । अष्टाश्रमष्टभागेन नवांशेनैव वृत्तकम् ॥
वर्धमानमिदं लिङ्गम्"
voir aussi *Ajitāgama, paṭala* 4, *śloka* 34b
[10] A, B : पूजाभागं नवांशं [11] B : उत्तमम् pour उन्नतम् [12] B, C, G : तेषु pour तेषां
[13] C, F, G : भूतांशताष्टकम् [14] A : षोडशांशं pour षोडशांश

[शिवाधिकलिङ्गम्[1]]

[2]लिङ्गोच्चे तु कलांशे तु पञ्चपञ्चषडंशकैः[3]॥ ११ ।
[4]ब्रह्मविष्ण्वीश्वरांशोच्चं[5] [6]वेदांशं लिङ्गविस्तरम् । एवं [7]समासतः प्रोक्तं लिङ्गमेतच्छिवाधिकम्॥१२॥

[स्वस्तिकलिङ्गम्[8]]

[9]नन्दांशे द्व्यग्निवेदांशं स्वस्तिकं तदुदाहृतम् ।

[शिरोवर्तनम्[10]]

लिङ्गोदये चतुर्थांशं विशालं परिकीर्तितम् ॥ १३ ॥

---

[1] cf. *Kāraṇāgama* I 9, 119b-120:
सप्तसप्ताष्टभागं तु पञ्चपञ्चषडंशकम् । वेदवेदशरांशं तु गुणानलयुगांशकम् ।
एवं शिवाधिकं प्रोक्तं द्विजादीनां क्रमाद्गृहे ।
cf. *Suprabhedāgama* I 33, 86b-87 :
आयामं दशधा कृत्वा चतुरश्रं त्रिभागतः । अष्टाश्रं च त्रिभागेन चतुरंशेन वृत्तकम् ॥
शिवाधिकमिदं शस्तं भुक्तिमुक्तिप्रदं नृणाम् ।
voir aussi *Ajitāgama, paṭala* 4, *śl.* 35.

[2] B : लिङ्गे चतुःकलांशे तु ; C, F, G : लिङ्गाच्चतुष्कलांशे तु

[3] A, B, E : षडंगकैः pour षडंशकैः [4] C, G : विष्णुशर pour विष्ण्वीश्वर

[5] B : अंशाच्च pour अंशोच्चं [6] C, F, G : वेदाङ्गं [7] C, F, G : समांशतः

[8] cf. *Aṃśumadāgama* 51, 128b-129:
लिङ्गायामे नवांशे तु चतुरश्रं द्विभागधा । वस्वश्रं तु गुणांशेन वेदांशं वृत्तमुच्यते ॥
स्वस्तिकं ह्येवमाख्यातम् ”
voir aussi *Ajitāgama, paṭala* 4, *śl.* 36.

[9] A : नन्दांशेष्वग्निवेदांशं ; B : नन्दांशे त्वग्निवेदांशं

[10] cf. *Kāmikāgama* I 62, 52-61:
शिरोवर्तनमेतेषां वक्ष्ये तद्बहुधा मतम् । पुण्डरीकं विशालाख्यं श्रीवत्सं शत्रुमर्दनम् ॥
काष्ठांशके चतुर्भक्ते भागभागविवर्धनात् । भवन्ति पुण्डरीकादिभेदा भिन्नफलाप्तये ॥
पुण्डरीकाद्यशःप्राप्तिं विशालाद्विपुलां श्रियम् । प्राप्नोति सर्वान् श्रीवत्साद्विजयं शत्रुमर्दनात् ॥
कुक्कुटाण्डशिरोमूर्तिश्चतुर्थांशविवर्धनात् । प्रजावृद्धिकरं यस्मात्प्रजालाभं प्रजापतिः ॥
त्रिभागवर्धनादर्धचन्द्रं चन्द्रसमो यतः । प्राप्तमायुः परं प्राप्तलोकं सौभाग्यमुत्तमम् ॥
षड्भागवर्धनाद्भूतिनिमित्तं त्रपुषाकृतिः । साध्याः सिद्धाश्च मरुतो यस्माद्भूतिं परां गताः ॥
अथवान्यप्रकारेण शिरोवर्तनमुच्यते । अष्टधा विभजेत्तारमध्यर्धेन विवर्तनात् ॥
छत्रशीर्षमिति प्रोक्तं त्रपुषाभं निगद्यते । षडंशैः त्रपुषं वा स्यात्सार्धद्व्यंशेन वर्तनम् ॥
कुक्कुटाण्डशिरः प्रोक्तं विस्तारार्धप्रवर्तितम् । चन्द्रखण्डनिभं प्रोक्तं विस्तारत्र्यंशवर्तितम् ॥
बुद्बुदाभं शिरः सार्धत्र्यंशेनाष्टविभाजिते । एतानि सर्वलिङ्गानां सनातनशिरांसि हि ॥

विस्तारं तु त्रिधा कृत्वा द्विभागेन तु [1]वर्तितम् । अर्धचन्द्रं तु तत्प्रोक्तं [2]सर्वजात्यर्हकं भवेत् ॥ १४ ।

[लक्षणोद्धारः[3]]

[4]शिरसो [5]वर्तनं [6]प्रोक्तम् ; लक्षणोद्धारणं ततः । [7]पूजांशोच्चे कलांशे तु [8]द्व्यंशाधस्ताद्विसृज्य च ॥१५॥
नवांशं नालमित्युक्तमेकांशं मुकुलं भवेत् । एकांशं तु त्रिधा कृत्वा [9]द्व्यंशं नालस्य विस्तृतम् ॥ १६ ॥

---

cf. *Suprabhedāgama* I 33, 122b-127:

शिरसो वर्तनं कार्यं तच्चतुर्विधमुच्यते । छत्राकारं तु पूर्वं च द्वितीयं त्रपुषाकृतिः ॥
कुक्कुटाण्डं तृतीयं तु चतुर्थं त्वर्धचन्द्रकम् । कृत्वा तारं तु षड्भागं लिङ्गस्य च शिरस्त्वथ ॥
भागेन वर्तनं कृत्वा यावन्निम्नं तु मध्यमम् । छत्राकारमिदं प्रोक्तं सर्वसिद्धिप्रदायकम् ॥
तारं कृत्वा तु षड्भागं द्विभागार्धेन वर्तितम् । त्रपुषाकृतिरेवं स्याद्भुक्तिमुक्तिफलप्रदम् ।
कुक्कुटाण्डं तु तत्रैव विस्तारार्धेन वर्तितम् । लिङ्गतारं त्रिधा कृत्वा द्विभागेन तु वर्तितम् ॥
अर्धचन्द्रमिदं तत्र भुक्त्यर्थं प्रोच्यते क्रमात् ॥

voir aussi *Ajitāgama, paṭala* 4 *śl.* 39b-47.

[1] **C** : वर्धितम्

[2] **A** : सर्वमृद्यमहं भवेत् ; **B** : सर्वमृद्यं महाभवेत् ; **C, G** : सर्वजात्यसकं भवेत्

[3] Cf. *Cintyāgama*, 20, 49b–61 ; 64a :

प्रभाते सूत्रविन्यासं मुमुहूर्ते समाचरेत् । रुद्रभागस्य चायामं षोडशांशेन भाजयेत् ॥
चतुर्थांशं द्वितीयं च ऊर्ध्वे मूले त्यजेत्क्रमात् । एकांशं मुकुले न्यस्त्वा रन्ध्रांशं नालमालिखेत् ॥
कृशतां कल्पयेद्धीमान्पक्षसूत्रद्वयं लिखेत । तयोः सूत्रद्वयं चैव साधयेत्पृष्ठदेशके ॥
प्रथमं लक्षणं प्रोक्तं द्वितीयं लक्षणं शृणु । पूजाभागे तु भान्वंशे ऊर्ध्वे त्यक्त्वा गुणांशकम् ॥
एकांशं मुकुले न्यस्त्वा वस्वंशं नालमुच्यते । पक्षसूत्रद्वयं चापि पूर्वोक्तविधिना कुरु ॥
द्वितीयं लक्षणं प्रोक्तं तृतीयं लक्षणं शृणु । रुद्रांशे रुद्रभागे तु त्यक्त्वाप्यूर्ध्वे गुणांशकम् ॥
एकांशं मुकुलं कृत्वा नालं सप्तांशकं भवेत् । रुद्रांशं नवधा कृत्वा त्यक्त्वोर्ध्वे च द्वयां[त्रयां?]शकम् ॥
मुकुलमेकभागं तु पञ्चांशं नालमिष्यते । नालायाममधस्तस्य मुकुलं कृत्वा तु मूलतः ॥
पार्श्वयोरुभयोः सूत्रं बन्धयेत्पृष्ठदेशके । कदलीमुकुलं वापि पद्मं वा युगलं तु वा ॥
लिङ्गं वा शूलरूपं वा छत्रं वा लक्षणं न्यसेत् । सर्वेषां चैव लिङ्गानां मुकुलं चोत्तमोत्तमम् ॥
त्रियम्बकेन मन्त्रेण नालसूत्रं तु विन्यसेत् । ब्रह्मजज्ञानमन्त्रेण लेखयेद्ब्रह्मसूत्रकम् ॥
नेत्रेण मुकुलं लिख्य लेखयेत्स्वर्णसूचिना । मधुवातेति मन्त्रेण मधुना तर्पयेततः ॥
घृतं मिमिक्षमन्त्रेण तर्पयेतु घृतं ततः । . . . . . दर्शयेद्धान्यराशिं तु गोवत्सां ब्रह्मकन्यकाम् ॥

Voir aussi *Ajitāgama paṭala* 18, *śl.* 49-89.

[4] **C** : शिरसा [5] **B** : वर्धनं [6] **A** : प्रोक्तो

[7] **A** : पूजांशोच्चकलांशे तु ; **B** : पूजांशे तु कलांशे तु

[8] **A** : द्व्यंशा शस्तान्विसृज्य च ; **B** : द्वैंशाशस्ताद्विसृज्य च

[9] **A** : द्व्यंशं नालं तु विस्तृतम् ; **B** : द्व्यंशनालं तु विस्तृतम्

पार्श्वयोरुपरि [1]चाधो रेखां [2]नालस्य कल्पयेत् । नालव्यासार्धभागं तु मुकुलस्य समानकम् ॥ ॥ १७ ॥
परितो मुकुलस्यापि रेखां संकल्पयेद् बुधः । दलाग्रपार्श्वयोर्नालव्यासतुल्यं विसृज्य च ॥ १८ ॥
नालायामसमं [3]नालमूलपार्श्वद्वयोरपि । नीत्वा [4]तु मणिरेखे [5]द्वे कल्प्य [6]पृष्ठे तु बन्धयेत् ॥ १९ ॥
[7]स्वर्णसूच्या लिखेत्पश्चाद्धृदयेन तु मन्त्रतः । क्षीरं [8]घृतं मधु चैव बीजमुख्येन लेखयेत् ॥ २० ॥
सद्योजातेन मन्त्रेण सवत्सां गां प्रदर्शयेत् । वामदेवेन मन्त्रेण [9]ब्राह्मणान्दर्शयेत्ततः ॥ २१ ॥
[10]तत्पुरुषेण [11]मन्त्रेण जनसंघान्प्रदर्शयेत् ।

[लिङ्गशुद्धिः[12]]

मृद्भस्मना[13]शकृच्चूर्णं पञ्चगव्यकुशाम्भसा ॥२२॥
क्षालयेदस्त्रमन्त्रेण शुद्धवारियुतेन च । पञ्चगव्याधिवासश्च [14]पञ्चब्रह्मादिमन्त्रतः ॥ २३ ॥

[जलाधिवासः[15]]

ग्रामप्रदक्षिणं कृत्वा लिङ्गं पिण्डिकया सह । सर्वालंकारसंयुक्तं जलमध्ये तु [16]शाययेत् ॥ २४ ॥

---

[1] C : भागेऽथ pour चाधो ; E, F : श्चाधो

[2] Le ms. B omet la portion entre le premier *pāda* du *śloka* 17a et le second *pāda* du *śloka* 18a et se lit : पार्श्वयोरुपरि चाधो रेखां संकल्पयेद्बुधः

[3] A : ताल pour नाल; B : नालं [4] B omet तु [5] A : त्वे pour द्वे

[6] B : पृष्ठेषु pour पृष्ठे तु [7] C, G : स्वसूत्राच्च लिखेत् ; F : स्वसूत्रं विलिखेत्

[8] A : घृतं मधुं चैव ; B, F : घृतमधुश्चैव

[9] B : ब्राह्मणैर्दर्शयेद्बुधः; C, F, G : ब्राह्मणान् दर्शयेद्बुधः [10] B : तत्पूरुषेण

[11] A ajoute तु après तत्पुरुषेण

[12] cf. *Kāraṇāgama* I 59, 77-81:

स्नानश्वभ्रं नयेल्लिङ्गं दारुपीठोपरि न्यसेत् । कौशेयोपरि विन्यस्य ततः स्नानं समारभेत् ॥
सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम् । स्नापयेत्पञ्चगव्यैश्च पवमानमुदीरयेत् ॥
अष्टमृत्सलिलेनैव यवगोधूमसर्षपैः । रात्रिचूर्णशकृच्चूर्णभस्मतद्युक्ततोयकैः ॥
स्नापयेत्तु विशेषेण शुद्धैरुद्धैरिति ब्रुवन् । पाद्यमाचमनं चार्घ्यं वक्त्रमन्त्रेण दापयेत् ॥
गन्धपुष्पादिभिः पूज्य हृदयेन तु मन्त्रतः । पुण्याहं वाचयेत्तत्र रक्तवस्त्रेण वेष्टयेत् ॥

voir aussi *Ajitāgama, paṭala* 18, *śloka* 90-94.

[13] B : द्वि pour ना [14] F : वासं च pour वासश्च

[15] cf. *Suprabhedāgama* I 36, 17-22a:

ग्रामप्रदक्षिणं कृत्वा देशिकः शिल्पिसंयुतः । कण्ठमात्रे जले शुद्धे प्रपां कृत्वा विचक्षणः ॥
वितानध्वजमाल्यादिदर्भमालाभिरावृतम् । वस्त्रैरावेष्टयेल्लिङ्गं दर्भैरावेष्टय यत्नतः ॥
फलकायां तु पीठे वा प्राक्शिरस्कं तु शाययेत् । ऊर्ध्वसूत्रं यथा कृत्वा पीठं तत्पार्श्वयोस्ततः ॥
कलशानष्ट संस्थाप्य रक्षार्थं परितस्तदा । लोकपालाधिदैवत्यान्सकूर्चान्वस्त्रवेष्टितान् ॥
पञ्चरात्रं त्रिरात्रं वा एकरात्रमथापि वा । पञ्चगव्ये तु तल्लिङ्गमेकरात्रोषितं तथा ॥
अथवा स्नापयेद्गव्यैराढकैस्तु पृथक् पृथक् ।

voir aussi *Ajitāgama, paṭala* 18, *śloka* 95-98.

[16] B ; योजयेत्

आपादलम्बितं कूर्चं [1]वस्त्रद्वयसमायुतम् । [2]पुष्पमालां च संवेष्टय हृदा गन्धादिभिर्यजेत् ॥ २५ ॥
[3]प्राङ्मस्तकमधःसूत्रं [4]प्रपामध्ये तु शाययेत् । एकरात्रं द्विरात्रं वा त्रिरात्रवाधिवासयेत् ॥ २६ ॥

[मण्डपः[5]]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् । सप्तहस्तं समारभ्य यावत्पक्षकरावधि[6] ॥ २७ ॥
नवधा मण्डपव्यासं कलास्तम्भसमन्वितम् । वितानाद्यैरलंकृत्य मण्डपं तु त्रिधा भजेत् ॥ २८ ॥
[7]मध्यांशं[8] वेदिकाव्यासं [9]रत्निमात्रं तदुन्नतम् । दर्पणोदरसंकाशं कृत्वा [10]रक्तमृदा [11]बुधः २९ ॥
भूताक्षमात्रविस्तारमुत्सेधमुपवेदिका[12] । [13]तुर्याश्रकुण्डं [14]प्राच्यां तु दक्षिणे त्वर्धचन्द्रकम् ॥ ३० ॥
वारुणे [15]वृत्तकुण्डं तु सौम्ये चैव त्रिकोणकम् । पद्मकुण्डमथैशान्यां [16]सर्वं वेदाश्रमेव वा ॥ ३१ ॥
[17]हस्तव्यासं च खातं च ताल[18]गाधमथापि वा । मेखलात्रय[19]संयुक्तमेकैकं तु [20]त्रयाङ्गुलम् ॥ ३२ ॥
शोषणं [21]पाचनं कृत्वा पर्यग्निकरणं [22]तथा । पुण्याहं वाचयित्वा तु प्रोक्षयेत्पञ्चगव्यकैः ॥ ३३ ॥

---

[1] A : वस्त्रं यस्य समायुतम् ; B : वस्त्रत्रयसमन्वितम्
[2] A : पुष्पमालां च संवृत्य ; B : पुष्पमाल्यादिभिर्भूष्य
[3] B : प्राङ्मस्तकमयं सूत्रं
[4] A : प्रभा pour प्रपा
[5] cf. *Suprabhedāgama* I 36, 22b-30:
आलयस्याग्रतो भागे मण्डपं चतुरश्रकम् । दशद्वादशहस्तं वा त्रयोदशकरं तु वा ॥
दशपञ्चकरं वापि विंशद्धस्तमथापि वा । षोडशस्तम्भसंयुक्तं चतुर्द्वारसमायुतम् ॥
चतुस्तोरणसंयुक्तं दर्भमालासमावृतम् । वितानध्वजसंकीर्णं पुष्पमालावलम्बितम् ॥
नानावस्त्रैरलंकृत्य नानालंकारसंयुतम् । तन्मध्ये वेदिकां कुर्यात्तत्त्रिभागैकविस्तृताम् ॥
हस्तमानसमुत्सेधां दर्पणोदरसंनिभाम् । तस्याश्च परितः कृत्वा कुण्डानि च विधानतः ॥
पूर्वे तु चतुरश्रं तु याम्ये चैवार्धचन्द्रवत् । पश्चिमे वृत्तकुण्डं तु उत्तरे पद्ममेव च ॥
योन्याकारं तथाग्नेय्यां त्रिकोणं चैव नैर्ऋते । षट्कोणं वायुदिग्भागे ऐशान्यामष्टकोणकम् ॥
ऐशानइन्द्रयोर्मध्ये वृत्तकुण्डं तु कारयेत् । विस्तारे नवहोमः स्यात्संक्षेपे पञ्चहोमकम् ॥
पञ्चाग्निश्चेन्महाशासु मूर्तिरीशे शिवाग्निकम् ।
voir aussi *Ajitāgama, paṭala* 18, *śloka* 34-48.
[6] C, F, G : अवधिः pour अवधि
[7] Les mots *aṃśa* et *vyāsa* se trouvent au neutre au lieu du masculin ; cf. *Rauravāgama*, vol I, p. 69 note 6.
[8] A : मध्येंशं ; C : मध्येदं
[9] A : रत्निमात्रं समुन्नतम् ; B : रत्निमात्रसमन्वितम्
[10] B : रत्नपदा ; C : रत्नमृदा
[11] B : युतम् pour बुधः
[12] Une meilleure lecture semble être भूताक्षमात्रविस्तारोत्सेधा चात्रोपवेदिका
[13] B : श्रुत्यश्र pour तुर्याश्रि
[14] C, F, G : प्राच्यान्तं pour प्राच्यां तु
[15] C : वृद्ध pour वृत्त
[16] B : सर्वे ; C, F. G : षष्ठं
[17] C : हस्तं व्यासं च खातं च
[18] A, B : गाढ pour गाध
[19] A : संसक्त pour संयुक्त
[20] A : त्रियङ्गुलम्
[21] B : पाशनं
[22] B : कुरु pour तथा ; C, F : ततः

[स्नानमण्डपः[1]]

गोमयालेपनं कृत्वा रजांसि विनिपातयेत् । तस्योत्तरे प्रपायां तु स्नानश्वभ्रं प्रकल्पयेत् ॥ ३४ ॥
[2]हस्तव्यासं [3]युगाश्रं तु मेखलात्रयसंयुतम् । नालमुत्तरतः [4]कुर्याद्व्यासाग्न्यंशसमायुतम् ॥ ३५ ॥

[शयनाधिवासः[5]]

गोमयालेपनं कृत्वा [6]फलकं तत्र निक्षिपेत् । [7]जलादानीय लिङ्गं तु स्नानश्वभ्रे निधापयेत् ॥ ३६ ॥
पूर्ववल्लिङ्गशुद्धिं तु कृत्वा गन्धादिभिर्यजेत् । बध्वा प्रतिसरं पश्चाद्वस्त्रयुग्मेन वेष्टयेत् ॥ ३७ ॥
स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः । अष्टपत्राम्बुजं लिख्य [8]शालितण्डुलमेव वा ॥ ३८ ॥

---

[1] cf. *Suprabhedāgama* I 36, 31-34:

गोमयालेपनं कृत्वा पिष्टचूर्णैरलंकृतम् । तस्यैवोत्तरपार्श्वे तु कर्तव्यं स्नानमण्डपम् ॥
सप्ताष्टनवहस्तैर्वा कृत्वालंकृत्य पूर्ववत् । स्नानवेदिं तु तन्मध्ये श्वभ्रं सम्यक्तथोत्तरे ।
चतुरश्रं समं कृत्वा चतुस्त्रिनवहस्तकम् । त्रिमेखलासमायुक्तमेकतालसमुन्नतम् ॥
चतुस्त्रिद्व्यङ्गुलं तारमथवा चैकमेखलम् । उत्तरे जलमार्गं च मण्डपाद्वाह्यनिर्गमम् ॥

[2] B : हस्तव्याप्तं ; C : हस्तं व्यासं [3] B : युगालं तु

[4] A : कुर्याद्व्याधाग्न्यंशे समायुतम् ; B : कुर्याद्व्यायान्यंशे समायुतम् ; C, G : व्यासाग्न्यंशेंशमायुतम्

[5] cf. *Kāmikāgama* I 64, 91-101a et 110-111 :

जलाधिवासनस्थानादानीय परमेश्वरम् । मण्टपे स्नपनाख्ये तु प्राग्वत्स्नपनमारभेत् ॥
मृद्भिः कषायवर्गेण पञ्चगव्यफलोदकैः । पुष्पोदैः पत्रतोयैश्च गन्धोदैर्धातुतोयकैः ॥
पञ्चामृतैः कुशोदैर्वा स्नापयेद्वृषभध्वजम् । एवमेव भवान्याश्च कुर्यात्स्नपनमुत्तमम् ॥
आच्छाद्य वस्त्रयुग्मेन गन्धाद्यैरर्चयेत्क्रमात् । कृत्वा कौतुकसूत्रं तु शम्भोर्देव्याः क्रमेण तु ॥
शय्यां च कल्पयेद्विद्वान्शालितण्डुलकादिभिः । अष्टद्रोणैः सशालीभिस्तदर्धैस्तण्डुलैरपि ॥
तिलैस्तदर्धैर्लाजैश्च दर्भैः पुष्पैः परिस्तरेत् । चर्मजं रोमजं तूर्ध्वं मुण्डजं चाण्डजं तथा ॥
कार्पासजं क्रमेणैव कल्पयेदुपधानकम् । अलाभे पञ्चवस्त्रैस्तु मिश्रैः शय्यां प्रकल्पयेत् ॥
संपूज्यासनमन्त्रैश्च शक्तिं शय्याधिपान्न्यसेत् । शिबिकादौ समारोप्य भवान्यानुगतं नयेत् ॥
द्वारदेशे तु संप्राप्ते दद्यादर्घ्यं क्रमेण तु । आरोप्य शयने देवं प्राङ्मस्तकसमन्वितम् ॥
लिङ्गस्योत्तरतो देवीं क्रियाख्यां पीठविग्रहाम् । लिङ्गमूले न्यसेद्देवीं नवगर्तसमन्विताम् ॥
मूर्तिमूर्तीश्वरन्यासं तत्त्वतत्त्वेश्वरान्वितम् । संपूज्य गन्धपुष्पाद्यैर्देवानध्वपतीन्क्रमात् ॥
अव्यक्तमूर्तिं ब्रह्माणि विद्यादेहं शिवं ततः । शिवाङ्गानि च संपूज्य गन्धपुष्पादिभिः क्रमात् ॥
आच्छाद्य नववस्त्रेण प्रतिभागं च पूजयेत् ।

Voir aussi *Ajitāgama* 18, 99-103a; 114-121; 131-137

[6] B : फलकां तत्र; C, F, G : फलकायां तु C, F et G omettent les *śloka* 36b et 37

[8] B : शालितण्डुल एव च ; C, F : शालितण्डुल एव वा

[1]लाज[2]पुष्पतिलैर्दर्भैरलंकृत्य विशेषतः । शयनं कल्पयेत्तस्मिञ्चर्मजाण्डजरोमजैः[3] ॥ ३९ ॥
[4]मुण्डजैर्वामजैश्चैव कल्प्यं वस्त्रैरथापि वा । गन्धादिभिः समभ्यर्च्य सर्वालंकारसंयुतम् ॥ ४० ॥
[5]शयने शाययेल्लिङ्गं प्राक्शिरस्कमधोमुखम् । रक्तवस्त्रेण संवेष्टय गन्धाद्यैरर्चयेद्भृदा ॥ ४१ ॥

[कुम्भस्थापनम्[6]]

वारिभिः पूरितं कुम्भं ससूत्रं सापिधानकम् । सहिरण्यं [7]सरत्नं च सवस्त्रं कूर्चसंयुतम् ॥ ४२ ॥
नानागन्धाम्बु[8]संपूर्णं स्थापयेत्तु शिरोऽन्तिके । वर्धनीं तस्य सौम्ये तु परितोऽष्टघटान्न्यसेत्[9] ॥ ४३ ॥
तानि [10]सूत्रादिभिर्युक्तं प्रागिवैव विशेषतः । [11]मूलमन्त्रं न्यसेत्कुम्भे ध्यायेत्सर्वेश्वरं प्रभुम् ॥ ४४ ॥

[कुम्भमध्ये सदाशिवध्यानम्[12]]

पञ्चवक्त्रयुतं देवं [13]पञ्चमूर्धसमन्वितम् । दिव्याम्बरधरं देवं दिव्यगन्धानुलेपनम् ॥ ४५ ॥
यज्ञसूत्रसमायुक्तं [14]कटिसूत्रयुतोदरम् । कर्णिकाहारवलयं [15]कर्णपुष्पोत्तरीयकम् ॥ ४६ ॥

---

[1] cf. *Suprabheda*, I 22, 145b-150 :
अण्डजं मुण्डजं चैव रोमजं चर्मजं तथा । वामजं शयनं पञ्च तल्पास्त्वेवं विशेषतः ॥
अण्डजं चात्र बोद्धव्यं पक्षिपिञ्छसमुद्भवम् । कार्पासेन कृतं यत्तु मुण्डजं च प्रकीर्तितम् ॥
आविकादिमृगाणां तु रोमजं रोमज स्मृतम् । चर्मजं व्याघ्रसिंहयोः कौशेयं वामजं स्मृतम् ॥
पट्टं चापि प्रकर्तव्यं सदृशेन समन्वितम् । अण्डजं श्वेतरूपं स्यान्मुण्डजं पीतवर्णकम् ॥
रोमजं कृष्णवर्णं तु रक्तवर्णं तु चर्मजम् । वामजं सितवर्णं तु शुक्लरूपं तु पट्टकम् ॥
यथार्हकं तथा कृत्वा ह्यपिधानं तथा भवेत् ॥
Voir aussi *Ajitāgama, paṭala* 18, *śl.* 117-121 et *paṭala* 40 *śl.* 51-55.

[2] B : पुष्पैस्तिलैर् pour पुष्पतिलैर्
[3] C, F, G : चर्मजालैश्च रोमजैः
[4] C : अण्ड pour मुण्ड
[5] C, F, G : शाययेच्छयने लिङ्गं
[6] cf. *Kāmika*, I 64, 112-114a et 117-118a :
वेद्यूर्ध्वे परितः कुम्भान्न्यसेद्विश्वेश्वरात्मकान् । निद्राकुम्भं शिरोदेशे वर्धनीमुत्तरे न्यसेत् ॥
कुम्भान्वस्त्रैः समावेष्टय हेमपद्मसमन्वितान् । पिधानकूर्चसंयुक्तान्पल्लवैरुपशोभितान् ॥
निवेद्य भूरि नैवेद्यं ताम्बूलाद्यं च मन्त्रवत् । . . . चतुर्वेदविदो विप्राश्चतुर्दिक्षु व्यवस्थिताः ।
पठन्तो देवतालिङ्गमन्त्रान्संनिधिहेतवे । भवन्ति मूर्तिपा नाम संस्कृताः शिवशम्बरैः ॥
Voir aussi *Ajitāgama* 18, 138-147.

[7] A, B : ससूत्रं
[8] C : गन्ध्याम्बु pour गन्धाम्बु
[9] B : यजेत् pour न्यसेत्
[10] C : सूत्राणुभिर्युक्तं ; E : सूक्ष्माणिभिर्युक्तं ; F : सूत्रैः समायुक्तं
[11] A : मूलमग्रं
[12] cf. *Sūkṣmāgama* 42, 143b-148a :
ज्ञात्वा सदाशिवं रूपं पञ्चमूर्ति[मूर्ध्व]समन्वितम् । पञ्चवक्त्रसमायुक्तं दशहस्तोपशोभितम् ॥
दिव्याम्बरधरं देवं दिव्याभरणभूषितम् । शुद्धस्फटिकसंकाशं कुन्देन्दुधवलप्रभम् ॥
कुण्डलैः कर्णिकैर्हारैर्यज्ञसूत्रविभूषितम् । शूलं परशुवज्रं च खड्गं चाभय दक्षिणे ॥
पाशाङ्कुशं च वह्निं च खेटकं वरदे परे । कुम्भे ध्यात्वा विशेषेण पद्ममुद्रां प्रदर्शयेत् ॥
आवाहनादिकं सर्वं पूर्वोक्तविधिना कुरु । शिवमन्त्रं समुच्चार्य गन्धपुष्पादिनार्चयेत् ॥
Voir aussi *Ajitāgama* 20, 158-164

[13] C, F, G : पञ्चमूर्ध्नां pour पञ्चमूर्ध
[14] A, B : कटिसूत्रोदरबन्धनम्
[15] C : कण्ठ pour कर्ण

[1]नूपुरैः पादयोर्युक्तं पद्मपीठोपरि स्थितम् । [2]दशभुजं चैकदेहं च दिव्याभरणभूषितम् ॥ ४७ ॥
शूलं परशुखड्गं च [3]वज्रं [4]वह्निं च दक्षिणे । पाशाङ्कुशं च नागं च घण्टाभयं च वामके ॥ ४८ ॥
जटामकुटसंयुक्तं रक्तवर्णसमायुतम् । पुष्पमालासमायुक्तं भस्मोद्धूलितविग्रहम् ॥ ४९ ॥
[5]धुत्तूरपुष्पसहितं बालेन्दुकृतशेखरम् । ध्यात्वैवं कुम्भमध्ये तु हृदा [6]मूलमुदाहरन् ॥ ५० ॥

[वर्धन्यां मनोन्मनीध्यानम्[7]]

वर्धन्यां [8]मनोन्मनीं ध्यायेदेवमेव विचक्षणः । [9]त्रिनेत्रां चतुर्भुजां शान्तां पीनोरुजघनस्तनाम्[10] ॥ ५१ ॥
तप्तकाञ्चनसंकाशां किरीटमकुटान्विताम्[11] । दुकूलवसनोपेतां सर्वाभरणभूषिताम् ॥ ५२ ॥
[12]त्रिभङ्गामम्बुजे संस्थां [13]वरदाभयसंयुताम् । उत्पलं दक्षिणे हस्ते [14]वामहस्ते धृताम्बुजाम् ॥ ५३ ॥
देवस्य वामपार्श्वे तु [15]देवमीषन्निरीक्षिताम् । [16]ईषद्ललितवक्त्राढ्यां बीजमुख्यमुदाहरन् ॥ ५४ ॥

[विद्येश्वरध्यानम्[17]]

अनन्तादिशिखण्डयन्ताञ्शक्रादिषु घटेषु वै । [18]त्र्यक्षाश्चतुर्भुजाञ्शान्तान् [19]वरदाभयसंयुतान् ॥ ५५ ॥

---

[1] A : नूपुरं [2] B : सौम्यदेहं दशभुजं ; C, G : दशभुजं चैकदेशं च [3] B : यज्ञं pour वज्रं
[4] C : करे pour वह्निं [5] A, B : सदूर्ध्वं pour धुत्तूर ; F : धुर्धूर [6] C omet मूल
[7] cf. *Kāraṇāgama* I 90, 6-10:

" मनोन्मन्याकृतिं शृणु ।
शशिवर्णं त्रिनेत्रं च जटामकुटमण्डितम् । सर्वाभरणसंपूर्णं चतुर्भुजसमन्वितम् ॥
पङ्कजाभयं दक्षे तु वरदोत्पलं वामके । अथवा कटकं वापि द्विहस्तं वा विशेषतः ।
उत्पलं सव्यहस्ते तु वामहस्तं प्रलम्बयेत् । इन्दुशेखरसंयुक्तं नक्रकुण्डलधारिणम् ॥
वालिकाकर्णपुष्पेण शोभनाम्बरभूषितम् ।
कुन्दनिभवेदकरवह्निनयनं स्यात् । पङ्कजवराभयकरोत्पलचतुष्कम् ।
अङ्गाहिमभूषणविचित्रनयनं स्यात् तुङ्गमकुटोज्ज्वलमनोन्मनिस्वरूपम् ॥

[8] B : पूजयेद्देवीं ध्यायेदेवं ; C. F : मनोन्मनीं ध्यायेदेवमेवं [9] A : त्रिणेत्रां
[10] B : स्थलाम् pour स्तनाम् [11] C, G : उज्ज्वलाम् pour अन्विताम्
[12] C, G : त्रिभङ्गीमम्बुजैः ; F : त्रिभङ्गिमम्बुजैः [13] A, C : अभयं वरदान्वितम्
[14] A : वामहस्ताम्बुजोद्धताम् ; C, F, G : वामहस्तेऽम्बुजं धृताम्
[15] : देवीम् pour देवम् ; une meillere lecture semble êt re देवेनेषन्निरीक्षिताम्
[16] A : ईषद्वहितवक्त्राढ्यां ; B : ईषद्विहितवक्त्राढ्यां ; C : ईषत्स्मितयुतां देवीं
[17] cf. *Kāraṇāgama* I 30, 291-294a:

अनन्तेशस्तथा सूक्ष्मः शिवोत्तमश्चैकनेत्रकः । एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिकः ॥
अष्टविद्येश्वरा ह्येते त्रिणेत्राश्च चतुर्भुजाः । अभयवरदोपेताष्टङ्कशूलसमन्विताः ॥
रक्तं श्वेतं तथा नीलपीतं कृष्णं च कुङ्कुमम् । शोणं भिन्नाञ्जनप्रख्यं क्रमाद्विद्येशवर्णकम् ॥
अनन्तादिशिखण्डयन्तान्प्रादलेषु प्रकल्पयेत् ।

voir aussi *Ajitāgama paṭala* 36, *śl.* 344.

[18] A, C : त्रिणेत्राम् pour त्र्यक्षान [19] A, F : अभयं वरदान्वितान्

टङ्कशूलसमायुक्तान्दक्षिणेऽदक्षिणे करे । [1]ध्यायेच्च परमेशानं [2]निरीक्ष्यतो द्विजोत्तम ॥ ५६ ॥
गन्धाद्यैरर्चयेत्सम्यग्हविष्यान्तं[3] विशेषतः । दिशास्वध्ययनं[4] कुर्यान्मन्त्राणि विदिशासु वै ॥ ५७ ॥

[होमः[5]]

पश्चाद्धोमं[6] तु कर्तव्यमनेन विधिना क्रमात् । [7]अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ ५८ ॥

---

[1] A, C, F : ध्याययेत् pour ध्यायेच्च [2] A : निरीक्ष्यतन् pour निरीक्ष्यतो ; B : वीक्षणां च ; C : निरीक्षन्तां

[3] B : हविष्यन्तं ; C, F, G : हविषान्तं

[4] Pour plus de détails au sujet d'*adhyayana* voir *Ajitāgama* 18, 148.

[5] cf. *Diptāgama* 20, 168b- 172:

आचार्यो मूर्तिपैः सार्धं होमं कुर्याद्विशेषतः । समिदाज्यचरू लाजाः सक्तुसिद्धार्थमाषकाः ॥
यवनीवारश्रीपत्रतिलास्त्वेकदशा इमे । अश्वत्थोदुम्बरप्लक्षवटं पूर्वादिदिक्षु च ॥
शमीखदिरश्रीवृक्षमयूराश्च विदिक्षु च । पलाशं तु प्रधानस्य सर्वेषामिध्ममुच्यते ॥
स्वदिक्स्था मूर्तिपाः सर्वे सर्वसंभारसंयुताः ।

voir aussi *Ajitāgama* 18, 149-165.

[6] Le mot होम se trouve au neutre au lieu du masculin ; cf. *Rauravāgama* vol I, p. 69 note 6.

[7] cf. *Diptāgama* 20, 195-214:

शिवाग्निं जनयेत्पूर्वमाचार्यो विधिना सह । सोष्णीषः सोत्तरीयश्च दिव्यगन्धानुलेपनः ॥
शिवाग्नौ जनिते ह्येवं पश्चान्निक्षिप्य विष्टरम् । आवाहनादि यत्कर्म पूर्वोक्तविधिना सह ॥
शिवाग्नौ शिवमावाह्य पञ्चावरणसंयुतम् । भवश्च पूर्वदिग्भागे आग्नेय्यामुग्र एव च ॥
शर्वश्च दक्षिणे कुण्डे वामस्तु नैर्ऋते ततः । रुद्रश्च पश्चिमे भागे भीमो वै वायुगोचरे ॥
पशुपतिश्चोत्तरे कुण्डे ऐशान्यामीश एव च । त्रिणेत्राश्चतुर्भुजाश्चैव जटामकुटधारिणः ॥
कुण्डमध्ये न्यसेदेतांस्तद्बाह्ये वसवः स्थिताः । तद्बाह्ये मारुतश्चैव लोकपालाश्च तद्बहिः ॥
लोकपालविहीनं स्यान्मध्यमे होमकर्मणि । मरुतो वसवो हीनाः कन्यसे होमकर्मणि ॥
कुण्डाधिदेवताः सर्वे विन्यसेत्कुण्डमध्यमे । पाद्यादिदीपपर्यन्तमर्चयेत्तु विधानतः ॥
शिवमन्त्रं समुच्चार्य शिवाग्नौ जुहुयाच्छतम् । अन्येषां देवतानां च तत्तन्मन्त्रैर्दशाहुतिः ॥
ब्रह्माङ्गैश्च ततो हुत्वा प्रत्येकं तु शताहुतिः । त्रियम्बकेन मन्त्रेण समिदाहुतिमाचरेत् ॥
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा । शतमष्टोत्तरं वापि प्रत्येकं जुहुयात्क्रमात् ॥
आज्यं हुत्वा हृदा मन्त्री पूर्वसंख्याक्रमेण तु । घृतमिक्षेति मन्त्रेण जुहुयात्तत्संख्यया घृतम् ॥
चरुं हुत्वा तु सद्येन देवस्य त्वा चरूंहुनेत् । शिरसा लाजं हुत्वा तु एषामीशेति मन्त्रतः ॥
सक्तुं वामेन मन्त्रेण आपो राजेति मन्त्रतः । सिद्धार्थाञ्शिखया हुत्वा यो रुद्रस्तदनन्तरम् ॥
माषं हुत्वा तु घोरेण एष ते रुद्र मन्त्रतः । कवचेन यवं हुत्वा त्रियम्बकेनैव मन्त्रतः ॥
नीवारं पुरुषेणैव आप्यायस्वेति मन्त्रतः । अस्त्रेण जुहुयात्पत्रमप्सु मे सोम इत्यपि ॥
तिलान्हुत्वेशमन्त्रेण यतयत्तेति [यदस्येति च?] मन्त्रतः । द्रव्यान्ते व्याहृतिं हुत्वा स्रुशेल्लिङ्गस्य मस्तकम् ॥

समिदाज्य[1]चरूँल्लाजान्सक्तु[2]माषतिलानपि । [3]सिद्धार्थं गुलमुद्गं च कदलीफलमेव च ॥ ५९ ॥
[4]सद्याद्यस्त्रान्तकैर्मन्त्रैः प्रत्येकं तु शताहुतिः । [5]त्रियम्बकेन मूलेन [6]त्वाज्येनैव शताहुतिः ॥ ६० ॥
पञ्चाशद्बीजमुख्येन हुत्वा लिङ्गं तु संस्पृशेत् । स्तोत्रैर्मन्त्र[7]जपैर्गेयै रात्रिशेषं व्यपोहय च ॥ ६१ ॥

[पूर्णाहुतिः[8]]

आचार्यो मूर्तिपैः सार्धं प्रभाते स्नानमाचरेत् । भस्मचन्दनलिप्ताङ्गः सकलीकृतविग्रहः ॥ ६२ ॥
लिङ्गं च कलशानग्निं[9] पूजयेत्तु क्रमाद्बुदा[10] । जयादिरभ्याधानं च[11] राष्ट्रभृच्चैव होमयेत् ॥ ६३ ॥
ब्रह्माङ्गैश्चैव विद्याङ्गैराज्येनैव दशाहुतिः । [12]स्विष्टमग्नेतिमन्त्रेण पूर्णाहुतिमथाचरेत् ॥ ६४ ॥

[आचार्यपूजा[13]]

आचार्यं पूजयेत्तत्र गो[14]भूमिकाञ्चनादिभिः । [15]मूर्तिपान्पूजयेत्पश्चाद्दैवज्ञं पूजयेत्ततः ॥ ६५ ॥

तदन्ते होमयेद्धीमान्गौरीब्रह्माङ्गविद्यया । गौरीगायत्रिमन्त्रेण गौरीमिमायेति मन्त्रतः ॥
हुत्वा हुत्वा स्पृशेत्पीठं पञ्चविंशतिसंख्यया । ब्रह्मजज्ञानमन्त्रेण हुत्वा ब्रह्मशिलां स्पृशेत् ॥
गर्भगेहस्य तन्मध्ये वास्तुहोमं समाचरेत् । पुण्याहं वाचयित्वा तु दद्यादर्घ्यं विशेषतः ॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वाधिवासयेत् । एवं जागरणं रात्रौ नृत्तगेयसमन्वितम् ॥

[1] A : चरुं pour चरून् [2] A : सक्थु pour सक्तु
[3] B : सिद्धाद्यङ्गुलमुद्गं च ; C, G : सिद्धार्थं गलपूगं च ; F : सिद्धार्थं गुलपूगं च
[4] C, F, G : सद्याद्यस्त्रान्तमन्त्रैश्च प्रत्येकाष्टोत्तरं शतम् [5] C : त्र्यम्बकेन [6] A omet तु
[7] C, F, G : मन्त्रैर् pour मन्त्र
[8] Cf. *Suprabheda* I 36, 106b-109a et 114b-115a:
आचार्यस्तु पुनः स्नात्वा मन्त्रसंनद्धविग्रहः । पुण्याहं वाचयित्वा तु स्नापयेत्पञ्चगव्यकैः ।
गन्धपुष्पादिना पूज्य कल्पयित्वा तथासनम् । आवाह्याराध्य मन्त्रज्ञः सकलीकरणं शिवम् ॥
मन्त्रसंतर्पणं कृत्वा पूर्णाहुतिमथाचरेत् । कुम्भपूजां विशेषेण कृत्वा विज्ञाप्य पूर्वकम् ॥
होमशेषं ततो नेयं हृदयेन विचक्षणः । कुम्भस्थदेवदेवेशं विज्ञाप्य विधिपूर्वकम् ॥
voir aussi *Ajita* 18, 166-170a.
[9] A, B : अग्नीन् pour अग्निं [10] B : हृदि pour हृदा [11] B : अभ्याधानैश्च
[12] *Taittiriyabrāhmaṇa* 2, 4, 1, 4
[13] cf. *Suprabhedāgama* I 36, 109b-114a:
आचार्यं पूजयेत्तत्र यथा विभवसंयुतम् । उष्णीषमुत्तरीयं च परिधानं तथैव च ॥
हेमाङ्गुलीयकैश्चैव गन्धपुष्पं तथैव च । मकुटं कुण्डलं चैव हारकेयूरकं तथा ॥
कटकं कटिसूत्रं च आचार्यस्य प्रदापयेत् । आचार्यदक्षिणा हेम कन्यसं दशनिष्ककम् ॥
मध्यमं द्विगुणं तस्य उत्तमे त्रिगुणं भवेत् । एकं संपूज्य विधिवत्सवत्सा गाश्च दापयेत् ॥
आचार्यमनसस्तुष्टिर्देवस्य प्रीतिकारणम् । मूर्तिपानां पृथग्वस्त्रैर्हेमनिष्कं च दापयेत् ॥
voir aussi *Ajitāgama*, 18, 269-276.
[14] B, C, G : भूमी pour भूमि [15] C, G : मूर्तिमान्

[लिङ्गस्य गर्भगेहानयनम्[1]]

मुहूर्ते समनुप्राप्ते वेद्या[2] लिङ्गं समुद्धरेत् । सर्वालंकारसंयुक्तं सम्यक्कृत्वा प्रदक्षिणम् ॥ ६६ ॥
[3]प्रविश्य [4]गर्भगेहं च स्थाप्य लिङ्गं विशेषतः । [5]घृतशिरोऽर्पणं कुर्याद्गर्भगेहं [6]समाश्रयेत् ॥ ६७ ॥

[आधारशिलास्थापनम्[7]]

गर्भगेहस्य मध्ये तु किञ्चिदीशानमाश्रिताम् । स्थाप्याधारशिलां सम्यक्सुधया बन्धयेद्दृढम् ॥ ६८ ॥

[रत्नादिन्यासः[8]]

[9]माणिक्यादीनि रत्नानि मध्यादीनि क्रमान्न्यसेत् । सुवर्णकलशान्पुष्पं[10] [11]लोहधान्यादि धापयेत्[12] ॥६९

---

[1] cf. *Kāraṇāgama* I 59, 195b-201a :
मुहूर्तात्प्राप्तकाले तु सर्वातोद्यसमन्वितम् । शङ्खदुन्दुभिनादैश्च गीतनृत्तसमायुतम् ॥
ब्रह्मघोषसमायुक्तं नानाभक्तिसमन्वितम् । छत्रध्वजवितानैश्च धूपदीपैश्च संयुतम् ॥
वर्धन्याः स्रावसहितं मङ्गलाङ्कुरसंयुतम् । उद्धृत्य शयनाल्लिङ्गं वस्त्रादीनि व्यपोह्य च ॥
घृतं शिरोऽर्पणं कुर्याद्धेमदूर्वाङ्कुराक्षतैः । रथे वा शिबिकायां वा रज्जुयन्त्रेण वा पुनः ॥
उक्तालंकारसंयुक्तं कृत्वा धामप्रदक्षिणम् । पृष्ठतो यजमानस्तु पुत्रभ्रातृसमान्वितः ॥
आचार्यस्त्वग्रतो गच्छेदर्घ्यहस्तः समाहितः । विश्राम्य द्वारदेशे तु अर्घ्यं दत्त्वा विशेद्गृहम् ॥
voir aussi *Ajitāgama* 18, 202b-206.

[2] A : वेद्यां [3] C, F, G : प्रवेशं [4] B : गर्भगेहस्य [5] A, B : घृतं pour घृत

[6] B : समाचरेत् ; C, F, G : समविशेत्

[7] cf. *Suprabhedāgama* I 33, 114b-118:
समन्ताच्चतुरश्रास्तु ब्रह्मभागसमोन्नताः । अथवा चतुरश्रस्य चाष्टांशात्सप्तमोच्छ्रितः ॥
गर्भस्य नवभागैकं पादाधारशिला शुभा । तदर्धमेकमेवं वा तन्नवांशैकमुच्छ्रितिः ॥
चतुरश्रस्य चाष्टांशादेकांशं मध्यनिम्नगम् । लिङ्गतारप्रमाणेन खातविस्तारमानकम् ॥
नवनिम्नं तु तन्मध्ये रत्नन्यासार्थमुच्यते । ब्रह्मोपला समोत्तुङ्गा तत्ताराध्यर्धविस्तृता ॥
एवं कूर्मशिला सिद्धा सुदृढा चतुरश्रका ।
cf. *ibid.*, I 36, 87-88a:
आदौ कूर्मशिलां न्यस्त्वा ब्रह्मभागान्वितां दृढाम् । न्यसेद्ब्रह्मशिलामूर्ध्नि नन्द्यावर्तशिलान्विताम् ॥
स्थलं सम्यक् प्रकुर्वीत स्नेहद्रव्यान्वितं दृढम् ।
voir aussi *Ajitāgama* 18, 172-188

[8] cf. *Suprabhedāgama* I 36, 88b-93 :
माणिक्यं चैव वैडूर्यं नीलं मरकतं तथा । मौक्तिकं चैव गोमेदं वज्रं पुष्पं प्रवालकम् ॥
एतानि नवरत्नानि मध्यमादि विनिक्षिपेत् । यवनीवारमुद्गाश्च तिलो वै सर्षपस्तथा ॥
शालिप्रियङ्गुश्यामाश्च कुलुत्था नवबीजकम् । हरितालं तथा श्यामं चन्दनं चःमनःशिलाम् ॥
सौराष्ट्रं पारतं सीसं गैरिकं हेममाक्षिकम् । एवं स्मृत्वा क्षिपेद्विद्वान्प्राणधात्विन्द्रियादिकम् ।
रत्नानि प्राणसंज्ञानि सुबीजानीन्द्रियाणि च । धातूनि धातवः प्रोक्ता बीजमुख्येन विन्यसेत् ॥
गन्धपुष्पादिनाभ्यर्च्य नन्द्यावर्तशिला न्यसेत्
voir aussi *Ajitāgama* 18, 189-199.

[9] B, E, F : माणिक्कादीनि [10] A : पुष्पान् pour पुष्पं [11] A : लोक pour लोह

[12] B : धान्यादिकं न्यसेत् ; C, F : धान्यानि धापयेत्

हृदयेन तु मन्त्रेण गन्धपुष्पादिभिर्यजेत् ।

[लिङ्गस्थापनम्[1]]

मुहूर्ते समनुप्राप्ते [2]वेद्या लिङ्गं समुद्धरेत् ॥ ७० ॥

मूलमन्त्रेण लिङ्गं तु स्थापयेद्द्वार[3]दिङ्मुखम् । नन्द्यावर्तशिलां योज्य पिण्डिकां चैव योजयेत् ॥ ७१ ॥

[पिण्डिकालक्षणम्[4]]

पिण्डिकाश्ममयं वाथ मिश्रं सौधमथापि[5] वा[6] । [7]मिश्रे त्वधोऽम्बुजं सौधमुपर्यश्ममयं[8] भवेत् ॥ ७२ ॥

[9]सुधा चेदिष्टकागर्भं कारयेल्लक्षणान्वितम् । मोक्षद[10] शैलजं पीठं मिश्रं स्याद्भोगमोक्षदम् ॥ ७३ ॥

---

[1] cf. *Kāraṇāgama* I 59, 201b-202 :

कालं निरीक्ष्य दैवज्ञो गुरवे संनिवेदयेत् । आचार्यो मूर्तिपैः साधं लिङ्गस्थापनमारभेत् ॥
पुरुहूते तु संस्थाप्य लिङ्गं तु द्वारसंमुखम् ।

cf. *Suprabheda* I 36, 101b :

नन्द्यावर्तशिलाभिस्तु बध्वा पीठं तु योजयेत् ।

voir aussi *Ajitāgama* 18, 206b-215 .

[2] A : वैशाल्लिङ्गं [3] B : द्वारि pour द्वार

[4] cf. *Aṃśumatkāśyapa* 52, 2-3a:

शैलजे तु शिलापीठं सुधयेष्टकयापि वा । दारुजे दारुजं वाथ इष्टकामयमेव वा ॥
रत्नलोहादिलिङ्गानां स्वयोनिं लोहजं तु वा ।

cf. *Kāmikāgama* II 35, 1-9a :

पीठसंस्थापनं वक्ष्ये तल्लक्षणपुरःसरम् । लिङ्गायामविशालं तु पीठं सर्वार्थसाधकम् ॥
विष्वंशसमतुङ्गं च छायादोषविवर्जितम् । पूजाभागोदयप्रान्तपीठनिर्गमनान्वितम् ॥
ईदृशं पीठमाप्राप्य को न सिध्येत मानवः । लिङ्गायामसमं वापि लिङ्गायामार्धमेव वा ॥
सप्तविंशतिमानानि षड्विंशत्यंशकेऽन्तरे । लिङ्गस्य तारत्रिगुणं भवेत्पञ्चगुणं तु वा ॥
तदन्तरे तदा भक्ते सप्तविंशतिमानकम् । लिङ्गमानवशात्पीठविस्तारं परिकीर्तितम् ॥
तिथ्यङ्गुलं समारभ्य व्योमाङ्गुलविवर्धनात् । षोडशाङ्गुलसंयुक्तं विंशकाङ्गुलकावधि ॥
हस्तादिनवहस्तान्तं लिङ्गानां पीठविस्तृतिः । लिङ्गायामाधिकः पीठविस्तारो नेष्यते द्विजाः ॥
अग्रमूलसमं वास्य हीनमूलं तु नेष्यते । षडंशात्षोडशांशान्तं कृत्वा मूलविशालकम् ॥
एकांशेनाग्रविस्तारं पीठं वा परिकीर्तितम् ।

voir aussi *Ajitāgama* 16, 1-8.

[5] A : अथापि pour अथापि [6] C omet वा [7] A : मिश्रे द्वयोम्बुजं ; B : मिश्रे द्वयेऽम्बुजं

[8] C : अश्रमयं pour अश्ममयं

[9] B : सुधा चेदिष्टिकागर्भं ; C, G : सयं चेदिष्टिकागर्भं ; F : सौधवेदीष्टिकागर्भं [10] B : मोक्षजं

सौधजं भोगदं ख्यातं विष्णुभागसमोन्नतम्[1] । [2]लिङ्गतारत्रयं [3]व्यासं लिङ्गनाहसमं तु वा ॥ ७४ ॥
ब्रह्मांशेतरलिङ्गानां लिङ्गनाहं [4]तथोन्नतम् । [5]भद्रपीठं पद्मपीठं द्विविधं पीठलक्षणम् ॥ ७५ ॥

[भद्रपीठम्[6]]

पीठोदये कलांशे तु [7]व्योमांशं स्यात्पुरोदयम्[8] । [9]जगत्युच्चं तु [10]वेदांशं गुणांशं [11]कुमुदोदयम् ॥ ७६ ॥
[12]कम्पमंशेन कर्तव्यं गलमानं गुणांशकम् । ऊर्ध्वकम्पं [13]शिवांशं स्याद्दिग्भागं[14] पट्टिकोदयम् ॥ ७७ ॥
व्योमांशं घृतवारि[15] स्यादुत्तदुच्चं [16]नीव्रवेशकम् । पीठव्यासेऽग्निभागांशं[17] नालव्यासं च नीव्रकम् ॥ ७८
[18]तत्त्रिपादं घनं विद्यान्मध्ये [19]धारासमन्वितम् । भद्रपीठमिदं ख्यातम् ;

[पद्मपीठम्[20]]

पद्मोच्चं तु कलांशकम् ॥ ७९ ॥

---

[1] B : समन्वितम् pour समोन्नतम्
[2] C, F et G omettent les demi-*śloka* 74b et 75a
[3] B : वाथ
[4] B : ततो नतम्
[5] A : पद्मपीठं द्विद्विविधं विविधं पीठलक्षणम् ; B : पद्मपीठं च द्विविधं विविधं पीठलक्षणम् ; **C, F, G :** पद्मपीठं महापीठं विविधं पीठलक्षणम्
cf *Suprabheda* I 32, 97 :
पद्मपीठं भद्रपीठं वेदिका परिमण्डलम् । पीठं चतुर्विधं प्रोक्तम्"
voir aussi *Ajita* 16, 9-10.
[6] cf. *Aṃśumatkāśyapa* 52, 33-38:
"भद्रपीठमथोच्यते ।
कृत्वा तु षोडशोत्सेधं भागेनोपानमुच्यते । जगत्युच्चं तु वेदांश गुणांशं कुमुदोदयम् ॥
शिवांशं पट्टिकामानं कण्ठमानं गुणांशकम् । तदूर्ध्वकम्पमेकांशं द्विभागा पट्टिका भवेत् ॥
शश्यंशं घृतवारि स्यादेतत्तु भद्रमुच्यते । पीठोच्चे तु कलांशे तु द्विभागं पट्टिकोदयम् ॥
गुणांशं जगतीमानं कुमुदोच्चं तु तत्समम् । व्योमांशं कम्पमानं तु कण्ठमानं द्विभागधा ।
तस्योर्ध्वकम्पमेकांशं गुणांशा पट्टिका भवेत् । एकांशं घृतवारि स्यादेतद्भद्रकमुच्यते ॥
भद्रमेवं द्विधा ख्यातम्"
voir aussi *Ajitāgama* 16, 11-13.
[7] A : व्यामांशं ; C, F, G : व्योमांशः
[8] C, G : पुरोमतम् ; E : पुरोमदम् ; F : पुरोदमः
[9] A : गजत्युच्चं ; B : गजत्युच्चे
[10] C, E, F, G : वेदाङ्गं
[11] A : कमृतोदयम् ; B : कमतोदयम् ; C : कमुदोदयम्
[12] A : कूपदंशेन ; B : तुपदंशेन ; C, F, G : कूपमंशेन
[13] C, F, G : गुणांशः स्यात्
[14] B : यागं pour भागं
[15] A : वारी pour वारि
[16] B : निप्र pour नीव्र ; **C E :** नीप्र
[17] A : भागेंशं pour भागांशं ; B : भागे तु
[18] A : च निव्रकम् ; B : निवृत्तकम्
[19] F : तारा pour धारा
[20] cf. *Kāmikāgama* II 35, 37-38:
षोडशांशे तदुत्सेधे द्विपादं पादुकं भवेत् । शरांशं पद्ममानं स्याद्दिभागं वृत्तमुच्यते ॥
वेदांशमूर्ध्वपद्म स्यादन्यिन्यंशेन पट्टिका । घृतवार्यंशमानं स्यात्पद्मपीठमिदं मतम् ॥
voir aussi *Ajitāgama* 16, 30b-32.

कृत्वाक्षांशमुपानोच्चं [1]सौधपद्मं [2]रसांशकम् । [3]कर्णवेशो द्विकांशः स्यादूर्ध्वपद्मं शरांशकम्[4] ॥ ८० ॥
शिवांशं [5]घृतवारि स्याच्छेषं प्रागिव [6]कल्पयेत् । [7]कृत्वा तु पिण्डिकामेवमष्टबन्धं[8] सुयोजयेत् ॥८१॥

[लिङ्गपीठशुद्धिः[9]]

लिङ्गपीठस्थलं चैव [10]शुद्धिं कृत्वास्त्रमन्त्रतः । [11]पुण्याहप्रोक्षणं कृत्वा [12]ततोऽपि स्नानमाचरेत् ॥ ८२

[कुम्भाभिषेकः[13]]

[14]वेद्यास्तु [15]कूम्भानुद्धृत्य [16]बाह्यधामप्रदक्षिणम् । लिङ्गाग्रे स्थापयेत्कुम्भान्पूर्ववत्स्थापनक्रमात्[17] ॥
प्रागेव तु घटे [18]तस्मिन्बाल[19]लिङ्गान्महेश्वरम् । मनोन्मनीं च विद्येशानावाह्यार्चनमाचरेत् ॥ ८४ ॥

---

[1] Une meilleure lecture semble être अध:पद्मं au lieu de सौधपद्मं

[2] B : शरान्तकम्

[3] A : कर्णे वेशत्रद्वौकाशं स्याद् ; B : कर्णे वेश द्विकाशं स्याद् ; C : कर्णवेत्रं द्वितीयं स्यात् ; E : कण्ठवेत्रं द्वितीयं स्याद्

[4] B : ऊर्ध्वपद्मं शरान्तकम् ; C, E: ऊर्ध्वकंपाशकांशकम् ; F : ऊर्ध्वकम्पं शतांशकम्

[5] A : कृत pour घृत [6] A : कल्पितम्

[7] A : पिण्डिकामेकं कृत्वा तु मुष्टिबन्धं ; E, F : पिण्डिकामयमेवं च अष्टबन्धं

[8] Pour plus de détails au sujet d'*aṣṭabandha* voir *Kāraṇāgama* I 136. 16-19:

आर्द्रीकृत्याष्टबन्धं तु बन्धयेल्लिङ्गपीठयोः । कार्पासतूलकं चैव महिषाज्यं तु शर्करा ॥
लाक्षाचूर्णं मधूच्छिष्टं कुन्दुरुक्कस्य चूर्णकम् । काषायचूर्णं गौलं च द्रव्यं स्यादष्टबन्धने ॥
एकभागं तु कार्पासं महिषाज्यं तु तत्समम् । शिलाचूर्णं चतुर्भागं लाक्षा च द्वेकभागकम् ॥
भागार्धं तु मधूच्छिष्टं कुन्दुरुष्कं द्विभागकम् । काषायचूर्णमेकार्धमेकार्धं गुलमुच्यते ॥

voir aussi *Ajitāgama* 18, 216-218.

[9] cf. *Kāmikāgama* I 64, 161b-162:

पुण्याहं वाचयित्वा तु लिङ्गपीठे तु शोधयेत् । शान्तिकुम्भस्य तोयैश्च देवेशमभिषेचयेत् ॥
शिल्प्यादिस्पर्शशान्त्यर्थं भवेदेतद्द्विजोत्तमाः ।

cf. *Ajitāgama* 18, 220-223a.

[10] C, F, G : शुद्धिं pour शुद्धं [11] A : पुण्याहं प्रोक्षणं [12] B : ततत्स्नपनमाचरेत्

[13] cf. *Kāmikāgama* I 64, 172-173 et 180-181a:

कुम्भान्सर्वान्समानीय वेदिकोपरि संस्थितान् । सर्वमङ्गलसंयुक्तं कृत्वा ग्रामप्रदक्षिणम् ॥
स्थण्डिले त्वग्रकल्पिते तु पूर्ववद्विनिवेशनम् । कुम्भाद्बीजं समादाय लिङ्गमूर्धनि विन्यसेत् ॥
जलेन कुम्भवर्धन्योः स्नापयेल्लिङ्गपिण्डिके । विद्येश्वरघटस्थाणूपीठे पूर्वादितो न्यसेत् ॥
तत्कुम्भस्थतोयेन स्नापयेत्परमेश्वरम् ।

voir aussi *Ajitāgama* 18, 223b-237.

[14] A : वेद्यां तु [15] C : कुम्भम् pour कुम्भान् [16] C : बाह्यायाम pour बाह्यधाम

[17] A : स्थापनं क्रमात् ; B : स्नपनं क्रमात् [18] C, F, G : त्वस्मिन् [19] B : लिङ्गं pour लिङ्गाद्

तद्घटाद्बीजमानीय लिङ्गमध्ये तु योजयेत्। तदा ध्यानसमायुक्तं हृदा मूलं सुयोजयेत् ॥ ८५ ॥
मनोन्मनीं च वर्धन्यां वामपीठे तु योजयेत्। ततो [1]विद्येशकलशे विद्येशान्परितो न्यसेत् ॥ ८६ ॥
तत्तद्घटाम्बुभिस्तत्तन्मूर्ति[2]मेवाभिषेचयेत्। [3]परिवारं ततः स्थाप्य महापीठं च विन्यसेत् ॥ ८७ ॥
आसनावाहनादीनि [4]चार्चनोक्तवदाचरेत्। महाहविश्च दत्त्वा तु ताम्बूलं च निवेदयेत् ॥८८ ॥
स्नापनं तत्र कुर्वीत यथाविधिपुरःसरम्।

[लिङ्गप्रतिष्ठाफलम्[5]]

एवं यस्तु विधानेन स्थापयेल्लिङ्गमादरात् ॥ ८९ ॥
[6]कुलैकविंशमुक्तात्मा शिवलोके स मुच्यते ॥ ९० ॥

इति [7]श्रीमद्रौरवतन्त्रे[क्रियापादे][8]लिङ्गस्थापनविधिर्नाम अष्टाविंशः पटलः

---

[1] A : विद्येशकलशान्विद्येशान् सकलान् यजेत् ; C, G : विद्येश्वरान् कालान् विद्येशान् परितो यजेत्
[2] A : तत्र मूर्तिं pour तत्तन्मूर्तिं [3] A : परीवारं [4] A omet च
[5] Cf. *Kāraṇāgama* I 59, 1-2a :
अथ वक्ष्ये विशेषेण लिङ्गस्थापनमुत्तमम्। धन्यं यशस्करं चायुर्वर्धनं पुत्रवृद्धिदम् ॥
भुक्तिदं मुक्तिदं सर्वदानयज्ञफलप्रदम् ॥
cf. *ibid* II 21, 1 :
अथातः संप्रवक्ष्यामि सर्वलोकहिताय च। राजराष्ट्राभिवृद्ध्यर्थं शिवस्थापनमुत्तमम् ॥
cf. *Cintyāgama* 20, 64a :
एवं यः स्थापयेल्लिङ्गं स पुण्यां गतिमाप्नुयात्।
Voir aussi *Ajitāgama* 18, 288b-292.
[6] A, B : कुलैकविंशमुक्ताभिः ; une meilleure lecture semble être कुलैकविंशयुक्तात्मा शिवलोके महीयते
[7] B omet श्रीमद्रौरवतन्त्रे
[8] A : लिङ्गस्थापनविधिपटलस्त्रिंशः ; B : लिङ्गस्थापनविधिर्नाम त्रिंशः पटलः ; C, G : लिङ्गस्थापनविधिर्नाम चतुर्थः पटलः; E : लिङ्गस्थापनविधिश्चतुर्थः ; F : लिङ्गस्थापनपटलश्चतुर्थः

[एकोनत्रिंशः पटलः]

[पिण्डिकास्थापनम्[1]]

अतः परं प्रवक्ष्यामि पिण्डिकास्थापनं परम् । प्रागुक्तलक्षणोपेतं पीठं कुर्यात्तु शैलजम्[2] ॥ १ ॥

[आधारशिला[3]]

तत्पीठव्याससदृशं [4]नन्यावर्त[5]शिलोदयम्[6] । लिङ्गव्याससमं[7] मध्ये [8]गाधं [9]युक्तं तु कल्पयेत् ॥ २ ॥
नन्यावर्तशिलाश्चैव[10] चतस्रः[11] परिकल्पयेत् । ईशानाग्नानलाग्रं च [12]वारुणे सौम्यकेऽग्रकम्[13] ॥३ ॥

---

[1] Pour पिण्डिकास्थापनविधि voir *Aṃśumatkāśyapa* 96, *Aṃśumadāgama* 56, *Acintyaviśvasādākhya* 71, *Kāmikāgama* II 32 et 35, *Kāraṇāgama* I 134, *Diptāgama* 59, *Virāgama*, 70, *Suprabhedāgama* I 54 et *Sūkṣmāgama* 64.

[2] Pour पिण्डिकालक्षण voir le dernier *paṭala* (लिङ्गस्थापनविधि) *śl.* 72-81.
cf. *Kāraṇāgama* I 9, 140b–146 et 165-166:

"पीठमथ शृणु ।
स्त्रीशिलां तु परिग्राह्य पीठं कुर्याद्विशेषतः । लिङ्गविस्तारमानेन त्रिगुणं पीठविस्तृतम् ॥
कर्णाद्द्विगुणमेवं वा त्रिगुणं पीठविस्तृतम् । कर्णस्य द्विगुणार्धं वा लिङ्गदैर्घ्यसमं तु वा ॥
गर्भगेहं त्रिधा भज्य भागैकं पीठविस्तृतम् । लिङ्गमानेन हर्म्यं स्याल्लिङ्गमानेन पिण्डिका ॥
पूर्वाकृतिर्यथा पीठं तथा कुर्यात्पुनः पुनः । अन्याकृतिर्न कर्तव्या कृता चेत्कर्तृनाशिनी ॥
वेदाश्राष्टाश्रमानं तु विभजेदष्टधा पुनः । गुणभागमधस्त्यक्त्वा बाणांशं पीठिकोच्छ्रयम् ॥
ब्राह्मयवैष्णवमानं तु षोडशांशेन भाजयेत् । सप्तभागमधो मुक्त्वा ग्रहांशं पिण्डिकोच्छ्रयम् ॥
भागार्धं तत्त्रिपादं वा समं वा शेषनिर्गमम् । मूलादष्टांशमग्रे तु हीनं स्यात्पद्मपीठके ।
सर्वेषामेव पीठानामुपानात्पीठविस्तरम् । पीठिकालक्षणं पोक्तम्"

voir aussi *Ajitāgama* 16,1-10 et 46-52

[3] cf. *Suprabhedāgama* I 33, 111-119a:

लिङ्गस्य पीठिका चेत्तु मध्येऽष्टाश्रकमान्वितम् । अवटं कारयेद्धीमान्विष्णुभागसमं यथा ॥
ब्रह्मभागप्रवेशार्थं तन्मानाच्चतुरश्रकम् । घृतवारिघटान्नालं सकले त्वासनं विना ॥
नन्यावर्तशिलां वक्ष्ये पीठाधस्ताच्चतुश्शिला । परितस्तालमात्रं वा षडङ्गुलमथापि वा ॥
पीठविस्तारतोऽधिक्या नन्यावर्तशिलाः शुभाः । समन्ताच्चतुरश्रास्तु ब्रह्मभागसमोन्नताः ॥
अथवा चतुरश्रस्य चाष्टांशात्सप्तमोच्छ्रितिः । गर्भस्य नवभागैकं पादाधारशिला शुभा ॥
तदर्धमेकमेवं वा तन्नवांशैकमुच्छ्रितिः । चतुरश्रस्य चाष्टांशादेकांशं मध्यनिम्नगम् ॥
लिङ्गतारप्रमाणेन खातविस्तारमानकम् । नवनिम्नं तु तन्मध्ये रत्नन्यासार्थमुच्यते ॥
ब्रह्मोपलासमोत्तुङ्गा तत्तारार्ध्यर्धविस्तृता । एवं कूर्मशिला सिद्धा सुदृढा चतुरश्रका ॥
एवमुक्तास्तु सर्वज्ञाः किंचिन्मानाधिकास्तु वै ।

voir aussi *Ajitāgama* 18, 172-179

[4] B : नन्यावर्तं pour नन्यावर्त [5] C, F, G : शिलोरकम् pour शिलोदयम्

[6] C, F et G ajoutent le demi-*śloka* : ब्रह्मभागोच्चसदृशं नन्यावर्तशिलोदयम्

[7] A : समो pour समं [8] A, B : गाढं [9] C, F, G : युक्त्या [10] A , B : शिलां चैव pour शिलाश्चैव

[11] A : चत्वारः ; B : चतुरः [12] B : पारणे [13] A, B : गृहम् pour अग्रकम्

नन्द्यावर्तशिलादेवाः[1] प्रोच्यन्ते[2] स्थापनक्रमात्। तद्व्याससदृशं ब्रह्म[3]शिलाव्यासमुदाहृतम्॥ ४॥
[4]तद्व्यासाग्न्यंशकैर्शं स्याद्वेदांशेऽशं तु चोन्नतम्। लिङ्गव्याससमं मध्ये [5]निम्नमर्धाङ्गुलं तु वा॥ ५॥
[6]गुणाक्षियवमानं वा [7]गाधं तु समतां नयेत्। [8]रत्नन्यासार्थमत्रैव निम्नं रत्निप्रमाणतः[9]॥ ६॥

[जलाधिवासः[10]]

[11]कृत्वैवं [12]पञ्चगव्यैश्च स्नाप्य [13]पीठादि संस्कृतम्। जलाधिवासनं कुर्यान्नाभिमात्रे जले बुधः॥ ७॥
चतुर्गात्रसमायुक्तां[14] प्रपां [15]कृत्वातिसुन्दराम्[16]।

[मण्डपः[17]]

प्रासादस्याग्रतो [18]वैशे सौम्ये वा मण्डपं कुरु॥ ८॥
नवहस्तविशालं तु कलास्तम्भसमन्वितम्। सर्वालंकारसंयुक्तं [19]मध्येऽग्न्यंशेन वेदिका॥ ९॥
[20]विशालं [21]तत्त्रिभागैकमुत्सेधं सोपवेदिकम्। [22]महाशास्वीशकोणे [23]च योनिकुण्डानि कल्पयेत्॥ १०
उत्तरे स्नानवेदिं[24] च युक्त्या तु परिकल्पयेत्। गोमयालेपनं कृत्वा पुण्याहप्रोक्षणं कुरु॥ ११॥

---

[1] C, F, G : वेदाः pour देवाः [2] A, B, C : प्रोच्यते [3] A : तिल pour शिला
[4] A : तद्व्यद्व्यंशकेशं स्याद् ; B : तद्व्यंशकं प्रशस्यं स्याद् [5] B : निम्नं मध्याङ्गुलं तु वा
[6] B : गुणाक्षयावमानं वा ; C : गुणाक्षयसमानं वा ; F : गुणाक्षयसमानं वा
[7] A : भासं pour गाधं [8] A : कर्तव्या सार्धमन्त्रैव ; C, G : रत्नन्यासार्धमन्त्रैर्वा
[9] F : प्रमाणकम् pour प्रमाणतः
[10] cf. *Kāmikāgama* II 35, 121-124 :
प्राग्वत्संस्नाप्य देवीं तु वस्त्रगन्धादिनार्चयेत्। प्रदक्षिणं नयेद्ग्रामे जलतीरे निवेश्य च॥
स्थण्डिलं तत्र निक्षिप्य स्थापयेत्तत्र पिण्डिकाम्। कलशान्स्थापयेदष्टौ लोकपालाधिपान्क्रमात्॥
देवीं च कलशानिष्टा लम्बकूर्चसमन्वितान्। नववस्त्रपरिच्छन्नां फलकोर्ध्वे जलान्तरे॥
स्थापयेदभितोऽष्टौ तु कलशान्सूत्रसंयुतान्। पिधानाम्बरहैमांस्तान्सकूर्चाञ्शक्त्यधिष्ठितान्॥
[11] B : कृत्वा तु [12] C, G : पञ्चगव्यस्थं स्नाप्य ; F : पञ्चगव्यैस्संस्नाप्य
[13] A : पीठादयो स्मृतः ; B : पीठादयः स्मृताः ; C, G : पीठादयो स्मृताः
[14] A, B : युक्तं pour युक्तां [15] B : कृत्वा तु pour कृत्वाति [16] F : सुन्दरम् pour सुन्दराम्
[17] cf. *Virāgama* 70, 2b-5a et 17:
प्रासादस्याग्रतः कुर्यान्मण्टपं चतुरश्रकम्। पञ्चसप्ताष्टहस्तं वा नवहस्तमथापि वा॥
स्तम्भैः षोडशभिर्युक्तं चतुर्द्वारसमन्वितम्। मध्यमे वेदिकां कुर्यात्तालमात्रसमुच्छ्रयाम्॥
वितानध्वजमाच्छाद्य दिग्ध्वजैश्च प्रलम्बितम्। दर्भमालाभिरावेष्ट्य तोरणैरुपशोभितम्॥
यावदर्श्रं भवेत्पीठं तावदर्श्रं तु कुण्डकम्। वृत्तपीठस्य हे ब्रह्मन्वृत्तकुण्डमिहोच्यते॥
[18] B : वाशे pour वैशे [19] A : मध्येग्न्यैशोपवेदिका [20] B omet le demi-*śloka* 10a
[21] A : तत्र pour तत्रि [22] A : महेशा pour महाशा [23] A : कोणेश pour कोणे च
[24] B, F : वेदीं pour वेदिं

[शयनाधिवासः[1]]

स्थण्डिलं शालिभिः कुर्या[2]त्तण्डुलैस्तिललाजकैः । दर्भैः पुष्पैः परिस्तीर्य [3]फलकां चोपरि न्यसेत्॥१२॥
शयनं [4]कल्पयेत्तस्मिन्नववस्त्रैर्विशेषतः । जलात्पीठं समानीय स्नानवेद्यां निधापयेत् ॥ १३ ॥
गव्यैर्गन्धोदकैश्चैव [5]त्वभिषिच्यास्त्रमन्त्रतः । हृदा गन्धादिभिर्यष्टा[6] [7]कण्ठे प्रतिसरं कुरु ॥ १४ ॥
[8]शयने शाययेत्पीठं प्राङ्मुखोत्तरयोनिकम् । शांकरादिषु तद्वाह्ये [9]नन्यावर्तशिला[10] न्यसेत् ॥ १५ ॥
[11]गन्धाद्यैस्तु हृदाभ्यर्च्य रक्तवस्त्रेण वेष्टयेत् ।

[कुम्भस्थापनम्[12]]

नवसंख्यान्नवान्कुम्भान्सूत्रादिभिः समन्वितान् ॥ १६ ॥
नानागन्धाम्बुसंपूर्णान्वेद्यां तु स्थापयेत्क्रमात् । [13]पीठस्य [14]शांकरे प्राच्यां [15]पृष्ठे प्रधानकुम्भकम् ॥१७॥
शक्रादिषु क्रमात् [16]स्थाप्य चान्यकुम्भानि[17] देशिकः । गौरीं प्रधानकुम्भे तु [18]वामादीनन्यकुम्भके ॥ १८

---

[1] Cf. *Virāgama* 70, 5b-6a :
शालिभिर्विकिरेत्तत्र तण्डुलैश्च तिलैस्तथा । पञ्चभिः कम्बलैर्युक्तं पीठं तस्योपरि न्यसेत् ॥

[2] A : स्थण्डिलैस् pour तण्डुलैस्

[3] A : फलकां च परिन्यसेत् ; le mot फलक se trouve ici au féminin au lieu du masculin.

[4] B : कल्पयेद्धीमान [5] A omet तु

[6] voir *Ajitāgama*, vol I, p. 218 note 3.

[7] A : कर्णे [8] B : शयनं [9] B : नन्यावर्तं pour नन्यावर्त [10] A : शिलां pour शिलाः

[11] A, B : गन्धाद्यैः स्वहृदाभ्यर्च्य

[12] cf. *Kāmikāgama* II 35, 146-153:
" तद्देशे करकं न्यसेत् ।
सूत्रवस्त्रपरिच्छन्नं नवरत्नोदरं भवेत् । सहैमपङ्कजं कूर्चफलपल्लववक्त्रकम् ॥
तन्मध्ये सासनां देवीमर्चयेद्गन्धसंमुखैः । वर्धनीरष्टसंख्याताः कूर्चवस्त्रससूत्रकाः ॥
सहैमाः पल्लवोपेताः सापिधानाः फलोद्गहाः । वामाद्यधिष्ठिता बाह्ये परितो विनिवेशयेत् ॥
गन्धाद्यैरर्चयित्वा तु पिण्डिकां वर्धनीमपि । तत्त्वतत्त्वेशिसंयुक्तां मूर्तिमूर्तीश्वरीं न्यसेत् ॥
कर्णस्याधो गले कर्णाद्ऊर्ध्वे तत्त्वत्रयं स्यसेत् । क्रिया ज्ञानं तथेच्छेति त्रितत्त्वेशाः प्रकीर्तिताः ॥
धारिका दीप्तिमत्युग्रा ज्योत्स्ना चेता बलोत्कटाः । धात्रीविधीति मूर्तिभ्यः परिभाव्य क्रमेण तु ॥
पञ्चपक्षेऽथवा ग्राह्यं त्वत्रानुक्तं तु यद्भवेत् । लिङ्गसंस्थापनप्रोक्तविधिनाखिलमाचरेत् ॥
चन्दनाद्यैः समभ्यर्च्य होमकर्म समारभेत् ।

[13] C, G : पिण्डस्य [14] A : शांकरो [15] A : कृष्टे ;E, F : त्रिष्टे

[16] A : स्थाप्य मर्त्य pour स्थाप्य चान्य ; B : स्थाप्य मध्ये ; C : स्थाप्यमन्य ; F : स्थाप्यान्य

[17] Le mot कुम्भ se trouve ici au neutre au lieu du masculin

[18] A : वामादीनान्त्यकुम्भकैः ; B : वामादीनां तु कुम्भकैः ; C : वामादीशान्त्यकुम्भकैः

ध्यानमन्त्रसमायुक्तं [1]हविरन्तं समर्चयेत् ।

[होमः[2]]

[3]पश्चाद्धोमं प्रकर्तव्यमनेन विधिना क्रमात् ॥ १९ ॥

अग्न्याधानाधिकं [4]सर्वमग्निकार्योक्तमाचरेत् । वञ्जुलं [5]खादिराश्वत्थवटं [6]शक्रान्महादिशि ॥ २० ॥

[7]पालाशं स्यात्प्रधानस्य [8]कथ्यन्ते समिधः क्रमात् । समिदाज्यौदनं [9]मुद्गतिलसर्षपमाषकम्[10] ॥ २१ ॥

अपूपं [11]लाजाः सक्तुश्च [12]क्षौद्रं यथाक्रमेण तु । गौर्यास्तु [13]पञ्चब्रह्माङ्गैः प्रत्येकं तु शताहुतिः ॥ २२ ॥

[14]गौरीमिमायमन्त्रेण गौरीगायत्रिमन्त्रतः[15] । घृतेन जुहुयाद्धीमान्प्रत्येकं पञ्चविंशतिः ॥ २३ ॥

[16]बीजमुख्येन मन्त्रेण स्पृष्ट्वा स्पृष्ट्वा दशाहुतिः । एवं तु जागरं[17] रात्रौ प्रभाते विमले शुभे ॥२४ ॥

आचार्यो मूर्तिपैः [18]स्नात्वा सकलीकृतविग्रहः । [19]पिण्डिकां [20]कलशानग्निमभ्यर्च्य विधिना ततः ॥२५॥

ततो जयादिभिर्हुत्वा ब्रह्माङ्गैश्च दशाहुतिः । [21]गौरीगायत्रिमन्त्रेण पूर्णाहुतिमथाचरेत् ॥ २६ ॥

[जीर्णपिण्डिकाविसर्जनम्[22]]

आचार्यादीन्समभ्यर्च्य वस्त्रैर्धान्यैर्धनैरपि । गर्भगेहं प्रविश्याथ विसृजेज्जीर्णपिण्डिकाम् ॥ २७ ॥

---

[1] B : हविषान्तं

[2] cf. *Virāgama* 70. 48b-57a:
ततो होमं प्रकुर्वीत लक्षणेन समन्वितम् । पलाशखदिराश्वत्थप्लक्षन्यग्रोधमेव च ॥
उदुम्बरमपामार्गं खदिरं च विशेषतः । पूर्वादीशानपर्यन्तं क्रमेण परिकीर्तितम् ॥
ईशान इन्द्रयोर्मध्ये शमीं चैव तु विन्यसेत् । अष्टोत्तरशतं चैव पञ्चाशत्पञ्चविंशतिः ॥
सर्वेषां चैव होमानां पलाशेध्ममिहोच्यते । समिदाज्यचरूँल्लाजान्मुद्गमाषांश्च सर्षपान् ॥
समिधं सद्यमन्त्रेण वक्त्रेणाज्यं तथैव च । अघोरेण चरुं हुत्वा लाजान्वामेन होमयेत् ॥
नेत्रेणैव तु मुद्गं स्यान्माषे हृदयमुच्यते । ईशानेन तु मन्त्रेण सर्षपं चैव होमयेत् ॥
प्रासादेन तु मन्त्रेण प्रत्येकं पञ्चविंशतिः । गौरीबीजेन मन्त्रेण प्रत्येकं पञ्च विंशतिः ।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् । स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ॥
जयादिरभ्याधानं च राष्ट्रभृच्चैव होमयेत् । हुत्वान्ते तु यदस्येति स्विष्टकृद्धूयते क्रमात् ॥

[3] C, F, G : पश्चाद्धोमं तु कर्तव्यम् ; le mot hom se trouve ici au neutre au lieu du masculin

[4] B : सर्वमग्निकार्यक्रमाच्चरेत् [5] A : खदिर pour खादिर [6] B : शक्र pour शक्रान् ; C : शंख

[7] B : पलाशं [8] B : कथिताः [9] A : मुद्गं pour मुद्ग [10] A : माषका: pour माषकम्

[11] A : लाजसक्थुश्च pour लाजाः सक्तुश्च [12] B : क्षौद्रं चैव यथाक्रमम् [13] A, B, C : ब्रह्मपञ्चाङ्गैः

[14] **गौरीमिमाय** cf. *Taittriyāraṇyaka* I 1, 37 ; **गौरीगायत्री** ओं महादेव्यै च विद्महे रुद्रपत्नी च धीमहि तन्नो गौरी प्रचोदयात् (*Yogajāgama* T. No. 161, p. 38)

[15] L'ordre des *śloka* dans le ms. B est le suivant: 24b, 25, 23, 24a, 26 etc.

[16] A, B : बीजमन्त्रेण मुख्येन [17] "कृत्वा" इति शेषः [18] C, G : सार्धं pour स्नात्वा

[19] A : पिण्डिकात् [20] C, F, G : कलशानग्नीन् [21] C : गौरि ponr गौरी

[22] cf. *Virāgama* 70. 26b-29:
ततः प्रभाते विमले सुमुहूर्ते सुलग्नके । आचार्यं पूजयित्वा तु शिल्पिनं पूजयेत्ततः ॥
पश्चाद्गर्भगृहं गत्वा आचार्यः शिल्पिना सह । मृण्मयं वृषभं कुर्यात्सुवर्णखुरशृङ्गकम् ॥
वृषगायत्रिमन्त्रेण प्रासादेन समन्वितम् । वृषभस्य तु शृङ्गेण कर्षयेत्पीठमेव च ॥
पीठं विसर्जयेत्तत्र जलमध्ये तु निक्षिपेत् ।

[पिण्डिकास्थापनम्[1]]

[2]वज्रबन्धाष्टबन्धं वा[3] [4]सुधापाकं परिस्तरेत् । नन्द्यावर्तशिलां योज्य [5]बन्धोर्ध्वे पङ्कमालिपेत् ॥ २८
मुहूर्ते समनुप्राप्ते सर्वालंकारसंयुतम् । [6]वेद्यास्तु पीठमुद्धृत्य शनैर्गर्भगृहं विशेत् ॥ २९ ॥
युक्त्या पीठं समुद्धृत्य लिङ्गस्य [7]मूर्धमार्गतः । शनैः सुयोजयेत्पीठं नालमुत्तरगं[8] विदुः ॥ ३० ॥
गन्धद्रव्येण सुदृढं विवरं तु [9]निवर्तयेत् । शिलाभिर्वेष्टकाभिर्वा[10] स्थलं दृढतरं कुरु ॥ ३१ ॥

[कुम्भाभिषेकः[11]]

शुद्धिं कृत्वा तु [12]गव्यैश्च पुण्याहप्रोक्षणं कुरु । [13]वेद्यास्तु कुम्भानानीय पीठाग्रे तु निधापयेत् ॥ ३२ ॥
कुम्भाद्बीजं समानीय [14]पीठकण्ठे तु योजयेत् । तज्जलैरभिषिच्याथ परितोऽष्टघटैरपि ॥ ३३ ॥
संस्नाप्य स्नपनं कृत्वा चार्चनोक्तं [15]समाचरेत् । [16]प्रभूतं च हविर्दत्त्वा ताम्बूलं च निवेदयेत् ॥ ३४ ॥

इति [17]श्रीमद्रौरवतन्त्रे [क्रियापादे] [18]पिण्डिकास्थापनविधिर्नामैकोनत्रिंशः पटलः

---

[1] cf. *Virāgama* 70, 31-34 :

लिङ्गे पीठं समायोज्य सुस्निग्धं कारयेत्ततः । अष्टबन्धं प्रकर्तव्यं लक्षणेन समन्वितम् ॥
लाक्षा चैव मधूच्छिष्टं शर्करा सर्जरं तथा । वालुकेनेष्टकाचूर्णं सदृशं घनतैलकम् ॥
समं कृत्वा तु विप्रेन्द्र तैलमर्धं विधीयते । ताम्रपात्रे विशेषेण पाचयेच्छिल्पिना सह ॥
लिङ्गपीठकयोर्मध्ये पक्वद्रव्यं विनिक्षिपेत् । एवं यः कुरुते मर्त्यः शिवलोके महीयते ॥

[2] Pour plus de détails au sujet du वज्रबन्ध et de l'अष्टबन्ध voir *Ajitāgama* 18, 216-218

[3] B : वस्त्रबन्धाष्टबन्धं वा ; C, E : वज्रहस्ताष्टबन्धं वा [4] C, F, F : सुधापङ्कं

[5] A : बन्धार्थे ; B : बन्धार्धे [6] A : वेद्यां तु ; F : वेद्या तु [7] B : मूर्ध्नि pour मूर्ध

[8] A : उत्तरणं pour उत्तरगं [9] A, E, F : निवृत्तये [10] B : इष्टिकाभिर्वा pour इष्टकाभिर्वा

[11] cf. *Virāgama* 70, 54-59:

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः । नववस्त्रपरीधानः सोष्णीषः सोत्तरीयकः ॥
कुण्डलैः कर्णिकाहारैरर्घ्याङ्गुलीयकमेव च । प्रशान्तमानसो भूत्वा स्नापयेल्लिङ्गमूर्धनि ॥
गौरीबीजेन वर्धन्या स्नापयेत्पिण्डिकोपरि । पूर्वादीशानपर्यन्तं विद्येशान्स्नापयेत्ततः ॥
अष्टोत्तरशतेनैव पञ्चाशत्पञ्चविंशतिः । स्नपनं कारयेत्तत्र यथाविभवविस्तरम् ॥
गन्धैः पुष्पैश्च धूपैश्च दीपैश्चैव सुपूजयेत् । हविर्निवेदयेत्पश्चात्ताम्बूलं दापयेत्ततः ॥
ब्राह्मणान्भोजयेत्तत्र शैवान्संभोजयेत्ततः । पीठस्थापनमेवोक्तम् ''

[12] B : गव्येन [13] A : वेद्यां तु [14] A : पीठं कर्णे तु ; B : पीठकर्णे तु [15] A : समर्चयेत्

[16] B, C, F : प्रभूतहविषं दत्त्वा [17] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे

[18] A : पिण्डिकास्थापनविधिपटलोऽष्टाविंशः; B : पिण्डिकास्थापनं नाम अष्टाविंशः पटलः ; C : पिण्डिकास्थापनविधिर्नाम पञ्चम: पटलः; E : पिण्डिकास्थापनविधिः पञ्चमः पटलः; F : पिण्डिकास्थापनपटलः पञ्चमः

[त्रिंशः पटलः]

[[1]क्षेत्रलिङ्गप्रतिष्ठाविधिः[2]]

[क्षेत्राष्टकम्[3]]

उभयार्थं तु कर्तुश्च मोक्षार्थं जन्मवेदनात्[4]। तटाकतीरे [5]वाप्यास्तु नद्यास्तीरे [6]समुद्रके ॥ १ ॥
तीरे तु सागराणां [7]तु पर्वताग्रे वनान्तरे। [8]श्मशाने [9]चैश्वरे ह्म्यें स्थापयेत्क्षेत्रलिङ्गकम् ॥ २ ॥
[10]क्षेत्राष्टका इमे प्रोक्ता दशब्द्व्युत्तरं फलम्। [11]पौरुषादार्षकं श्रेष्ठमार्षाद्गाणपकं वरम्[12]॥ ३ ॥

---

[1] Le manuscrit sur ôles n° 15545 de l'Institut Français d'Indologie renferme quelques citations des *Rauravāgama*, *Acintyaviśvasādākhya* et *Kāmikāgama* relatives à la *kṣetraliṅgapratiṣṭhā* notamment les *śloka* 1b à 12a dont le texte nous a été très utile pour le rétablissement des passages corrompus. Ce manuscrit est représenté en note par le symbole H.

[2] Pour क्षेत्रलिङ्गप्रतिष्ठा voir *Acintyaviśvasādākhya*, *samādhiliṅgasthāpanapaṭala*, *Ajita* 18, *Kāmika* I 64 et II 66, *Kāraṇa* I 59 et II 21, *Kiraṇa* III 26, *Cintya* 20, *Dipta* 20, *Makuṭa* 10, *Mataṅgaqārameśvara*, *kriyāpāda* 39, *Yogaja* 4, *Santānasaṃhitā* 19, *Suprabheda* I 36, et *Sūkṣma* 42.

[3] cf. *Acintyaviśvasādākhya*, n° 15545, folio 1a :

वक्ष्ये समाधिलिङ्गस्य प्रतिष्ठां द्विजसत्तमाः। द्विविधं तत्सुसंप्रोक्तमालये वा बहिस्थले ॥
प्राकारचतुरस्यान्ते (चतुर्थस्यान्ते ?) पञ्चमस्य सुमध्यमे। स्थापितं विधिना लिङ्गं परं शृणुत सांप्रतम् ॥
नदीतीरे तटाके वा उद्याने स्वमठेऽपि वा। अन्यत्र च मनोयोग्ये स्थापितं द्विविधं भवेत् ॥

cf. *Kāmika* II 66, 5b-7a :

स्वप्रधानं पराङ्गं च द्विविधं स्थापनं मतम्। ग्रामादौ वा नदीतीरे पुष्करिण्यास्तटेऽपि वा ॥
वने चोपवने वापि पर्वते वा मनोरमे। स्थानेऽन्यत्र च कर्तव्यं स्वप्रधानस्य मन्दिरम् ॥

[4] B : वेदनम् pour वेदनात्

[5] B : वाप्यां तु [6] B : समुद्रके [7] B : च pour तु

[8] A : दशाने ; E : ईशाने ; G : मशाने [9] A, G : चेश्वरो

[10] A : क्षेत्राष्टकानुमे ; C : क्षेत्राष्टका इमे

[11] A : पौरुषादार्षं श्रेष्ठमार्षाद्गाजपरं वरम् ; B : पौषादर्शश्रेष्ठमासाद् गाणपरं स्मृतम् ; C : पौरुषादार्षं श्रेष्ठं माषमुद्गाणपः परम् , E : पौरुषादार्षं श्रेष्ठमार्षाद्गाणपः परम् ; le ms. H ajoute : गाणपाद्दैविकं श्रेष्ठं दैवे स्वायंभुवं वरम

[12] Pour les détails relatifs aux liṅga tels que पौरुष, आर्ष, गाणप et दिव्य voir *Aṃśumatkāśyapa* T. n° 1, pp. 430-431:

लिङ्गं चतुर्विधं ज्ञात्वा स्थावरं शास्त्रचोदितम्। दैविकं चार्षकं चैव गाणपं मानुषं तथा ॥
चतुर्विधेषु भेदेषु दैविकं लक्षणं शृणु। दीर्घाकारं भवेल्लिङ्गं निम्नोन्नतविवर्जितम् ॥
रेखाकोटरसंयुक्तं मुखे धारा यवोन्नता। पर्वताग्राकृतिर्लिङ्गं बह्वग्रं त्वग्रतः शिखा ॥

तस्मान्मुख्यं तु दिव्यं यद्देवालयस्थलाशयम्[1] । साधारणं श्मशानं तु मरुत्कानां परं भवेत् ॥ ४ ॥

[श्मशाने क्षेत्रलिङ्गस्थापनम्[2]]

[3]तस्माद्वै दीक्षितानां तु [4]योगिनां तु वरं ततः । सर्वेषां [5]च श्मशानं तु वरं [6]ब्रह्मविदां विदुः ॥ ५ ॥
श्मशान[7]भुवनादूर्ध्वं नेत्राग्नियुगतः[8] स्थलम्[9] । शिलाभिर्वेष्टकाभिर्वा स्थलोच्चं परिकल्पयेत् ॥ ६ ॥
तदूर्ध्वं स्थापयेल्लिङ्गं प्रतिमां वा विशेषतः । लिङ्गं चेत्प्राङ्मुखं स्थाप्यं पश्चिमाननमेव वा[10] ॥ ७ ॥

कराभ्यां संपुटाकारं ब्रह्मसूत्रविवर्जितम् । इत्येतैर्लक्षणैर्युक्तं लिङ्गं दैविकमुच्यते ॥
मूलस्थूलं भवेल्लिङ्गमग्रमूलं तथैव च । मध्यस्थूलं तु लिङ्गानां नालिकेरफलाकृति ॥
कदलीफलाकृति श्रीबिल्वस्यैव फलाकृति । लिङ्गमार्षकमाख्यातं ब्रह्मसूत्रविवर्जितम् ॥
कूष्माण्डस्य फलाकारं मातुलुङ्गफलाकृति । उर्वारुकफलाकारं कपित्थस्य फलाकृति ॥
तालफलवदाकारं गाणपं लिङ्गमुच्यते । द्वारं वा गर्भमानं वा हस्तमानमथापि वा ॥
शिल्पशास्त्रोक्तमानं वा छत्राकारशिरोन्नतम् । एकवर्णं सुसंस्निग्धं ब्रह्मसूत्रसमन्वितम् ॥
इत्येतैर्लक्षणैर्युक्तं लिङ्गं मानुषमुच्यते ।

[1] C, G : स्थलाशनम् pour स्थलाशयम्

[2] cf. *Acintyaviśvasādākhya*, fol. 1a-3a:

महात्मानश्च सर्वज्ञा नानाश्चर्यसमन्विताः । अनेकजन्मजन्मैश्च[न्मभिः?]कृतकृत्या मदाज्ञया ॥
मदंशभाजिनः प्रीत्या मत्स्वरूपपरायणाः । दयादाक्षिण्यसंयुक्ता निरपेक्षाणिमादिषु ॥
सर्वागमज्ञाः सर्वज्ञा लोकरक्षार्थमागताः । समयादिज्ञानपर्यन्तदीक्षया संयुताश्च ये ॥
येषां मृतस्य काले तु दहनं न प्रशस्यते । यदि मोहेन कुर्याच्चेद्राजराष्ट्रस्य दोषकृत् ॥
तस्मात्समाधिमेतेषां कारयेद्विजसत्तमाः । पश्चात्षाण्मासकान्ते तु लिङ्गं संस्थापयेत्सुधीः ॥
सामान्यमिदमाख्यातं विशेषं तु वदाम्यहम् । आचार्यः शिल्पिसंयुक्तः कर्ता कारयिता तथा ॥
वनाद्वनान्तरं गत्वा पर्वतात्पर्वतान्तरम् । यथोक्तं ग्राह्येच्छैलं शुचिं गर्भादिवर्जितम् ॥
निश्चित्य देशिकायैस्तु गृह्णीयादुपलं तथा । लिङ्गं समं वा प्राचिं [प्राज्यं?] वा शिवाधिक्यमथापि वा ॥
स्वस्तिकं मुखलिङ्गं वा धारालिङ्गमथापि वा । तेषां विशेषं लिङ्गानां शिवाधिक्यं महाफलम् ॥
समाधिस्थापने लिङ्गमिदमेव महामतम् । तस्माच्छिवाधिकं लिङ्गं स्थापयेद्विधिना द्विजाः ॥
अलाभे अन्यलिङ्गं वा प्रतिष्ठाप्य सुपूजयेत् । प्रासादं नागरं वापि द्राविडं वेसरं तु वा ॥
पञ्चप्रकारसंयुक्तमालयं कारयेद् बुधः । विभवस्यानुसारेण अथवा कारयेत्ततः ॥
लिङ्गं संस्थापयेत्पश्चात्पूर्वोक्तविधिना द्विजाः ॥

[3] A : तस्माद्वेदिक्षितीनां तु [4] A : योगिनीनां वरं ; B : योगिनां च वरं ; C, E, F, G : योगीनां तु परं ततः

[5] A : तु pour च [6] A, C, F : ब्रह्मविदो विदुः [7] A, F : भवन pour भुवन

[8] B, E, G : युगतो pour युगतः [9] B : फलम् pour स्थलम्

[10] cf. *Kāmika* II 66, 1b-15a:

तदर्थं शिवलिङ्गं वा प्रतिमां वा शिवस्य तु । स्कन्दनन्द्यादिरूपं वा मृतप्रतिकृतिं तु वा ॥
कुर्यादायादिसंयुक्तं शिलाद्यैरुक्तवस्तुभिः । शैलं लोहं तथा वार्क्षं मृण्मयं मणिजं तु वा ॥
अर्धचित्रमथाभासं पटादिपरिकल्पितम् । लिङ्गं चेत्प्रतिमा चेद्वा लिङ्गबेरोक्तवर्त्मना ॥

प्रतिमा चेदवाच्यां तु [1]मुखं पीठं तु वा बुधः । सर्वकामप्रदं वापि जयदं वालयं कुरु[2] ॥ ८ ॥
लिङ्गं च पिण्डिकादींश्च[3] [4]नागराद्युक्तमाहरेत्[5] ।

---

[1] G, H : मुखपीठं तु

[2] Pour les détails relatifs aux *liṅga* tels que सर्वकामप्रद et जयद voir *Aṃśumatkāśyapa* 28, 21-24a et 14-17a:

प्रासादस्योच्चतुङ्गे तु षडष्टांशैर्विभाजिते । अधिष्ठानं युगांशं तु वस्वंशं चरणोदयम् ॥
मञ्चमानं तु वेदांशं तलिपं सार्धसप्तकम् । सार्धत्रिभागमञ्चोच्चं सप्तांशं चरणोदयम् ॥
प्रस्तरोच्चं गुणांशं तु शिवांशं वेदिकोदयम् । गलमानं द्विभागं स्याद्रसांशं शिखरं भवेत् ॥
द्विभागं तु शिखामानमेवं स्यात् **सार्वकामिकम्** ।
सप्तशिंतिभागं तु कृत्वा तु सदनोदयम् । द्विभागं धरातलोत्सेधं युगांशं चरणोदयम् ॥
मञ्चमानं द्विभागेन वेदांशं चरणोदयम् । पादोनद्व्यंशमञ्चोच्चं तलिपोच्चं तु तद्द्वयम् ॥
साधांशं प्रस्तरोत्सेधमेकांशं वेदिकोदयम् । द्विभागं ग्रीवमानं तु वेदभागं तु शीर्षकम् ॥
शेषं स्तूप्यूदयं ख्यातं **जयदं** तदुदाहृतम् ।

voir auussi *Ajitāgama*, 12, 72b-47.

[3] C, G : पिण्डिकादिञ्च

[4] A : नाहरेत्युक्तमाहरेत् ; B : नाहरद्युक्तमाहरेत् ; C, G : नागरेत्युक्तमाचरेत्

[5] Pour les détails relatifs aux liṅga tels que नागर, द्राविड et वेसर voir *Aṃśumatkāśyapa* 51, 88b-97 :

नागरं द्राविडं लिङ्गं वेसरं च वदाम्यहम् । लिङ्गोदये तु वेदांश एकांशं कन्यसं तति ॥
तुङ्गे त्र्यंशे शिवांशं तु विस्तारं श्रेष्ठमुच्यते । तयोर्मध्येऽष्टभागे तु नवधा तारमुच्यते ॥
अथोदये कलांशे तु पञ्चांशं शान्तिकं भवेत् । वेदांशं पौष्टिकं ख्यातं गुणांशं जयदं भवेत् ॥
आभिचारं [अभिवारं?] द्विभागं स्याद्व्यासमेवं चतुर्विधम् । एवं त्रयोदशव्यासं नागरे तु विधीयते ॥
लिङ्गोच्चे द्विर्नवांशे तु रसभूतयुगांशके । गुणांशे शान्तिकादि स्याद्द्राविडे तु चतुर्विधम् ॥
वेसरे लिङ्गतुङ्गे तु विंशत्यंशविभाजिते । अष्टांशसप्तषट्पञ्चभागैर्व्यासं प्रकल्पितम् ॥
शान्तिकं पौष्टिकं चैव जयदाद्भुतकं भवेत् । वेसरं च चतुर्भेदं हर्म्यं लिंगस्य पिण्डिका ॥
पादाधारशिला चैव एकजातिस्त्वसंकरम् । यत्रैव कल्पितं लिङ्गं वृद्धिहेतुरुदाहृतम् ॥
अन्योन्यसंकरश्चेत्तु राज्ञो मुखभयावहम् । तस्मात्सर्वप्रयत्नेन संकरं न समाचरेत् ॥
लिङ्गानां नागराद्येवं ख्यातम्''

Pour les détails relatifs aux पीठ ou पिण्डिका voir *Aṃśumatkāśyapa* 52, 1—23 :

अथातो नागरादीनां लिङ्गानां पीठलक्षणम् । लिङ्गोत्सेधसमं पीठविस्तारं चोत्तमं भवेत् ।
पूजांशोच्चसमं पीठतारं कन्यसमुच्यते । तयोर्मध्येऽष्टभागे तु उत्तमादित्रयं त्रयम् ॥
पीठव्यासं त्रिधा भज्य द्विभागं चोत्तमोन्नतम् । व्यासार्धमधमोत्तुङ्गं तयोर्मध्येऽष्टभाजिते ॥
नवधा पीठतुङ्गं तु उत्तमादित्रयं त्रयम् । क्रमेण कथिता विप्र नागरा ह्येवमुच्यते ॥

[शिवालये क्षेत्रलिङ्गस्थानम्[1]]

[2]शिवालये मध्यहारायां स्थापयेदधमान्तरम्[3] ॥ ९ ॥
[4]मध्यमं चैव मर्यादौ [5]वरं स्याद्बाह्यसालके । परे वावरणोपेतं मध्ययोस्तु विना हि तत् ॥ १० ॥
[6]रोगापमृत्यू मृत्युश्च [7]विपच्च रिपुवर्धनम् । [8]शत्रुनाशो [9]महासंपद्विजयः शिवहर्म्यके ॥ ११ ॥
[10]शक्रादिशांकरान्तासु [11]स्थापनात्तु फलं शुभम् । अन्यक्षेत्रेषु सर्वत्र [12]जयदं प्रविधीयते ॥ १२ ॥

लिङ्गस्योच्चसमं व्यासं श्रेष्ठं तन्नवभाजिते । सप्तांशं कन्यसं व्यासं तयोर्मध्येऽष्टभाजिते ॥
नवधा विस्तृतं ख्यातं ब्रह्मविष्ण्वंशयोरपि । उदयं वसुधा भज्य द्विभागं वानलांशके ॥
एकांशं वा विशेषेण स्थलांशे तु निवेशयेत् । शेषं पीठोदयं ख्यातमेवं द्राविडमाचरेत् ।
पूजांशपरिणाहेन समं श्रेष्ठविशालकम् । परिणाहं कलांशे तु भान्वंशमधमं ततिः ॥
तयोर्मध्येऽष्टभागे तु नवधा पीठविस्तृतम् । विष्णुभागसमोच्चं तु पीठं कन्यसमुच्यते ॥
सपादं श्रेष्ठमाख्यातं तयोर्मध्येऽष्टभाजिते । नवधा पिण्डिकोत्तुङ्गं वेसरे ह्येवमाचरेत् ॥
अथवा लिङ्गविष्कम्भत्रिगुणं पीठविस्तृतम् । अथवा लिङ्गविष्कम्भे चतुरश्रीकृते सति ॥
तत्कर्णद्विगुणं वाथ सार्धद्विगुणमेव वा । त्रिगुणं वा विशालं तु पीठानां तु विशेषतः ॥
गर्भगेहत्रिभागैकं चतुर्भागैकमेव वा । पीठव्यासं समाख्यातं विष्णुभागसमोन्नतम् ॥
सामान्यं नागरादीनां लिङ्गनां पिण्डिका इमाः । उपानबाह्यविस्तारं सर्वेषां तु विशेषतः ॥
तदष्टनवदशांशेन हीनमग्रविशालकम् । विष्णुभागसमोत्तुङ्गं सपादं सार्धमेव वा ॥
सामान्यं पिण्डिकानां तु नागरादिसमुन्नतम् । लिङ्गानां सकलानां च सामान्यं पीठलक्षणम् ॥
सकलोदये नवांशे तु व्योमांशं कन्यसोदयम् । गुणांशं श्रेष्ठमानं तु तयोर्मध्येऽष्टभाजिते ॥
नवधा पीठतुङ्गं तु तस्य विस्तारमुच्यते । पीठतुङ्गसमव्यासमधमं पीठमुच्यते ॥
द्विगुणांशोत्तमव्यासं तयोर्मध्येऽष्टभाजिते । नवधा विस्तृतं ख्यातं सकलानां विशेषतः ।
पिण्डिका गोमुखोपेता लिङ्गानां तु विधीयते । गोमुखीरहितं पीठं सकलानां विशेषतः ॥
समाश्रं समवृत्तं वा लिङ्गानां तु विधीयते । सायताश्रायतवृत्तं प्रतिमानां विशेषतः ॥

[1] cf. *Kāmika* II 66, 7b-9a:
देवालयान्तः सालादौ तत्र कल्पितमन्दिरे । परिवारसमोपेतं स्वप्रधानं प्रकीर्तितम् ॥
देवालयादौ सर्वत्र मालिकामण्टपादिषु । परिवारविहीनं यत्कल्पितं त्वङ्गमिष्यते ॥

[2] **A**, B : शिवालय pour शिवालये ; H : शिवालयस्य मध्ये तु

[3] **A**, B : दशमान्तरम् pour अधमान्तरम् ;

[4] **A** : मध्यमं मयादौ तु ; C : मध्यं मर्यादौ तु ; E, G : तन्मध्यमर्यादौ तु ; H : मध्यमं मध्यमर्यादौ

[5] B : परं pour वरं ; H : वारं [6] **A**, **B** : रोगापमृत्युमृत्युश्च ; G . रोगापमृत्युक्रूरश्च

[7] **H** : विपदश्चार्यवर्धनम् [8] **A**, H : शत्रुनाशं [9] A, H : महत्संपद्विजयं [10] **H** : शक्रादीशानपर्यन्तं

[11] **A** : स्थापरा तु फला इमे ; B ; स्थापनात्तु फलं शुभे ; H : स्थापयत्फलमेव तु

[12] **A** ; जयं प्रविधीयते ; B : जयं प्रतिविधीयते

[क्षेत्रलिङ्गविषये बालस्थापननिषेधः[1]]

[2]विनास्य बालनिर्माणं स्थापयेन्मूलमेव तु ।

[मण्डपः[3]]

प्रासादाभिमुखे कुर्यात्प्रपां वा मण्डपं तु वा ॥ १३ ॥

नवहस्तप्रमाणेन षोडशस्तम्भसंयुतम् । मध्ये तु वेदिकांशेन [4]रत्निमात्रं समुन्नतम् ॥ १४ ॥

परितस्त्वग्निकुण्डानि महाशासु युगाश्रकम्[5] । सौम्ये तु स्नानवेदीं च[6] हस्तमानेन कल्पयेत् ॥ १५ ॥

तोरणाद्यैस्तरङ्गैश्च[7] वितानाद्यैरलंकुरु[8] । स्थण्डिलं कारयेद्वेद्यां [9]शालिभिस्तिलतण्डुलैः ॥ १६ ॥

[10]लाजपुष्पैश्च दर्भैश्च स्तीर्यं ब्रह्माणमर्चयेत्[11] । लिङ्गं तु [12]शाययेत्तत्र लक्षणोद्धारमाचरेत्[13] ॥ १७ ॥

---

[1] cf. *Acintyaviśvasādākhya* fol. 3b:

रत्नन्यासादिकं सर्वं पूर्वोक्तेन समाचरेत् । सर्वेषां शिवलिङ्गानां स्थापनं तु यथाविधि ॥
तथा सर्वं समाप्याथ विनाकर्षणमात्रकम् । प्रतिष्ठाप्य मुनिश्रेष्ठाः पूजयेत्परमेश्वरम ॥

[2] A : विनास्य बालनिर्वाणं ; C : विनास्य.....निर्वरणं ; G : विनाशस्य विनिर्वाणं

[3] cf. *Yogajāgama* 4, 37b-48:

यागमण्टपालंकारो वक्ष्यते विधिना युतः । आलयस्याग्रतः कुर्याद्दक्षिणे चोत्तरेऽथ वा ।
प्रतिष्ठामण्टपं कुर्यान्नवाष्टसप्तहस्तकैः । षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा ॥
वितानध्वजसंयुक्तं पताकध्वजसंयुतम् । पूर्णकुम्भैरलंकृत्य वस्त्राद्यैः स्तम्भवेष्टितैः ॥
दर्भमालासमायुक्तं पुष्पमाल्यैरलंकृतम् । चतुस्तोरणसंयुक्तमष्टमङ्गलशोभितम् ॥
क्रमुकैर्नारिकेलैश्च कदलीफलसंयुतम् । चित्रवस्त्रेण संवेष्ट्य मुक्तादामैरलंकृतम् ॥
चतपल्लवसंयुक्तं पताकध्वजसंयुतम् । पूर्णकुम्भैरलंकृत्य नानादीपैः समायुतम् ॥
दूर्वाङ्कुरलमायुक्तं फलपल्लवशोभितम् । एवं मण्टापलंकारं सर्वद्रव्यैर्विचक्षणः ॥
कन्यसत्रयलिङ्गानां कन्यसं मण्टपं भवेत् । मध्यमत्रयलिङ्गानां मध्यमं मण्टपं भवेत् ॥
उत्तमत्रयलिङ्गानां मण्टपं चोत्तमं भवेत् । कूटं वापि प्रपां वापि सर्वत्र परिकल्पयेत् ॥
मण्टपलक्षणमार्गेण कुण्डं वेदिं च कल्पयेत् । तस्य पश्चिमभागे तु उत्तरे वाथ कल्पयेत् ॥
स्नानश्वभ्रं प्रकर्तव्यं लिङ्गानुरूपं कारयेत् । दारुपीठं तु संकल्प्य उत्तरे जलमार्गकम् ॥
एवं मण्टपालंकारम्"

voir aussi *Ajitāgama*, 18, 34-48 et *Rauravāgama* 28, 27-33.

[4] A : मध्यसान्तं ; G : मध्यपान्तं [5] A, B : अग्रकम् pour अश्रकम्

[6] G : वेदिं च pour वेदीं च ; G : वेदिश्च [7] C : अनङ्गैश्च pour तरङ्गैश्च ; F, G : श्च रङ्गैश्च

[8] A : अलंकरेत् pour अलंकुरु ; G : अलंकृतम् [9] B : शालिभिः स्थण्डिलं कुरु

[10] B omet le *śloka* n° 17. [11] C : तिर्यक् ब्रह्माणमुच्चरेत् ; G : स्तीर्य ब्रह्माणमुच्चरेत्

[12] C : साधयेत्तत्र

[13] Pour plus de détails au sujet du *lakṣaṇoddhāra* voir *Ajitāgama* 18, 50-89 et *Rauravāgama* 28, 15-22a.

[जलाधिवासः[1]]

जलाधिवासनं कुर्यात्स्थण्डिलं कुरु पूर्ववत् । जलादानीय लिङ्गं तु स्नानवेद्यां निधापयेत् ॥ १८ ॥

[लिङ्गशुद्धिः[2]]

व्यपोह्य वस्त्रकूर्चादीन्स्नापयेच्छुद्धतोयकैः । [3]गव्यैर्गन्धोदकैश्चैव ब्रह्माङ्गैरभिषेचयेत् ॥ १९ ॥

[शयनाधिवासः[4]]

गन्धादिभिर्हृदाभ्यर्च्य बध्वा [5]प्रतिसरं ततः । गन्धमाल्यैः समावेष्ट्य लम्बकूर्चं तु बन्धयेत् ॥२० ॥

---

[1] cf. *Yogajāgama* 4, 26b-31a:

जलाधिवासनं प्रोक्तं पञ्चसप्तत्रिरात्रकम् । प्रपां कृत्वा वितानैस्तोरणैस्तरङ्गवेष्टिताम् ॥
दर्भमालासमायुक्तां पुष्पमाल्यैरलंकृताम् । नृत्तगेयसमायुक्तं स्तोत्रमङ्गलवाचकैः ॥
पिञ्छचामरसंयुक्तं पताकच्छत्रसंयुतम् । तालवृन्तसमायुक्तं हरशब्दसमायुतम् ॥
जलमध्ये फलकं स्थित्वा साधयेल्लिङ्गपीठकम् । दर्भैरावेष्ट्य तल्लिङ्गं पीठं ब्रह्मशिलायुतम् ॥
नववस्त्रेण संवेष्ट्य ब्रह्मकूर्मसमायुतम् । त्रिसंध्यायां हविर्दत्त्वा ताम्बूलं दापयेत्ततः ॥

voir aussi *Ajitāgama* 18, 95-133 et *Rauravāgamā* 28, 24-26,

[2] cf. *Yogajāgama* 4, 31b-37a:

प्रतिष्ठादिनपूर्वे तु जलादुत्तीर्य यत्नतः । लिङ्गं पीठं ब्रह्मशिलां कूर्ममेवं समायुतम् ॥
जलादुत्तीर्य देवेशं सर्वतीर्थं समावहेत् । कुम्भोदके तथाभ्यर्च्य पीठवर्धनिकां यजेत् ॥
गन्धपुष्पादिभिः पूज्य मूलमन्त्रेण संयुतम् । अष्टमृत्सलिलेनैव बिल्वपत्रैश्च घर्षयेत् ॥
गन्धतोयं समभ्यर्च्य रजन्यामलकादिभिः । हविर्निवेदयेत्पश्चात्ताम्बूलं च निवेदयेत् ॥
वस्त्राभरणं संवेष्ट्य सर्वालंकारसंयुतम् । रथे वा शिबिकायां वा यानयेत्क्रमशः पुनः ॥
सर्वालंकारसंयुक्तं कुर्याद्वास्तुप्रदक्षिणम् । सर्वातोद्यसमायुक्तं प्रविशेदालयं पुनः ॥

voir aussi *Ajitāgama* 18 114 121.

[3] B : गव्यैर्गन्धाम्बुभिः पश्चाद्

[4] cf. *Yogajāgama* 4, 52b-63a:

वेदिकोपरि विन्यस्य अष्टद्रोणैश्च शालिभिः । तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ॥
लाजपुष्पैश्च दर्भैश्च विकिरेत्तु विशेषतः । अण्डजं मुण्डजं चैव रोमजं व्रीलितं [चर्मजं?] तथा ॥
दुकूलपट्टदेवाङ्गैः कार्पासवस्त्रमेव वा । पञ्चवर्णं प्रकल्प्याथ श्वेतं रक्तं च कृष्णकम् ॥
नीलं पीतनिभं चैव पञ्चवर्णं प्रकल्पयेत् । पुण्याहं वाचयित्वा तु रक्षाबन्धं प्रकल्पयेत् ॥
सुवर्णसूत्रं तु संवेष्ट्य त्रियम्बकेन मन्त्रतः । लिङ्गं पीठं समभ्यर्च्य ब्रह्मकूर्मशिलायुतम् ॥
रक्षासूत्रं तु संवेष्ट्य मूलमन्त्रं समर्चयेत् । ईशानेन तु मन्त्रेण शयने शाययेद्बुधः ॥
प्राक्शिरश्चोर्ध्ववक्त्रं च शयने शाययेद्बुदा । मुकुली पद्ममुद्रा तु सुरभी नालमुद्रका ॥
लिङ्गमुद्रा च कर्तव्या पञ्चवक्त्रं च दर्शयेत् । रक्तवस्त्रेण संवेष्ट्य कूर्चपुष्पैर्युतेन च ॥
गन्धपुष्पादिभिः पूज्य सर्वातोद्यसमायुतम् । पीठं च नन्दिकावर्तं कूर्मशिलां च स्थापयेत् ॥
वेद्यूर्ध्वे लिङ्गमूले तु स्थापयेत्क्रमशस्तथा । वेष्टयेत्पीतवस्त्रेण गन्धपुष्पादिभिर्यजेत् ॥
शक्तिबीजमनुस्मृत्य गन्धपुष्पादिनार्चयेत् । ब्रह्मबीजमनुस्मृत्य ब्रह्मकूर्मशिलां यजेत् ।

voir aussi *Ajitāgama* 18, 131-137 et *Rauravāgama* 28, 36-41.

[5] C ; प्रतिसरास्त्रकः ; G : प्रतिसरास्त्रकम्

नववस्त्रेण संवेष्टय नृत्तगेयादिभिर्युतम्। [1]वेद्यां तु स्थण्डिले मध्ये [2]शयनं पञ्च कल्पयेत्॥ २१॥
[3]अण्डजं मुण्डजं चैव चर्मजं रोमजं तथा। शाल्मलं शयनं [4]वाथो उपर्युपरि कल्पयेत्॥ २२॥
अलाभे पञ्चवस्त्रेण [5]कल्पयेच्छयनं हृदा। द्वात्रिंशद्दर्भकं[6] कूर्चं प्रागग्रं विन्यसेद्धृदा॥ २३॥
गन्धादिभिः समभ्यर्च्य सर्वातोद्यसमन्वितम्। लिङ्गमानीय वेद्यां तु शाययेच्छयनोपरि॥ २४॥
प्राक्शिरश्चोर्ध्ववक्त्रं च [7]छादयेद्रक्तवस्त्रतः।

[कुम्भस्थापनम्[8]]

ससूत्रं सापिधानं च सकूर्चं सहिरण्यकम्॥ २५॥
[9]सवितानं सवस्त्रं च [10]गन्धाम्भःपूरितं घटम्। [11]लिङ्गमूर्धान्तिके स्थाप्य मूलमन्त्रं तु विन्यसेत्॥२६॥

---

[1] C, G : वेद्यास्तु

[2] Une meillere lecture semble être पञ्चशयनं ; mais le mètre ne serait pas respecté.

[3] voir *supra* p. 21 note 1

[4] A : वाथ ; G : वायोर्

[5] A : शयनं कल्पयेद्विधा ; B : कल्पयेच्छयनं द्विधा

[6] B : दर्भतः pour दर्भकं

[7] C : शाधयेदुक्तवस्त्रकम् ; E : शाययेद्रक्तवस्त्रकम् ; G : छाययेद्रक्तवस्त्रकम्

[8] cf. *Yogajāgama* 4, 63b-78:

निष्कलङ्कानसुषिरान्द्रोणतोयेन पूरितान्। त्रिसूत्रवेष्टितान्कुम्भान्नववस्त्रैश्च शोभितान्॥
विधाय चक्रपात्राणि सूत्रेणैव विचित्रयेत्। स्वर्णपुष्पसमायुक्तं कूर्चगन्धसमायुतम्॥
शिवकुम्भं तु संपूज्य वर्धनीं चैव पूजयेत्। नववस्त्रेण संवेष्टय युग्मवस्त्रयुतेन च॥
देवस्यैव शिरोभागे कल्पयेदासनं तथा। गन्धादिभिः समभ्यर्च्य शिवकुम्भं च विन्यसेत्॥
पञ्चरत्नसमायुक्तं ध्यानं सदाशिवस्य तु। सद्यमन्त्रेण चावाह्य स्वागतं हृदयेन तु॥
स्थापयेद्वामदेवेन अघोरेण निरोधयेत्। ईशानेन तु सांनिध्यं पुरुषेण तु संमुखम्॥
पाद्यमाचमनं चार्घ्यं शिरोमन्त्रेण दापयेत्। गन्धपुष्पं च धूपं च दीपं नैवेद्यमेव च॥
दापयेद्धृदयेनैव ताम्बूलं दापयेत्ततः। दर्शयेद्धेशमुद्राश्च लिङ्गमुद्रां तथैव च॥
पञ्चवक्त्रं प्रदर्श्याथ ईशानेन पिधाय च। अस्त्रेणैव तु मन्त्रेण दिग्बन्धं च ततः कुरु।
तस्यैव वामभागे तु वर्धनीं चैव विन्यसेत्। वर्धनीमध्यमे न्यस्त्वा मनोन्मन्यास्तु मन्त्रकम्।
अब्जमुद्रां प्रदर्श्याथ सुरभीं तालमुद्रिकाम्। स्वर्णवक्त्रसमायुक्तं चक्रपात्रं पिधाय च॥
दिग्बन्धं तु ततः कुर्यादस्त्रमन्त्रेण दिक्षु च। अभितस्तु घटानष्टौ स्थापयेदष्टदिक्षु च॥
इन्द्राद्यैशानपर्यन्तमष्टविद्येश्वरान्न्यसेत्। सकूर्चान्सापिधानांश्च सवस्त्रान्हेमसंयुतान्॥
अष्टमङ्गलरूपाणि तत्तत्स्थानेषु विन्यसेत्। यागविद्येशरूपं च गन्धपुष्पादिनार्चयेत्।
शिवकुम्भादिकुम्भानां वर्धन्यभिमुखं चरेत्। विद्येश्वरस्य कुम्भानि अष्टविद्येशधारकान्॥
अष्टमङ्गलरूपाणि उपवेद्युपरि न्यसेत्॥

voir aussi *Ajitāgama* 18, 138-147 et *Rauravāgama* 28, 42-57a.

[9] A, C, F, G : सापिधानं [10] B, C, F, G : गन्धाम्बु pour गन्धाम्भः; [11] A : लिङ्गमूर्ध्वान्तिके

[1]लिङ्गाधेयां च मूर्तिं तां ध्यात्वाभ्यर्च्य हृदा यजेत् । तथैव वर्धनीं पश्चादुत्तरे शक्तिमन्त्रतः ॥ २७
विघ्नेश्वरघटानष्टौ परितः स्थाप्य पूजयेत् । परिवारघटांश्चैव वेदिबाह्ये न्यसेत्क्रमात् ॥ २८ ॥

[होमः[2]]

[3]पूजयेद्धविरन्तं तु ; ततो होमं समाचरेत् । दिशास्वध्ययनं [4]कुर्युश्चत्वारस्तु[5] द्विजोत्तमाः[6] ॥ २९ ॥
विदिशासु [7]जपस्तोत्रं चत्वारश्चानुशैवकाः[8] । [9]आचार्य[10]लक्षणोपेतस्त्वाचार्यो [11]मूर्तिपास्तथा ॥ ३० ॥
स्नानद्वयसमायुक्ताः[12] सकलीकृतविग्रहाः[13] ।[14]आचार्यश्चेशकुण्डे तु शेषकुण्डेषु मूर्तिपाः ॥ ३१ ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् । [15]समिधः सद्यमन्त्रेण [16]चाज्यं वामेन होमयेत् ॥ ३२ ॥
[17]अघोरेण चरुं हुत्वा [18]लाजांस्तत्पुरुषेण तु । [19]सक्तुमीशेन जुहुयात्तिलं वै हृदयेन तु ॥ ३३ ॥
सिद्धार्थं शिरसा हुत्वा [20]शिखया तु फलाहुतिः । अपूपं कवचेनैव मुद्गं नेत्रेण होमयेत् ॥ ३४ ॥
[21]मधु चास्त्रेण जुहुयात्क्षीरं मूलेन होमयेत् । शतं वार्धं तदर्धं वा प्रत्येकाहुतिमाचरेत् ॥ ३५ ॥

---

[1] A, C, G : लिङ्गाधेयं तु मूर्तिं तु तं ध्यात्वाभ्यर्चयेद्धृदा

[2] cf. *Cintyāgama*, 2 , 123-132:

होमकर्म समारभ्य चाचार्यो मूर्तिपैः सह । आचार्यानुज्ञया सर्वे होमं कुर्युश्च मूर्तिपाः ॥
प्रधाने देशिको हुनेदन्यकुण्डेषु मूर्तिपाः । अग्न्याधानादिकं सर्वमग्निकार्योक्तमार्गतः ॥
पञ्चार्णं च नवार्णं च दशार्णं चैव देशिकः । बिल्वाश्वत्थशमीर्हुत्वा क्रमात्तदर्णसंख्यया ॥
पलाशोदुम्बराश्वत्थवटं पूर्वादि दिक्षु वै । शमीखदिरबिल्वार्कमान्नेयादिविदिक्षु वै ॥
प्रधानस्य पलाशं च सर्वेषां होममाचरेत् । समिदाज्यचरूँल्लाजांस्तिलसिद्धार्थकान्यवान ॥
माषं मुद्गं च शालिं च सक्तुमेकादश क्रमात् । ईशानादीनि चास्त्रान्तं स्वस्वबीजेन होमयेत् ॥
शक्तीनां होमके मन्त्री स्त्रीलिङ्गान्तानि योजयेत् । तत्तद्देवस्य गायत्रीः सप्तसंख्या हुनेद्घृतम् ॥
क्षीरैर्गुलैः फलैः पत्रैः पुष्पैश्चैव हुनेत्ततः । द्रव्यं प्रति विशेषेण मूलमन्त्रं हुनेत्क्रमात् ॥
द्रव्यान्ते व्याहृतिं हुत्वा सहस्रं वार्धमेव वा । अष्टोत्तरशतं चैव अथवा होममाचरेत् ॥
ततः स्पर्शाहुतिं हुत्वा बिम्बे द्रव्यं प्रति प्रति । कुण्डे स्पर्शाहुतिं हुत्वा स्रुष्ट्वा जप्त्वा च बुद्धिमान् ॥

voir aussi *Ajitāgama* 18, 148-165 et *Rauravāgama* 28, 57b-61.

[3] B : पूजयेद्धविरन्ताद्यैः ; C, G : पूजयेद्धविषान्तं तु

[4] B, E : कुर्यात् pour कुर्युः [5] C : अर्चकस्तु pour चत्वारस्तु [6] B : द्विजातयः ; C, G : द्विजोत्तमः

[7] A, G : जपस्तोत्रान् ; B : जपेत्स्तोत्रं ; C : जपेत्स्तोत्रान्

[8] A, B, G : शैवकान् pour शैवकाः [9] C : आचार्यो pour आचार्य ; E : आचार्यं

[10] E : दक्षिण pour लक्षण [11] B : मूर्तिपैः सह ; C, E, G : मूर्तिपैस्तथा

[12] B, C : युक्तः pour युक्ताः [13] B, C : विग्रहः pour विग्रहाः [14] A : आचार्यः शक्रकुण्डेषु

[15] C, G : समिधा [16] A, C et G omettent च

[17] C omet le *śloka* 33, 34 et 35a

[18] G : लाजं pour लाजान् [19] A : सक्थु pour सक्तु [20] G : शिखायां तु

[21] A, B : मधुमन्त्रेण ; G : मधुमस्त्रेण

द्रव्यान्ते व्याहृतिं हुत्वा [1]स्वस्वमन्त्रैस्समाहुतिः । मनोन्मन्यास्तु मन्त्रेण [2]चाज्येनैव शताहुतिः ॥ ३६ ॥
अनन्ताद्यावृतानां तु [3]प्रतिमन्त्रं दशाहुतिः । एवं [4]जागरणं रात्रौ ; प्रभाते सुमुहूर्तके ॥ ३७ ॥

[आधारशिलादिन्यासः[5]]

पुरस्ताद्धोम[6]घटिकादाधारादिशिला[7] न्यसेत् । लिङ्गं प्रासादमध्ये तु[8] किञ्चिदीशानमाश्रितम् ॥ ३८ ॥
[9]योज्यं ब्रह्मशिलामध्यं [10]युक्त्या न्यस्य तु देशिकः । [11]शिलाभिर्वेष्टकाभिर्वा [12]सुधया सुदृढीकृतम् ॥३९॥

[रत्नादिन्यासः[13]]

पश्चात्स्नानद्वयं कृत्वा सकलीकृतविग्रहः[14] । अन्तर्यागं च कृत्वा तु सादाख्यं हृदि [15]चिन्तयेत् ॥ ४० ॥

---

[1] A : सुवस्त्रेण स्पर्शाहुतिः ; G : त्वस्त्रेण स्पर्शाहुतिः
[2] A omet च ; B : तु pour च
[3] A : प्रतिमध्र pour प्रतिमन्त्रं
[4] C, G : जागरकं
[5] Cf. *Cintyāgama*, 20, 133-139 :

देशिकः शिल्पिभिः सार्धं गर्भगेहं प्रवेशयेत् । मध्यसूत्रं न्यसेद्धीमान्पीठविस्तारसूत्रकान् ॥
न्यस्त्वा प्रागुदगग्राणि तन्मध्ये विन्यसेच्छिवम् । कूर्मशिलावटाञ्शोध्य प्रोक्षयेत्पुरुषेण तु ॥
पश्चाच्छिल्पि विसृज्याथ स्नानादि सर्वमाचरेत् । सकलीकरणं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ॥
स्वस्वबीजेन मूलेन स्वर्णरत्नं सुपूजयेत् । अवटेषु न्यसेद्धीजं प्रणवास्त्रं प्रतिप्रति ॥
कूर्मं वा पद्मपुष्पं वा तत्तद्वाहनमेव वा । तन्मध्ये विन्यसेद्धीमान्पद्मरागेण संयुतम् ॥
वज्रं मरकतं नीलं पुष्परागं प्रवालकम् । मौक्तिकं चैव वैडूर्यं गोमेदं च दिशि क्रमात् ॥
परिवारे तु बीजैश्च विन्यसेत्तु यथाक्रमम् । धेनुमुद्रां प्रदर्श्याथ नववस्त्रेण वेष्टयेत् ॥

Voir aussi *Ajitāgama*, 18, 170b-188 et *Rauravāgama* 28, 68.

[6] Le mot घटिका se trouve au masculin au lieu du féminin.
[7] B, C : शिलां
[8] A : मध्यां तु pour मध्ये तु ; C . मध्यस्थं ; G : मध्यास्तु
[9] A : योग्यं
[10] C : युक्तं न्यस्त्वा तु
[11] B : शिलाभिरिष्टकाभिर्वा
[12] C. G : सुधा वा
[13] cf. *Kāraṇāgama* I 59, 172b-185a:

कूर्मशैलेऽवटाञ्शोध्य प्रोक्षयेत्पुरुषेण तु । चन्दनेनानुलिप्याथो रत्नानि विविधान्न्यसेत् ॥
वज्रं मरतकं पुष्यरागं नीलं प्रवालकम् । मौक्तिकं चैव वैडूर्यं स्फटिकं च महामणीन् ॥
इन्द्रादि मध्यपर्यन्तं विन्यसेन्मूलविद्यया । सुवर्णं राजतं ताम्रमायसं त्रपु सीसकम् ॥
आरकूटं च विपुलं देवलोहं क्रमात्तथा । हरितालं त्रयं चैव गन्धकं दरदाञ्जनम् ॥
सौराष्ट्रं गैरिकं चैव माक्षिकं पूर्ववन्न्यसेत् । यवगोधूमनीवारशालिवैणवकानि च ॥
प्रियङ्गुतिलमुद्गानि निष्पावं च क्रमात्तथा । चन्दनं कुङ्कुमं चैव लोहं पत्रं फलत्रयम् ॥
कर्पूरमुशिरं चैव पूर्ववद्विन्यसेत्ततः । वैष्णवं वज्रपाणिं च वृषभध्वजमेव च ॥
लक्ष्मीं च सहदेवीं च शङ्खपुष्पं सुवर्चलाम् । दूर्वां चतुर्मुखं चैव विन्यसेद्देशिकोत्तमः ॥
पृथिवीं शातकुम्भेन समुद्रं रजतेन तु । ताम्रेण वृषभं कृत्वा तोमरं चामरं गजम् ॥
श्वेतवत्सं कलशं भेरीं दर्पणं पद्मपुष्करम् । महामेरुं सुवर्णेन कृत्वा रन्ध्रेऽवटे न्यसेत् ॥
दक्षिणे मध्यमे सौम्ये त्ववटेषु क्रमान्न्यसेत् । मुकुलीं पद्ममुद्रां च शोधनीं च प्रदर्शयेत् ॥
पूजयित्वा तु रत्नानि गन्धपुष्पादिभिर्हृदा । पायसेन तु लिप्याथ सद्यं ब्रह्मशिलावटम् ॥
आसनं कल्पयेत्पश्च तस्य मध्ये क्रमेण तु । गन्धपुष्पादिना पूज्य वस्त्रेणावेष्टय सर्वतः ॥

Voir aussi *Ajitāgama* 18, 189-199 et *Rauravāgama* 28, 69.

[14] C, G : चेतसः pour विग्रहः
[15] A : सद्वयेत् ; G ; सन्धयेत्

[1]माणिक्यं मध्यमे [2]न्यस्य प्रवालं [3]शक्रगोचरे । स्फटिकं चानले देशे नीलं [4]वै याम्यगोचरे ॥ ४१॥
नैर्ऋत्यां मौक्तिकं [5]न्यस्य वज्रं [6]वारुण्यगोचरे[7] । पुष्परागं तु [8]वायव्ये वैडूर्यं च तथोत्तरे ॥ ४२ ॥
शांकरे पद्मरागं [9]तु हृदा मूलेन विन्यसेत् । मनोन्मन्यादि[10]शक्तीनां मन्त्रेणैव क्रमान्न्यसेत् ॥ ४३ ॥
यवनीवारमुद्गं च[11] सर्षपं तिलमेव च । [12]शालीप्रियङ्गुश्यामं च [13]कुलुत्थं च विशेषतः ॥ ४४ ॥
एतानि नव बीजानि रत्नानीव क्रमान्न्यसेत्[14] । श्यामं च हरितालं चाप्यञ्जनं च [15]मनःशिला ॥४५
सौराष्ट्रं [16]पारदं चैव माक्षिकं गैरिकं तथा । प्रणवेनैव [17]तान्न्यस्य [18]जीवितान्विदधत्विमे ॥ ४६ ॥

[लिङ्गस्थापनम्[19]]

शयनाल्लिङ्गमुद्धृत्य वस्त्रादीनि व्यपोह्य च । अर्घ्यं दत्त्वा हृदा मन्त्री पुष्पाङ्कुरसमन्वितम् ॥ ४७ ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः । [20]नानाविधैश्च विभवैराचार्यं तोषयेत्तदा[21] ॥ ४८ ॥
मूर्तिपान्पूजयेत् [22]पश्चाद्दैवज्ञं पूजयेत्ततः । भक्तांश्च परिवारांश्च पूजयेत्तु यथोचितम् ४९ ॥
ततो लिङ्गं समुद्धृत्य सर्वालंकारसंयुतम् । [23]हर्म्यं प्रदक्षिणं कृत्वा [24]गेहद्वारे निधापयेत् ॥ ५० ॥

---

[1] B E, F, G : माणिक्कं [2] A, B : न्यस्त्वा [3] A : शक pour शक्र ; C : चक्रगो चरेत्
[4] B : वै यमगोचरे ; C, G : वैडूर्यदेशके [5] A : न्यस्त्वा
[6] B : वरुण pour वारुण्य ; G, E, F, G : वारुण [7] C : गोचरेत् pour गोचरे
[8] A : वायव्यां [9] B : च pour तु [10] A : तु pour आदि [11] B : मुद्गांश्च pour मुद्गं च
[12] B : शाली प्रियङ्गवं चैव ; E, F, G : शाल्याः प्रियङ्गुश्यामं च [13] A : कुलस्थं च
[14] A : भक्तेनेव कृता न्यसेत् ; B : हुनेद्भक्तानिषु क्रमात् ; C : ...कृता न्यसेत् ; F : ...न क्षता न्यसेत् ; C : गिन्वक्षत न्यसेत्
[15] C, G : मनोशिला [16] C : पारतं [17] A : तान्न्यस्त्वा ; B : तन्न्यस्य
[18] A : जीवितान्वितयास्वमे ; B : जीवितान्वितयास्विमे ; C : जीवितान्वितयास्त्विमे
[19] cf. *Cintyāgama* 20, 142-151:

सुमुहूर्तस्य पूर्वे तु सर्वतोद्यसमन्वितम् । शङ्खध्वनिसमायुक्तं वाद्यघोषसमन्वितम् ॥
धूपदीपसमायुक्तं छत्रचामरसंयुतम् । उद्धृत्य शयनाल्लिङ्गं पिण्डिकया समन्वितम् ॥।
घृतं शिरोऽर्पणं कुर्याद्धेमदूर्वाङ्कुराक्षतैः । रत्नसिंहासने वापि शिबिकारज्जुयन्त्रके ॥
धामप्रदक्षिणं कृत्वा द्वारे दत्त्वार्घ्यपाद्यके । सुस्थिते सुस्थिरे लग्ने स्थाप्य द्वाराभिसंमुखम् ॥
नन्द्यावर्तशिला योज्य पीठं पश्चात्प्रवेशयेत् । लिङ्गोद्वाह्योजयेत्पीठं योजयेत्तु शनैः शनैः ॥
स्वस्वमूलेन संयोज्य वालुकाभिः प्रपूर्य च । लिङ्गमूर्ध्नि च संस्पर्शेत्सव्यहस्ताङ्गुलित्रयम् ॥
स्थाप्य चन्द्रार्कवत्तिष्ठ दशबीजं जपेद्दश । लाक्षासर्जरसपाषाणं मधूच्छिष्टं च गुग्गुलुम् ॥
शङ्खधूलिं गुलं चैव महिषाज्येन संयुतम् । गुलवत्तडयेद्धीमाँल्लूखले मुसलेन तु ।
त्रियम्बकेन मन्त्रेण बन्धयेदष्टबन्धनम् ।.....पूर्वोक्तविधिना चैव बेरशुद्धिं समाचरेत् ॥
एवं क्रमेण विधिवत् षडध्वन्यासमाचरेत् ।

Voir aussi *Ajitāgama* 18, 202b-213a.

[20] A : नानाद्यैर्विभवैश्चैव ; C, G : नानाद्यैर्विविधैश्चैव [21] C, F, G : ततः pour तदा
[22] C, F, G : तत्र pour पश्चात [23] C, F, G : हर्म्यप्रदक्षिणं [24] C, F, G : गेहे द्वारे

गन्धादिभिः समभ्यर्च्य [1]घृतशिरोऽर्पणं कुरु । मुहूर्ते लिङ्गमुद्धृत्य गर्भगेहं समाविशेत् ॥ ५१ ॥
आचार्यः सुप्रसन्नात्मा मूलमन्त्रमुदाहरन् । लिङ्गं सदाशिवं [2]चिन्त्य स्थापयेद्वारदिङ्मुखम्[3] ॥ ५२ ॥
[4]अधिष्ठानसमाप्तौ तु[5] पुरतो [6]द्वारबन्धतः । [7]मूर्धेष्टकायाः पूर्वं वा लिङ्गस्थापनमाचरेत् ॥ ५३ ॥
नन्द्यावर्तशिलां योज्य परितः शांकरादिषु । [8]कल्केनैवाष्टबन्धैर्वा बन्धयेत्तद्दृढं [9]यथा[10] ॥ ५४ ॥

[पिण्डिकायोजनम्]

मनोन्मन्यास्तु मन्त्रेण योजयेत्पिण्डिकां तथा[11] । शिलालाभे[12]ष्टकागर्भं [13]सुधया पिण्डिकां कुरु ॥५५॥
[14]स्थलं च समतां कृत्वा ततः शिल्पिविसर्जनम् । [15]पुण्याहप्रोक्षणं कृत्वा [16]गव्याभिषेचनं कुरु ॥ ५६ ॥
गन्धोदकेन [17]संस्नाप्य पुष्पं [18]मूर्धनि विन्यसेत् । पञ्चासनं च संकल्प्य समभ्यर्च्य यथाविधि ॥ ५७ ॥

---

[1] A : घतं pour घृत ; C : घृते [2] A : चान्यत् pour चिन्त्य [3] G : दिङ्मुखः pour दिङ्मुखम्

[4] voir *Ajitāgama* 18, 31b-33a et *Suprabhedāgama* I, 36, 3-4a

[5] C, F : अधिष्ठानं समाप्तौ तु ; G : अधिष्ठानं समाप्ते तु [6] C : द्वारबन्धनः ; G : द्वारबन्धनम्

[7] A : मूलेष्टकायाः; C, G : कुलेष्टकायाः

[8] A : कलैकनैवाष्टबन्धैः ; B : कनकेनाष्टबन्धैर्वा ; C, F, G, : कल्केनैवाष्टगन्धैर्वा

[9] B : गुरुः pour यथा

[10] Pour les détails relatifs au *kalka* voir *Aṃśumatkāśyapa* 87, 1-7:

अथ कल्कविधानं तु वक्ष्ये संक्षेपतः क्रमात् । नद्यां वापि तटाके वा दीर्घिकायामथापि वा ॥
सस्यक्षेत्रे तथा विप्र निरूषरजले शुभे । सुदृढा चूर्णतुल्याभा स्थूलवालुकमिश्रिता ॥
संग्राह्या शर्करा ह्येषा पेष्य प्रक्षालनं कुरु । शर्करांशोषणं कृत्वा सूक्ष्मचूर्णं तु तत्कुरु ॥
त्रिफलोदके संमृज्य पिण्डं कृत्वा तु शोषयेत् । कपित्थनिर्यासस्यैव जलं त्रिविधमुच्यते ॥
पञ्चांशकं तु निर्यासं सार्धं वा पञ्च षड्गुणम् । सूतं स्वच्छजलं चैव सेकं चेति क्रमोदितम् ॥
स्वच्छसेकजलैः पिण्डं पेषयेन्नवनीतवत् । पश्चात्कार्पासतूलैश्च मिश्रं कृत्वा सुपेषयेत् ॥
कल्के भिन्ने तु यत्तन्तु कदलीदण्डतन्तुवत् । एतत्कल्कं समालेप्यं प्रथमं कल्कमेव हि ॥

Pour les détails relatifs à l'*aṣṭabandha* voir ***Ajitāgama*** 18, 216-218.

[11] C, G : पिण्डिका यथा pour पिण्डिकां तथा

[12] Nous constatons ici le chute de la voyelle initiale d'*iṣṭakā* qui ne correspond à aucun *saṃdhi* Pāṇinnén. Le sens ne permet pas d'y voir un composé.

[13] C, G : सुधायां [14] C : सुस्थलं च सतां कृत्वा [15] A : पुण्याहं pour पुण्याह

[16] B : कुरु गव्याभिषेचनम् [17] B : संस्थाप्य [18] C : मूर्धन्य ; E : मूर्ध्नि च ; G : मूर्ध्नि तु

[पूर्णाहुतिः, कुम्भाभिषेकश्च[1]]

पश्चादग्निं[2] समभ्यर्च्य [3]करीरान्स्थापितान्यजेत्[4]। जयादिरभ्याधानं[5] च राष्ट्रभृच्चैव[6] होमयेत् ॥ ५८ ॥
स्विष्टमग्नेतिमन्त्रेण[7] पूर्णाहुतिं [8]समाचरेत्। कुम्भानुद्धृत्य शिरसा [9]बाह्यधामप्रदक्षिणम् ॥ ५९ ॥
कृत्वालंकारसंयुक्तं लिङ्गाग्रे [10]स्थापयेत्क्रमात्। [11]षडध्वानं न्यसेल्लिङ्गे सूक्ष्मदेहस्य देहकम् ॥ ६० ॥
कुम्भादेवं समादाय मूललिङ्गस्य मध्यमे। हृदा मूलं समुच्चार्य [12]ध्यानयुक्तः समाहितः ॥ ६१ ॥
योजयेत्सूक्ष्मदेहे तु [13]मयूराण्डे मयूरवत्। मनोन्मनीं च वर्धन्यां पिण्डिकायां च योजयेत् ॥ ६२ ॥
अनन्तादि[14]शिखण्डयन्तानानीयावृतके[15] न्यसेत्। तत्कुम्भस्थोदकैः[16] स्नाप्य [17]चार्चनोक्तं समर्चयेत् ॥६३
[18]परिवारघटाद्बीजान्परितो विष्टरे न्यसेत्। हविष्यं दापयेत्पश्चाद्भद्रो भद्रपरः पुरे[19] ॥ ६४ ॥
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ ६५ ॥

इति [20]श्रीमद्रौरवतन्त्रे[21] [क्रियापादे] [22]क्षेत्रलिङ्गप्रतिष्ठाविधिर्नाम त्रिंशः पटलः

---

[1] cf. *Cintyāgama* 20, 152-164:

ततः कुम्भाभिषेकार्थं रक्षासूत्रं तु धारयेत्। लिङ्गं च पिण्डिकां कृत्वा गन्धपुष्पावगाहनम् ॥
श्वेतवस्त्रेण संवेष्ट्य दिग्बन्धं चास्त्रमन्त्रतः। कुण्डस्थानं समाश्रित्य पूर्ववत्परिषेचयेत् ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत्। पूर्णाहुतिं च शिरसा हुनेत्कुम्भेषु योजयेत् ॥
नैवेद्यं धूपदीपं च उपचारादि संयजेत्। उद्धृत्य शिरसा वाह्य शिवकुम्भं तु देशिकः ॥
अन्यकुम्भान्समादाय मूर्तिपास्तु शिरःसु च। सर्वतोद्यसमायुक्तं कृत्वा धामप्रदक्षिणम् ॥
लिङ्गाग्रे विन्यसेत्कुम्भान्क्रमेण दलिकोपरि। श्रुतिकुम्भान्गृहीत्वा च स्नापयेत्परमेश्वरम्।
सुमुहूर्ते विशेषेण न्यसेन्मन्त्रस्वरूपकम्। धूपदीपं समाश्रित्य यजेन्नीराजनादिभिः ॥
अर्चयेद्गन्धपुष्पैश्च कल्पयेत्पद्ममासनम्। मन्त्ररूपं समादाय कुम्भाद्बिम्बे सुयोजयेत् ॥
कुम्भाम्भोरुहमध्याच्च बिम्बस्य हृदि पद्मके। न्यस्त्वा वस्तुमयं बीजं प्रोक्ष्य मन्त्रस्वरूपकम् ॥
बिम्बमूर्धिन समापूर्य साङ्गं मन्त्रस्वरूपकम्। कुम्भतोयाभिषेकेन इष्टनाम तु कल्पयेत् ॥
तस्य वामे तु विन्यस्य वर्धन्याश्च मनोन्मनीम्। बीजं विद्येश्वराणां च आवृते विन्यसेत्सुधीः ॥
मूलेन विन्यसेद्धीमान्कुम्भैः स्नात्वार्चयेत्क्रमात्। पायसान्नादिनैवेद्यं पञ्चवक्त्रो निवेदयेत् ॥
ताम्बूलं दापयेत्पश्चादुपचारैश्च संयजेत्। एवं यः स्थापयेल्लिङ्गं स पुण्यां गतिमाप्नुयात् ॥

voir aussi *Ajitāgama*, 18, 165-170 et 223b-268, et *Rauravāgama* 28, 62-64 et 83-90.

[2] C, F, G : अग्नीन् pour अग्निं [3] C, F : करीन्द्रान् [4] A : न्यसेत् pour यजेत्
[5] A, C, E, G : अभ्याधानैः pour अभ्याधानं [6] C : अपि pour एव ; E : चक्र ; G : अत्र
[7] A, B : मूलेन pour मन्त्रेण [8] B : अथाचरेत् pour समाचरेत्
[9] B : बाह्ये ग्राम pour बाह्यधाम [10] C, F, G : स्थापयेद्बुधः [11] C : षडध्वने
[12] A : ध्यानयुक्तसमाहितम् ; C, G : ध्यानयुक्तं समाहितम् [13] A : मयूराण्ये
[14] C, E : शिखण्डयन्ता चा pour शिखण्डयन्ताना [15] C, F : आवृतकं pour आवृतके
[16] C : उदके pour उदकैः [17] A omet च [18] C omet le *śloka* n° 64
[19] A, G : भद्राभद्रा परा पुरे ; C : भद्राभद्रौ परापुरे [20] A : श्रीरौरवतन्त्रे [21] A ajoute संहितायां
[22] A : क्षेत्रलिङ्गप्रतिष्ठाविधिपटल एकत्रिंशः ; B : क्षेत्रलिङ्गविधिर्नाम एकत्रिंशः पटलः ; C : लिङ्गप्रतिष्ठाविधिर्नाम एकचत्वारिंशत्पटलः ; E ; लिङ्गप्रतिष्ठाविधिरेकचत्वारिंशत्पटलः ; F, G : क्षेत्रलिङ्गप्रतिष्ठाविधिपटलः एकचत्वारिंशत

[एकत्रिंशः पटलः]

[गौरीस्थापनविधिः[1]]

[गौरीप्रतिष्ठात्रैविध्यम्[2]]

अथ [3]गौरीप्रतिष्ठां च वक्ष्येऽहं शृणु सुव्रत । त्रिविधं तत्समाख्यातं [4]वीरयोगक्रमं तथा ॥ १ ॥
गौरीमेव[5] स्थितां[6] [7]यत्र केवलं तदुदाहृतम् । तदेव [8]वीरमाख्यातं शम्भुना सह योगकम् ॥ २ ॥
[9]प्राकारे [10]शयनस्थाने [11]स्थाप्यं [12]यानं क्रमं विदुः । मृदा वाश्ममयं वीरं योगं लोहजमुच्यते ॥ ३ ॥
[13]मृण्मयं लोहजं [14]वाथ [15]दृषद्वाप्युभयं तथा । [16]संपातस्थानकं वीरं [17]योगक्रमं त्रिभङ्गिकम् ॥ ४ ॥

---

[1] Pour गौरीस्थापनविधि voir *Aṃśumadāgama* 80, *Acintyaviśvasādākhya* 59, *Kāmika* II 44, *Kāraṇa* I 89 et II 84, *Yogaja* 13, *Vira* 65, *Santāna* 35, *Sahasra* 41 et *Suprabheda* I 38.

[2] cf. *Aṃśumadāgama* 80, 2b-3:

स्वतन्त्रं केवलं चेति द्विविधं परिकीर्तितम् । स्वतन्त्रं वीरमित्युक्तं परिवारादिभिर्युतम् ॥
परिवारादिहीनं यत्केवलं चेति कथ्यते ।

cf. *Kāraṇāgama* II 84, 1-3:

अथातः संप्रवक्ष्यामि सर्वलोकहिताय च । सर्वज्ञानप्रदं चैव शक्तित्रयमिहोच्यते ॥
योगं पीठसमायुक्तं भोगं वामसमन्वितम् । वीरं स्वतन्त्रमित्युक्तं शक्तित्रयमिहोच्यते ॥
मूललिङ्गसमीपे तु वामभागेऽर्धमण्टपे । आसनं स्थानकं प्रोक्तं द्विविधं भोगशक्तिका ॥

cf. *Suprabhedāgama* I 38, 4b-6 et 14b:

त्रिभेदमन्यच्छक्तीनामेकं युक्तं सहेति च । शक्तिस्तु केवलं यत्र स्थाप्यते त्वेकमुच्यते ॥
पूर्वं शम्भुं प्रतिष्ठाप्य शक्तेस्तु स्थापनं तथा । कृतं युक्तं विधानेन युक्तं तत्परिकीर्तितम् ॥
शक्तिं शंभुमथैकत्र स्थापयेत्तत्सहैव तु । मृण्मयं शैलजं चैकं शेषं लोहजमुच्यते ॥

[3] A : गौरीप्रतिष्ठाया pour गौरीप्रतिष्ठां च ; C, F, G : गौरीप्रतिष्ठायां [4] A, B : वीरो pour वीर
[5] G : एवं pour एव [6] C, F, G : स्थितं [7] F : स्येवं pour यत्र
[8] C, F, G : बीज pour वीर [9] A : प्रकारे ; C : प्राकारा ; G : प्राकार [10] B : शयने स्थाने
[11] C : स्थाप्य [12] B, C, G : यानक्रमं [13] B : मृन्मयं लोहजं ; C, F, G : कामं लोहजकं
[14] F : च pour वा
[15] A : वृषं द्वाप्युभयं तु वा ; B : प्रपन्नाप्यमयं तु वा ; C : दृष्टाद्वाप्युभयं तथा ; F : दृष्ट्वाप्युभयं तु वा
[16] C, G : संपाद pour संपात [17] C, G : योगं कामं

[गौरीलक्षणम्[1]]

द्विपादं [2]द्विभुजं शान्तं द्विनेत्रं श्यामसंनिभम् । करण्डमकुटं[3] वापि केशबन्धमथापि वा ॥ ५ ॥
उत्पलं दक्षिणे हस्ते धृत्वा [4]वामं प्रलम्बयेत् । ईषत्समीक्ष्य तं देवं [5]सूत्रयुक्त्या तु कल्पितम्[6] ॥ ६
संपातस्थानकं चेत्तु समसूत्रेक्षणं तथा । [7]नासान्तोभयहस्तं चाप्युभयोरुत्पलं भवेत् ॥ ७ ॥
उभयोरम्बुजं वाथ [8]सिंहकर्णकरेण धृत् । एवं कृत्वा विधानेन ततः स्थापनमाचरेत्[9] ॥ ८ ॥

[रत्नादिन्यासः[10]]

[11]मण्टपं भूषयित्वा तु गोमयालेपनादिभिः । स्थण्डिलं शालिभिः कृत्वा [12]दर्भपुष्पादिभिः स्तरेत् ॥ ९ ॥
निधाय पीठं तत्रैव रत्नहेमाम्बुजं[13] न्यसेत् । देव्यास्तु कवचेनैव देवीं पीठोपरि न्यसेत् ॥ १० ॥
सुस्निग्धं सुदृढं कृत्वा [14]गव्यैः कृत्वाभिषेचनम् । गन्धादिभिः समभ्यर्च्य [15]स्थण्डिलेऽन्ये[16] तु विन्यसेत् ॥ ११

---

[1] cf. *Aṃśumadāgama* 80, 6b-7 :
द्विहस्ता च द्विनेत्रा च किरीटमकुटान्विता । नीलोत्पलं दक्षहस्ते वामहस्ते प्रसारितम् ॥
गौरीरूपमिदं प्रोक्तं स्त्रीमानवशतः क्रमात् ।

cf. *Vīrāgama* 65, 4-6:
देव्या रूपमहं वक्ष्ये शृणुष्व कमलासन । द्विनेत्रां चारुवदनां सुस्तनां च सुयौवनाम् ॥
द्विहस्तां च द्विपादां च नीलोत्पलयुतौ करौ । करण्डमकुटां चैव सर्वाभरणभूषिताम् ॥
दुकूलपट्टवसनच्छन्नवीरसमन्विताम् । पादनूपुरसंयुक्तां देव्या रूपमिहोच्यते ॥

[2] **C, G** : त्रिभुजं [3] C : मुकुटं pour मकुटं [4] C : यामं
[5] **A** : सूत्रं युक्त्यानुकल्पितम् [6] **B, C, F** : कम्पितम् pour कल्पितम् [7] **A** : नाक्षान्त pour नासान्त
[8] **B** : सिह्यकर्ण करेण धृत् ; G : सिंहकण्ठकरेण धृत् [9] B : आश्रयेत् pour आचरेत्

[10] cf. *Kāraṇāgama* 1 89, 6b-10:
रत्नन्यासं ततः कुर्यान्मण्टपे समलंकृते । स्थण्डिलं शालिभिः कुर्यात्तिलदर्भैः परिस्तरेत ॥
तन्मध्ये विन्यसेत्पीठं नवकोष्ठसमायुतम् । इन्द्रनीलं न्यसेदैन्द्रे वैडूर्यं वह्निगोचरे ॥
याम्यायां तु महानीलं मुक्तां निर्ऋतिगोचरे । वारुणे स्फटिकं चैव वायव्ये पुष्यरागकम् ॥
प्रवालं सौम्यदेशे तु वज्रमीशानगोचरे । माणिक्यं मध्यमे न्यस्त्वा दिक्पालानां तु बीजकैः ॥
प्रतिमां तत्र विन्यस्य सुस्निग्धं कारयेत्ततः ।

[11] **A** : मण्डपं [12] B : दर्भैः pour दर्भ [13] **A** : अम्बुजे pour अम्बुजं
[14] **C** : खर्वैश्चैवाभिषेचयेत् ; F: गव्यैश्चैवाभिषेचयेत् [15] B : स्थण्डिले विन्यसेद्बुधः
[16] La forme attendue normalement pour le loc. sing. du pronom *anya* devrait être *anyasmin*

[नेत्रोन्मीलनम्[1]]

समभ्यर्च्य हृदा मन्त्री गन्धैः पुष्पैश्च धूपकैः । [2]स्वर्णसूचिप्रहाराभ्यां [3]भ्रूरेखादीन्समालिखेत् ॥ १२ ॥
[4]भ्रूरेखां पक्ष्मरेखां च कृष्णमण्डलरेखिकाम्[5] । ज्योतिर्मण्डलमालिख्य गौरीनेत्रमुदाहरन् ॥ १३ ॥
[6]मधुवाता [7]ऋतायेति मधुना तर्पयेद्बुधः । [8]घृतं मिमिक्षेतिमन्त्रेण [9]नेत्रयोस्तु घृतार्पणम् ॥ १४ ॥
[10]गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत् । [11]ब्रह्मजज्ञानमन्त्रेण [12]ब्राह्मणान्दर्शयेत्ततः ॥ १५ ॥
[13]गौरीमिमायमन्त्रेण कन्यासङ्घं[14] प्रदर्शयेत् । [15]छन्नवस्त्रं परित्यज्य गव्यैः कृत्वाभिषेचनम्[16] ॥१६ ॥

---

[1] cf. *Kāraṇāgama* I 89, 11-18:

नेत्रद्वययुतर्क्षे तु नेत्रमोक्षणमारभेत् । मण्टपे स्थण्डिलं कृत्वा अष्टद्रोणैश्च शालिभिः ॥
तन्मध्ये नलिनं लिख्य साष्टपत्रं सकर्णिकम् । तरङ्गवेष्टनं कृत्वा बेरं तु प्राङ्मुखं कुरु ॥
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत् । असितं मण्डलं लिख्य दृष्टिमण्डलमालिखेत् ॥
ज्योतिर्मण्डलकं पश्चान्नेत्रमुच्चार्य लेखयेत् । वस्त्रहेमाङ्गुलीयाद्यैः संपूज्योद्वास्य शिल्पिनम् ॥
हिरण्यदूर्वया विद्वान्मध्वाज्याभ्यां तु तर्पयेत् । सौवर्णमुत्तमं पात्रं ताम्रपात्रं तु मध्यमम् ॥
मृण्मयं चाधमं पात्रं प्रस्थेनैव तु पूरितम् । मध्वाज्याभ्यां प्रपूर्याथ तत्सूक्ताभ्यां प्रदर्शयेत् ॥
धेनुं गौर्धेनुहव्येति ब्रह्मसूक्तेति भूसुरान् । प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत् ॥
पञ्चमृत्पञ्चगव्यैश्च स्नापयेत्पुरुषेण तु । शुद्धतोयेन संस्नाप्य गन्धादिभिर्यजेद्बुधः ॥

cf. *Suprabhedāgama* I 38, 17-24a:

पूर्ववद्रत्नविन्यासं कृत्वा तदनु बिम्बकम् । सुस्थिरं कारयित्वा तु नेत्रमोक्षणमारभेत् ॥.....
हेमसूचिप्रहाराभ्यां नेत्रमन्त्रेण देशिकः । भ्रूरेखां प्रथमं लिख्य पक्ष्मरेखां द्वितीयकम् ॥
श्वेतमण्डलमालिख्य ततो वै कृष्णमण्डलम् । ज्योतिर्मण्डलं मध्ये तु कर्तव्यं शिल्पिना बुधः ॥
शिल्पिमुद्रास्य गुरुणा कर्तव्यं कर्म चोत्तरम् । हिरण्यनखसंप्रोततर्जनीमध्यमाङ्गुलिः ॥
नासां नेत्रेऽप्यसौ धीमाञ्छक्तिमन्त्रेण संस्पृशेत् । कांस्ये मधुघृताभ्यां तु सौवर्णया तु दूर्वया ॥
हृन्मन्त्रेण तु संसिच्य सवत्सां गां पयस्विनीम् । गौर्धेनुहव्यमन्त्रेण देशिको गां प्रदर्शयेत् ॥
ब्राह्मणादीञ्जनान्सर्वान्वीक्षयित्वाक्षिमन्त्रतः । बिम्बशुद्धिं ततः कृत्वा शुद्धतोयैर्विचक्षणः ॥

[2] **A** : हिरण्य pour स्वर्ण [3] **B** : मध्रुरेखां समालिखेत् ; C, F : भ्रूरेखादि समाचरेत् ; G : भ्रूरेखादीन् समाचरेत्

[4] **A** : भ्रूरेखा पक्ष्मरेखा च ; B : भ्रूरेखा पद्मरेखां च [5] **A** : रेखकान् pour रेखिकाम्

[6] cf. *Taittiriyasaṃhitā* 4. 2. 9. 3 et 5. 2. 8. 6 [7] **A** : रतायेति

[8] cf. *Taittiriyāraṇyaka* 10. 10. 2.

[9] **A** : नेत्रयोरस्रतर्पणम्

[10] cf. *Āpastambamantrapāṭha* 2. 10. 9 ; **A, G** : गौर्धेनुर्भव्यमन्त्रेण ; **B** : गौर्येन भव्यमन्त्रेण

[11] cf. *Taittiriyasaṃhitā* 4. 2. 8. 2.

[12] **A** : ब्राह्मणान् भोजयेत्ततः [13] cf. *Taittiriyāraṇyaka* 1. 9. 4

[14] **A** : सौम्यां pour सङ्घं [15] **G** : छिन्न pour छन्न [16] **A** : अभिषेचयेत् pour अभिषेचनम्

[ग्रामप्रदक्षिणम्, जलाधिवासश्च[1]]

[2]वस्त्रैराभरणैर्माल्यैर्भूषयित्वा सुगन्धकैः । सर्वालंकारसंयुक्तं ग्रामं कृत्वा प्रदक्षिणम् ॥ १७ ॥
जलाशयं ततः प्राप्य जलाधिवासनं कुरु ।

[मण्टपः[3]]

देवेश्वरालयाग्रे वा [4]देव्यालयाग्रकेऽपि वा ॥ १८ ॥
नवाष्टसप्तहस्तं[5] वा मण्टपं तु [6]समाश्रकम् । षड्भित्रयसमायुक्तं कलाचरणसंयुतम् ॥ १९ ॥
[7]मण्टपं वाथ कूटं वा प्रपां वा शक्तितः कुरु । द्वारतोरणसंयुक्तं वितानाद्यैरलंकृतम् ॥ २० ॥
[8]मध्येशं वेदिकाव्यासमुत्सेधं मुष्टिमात्रकम् । [9]गुणाक्षकरजव्यासससमोत्सेधोपवेदिका ॥ २१ ॥
शांकरे च महाशासु पञ्चकुण्डाम्बुजाकृति[10] । योनिकुण्डानि वा कल्प्य गोमयालेपनं कुरु ॥ २२ ॥

---

[1] cf. *Virāgama* 65, 26-30 :

अलंकृत्य च तां देवीं कुर्याद्ग्रामप्रदक्षिणम् । नदीतटाकतीरे वा गोमयेनानुलेपिते ॥
पीठं तत्रैव निक्षिप्य गौरीं तत्रोपरि न्यसेत् । स्नापयेत्पञ्चगव्येन जलाधिवासनं कुरु ॥
नववस्त्रेण संवेष्ट्य कूर्चेनैव समन्वितम् । जलमध्ये न्यसेद्देवीं गौरीबीजेन देशिकः ॥
पूर्वादीशानपर्यन्तं वर्धनीं विन्यसेत्ततः । सवस्त्रां सापिधानां च वामाद्याश्चैव विन्यसेत् ॥
तस्योर्ध्वे च प्रपां कृत्वा दीपयुक्तं विधीयते । एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ॥

cf. *Suprabhedāgama* I 38, 24b-27a :

सर्वालंकारसंयुक्तं कृत्वा ग्रामप्रदक्षिणम् । जलाधिवासनं पश्चात्त्रिरात्रं वैकरात्रकम् ॥
चतुरश्रां प्रपां कृत्वा दर्भमालाविभूषिताम् । वस्त्रैरावेष्टयित्वा तु पुष्पैर्दर्भैर्विशेषतः ॥
कण्ठमात्रे जले शुद्धे शक्तिं तत्राधिवासयेत् । दिक्पालाधिपकुम्भानि विन्यसेत्परितो जले ॥

[2] B : वस्त्रैश्च pour वस्त्रैर्

[3] cf. *Aṃśumadāgama* 80, 15b-18a :

पूर्वे वा चोत्तरे वापि मण्टपं कारयेद्बुधः । मण्टपं नवधा भज्य मध्ये वेदीं प्रकल्पयेत् ॥
कुण्डानि परितः कल्प्य पद्मकुण्डं चतुर्दिशि । पावकादिषु कोणेषु योन्याकाराणि कल्पयेत् ॥
इन्द्रईशानयोर्मध्ये प्रधानं वृतकं कुरु । मण्टपं भूषयेत्पश्चात् ”

cf. *Suprabhedāgama* I 38, 27b-31a et 45 :

प्रतिष्ठामण्टपं कृत्वा सर्वालंकारसंयुतम् । षोडशस्तम्भसंयुक्तं चतुर्द्वारसमायुतम् ॥
चतुस्तोरणसंयुक्तं दर्भमालाभिशोभितम् । तन्मध्ये वेदिकां कृत्वा तत्त्रिभागैकविस्तृताम् ॥
हस्तमात्रसमुत्सेधां दर्पणोदरसंनिभाम् । तालमात्रसमुत्सेधामुपवेदीं प्रकल्प्य वै ॥
तस्योत्तरसमीपे तु तद्वद्वै स्नानमण्डपम् । तन्मध्ये स्नानवेदीं च तिस्रो वा द्वयेकमेखला ॥
नवपञ्चाग्निकं वापि त्रयं वा चैकमेव वा । योन्याकाराणि विधिवत्ततः कुण्डं प्रकल्पयेत् ॥

[4] A : देव्याचार्याग्रकेऽपि वा [5] C : कृत pour हस्त [6] A : समाश्रमम् [7] A : मण्डपं

[8] A मध्येशं ; C, F, G : मध्येसं [9] A : गुणाक्षकरजं व्याससमुत्सेधं सोपवेदिका ; C : गुणकर्षकरं जव्यासमुत्सेधं सोपवेदिका ; F : गुणक्षकरव्याससमुत्सेधं सोपवेदिका

[10] La forme grammaticale correcte est पञ्चकुण्डमम्बुजाकृति ; mais le mètre ne serait pas respecté.

[1]मण्डपस्योत्तरे देशे स्नानभ्रं प्रकल्पयेत् । देव्यास्तु [2]पीठविस्तारत्रिगुणं भ्रवभ्रविस्तृतम्[3] ॥ २३ ॥
[4]त्रिद्व्येकमेखलं वाथ [5]वेदाग्न्यक्षाङ्गुलं ततम् । उन्नतं [6]चैकं कर्तव्यं मेखलात्रयसंयुतम् ॥ २४ ॥
अधस्तान्मेखलाहीनं [7]चैकमेखलयापि वा । नालमुत्तरतः [8]कुर्यात्तत्त्रिभागैकमानतः ॥ २५ ॥
व्यासायामसमं कुर्याद्बाह्ये[9] मेखलमन्तरे[10] । जल[11]धारासमायुक्तं गुणमात्रविशालतः ॥ २६ ॥

[शयनाधिवासः[12]]

ततः शिल्पिनमुद्वास्य पुण्याहप्रोक्षणं कुरु । स्थण्डिलं वेदिकायां तु [13]शालिभिर्विमलैः कुरु ॥ २७ ॥
तस्मिन्नलिनमालिख्य तण्डुलैस्तिललाजकैः । दर्भैः पुष्पैः परिस्तीर्य [14]शयनं पञ्च कल्पयेत् ॥ २८ ॥
जलाद्गौरीं [15]समानीय स्नानभ्रे निधापयेत् । व्यपोह्य वस्त्रकूर्चादीन्[16] गव्यैः कृत्वाभिषेचनम्[17] ॥२९ ॥
[18]शुद्धाद्भिः स्नापयेत्पश्चाद्गौर्या[19] मन्त्रमुदाहरन् । [20]गन्धादिभिर्हृदाभ्यर्च्य नववस्त्रं धरेत्ततः ॥ ३० ॥
बध्वा प्रतिसरं पश्चात्कूर्चमालभ्य[21] मूर्धनि । शयने शाययेत्पश्चा[22]त्प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥ ३१ ॥

---

[1] C, G : मण्टप pour मण्डप
[2] A : पीठविधृता त्रिगुणं ; B : पीठविवृतेस्त्रिगुणं C, F, G : पीठविस्तारं त्रिगुणं
[3] B : विस्तृति pour विस्तृतम्
[4] A : त्रिद्वैथमेखलं ; B : त्रिद्वैधमेखलां ; C : त्रिद्वयमेखलं ; F : तद्वयं मेखलं ; G : त्रिद्विमेखलं
[5] A : देव्यान्यक्षांगुलास्तृतम् ; B : देव्यान्यक्षङ्गुलांस्तथा ; C, F : वेदान्यक्षाङ्गुलस्मृतम्
[6] A, B : चैव pour चैकं ; F, G : चैक
[7] A, B : चैकमेखलयोरपि [8] A, B : कुर्यात्त्रित्रिभागैकभागतः [9] B : बाह्य pour बाह्ये
[10] C : अन्धरे pour अन्तरे [11] B, C, G : धार pour धारा
[12] cf. *Kāraṇāgama* I 89, 31-40 :

गोमयालेपनं कृत्वा कुर्याच्छिल्पिविसर्जनम् । मण्टपं भूषयेत्पश्चाद्वसुदिक्षु ध्वजान्वितम् ॥
वितानदर्भमालाभिः संयुक्तं चाष्टमङ्गलैः । नालिकेरफलैश्चैव मुक्तादामैः प्रलम्बितम् ॥
गात्रवेष्टनसंयुक्तं युगतोरणभूषितम् । भूसुरान्भोजयेत्तत्र उच्छिष्टोद्वासनं कुरु ॥
गोमयालेपनं कृत्वा यागमण्टपशुद्धये । पञ्चगव्येन संप्रोक्ष्य पूर्वं वा पश्चिमे तथा ॥
वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु । पुण्याहं वाचयित्वाथ अष्टद्रोणैश्च शालिभिः ॥
वेद्यूर्ध्वं स्थाण्डिलं कुर्यात्तदर्धैस्तण्डुलैरपि । तदर्धैस्तिलसंयुक्तैर्दर्भैः पुष्पैः परिस्तरेत् ॥
तन्मध्ये शयनं कल्प्य चर्मजाद्यैरनुक्रमात् । द्वारपूजादिकं सर्वं स्थापनक्रमवत्सुधीः ॥
जलादुत्तीर्य गौरीं तु स्नानभ्रोपरि न्यसेत् । वस्त्रकूर्चं विसृज्याथ पूर्ववच्छुद्धिमाचरेत् ॥
नवाम्बरेण संछाद्य गन्धपुष्पादिभिर्हृदा । कौतुकं बन्धयेत्पश्चाद्गौरीगायत्रिमन्त्रतः ॥
आरोप्य सुमुहूर्ते तु प्राक्शिरश्चोर्ध्ववक्त्रकम् । शयने शाययेद्गौरीं रक्तवस्त्रेण वेष्टयेत् ॥

[13] G : शालिपिष्टमलंकुरु [14] voir *supra* p. 41 note 2
[15] B : समादाय [16] C : कूर्चादि pour कूर्चादीन् [17] A, G : कृत्वाभिषेचयेत्
[18] C : शुद्धां च [19] B : गौरी pour गौर्या [20] B : गन्धाद्विश्च pour गन्धादिभिः
[21] C, G : कूर्चमालां च ; F : कूर्चमाला च [22] B : प्राक्शिरां pour प्राक्शिरः

[कुम्भस्थापनम्[1]]

नववस्त्रेण संवेष्ट्य कवचेन तु मन्त्रतः । नवसंख्या[2] नवान्कुम्भान्सूत्रादिभिः समन्वितान् ॥ ३२ ॥
गौर्यास्तु [3]गौरीकुम्भं तु स्थापयेत्तु शिरोऽन्तिके । वामादिवसुकुम्भं तु शक्रादिषु निधापयेत् ॥ ३३ ॥
तत्तन्मन्त्रं न्यसेत्तेषु [4]हविरन्तं समर्चयेत् । [5]दिशास्वध्ययनं कुर्याद्धोमकर्म समाचरेत्[6] ॥ ३४ ॥

[होमः[7]]

अग्न्याधानादिकं [8]सर्वमग्निकार्योक्तमाचरेत् । [9]पलाशोदुम्बराश्वत्थवटाः पूर्वादिषु क्रमात् ॥ ३५ ॥

---

[1] cf. *Kāroṇāgama* I 89, 41-45a:

देव्याश्च दक्षिणे भागे गौरीकुम्भं तु विन्यसेत् । समूत्रान्सापिधानांश्च सवस्त्रान्कूर्चसंयुतान् ॥
हेमपङ्कजसंयुक्तान्द्रोणोदकसुपूरितान् । गौरीरूपं ततो ध्यात्वा तद्रूपं तु घटे न्यसेत् ॥]
परितोऽष्टौ घटान्न्यस्त्वा सूत्रादिभिः समन्वितान् । इन्द्रादिषु क्रमेणैव वामादिवसुशक्तिकाः ॥
स्वस्वबीजसमायुक्तं न्यस्त्वा संपूजयेद्बुधः । मुकुलीं पद्ममुद्रां च बिम्बमुद्रां प्रदर्शयेत् ॥
दिशास्वध्ययनं कुर्यात्ततो होमं समाचरेत् ।

[2] C : नव pour नवान्

[3] B : गौरि pour गौरी [4] B : हविष्यान्तैः ; C, G : हविष्यान्तं [5] C, G . दिशामध्ययनं

[6] cf. *Vīrāgama* 65, 47:

चतुर्दिक्षु चतुर्वेदैः कुर्यादिध्ययनं ततः । गौरीमूलं जपेत्तत्र आग्नेयादि चतुर्दिशि ॥

[7] cf. *Kāraṇāgama* I 89, 45b-52:

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् । कुण्डमध्ये यजेद्देवीं रक्तपद्मोपरि स्थिताम् ॥
आषाढाश्वत्थखदिरवटाः पूर्वादिदिक्षु वै । औदुम्बरमपामार्गं शम्यर्कं पावकादिषु ॥
पलाशं तु प्रधानं स्याज्जुहुयाद्दैशिकोत्तमः । समिधो जुहुयाद्ब्रह्मान्सद्योजातेन मन्त्रतः ॥
गौरीगायत्रिमन्त्रेण घृतं हुत्वा विशेषतः । अघोरेण चरुं हुत्वा लाजं वामेन होमयेत् ॥
तिलमस्त्रेण जुहुयात्सर्षपं कवचेन तु । यावकं पञ्चमेनैव द्रव्यान्ते व्याहृतिं हुनेत् ॥
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् । गौरीमिमायमन्त्रेण होमयेत्पञ्चविंशतिः ॥
गौरीबीजमनुस्मृत्य होमयेच्छतसंख्यया । द्रव्यान्ते तु स्पृशेद्गौरीं गौरीमिमायमन्त्रतः ॥
गेयनृत्तादिभिर्युक्तं रात्रिशेषं व्यपोह्य च ॥

cf. *Vīrāgama* 65, 40b-45:

ततो होमं प्रकुर्वीत नव वा पञ्च एव वा । समिदाज्यचरूल्लाजान्मुद्गमाषयवांस्तथा ॥
गौरीमूलेन मन्त्रेण समिधा हूयते क्रमात् । आज्यं गायत्रिमन्त्रेण हृदयेन चरुस्तथा ॥
शिरोमन्त्रेण लाजश्च मुद्गं वामेन हूयते । माषं सद्येन होतव्यं यवमीशानमन्त्रतः ॥
एवमेव क्रमेणैव प्रत्येकं तु शताहुतिः । घृतमिक्षेति मन्त्रेण घृतेनैव शताहुतिः ॥
देवस्य त्वेति मन्त्रेण अन्नाहुतिमथाचरेत् । द्रव्यान्ते व्याहृतिं हुत्वा स्पर्शयेत्प्रतिमां ततः ॥
हव्यवाहेति मन्त्रेण सर्वद्रव्यसमन्वितम् । स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ॥
नृत्तगेयसमायुक्तं रात्रौ जागरमुच्यते ।

[8] A : सर्वं कर्माग्निकार्यमाचरेत् ; B : सर्वं कर्म पूर्णान्तमाचरेत्

[9] A : पालाशौदुम्बराश्वत्थवटाः ; B : पालाशोदुम्बराश्वत्थवटं

शांकरे च [1]पलाशः स्यात्समित्परिध्यस्तथा । [2]गौरीगायत्रिमन्त्रेण[3] समिद्धोमं समाचरेत् ॥ ३६ ॥
[4]गौरीमिमायमन्त्रेण [5]हृदा च घृतहोमकम् । शिखया चरुहोमं तु प्रत्येकं तु शताहुतिः ॥ ३७ ॥
पञ्चाशत्पञ्चविंशद्वा प्रत्येकं होममाचरेत् । द्रव्यान्ते व्याहृतिं हुत्वा ततो वै स्पर्शमाहुतिम्[6] ॥ ३८ ॥
[7]ब्रह्माङ्गैस्तत्तदङ्गानि स्पृष्ट्वा स्पृष्ट्वा दशाहुतिः ।

[कुम्भाभिषेकः[8]]

एवं जागरणं रात्रौ स्नापयेदथ ऋक्षके[9] ॥ ३९ ॥
आचार्यो मूर्तिपैः सार्धमात्मशुद्धिं समाचरेत्[10] । विम्बकुम्भानलान्सर्वान्समभ्यर्च्य विधानतः ॥ ४० ॥

---

[1] B : फलाशस्य pour पलांशः स्यात् [2] C : गौरि pour गौरी

[3] Pour गौरीगायत्री voir *Suprabhedāgama* I 38, 12b-14a:

उच्यते गौरिगायत्री गणाम्बिकायै विद्महे । इत्युच्चार्य तदन्ते तु महातपायै धीमहि ॥
एवमुक्त्वा तदन्ते तु तन्नो गौरी प्रचोदयात् । गौरीगायत्रिसंज्ञाख्या चतुर्विंशतिकाक्षरा ॥

voir aussi *supra* p. 33 note 14.

[4] voir *supra* p. 33 note 14 [5] A : हृदार्च pour हृदा च

[6] G, F. G : आहुतिः pour आहुतिम् [7] B omet le demi-*śloka* 39a

[8] cf. *Kāmikāgama* II 44, 86b-96:

ततः प्रभाते शुद्धस्तु मूर्तिपैः सह देशिकः । उत्थाप्य देवीं कुम्भांश्च प्राग्वद्वह्निं च तर्पयेत् ॥
दत्त्वा पूर्णाहुतिं पश्चात्प्रविशेद्भवनं ततः । मानुषे दैविके वापि प्राग्वत्संस्कृत्य विन्यसेत् ॥
कशिलां पूर्वमन्त्रेण रत्नहेमादिगर्भिताम् । प्राग्वद्धात्रीश्वरीं नीत्वा मूलमुच्चार्य विन्यसेत् ॥
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं च कारयेत् । चलां चेत्स्नानवेद्यां तु मन्त्रन्यासं समाचरेत् ॥
देव्यग्रे तु घटान्न्यस्य कुम्भाद्बीजं तु तद्धृदि । विन्यसेदनुकुम्भेभ्यः पीठस्य परितो मुनून् ॥
तत्त्वमूर्त्यादिविन्यासं पूर्ववत्कारयेत्ततः । तत्तत्कुम्भोदकैश्चैव तत्तद्देशेऽभिषेचयेत् ॥
स्नपनं कारयेदन्ते नैवेद्यं चोत्सवं गुरुः । स्तुत्वानेकविधैः स्तोत्रैरमुं श्लोकं पठेत्ततः ॥
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावदत्र त्वया देवि स्थातव्यमिह मन्दिरे ॥
संपूज्य देशिकादींश्च दक्षिणां दापयेत्ततः । उत्तमादिविभिन्नां तु लिङ्गस्थापनचोदिताम् ॥
ततः कल्याणकर्म स्याच्चतुर्थे कर्मवित्ततः । देव्याः स्वयं प्रधानायाः सहजायाश्च वर्जयेत् ॥
कर्म वैवाहिकं विप्राः प्रतिष्ठैवं समीरिता ।

cf. *Suprabhedāgama* I 38, 48-63 :

प्रभाते सुमुहूर्ते तु सर्वतोद्यसमायुतम् । आचार्यमूर्तिपांश्चैव दैवज्ञं संप्रपूजयेत् ॥
पूर्णाहुतिं ततो दत्त्वा बीजमुख्येन मन्त्रतः । शक्तिबिम्बं ततोत्थाप्य स्नानवेद्युपरि न्यसेत् ॥
वर्धनीं तु ततोत्थाप्य देशिकश्चोत्तरानतः । बिम्बस्य हृदये मूर्ध्नि नाभौ मूले तु विन्यसेत् ॥
न्यस्त्वा ब्रह्माङ्गमन्त्राणि विन्यसेत्सर्वमातृकाः । वर्धकुम्भस्थशक्तीश्च बिम्बे संयोज्य मूलतः ॥
बीजमुख्येन मन्त्रेण तज्जलेनाभिषिच्य वै । वामादिशक्तिकुम्भाद्भिः संस्नाप्य स्वस्वमन्त्रकैः ॥
स्नानलेपादिभिरद्भिः स्वस्वमन्त्रैर्विशेषतः । पाद्यमाचमनं चार्घ्यं दद्याद्देव्यै हृदादिभिः ॥
अभ्यर्च्य गन्धपुष्पाद्यैः सर्वालंकारसंयुतम् । पायसं हविषं तत्र हृदयेन प्रदापयेत् ॥

[1]गौरीगायत्रिमन्त्रेण [2]चाज्येनैव दशाहुतिः । गौर्यास्तु मूलमन्त्रेण पूर्णाहुतिं समाचरेत् ॥ ४१ ॥
गौरीबिम्बं [3]ततोद्धृत्य स्नानवेद्यां निधापयेत् । व्यपोह्य वस्त्रकूर्चादीन्हृदा गन्धादिभिर्यजेत् ॥ ४२ ॥
[4]घृतशिरोऽर्पणं कृत्वा पादयोर्बाहुमूर्धनि । कुम्भानानीय [5]वेद्यास्तु [6]बिम्बाग्र स्थण्डिले न्यसेत् ॥४३ ॥
[7]कुम्भाद्बीजं समादाय [8]प्रतिमाहृदि विन्यसेत् । कलान्यासं ततः कृत्वा [9]कुम्भाद्भिरभिषेचयेत् ॥ ४४ ॥
[10]आम्रपांसुहरिद्रैश्च [11]गन्धाद्भिरभिषेचयेत् । वस्त्रैराभरणैर्माल्यैर्गन्धैर्धूपैश्च दीपकैः[12] ॥ ४५ ॥
[13]हविरन्तं समभ्यर्च्य [14]गौरीगायत्रिमन्त्रतः । [15]सर्वासां चैव शक्तीनामर्चायां[16] तु विशेषतः ॥ ४६ ॥
कल्याणं कारयेद्धीमान्विवाहविधिमार्गतः ॥ ४७ ॥

इति [17]श्रीमद्रौरवतन्त्रे [क्रियापादे] [18]गौरीस्थापनविधिर्नाम एकत्रिंशः पटलः

एवमेकं समाख्यातं युक्तं तत्र वदामि ते । मण्डपं विधिना कृत्वा तन्मध्ये वेदिकां क्रमात् ॥
सर्वालंकारसंयुक्तां वितानध्वजभूषिताम् । तन्मध्ये स्थण्डिलं कृत्वा वह्निं तत्रैव संयजेत् ॥
तत्र मानुषनाहे तु उमारुद्रौ तु वारुणे । वामभागे द्युमां न्यस्त्वा सर्वालंकारसंयुताम् ॥
नववस्त्रैरुमारुद्रौ प्रशान्तायेति भूषयेत् । आचार्यो ब्रह्मवद्ध्यात्वा विवाहे सर्वकर्मणि ॥
पूर्वोक्तेन विधानेन अग्न्याधानादिकं तथा । विष्णुं तत्रैव चाहूय देवीमुदकपूर्वकम् ॥
रुद्रस्य दक्षिणे हस्ते बीजमुख्येन दापयेत् । वामेऽश्मानं तु संस्थाप्य गौरीगायत्रिमन्त्रतः ।
देव्याः पादं च रुद्रेण स्पर्शयित्वाश्मनि न्यसेत् । शिवमन्त्रेण मन्त्रज्ञो लाजं हुत्वा त्रयं बुधः ।
शक्तियुक्तं ततः सर्वं प्रभूतं हविषं ददेत् । युक्तमेवमिदं प्रोक्तं सहैव स्थापनं शृणु ।
आरम्भस्थापनान्तं यत्सर्वकर्म सहैव तु । सहैव इति विख्यातं चोत्सवो विधिचोदितः ॥

[9] C, G : अपऋक्षकैः pour अथ ऋक्षके [10] A : अथाचरेत् pour समाचरेत्
[1] C : गौरि pour गौरी [2] A omet च dans चाज्येनैव
[3] La forme grammaticale correcte est तत उद्धृत्य ; mais le mètre ne serait pas respecté
[4] A : घृतं pour घृत [5] A, B : वेद्यां तु [6] F : शिवाग्रे [7] C : कुम्भाद्विम्बं
[8] B : प्रतिमां हृदि ; C, G : प्रतिमे हृदि [9] C : कुम्भाद्यैः pour कुम्भाद्भिः
[10] C, F, G : अत्र pour आम्र ; une meilleure lecture semble être आम्लपांसुहरिद्रैश्च (आम्लपांसुः = நெல்லிப் பொடி)
[11] C : गन्धाद्यैः pour गन्धाद्भिः [12] C, F, G : गन्धैश्च धूपदीपकैः [13] B, C, F, G : हविषान्तं
[14] C : गौरि pour गौरी
[15] cf. *Virāgama* 65, 57-63 :
कल्याणं कारयेत्पश्चान्मण्डपे सविशेषतः । गोमयालेपनं कृत्वा शालिना विकिरेत्ततः ॥
शाल्युपरि सुसंस्थाप्य मानुषे तु पदे तथा । स्थण्डिले स्थापयेद्देवीं दिशि दक्षिणतो न्यसेत् ॥
तस्याग्रे स्थण्डिलं कृत्वा अग्निमुखं च कारयेत् । तत्र विष्णुं समाहूय दद्यादुदकपूर्वकम् ॥
गौरीबीजेन संयुक्तं ब्रह्माङ्गेन समायुतम् । हृदयेनादिष्टमन्त्रेण अश्मानं स्पर्शयेत्ततः ॥
आचार्यहस्ते संपूर्य लाजान् हृदयमन्त्रतः । ईशानेन तु मन्त्रेण लाजहोमं तु कारयेत् ॥
प्रदक्षिणं ततः कृत्वा लाजहोमं पुनः पुनः । त्रिःकृत्वा तु विशेषेण हुत्वा चित्तादिभिस्तथा ॥
हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरम् । भिन्नासनमिदं प्रोक्तम्''
[16] A : अम्भाया pour आचार्यां ; B : अङ्गानां ; G : अङ्गायाः
[17] A : श्री pour श्रीमद् ; B omet श्रीमद्रौरवतन्त्रे
[18] A : गौरीस्थापनविधिपटलो द्वात्रिंशः ; C : गौरीस्थापनविधिर्नाम एकत्रिंशत्पटलः; F, G : गौरीस्थापनविधिपटलः एकत्रिंशत्

[द्वात्रिंशः पटलः]

[द्वारपालस्थापनविधिः[1]]

[द्वारपालस्थानं तन्मानं च[2]]

लक्षणं द्वारपालानां स्थापनं[3] शृणु [4]वक्ष्यते । द्वारेषु मूलहर्म्यस्य[5] [6]मण्डपे वान्तरालके ॥ १ ॥
शोभादिगोपुरान्तेषु [8]द्वारस्यैव तु पार्श्वयोः । स्तम्भोदय[9]समं श्रेष्ठं [10]द्वारोदयमथाधमम् ॥ २ ॥
तयोर्मध्येऽष्टभागे तु[11] नवधोच्चं [12]परावरे । तस्मादायांश[13]संयुक्तमायादि[14] शोभनार्थकम् ॥ ३ ॥
राज्ञः [15]कर्तुश्च राष्ट्रस्य [16]वास्तोश्चैवानुकूलतः । यत्तन्मानं गृहीत्वा तु [17]कुर्याद्वेशघनेन तु ॥ ४ ॥

---

[1] Pour द्वारपालस्थापनविधि voir *Aṃśumadāgama* 23, *Kāraṇa* II 86, *Dipta* 67, *Vira* 41, *Sahasra* 44 et *Suprabheda* I 39.

[2] cf. *Aṃśumatkāśyapa* 44, 1b-2:
अन्तर्मण्डलसालादिस्त्वधुना प्रोच्यते क्रमात् । द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यके ॥
द्वारगोपुर इत्येते क्रमान्नाम्ना प्रकीर्तिताः ।

cf. *Aṃśumadāgama* 23, 6–10:
" स्थानं वक्ष्ये द्विजोत्तम ।
द्वारस्योभयपार्श्वे तु स्वाधिष्ठानस्य चोर्ध्वतः । भित्तियुक्तं वियुक्तं वा स्थापयेद्वारपालकान् ॥
द्वारमन्तर्मुखं विद्याद्वारपालान्बहिर्मुखे । स्तम्भोत्सेधांशमानेन द्वारपालोदयं विदुः ॥
स्तम्भोत्सेधसमं वाथ त्रिपादं वाथ संग्रहे । तयोर्मध्येऽष्टभागं च एकांशेन तु ह्रासयेत् ॥
एवं बिम्बोदयं ख्यातं शुभायादौ तु संभवे । शालादिगोपुरान्तानां स्तम्भमानेन कल्पयेत् ॥
मण्टपद्वारदेशे तु द्वारपालांश्च कल्पयेत् ।

cf. *Suprabhedāgama* I 39, 20b-21:
द्वारोत्सेधसमा भद्राः किरीटाद्यङ्गदोज्ज्वलाः । प्रासादे मण्डपे द्वारे द्वारे च कीर्तिताः ॥
महामर्यादिभित्तिस्था द्वारगोपुरपार्श्वयोः ।

[3] B : स्थापने [4] C, G : वक्ष्मि ते [5] C : हर्म्यस्थ pour हर्म्यस्य
[6] C, G : मण्टपे च pour मण्डपे वा [7] E : गोपुरं तेषु pour गोपुरान्तेषु
[8] A : द्वारास्ये चतुः पार्श्वयोः ; B : द्वारमस्य तु पार्श्वयोः [9] C, F : सहस्रेषु pour समं श्रेष्ठं
[10] A : द्वारोदयाधमम् ; C, F, G : द्वारोदयाधमं भवेत् [11] A : भागेन pour भागे तु ; F : भागं तु
[12] A : वरे वरात् ; B : वरं वरात् ; G : परोऽवरात् [13] D : आयाम pour आयांश
[14] A : मावादि pour आयादि ; C, F, G : आपादि [15] A : कर्तव्य pour कर्तुश्च
[16] A : वास्तोच्चे वानुकूलितम् ; D : वासेच्छावानुकूलतः ; C : वस्त्वोरुच्चेवानुकूलितम् ; F : तस्योच्चेवानुकूलितम्
[17] B : कुर्याद्वै शयनेन तु

[प्रतिमाद्रव्यम्[1]]

लोहजं शैलजं वापि सौधजं धातुजं तु वा[2] । लोहजं [3]सुघनं वापि सगर्भं वा मृदादिभिः ॥ ५ ॥
[4]सौधजं [5]चेष्टकागर्भं [6]शिलाधातु नगर्भकम् ।

[द्वारपाललक्षणम्[7]]

नन्दिकालौ तु पूर्वे तु[8] दक्षिणेऽदक्षिणे स्थितौ ॥ ६ ॥

---

[1] cf. *Aṃśumadāgama* 23, 1:

द्वारपालविधिं वक्ष्ये शृणुतां रविसत्तम । शिलादार्विष्टकादीनि कारयेल्लक्षणान्वितम् ॥

[2] B : तथा pour तु वा [3] A : सुखसं वापि ; B : सुखदं वापि ; C, F, G : सुखनं वापि

[4] E omet les *śloka* 6, 7 et 8 [5] A: ज्येष्ठं pour चेष्टका

[6] A : शिलायां तु न गर्भकम् ; C, G : शिलादारू न गर्भकम्

[7] cf. *Diptāgama* 67, 1b-8:

पूर्वद्वाराधिपौ ज्ञेयौ नन्दिकालावुभौ तथा । दण्डी मुण्डी महावीर्यौ दक्षिणद्वारपालकौ ॥
भृङ्गी च विजयश्चैव पश्चिमद्वारपालकौ । अनन्तः पशुपतिश्चैव उत्तरद्वारपालकौ ॥
नन्दीशो दण्डहस्तः स्यात्कालः परशुधारकः । दण्डीशो दण्डहस्तः स्यान्मुण्डी वै भिण्डिपालधृत् ॥
भृङ्गी वै खड्गहस्तः स्याद्विजयः शूलधारकः । अनन्तो वज्रहस्तः स्यात्पशुपतिः पाशधारकः ॥
नन्दीशः श्यामवर्णः स्यात्कालो वै धूम्रवर्णकः । इन्द्रनीलनिभो दण्डी मुण्डी वै श्वेतवर्णकः ॥
भृङ्गी मयूरग्रीवाभो विजयो रक्तवर्णकः । अनन्तः कालवर्णः स्यात्पशुपतिर्नील एव च ॥
त्रिणेत्राश्चतुर्भुजाः सर्वे सर्वाभरणभूषिताः । किंचित्त्रिभङ्गिकं कार्यं वामपादं तु कुञ्चितम् ॥
इत्येवं लक्षणं कृत्वा ततः स्थापनमारभेत् ।

cf. *Yogajāgama* 6, 244b-252a:

नन्दीशः श्यामवर्णस्तु द्विहस्तः परशुसंयुतः । परशुं वामहस्ते तु दक्षिणे वेणुदण्डकम् ॥
कालेशः कुङ्कुमाभस्तु परशुवेणुदण्डधृत् । द्विनेत्रौ द्विभुजौ चैव नन्दिकालौ वयोधरौ ॥
पूर्वद्वारे स्थितौ यत्र नन्दिकालौ महात्मनः । अनन्तः पशुपतिश्चैव दक्षिणद्वारपालकौ ॥
अनन्तो रक्तवर्णस्तु वज्रायुधसमन्वितः । पशुपतिर्नीलवर्णस्तु शक्तिहस्तोग्रलोचनः ॥
पश्चिमद्वारपालौ च दण्डी मुण्डी तथैव च । दण्डी घनेन्द्रचापाभः खड्गहस्तोग्रदंष्ट्रकः ॥
मुण्डी कुन्देन्दुवर्णश्च भिण्डिपालयुतस्तथा । विजयश्चैव भृङ्गीश उत्तरद्वारपालकः ॥
विजयश्चेन्द्रगोपाभः शूलहस्तो भयंकरः । भृङ्गीशो भृङ्गवर्णस्तु क्षुरिकायुधहस्तधृत् ॥
त्रिभङ्गं कुञ्चितं पादमुग्रदंष्ट्रसमन्वितम् । प्रासादमण्डपद्वारे द्वारे चैव प्रकीर्तिताः ।

cf. *Suprabhedāgama* I 39, 18b-20a:

सर्वे त्रिभङ्गियुक्ताश्च सर्वे कुञ्चितपादकाः । उग्रदंष्ट्राः सुवृत्ताश्च सर्वे निर्देशहस्तकाः ॥
सर्वे चतुर्भुजोपेता द्विभुजा वा त्रिणेत्रकाः । द्विनेत्राश्चोग्रदंष्ट्राश्च हलपल्लवहस्तकाः ॥

[8] B : पूर्वे च ; C, F : पूर्वौ तु

[1]दण्डिमुण्डी अवाच्यां तु [2]विजयो भृङ्गिरेव च । वारुणे [3]रक्षकावेतौ [4]गोपत्यनन्तकाविमौ ॥ ७ ॥
उत्तरद्वाररक्षार्थं दक्षिणेऽदक्षिणे न्यसेत् । [5]श्यामाभकुङ्कुमाभौ च नन्दिकालौ [6]क्रमास्थितौ ॥ ८ ॥
[7]इन्द्रगोपनिभौ[8] चैव मयूरस्येव[9] कन्धरम्[10] । [11]अवाच्यां द्वारिकौ भासा [12]पद्मरागाभनीलकौ ॥ ९ ॥
वारुणे द्वारपालौ तु [13]सितकालाभावुत्तरे । [14]दण्डं गदा च खड्गश्च त्रिशूलं [15]भिन्दिपालकः ॥१० ॥
[16]वेत्रं गदा च वज्रं च नन्द्यादीनां तु [17]चिह्नकम् । त्रिनेत्राश्चतुर्भुजाः सर्वे त्वतिरौद्राः सदंष्ट्काः ॥११॥
जटा[18]मकुटयुक्ताश्च [19]करण्डं वा किरीटकम् । [20]द्वारपार्श्वकहस्तौ द्वौ [21]पूर्वे चिह्नं परेऽञ्जलिः ॥१२॥
[22]अग्रहस्तद्वयोः [23]पूर्वे सूच्यन्ये[24] [25]हरपल्लवम् । हस्तानां वेशनीत्रं[26] चाप्युद्धृतालम्बनं तथा ॥ १३ ॥

---

[1] A B : दण्डमुण्डमवाच्यां तौ ; le forme grammaticale correcte est दण्डिमुण्डिनौ

[2] A : विजयो भिकिरीभि च ; B : विजयो रमिकीरितौ [3] A : क्षेकरापेतौ ; C, F : रक्षकाले तु

[4] A : गोपानश्चान्तकापिगौ ; B : गोपानश्चान्तकाविमौ ; F : कोपनश्चान्तकावुभौ ; G : गोपानश्चान्तकावुभौ

[5] C, F, G, : श्यामाभं कुङ्कुमाभं च [6] A : क्रमान्तितौ ; B : क्रमान्तिकौ ; C : त्वसन्निभौ ; F : ख्यमान्निभौ

[7] E omet le *śloka* 9.

[8] A : निभं pour निभौ [9] A : मयूरस्य तु

[10] Le mot कन्धरा se trouve ici au neutre au lieu du féminin.

[11] A : अवाच्युद्वारकाभासमौ ; B : अवाच्यद्वारकाभासौ ; C : अवाप्यद्वारिकाभासौ ; G : अवाच्यां द्वारिकौ भासौ

[12] A : पद्मरागाभिनीलकम् ; B : पद्मरागाभिनीलकौ ; C : पद्मरागान्तरालकम् ; G : पद्मरागाभरालकम्

[13] A : शीतकालाभमुत्तरे ; C, F : सितं कालाभमुत्तरे [14] A : दण्डं गदां च खडगं च

[15] A : भिन्दिवालकम् [16] A : वेलं pour वेत्रं [17] G : शक्तिकम् [18] C : मुकुट pour मकुट

[19] A : करण्डा वा किरीटिका ; B : सकरण्डकिरीटका: [20] A : द्वारपार्श्वं च हस्तौ द्वौ ; B : द्वारपार्श्वं च हस्तौ द्वौ

[21] A : पूर्वं चिह्नापराञ्जली [22] A : अग्नि pour अग्र

[23] A : पूर्वं सूच्यन्तं ; cf. *Nāṭyaśāstra* 9, 64 : खटकाख्ये यदा हस्ते तर्जनी संप्रसारिता । हस्तः सूचीमुखो नाम तदा ज्ञेयः प्रयोक्तृभिः ॥

cf. *Saṃgitaratnākara* 7, 147:
ऊर्ध्वप्रसारिता यत्र खटकामुखतर्जनी । हस्तः सूचीमुखः स स्यात् ।

[24] La forme grammaticale correcte est अन्यस्मिन्

[25] C : हरवल्लभम् ; une meilleure lecture semble être अलपल्लवम् cf. *Nāṭyaśāstra* 9, 91:
आवर्तिताः करतले यस्याङ्गुल्यो भवन्ति हि । पार्श्वगतविकीर्णाश्च स भवेदलपल्लवः ॥

cf. *ibid.* le commentaire d'Abhinavagupta:
अलपल्लवमाह—आवर्तिता इति । कनिष्ठादिक्रमेण वर्तना परिवर्तनं वा कुर्वन्त्यः । इयतीत्यः चलः चलत्पल्लवाकारत्वाद् अलपल्लवः । अलपद्मक इति च तन्नाम ।

cf. *Saṃgitaratnākra* 7, 144-145:
व्यावर्तिताख्यं करणं कृत्वैव समवस्थिताः । यस्याङ्गुल्यः करतले पार्श्वगाः सोऽलपल्लवः ॥
अलपद्मः स एव स्यादङ्गुलीनां च केचन । अस्य व्यावर्तितस्थाने परिवर्तितमूचिरे ॥

[26] A : नौलं pour नीत्रं

[1]शृङ्गारं युक्तितः कुर्यात्सर्वाभरणवाससधृत्[2] । [3]सुस्थितो द्वारपार्श्वाङ्घ्रिरन्याङ्घ्रि[4]तलमुद्धृतम् ॥ १४ ॥
चिह्नदण्डे निधातव्यमुद्धृताङ्घ्रितलं रुरो । अन्यद्भङ्गत्रयं [5]त्विष्टभङ्गस्थानकमेव वा ॥ १५ ॥
[6]सुस्थितो द्वारपार्श्वेऽङ्घ्रिरन्यत्कुञ्चितमाचरेत् ।
[नेत्रोन्मीलनं कुम्भस्थापनादि च[7]]
स्थापयित्वोक्तदेशेषु हृदा कृत्वाक्षिमोचनम्[8] ॥ १६ ॥
गव्याभिषेचनं कृत्वा स्नापयेद्गन्धतोयकैः । [9]संछाद्याहतवस्त्रेण वेदीं [10]कृत्वाग्रतो बुधः ॥ १७ ॥
[11]हस्तवितस्तिविस्तारोत्सेधां दर्पणसंनिभाम्[12] । [13]वृत्तकुण्डं तदग्रे तु गोमयालेपनं कुरु ॥ १८ ॥
स्थण्डिलं शालिभिः कुर्याद्दर्भैः पुष्पैः परिस्तरेत् । द्रोणाम्बुपूरितं कुम्भं सूत्रादिभिरलंकृतम् ॥ १९ ॥
गन्धाम्बु पूरये[14]त्तस्मिन्स्थापयेत्स्थण्डिलोपरि[15] । मूलमन्त्रं न्यसेत्तस्मिंस्तद्रूपं तु विचिन्तयेत् ॥ २० ॥
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैः[16] [17]सुपूजयेत् । [18]पुण्याहप्रोक्षणं कृत्वा ततो होमं समाचरेत् ॥ २१ ॥
[होमः[19]]
समिदाज्यौदनैः पश्चाद्भृदा मूलेन मन्त्रतः । प्रत्येकं शतमर्धं वा जुहुयात्तु क्रमेण वै[20] ॥ २२ ॥

---

[1] A : शृङ्गारयुक्तितः [2] C : वास्त्रधृक् ; : F : वस्त्रधृक्
[3] A : सुस्थित pour सुस्थितो ; C, G : संस्थितं [4] A, B : गत pour तल
[5] A : स्विष्ट pour त्विष्ट ; C : स्वष्ट ; G : स्त्विष्ट [6] A : सुस्थित pour सुस्थितो ; B, C, G : सुस्थितं
[7] cf. *Diptāgama* 67, 15-21:
नेत्रबीजं समुच्चार्य नेत्रमोक्षणमारभेत् । तर्पयेन्मधुनाज्येन तत्तद्धृदयमुच्चरन् ।
संस्नाप्य पञ्चगव्येन पञ्चगव्यमुदाहरन् । त्वमग्ने रुद्रमन्त्रेण शुद्धतोयेन सेचयेत् ॥
गन्धादिना समभ्यर्च्य हृदयमन्त्रं समुच्चरन् । तेषामग्रे तु कर्तव्यं स्थण्डिलं शालिना कुरु ॥
तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् । सुतलैः शोभितं कृत्वा तिलदर्भैः परिस्तरेत् ॥
द्वारपालाधिदैवत्यं कुम्भं तन्मध्यमे न्यसेत् । द्रोणतोयेन संपूर्णं ससूत्रं सापिधानकम् ॥
सवस्त्रं पल्लवोपेतं तत्तद्बीजसमन्वितम् । दर्भमालासमायुक्तानष्टौ च कलशान्न्यसेत् ॥
ससूत्रान्सापिधानांश्च सवस्त्रान्वारिपूरितान् । अर्चयित्वा विधानेन नैवेद्यान्तं स्वनामतः ॥
[8] C, F, G : मोक्षणम् pour मोचनम् [9] B : संछाद्य हस्तवस्त्रेण [10] B : कृत्वा गतो बुधः
[11] A : हस्तं वितस्तिविस्तारं ; B : हस्तविस्तारमुत्सेधं [12] B : दर्पणोदरसंनिभम् [13] C : वृत्तं कुण्डं
[14] B : पश्चात् pour तस्मिन् [15] A : तण्डुल pour स्थण्डिल [16] G : अन्यैः pour अर्घ्यैः
[17] B : सु pour सु ; C : श्च [18] A : पुण्याहं प्रोक्षणं
[19] cf. *Diptāgama* 67, 22-25 :
तस्याग्रे स्थण्डिलं कृत्वा वालुकैर्हस्तमानकम् । अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥
तत्तद्धृदयमन्त्रेण समिदाहुतिमाचरेत् । घृतमिश्रे घृतं हुत्वा शिरसा च चरुं हुनेत् ॥
त्वमग्ने रुद्रमन्त्रेण हुत्वा लाजं विचक्षणः । अक्षतं तिलसंमिश्रं क्षीरं मन्त्रेण होमयेत् ॥
प्रत्येकं शतमर्धं वा जुहुयात्क्रमशः पुनः । एवं जागरणं रात्रौ" ॥
[20] A : वा pour वै

[कुम्भाभिषेकः[1]]

मुहूर्ते समनुप्राप्ते [2]पूर्णाहुतिं समाचरेत् । विसृज्याच्छाद्य [3]वस्त्रं तु गव्यैः [4]कृत्वाभिषेचनम् ॥ २३ ॥
शुद्धाद्भिरभिषिच्याथ [5]सब्रह्माङ्गकला न्यसेत् । [6]वेद्या आदाय कुम्भं तु बिम्बाग्रे तु निधापयेत् ॥ २४ ॥
कुम्भाद्बीजं समादाय [7]बिम्बस्य हृदि योजयेत् । तदद्भिरभिषिच्याथ हविरन्तं हृदार्चयेत् ॥ २५ ॥
एवं दौवारिकाष्टानां[8] स्थापनं प्रोच्यते तथा[9] ॥ २६ ॥

इति [10]श्रीमद्रौरवतन्त्रे [क्रियापादे][11]द्वारपालस्थापनविधिर्नाम द्वात्रिंशः पटलः

---

[1] cf. *Diptāgama* 67, 25b-31a :

" प्रभाते स्थापनं भवेत् ॥
पूर्णाहुतिं तु शिरसा स्विष्टान्तं हि समाचरेत् । तत्तत्कुम्भं समुद्धृत्य सर्वालंकारसंयुतम् ॥
सुमुहूर्ते सुलग्ने च नक्षत्रकरणान्विते । कुम्भाद्बीजं समादाय हृद्देशे तु न्यसेत्क्रमात् ॥
दशकुम्भं समुद्धृत्य पूर्वादितः प्रदक्षिणम् । पिण्डिकायां न्यसेद्धीमान्हर्म्यपालकबीजकान् ॥
तेनोदकेन संप्रोक्ष्य तत्तद्धृदयमुच्चरन् । गन्धपुष्पादिना पूज्य स्वस्वबीजमुदाहरन् ॥
शुद्धान्नं दापयेत्पश्चादुपदंशसमन्वितम् । पश्चादाचमनं दद्यात्ताम्बूलं च निवेदयेत् ॥
द्वारपालाधिपानां तु स्थापनं चोच्यते क्रमात् ।

[2] B : पूर्णाहुतिमथाचरेत् [3] G : वस्त्रेण [4] A : कृत्वाभिषेचयेत्
[5] A : सब्रह्माङ्गं कलां न्यसेत् [6] A : वेद्यामादाय [7] A : बिम्बे हृदि विन्यसेत्
[8] A : अष्टौ च pour अष्टानां [9] A : अथवा pour तथा
[10] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे

[11] A : द्वारपालस्थापनविधिपटलस्त्रयस्त्रिंशः ; B : द्वारपाल थापनं नाम त्रयस्त्रिंशः पटलः ; C : द्वारपालस्थापनविधिर्नाम चतुश्चत्वारिंशः पटलः ; E : द्वारपालस्थापननिधिश्चतुश्चत्वारिंशत्पटलः ; F : द्वारपालस्थापनपटलश्चतुश्चत्वारिंशत् ; G : द्वारपालस्थापनविधिपटलश्चत्वारिंशत्

[त्रयस्त्रिंशः पटलः]

[परिवारस्थापनविधिः[1]]

[परिवाराष्टकस्थानम्[2]]

[3]अतः परं प्रवक्ष्यामि परिवारविधिक्रमम् । अन्तर्मण्डल[4]मध्ये वा बाह्ये वान्तरहारके[5] ॥ १ ॥
मध्ये [6]वाभ्यन्तरे बाह्ये मध्यहारे तथैव च । [7]उक्षं दुर्गां च [8]चामुण्डीं गणेशं चैव षण्मुखम् ॥ २ ॥
ज्येष्ठां चैव हरिं भानुं पूर्वादिक्रमशो न्यसेत् । [9]मूलहर्म्यं निरीक्ष्यास्ते कल्पयेद्बिम्बविष्टरम् ॥ ३ ॥

[उक्षस्थानं बिम्बविष्टरस्थानं च[10]]

त्रिचतुर्दण्डमारभ्य द्विद्विदण्डविवर्धनात् । [11]त्रिचतुस्त्रिंशद्दण्डैर्वा यावत्तावद्विशेषतः ॥ ४ ॥
[12]उक्षस्थानमयुग्मे च[13] युग्मे स्याद्बिम्ब[14]विष्टरम् । प्रतिषोडशभेदं स्यादुक्तदण्डे तु [15]मध्यमे ॥ ५ ॥
[16]उक्तदण्डावसाने[17] वा तयोः[18] [19]पीठावसानकम् ।

---

[1] Pour परिवारस्थापनविधि voir *Aṃśumatkāśyapa* 50, *Ajita* 39 et 46, *Kāmika* I, 72 et 74 et II 69, *Kāraṇa* I 60, 61 et 68 et II 87 et 88, *Dīpta* 68 et 69, *Yogaja* 17, *Vīra* 41 et 72 et *Suprabheda* I 39, 40 et 51.

[2] cf. *Diptāgama*, 68, 1-2:

परिवारस्थापनं वक्ष्ये शृणु वह्ने विशेषतः । वृषः कात्यायनी चैव मातरो गणनायकः ॥
सुब्रह्मण्यस्तथा ज्येष्ठा केशवो भास्करस्तथा । पूर्वाद्यैशानपर्यन्तमन्तर्हारे स्थिता इमे ॥

voir aussi *Ajitāgama, paṭala* 39 *śl.* 1-3 et 7-10

[3] Dans le ms. F ce *paṭala* se trouve après le *paṭala* suivant.

[4] A : मण्डप pour मण्डल [5] A : भारके pour हारके [6] A : बाह्यान्तरे ; F : चाभ्यन्तरे

[7] La forme grammaticale correcte est उक्षाणं ; mais le mètre ne serrait pas respecté.

[8] C : चामुण्डि [9] A, C : मूलहर्म्यान्निरीक्ष्यास्ते

[10] cf. *Kāraṇāgama* I 60, 38b-40 et 49-51a:

"पीठस्थानं विधीयते ॥
मूलप्रासादविस्तारं यत्तद्दण्डमिहोच्यते । प्रासादं तु समारभ्य रसदण्डान्तिकेऽपि वा ॥
क्षुद्रदण्डान्तिके चैव मनुदण्डान्तिकेऽपि वा । कारयेत्तत्र पीठानि..... ॥
"वृषभस्थानमुच्यते ॥
पीठाद्दण्डद्वयं त्यक्त्वा तस्याग्रे स्थापयेद्वृषम् । अथवान्यप्रकारेण वृषस्थानं विधीयते ॥
गुणहस्तान्तरं वापि पक्षहस्तान्तरं तु वा । पीठाग्रे तु प्रकर्तव्यम्"

[11] B omet le *śloka* 4b ; C : त्रिचतुस्त्रिंशतिर्दण्डं

[12] B : युग्म pour उक्ष [13] C, F : तु pour च [14] A, B, C : ब्रह्म pour बिम्ब

[15] C, F : मध्यमम् [16] A, B : युक्त pour उक्त [17] A : अवसानं pour अवसाने

[18] A : वा भवोः ; B : वा थयोः [19] C : पिण्ड pour पीठ

[पीठलक्षणम्[1]]

[2]चतुर्विंशाङ्गुलं वाथ त्रिषडङ्गुलमेव वा ॥ ६ ॥

[3]भान्वङ्गुलविशालं[4] वा [5]तत्तुल्यतुङ्गविष्टरम् । मेखलात्रयसंयुक्तं कर्तव्यं तत्सकर्णिकम् ॥ ७ ॥

अश्मजं सौधजं वापि [6]चेष्टजं वाथ कल्पयेत् । प्रतिमां चापि [7]तन्माने [8]स्वेष्टमुच्चं तु गृह्यताम्[9]॥ ८ ॥

[वृषभः[10]]

[11]द्वारोच्चे गर्भगेहे तु नवभागविभाजिते ।

---

[1] cf. *Aṃśumatkāśyapa* 50, 150-153a:

"पीठं चेल्लक्षणं शृणु ॥
भानुद्वयाङ्गुलं तारमुत्सेधं भानुमात्रकम् । मेखलात्रयसंयुक्तं वेदमात्रविशालकम् ॥
गुणाङ्गुलं तदुत्सेधं पद्मोच्चं तु गुणाङ्गुलम् । षडंशं पद्मविस्तारं शेषोर्ध्वकम्पनीत्रकम् ॥
शिलाभिर्वेष्टकाभिर्वा सुधया वा प्रकल्पयेत् । परिवारासनं ह्येवम्"

cf. *Kāraṇāgama* I 60, 25-28:

प्रतिमानामभावे तु पीठं वा कल्पयेत्सुधीः । विमानेन युतं वापि हीनं वा स्थापयेत्सुधीः ॥
पक्षतालप्रविस्तारमुत्सेधं तु तदर्धकम् । द्विमेखलासमायुक्तमेकैकं चतुरङ्गुलम् ॥
उत्सेधं तत्समं ज्ञेयं तन्मध्येऽब्जं तु कारयेत् । षडङ्गुलप्रमाणेन पद्मं कुर्याद्दलाष्टकम् ॥
अन्यदङ्गुलप्रमाणेन तन्मध्ये कर्णिकां कुरु । वृत्तं वा चतुरश्रं वा एवं पीठं तु कारयेत् ॥

voir aussi *Ajitāgama, paṭala* 39 *śl.* 16-21

[2] B : चतुर्विंशकुलं [3] A : भानुशूल pour भान्वङ्गुल [4] C : विलेपं pour विशालं

[5] A : तत्तुव्य pour तत्तुल्य ; B, C, F : तत्तुल्यं [6] B : पीठजं ; C : तेष्टजं

[7] A, B : तन्मध्ये [8] C, F : विष्टमुच्चं तु [9] B : गृह्य तौ

[10] cf. *Suprabhedāgama* I 40, 6-16:

वृषभस्य तु उत्सेधं द्वारमानेन वै शृणु । द्वारोत्सेधचतुर्थांशमर्धं पादोनकं तथा ॥
समं वा द्विगुणं वापि त्रिगुणं वा विशेषतः । तत्काले वृषभायामं द्विसप्तत्यङ्गुलं स्मृतम् ॥
चतुर्भागमुखं तत्र त्रिभागं नासिका तथा । द्व्यङ्गुलं तु तथा नेत्रमन्तः पादसुविस्तरम् ॥
शृङ्गायामं द्विभागं तु तन्मूलं भागविस्तरम् । तीक्ष्णाग्रौ तु प्रकर्तव्यौ चानुपूर्वात्क्रमेण तु ॥
कर्णायामं दशाङ्गुल्यं तद्विस्तारं तदर्धता । कला तु कर्णमूलं हि तदन्तश्च तदेव तु ॥
त्रिभागं नेत्रयोर्मध्ये तद्वच्छृङ्गौ तु मध्यमम् । अक्षिकर्णान्तरं भागं कर्णाच्छृङ्गान्तरं तथा ॥
द्व्यङ्गुलं नासिकाद्वारे तद्वक्त्रं भागमानतः । जिह्वास्यौ दन्तपङ्क्ती च यथायुक्त्या च कारयेत् ॥
अष्टादशाङ्गुलं चोरू तन्नाहं त्रिगुणं तथा । जङ्घा दशाङ्गुला ज्ञेया तदूर्ध्वं तु चतुष्कला ॥
षडङ्गुलं ततः पादं तदर्धं खुरमुच्यते । जङ्घायाः पश्चिमं पादं कलोर्ध्वं तु कलाधिकम् ॥
पुच्छं स्यादग्रमूलान्तं चतुरङ्गुलविस्तृतम् । मध्यमं द्व्यङ्गुलं तारमग्रमेकाङ्गुलं स्मृतम् ॥
वृषणौ द्विकलायामौ विस्तारं स्याच्च द्व्यङ्गुलम् । वृषस्य लक्षणं प्रोक्तम्"

voir aussi *Ajitāgama* 36, 361b-375a:

[11] A, B : द्वारोच्चगर्भगेहं तु

[1]नवधा वृषभस्योच्चं [2]तस्योच्चाग्न्यंशमासनम् ॥ ९ ॥
उन्नतं कुक्षि[3]विस्तारादग्न्यंशा[4]धिकविस्तरम् । [5]आयामोच्चघनाधिक्यं भद्रं वा पद्मपीठकम् ॥ १० ॥
उपपीठाकृतिर्वापि कल्पयेद्वृषविष्टरम् ।

[त्रिशूलम्[6]]

तदग्रे द्वारतुल्योच्चं वषोच्चं वा त्रिशूलकम् ॥ ११ ॥
शूलोच्चे भूतषट्सप्तभागेऽशं वा विशालकम् । विस्तारार्धं त्रिपादं [7]वाप्यग्न्यंशेऽशं तु वा[8] घनम् ॥

---

[1] A : नवधा वृषभः सोच्चं ; C : नव चा वृषभस्योच्चं

[2] A : तस्योच्चात्यंशमासनम् ; B : तस्योच्चात्यंशमानकम् ; C : तस्योच्चान्त्यंशमासनम्

[3] A : विस्तारं pour विस्तारात् [4] C : अन्यान्य pour अग्न्यंशा ; E : अन्याशा

[5] A : आयामाच्चन्दनाधिक्यं ; C : आयामोच्चन्दनाधिक्यं ; F : आयामोच्चन्नताधिक्यं

[6] cf. *Kāraṇāgama* **I**, 68, 2-5 et 7b-25:

सर्वदेवमयं शूलं महास्त्रं परमं शुभम् । हैमराजतताम्रेण आयसेनैव वा कुरु ॥
गर्भद्वारे च हस्ते च तुङ्गानि योजयेत्ततः । गर्भादधिक्रमादाय शूलमुत्तममुच्यते ॥
मध्यमं समगर्भं तु तद्गर्भं भूतभागकम् । त्रिभागमधमं ज्ञेयं कनिष्ठोत्तममध्यमम् ॥
अष्टधा विभजेत्तत्र उत्तमादि त्रयं त्रयम् । द्वारोत्सेधसमं मानमुत्तमं शूलमुच्यते ॥.....
आयामं भूतभागैकं पत्रायाममिति स्मृतम् । नाडिकांशं भजेत्तत्र एकांशं पत्रविस्तरम् ॥
संगृह्य पत्रमानं तु चतुरश्रं समं कुरु । पत्राधारं विसृज्याथ पार्श्वयोरुभयोरपि ॥
वृत्ताकारं यथा तत्र वर्तयेत्तदनु क्रमात् । तयोर्बाह्यान्तरं ग्राह्यं भ्रामयेद्दिङ्मुखं तु तत् ॥
पार्श्वपत्रद्वयं ह्येवं भवेत्तद्वर्तुलद्वयात् । पत्रतारेण चाग्रे तु धारानिशितसंयुतम् ॥
तारार्धं मुकुलं कुर्यान्मध्यमूलाग्रतः क्रमात् । पत्रविस्तारमुद्दिष्टं भागैकं घनमुच्यते ॥
तारार्धताग्रके मूले चान्तरं पार्श्वपत्रयोः । पत्रायामं च नवधा भज्य भागेन मूलतः ॥
पादायाममिति प्रोक्तं तदर्धं पादविस्तरम् । द्विगुणं मध्यपादस्य विस्तारं पार्श्वपत्रवत् ॥
पत्राणां पादमूले तु कुर्याद्वै कुण्डलीकृतम् । विचित्रपत्रविहितं पत्रलेखेन कारयेत् ॥
तस्याधः पालिका कार्या पत्रायामत्रिभागतः । तत्तारं नवधा भज्य व्योमांशं पालिकायतम् ॥
त्र्यंशेनाब्जं तु तस्याधः कोणेष्वश्वत्थपत्रवत् । कर्तव्या पालिका ह्येवं तदधः कल्पयेद्दलम् ॥
पालिकायास्तु विस्तारं विभजेत्तु दशांशकम् । एकांशं गलविस्तारमुत्सेधं तत्समं भवेत् ॥
पालिकार्धं घटाकारमुत्सेधं स्यात्तदर्धतः । तस्याधः कर्णिकारेण कर्णं कुर्यात्तु बुद्धिमान् ॥
पादेन कुम्भकारेण तस्याधो नाडिका भवेत् । घटवन्नाडिकामानं तन्मानं युगमार्जितम् ॥
एकभागान्तरं कुर्यात्तत्प्रमाणेन हीरिका । हीरिकाथ प्रकर्तव्या शेषं दण्डमिहोच्यते ॥
नाडिकायास्तु विस्तारचतुर्भागत्रिभागिकम् । दारुदण्डस्य विस्तारं तदर्धं लोहदण्डकम् ॥
दण्डमूले तु पद्मं स्याद्विस्तारं पालिकासमम् । तदर्धमानमित्युक्तं तन्मानं गुणभाजितम् ॥
एकांशं पट्टिका ज्ञेयं शेषांशेन कुशेशयम् । वृत्तं वा चतुरश्रं वा कारयेत्तु कुशेशयम् ॥
हीरिकासममानेन पद्मोर्ध्वे पट्टिकां कुरु । मध्यपत्रस्य मध्ये तु लिखेदब्जं तु तन्मुखम् ॥
एवं लक्षणमाख्यातम्"

[7] A : वा विन्यसेशं तु ; B : वा विन्यस्येशं तु ; C : वाखिन्यंशेशं तु [8] B : वामके pour वा घनम्

[1]हस्तं वृषाग्रतो नीत्वा [2]हस्तं पीठोच्चविस्तृतम्। त्रिमेखलासमायुक्तं तस्योर्ध्वे शूलसंस्थितिः[3] ॥१३॥
[4]विस्तारार्धं त्रिपादं [5]वाप्यर्धांशोंऽशं तु वा घनम्। शूलोच्चे भूतभागैकं [6]पत्रोच्चं तु विशालकम् ॥१४॥
[7]पत्रादधोऽर्धमग्न्यंशं [8]वा स्यात्पालिघटोदयम्। शेषं युक्त्या तु[9] कर्तव्यं [10]महापीठं समुच्यते ॥ १५॥

[महापीठम्[11]]

एकहस्तं समारभ्य वह्नयङ्गुलविवर्धनात्। अक्षहस्तावधिर्यावन्नवधा पीठविस्तरम् ॥ १६ ॥
विस्तारसदृशोत्सेधं[12] तत्तुङ्गं [13]युगषड्भजेत्। [14]उपानोदयमेकांशं भूतांशं [15]जगती भवेत् ॥ १७ ॥

---

[1] A : हत्वा pour हस्तं [2] A: हसं pour हस्तं ; B : हंसम्
[3] A : संस्थितः pour संस्थितिः ; B : संयुतम्
[4] C et F omettent le demi-*śloka* n° 14a
[5] B: वाप्यब्ध्यंशोंशं [6] B : पत्रोच्चं
[7] A : पत्रादयोर्ध्व्यंशं ; B : पत्रादयोर्थत्यंशं ; C : पत्रादयोर्ध्वमन्यांशं ; F : पत्रादथोर्धमरन्यंशं
[8] A : वाभ्यपारपठोदयम् ; B : वाभ्यपारं घटोदयम् [9] A : तु pour तु [10] A : महापीठसमोच्यते
[11] cf. *Aṃśumatkāśyapa* 50, 156b-171a:

महापीठं प्रकर्तव्यं तस्य लक्षणमुच्यते। मूलधामस्य द्वारोच्चमुत्तमं पीठविस्तृतम् ॥
त्रिपादं मध्यमं प्रोक्तं द्वारतुङ्गार्धकन्यसम्। शुद्धद्वारस्य विस्तारमधमं पीठमुच्यते ॥
द्विगुणं मध्यमं प्रोक्तं त्रिगुणं श्रेष्ठमुच्यते। अथवा व्योमहस्तं तु अधमं पीठविस्तृतम् ॥
द्विहस्तं मध्यमं प्रोक्तं त्रिहस्तं श्रेष्ठमुच्यते। तद्विस्तारसमं तुङ्गं कृत्वा चैवाष्टविंशतिम् ॥
उपानोच्चं द्विभागं स्यात्षडंशं जगती भवेत्। कुमुदोच्चं तु भूतांशं कम्पमेकांशमुच्यते ॥
वेदांशं कर्णमानं तु ऊर्ध्वकम्पं शिवांशकम्। महापट्टी गुणांशं वा द्विभागं वा विशेषतः ॥
वेदांशं पद्मतुङ्गं तु द्विभागं कर्णिकोदयम्। अथवा कर्णिकोत्सेधं गुणांशं द्विजसत्तम ॥
पद्मोच्चं पद्मभागं तु महापट्टी द्विभागधा। उपानोच्चं शिवांशेन शेषं पूर्ववदेव हि ॥
अथ पीठोदयं विप्र धरातलं यथा कुरु। तदूर्ध्वे पद्ममानं तु पीठोच्चेऽग्न्यंशमुच्यते ॥
अधिष्ठानोक्तमार्गेण वेशनिष्क्रान्तिमाचरेत्। पद्मतारे युगांशं वा भूतांशं कर्णिका भवेत् ॥
पीठाकारं युगाश्रं वा वृत्तं वाष्टाश्रमेव वा। कलाश्रं वाथ कर्तव्यं तद्दयं मण्डलाम्बुजम् ॥
लोहजं शैलजं वाथ इष्टकामयमेव वा। सुधया वेष्टकागर्भं नानाचित्रैर्विचित्रितम् ॥
भूतैश्च मकरैर्व्यालैर्वृषभैश्च विभूषितम्। नानावर्णैर्विचित्रं वा भूषयेद्धैमराजतैः ॥
पीठव्यासे तु षट्सप्तवसुनन्दांशकेऽपि वा। अंशमस्योपपीठोच्चमुपपीठोक्तवत्कुरु ॥
तदूर्ध्वे तु महापीठमुक्तव्यासोदयान्वितम्। उपपीठं विना पीठं कर्तव्यं वा द्विजोत्तम ॥

voir aussi *Ajitāgama* 39, 43-52

[12] C, F : सदृशोच्चं तु pour सदृशोत्सेधं [13] A : युगषड्भजत् ; B : युगषटकम्
[14] C : उपानोदयेनमेकांशं : E : उपानोदये दशेकांशं [15] B : जगतो pour जगती

[1]युगांशं कुम्भतुङ्गं स्यात्कम्पमंशेन कल्पयेत्। अग्र्यंशं [2]कण्ठमानं तु [3]कम्पमेकांशमुन्नतम् ॥ १८ ॥
[4]द्विभागं पट्टिकामानं कम्पमेकेन कल्पयेत्[5]। [6]वेदांशेन दलोच्चं तु [7]पक्षांशं कर्णिकोदयम् ॥ १९ ॥
[8]अङ्गानां वेशनिष्क्रान्तमधिष्ठानोक्तवत्कुरु। युगाष्टकोणयुक्तं वा मध्यभद्रयुतं तु वा ॥ २० ॥
[9]कोणेषूक्तयुतं वापि [10]कर्णं वा [11]नालकान्वितम्। भूतेश्वरं तु विघ्नं तु कर्णिकायां प्रतिष्ठयेत्[12] ॥ २१ ॥

[स्थापनम्[13]]

तत्तत्स्वनाममन्त्रेण[14] [15]मखे कुम्भाधिवासनम्[16]।

---

[1] E omet le demi-*śloka* n° 18a [2] A : कर्म pour कण्ठ ; F : कर्ण [3] E : पञ्च pour कम्प
[4] A : विभागं [5] B : कम्पकेन प्रकल्पयेत् [6] A : वेदांशं pour वेदांशेन
[7] C : वृक्षांशं [8] C, F : अंशानां
[9] A : कोणें सूक्ष्मयुतं ; F : कोणेषु क्षयितं [10] C : कण्ठं pour कर्णं [11] A : नाटिकान्वितम्
[12] A : कर्णिकाया: प्रतिष्ठाये ; B : कर्णिकायां प्रतिष्ठय ; C : कर्णिकाशां प्रतिष्ठयेत्
[13] Pour plus de détails au sujet du परिवारस्थापन voir *Kāmikāgama* I 72, 1-14a:

स्थापनं परिवाराणां संक्षेपाच्छृणुत द्विजाः। त्रिहस्तं तु समारभ्य करस्यैकस्य वर्धनात् ॥
मण्डपस्यास्य विस्तारो नवहस्तान्तमेव हि। तन्मध्ये वेदिकोपेतं षोडशस्तम्भसंयुतम् ॥
रविस्तम्भयुतं वापि चतुःस्तम्भयुतं तु वा। कुण्डं वा स्थण्डिलं वापि शरवेदैकसंख्यया ॥
वृत्तं वा चतुरश्रं वा कुण्डं कुर्याद्विगश्रकम्। मातृणां नवकुण्डं वा चैककुण्डमथापि वा ॥
योग्यानां रत्नविन्यासं नेत्रोन्मीलनमेव च। पञ्चगव्यादिभिस्तेषां शुचिं तोयाधिवासनम् ॥
ततो मण्डपसंस्कारं ततो बिम्बादिशोधनम्। कौतुकं शयनारोहं कुम्भविन्यासमेव च ॥
कृत्वा तु पूर्ववत्सर्वं स्वनामाद्यक्षरेण तु। तत्तद्वर्णादि संस्थाने यजेत्सम्यक्शिवद्विजाः ॥
तेषां मूर्त्यादिविन्यासं कृत्वा होमं समाचरेत्। पलाशोदुम्बराश्वत्थवटैः पूर्वादिदिक्षु च ॥
समिदाज्यचरूँल्लाजांस्तिलं च जुहुयात्क्रमात्। ततः प्रभाते बिम्बाद्यं कुम्भानग्नींश्च पूजयेत् ॥
दक्षिणां दापयेत्पश्चादाचार्यादेर्विधानतः। निष्कादिदशनिष्कान्ता गुरावन्येषु पूर्ववत् ॥
मुहूर्तनाडिकापूर्वं मन्त्रन्यासं समाचरेत्। कुम्भाद्बीजं समादाय विन्यसेत्स्वस्वदेशके ॥
प्रासादतारपादं वा तदर्धं वा त्रिपादकम्। समं सपादं सार्धं वा सजगत्पादुका बहिः ॥
न्यस्त्वा संस्थापयेत्पीठानथवादौ विधाय तान्। प्रतिष्ठां कारयेन्मुक्तारत्नन्यासं प्रदक्षिणम् ॥
जलाधिवासनं कुर्यादन्यत्कर्म समाचरेत्।

Pour plus de détails au sujet du वृषभस्थापन voir *Kāmikāgama* I 74, 63b-79:

"स्थापनं श्रयतां द्विजाः ॥
कालोऽपि पूर्ववज्ज्ञेयस्तद्वदेवाङ्कुरार्पणम्। मण्टपं परिवारोक्तमार्गेणैव समाचरेत् ॥
पञ्चैककुण्डे होमः स्यात्तथैव स्थण्डिलेऽपि वा। रत्नन्यासं प्रकर्तव्यं शैले वा लोहजेऽप्यथ ॥
रत्नार्थं हेमपद्मं वा मृण्मयादौ विवर्जयेत्। ततोऽक्षिमोचनं शुद्धिर्ग्रामादीनां प्रदक्षिणम् ॥
तोयाधिवासनं प्राप्य ततो मण्टपसंस्कृतिः। द्विजसंभोजनं पुण्यतोयसेचनमेव वा ॥
वास्तुहोमं तथा शय्या स्नपनं कौतुकं तथा। वृषस्य दक्षिणे शृङ्गे कौतुकं बन्धयेद्गुरुः ॥

शयनारोपणं कुम्भस्थापनं पूर्ववन्नयेत् । सप्तवर्गाच्चतुर्थान्तं सप्तस्वरविभूषितम् ॥
बिन्दुनादसमायुक्तमादौ प्रणवसंयुतम् । वृषभाय नमश्चान्ते तस्मिन्ब्रह्माङ्गकल्पना ॥
मध्यकुम्भे वृषः प्रोक्तः परितोऽष्टसु लोकपाः । अथ विघ्नेश्वरान्वापि वृषस्य परितो न्यसेत् ॥
उक्षा च गोपतिश्चापि शङ्कुकर्णस्तथैव च । तीक्ष्णशृङ्गस्तथा नन्दी विषाणी पशुभूत्तथा ॥
महोदरोऽष्टमश्चैतान्स्वस्वबीजेन विन्यसेत् । संपूज्य गन्धपुष्पाद्यैर्मुद्रान्नं तु निवेदयेत् ॥
चरुकल्पे तथैव स्यात्तत्त्वमूर्त्यादिकं न्यसेत् । अग्निकार्यं ततः कुर्यात्प्रागुक्तविधिना सह ॥
समिदाज्यचरूँल्लाजान्मुद्रमाषान्क्रमाद्धुनेत् । प्रभाते देशिकः शुद्धः पूजां होमं च कारयेत् ॥
आचार्यपूजा स्यादन्ते होतृभ्यश्चापि दक्षिणा । सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समाचरेत् ॥
चलं चेद्वृषभस्थानं वेद्यन्ते च स्वदेशके । मूलमन्त्रेण संस्थाप्य गन्धपुष्पादिभिर्यजेत् ॥
ततः कुम्भान्समाहृत्य वृषाग्रे स्थण्डिले न्यसेत् । कुम्भाद्बीजं समादाय वृषस्य हृदये न्यसेत्॥
अन्येभ्यो बीजमादाय तत्पीठे परितो न्यसेत् । ततः कुम्भोदकेनैव स्नापयेद्वृषमादरात् ॥

voir aussi *Ajitāgama paṭala* 46.

Pour plus de détails au sujet du शूलस्थापन voir *Suprabhedāgama* I 51, 15b-24a:

"ततः स्थापनमारभेत् ।
जलाधिवासनं स्नानं कृत्वा मण्डपसंस्कृतिम् । वस्त्रैराच्छाद्य शूलं तु स्थण्डिले शयनोपरि ॥
न्यस्त्वा शूलाधिपान्देवानर्चयित्वा यथाक्रमम् । कलशान्विन्यसेत्तत्र शूलास्त्राधिपसंयुतान् ॥
सकूर्चास्त्रसंयुक्तांस्तदायुधांश्च बैजिकान् । तत्तदग्नौ हुतं हुत्वा तत्तन्मन्त्रैस्तु बुद्धिमान् ॥
सुमुहूर्ते सुलग्ने तु तत्तन्मन्त्राणि संस्मरन् । मध्यपत्राधिपो रुद्रो दक्षिणे तु पितामहः ॥
वामपत्रे तथा विष्णुस्त्रिपत्राणां तु देवताः । वामा ज्येष्ठा च रौद्री च शूलमूले तु देवताः ॥
फलका स्कन्ददैवत्या कुम्भे तु वरुणः स्थितः । तदर्धं चाग्निदैवत्यं दण्डे चैव सरस्वती ॥
पीठे चैवमुमादेवी भूमिभागे वसुंधरा । स्थापयेत्क्रमशो विद्वान्गन्धपुष्पाक्षतान्वितम् ॥
स्वनामाद्येन बीजेन कलशैरभिषेचयेत् । अभ्यर्च्य हृदयेनैव हविष्यं तु निवेदयेत् ॥
शूलसंस्थापनं प्रोक्तम्"

Pour plus de détails au sujet du महापीठस्थापन voir *Kāmikāgama* I, 72, 14b-32a:

महापीठप्रतिष्ठाया विधानमधुनोच्यते । पूर्वपश्चिमसोमेषु मण्डपं पूर्ववन्न्यसेत् ॥
वेदैकसंख्यया कुण्डं वेदाश्रं स्थण्डिलं तु वा । पञ्चगव्यादिभिः पीठशुद्धिं कृत्वा च कौतुकम् ॥
स्थण्डिले वेदिकायां तु कुम्भन्यासं तु कारयेत् । मध्यपूर्वयमाग्नेयेन्दुशंकरस्थघटेष्वथ ॥
अविघ्नं च तथामोदं प्रमोदं प्रमुखं तथा । दुर्मुखं विघ्नकर्तारं न्यस्त्वा वर्णांस्तु भावयेत् ॥
अविघ्नो विद्रुमप्रख्य आमोदः श्यामवर्णकः । प्रमोदः कृष्णवर्णश्च प्रमुखः स्फटिकप्रभः ॥
दुर्मुखः कुङ्कुमाभश्च [विघ्नकर्ताञ्जनप्रभः । क्रमादेतांश्च सर्वांस्तु] ध्यात्वैवं पूजयेद्गुरुः ॥
पीठे तत्त्वेशमूर्त्यादिन्यासं होमं समाचरेत् । जङ्घागलकपद्मान्तमात्मतत्त्वादिकं न्यसेत् ॥
समिदाज्यचरूँल्लाजान्सर्षपं च यवं तिलम् । क्रमेण जुहुयाद्धीमान्पलाशोदुम्बरौ वटम् ॥
अश्वत्थं प्राग्दिगारभ्य पूर्ववद्धोममाचरेत् । संपूज्य पीठं कुम्भांश्च प्रभाते पावकं तथा ॥
दक्षिणां पूर्ववद्दत्त्वा मन्त्रन्यासं समारभेत् । अविघ्नं कर्णिकामध्ये विन्यसेत्कुम्भमध्यगम् ॥
आमोदादीन्यसेद्धीमांश्चतुर्दिक्ष्वीशकोणके । तत्तत्कुम्भोदकेनैव स्नापयेत्पीठमादरात् ॥

समिदाज्यौदनैस्तेन प्रत्येक तु[1]शताहुतीः ॥ २२ ॥
हुत्वा पूर्णाहुतिं [2]कृत्वा कुम्भाद्बीजं [3]हृदि न्यसेत् । अभिषिच्य [4]घटाद्भिश्च [5]हविष्यान्तं समर्चयेत् ॥२३॥
इति [6]श्रीमद्रौरवतन्त्रे [क्रियापादे] [7]परिवारस्थापनविधिर्नाम त्रयस्त्रिंशः पटलः ॥

एवं स्याद्भूतपीठस्य पैशाचेऽप्येवमाचरेत् । किं तु मध्यमकुम्भस्य मध्यमे नीललोहितम् ॥
नक्षत्रं पूर्वदिग्भागे राशिं चैव तु दक्षिणे । पश्चिमे क्षेत्रपालं च सोमे विघ्नगणान्न्यसेत् ।।
रुद्रांश्च पूर्वदिक्कुम्भे याम्ये मातृगणान्न्यसेत् । गणान्पश्चिमदिग्भागे यक्षानुत्तरदिग्गते ॥
ग्रहानीशानदिग्भागे वह्नावसुरसंज्ञकान् । राक्षसान्पितृदेशे तु वायौ नागगणान्न्यसेत् ॥
तद्बाह्ये कलशान्स्थाप्य लोकपालाधिदैवतान् । संपूज्य गन्धपुष्पाद्यैर्नैवेद्यान्तं हि देशिकः ॥
एतदेव विशेषं स्यादन्यत्सर्वं समानकम् । कर्णिकायां न्यसेत्पञ्चगणानष्टौ दलेषु च ।।
दलबाह्ये न्यसेद्धीमाँल्लोकेशान्स्वस्वदिग्गतान् । मन्त्रन्यासविशेषोऽयं पिशाचबलिपीठके ॥
अनुक्तं यन्नयेत्सर्वं प्रतिमास्थापनोक्तवत् ।

[14] A, B : मन्त्रैस्तु pour मन्त्रेण
[15] A : मुखे pour मध्ये ; B : कुम्भे
[16] A : कुम्भाधिवासयेत् ; C : कुम्भे निवासयेत्
[1] A : शताहुतिः
[2] A : हुत्वा pour कृत्वा ; B : पश्चात्
[3] B : न्यसेद्धृदि ; C, F : हृदा न्यसेत्
[4] A : घटातोयैः ; C, F : घटैस्तोयैः
[5] A : हविषान्तं
[6] A : श्री pour श्रीमद् ; B omet श्रीमद्रौरवतन्त्रे
[7] A : परिवारस्थापनविधिपटलश्चतुस्त्रिंशः ; B : परिवारस्थापनं नाम चतुस्त्रिंशः पटलः ; C : परिवारस्थापनविधिर्नाम सप्तमः पटलः ; E : परिवारस्थापनविधिः सप्तमः पटलः ; F : परिवारस्थापनपटलः सप्तमः

[चतुस्त्रिंशः पटलः]

[सोमेश्वरस्थापनविधिः[1]]

[सोमेश्वरस्थानम्, तन्मानं च[2]]

अतः परं प्रवक्ष्यामि स्रोमेशस्थापनं परम्। [3]लिङ्गस्यापरभागे तु गर्भगेहे विशेषतः ॥ १ ॥
मर्त्यपैशाचयोश्चैव कर्तव्यं भद्रपीठकम्[4]। लिङ्गस्य त्रिगुणायामं सार्धं [5]वेदगुणं तु वा ॥ २ ॥
[6]देवोदयेऽग्निभागैकचतुर्भागं तु चोन्नतम्। प्रासादे मूलभूमौ[7] तु [8]स्तम्भमानसमोन्नतम् ॥३॥
देवस्योदयमुत्कृष्टं त्रिपादं कन्यसोदयम्। तयोर्मध्येऽष्टभागे तु नवधा देवतोन्नतम् ॥ ४ ॥
[9]तेष्विष्टं कर्तुर्यन्मानमानुकूल्यं नृपादिनाम्। तन्मानं तु परिग्राह्य युक्त्या शूलं तु कारयेत् ॥ ५ ॥

---

[1] Pour सोमेश्वरस्थापनविधि voir *Ajita* 41, *Kāmika* I 68 et II 47, *Kāraṇa* I 79, II 58 et 67 *Vira* 67 et *Suprabheda* I 34 et 37

[2] cf. *Suprabhedāgama* I 34,5-14:

पूजाभागसमायामं तदूर्ध्वं प्रतिमोच्छ्रयम्। द्विगुणं त्रिगुणं तत्र मध्यमं चोत्तमं त्विह ॥
एकैकस्य त्रिभिर्भेदैर्नवमानमुदाहृतम्। गर्भं तु नवधा कृत्वा नवधा दीप्यमुच्यते ॥
द्वारस्योच्छ्रयमाने तु षोडशांशविभाजिते। भुवङ्गं च पतङ्गं च ऊर्ध्वार्धोऽशद्वयं त्यजेत् ॥
शुद्धद्वारमिदं शेषमेतन्मानेन चोत्तमम्। तत्त्रिभागद्विभागं च मध्यमं त्विति कीर्तितम् ॥
तत्त्रिभागैकमधममेकैकं त्रित्रिभाजितम्। प्रोक्तं हि नवधा मानं स्तम्भमानमथ शृणु।
स्तम्भायामार्धभागेन कर्तव्यं कन्यसं बुधैः। त्रिपादं मध्यमं प्रोक्तं समं चैवोत्तमं भवेत् ॥
प्रत्येकं त्रिविधैर्भागैर्नवमानं पुरोक्तवत्। उत्तमं तु चतुस्तालं त्रितालं मध्यमं तथा।
द्वितालमधमं विद्धि हस्तमानमथ शृणु। एकहस्तं समारभ्य नवहस्तान्तमेव च।
नवमानं करेणैव त्वङ्गुलीनां वशाच्छृणु। यजमानसमं ज्येष्ठं त्रिपादं चैव मध्यमम्।
अधमं त्वर्धमित्युक्तं यजमानानुरूपतः। एतान्युक्तानि मानानि मानाङ्गुलेन भाजिते ॥

voir aussi *Ajitāgama* 36, 1-17a

[3] B : लिङ्गव्यापारभागे तु

[4] Pour plus de détails au sujet du प्रतिमापीठ voir *Suprabhedāgama* I 34, 17-19a :

यदुक्तोत्सेधमानं तु त्रिभागं संविभज्य वै। उष्णीषात्पादपर्यन्तं द्विभागेनैव कारयेत् ॥
पीठमानमथैकांशं त्रिविधं पद्ममेकतः। द्विभागं पीठमानं स्यादासने तु विशेषतः ॥
बिम्बायामचतुर्थांशं पीठोच्चं स्थानकस्य तु।

voir aussi *Ajitāgama* 36, 17b-19a.

[5] B : वेदाङ्गुलं तु वा [6] B : दैवादैशानभागैक ; C : देवादयोऽग्निभागैक ; F : देवालयेऽग्निभागैक

[7] B : भौमं pour भूमौ [8] A : स्तम्भमासनमोन्नतम् ; B : स्तम्भमानं न यौतकम्

[9] A : तेषु विष्टम्भकं तु न्यासमनुकूलनृपादिनम् ; B : तेषु विष्टम्भकन्यासमनुकूलं नृपादियम् ; cf. *Suprabhedāgama* I 34,20b: आचार्यशिल्पिकर्तृणामिष्टमानं प्रगृह्य च।

[ईश्वरप्रतिमालक्षणम्]

[1]प्रतिमालक्षणोक्तेन कारयेत्परमेश्वरम्। शूलं च [2]रज्जुबन्धं च [3]कल्कबन्धं तथैव च ॥ ६ ॥

---

[1] Pour प्रतिमालक्षण voir le *paṭala* suivant

[2] Pour plus de détails au sujet du रज्जुबन्ध voir *Aṃśumatkāśyapa* 85, 1-2a, 6b-7 et 27b-33a:

अथ वक्ष्ये विशेषेण रज्जुबन्धं शृणु द्विज। सर्वासु शूलसंध्यासु ताम्रपत्रैस्तु वेष्टयेत् ॥
शूलेऽष्टबन्धमालिप्य रज्जुबन्धं ततो विदुः।.....रज्जुबन्धं तु नाभेस्तु मध्यस्थादूर्ध्वगात्त्रिधा ॥
सुषुम्ना मध्यमा ख्याता पिङ्गला तस्य दक्षिणा। इडा वै तस्य वामस्था प्रधाना नाडयस्त्विमे ॥.....
द्विसप्ततिसहस्राणि नाडयः परिकीर्तिताः। नाडिभिः स्वावृतं शूलं जीर्णकाश्वत्थपत्रवत् ॥
नालिकेरफले पक्वे त्वत्यल्पसलिलान्विते। चर्मसारं गृहीत्वा तु सारादन्यं व्यपोह्य च।
नाडयस्ता अभिसंकल्प्य पश्चादावृतनाडिकाः। षडयवं तु परीणाहं रज्जुमादायेद्दृढम् ॥
पश्चान्निरन्ध्रं रज्जुभ्यां बन्धयेद्दक्षिणावृतम्। हृत्पद्मं साष्टपत्रं तु रज्जुना कारयेद्बुधः ॥
तस्य नालं तु नाभ्यन्तं सुषुम्नासहबन्धितम्। जीवस्थानं तु तत्पद्ममित्युक्तं हि मया तव ॥
मूलमन्त्रमनुस्मृत्य रज्जुबन्धमिदं कुरु। रज्जुबन्धमिदं ख्यातम्"

voir aussi *Ajitāgama* 35, 185-205a.

[3] Pour plus de détails au sujet du कल्कबन्ध voir *Aṃśumatkāśyapa* 87, 1-17a:

अथ कल्कविधानं तु वक्ष्ये संक्षेपतः क्रमात्। नद्यां वापि तटाके वा दीर्घिकायामथापि वा ॥
सस्यक्षेत्रे तथा विप्र निरूषरजले शुभे। सुदृढाश्चूर्णतुल्याभाः स्थूलवालुकमिश्रिताः ॥
संग्राह्य शर्करा ह्येषां पेष्य प्रक्षालनं कुरु। शर्कराशोषणं कृत्वा सूक्ष्मचूर्णं तु तत्कुरु ॥
त्रिफलोदकेन संमृज्य पिण्डं कृत्वा तु शोषयेत्। कपित्थनिर्यासस्यैव जलं त्रिविधमुच्यते ॥
पञ्चांशं चैव निर्यासात्सार्धं वा पञ्च षड्गुणम्। सृतं स्वच्छजलं चैव सेकश्चेति क्रमोदिताः ॥
स्वच्छसेकजलैः पिण्डं पेषयेन्नवनीतवत्। पश्चात्कार्पासतूलैश्च मिश्रं कृत्वा सुपेषयेत् ॥
कल्कभिन्नं तु यत्तन्तु कदलीदण्डतन्तुवत्। एतत्कल्कं समालिप्यं प्रथमं कल्कमेव हि ॥
निर्यासात्त्रिगुणं सार्धत्रिगुणं वा चतुर्गुणम्। मरीचित्रिफलं ह्येवं त्रियवं परिपठ्यते ॥
तेषु चान्यजलाभ्यां तु मर्दयेत्तु पुनः पुनः। क्रमेण लेपयेत्कल्कं द्वियवं त्रियवं घनम् ॥
शनैः शनैः क्रमाल्लिप्य भिन्नच्छिद्रविवर्जितम्। द्विमासं सार्धमासं वा मासं वा शोषयेत्ततः ॥
कूर्चं न्यस्त्वा ततो विप्र पेषण्या पेषयेत्क्रमात्। ततः स्वच्छजलैः कल्कं प्रमाणान्तं तु पूरयेत् ॥
बहु कृत्वा प्रमाणं तु शोध्यमानं समानयेत्। अङ्गोपाङ्गं च प्रत्यङ्गं कल्पयेल्लक्षणान्वितम् ॥
हस्तपादोदरादीनि अङ्गमित्यभिधीयते। उपाङ्गं भूषणं ख्यातं प्रत्यङ्गं चिह्नवाहनम् ॥
कपित्थस्यैव निर्यासात्तत्सार्धत्रिगुणाम्भसा। पटाच्छादं तु कर्तव्यं कल्कमालेपयेत्ततः।
तत्कल्कं तु यवाष्टांशदशभागपरं ततः। निर्यासतोयं कूर्चेन सेच्य पेष्या तु पेषयेत् ॥
मण्डनानि तदूर्ध्वं तु मण्डयेल्लक्षणान्वितम्। पश्चाद्वै चिक्कणं लिप्य श्वेतवर्णं ततो लिपेत् ॥
इत्येवं कल्कसंस्कारलक्षणं सकलस्य तु।

[1]पटैनाच्छादनं चैव वर्णलेपनमेव च । [2]पश्चाद्वदामि ते युक्त्या कर्तव्यः परमेश्वरः ॥ ७ ॥

[देवीमानम्[3]]

[4]नासान्तं [5]वास्यसीमान्तं चिबुकान्तं विशेषतः । हिक्कान्तं [6]वा स्तनान्तं वा [7]देवे देव्युन्नतं भवेत् ॥८॥

[सोमेश्वरलक्षणम्[8]]

शूलादीन्स्थापयित्वा तु[9] देवीं चैव तु कारयेत् । [10]आसीनौ देवदेव्यौ च प्रागुक्ते भद्रपीठके ॥ ९ ॥

---

[1] Pour plus de détails au sujet du पटाच्छादन et du वर्णलेपन voir *Aṃśumatkāśyapa* 90, 1-8:

अथ वक्ष्ये विशेषेण वर्णलेपनमुत्तमम् । शैलदार्विष्टिकागर्भं त्रिधा वै वर्णलेपनम् ॥
शैलजे वर्णपक्षे वै अङ्गोपाङ्गं शिलामयम् । उपरिष्टात्पटमाच्छाद्य तस्योर्ध्वे शर्करां लिपेत् ॥
तदूर्ध्वे चिक्कणं लिप्य श्वेतवर्णादियस्ततः । बिम्बोचितनिभं लिप्य प्रतिष्ठां सम्यगाचरेत् ॥
अथवा शैलजे बिम्बे पटाच्छाद्यं विनोर्ध्वतः । शर्करां यवमानं च लिप्य चिक्कणलेपनम् ॥
श्वेतं च बिम्बवर्णं च क्रमेणैवोचितं लिपेत् । शिलागर्भमिति ख्यातं वर्णहीनाश्ममेव वा ॥
शूलस्थापनकर्मादि दारुगर्भं तु पूर्ववत् । चित्रं वाप्यर्धचित्रं वा पक्वेष्टकासुधान्वितम् ॥
अङ्गसंपूरणं कृत्वा पटमाच्छादयेत्ततः । शर्करादीनि सर्वाणि शैलजे तु यथा तथा ॥
कर्तव्यमिष्टकागर्भं दारुमिश्रितमेव वा । एवं त्रिविधरीत्या तु वर्णगर्भमुदाहृतम् ॥

[2] Bien qu'il soit indiqué ici que les quatre sujets रज्जुबन्ध, कल्कबन्ध, पटाच्छादन et वर्णलेप seraient traités plus loin, nous n'en trouvons pas trace dans le *paṭala* suivant (प्रतिमालक्षणविधि) où ils sont ordinairement traités, ni dans aucun autre *paṭala* des manuscrits utilisés pour cette édition. Il est très probable qu'ils étaient compris dans les lacunes que nous constatons dans le प्रतिमालक्षणविधिपटल.

[3] cf. *Aṃśumatkāśyapa* 57, 3b-6a:

शम्भोर्नासाग्रसीमान्तं शक्त्युच्चं द्युत्तमोत्तमम् । शम्भोर्वा स्तनसीमान्तमधमाधममुच्यते ॥
तयोर्मध्येऽष्टभागे तु नवधा शक्तिमानकम् । शम्भोर्हिक्कान्तमुत्कृष्टं स्तनान्तमधमाधमम् ॥
तयोर्मध्येऽष्टभागे तु नवधा शक्तिमानकम् । एवमष्टादशोत्सेधं पादादुष्णीषसीमकम् ॥

cf. *Suprabhedāgama* I 34, 67b-68a:

ईश्वरस्य च हन्वन्तं बाहून्तं वा स्तनान्तकम् । ईश्वरीति समाख्यातम् ”

[4] A : नास्यान्तं : B : नास्थन्तं [5] E : वाथ pour वास्य ; C, F : चास्य [6] C omet वा

[7] A : देव्यो देव्योन्नतं ; B i देव्या देव्यन्तकं ; C, F : देवदेव्योन्नतं

[8] cf. *Kāmikāgama* II 47, 1-5a et 13:

वक्ष्यामि सोमोमास्कन्दमुखेशस्थापनं परम् । तल्लक्षणसमायुक्तं तच्चेदानीं प्रकथ्यते ॥
चतुर्भुजस्त्रिणेत्रश्च जटामुकुटमण्डितः । सर्वाभरणसंयुक्तो वरदाभयहस्तकः ॥
कृष्णापरशुसंयुक्तोर्ध्ववामेतरकरान्वितः । असव्यसव्यकर्णस्थपत्रिकानककुण्डलः ॥
सोपवीतः प्रसन्नात्मा शयितासव्यपातलः । सालम्बदक्षपादेन वामे गौर्या च संयुतः ॥
सर्वलक्षणसंयुक्तः सर्वाभरणभूषितः । .....वामे देव्या समायुक्तस्तदध्यायप्रसिद्धया ॥
स सोमः ”

cf. *Suprabhedāgama* I 37, 114b1-16:

देवयस्तु लक्षणं वक्ष्ये समासाच्छ्रुणु साम्प्रतम् । हन्वन्तं बाहुसीमान्तं स्तनान्तं वा समुच्छ्रयम् ॥
द्विभुजां श्यामवर्णां तु सर्वाभरणभूषिताम् । दक्षिणे चोत्पलं ग्राह्य वामहस्तं प्रसारयेत् ॥
किरीटं वा करण्डाख्यं तुङ्गपीनपयोधराम् ।

voir aussi *Ajitāgama* 36, 212b-216a.

[9] Ç omet तु [10] A : आसीनो देवदेवी च ; B : आसीनो देवो देवी च ; G : आसीनौ देवदेवौ च

लम्बयेद्दक्षिणं पादं [1]वामं पीठे तु शाययेत् । [2]अभयं दक्षिणं [3]पूर्वे वरदं वाममुच्यते ॥ १० ॥
दक्षिणे [4]त्वपरे टङ्कं वामे कृष्णमृगं धरेत् । शुद्ध[5]श्वेतनिभो देवः सर्वाभरणभूषितः ॥ ११ ॥
देव्यास्तु दक्षिणं पादं पीठे तु शाययेत्क्रमात् । वामपादं प्रलम्ब्याथ [6]चोत्पलं दक्षिणे करे ॥ १२ ॥
वरदं वामहस्ते[7] तु किञ्चित्प्रहसिताननाम्[8] । दुकूलवसनोपेतां[9] करण्डमकुटान्विताम्[10] ॥ १३ ॥
[11]सस्यश्यामनिभाकारां देवीं कुर्याद्यथोचितम्[12] ।
[नेत्रोन्मीलनम्[13]]
[14]नेत्रद्वययुते त्वक्षे नेत्रमोक्षणमाचरेत् ॥ १४ ॥

---

[1] A : वामपीठे [2] B omet le *śloka* n° 10b à 12a [3] A : पूर्वं pour पूर्वे
[4] C, F : तु करे pour त्वपरे [5] C, F : रेत pour श्वेत [6] A omet च dans चोत्पलं
[7] A : हस्तं pour हस्ते [8] A, B : आननम् pour आननाम् [9] A, B : उपेतं pour उपेतां
[10] A, B : अन्वितम् pour अन्विताम् [11] A : तस्या pour सस्य ; B ; तस्य

[12] Après ce *śloka*, les mss. C, E et F ajoutent un demi-vers तयोर्मध्ये तु पीठोर्ध्वे सेनापतिं च कल्पयेत् । Mais dans le *paṭala* suivant (प्रतिमालक्षणविधि) nous voyons Someśvara et Somāskanda mentionnés séparément ; de plus 127b du même *paṭala* déclare सोमेश्वरः पुरोक्तवत्. L'inclusion de सेनापति ici n'est donc pas justifiée.

[13] cf. *Suprabhedāgama* I 37, 15-29:

ततोऽक्षिमोचनार्थं तु स्थण्डिले पूर्ववत्कृते । बिम्बं विन्यस्य तस्योर्ध्वे पटेन महतावृते ॥
अभितः कलशानष्टौ कूर्चाक्षतसपुष्पकान् । विन्यस्य तेषु दिक्पालान्समभ्यर्च्य यथाविधि ॥
आचार्यः शिल्पिना सार्धं नेत्रमन्त्रमनुस्मरन् । हेमसूचिप्रहाराभ्यां शैलजे लोहजे तथा ॥
वर्णयेत्तत्तु संलिख्य चित्राभासे तु मृण्मये । भ्रूरेखां प्रतिमां कृत्वा पक्ष्मरेखातृतीयकम् ॥
श्वेतमण्डलमालिख्य तन्मध्ये कृष्णमण्डलम् । कृष्णस्याभ्यन्तरे धीमाञ्ज्योतिर्मण्डलमालिखेत् ॥
सुव्यक्तं शिल्पिना कार्यं नेत्रे मन्त्रं जपेद्गुरुः । स्थापकः स्थपतिं पूज्य वस्त्रसौवर्णभूषणैः ॥
संपूज्य तोषयित्वा तु कृत्वा शिल्पिविसर्जनम् । मध्वाज्याभ्यां तु संतर्प्य सौवर्णया तु दूर्वया ॥
नेत्राणि नेत्रमन्त्रेण क्षीरेणैवं समाचरेत् । पात्रत्रयं तु संग्राह्य ताम्रजं कांस्यमेव वा ॥
तेषु क्षीराज्यमधुभिः सौवर्णं राजतैः सह । पात्राण्यापूर्य तैरेव प्रत्येकं प्रस्थमानतः ॥
मधुना दक्षिणे नेत्रे दर्शयेद्भास्करात्मके । सर्पिषा गवि वामे तु चन्द्रात्मकमिति स्मरन् ॥
पयसा चोर्ध्वनेत्रे तु दर्शयेदनलात्मकम् । तत्तन्मन्त्राण्यनुस्मृत्य तैस्तु संप्रोक्षयेद्गुरुः ॥
सौवर्णनखयुक्तास्तु मध्यतर्जन्यनामिकाः । तर्जनीदक्षिणे चोर्ध्वे मध्यमानामिकान्यके ॥
संयोज्य हृदयाद्यैश्च सिच्य गन्धाम्बुना ततः । प्रच्छन्नपटमावर्ज्य सुपुष्टां गां सुयौवनाम् ॥
गौर्धेनुहव्यमन्त्रेण दुग्धक्षीरां सवत्सकाम् । गां समभ्यर्च्य सावित्र्या दर्शयेत्तु विचक्षणः ॥
दर्शयेत्तु द्विजान्पश्चाद्विजादन्यान्विशेषतः । एवं सकलबिम्बानां सममेतत्प्रकीर्तितम् ॥

voir aussi *Ajitāgama* 41, 9-19.

[14] A : नेत्रत्रययुतै ऋक्षैः ; B : नेत्रत्रययुते ऋक्षे

[1]स्वर्णतूल्या तु [2]नेत्रेणोन्मेषं [3]संलेखयेद्बुधः । [4]मधुवाता ऋतायेति मधु [5]संतर्पयेत्ततः ॥ १५ ॥
[6]घृतं मिमिक्षेति मन्त्रेण घृतं सम्यक्प्रतर्पयेत्[7] । [8]ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान्दर्शयेत्ततः ॥ १६ ॥
[9]गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत् । [10]जनौघं दर्शयेत्पश्चात्प्रच्छन्नपटमाव्रजेत् ॥ १७ ॥

[जलाधिवासः[11]]

देवस्याग्रे च[12] देव्यग्रे [13]त्रिपादीं विन्यसेत्ततः । [14]तदूर्ध्वेऽम्बुपूरिते पात्रे विन्यसेद्धृदयेन तु ॥ १८ ॥

---

[1] A, B : स्वर्णं कुर्यात्तु pour स्वर्णतूल्या तु

[2] A : नेत्रेण मषीं ; B : नेत्रेषु मषीं [3] A, B : संतर्पयेद्बुधः [4] voir *supra* p. 49 note 6

[5] A : संदर्शयेत्ततः [6] voir *supra* p. 49 note 8 [7] A, B : प्रदर्शयेत् pour प्रतर्पयेत्

[8] voir *supra* p. 49 note 11

[9] voir *supra* p. 49 note 10 ; A, B : गौर्धेनुहव्यमन्त्रेण

[10] A : जनान् संदर्शयेत् ; B : जनं संदर्शयेत्

[11] cf. *Kāraṇāgama* I 75, 36-47:

मृण्मये त्वर्धचित्रे च भित्तिचित्रे पटे तथा । ग्रामप्रदक्षिणं नोक्तमेतेषां तु प्रजापते ॥
जलाधिवासनं चैषामग्रे तु शालिभिः कुरु । अष्टतालप्रविस्तारमुत्सेधं तु युगाङ्गुलम् ॥
स्थण्डिलं चतुरश्रं तु तन्मध्ये नलिनं लिखेत् । तस्योर्ध्वे जलभाण्डं तु विन्यसेत्सूत्रवेष्टितम् ॥
वस्त्रेणास्तीर्य तस्योर्ध्वे दर्पणं विन्यसेत्ततः । प्रतिबिम्बयुतं तत्र स्थापयेद्दर्पणं हृदा ॥
त्रिंशत्काशैः समायुक्तमग्रं तु चतुरङ्गुलम् । ग्रन्थि व्योमाङ्गुलं दैर्घ्यं प्रतिमाजानुमात्रकम् ॥
तत्कूर्चं हृदयेनैव विन्यसेद्दर्पणोपरि । चतुष्पादं न्यसेत्तत्र याज्ञिकैर्वृक्षसंभवैः ॥
रत्निमात्राधिकं बिम्बमाने गात्रस्य दैर्घ्यकम् । युगाश्रं वाथ वृत्तं वा द्वादशाङ्गुलनाहकम् ॥
पक्षतालप्रमाणेन तदूर्ध्वे फलकां कुरु । अब्ध्यङ्गुलेन सुषिरं वृत्तं मध्ये प्रकल्पयेत् ।
द्वात्रिंशत्प्रस्थसंपूर्णं कुम्भं बिम्बसमप्रभम् । सूत्रेण वेष्टयेत्कुम्भं यवान्तरकमेण तु ॥
एवमेवोपकुम्भं तु कल्पयेत्कल्पवित्तमः । चतुष्पाद्युपरि न्यस्त्वा पृष्ठे तु सुषिरं कुरु ॥
वेदतारप्रमाणेन नालं हैमेन संयुतम् । तन्नालं तत्र तोयैश्च स्नापयेद्दर्पणोपरि ॥
कुम्भाम्भःशोषणात्पूर्वमुपकुम्भं तु पूरयेत् । जलाधिवासनं ह्येवम्"

cf. *Suprabhedāgama* I 37, 3b-5:

रत्नन्यासं जले वासं शयनं तु प्रदक्षिणम् । चित्राभासे तु वर्ज्यं हि रत्नजे तु समाचरेत् ॥
चित्राभासे तु कर्तव्यं दर्पणोपरि यत्नतः । त्रिपाद्यूर्ध्वे जलद्रोण्यां स्नावयेद्दर्पणोपरि ॥
जलाधिवासं स्नपनमेवमेव समाचरेत् ।

Voir aussi *Ajitāgama* 40, 124-132.

[12] C : तु pour च [13] A : त्रिपादीन् pour त्रिपादीं

[14] A : तदूर्ध्वं पूजितां पात्रीं ; B : तदूर्ध्वे विन्यसेत्पात्रीं

तयोस्तु [1]दर्पणं न्यस्य लम्बकूर्चसमन्वितम् । गन्धादिभिः समभ्यर्च्य तत्तन्मूलेन देशिकः ॥ १९ ॥

[मण्डपः[2]]

मण्डपे [3]चालयाग्रे तु [4]मध्ये वेदीं प्रकल्पयेत् । रत्निद्वयविशालेन तत्त्रिभागेन तुङ्गकम् ॥ २० ॥
दर्पणोदरसंकाशं कर्तव्यं सोपवेदिकम् । अग्रे वेदाश्रकुण्डं च शांकरे योनिकुण्डकम् ॥ २१ ॥

[शयनाधिवासः[5]]

कृत्वा गोमयमालिप्य पुण्याहप्रोक्षणं कुरु । स्थण्डिलं कारयेद्विद्वान्शालितण्डुललाजकैः ॥ २२ ॥
[6]तिलैश्च पुष्पैर्दर्भैश्च गन्धपुष्पादिभिर्यजेत् । [7]शयनं कल्पयेत्तस्मिन्नण्डजाद्यैर्विशेषतः ॥ २३ ॥
जलाद्दर्पणमानीय [8]शाययेच्छयनोपरि ।

[कुम्भस्थापनम्[9]]

सूत्रादिभिः [10]समायुक्तं शिवकुम्भं च वर्धनीम् ॥ २४ ॥

---

[1] A : दर्पणो न्यस्त्वा ; F : दर्पणै न्यस्त्वा

[2] cf. *Virāgama* 67, 6-8a:

प्रतिष्ठामण्डपं कृत्वा लक्षणेन समन्वितम । वेदिका ब्रह्मभागे तु मानुषे कुण्डमुच्यते ॥
वृत्तं वा चतुरश्रं वा सर्वकुण्डानि कारयेत् । देव्याश्चेद्दिक्षु विप्रेन्द्र योनिरश्वत्थपत्रवत् ॥
एकासनगतदेव्याश्चतुष्कोणेषु योनिकम् ।

voir aussi *Ajitāgama*, 40, 4-12a:

[3] A : वा pour च

[4] A : मध्यवेदीं

[5] cf. *Kāraṇāgama* I 75, 77b-80a:

मृण्मये त्वर्धचित्रे च आभासे च पटेऽपि वा । व्यपोह्य दर्पणं कूर्चं संगृह्य शयनोपरि ॥
संस्थाप्य पूज्य गन्धाद्यैर्बन्धयेत्कौतुकं बुधः । मृण्मये त्वर्धचित्रे च तद्वस्ते च प्रबन्धयेत् ॥
आभासे च पटे चैव कौतुकं भावयेद्बुधः । दर्पणं वापि कूर्चं वा पूर्वोक्तं शाययेद्बुधः ॥

cf. *Virāgama* 67, 9b-12:

"शयने शाययेत्ततः ।
वास्तुहोमं दिवा कुर्याल्लक्षणेन समन्वितम् । भारशालिसमायुक्तं वेदिमध्ये परिस्तरेत् ॥
शाल्यर्धतण्डुलं न्यस्य तदर्धं तु तिलं न्यसेत् । परिस्तरेत्तु दर्भैश्च अष्टपत्रं सकर्णिकम् ॥
तत्तन्मन्त्रेण संस्मृत्य शयनं पञ्च कल्पयेत् । दर्पणं शाययेत्तत्र प्रच्छन्नपटसंयुतम् ॥

[6] C ,F : तिलैः पुष्पैश्च दर्भैश्च

[7] A : शयने pour शयनं

[8] C : शाधयेत् pour शाययेत

[9] cf. *Kāraṇāgama* II 58, 13-15a:

वेदिकामध्यमे चैव दशकुम्भं न्यसेत्ततः । क्षित्यादिकुटिलाप्रान्तं विद्याङ्गं नेत्रमुद्रया ॥
प्रणवं पूर्वमुच्चार्य पुंसौमुच्चरेत्परम् । नीलकण्ठाय ते चैव शर्वादीन्परिकल्पयेत् ॥
पञ्चावरणमार्गेण पूजयित्वा विशेषतः ।

voir aussi *Ajitāgama*, 41, 32b-35.

[10] A : समायुक्ते

परितोऽष्ट[1]घटांश्चैव [2]नानागन्धाम्बुपूरितान् । स्थापयित्वा शिवे कुम्भे शिवमन्त्रं [3]निधापयेत् ॥२५॥
[4]अनन्ताद्यष्टविद्येशघटानिन्द्रादिषु न्यसेत् । सोमेश्वरं च विद्येशान्ध्यात्वा गन्धादिभिर्यजेत् ॥ २६ ॥

[होमः[5]]

ततो होमं प्रकुर्वीत [6]ह्यनेन विधिना बुधः । अग्न्याधानादिकं [7]सर्वमग्निकार्योक्तमाचरेत्[8] ॥ ॥ २७ ॥
समिदाज्यचरुक्षीरतिलसर्षपमाषकैः । प्रियङ्गु[9]मुद्गगुलैश्चैव पनसस्य फलैरपि ॥ २८ ॥
[10]सद्याद्यस्त्रैः शतं हुत्वा [11]देवदेव्योश्च कुण्डयोः । मूलेनाज्यशतं हुत्वा रात्रिशेषं व्यपोह्य च ॥ २९ ॥

[कुम्भाभिषेकः[12]]

[13]प्रातराचार्यः संस्नात्वा सकलीकृतविग्रहः । [14]दर्पणं च करीरादीनर्चयेद्गन्धपुष्पकैः ॥ ३० ॥

---

[1] B, C, F : अष्टौ pour अष्ट [2] B : नानागन्धसुपूजितान् [3] B : तु विन्यसेत्
[4] A, F : विद्येशानमनन्ताद्या शक्रादिषु घटान्न्यसेत् ; C, E : विद्येशाननन्ताद्यांश्चक्रादिषु घटे न्यसेत
[5] cf. *Virāgama* 67, 16-20a:
ततो होमं प्रकुर्वीत पलाशसमिधा सह । समिदाज्यचरूँल्लाजान्सर्षपान्मुद्गमेव च ॥
माषं चैव तु विप्रेन्द्र सप्तद्रव्याणि होमयेत् । सद्येन समिधा हुत्वा हृदयेनाज्यमेव च ॥
चरुणामेन होतव्यः शिरोमन्त्रेण लाजकम् । सर्षपं नेत्रमन्त्रेण मुद्गमीशानमन्त्रतः ॥
माषं नेत्रेण हुत्वा तु प्रत्येकं तु शताष्टकम् । सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ॥
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।
voir aussi *Ajitāgama* 41, 36-47
[6] A omet हि dans ह्यनेन [7] A, B : कर्म pour सर्वम् [8] B : मार्गतः pour माचरेत्
[9] A : मुद्गलैश्चैव ; C : मुद्गुलैश्चैव
[10] B : सद्येत्यस्त्रैः [11] B : देवदेव्याश्च
[12] cf. *Virāgama* 67, 20b-30a:
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः । मन्त्रन्यासोक्तमार्गेण स्वदेहे विन्यसेत्ततः ॥
ततोऽवसानहोमं तु आज्येन चरुणा युतम् । अष्टोत्तरशतं हुत्वा द्रव्यं प्रति विशेषतः ॥
चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं ततः । प्रायश्चित्तं तु होतव्यं चित्तादिभिर्जयादिभिः ॥
हुत्वान्ते तु यदस्येति जुहुयात्तदनन्तरम् । आचार्यदक्षिणां दद्यात्पश्चाङ्गभूषणैर्युतम् ॥
होमीनां तु पदार्थीनां पूजयेत्तु विशेषतः । प्रतिमस्याग्रतश्चैव जलभाण्डं न्यसेत्ततः ॥
तस्योर्ध्वे दर्पणं स्थाप्य मूलमन्त्रेण संयुतम् । प्रोक्षयेच्चित्रकर्म तु दर्पणे स्नापयेत्ततः ॥
प्रधानकलशं चैव स्नापयेत्तु विशेषतः । पूर्वादीशानपर्यन्तं स्नापयेत्स्वस्वमन्त्रतः ॥
हविर्निवेदयेत्पश्चात्ताम्बूलं दापयेत्ततः । ब्राह्मणान्भोजयेत्तत्र शैवान्संभोजयेत्ततः ॥
सर्वासां देवतानां च स्थापनक्रममेव हि । तत्तन्मन्त्रेण कर्तव्यं क्रियाभेदो न विद्यते ॥
प्रतिष्ठोपकरणं सर्वमाचार्याय प्रदापयेत् । चित्रस्थापनमेवोक्तम्"
cf. *Kāraṇāgama* I 75, 133b-138a:
"मृण्मये त्वर्धचित्रके ॥
आभासे च पटे चैव विशेषोऽस्ति शृणुष्व हि । शयनात्कूर्चमुत्तीर्य प्रतिमाहृदि विन्यसेत् ॥
बिम्बं पूर्वं प्रतिष्ठाप्य कर्माचार्यं स्नापयेज्जलैः । कर्माचार्यास्त्वभावे तु पीठं चैवाभिषेचयेत् ॥

आचार्यं पूजयेत्तत्र वस्त्रकाञ्चनभूषणैः । मुहूर्ते समनुप्राप्ते कृत्वा [1]घृतशिरोऽर्पणम् ॥ ३१ ॥
देवं चैव तु देवीं च [2]कलान्यासैः [3]समर्चयेत् । [4]वेद्यास्तु दर्पणं चैव [5]करीरांश्च समुद्धरेत् ॥ ३२ ॥
[6]हर्म्यप्रदक्षिणं[7] कुर्यात्सर्वालंकारसंयुतम् । गर्भगेहं प्रविश्याथ बिम्बाग्रे तु निधापयेत् ॥ ३३ ॥
[8]घटाद्बीजं समादाय प्रतिमाहृदि विन्यसेत् । [9]वर्धन्या बीजमादाय देव्यास्तु हृदि विन्यसेत् ॥ ३४ ॥
[10]परितोऽष्टघटाद्बीजान् [11]परितस्त्वासने न्यसेत् । [12]जलद्रोण्यां [13]त्रिपाद्यूर्ध्वे [14]दर्पणं तु निधापयेत् ॥३५
तद्घटस्थोदकेनैव [15]त्वभिषेकं समाचरेत् । अर्चनोक्तं समभ्यर्च्य प्रभूतं च हविर्ददेत् ॥ ३६ ॥
उत्सवं कारयेत्पश्चाच्छ्रद्धाभक्तिसमन्वितः ॥ ३७ ॥

इति [16]श्रीमद्रौरवतन्त्रे [क्रियापादे] [17]सोमेश्वरस्थापनविधिर्नाम चतुस्त्रिंशः पटलः

अर्चनोक्तं समभ्यर्च्य वस्त्राभरणपुष्पकैः । भस्म दत्त्वा हृदा मन्त्री दर्पणं दर्शयेत्ततः ॥
पायसं दापयेत्तत्र ताम्बूलं दापयेत्ततः । चलाचलविभागं तु ज्ञात्वा पूर्वोक्तवत्क्रिया ॥
तत्तत्स्थापनोक्तं च मार्गेणैव समाचरेत् ॥

voir aussi *Ajitāgama* 41, 48-61.

[13] B : प्रातराचार्यकः स्नाप्य [14] C : दर्पणं चाग्निनादीनि अर्चयेद् ; E, F : दर्पणं चाग्निरादीनि अर्चयेद्

[1] B : कृत pour घृत [2] A : कलान्यासं [3] C, F : समर्पयेत् [4] A : वेद्यां तु

[5] C : करं चैव समुद्धरेत् ; F : करीरं चैवमुद्धरेत्

[6] A : हर्म्यं pour हर्म्य ; F : हर्म्ये [7] B : प्रदक्षिणीकृत्य pour प्रदक्षिणं कुर्यात्

[8] B : कुम्भाग्राद्बीजमादाय प्रतिमाहृदि विन्यसेत् [9] A : वर्धन्यां

[10] A : परितोऽष्टघटां बीजां ; B, C : परितोऽष्टघटान् बीजान् [11] A : परितः स्वासने

[12] A : जलद्रोणां ; E : जलद्रोणान् [13] A : त्रिपादोर्ध्वे ; B, C : त्रिपादूर्ध्वे [14] B, C, F : दर्पणे

[15] A omet तु dans त्वभिषेकं [16] A : श्री pour श्रीमद् ; B omet श्रीमद्रौरवतन्त्रे

[17] A : सोमेश्वरप्रतिष्ठाविधिपटलः पञ्चत्रिंशः ; B : सोमेश्वरप्रतिष्ठा नाम पञ्चत्रिंशः पटलः ; C : सोमेश्वरस्थापनविधिर्नाम षष्ठ पटलः ; E : सोमेश्वरस्थापनविधिः षष्ठः ; F : सोमेश्वरस्थापनपटलः षष्ठः

[पञ्चत्रिंशः पटलः]
[प्रतिमालक्षणम्]
[विग्रहभेदाः[2]]

अतः परं प्रवक्ष्यामि प्रतिमालक्षणं परम्। [3]द्विसप्त विग्रहे भेदाः स्यात्तदादौ सुखासनः ॥ १ ॥
सोमेश्वरो द्वितीयः 'स्यात्सोमास्कन्देश्वरस्ततः। [5]उक्षारूढश्चतुर्थश्च [6]पञ्चमः स्यात्पुरारिकः ॥२ ॥
चन्द्रशेखरमूर्तिस्तु [7]षष्ठस्तु परिकीर्तितः। सप्तमः कालहारी [8]स्यात्कल्याणश्चाष्टमो भवेत्[9] ॥ ३ ॥

---

[1] Pour प्रतिमालक्षण voir *Aṃśumatkāśyapa* 55 et 56, *Aṃśumadāgama* 1, *Ajita* 36, *Kāmika* I 65, *Kāraṇa* I 11. *Kiraṇa* III 22, *Dipta* 16, *Makuṭa* 10, *Yogaja* 6, *Vira* 62-64, *Santānasaṃhitā* 16, *Suprabheda* I 34 et *Sūkṣma* 56.

[2] cf. *Kāmikāgama* I 65, 23-27:

आदौ सदाशिवः प्रोक्तो नृत्तमूर्तिरतः परम्। उमोमास्कन्दसहितः स्थितः स्यादिन्दुशेखरः ॥
त्रिपुरघ्नस्ततः प्रोक्तो लिङ्गोद्भूतस्त्वनन्तरम्। ततः स्याद्दक्षिणामूर्तिर्गेयमूर्तिरतः परम् ॥
चण्डेशाधिपतिः पश्चात्कालकामादिनाशकः। सुखासनस्ततः प्रोक्तस्ततः कल्याणसुन्दरः ॥
उमाविष्णवर्धरूपं च ब्रह्मविष्णुसमन्वितः। वृषारूढस्ततः प्रोक्तो गङ्गायुगपरस्तथा ॥
ततः कङ्कालमूर्तिः स्याद्वलिभर्ता त्वनन्तरम्। नन्दीश्वरप्रसादश्च ऊर्ध्वपादसमन्वितः ॥

cf. *Suprabhedāgama* I 34, 72-75a:

आद्यं सुखासनं चैव द्वितीयमुमया सह। वृषारूढं तृतीयं तु त्रिपुरारि चतुर्थकम् ॥
नृत्ताख्यं पञ्चमं रूपं षष्ठं सोमार्धशेखरम्। सप्तमं चार्धनारीशं हरेरर्धं तु चाष्टमम् ॥
भिक्षाटनं च नवमं दशमं कामनाशनम्। एकादशं तु कालघ्नं ततो लिङ्गपुराणिकम् ॥
द्वादश प्रतिमा ह्येवम्"

voir aussi *Ajitāgama* 36, 175-180.

[3] A : द्विसप्तविग्रहा भेदं स्यात्तदादौ ; B : द्विसप्तविग्रहभेदं स्यात्तदादौ तु ; C, F, G : सप्तविग्रहभेदं स्यात्तदादौ तु

[4] F : वा pour स्यात्

[5] B : दक्षारूढ pour उक्षारूढ

[6] A: पञ्चमं स्यात्पुरारि वै ; B, C : पञ्चमं स्यात्पुरारिकम्

[7] A : षष्ठमं परिकीर्तये ; B : षष्ठं तु परिकीर्तितम् ; C : षष्ठमः परिकीर्तितः ; F, G : षष्ठमं परिकीर्तितम्

[8] A : तु pour स्यात्

[9] Ce texte déclare qu'il y a quatorze *mūrti* (voir śloka 16), mais dans tous les manuscrits utilisés pour cette édition, l'énumération des noms cesse après le huitième, et le texte enchaîne sur un autre th ème : il doit y avoir une lacune de deux *śloka*. Plus loin, lors des définitions des *mūrti*, après la définition de la huitième, Kalyāṇasundaramūrti, (śl. 221a) on ne trouve pas la formule qui clôt chaque définition précédente. Il semble qu'il y ait là encore une lacune avant la définition de Nṛttamūrti, qui apparaît comme la neuvième mais devrait être la dixième. Au total on ne trouve donc énumérées que treize *mūrti* au lieu des quatorze annoncées. Malheureusement, aucune indication dans le texte présent ni dans les autres *paṭala* ne permet de restituer le nom de la *mūrti* manquante; comme le nombre des *mūrti* varie avec chaque *āgama*, méme une étude comparative ne peut résoudre ce problème.

[गर्भगेहतः प्रतिमामानम्[1]]

गर्भगेहविशालं तु [2]वेशत्रयविभाजितम्[3] । [4]अधमान्तरोत्कृष्टैर्हि प्रत्येकं नवधा भवेत् ॥ ४ ॥

[लिङ्गवशात् प्रतिमामानम्[5]]

लिङ्गोच्चभावनार्हं वा [6]विशाले वोदये तु वा । प्रत्येकाष्टद्वयांशे तु [7]शिवाग्निभूतसप्त वा ॥ ५ ॥

नव[8]रुद्रत्रयाधिक्य[9]दशांशं [10]वा त्रिपञ्चकम् । सदशादधिकं वापि हीनं [11]पञ्चांशमेव च ॥ ६ ॥

[द्वारतः स्तम्भतश्च प्रतिमामानम्[12]]

द्वारोच्चे स्तम्भमाने च[13] गर्भमानवदाचरेत् ।

[जात्यंशायांशयोजनम्[14]]

तस्माज्जात्यंशमायांशं योजयेदनुकूलितम् ॥ ७ ॥

---

[1] cf. *Dīptāgama* 16, 7b-11:

गर्भमानप्रमाणेन द्विविधं चोच्यते मया । यस्य गर्भगृहस्यार्धं कन्यसं प्रतिमोच्छ्रयम् ॥
पञ्चभागसमे गर्भे त्रिभागं मध्यमं भवेत् । त्रिभागे द्व्यंमित्युक्तं प्रतिमोत्सेधमुत्तमम् ॥
अथवा गर्भमानेन वक्ष्यते क्रमशोऽधुना । गर्भगेहं तथा भज्य एकैकं तु त्रिधा पुनः ।
अधस्तात्कन्यसत्रीणि मध्यमत्रीणि मध्यमम् । उत्तमत्रीणि चाग्रे तु एकैकं प्रति मानकम् ॥
नवधा मानमित्युक्तं कनिष्ठादि त्रयं त्रयम् ।

voir aussi *Ajitāgama* 36, 2b-5.

[2] A : वश pour वेश ; B : गुण [3] C, F, G : विभाजिते pour विभाजितम्

[4] A : अधमान्तरकुष्ठं हि ; B : अथ मान्तारकृष्ठं हि : C , F : अधमान्तारकृष्ठाभिः ; C : प्रथमान्तिरकृष्ठाभिः

[5] cf. *Kāmikāgama* I 65, 1b: लिङ्गतारोच्चनार्हैर्वा तैश्च द्वित्रिगुणैस्तु वा ।

voir aussi *Ajitāgama* 34, 11b-17a.

[6] A : विशालं वोदयं तु वा ; C : विशालं वोपयं तु वा ; F, G : विशालं वो वयं तु वा

[7] C : शिवाग्निभूत सप्त वा [8] B : सूत्र pour रुद्र

[9] B, C,G : आधिक्यं pour आधिक्य [10] B : वात्र पञ्चकम्

[11] C : पञ्चांशकेऽपि च ; E, F, G : पञ्चांशकेव च

[12] cf. *Kāraṇāgama* I 11,10-11a et 16-17a:

द्वारस्य सममानं तु उत्तमं तत्प्रकीर्तितम् । ग्रहभागैकहीनं तु मध्यमं प्रतिमोच्छ्रयम् ॥
अष्टभागैकहीनं स्यादधमम..... । प्राचीरुत्तर[पादादुत्तर?]सीमान्तं स्तम्भमानमथोत्तमम ॥
रन्ध्रभागैकहीनं यन्मध्यमं समुदाहृतम् । अष्टांशहीनमधमं स्तम्भमानं प्रकीर्तितम् ॥

voir aussi *Ajitāgama* 36, 6-9.

[13] A, B : स्तम्भमानेन

[14] cf. *Aṃśumatkāśyapa* 55, 47b-54:

अङ्गुलादन्यद्यन्मानं वेदाशीति विभज्य च । एकांशं रोपयेत्तस्माज्जात्यंशं तद्विजार्हकम् ॥
द्विभागाधिकषष्ट्यंशं भज्यैकांशसमन्वितम् । नृपजात्यंशकं ह्येवं नृपाणामृद्धिकारणम् ॥
चतुर्विंशतिभागं तु कृत्वैकांशसमन्वितम् । वैश्यजात्यंशकं ख्यातं वैश्यानामभिवृद्धिदम् ॥

अशीतिषष्टिविंशांशाद्दश[1]भागाद्विशेषतः । [2]वेदाक्षयुगषड्भागे [3]त्वधिके तु विभाजिते ॥ ८ ॥
तस्मादेकांशमाधिक्यं [4]द्विजजात्यंशमुच्यते । तज्जात्यंशयुतोच्चं तु दशभागाच्छतान्तकम्[5] ॥ ९ ॥
भागं कृत्वा तु [6]सकलमेकांशमधिरोपयेत् । नृपतेरपि वास्तोस्तु [7]कर्तुश्चानुकूलं हि यत् ॥ १० ॥

[आयादिशुद्धिः[8]]

तन्मानं तु गृहीतव्यमायात्[9] षट्शुद्धिमीक्षयेत् । [10]तुङ्गांशेऽष्टगुणेऽर्कांशहृते [11]शेषायमुच्यते[12] ॥ ११ ॥

षोडशांशेंऽशमारोप्य शूद्रक्रद्धिकरं भवेत् । एवं जात्यंशसंयुक्तमंशमष्टगुणीकृतम् ॥
सप्तविंशतिभिर्हृसि शेषमश्वादिभं भवेत् । तद्दिनं जातिऋक्षं स्यान्नृपवास्तुदिनान्वितम् ॥
सुशोभनेन युक्तं चेत्कर्तृवास्तुनृपादिनाम् । त्रिंशाद्यांशतभागान्तं बिम्बोच्चे तु विभाजिते ॥
शश्यंशं रोपयेद्यावच्छुभायादिक्रसंभवम् । तन्मानं कौतुकोच्चं स्यात्पादादुष्णीषकावधि ॥
आयांशकमिदं ख्यातं चैकांशायादि कल्पयेत् ।

cf. *Kāmikāgama* I 65, 8b-13a:

अष्टषष्ट्यर्कपङ्क्त्यूर्ध्वं वेदद्वियुगषड्विधम । भागं कृत्वैकभागेन युक्तं जात्यंशकान्वितम् ॥
वसुभिर्गुणिते तस्मिन्सप्तविंशतिभिर्हृते । ब्राह्मणादिदिनं प्रोक्तं तेषामेतच्छुभावहम् ॥
त्रिष्वङ्गुलप्रमाणेषु जात्यंशकं न रोपयेत् । शुभमानं न युक्तं चेद्राजग्रामादिवास्तुषु ॥
उत्सेधं पङ्क्तिपङ्क्त्यादि भजेत्पञ्च षडंशकम् । व्योमभागः सदा योज्यो यावानस्य शुभोदयः ॥
आयांशश्चैव नेष्टः स्यात्त्रिविधेष्वङ्गुलेषु च । यवमानेऽपि जात्यंशमायांशं नैव रोपयेत् ॥

[1] G : भागो pour भागाद्
[2] B : वेदाष्टयुगषड्भागं ; C : वेद्यार्थप्रागषड्भागं ; E, F : वेदार्थयुगषड्भागं
[3] A, B : अधिकं pour त्वधिके
[4] C, E : द्विजाज्जात्यंशमुच्यते
[5] B : शतांशकम् pour शतान्तकम
[6] A : लुगलम् pour सकलम् ; B : लगुलम् ; C : लुगुलम्
[7] B : कर्तुर्यदनुकूलकम्
[8] cf. *Aṃśumatkāśyapa* 55, 55-67:

अष्टभिर्वर्धयेदंशं भानुभिर्हासयेद्दिज । शेषमायमिति ख्यातमंशमष्टगुणीकृतम् ॥
सप्तविंशतिभिर्हासे शेषमश्वादिभं भवेत् । नवभिर्गुणिते त्वंशं नाडिभिर्हासयेत्ततः ।
शेषं व्ययमिति ख्यातमंशं वै त्वनलेन तु । वर्धयेद्वसुभिर्हासे शेषं ध्वजादि योजयेत् ॥
नवभिर्वर्धयेत्सप्तहासे वारमुदाहृतम् । वर्धयेद्वेदसंख्यया ह्रासयेन्नवसंख्यया ॥
शेषमंशकमित्युक्तमेवमायादिषड् भवेत् । आयाधिक्यव्यये क्षीणं पुष्कलायं सुशोभनम् ॥
ध्वजो धूमश्च सिंहश्च श्ववृषौ खरहस्तिनौ । काकश्च योनयश्चाष्ट तेषु केतुहरी वृषः ॥
गजश्च शुभदा ज्ञेया गर्हिताः शेषयोनयः । विपत्तिः प्रत्ययं चैव वधो वैनाशिकस्तथा ॥
षष्ठाष्टद्वादशं लग्नं वर्ज्यं शेषाः शुभावहाः । कर्तुश्च ग्रामनक्षत्राद् नृपवास्तुदिनं तथा ॥
गणयेद्बिम्बऋक्षान्तं शोभनं तु परिग्रहेत् । वारे सौम्यादि सौख्यं तु भौमवारं विवर्जयेत् ॥
सूर्यस्य वारं सौरेश्च मध्यमं चेति संस्मृतम् । भानुवारादिसंयुक्तं विशाखादि चतुश्चतुः ॥
योगं तु मरणं नाशममृतादि यथाक्रमम् । तस्करो भुक्तिशक्ती च धनं राजा च षण्डकः ॥
अभयं निर्धनः प्रेष्यं नवांशकमुदाहृतम् । तेषु तस्करषण्डं च ऋणं चैव तु वर्जयेत् ॥
गणेषु सुरमानुष्यं योग्यमन्यं विवर्जयेत् । एवं परीक्ष्य शोभाढ्यमायामं तु सुयोजयेत् ॥

[1]वेदघ्न्यां दशभिर्हसे [2]तस्कराद्यंशकं भवेत् । आयाधिकं[3] व्ययक्षीणं[4] [5]नृपस्य चानुकूलकम् ॥ १२ ॥
[6]भौमवारविनिर्मुक्तं [7]शुभयोन्यंशकान्वितम् । यन्मानं तद्गृहीतव्यं [8]बिम्बाङ्कैर्मूर्धकान्तकम् ॥ १३ ॥

[अङ्गमानम्[9]]

[10]सवेदषट्शते भागे तन्माने तु [11]विभाजिते । एकांशं देहमात्रं [12]स्यात्तद्वस्वंशं यवं भवेत्[13] ॥ १४ ॥
[14]शिवांशाग्नियवोपेतमुष्णीषोच्चमुदाहृतम् । [15]गुणांशं पूर्वकेशान्तं तस्मादग्नियवान्वितम् ॥ १५ ॥

---

cf. *Kāmikāgama* I 65, 13b-18:

वसुभिर्गुणितेष्वर्कहृते चायं विनिर्दिशेत् । अष्टपञ्चदिनं प्रोक्तं पञ्चविंशतिभिर्हृतम् ॥
नवभिर्गुणिते सप्तहृते वारं तु निर्दिशेत् । नन्दसंगुणिते दिग्भिर्भाजिते व्ययमादिशेत् ॥
गुणघ्ने वसुभिन्ने तु योनिरित्यभिधीयते । वेदवसुगुणिते नन्दहृते त्वंशक इष्यते ॥
वायोर्ऋक्षफलं प्रोक्तं राशिरंशश्च ऋक्षतः । त्रिंशद्भिन्ने तिथिः प्रोक्ता योगो वारर्क्षयोर्भवेत् ॥
जात्यंशयोजिते वैभिर्युक्तं चेत्तत्प्रगृह्यताम् । नो चेदायांशयुक्ते तु सशुभं तु समारभेत् ॥
गृहीतप्रतिमोत्तुङ्गमानमात्रेण वा भवेत् ॥

voir aussi *Ajitāgama* 36, 375-389.

[9] Une meilleure lecture semble être आयादि pour आयात्

[10] A : तुङ्गाष्टं च गुणेऽर्कांशहृदे शोषायमुच्यते ; B : तुङ्गाष्टमगुणैकांशं हृद्देशोयनमुच्यते ; C : तुङ्गाष्टांशगुणैकांशहृतो षोमायमुच्यते

[11] La forme grammaticale correcte est शेष आय उच्यते

[12] La partie du texte consacrée à la définition de व्यय, योनि, नक्षत्र et वार qui est normalement attendue ici semble perdue.

[1] A : वेशद्धयाद्दशभिश्रासे ; B : वेदाद्यधाँशमिश्रासे ; C : वैशुद्धयाद्दशभिर्हसे ; une meilleure lecture semble étre: वेदघ्न्यां नवभिर्हसे

[2] A : तस्कराद्यं करं भवेत् ; C, G ; तस्कराद्यकरं भवेत् [3] C F G : आयाधिक्यं

[4] A : क्षीण pour क्षीणं [5] A : नृपस्य तु च लक्षणम् ; C, E, F : नृपस्यानु च कूलकम् ; G ; नृपस्यानुकूलकम्

[6] A : भौमे वारे विनिर्मुक्तिः ; B : भौमवारे विनिर्मुक्तिः ; C, F, G : भौमवारे विनिर्मुक्तं

[7] C, G : शुभयोन्यंशमन्वितम् [8] A, B, C : बिम्बाग्रे मूर्धकान्तकम्

[9] cf *Aṃśumatkāśyapa* 56, 1-10a:

उत्तमं दशतालं तु शृणु वक्ष्ये द्विजोत्तम । सवेदविंशदंशं च शतं बिम्बोदयं कुरु ॥
तेष्वेव तालमात्रं स्यात्तन्मात्रे वसुभाजिते । उष्णीषात्पादपर्यन्तमङ्गमानं प्रमीयते ॥
त्रियवाधिकचन्द्रांशमुष्णीषोच्चमुदाहृतम् । तस्मादापूर्वकेशान्तमङ्गं भागमुदाहृतम् ॥
केशान्तादक्षिसूत्रान्तं युगांशं त्रियवाधिकम् । अक्षिसूत्रात्पुटान्तं च पुटाद्धन्वन्तमानकम् ॥
प्रत्येकं त्रियवाधिक्यं युगांशोदयमिष्यते । हन्वादिगलमानं तु चतुर्यवमुदाहृतम् ॥

युगांशमक्षसूत्रांशं [1]पुटान्तं च तथैव च। हन्वन्तं चैव तत्तुल्यं गललम्बं [2]चतुर्यवम्॥ १६॥
यवैकोनचतुर्भागं [3]ग्रीवामानमुदाहृतम्। हिक्कादिहृदयान्तं च ततो नाभ्यवसानकम्[4]॥ १७॥
नाभेर्लिङ्गस्य [5]मूलान्तं [6]तुल्यमग्नियवान्वितम। त्रयोदशाङ्गुलं [7]प्रोक्तमूरुदीर्घं त्रिवेशकम्[8]॥ १८॥
[9]वेदांशं जानुदीर्घं [10]स्याज्जङ्घोच्चं चोरुकांशकम्। जानुदीर्घसमं [11]पादतलस्योच्चमुदाहृतम्॥ १९॥
[12]अङ्गुष्ठाग्रात्तु[13] पार्ष्ण्यन्तं तलं सप्तदशाङ्गुलम्। हिक्कासूत्रादधो बाहुदीर्घं त्रिनवमात्रकम्[14]॥ २०॥
[15]कूर्परोच्चं द्विमात्रं स्यात्त्रिसप्तांशं प्रकोष्ठकम्। तस्मान्मध्याङ्गुलाग्रान्तं सार्धत्रयोदशाङ्गुलम्॥ २१॥
[16]सार्धरव्यङ्गुलं[17] प्रोक्तं मुखस्य तु विशालकम्। [18]मुखान्तस्य तु विस्तारं सार्धत्रयोदशाङ्गुलम्॥ २२॥

यवैकोनमुदांशं [युगांशं?][तु कण्ठोच्चमिति कथ्यते]। कण्ठमूलाद्धनुःसूत्रं[दधःसूत्रं?]हिक्कासूत्रमुदाहृतम्॥
हिक्कादा[या?]हृदयान्तं च हृदयं [याद्?]नाभिसीमकम्। नाभेस्तु मेढ्रमूलान्तं तु समं गुणयवाधिकम्॥
त्रयोदशांशमुत्सेधं प्रत्येकं द्विजसत्तम। अग्र[मेढ्?]मूलात्सूत्रमध्यं [तु यत्सूत्रं?] अर्धसूत्रं तदुच्यते॥
अर्धसूत्रादधश्चोरुदीर्घं नक्षत्रमायतं [मानकम्?]। तस्माद्वेदाङ्गुलं जानु जङ्घोरुसदृशायता॥
युगं पादतलोत्सेधमेवमुत्सेधमुच्यते॥
voir aussi *Ajitāgama* 36, 45-52a.

10 A, B : सवेदं षट्शतभागं तन्मानं ; C : सवेदषट्सप्तभागस्तु तन्मानं 11 B : विभाजितम्
12 A : स्यात्तद्वत्संशद्वयं भवेत् ; C : तद्वत्स्यांशं द्वयं भवेत् ; G : तद्वत्सांशं यवं मवेत्
13 cf. *Kāraṇāgama* I 11, 60b-61a:
यल्लब्धोत्सेधमानं तु चतुर्विंशच्छतं कुरु। अङ्गुलं तेषु भागैकं वस्वंशैकं ततो यवम्॥
14 A : शिवांशाग्नियतोपेतम् ; C G : शिवांशाग्नियतोपेतम् 15 A : गणांशं ; B : गणेऽशं
1 C : प्रदान्तं च ; G : गुदान्तं च 2 C, F, G : च तुल्यवत् 3 A : ग्रीव pour ग्रीवा
4 C, F, G : अवधानकम् pour अवसानकम् 5 B : मूलं तु 6 C, F : तन्तु pour तुल्य
7 C : प्रोक्तं दीर्घं ; G : प्रोक्तमूलदीर्घं 8 G : त्रिवेदकम् 9 A, B : वेदाङ्गं
10 A : स्याज्जङ्घोच्चारुद्रांशकम् ; B : जङ्घोच्चं रुद्रकांशकम् ; C : जङ्घोच्चं रुद्रबांशकम् ; F, G : जङ्घोच्चं रुद्रपांशकम्
11 A : पादं pour पाद
12 cf. *Aṃśumatkāśyapa* 56 9b-11a:
अङ्गुष्ठाग्रात्त पार्ष्ण्यन्तं तलं सप्तदशाङ्गुलम्। हिक्कासूत्रादधो बाहुदीर्घमृक्षाङ्गुलं भवेत्॥
कूर्परोच्चं द्विभागं स्यादेकविंशत्प्रकोष्ठकम्। सार्धत्रयोदशाङ्गुल्यं मध्यमाङ्गुलिसीमकम्॥
13 A, B : अङ्गुष्ठाग्रं तु 14 A : मात्रिकम् pour मात्रकम् 15 A, G : कोर्परोच्चं
16 cf. *Aṃśumatkāśyapa* 56, 11b-14a:
ततो वै मुखविस्तारं सार्धभान्वङ्गुलं भवेत्। मुखान्तस्य तु विस्तारं सार्धत्रयोदशाङ्गुलम्॥
ग्रीवाग्रं सार्धनन्दांशं ग्रीवामूलं दशाङ्गुलम्। हिक्काधो बाहुसीमान्तं चत्वारिंशच्छिवाधिकम्॥
सार्धद्वाविंशदंशं तु कक्षयोरन्तरे ततम्। नवांशं चतुर्यवोपेतं बाहुमूलविशालकम्॥
17 B : सार्धमध्यङ्गुलं 18 A : मुखं तस्य तु ; G : मुखान्तस्यातु

ग्रीवाग्रं[1] सार्धनन्दांशं[2] [3]ग्रीवामूलं दशांशकम् । [4]हिक्काधो बाहुपर्यन्तं चत्वारिंशद्व्याधिकम् ॥ २३ ॥
त्रयोविंशतिमात्रं स्यात्कक्षयोरन्तरं रुरो[5] । [6]सार्धनन्दाङ्गुलं प्रोक्तं बाहुमूल[7]विशालकम् ॥ २४ ॥
[8]स्तनदेशे तु विस्तारं त्रिःसप्तांशमुदाहृतम्[9] । [10]कटिंपार्श्वान्तविस्तारं त्रिःसप्ताङ्गुलमिष्यते ॥ २५ ॥
[11]ऊरूमूलविशालं तु मनुमात्रमुदाहृतम् । [12]भान्वङ्गुलमितं प्रोक्तमूरुमध्यविशालकम् ॥ २६ ॥
[13]धर्मांशं जानुविस्तारं जङ्घामूलविशालकम् । सार्धवस्वङ्गुलं प्रोक्तं [14]मध्यं सप्ताङ्गुलं भवेत् ॥ २७ ॥
[15]तयोर्मध्यविशालं तु नवमात्रमुदाहृतम्[16] । [17]नलकाविस्तृतं पश्चान्मात्रमित्यभिधीयते ॥ २८ ॥
[18]सार्धपञ्चाङ्गुलं [19]चैवं गुल्फाक्षस्य विशालकम् । [20]अक्षादातलतुङ्गं तु [21]सार्धवेदाङ्गुलं भवेत् ॥ २९ ॥
[22]पार्ष्णितारं च [23]तत्तुल्यं तलमध्यं षडङ्गुलम् । तलाग्रस्य तु विस्तारं सप्तमात्रमुदाहृतम् ॥ ३० ॥

---

[1] A, E, F, G : ग्रीवार्धं
[2] A, B : नन्दाङ्गं pour नन्दांशं
[3] A : ग्रीव pour ग्रीवा
[4] A : हिक्कां यो pour हिक्काधो
[5] A : गुरो pour रुरो , E, G : रुरोः
[6] A : साध्वि pour सार्ध ; B : सन्धि
[7] B : मूलं pour मूल
[8] C, F, G : स्तनदेशं तु
[9] cf. *Aṃśumatkāśyapa* 56, 14b: एकविंशतिभागं स्यात्स्तनदेशे तु विस्तरम् ।
[10] cf. *Aṃśumatkāśyapa* 56, 16b-17a:
कटेरग्रविशालं तु द्विर्नवाङ्गुलमुच्यते । तदधः कटिपार्श्वान्तं विस्तारः सार्धविंशतिः ॥
[11] cf. *Aṃśumatkāśyapa* 56, 17b-20:
पादोनमनुभागं तु ऊरुमूलविशालकम् । सपादद्वादशांशं तु ऊरुमध्ये विशालकम् ॥
पादोनधर्मभागं तु जानुव्याससमुदाहृतम् । सपादवसुभागं तु जङ्घामूलविशालकम् ॥
पादोनसप्तभागं तु जङ्घामध्यविशालकम् । तयोर्मध्यततं विप्र नवभागमुदाहृतम् ॥
पादोनपक्षभागं तु नलकाविस्तृतं भवेत् ।
[12] C, F : भागं भान्वङ्गुलं ; G : भद्रं भान्वङ्गुलं
[13] B : धनांशं
[14] A : मध्ये pour मध्यं ; C, C : मध्य
[15] F : तयोर्मध्ये विशालं तु
[16] C, F, G : उदाहरन् pour उदाहृतम्
[17] A : नलकाविहितं ; C, F : नलकापि हृतं
[18] cf. *Aṃśumatkāśyapa* 56, 21-23a:
त्रियवाधिकपञ्चांशं गुल्फाक्षव्यासमुच्यते । अक्षादातलतुङ्गं तु सार्धवेदाङ्गुलं भवेत् ॥
पार्ष्णितारं च तत्तुल्यं पार्ष्णेरुच्चं तदेव हि । तलमध्यं षडंशं स्याद्यवद्वयसमायुतम् ॥
तलाग्रविस्तृतं सप्तभागमित्यभिधीयते ॥
[19] A omet चैवं
[20] C : अक्षतातलतुङ्गं ; F: अक्षारतलतुङ्गं ; G : कक्षान्तरतलतुङ्गं
[21] C : सार्धं pour सार्ध
[22] A : पाष्ण pour पार्ष्णि ; C : पाष्णी
[23] A : तुल्यमध्यषडङ्गुलम् ; C : तुल्यमध्यष्टसालम् ; E : तुल्यमर्ध्यष्टसाङ्गुलम् ; F : तुल्यमध्यमष्टसंगुलम्

[1]द्वियवाधिक[2]वेदांशमङ्गुष्ठाय[3]ममुच्यते । [3]यवोपेतद्विमात्रं [4]तदङ्गुष्ठस्य विशालकम् ॥ ३१ ॥
[5]तद्व्यासार्धं [6]नखव्यासं [7]तत्त्रिपादार्धवर्तुलम् । पञ्चत्रिंशद्यवं प्रोक्तं पादे [8]तर्जनिदीर्घकम् ॥ ३२ ॥
[9]मध्यमायास्तु दीर्घं [10]स्यादेकत्रिंशतिकं यवम् । पञ्चविंशतियावं [11]स्यादनामिकायां तु दीर्घकम् ॥३३॥
[12]विंशद्यवं कनिष्ठायां नवसप्ताधं[13]सप्तषट् । यवव्यासमिति प्रोक्तं देशिन्यादि[14]क्रमाद्विदुः ॥ ३४ ॥
[15]तद्व्यासे तु त्रिपादं [16]स्यादङ्गुलाग्रोदयं विदुः । विस्तारसदृशोत्सेधं [17]नखदेशोदयं विदुः ॥ ३५ ॥
[18]बाहुमूलविशालं तु नवभागमुदाहृतम्[19] । सार्धं[20] वस्वङ्गुलं प्रोक्तं [21]मध्यं सप्त सपादकम् ॥ ३६ ॥

---

[1] cf. *Aṃśumatkāśyapa* 56, 23b-28:

द्वियवाधिकवेदांशं पादाङ्गुष्ठायतं भवेत् । यवोपेतद्वयांशं तु तस्य विस्तारमुच्यते ॥
तारार्धं नखविस्तारं पादोनायतवर्तुलम् । त्रियवोपेतवेदांशं तर्जन्यायाममुच्यते ॥
पादोनवेदभागं तु मध्याङ्गुल्यायतं भवेत् । यवोपेताग्निभागं तु अनामिकायाममिष्यते ॥
सार्धपक्षांशमानं तु कनिष्ठाङ्गुलिदीर्घकम् । देशिन्यादिक्रमात्तारं नवसप्तार्धसप्तषट् ॥
यवमानं स्वतारार्धं नखं पूर्वोक्तवद्विदुः । तत्तदङ्गुलिविस्तारं वेदांशं विभजेद्बुधः ॥
त्रिभागमङ्गुलाग्रोच्चं शेषं स्यात्तु नखोदयम् ।

[2] **A, B** : द्वियमाधिक ; **C** : द्वयमाधिक [3] **F** : अयोपेत pour यवोपेत

[4] **A** : तु pour तद् [5] **B** omet le *śloka* n° 32 [6] **A** : नव pour नख

[7] **A** : तत्तिपादाय pour तत्त्रिपादार्ध

[8] La forme grammaticale correcte est तर्जनीदीर्घकम् ; mais le mètre ne serait pas respecté.

[9] **A** : मध्यमायां तु [10] **B** : स्यादुत्सेधं विंशतिर्यवम्

[11] **B** : स्याद्दीर्घं चानिकास्यके ; **C** : स्यादनाकाशं तु दीर्घकम् ; **G** : स्यादनाकायां तु दीर्घकम् [12] **B** : विंशत्यावं

[13] **B** : अष्ट pour अर्ध [14] **B** : कमं pour क्रमाद् [15] **A** : तद्व्यासात्तु ; **B, C, G** : तद्व्यासं तु

[16] **G** : स्यादङ्गुलांशोदयं ;

[17] **A** : तवदेशोनरं विदुः ; **C** : नखदेशे नरं विदुः ; **G** : नवदेशे नरं विदुः

[18] cf. *Aṃśumatkāśyapa* 56, 29-32:

त्रियवाधिकवस्त्वंशं बाहुमध्यविशालकम् । सपादसप्तभागं तु कूर्परव्यासमुच्यते ॥
पादोनरसभागं तु प्रकोष्ठमध्यविस्तरम् । पादोनचतुरंशं तु मणिबन्धविशालकम् ॥
सप्तांशं तु तलायामं सार्धषण्मध्यमाङ्गुलम् । सपादभूतभागं स्यात्त्वनामिकायाममुच्यते ॥
यवाधिकं तु पञ्चांशं तर्जन्यायाममुच्यते । सपादवेदभागं तु कनिष्ठाङ्गुष्ठदैर्घ्यकम् ॥

[19] voir *supra śloka* n° 24b [20] **A** : सस्य pour सार्धं

[21] **A** : मध्यपादं सपादकम् ; **B** : मयपादं विपादकम् ; **C** : मध्यपादं स्वपादकम्

[1]कूर्परस्य [2]विशालं स्यात्पादोन[3]रसभागकम्[4]। प्रकोष्ठविस्तृतं[5] प्रोक्तं मध्यमे तु विशेषतः ॥ ३७ -
[6]चतुर्दशयवं प्रोक्तं मणिबन्धविशालकम्। सप्तमात्रं [7]तलायामं [8]सार्धषण्मध्यमायतम् ॥ ३८ ॥
चत्वारिंश[9]द्व्याधिक्य[10]यवमाना त्वनामिका। [11]तत्समे तु [12]यवोनं स्यात्तर्जन्यायाममुच्यते ॥ ३९ ॥
सपादवेद[13]भागं तु [14]दीर्घोऽङ्गुष्ठकनिष्ठयोः। [15]अङ्गुष्ठ[16]मूलविस्तारं [17]पादाधिकाङ्गुलं भवेत् ॥ ४० ॥
[18]अष्टौ यवास्तु तर्जन्यां [19]नवयावा तु मध्यमा। अनामिकाष्टयावा[20] स्यात्कनिष्ठा व्यासषडयवा[21]॥४१
[22]तत्तन्मूलं [23]द्विरष्टांशे त्वंशहीनाग्रविस्तरम्। अग्रव्यासे रसांशे तु भूतांशं [24]नखविस्तरम्[25] ॥ ४२ ॥

---

[1] A : क्रोर्परस्य [2] A : विशालस्य pour विशालं स्यात् [3] B, C, G : पादेन pour पादोन
[4] A : भागिकम् pour भागकम [5] B : विस्तरं pour विस्तृतं

[6] Le *Kāraṇāgama* I 11, 117a donne pour la largeur de *maṇibandha* quatre aṅgula (ou 32 yava), le *Dipta* 16, 91b donne 3 1/2 aṅgula plus 1 yava (soit 29 yava) l'*Ajita* [36, 87b 3 aṅgula plus 6 yava (soit 30 yava) et l'*Aṃśumatkāśyapa*, 56, 30b, 3 3/4 aṅgula (soit 30 yavas). Mais ici, les lectures de tous les manuscrits utilisés pour cette édition donnent une largeur de 14 yava, ce qui est très probablement une mauvaise leçon. Il vaudrait mieux lire चतुरंशं च पादोनं मणिबन्धविशालकम्.

cf. *Kāraṇāgama* I 11, 117a: मणिबन्धस्य विस्तारं भागमेकं प्रकीर्तितम्।

ibid 11, 63a: भागं स्याच्चतुरङ्गुलम् ; cf. *Diptāgama* I6, 91b: मणिबन्धस्य विस्तारं त्रिमात्रार्धं यवाधिकम्"

cf. *Ajitāgama* 36, 87b: मणिबन्धस्य विस्तारं त्रिमात्रं षडयवाधिकम्"

cf. *Aṃśumatkāśyapa* 56, 30b: पादेनचतुरंशं तु मणिबन्धविशालकम्"

[7] A : तिल pour तल [8] A : सार्धं pour सार्ध [9] G : यव pour द्वय
[10] B : यवमानमनामिका [11] G : तत्सर्वे तु [12] A : यवा न स्यात् pour यवोनं स्यात् ; C, G : यवानासां
[13] A, B : दर्भाङ्गं pour भागं तु [14] A, B : दीर्घाङ्गुष्ठचतुष्टयम्
[15] cf. *Aṃśumatkāśyapa* 56, 33-34
अङ्गुष्ठमूलविस्तारं सपादांशमुदाहृतम्। तर्जन्यष्टयवा ख्याता नवसंख्या तु मध्यमा ॥
अनामिका चाष्टयवा सप्तसंख्या कनीयसी। अङ्गुष्ठाद्यङ्गुलीनां तु मूलविस्तारमेव हि ॥
[16] B : पाद pour मूल [17] G : पादाधिक्य pour पादाधिक
[18] A : अष्टौ यवं तु ; B : अष्टयावं तु ; C : अष्टा यवं तु
[19] A : नवयावं तु मध्यमा ; B : मध्यमायां यवा नव ; C : नवा यवं तु मध्यमा
[20] A : अनामिकाष्टयावं स्यात् ; B : अनामिक्यामष्टयावा [21] B : कनिष्ठायां तु षडयवाः
[22] cf. *Aṃśumatkāśyapa* 56, 35-36:
तत्तन्मूलकलांशेऽशहीनमग्रविशालकम्। अग्रतार्रसांशे तु पञ्चांशं नखविस्तृतम् ।
पार्श्वयोर्मांसलं शेषं वृत्तायतं नखाकृति। सपादं नखतारं तु नखाय़ाममुदाहृतम् ॥
[23] A; B : त्रि pour द्वि [24] C : नव pour नख [25] A : विस्तरा pour विस्तरम

पार्श्वयोर्मांसलं[1] शेषं [2]वृत्तायता नखाकृतिः । नखव्यासे तु भूतांशे[3] रसांशं स्यान्नखायतम् ॥ ४३ ॥
[4]नखदीर्घद्वयं [5]चाग्रपर्वायाम[6]मुदाहृतम् । अङ्गुष्ठमूलपर्वस्य[7] [8]दीर्घं [9]सप्तदशं यवम् ॥ ४४ ॥
तर्जन्यास्त्वादिपर्वे[10] [11]चाप्यनाम्न्याश्च [12]द्वियङ्गुलम् ।[13]मध्याङ्गुल्यास्तु मूले तु दीर्घमष्टांशकं यवम् ॥४५
[14]कनिष्ठायास्तु मूले तु त्रयोदशयवायतम् । तयोस्तु शेषं [15]सर्वासां मध्यपर्वायतं भवेत् ॥ ४६ ॥
[16]अङ्गुष्ठस्तु द्विपर्वः [17]स्यादन्यास्सर्वास्त्रिपर्वकाः । [18]सार्धपञ्चांशकं [19]हस्ततलाग्रस्य विशालकम् ॥४७॥
[20]षडंशं मध्यविस्तारं सार्धषण्मूलविस्तृतम् । तर्जन्यङ्गुष्ठयोर्मूलान्तरं[21] [22]सार्धाग्निमात्रकम् ॥ ४८ ॥
[23]अङ्गुष्ठमूलमारभ्य मणिबन्धावसानकम् । [24]शुकदीर्घं तु [25]वेदांशं [26]द्व्यर्धांशं तु घनं भवेत् ॥ ४९ ॥

---

[1] C, G : मण्डलं pour मांसलं [2] A, G : वृत्तायानं ; C : वृत्ताधारं [3] B : भूतांशं
[4] cf. *Aṃśumatkāśyapa* 56, 37-40a:
नखायामद्वयं चाग्रपर्वदीर्घं प्रशस्यते । अङ्गुष्ठमूलपर्वस्य दीर्घं सप्तदशं यवम् ॥
तर्जनीमूलपर्वं तु अनामिकोच्चद्वयाङ्गुलम् । मध्यमामूलपर्वस्य दीर्घमष्टादशा यवाः ॥
कनिष्ठमूलपर्वस्य त्रयोदशयवाः स्मृताः । मूलाग्रपर्वयोर्मध्यदीर्घं मध्यस्थपर्वसु ॥
अङ्गुष्ठं तु द्विपर्वं स्याच्छेषास्त्रिपर्वसंयुताः ।
[5] B : चात्र pour चाग्र [6] A : पर्वयाम pour पर्वायाम ; C : पर्यायाम
[7] La forme grammaticale correcte est पर्वण: [8] A : दीर्घ pour दीर्घं [9] C : सप्तदशांशकम्
[10] Le forme grammaticale correcte est पर्वणि [11] C : चाप्यनाड्याश्च [12] A : द्वयङ्गुलम्
[13] A : मध्याङ्गुलस्य मूलं तु [14] A : कनिष्ठायां तु मूलं तु [15] A, B : सर्वेषां
[16] A : अङ्गुष्ठं तु द्विपर्वं [17] A : स्यादन्याः सर्वत्रिपर्वकम् ; B : स्यादन्याः सर्वे त्रिपर्वकम्
[18] cf. *Aṃśumatkāśyapa* 56, 40b-42a:
सार्धभूताङ्गुलं विप्र तलाग्रविपुलं भवेत् । रसांशं मध्यविस्तारं हस्तस्यैव तलस्य तु ॥
तलमूलविशालं तु सार्धषडभागमुच्यते । अङ्गुष्ठमूलमारभ्य तर्जनीमूलमात्रकम् ॥
सार्धं तु द्व्यङ्गुलं प्रोक्तम् ॥
[19] A : हस्तं pour हस्त [20] A : विडङ्ग pour षडंशं ; G, G : षडंश
[21] A : मूलान्तं pour मूलान्तरं ; B : मूलात्तं [22] G : स्यादग्नि pour सार्धाग्नि
[23] cf. *Aṃśumatkāśyapa* 56, 42-46a:
शुक्रोदरमथोच्यते ॥
अङ्गुष्ठमूलमारभ्य मणिबन्धावसानकम् । दीर्घं वेदाङ्गुलं प्रोक्तं द्व्यर्धांशं तु घनं भवेत् ॥
पार्ष्णिहस्तघनाग्न्यंशमग्रमङ्गुष्ठवत्क्षयम् । अङ्गुलीनामधस्तात्तु द्व्यर्धांशं मांसलं ततः ॥
द्विभागं पार्ष्णिहस्तस्थशुक्रोदरविशालकम् । शेषं मध्यतलं निम्नं भूतवेदाग्नि वा यवम् ॥
सूक्ष्मरेखां लिखेत्तस्मिञ्शङ्खं वा चक्रशूलवत् । पद्माभं वा कुशाभं वा तलरेखां प्रकल्पयेत् ॥
[24] A : शुक्र pour शुक ; G : शुक्रे [25] A : वेदांश pour वेदांशं ; C : वेदास्य
[26] A : द्व्यर्धांशं घनसंभवेत् ; C, G : शुक्रोदरविशालकम्

पार्ष्णिहस्तघनाग्र्यंशमग्रमङ्गुष्ठवत्क्षयम्[1] । [2]अङ्गुलीनामधस्तात्तु द्वयर्धाङ्गुलं च मांसलम् ॥ ५० ॥
[3]द्विभागं पार्ष्णि[4]हस्तस्थशुकोदरविशालकम् । शेषं मध्यतलं[5] निम्नं भूतवेदाग्नि [6]चायतम् ॥ ५१ ॥
सूक्ष्मरेखां [7]लिखेत्तस्मिञ्शङ्खं वा चक्रशूलवत्[8] । [9]पद्माभां [10]वा कुशाभां वा [11]तलरेखां प्रकल्पयेत्[12]॥
[13]भूताङ्गुलं भ्रुवायामं मध्यतारं यवद्वयम् । बालचन्द्राग्र[14]वत्क्षीणं [15]भ्रुवाग्रौ तु नताङ्गुलौ ॥ ५३ ॥

---

[1] A : अग्रमङ्गलवक्षयम् ; B : अग्रमङ्गुलमांसलम्

[2] B omet le demi-*śloka* n° 50b

[3] A : द्विताहं [4] A : हस्तस्य pour हस्तस्थ [5] B, C : तरं pour तलं

[6] A : वोयतम् ; E : माधमम् ; C, G : मायमम् [7] B : लिखेत्तत्र ; G : लिखेदस्मिन्

[8] A : शक्रावशकशूलवत् ; C, G : शाखा वा चक्रशूलवत् [9] G : वक्त्राभं

[10] A : वा कृशोभं वा ; B, G : वा कुशाभं वा [11] G : तलाश्रं वा

[12] Après le *śloka* 52 et avant 53a, il semble qu'il y ait une lacune, les mensurations au dessus des oreilles, tête, front etc. manquent. La méthode de description du *pratimā* dans ce *paṭala* semble le parallèle de la description trouvée dans le *paṭala* 56 de l'*Aṃśumatkāśyapa*. A ce titre nous donnons ci-dessous la partie correspondante de cet *āgama*. cf. *Aṃśumatkāśyapa* 56, 46b-53:

यवाष्टांशनतं निम्नं रेखाणां तु द्विजोत्तम । वृत्ताभेऽपेक्षिताङ्गेषु व्यासे पञ्चविभाजिते ॥
एकांशं तु परिग्राह्यं विस्तारं त्रिगुणान्वितम् । यत्तन्नाहमिति ख्यातं नाहतस्तारकल्पितम् ॥
कर्णोर्ध्वं शिरसो नाहं साष्टत्रिंशाङ्गुलं भवेत् । कर्णोर्ध्वं तु शिरस्तारं यवोनद्वादशाङ्गुलम् ॥
कर्णयोः पूर्वनालान्तं द्वात्रिंशदङ्गुलं भवेत् । कर्णयोः पृष्ठनाहं तु भान्वङ्गुलमुदाहृतम् ॥
तयोर्मध्यस्थभागं तु कर्णस्थितिरुदाहृतम् । शिरसो मध्यतो मूर्धमण्डलं चतुरङ्गुलम् ॥
तस्मात्तदग्रकेशान्तं नवाङ्गुलमुदाहृतम् । ततो वै मण्डलात्कर्णकेशान्तं च नवाङ्गुलम् ।।
मण्डलात्पृष्ठकेशान्तं सार्धमध्याङ्गुलं भवेत् । ललाटे तु तिरश्चीनं नवाङ्गुलमुदाहृतम् ॥
केशान्तादक्षिसूत्रस्य द्वयोर्मध्ये भ्रुवोः स्थितिः ।

[13] cf. *Aṃśumatkāśyapa* 56, 54-64:

भ्रुवाग्रौ तून्नतौ चैव चापाकारं यथा कुरु । द्वयन्तरं तु भ्रुवोर्विप्र सार्धवेदयवं भवेत् ॥
पञ्चाङ्गुलं भ्रुवायामं मध्यतारं यवद्वयम् । बालचन्द्राग्रवत्क्षीणं भ्रुवाग्रौ तस्य मध्यमम् ॥
कनीनिकायामविस्तारं यवमानमुदाहृतम् । कृष्णमण्डलविस्तारं चोत्सेधं षडयवं भवेत् ॥
सितांशं तत्समव्यासं कृष्णमण्डलपार्श्वयोः । शफराकृतिकं वापि धनुराकृतिमेव वा ॥
अर्धचन्द्राकृतिं वाथ नेत्राकारं प्रकल्पयेत् । तदाकारानुकूलोच्चं सितमण्डलयोर्द्विज ॥
नेत्रान्तेऽर्धयवं रक्तं मण्डलं तु सितांशके । कृष्णमण्डलमध्ये तु ज्योतिर्मण्डलकं यवम् ॥
तदष्टांशैकभागं तु तन्मध्ये दृष्टिमण्डलम् । साधांशयवमानं तु ऊर्ध्ववर्मततं भवेत् ॥
अधोवर्म च तत्तुल्यं दीर्घमष्टादशं यवम् । नेत्रयोरन्तरं विप्र सपादद्वयङ्गुलं भवेत् ॥
ऊर्ध्ववर्मभ्रुवोरन्तः सार्धषट्कयवं भवेत् । अधोवर्मस्थितिर्विप्र नेत्रसूत्रे विधीयते ॥
कर्तृनाशमधोदृष्टिरूर्ध्वदृष्टिर्विपत्करी । बन्धुनाशो भवेत्पार्श्वदृष्टिश्चेद्ग्रामवासिनाम् ॥
तस्मात्सर्वप्रयत्नेन सममेव निरीक्षणम् । नेत्रमेवं समाख्यातम् ”

[14] A, B : अर्क pour अग्र [15] A, B : भ्रुवाग्रौ तु हुताङ्गुलम् ; C : भ्रुवाग्रौ हुनताङ्गुलम् ; G : भ्रुवाग्रौ तु तनाङ्गुलम्

[1]यवं कनीनिकायामं विस्तारं चैव तत्सममं । [2]असितमण्डलव्यासमुत्सेधं चापि [3]षडयवम् ॥ ५४ ॥
अर्धचन्द्राकृतिं कुर्यान्नेत्राकारं[4] विशेषतः । नेत्रान्ते द्वियवं रक्तं [5]मण्डलं तु सितांशके[6] ॥ ५५ ॥
[7]कृष्णमण्डलमध्ये तु ज्योतिर्मण्डलकं [8]यवम् । [9]ज्योतिर्मण्डलकाष्टांशं [10]मध्ये तु दृष्टिमण्डलम् ॥
[11]अत्यर्धयवमानं[12] तु [13]ह्यूर्ध्ववर्मविशालकम् । अधोवर्म च तत्तुल्यं दीर्घमष्टादशा यवाः ॥ ५७ ॥
नेत्रयोरन्तरं चैव ह्यष्टादशयवं भवेत् । ऊर्ध्ववर्मभ्रुवोरन्तः[14] सार्धषडयवमुच्यते ॥ ५८ ॥
[15]अधोवर्मस्थितिं[16] [17]विद्यान्नेत्रसूत्रे विशेषतः । [18]समदृष्टिस्तु कर्तव्या[19] चान्यथा तु न कारयेत् ॥ ५९
[20]अधोर्ध्वपार्श्वयोर्दृष्टिः कर्तृनाशविपत्करी । बन्धुनाशस्तथा[21] ग्रामनाशः स्यात्तु यथाक्रमम् ॥ ६० ॥
[22]नासिकापुट[23]बाह्यं तु तारं स्यात्तु यथाक्रमम् । [24]यवं मध्यविशालं तु वेशमूलं तदर्धकम् ॥ ६१ ॥
[25]गोजीमूलात्तु [26]नासाग्रतुङ्गः स्यात्तु [27]कला यवाः । [28]तदूर्ध्वं नासिकाग्रस्य तारं नव यवास्तथा ॥ ६२
[29]नासिकायाः [30]पुटे [31]निम्न[32]सन्धिर्योमयवं भवेत् । द्वारयोर्वसतौ[33] तिर्यक् [34]प्रतिसंध्योर्ऋषियवम् ॥ ६३

---

[1] A : यवके निनिकायामविस्तारं ; B : यवके तिनिकायामविस्तारं ; G : यवकेन निकायामं विस्तारं

[2] A, B : असितं मण्डपव्यासम् ; C : असितं मण्टपव्यासम् [3] B : षड्द्वयम्

[4] B : आकार pour आकारं [5] G : मण्डलौ [6] B, C : सितांशकम्

[7] B : कृष्णं pour कृष्ण [8] C : वयम् [9] A : ज्योतिर्मण्डलकोऽष्टांशं

[10] B : मध्यमे pour मध्ये तु

[11] A : अत्यर्धं pour अत्यर्धं ; B : अत्यर्थं ; C : अर्धर्धं [12] C : यमसानं pour यवमानं ; G : यमसाने

[13] A : ऊर्ध्वं pour ह्यूर्ध्व [14] A, B : भवोरक्तं ; C, G : भुवो रक्तं [15] C : अथो pour अधो

[16] B, C, G : स्थितिः pour स्थितिं [17] G : गम्या नेत्रं pour विद्यान्नेत्र [18] G : समुद्रतस्तु

[19] A, G : कर्तव्यं

[20] La forme grammaticale correcte est अध ऊर्ध्वपार्श्वयोर्दृष्टिः ; mais le mètre ne serait pas respecté.

[21] A : दशा pour तथा

[22] cf. *Aṃśumatkāśyapa* 56, 65-69:

नासिकापुटबाह्ये तु तारमष्टादशं यवम् । तदर्धं मध्यविस्तारं तस्यार्धं मूलविस्तृतम् ॥
द्वारस्यान्तर्गतं व्यासं सार्धसप्तयवं भवेत् । पुटतारं पञ्चयवं पुटं निष्पावबीजवत् ॥
तिलपुष्पवदाकारं नासिकाकारमेव हि । एकांशं नासिकोत्सेधं तद्घनं तु यवं भवेत् ॥
पुटयोर्मध्यभित्तिस्तु पुष्करं चेति कथ्यते । सार्धवेदयवं गोजीदीर्घं तस्यार्धविस्तृतम् ॥
ऊर्ध्वोष्ठस्योर्ध्वनिम्नं तु गोजिनाम्ना प्रकीर्तितम् । यवमाननतं गोजि तदूर्ध्वे नासिकास्थितिः ॥

[23] A, B : अम्बुद pour पुट ; C : अर्बुद [24] A : यव pour यवं

[25] B : गोजीमूलं तु ; C : गोजिमूलं तु [26] B : नासाग्रं तुङ्गं ; C : नासाग्रं तुङ्गः [27] C : कलां यवाः

[28] E, G : ततोर्ध्वं [29] A : रसासिकायाः [30] A : पुण्ट्रे pour पुटे ; C, G : स्फुटे

[31] C : नित्यं pour निम्न [32] A, C : सांध्री pour सन्धि ; B : सान्ध्री

[33] A : वसतं pour वसतौ ; B : वसतिं [34] A, B : प्रतिसान्ध्रि pour प्रतिसंध्योः

तदुच्चं [1]भूतयावं स्यात्पुटं[2] निष्पावबीजवत्। मूर्तिर्यवं पुष्करोच्चं पुष्करस्य घनं यवम्॥ ६४॥
[3]अर्धद्वियवमानं तु [4]पुटनासाग्रनिर्गतिः। [5]सार्धवेदयवं गोजीदीर्घं तस्यार्धविस्तृतम्[6]॥ ६५॥
नतं स्याद्यवमात्रं तु [7]ह्यधस्तात्पुष्करस्य तु। [8]चतुस्त्रिंशद्यवायाममास्यस्य तु विशेषतः॥ ६६॥
उत्तरोष्ठायतं [9]चास्य[10]दीर्घतुल्यमुदाहृतम्। उत्तरोष्ठस्य मध्ये तु [11]तारं सार्धयवत्रिकम्[12]॥ ६७॥
[13]आनुपूर्व्या कृशं तारमास्यसीमावसानकम्। [14]ऊर्ध्वोपरि च पाल्यास्तु घनं [15]व्योमयवं भवेत्॥६८॥
[16]त्रिवक्रोपनता पाली [17]तदोष्ठ[18]सदृशायता। अधरोष्ठायतं[19] विद्यादष्टादश यवाः स्मृताः॥ ६९॥
तस्य [20]मध्यविशालं तु सयवैकाङ्गुलं भवेत्। [21]चिबुकात्तु[22] हनोर्वेशं [23]सार्धयावं शिवाङ्गुलम्॥ ७०॥

---

[1] A : वृत pour भूत ; B : कृत [2] A, B : स्फुटं pour पुटं

[3] A : अर्धद्वयं च मानं तु [4] A : पुटं pour पुट [5] A : सार्धं pour सार्ध

[6] Le manuscrit B omet la portion entre le premier *pāda* du *śloka* 65b et le second *pāda* du *śloka* 67a et lit: सार्धवेदयवं गोजीदीर्घं तुल्यमुदाहृतम् [7] A : अधः स्यात् pour ह्यधस्तात्

[8] cf. *Aṃśumatkāśyapa* 56, 70–75a:

सपादचतुरंशं तु आस्यदीर्घं तिर्यग्विदुः। उत्तरोष्ठायतं चास्यदीर्घतुल्यमुदाहृतम्॥
उत्तरोष्ठस्य मध्ये तु तारं सार्धत्रयं यवम्। आनुपूर्व्या कृशं तारमास्यसीमावसानकम्॥
यवमानघना पाली उत्तरोष्ठस्य चोपरि। त्रिवक्रा चोत्तरा पाली तदोष्ठसदृशायता॥
अष्टादशयवाः प्रोक्ता अधरोष्ठस्य दीर्घकम्। यवाधिकाङ्गुलं तस्य विस्तारं द्विजसत्तम॥
अधरपालिकासार्धयवमानमथोच्यते। चिबुकादधरोच्चं तु सार्धषडयवमुच्यते॥
किंचित्प्रहसिताकारमास्यं युक्त्या तु कारयेत्॥

[9] B : चास्यं pour चास्य [10] A : दीर्घं pour दीर्घ [11] G : ताराः सार्धं

[12] C, G : त्रयम् pour त्रिकम् [13] B : अनुपूर्वात्कमं तारं

[14] B : ऊर्ध्वोपरि वयेत्यं तु ; C : ऊर्ध्वे च परिपालस्तु ; E : ऊर्ध्वे च परिपाल्यस्तु ; G : ऊर्ध्वोपरि वल्यास्तु

[15] A : व्योममयं ; G : सोममयीं [16] A : त्रिवक्त्रा घनता पालि ; B : त्रिवक्त्रघनता वालि

[17] A : ततोष्ठ pour तदोष्ठ ; B : तथाष्ट ; C : ततेषु ; G : तत्तेषु [18] G : सदृशायते pour सदृशायता

[19] A : अधरोष्ठधरं ; C, G : अधरोष्ठतरं [20] C : मध्ये pour मध्य

[21] cf. *Aṃśumatkāśyapa* 56, 75b-78a:

अधराच्चिबुकालम्बं सार्धपक्षाङ्गुलं भवेत्। चिबुकात्तु हनोर्वेशं सार्धाष्टियवमुच्यते॥
सार्धद्वयङ्गुलकं तस्य तारमायतवृत्तवत्। हनोः संध्याः कर्णबन्धान्तं त्वन्तरं द्वादशाङ्गुलम्॥
हनोर्बाह्यं समारभ्य पादोनयुगमात्रकम्। कर्णवेशमिति ख्यातम्"

[22] A : चिबुकं तु ; B, C : चिबुकां तु ; C : विप्रकान्तु [23] C : सार्धं यावं

[1]अत्यर्धगुणमात्रं तु [2]तारमायतवृत्तवत् । कर्णबन्धाद्धनोःसंधेरन्तरं[3] तु दशाङ्गुलम् ॥ ७१ ॥
[4]हनोर्बाह्यं[5] समारभ्य [6]कर्णं द्वाविंशतिर्यवाः[7] । [8]अक्ष्यन्ताच्छ्रोत्रबन्धान्तं[9] सप्तभागमुदाहृतम्॥
[10]अष्टादशयवं प्रोक्तं श्रोत्रस्य तु विशालकम् । नेत्रसूत्रोपरि श्रोत्रतुङ्गश्चाष्टादशा यवाः[11] ॥ ७३ ॥
[12]ऊर्ध्वबन्धात्तु तस्यार्धं [13]मध्यं वृत्तं तु मूर्धतः । नेत्रसूत्रादधः [14]कर्णबन्धं स्यादङ्गुलद्वयम् ॥ ७४ ॥
[15]सयवं [16]सार्धवेदांशं [17]नालस्योल्लङ्घनं भवेत् । पूर्वं[18]नालविशालांशं सार्धमात्रापरं[19] विदुः ॥ ७५ ॥
तयोरर्धाङ्गुलं नीत्रं त्रिपादं [20]नालकान्तरम् । नालान्तरायतं ख्यातं [21]चतुर्मात्रं रुरो विदुः ॥ ७६ ॥
[22]श्रोत्रोदयमशेषं[23] तु [24]यवहीनं [25]नवाङ्गुलम् । पिप्पलीघनमर्धांशं[26] द्विगुणं [27]हि तदायतम् ॥ ७७ ॥

---

[1] B. अत्यर्थगुण ; C : अध्यर्धगुण ; G : आस्यत्रिगुण [2] A : ताल pour तार
[3] B : उदरं pour अन्तरं [4] C et F omettent le *śloka* n° 72
[5] A : अनोबाह्यं ; B : अन्नबाह्यं [6] A : कर्ण pour कर्णे [7] A : यवम् pour यवाः
[8] cf. *Aṃśumatkāśyapa* 56, 78-80:
"ततः कर्णं वदामि ते
नेत्रान्तात्कर्णबाह्यान्तं द्वयन्तरं सप्तमात्रकम् । कर्णस्य तु विशालं तु अष्टादश यवाः स्मृताः ॥
अक्षिसूत्रोर्ध्वतः कर्णतुङ्गं चाष्टादशं यवम् । तदर्धं चोर्ध्वबन्धात्तु शेषं वृत्तं तु मूर्धतः ॥
नेत्रसूत्रादधः कर्णबन्धं सप्तदशा यवाः ।
[9] B : अक्षन्त्याच्छ्रोत्रबन्धान्तं ; G : पक्ष्मान्ताच्छ्रोत्रबन्धान्तं
[10] C omet les *śloka* n° 73 et 74
[11] A : अष्ट यवाथवा pour अष्टादशा यवाः ; B : अष्ट यवायतम् ; G : अष्टादशं यवम्
[12] A : ऊर्ध्ववर्धं तु ; B : ऊर्ध्वादर्धं तु ; E, G : ऊर्ध्वबन्धं तु
[13] A : अर्धं विविधमूर्ध्वतः ; B : मध्यं विविधमूर्ध्नतः ; G ; मध्यमं विप्रमूर्ध्वतः
[14] E, G : कण्ठ pour कर्ण
[15] cf. *Aṃśumatkāśyapa* 56, 81-82:
सार्धवेदाङ्गुलं तस्मात्तस्य नालं प्रलम्बयेत् । पूर्वनालततं व्योमभागं सार्धांशकं परम् ॥
नालयोर्व्यासमाख्यातं घनमर्धाङ्गुलं तयोः । नालान्तरं त्रिपादं च वेदांशं विस्तृतायतम् ॥
[16] C : सर्व pour सार्ध [17] A : नालस्यालङ्घनं भवेत् [18] B : नाडी pour नाल
[19] A : सार्धमत्रापरे ; B : सार्धमत्रापरो [20] A : नालयोत्तरम्
[21] C : छत्र pour चतुर् ; E : चित्र
[22] cf. *Aṃśumatkāśyapa* 56, 83-87a:
कर्णतुङ्गमशेषं तु यवैकोननवाङ्गुलम् । पिप्पलीघनमर्धांशं द्विगुणं हि तदायतम् ॥
उत्सेधं सार्धमात्रं स्यान्मूलादग्रं क्षयानुगम् । द्विभागं पिञ्चुषीदीर्घं द्वियवार्धांशविस्तृतम् ॥
अक्षसूत्रादधः कर्णद्वारमर्धाङ्गुलं भवेत् । कर्णद्वारततं निम्नं सममेव हि वर्तुलम् ॥
कर्णपालीघनं सार्धयवं नीत्रं चतुर्यवम् । पृष्ठकर्णस्य विस्तारमध्यर्धाङ्गुलमुदाहृतम् ॥
केशान्तात्पृष्ठकर्णान्तु द्वयन्तरार्धयर्धमात्रकम् ॥
[23] A : स्तोत्रोदयमशेषं ; B : स्तोत्रादयमशेषं [24] G : नव pour यव [25] B : यव pour नव
A : अर्धांश pour अर्धांशं [27] A : हितदायकम् ; G : हीनं तदायतम्

[1]तुङ्गं चतुर्यवं [2]ख्यातं मूलादग्रं क्रमात्कृशम्[3]। [4]पिञ्चूषीदीर्घमक्षांशमध्यर्धांशविशालकम्॥ ७८॥
[5]नेत्रसूत्रादधः कर्णद्वारमर्धाङ्गुलं भवेत्। तत्तुल्यं निम्नमाख्यातं [6]समवृत्तं प्रकल्पयेत्॥ ७९॥
[7]कर्णपालीघनं सार्धं [8]यवं नीव्रं चतुर्यवम्। [9]पृष्ठकर्णस्य[10] [11]विस्तारमध्यर्धाङ्गुलमुच्यते॥ ८०॥
[12]केशान्तात्पृष्ठकर्णान्तु[13] द्व्यन्तरं सार्धमात्रकम्। [14]पृष्ठ[15]केशावसाने तु [16]कृकाट्यर्धांशकोन्नता॥८१
[17]तदधः पृष्ठग्रीवोच्चं [18]युगांशं च यवत्रयम्। सवेदयवधर्मांशं [19]ग्रीवामूलविशालकम्॥ ८२॥
अग्रव्यासं प्रवेशांशं मूलादग्रं क्रमात्कृशम्। [20]हिक्कोर्ध्वे स्कन्धसन्ध्युच्चं[21] युगाङ्गुलमुदाहृतम्॥ ८३॥
कर्णबन्धादधस्तात्तु [22]सार्धमृत्वङ्गुलं भवेत्। स्कन्धसन्ध्यास्तु [23] सीमास्यात्सप्ताङ्गुलघनं भवेत्॥८४॥
[24]हिक्कान्तं स्कन्धसन्ध्यग्रान्क्रमेण कृशतां नयेत्। दशाङ्गुलं [25]ककुन्मानं [26]पृष्ठग्रीवादधो बुधः॥८५॥

---

[1] **A** : तुङ्गः pour तुङ्गं [2] B : यातं pour ख्यातं [3] **C** : कुशः pour कृशम्
[4] **B** : पिञ्चुली pour पिञ्चूषी ; C : पञ्चर्षी ; G : पञ्चषड् [5] A : नेत्रसूत्रादयः ; C : नेत्रसूत्रनयं
[6] E : सद्यवृत्तं [7] C, G : कण्ठ pour कर्ण [8] A : यवनीव्रं च तद्यवम्
[9] A : घृष्ट pour पृष्ठ ; B : धृष्ट [10] E, G : कण्ठस्य pour कर्णस्य
[11] A, B : विस्तारं मध्यस्याङ्गुलमुच्यते
[12] B: केशान्तान् pour केशान्तात् [13] C, G : कण्ठात्तु pour कर्णात्तु
[14] cf. *Aṃśumatkāśyapa* 56, 87b-89:
पृष्ठकेशावसाने तु कृकाट्यर्धांशमुन्नतम्। तस्याधः पृष्ठग्रीवोच्चं युगांशं त्रियवाधिकम्॥
कृकाटिकादधः पृष्ठग्रीवाग्रं तु नवाङ्गुलम्। पृष्ठग्रीवस्य मूलस्य तारं सार्धदशाङ्गुलम्॥
मूलादग्रं क्रमात्क्षीणं ग्रीवं वृत्ताभमुच्यते।
[15] **A** : वृष pour पृष्ठ [16] A, B : कृतावर्धांशकं नवम् [17] **A** : तदसो परवो घच्चं ; G : तदधो परयोरुच्चं
[18] A, B : युगांशं यवमात्रकम् [19] A : ग्रीव pour ग्रीवा ; E : श्रीमन्
[20] cf. *Aṃśumatkāśyapa* 56, 90-91:
हिक्कासूत्रोपरि स्कन्धसंधितुङ्गं युगाङ्गुलम्। कर्णबन्धादधः सार्धं षण्मात्रं स्कन्धसीमकम्॥
सप्ताङ्गुलघनं स्कन्धं हिक्कावधिक्रमात्क्षयम्। पृष्ठग्रीवादधस्तात्तु ककुन्मानं दशाङ्गुलम्॥
[21] A : सन्धच्यं pour सन्ध्युच्चं ; **B** : सधच्यां ; **C** : सज्यश्च ; E : सन्ध्यश्च
[22] B, E, G : सार्धं pour सार्धम् [23] B : सन्धिस्तु pour सन्ध्यास्तु
[24] A : हिक्कान्तात् pour हिक्कान्तं ; C, G : हिक्कान्तान्
[25] **A** : तु तन्मानं ; **C** : ककुन्मानं ; **G** : कण्ठमानं [26] A : प्रति pour पृष्ठ

[1]तस्मादाकटिसन्ध्यन्तं[2] [3]वंशमृक्षांशमायतम्। [4]वंशस्य नतविस्तारमर्धमक्षाङ्गुलं भवेत्॥ ८६॥
[5]तदधो वंशमूलं तु चतुर्थाङ्गुलमुदाहृतम्। अष्टाविंशतिमात्रं तु कक्षान्तरविशालकम्॥ ८७॥
[6]तदधस्त्वंसफलकं सप्ताङ्गुलमुदाहृतम्। [7]तदुच्चमुपरिष्टाच्च सप्तांशं बाहुसीमकम्[8]॥ ८८॥
[9]सप्तदशाङ्गुलं प्रोक्तं [10]मध्यकायविशालकम्। एकविंशतिमात्रं स्यान्नाभिसूत्रस्य मानकम्[11]॥ ८९॥
कटिसन्धौ[12] तु विस्तारमेकोनविंशदङ्गुलम्। स्फिक्पिण्डं प्रति विस्तारं दशमात्रमुदाहृतम्॥ ९०॥
[13]तौ सुवृत्तौ प्रकर्तव्यौ [14]चतुर्यवं तदन्तरम्। कक्षाग्रे तु विशालं तु[15] सप्तभागमिति स्मृतम्॥ ९१॥
[16]सार्धभागं तु विस्तारं [17]स्तनसूत्रे तु विस्तृतम्। सार्धद्वादशमात्रं तु मध्यपार्श्वविशालकम्॥ ९२॥
[18]श्रोण्यास्तु मध्यविस्तारं सार्धसप्ताङ्गुलं भवेत्। उरो तत्रैव श्रोण्युच्चं सप्तभागमुदाहृतम्॥ ९३॥

---

[1] cf. *Aṃśumatkāśyapa* 56, 92-95a:
तस्मादाकटिसंध्यन्तं वंशमृक्षांशमायतम्। तद्वंशनतविस्तारं सार्धषोडशकं यवम्॥
वंशमानादधस्तात्तु वंशमूलं गुणाङ्गुलम्। अपरे तुङ्गमेवं स्यात्तस्मिन्व्यासं वदामि ते॥
सार्धऋक्षाङ्गुलं प्रोक्तं कक्षयोरन्तरं द्विज। कक्षाधस्त्वंसफलकातुङ्गं सप्ताङ्गुलं भवेत्॥
कक्षोर्ध्वं बाहुसीमान्तं सप्ताङ्गुलमुदाहृतम्।

[2] A, B : तस्मात्कृतकसम्ध्यन्तं ; G : तस्मात्तु करसन्ध्यन्तं

[3] A : वंशमाक्षान्तमायतम् ; G : वंशमक्षान्तमायतम्

[4] C : वंशस्यानत pour वंशस्य नत

[5] B : तदर्धं pour तदधो

[6] A : तदयस्त्वंशपंक्तोच्चं ; B : तदधस्त्वंशपङ्क्तोच्चं

[7] A : तमुच्चम् pour तदुच्चम्

[8] C, G : सीमगम् pour सीमकम्

[9] cf. *Aṃśumatkāśyapa* 56, 95b-99:
सार्धषोडशमात्रं तु मध्यव्यासमुदाहृतम्। नाभिसूत्रे तु विस्तारं सार्धविंशाङ्गुलं भवेत्॥
कटिसंधौ तु विस्तारं त्रिषडंशमुदाहृतम्। पादोनधर्मभागं तु स्फिक्पिण्डं प्रति विस्तृतम्॥
सुवृत्तौ तौ समाख्यातौ तयोर्मध्ये चतुर्यवम्। अपरे तारमेवोक्तं पार्श्वव्यासमथोच्यते॥
कक्षस्याग्रविशालं तु सप्तमात्रमुदाहृतम्। सपादषोडशमात्रं स्यात्स्तनसूत्रे तु विस्तृतम्॥
सवेदद्वादशांशं तु मध्यपार्श्वघनं भवेत्।

[10] G : अर्धं pour मध्य

[11] A : सूत्रकमेतकम् pour सूत्रस्य मानकम् ; B : सूत्रस्य मेतकम्

[12] C : बन्धौ pour सन्धौ

[13] A : तो सुवृत्ते ; C : ते तु वृत्ते ; E : ते सुवृत्तौ

[14] C : चतुर्यांशं ततोन्नतः ; E : चतुर्थांशं तथोन्नतम् ; G : चतुर्यवं तथोन्नतम्

[15] B : च pour तु

[16] Une meilleure lecture semble être : सार्धषोडशमात्रं तु

[17] A, B : स्तनसूत्रेऽतिविस्तृतम्

[18] cf. *Aṃśumatkāśyapa* 56, 100-103:
श्रोणीमध्यघनं पार्श्वे सप्तदशाङ्गुलं भवेत्। ततः श्रोण्युदयं विप्र सप्तमात्रमुदाहृतम्।
नाभिसूत्रादधश्चोर्ध्वे चतुर्थं त्र्यङ्गुलं हि तत्। श्रोण्यधस्तात्कटेरुच्चं सार्धभूताङ्गुलं भवेत्॥
तत्कटेस्तु घनं धीमान्सार्धभान्वङ्गुलं भवेत्। स्फिक्पिण्डं चोरुमूलात्तु नीत्वं सार्धयुगाङ्गुलम्॥
तत्पिण्डालम्बनं चार्धसूत्रादधो युगाङ्गुलम्। कक्षाग्राधरनिम्नं तु सार्धद्व्यङ्गुलकं भवेत्॥

भान्वंशं [1]श्रोणिविस्तारं नाभिसूत्रादधोर्ध्वकम्[2] । कटेरुच्चं तु [3]श्रोण्याधः षण्मात्रं पादहीनकम् ॥९४।
तत्कटेस्तु घनं तत्र [4]सार्धभान्वङ्गुलं भवेत् । स्फिक्पिण्डं चोरुमूलात्तु[5] नीत्वं भूतांशमङ्गुलम्[6] ॥ ९५॥
[7]स्फिक्पिण्डालम्बनं [8]चार्धसूत्राधो वेदमात्रकम् । [9]कक्षाग्राधरनिम्नं तु पादहीनाङ्घ्रिमात्रकम् ॥ ९६ ॥
[10]सुवृत्तं[11] ग्रीवमाख्यातं[12] रेखाद्विपरिवेष्टितम्[13] । [14]कण्ठमूले [15]पुरो [16]निम्नतारोच्चं च चतुर्यवम् ॥
[17]हिक्कायास्त्वक्षमात्रं तु [18]जत्रुसूत्रमुदाहृतम् । हिक्कामध्यात्तु कक्षान्तं द्वादशाङ्गुलमिष्यते ॥ ९८ ॥
[19]हिक्कायाः स्तनसूत्रान्तं स्तनयोरन्तरं समम् । हृदयस्तनयोरन्तर्निम्नं भानुयवं भवेत् ॥ ९९ ॥
[20]कण्ठ[21]मूले च[22] निम्नं तु चतुर्यवमुदाहृतम् । अध्यर्धायामकं [23]तिर्यक् कल्पयेत्त [24]त्रिपुण्डवत्॥१००
[25]कण्ठमूले नतं हिक्कासूत्राधस्तात्प्रकल्पयेत् । हिक्कासूत्रोपरिष्टात्तु नीलपुण्ड्रं प्रकल्पयेत्[26] ॥१०१॥

---

[1] A : स्तोत्र pour श्रोणि

[2] La forme grammaticale correcte est अध ऊर्ध्वकम्

[3] La forme grammaticale correcte est श्रोण्या अधः ou श्रोण्यधः

[4] A : सार्धं भान्वङ्गुलं ; B : सार्धतन्त्वङ्गुलं [5] A, B : मूलं तु pour मूलात्तु

[6] A : अङ्घ्रिभा pour अङ्गुलम् B : अङ्घ्रिमा ; C : अग्रभा [7] B : स्फिक्पिण्डलम्बनं

[8] A : चार्धं सूत्रतो चेतमात्रकम् ; B, C : चार्धं सूत्राधो चेतमात्रकम्

[9] A : कक्षाग्रधर pour कक्षाग्राधर ; B : कक्षाग्रेधार

[10] cf. *Aṃśumatkāśyapa* 56, 104-106:
ग्रीवासुवृत्तनाहे तु रेखाद्विपरिवेष्टितम् । कर्ण[कण्ठ?] मूले नतं तारं तुङ्गं चैव चतुर्यवम् ॥
हिक्कायास्त्वक्षमात्रं तु जत्रुसूत्रमुदाहृतम् । हिक्कामध्यात्तु कक्षान्तं भान्वंशात्पादहीनकम् ॥
हिक्कादास्तनसूत्रान्तं स्तनान्तरसमं भवेत् । हृदयस्तनयोर्मध्ये निम्नमध्यर्धमात्रकम् ॥

[11] C : सुवर्तं ; G : सवृतं [12] A : आख्याग्रे pour आख्यातं

[13] A, B : रेखाग्रौ परिवेष्टितौ ; C, G : रेखा द्वौ परिवेष्टितम् [14] A, B : कर्ण pour कण्ठ

[15] A : पुरे pour पुरो [16] A : निम्नो तारोच्चं ; B : निम्न तरोच्चं ; C : निम्ने तारोपं

[17] Le ms B omet la portion entre le premier *pāda* du *śloka* 98a et le second *pāda* du *śloka* 98b et lit : हिक्कायास्त्वक्षमात्रं तु द्वादशाङ्गुलमिष्यते

[18] A : जर pour जत्रु [19] A : हिक्काधनसूत्रान्तं ; B : हिक्का तु घनसूत्रान्तं

[20] cf. *Aṃśumatkāśyapa* 56, 107-108:
नीलं [निम्नं?] वै कण्ठमूले तु यवत्रयमुदाहृतम् । अध्यर्धायामसंयुक्तं कल्पयेत्तु त्रिपुण्ड्रवत् ॥
कण्ठमूले नतं हिक्कासूत्राधस्तात्प्रकल्पयेत् । हिक्कासूत्रोपरिष्टात्तु नीलवर्णं प्रकल्पयेत् ॥

[21] A, B : कर्ण pour कण्ठ [22] B : तु pour च [23] A, B : तिर्य्यं ; C, G : नित्यं

[24] A, B : त्रिपुण्ड्रकम् [25] A et B omettent कण्ठ

[26] L'*Aṃśumatkāśyapa* qui donne des mensurations à peu près identiques ajoute après ce *śloka* un *śloka* et demi décrivant les seins (stana) dont la description manque ici.
cf. *Aṃśumatkāśyapa* 56, 109-110a:
हृदयस्तनपीठोच्चं द्व्यङ्गुलं समुदाहृतम् । सप्तदशयवं ख्यातं स्तनमण्डलविस्तृतम् ॥
तन्मध्ये चुचूकोच्चं तु व्यासं चैव यवद्वयम् ।

[1]नाभेर्निम्नं च[2] विस्तारं समं रुद्रयवं भवेत् । नाभिर्वै दक्षिणावर्तो मूलव्यासं यवद्वयम् ॥ १०२ ॥
नाभेरवटमध्यस्थं नाभिसूत्रं रुरो विदुः । [3]श्रोण्युच्चं नाभ्यधस्तात्तु सार्धभूताङ्गुलं भवेत् ॥ १०३ ॥
तदधस्तात्कटिः श्रोणी[4] [5]सार्धवह्नयङ्गुलं भवेत् । [6]तस्मादुदरं मेढ्रं च मेढ्रपीठं युगाङ्गुलम् ॥१०४॥
यवद्वयसमायुक्तं भूतांशं लिङ्गदीर्घकम् । [7]सपादाक्षाङ्गुलं लिङ्गमूलव्यासमुदाहृतम् ॥ १०५ ॥
[8]लिङ्गायाम[9]त्रिभागैकमग्रपर्वायतं भवेत् । अग्रपर्वस्य[10] [11]मूलं तु [12]विंशतियवविस्तृतम् ॥ १०६ ॥
मूलादग्रं क्रमात्क्षीणमुत्पल[13]मुकुलोपमम् । [14]मुष्कायामविशालं च [15]सार्धवेदाङ्गुलं भवेत् ॥ १०७ ॥
घनमग्न्यङ्गुलं प्रोक्तं [16]मूलात्तरुर्विवर्धिता । [17]मेढ्रपीठस्य मूलस्य व्यासं सप्तार्धमात्रकम् ॥ १०८ ॥
[18]लिङ्गमूलस्य[19] पीठान्तमूरुमूलस्य मांसलम् । जानुमण्डलविस्तारं सपादचतुरङ्गुलम् ॥ १०९ ॥

---

[1] cf. *Aṃśumatkāśyapa* 56, 110b-114a:

नाभेस्तु नतविस्तारं व्योमांशं द्वियवाधिकम् । तन्नाभि दक्षिणावर्तं मूलतारं यवद्वयम् ॥
तन्नाभ्यवटमध्यस्थं नाभिसूत्रं द्विजोत्तम । नाभेरधस्तात्पादोनं श्रोण्युच्चं पञ्चमात्रकम् ॥
तदधस्तात्कटिः श्रोणी सार्धत्र्यङ्गुलकं भवेत् । तस्मादामेढ्रमूलान्तं मेढ्रपीठं युगाङ्गुलम् ॥
सपादपञ्चमात्रं तु लिङ्गदीर्घमुदाहृतम् । लिङ्गमूलविशालं तु सप्तदश यवाः स्मृताः ॥

[2] B : निम्नस्य pour निम्नं च [3] A : श्रोण्युच्चयोभ्यधस्तात्तु ; B : श्रोण्युच्चयोरधस्तात्तु

[4] A : कटिश्रोणी pour कटिः श्रोणी

[5] A : साध्यवन्यङ्गलं ; B : सार्धवन्ध्यङ्गुलं ; C : सार्धवद्व्यङ्गुलं ; G : सार्धद्व्यङ्गुलं

[6] A : तरस्मादुदरं मेढ्रं ; B : तस्योदरं.....मेढ्रं ; C : तरस्मादरमेढ्रं च ; G : तस्मादरमेढ्रं तु ; *Aṃśumatkāśyapa*: तस्मादामेढ्रमूलान्तं मेढ्रपीठं युगाङ्गुलम्

[7] C : सपद pour सपाद

[8] cf. *Aṃśumatkāśyapa* 56, 114b-117a:

लिङ्गायामत्रिभागैकमग्रगण्या[कं तदग्रस्या?] यतं भवेत् । तदग्रग्रन्थिमूलं तु यवमानं बृहत्तरम् ॥
रक्तोत्पलस्य मुकुलाकारं लिङ्गाग्रमुच्यते । मुष्कायामं विशालं च सार्धवेदाङ्गुलं भवेत् ॥
घनं सार्धगुणांशं तु तन्मूलोत्थोरुवर्धनम् । मेढ्रपीठस्य मूलस्य व्यासं सप्तार्धमात्रकम् ॥

[9] A : लिङ्गायामं pour लिङ्गायाम [10] La forme grammaticale correcte est अग्रपर्वण:

[11] C : मूल्यस्य ; G : मूलस्य [12] A : विंशतिर्यव pour विंशतियव

[13] A : उत्पले pour उत्पल ; B : उत्पलो [14] A : मुषकायां विशालं च [15] B : सार्धं pour सार्ध

[16] A : मूले रु...बन्धितम् ; B : मूले ह्यरु विवर्धितम् ; C : मूला धुत्तूरबन्धितम् ; G : मूले दद्धूरबन्धितम्

[17] A : मेढं पीठस्य

[18] cf. *Aṃśumatkāśyapa* 56, 117b-119:

मेढ्रपीठस्य मूलान्तमूरुमूलस्य मांसलम् । जानुमण्डलविस्तारं सपादं चतुरङ्गुलम् ॥
सार्धत्र्यङ्गुलकं प्रोक्तं जानुमण्डलनीव्रकम् । सार्धद्व्यङ्गुलकं प्रोक्तं पृष्ठजान्वोर्नतं भवेत् ॥
मध्ये तु पार्श्वयोः शेषं यथासौन्दर्यमाचरेत् ।

[19] A : मूलं तु pour मूलस्य

सार्धद्व्यङ्गुलविस्तीर्णं[1] तत्समं च [2]परे नतम् । मध्ये तु पार्श्वयोः [3]शेषं यथासौन्दर्यमादिशेत् ॥ ११०॥

[सुखासनलक्षणम्[4]]

[5]भद्रासनस्थमासीनमार्जवं [6]राजसान्वितम् । वामाङ्घ्रिं [7]शाययेत्पीठे त्वन्यपादं प्रलम्बयेत् ॥ १११ ॥

[8]स्फिक्पिण्डोच्चं तु [8]चत्वारि विष्टरोपरिमानके । आसनात्पूर्वकेशान्तं [9]जान्वोर्बाह्यावसानकम् ॥ ११२

[10]जानूर्ध्वात्पूर्वकेशान्तं [11]जान्वोर्बाह्यग्रबाह्यकम् । परतो मणिबन्धस्य मध्यमं च समं भवेत् ॥ ११३ ॥

[सूत्रन्यासः[12]]

मूर्धमध्याच्च नासाग्रात्स्तनयोर्नाभिमध्यमात् । वामाङ्घ्रिगुल्फमध्ये तु पूर्वसूत्रं प्रलम्बयेत् । ११४ ॥

---

[1] B : विस्तारं pour विस्तीर्णं [2] A : परेतनम् [3] B, G : ज्येष्ठं pour शेषं

[4] cf. *Aṃśumatkāśyapa* 64, 1-4:

अथ वक्ष्ये विशेषेण सुखासनविधिं परम् । आर्जवं राजसं भावं भद्रपीठे सुखासनम् ॥
वामाङ्घ्रिं शाययेत्पीठे दक्षिणाङ्घ्रिं तु लम्बयेत् । ऊर्ध्वकायोपरिष्टात्तु सार्धवेदाङ्गुलाधिकम् ॥
स्फिक्पिण्डमानमेतद्धि आसनोर्ध्वं विशेषतः । आसनात्पूर्वकेशान्तं जान्वोर्बाह्यावसानकम् ॥
जानूर्ध्वात्पूर्वकेशान्तं जानुबाह्यग्रबाह्यकम् । परहस्ते मणिबन्धमध्यमं च समं भवेत् ॥

[5] A : भद्रासनार्धम् pour भद्रासनस्थम् [6] A : राजसात्विकम् [7] C : साधयेत् pour शाययेत्

[8] C : चतुरं ; G : चत्वारं [9] B : जान्वोर्बाह्यावसानकम्

[10] A : जान्वोर्धात् pour जानूर्ध्वात् ; B : जान्वर्धात् [11] A : जान्वोर्बाह्याग्रबाह्यकम्

[12] cf. *Aṃśumatkāśyapa* 64, 5b-20a:

मौलिमध्ये तु नासाग्रे स्तनान्ते नाभिमध्यमे । वामाङ्घ्रिगुल्फमध्ये तु ब्रह्मसूत्रं प्रलम्बयेत् ॥
सूत्राद्दक्षिणजान्वन्तमेकत्रिंशाङ्गुलं भवेत् । अथवा त्रिंशदङ्गुल्यमेकोनत्रिंशमेव वा ॥
सूत्रात्तदङ्घ्रिनलकादन्तरं द्वादशाङ्गुलम् । त्रयोदशाङ्गुलं वापि मन्वङ्गुलमथापि वा ॥
पीठात्तद्धिदपाष्ण्यंस्तु नीत्रं द्वित्र्यङ्गुलं तु वा । तत्सूत्रादभये हस्ते मध्यरेखावसानकम् ॥
चतुर्दशाङ्गुलं प्रोक्तं त्वन्तरं तु द्विजोत्तम । अभये मध्यमाग्रान्तं चिबुकोर्ध्वसमं भवेत् ॥
तत्सूत्रात्कटके हस्ते मणिबन्धस्य मध्यमा । पञ्चदशाङ्गुलं प्रोक्तं त्वन्तरं तु द्विजोत्तम ॥
ऊरोस्तु मणिबन्धान्तं नीत्रं द्वित्र्यङ्गुलं तु वा । कटकं सिंहकर्णं वा तद्धस्तं प्रविधीयते ॥
तर्जन्यादिकनिष्ठान्तं तत्तन्मूलान्तवक्रिता । ईषद्वक्रं तदङ्गुष्ठमेवं स्यात्कटकाकृतिः ॥
मध्या मध्यतलान्तं तु अर्धमर्धं वलामिका । वक्रा शेषाङ्गुलाः प्रायस्सिंहकर्णमिदं परम् ॥
हिक्कासूत्रसमं कुर्यात्कर्तर्यग्रौ करौ परौ । वक्रौ त्वनामिकाङ्गुष्ठौ तलमध्यावसानकौ ॥
किंचिद्वक्रं कनिष्ठं तु शेषौ द्वौ तु ऋजुक्रियौ । कर्तर्याकृतिरेवं स्याल्लक्षणं चातिसुन्दरम् ॥
कोर्परं श्रोणिपार्श्वात्तु पञ्चषट्सप्तमात्रकम् । कुक्षिमध्ये च नासाग्रे पूर्वसूत्रं तु संस्पृशेत् ।
मेढ्रमूलात्तु वामाङ्घ्रिगुल्फमध्यं रसाङ्गुलम् । अथवा सप्तमात्रं तु पञ्चमात्रमथापि वा ॥
नाभिमध्यात्तु वामाङ्घ्रिनलकामध्यं चतुर्दश । त्रयोदशाङ्गुलं वाथ मान्वङ्गुलमथापि वा ॥
मौल्यग्रं मध्यमात्सूत्रात्त्वन्तरं मनुमात्रकम् । सार्धत्रयोदशांशं वा त्रयोदशाङ्गुलमेव वा ॥

[1]सूत्राद्दक्षिणजानवन्तमेकत्रिंशति[2]मात्रकम् । सूत्रात्तद्ङ्घ्रिनलकादन्तरं [3]भानुमात्रकम् ॥ ११५ ॥
पीठात्तद्ङ्घ्रिनलकादन्तरं[4] रसमात्रकम् । प्राक्सूत्रादमये[5] हस्ते [6]मध्यरेखावसानकम् ॥ ११६ ॥
मनुमात्रं तु मध्याग्रं [7]चूचुकोर्ध्वसमं भवेत् । तत्सूत्रात्कटके हस्ते [8]मणिबन्धस्य [9]मध्यमम् ॥ ११७ ॥
[10]त्रिपञ्चमात्रमित्युक्तं षोडशाङ्गुलमेव वा । कटकं [11]सिंहकर्णं वा तद्धस्तं[12] प्रविधीयते ॥ ११८ ॥
हिक्कासूत्रसमं कुर्यात्कर्तर्यग्रौ[13] विशेषतः । [14]कूर्परं श्रोणिपार्श्वात्तु रसमात्रमुदाहृतम् ॥ ११९ ॥
[15]मेढ्रमूलात्तु वामाङ्घ्रिगुल्फमध्यं रसाङ्गुलम् । नाभिमध्यात्तु वामाङ्घ्रि[16]नलकान्तरार्कमात्रकम् ॥ १२०
[17]मौलेस्तु मध्यमात्सूत्रादन्तरं मनुमात्रकम् ।

[सुखासनमूर्तिरूपम् [18]]

त्रिनेत्रं प्रसन्नवदनं प्रवालसदृशप्रभम् ॥ १२१

---

cf. *Kāmikāgama* II 47, 5b-12:

ललाटनासिकानाभिमेढ्राद्गुल्फमध्यमे । श्रोणिस्रुक्[स्फिक्?]संस्थितं सूत्रं मध्यसूत्रमिति स्मृतम् ॥
मुखान्तात्पिप्पलीमूलाद्वीवापार्श्वात्तथैव च । चूचुकस्याथ मध्यात्तु कटिस्थं पार्श्वगं मतम् ॥
उष्णीषात्तु ककुद्वंशकण्ठस्फिग्मध्यमाद्गतम् । पृष्ठसूत्रमिति प्रोक्तं पार्श्वस्थात्सार्धमात्रकम् ॥
हित्वा पार्श्वद्वयोश्चैव ततः स्यादूरुदैर्घ्यकम् । जानुः पक्षाङ्गुलं वामे लम्बितस्य गुणाङ्गुलम् ॥
सूत्रात्तु वामजान्वन्तमूर्ध्वकायार्धमानकम् । ऊरुमूलात्तु षण्मात्रं नालकान्तं द्विजोत्तमाः ॥
तलाग्रादूरुमध्याच्च द्वयन्तरं तु गुणाङ्गुलम् । सूत्राल्लम्बाङ्घ्रिपार्ष्ण्यन्तं सार्धविश्वाङ्गुलं भवेत् ॥
कटकान्मणिबन्धाधोदेशे कटयग्रसीमकम् । नाभेस्तु मणिबन्धान्तं षोडशाङ्गुलमीरितम् ॥
वरदं चेत्तु तत्पृष्ठान्नाभ्यन्तसममिष्यते ।

[1] G : सूत्र pour सूत्राद् [2] B : त्रि pour ति [3] B : रस pour भानु
[4] A : उत्तरं pour अन्तरं [5] C, G : उभये pour अभये [6] A : मध्ये pour मध्य
[7] B : चूचुकोर्ध्वं समं [8] C, G : मणिमध्यस्य [9] A : मध्यमात् [10] G : आ pour त्रि
[11] B : सिंहहस्तं वा
[12] Le mot हस्त se trouve ici au neutre au lieu du masculin.
[13] B: अग्रे pour अग्रौ [14] A : कोर्परं श्रोणिपार्श्वं तु [15] A : मध्यमूलं तु ; C : मध्यं मूलं तु
[16] A : नलिकान्तरार्धमात्रकम् ; B : नलकार्धार्धमात्रकम् [17] C : मौल्यं तु
[18] cf. *Aṃśumatkāśyapa* 64, 20b-33a:

ऋज्वागतं [कृतिं?] सुखासीनं प्रवालसदृशप्रभम् । त्रिणेत्रं प्रसन्नवदनं संपन्नं राजसैर्गुणैः ॥
व्याघ्राजिनाम्बरधरं दुकूलवसनान्वितम् । कर्तरीपरहस्तौ द्वौ बाह्यौ वाभ्यन्तराननौ ॥
दक्षिणे परशुं वामे कृष्णं न्यस्य करद्वये । अभयं दक्षिणे वामे कटकं सिंहकर्णवत् ॥
वामकर्णे विशेषेण शङ्खपत्रं निधापयेत् । त्रिचतुष्पञ्चमात्रं वा पत्रमण्डलविस्तृतम् ॥
कर्णनालघनं चैव त्रिगुणं पत्रविस्तृतम् । यवं पत्रघनं प्रोक्तं श्वेताभं चातिमार्दवम् ॥
दक्षिणे मकराख्यं तु कुण्डलं सिंहमेव वा । कुण्डलव्यासतुङ्गं तु त्रिचतुष्पञ्चमात्रकम् ॥

व्याघ्राजिनाम्बरोपेतं दुकूलवसनान्वितम् । [1]कर्तरीपरहस्तौ च [2]बाह्यौ [3]वाभ्यन्तराननौ ॥ १२२ ॥
दक्षिणे परशुं [4]कृष्णमृगं वामे तु धारयेत् । अभयं दक्षिणे पूर्वमितरत् सिंहकर्णकम्[5] ॥ १२३ ॥
वामकर्णे तु [6]पत्रं स्यादन्ये[7] सिंहाख्यकुण्डलम्[8] । [9]मकुटे [10]मुखद्वयं तुङ्गमष्टादशाङ्गुलं[11] तु वा ॥ १२४
[12]एकविंशतिमात्रं [13]स्याल्ललाटपट्टसमन्वितम् । व्यालं चैवार्कपुष्पं च मकुटे दक्षिणे न्यसेत् ॥ १२५ ॥
दक्षिणेऽदक्षिणे वाथ तरुणेन्दुं निधापयेत् । जटामकुटमेवं [14]स्याच्चतुष्पूरिमसंयुतम् ॥ १२६ ॥
सर्वाभरणसंयुक्तं युक्तया शोभनमाचरेत् । एवं सुखासनः प्रोक्तः सोमेश्वरः पुरोक्तवत्[15] ॥ १२७ ॥

[सोमास्कन्दः[16]]

देवः सुखासनोक्तः स्याद्देवीमात्रं वदामि ते । [17]तद्विष्टरेन्दुपञ्चाशदङ्गुलं तु परं भवेत् ॥ १२८ ॥
साक्षविंशद्भुयांशं[18] तु कन्यसं विष्टरोदयम् । अङ्गुलाङ्गुलहीनेन नवधा पीठमानकम् ॥ १२९ ॥
तन्मानसदृशव्यासमुपामेऽग्रेऽष्टहीनकम् । [19]विस्तारत्रिगुणायामं परं [20]द्विगुणिताधरम् ॥ १३० ॥

युक्तं वै कुण्डलं कृत्वा कर्णे स्कन्धोपरि न्यसेत् । अथवा कर्णयोर्विप्र वृत्तकुण्डलकं न्यसेत् ॥
वृत्तकुण्डलविस्तारमष्टादशयवं भवेत् । वेदाङ्गुलं तु तत्तुङ्गं कुम्भाब्जमुकुलोत्पलम् ॥
अन्यं वा सुन्दरोपेतं कल्पयेद्वृत्तकुण्डलम् । जटामकुटसंयुक्तं युग्मसंख्याजटान्वितम् ॥
मकुटस्योदयं विप्र चतुर्विंशाङ्गुलं भवेत् । त्रिःसप्ताङ्गुलतुङ्गं वा द्विर्नवाङ्गुलमेव वा ॥
केशान्तान्मकुटोच्चं तु ललाटे पट्टसंयुतम् । मुखान्तसदृशं विप्र मकुटमूलविशालकम् ॥
तत्सप्ताष्टनवांशैकहीनमग्रविशालकम् । चतुष्पूरिमसंयुक्तं भान्वंशं पूरिमोदयम् ॥
सर्व्ये नागार्कपुष्पं च वामे त्वर्धशशिं न्यसेत् । दक्षिणेऽर्धशशी वाथ वामे नागार्कपुष्पवत् ॥

[1] C : कर्तारिं pour कर्तरी [2] A : बाह्ये pour बाह्यौ [3] A : वाभ्यन्तराननम् ; G : बाह्यान्तराननम्
[4] A : कृष्णो वामे गुसं धरे [5] G : कण्ठकम् pour कर्णकम् [6] A : पार्श्वौ ; C, G : पार्श्वं
[7] La forme grammaticale correcte est अन्यस्मिन् [8] A : मण्डलम् pour कुण्डलम्
[9] A : मकुटं pour मकुटे [10] G : मख pour मुख ; cf. *Kāraṇāgama* I 11, 63b-64a: "रव्यङ्गुलं मुखं भवेत् । मुखतालं मुखं चैव पर्यायवचनानि च ।" voir aussi *Ajitāgama* 36, 40b.
[11] B : अष्टमांशाङ्गुलं pour अष्टादशाङ्गुलं [12] A : एवं pour एक
[13] A : स्याल्लाटपट्ट pour स्याल्ललाटपट्ट [14] B : स्याच्चतुष्पूरिसमायुतम्
[15] voir *supra paṭala* 34 (सोमेश्वरस्थापनविधिः)
[16] cf. *Aṃśumatkāśyapa* 65, 1-12a:

अथ वक्ष्ये विशेषेण सोमास्कन्देश्वरं द्विज । सुखासनं यथा प्रोक्तं तथा देवो विधीयते ॥
देवस्य वामपार्श्वे तु पार्वती च सुखासने । शाययेद्दक्षिणं पादं वामपादं प्रलम्बयेत् ॥
आसनस्योपरिष्टात्तु स्फिग्मानं चतुरङ्गुलम् । ऊर्ध्वकायसमायुक्तमासनोपरि कल्पयेत् ॥
किंचिद्देवाश्रितं वक्त्रं ललितं भङ्गसंयुतम् । वरदं वामहस्तं तु उत्पलं दक्षिणे करे ॥
किंचिद्वक्राङ्गुलाः सर्वे वामहस्ततलोर्ध्वगाः । वरदं त्विति विख्यातं पुष्पधूर्त्सिंहकर्णवत् ॥

[1]तयोर्मध्येऽष्टभागे तु नवधा [2]विष्टरायतम् । भद्रासनाङ्ग[3]संयुक्तं [4]कर्तव्यमतिसुन्दरम् ॥ १३१ ॥
तस्योर्ध्वे दक्षिणे देवं वामे देवीं [5]निधापयेत् । विष्टरे शाययेत्सव्यं पादमन्यं [6]प्रलम्बयेत् ॥ १३२ ॥
उत्पलं दक्षिणे हस्ते वरदं वामहस्तके । किञ्चिद्देवं [7]समीक्ष्येव [8]युक्त्या देवीं निधापयेत् ॥ १३३ ॥
दुकूलवसनां श्यामां सर्वाभरणभूषिताम् । [9]वामोरुबाह्ये पीठे तु [10]वामहस्ततलं न्यसेत् । १३४ ॥
पीठात्तु दक्षिणं [11]जानुमुद्धृतं सुन्दरं यथा । स्फिक्पिण्डमानमायार्धं[12] विष्टरोपरिमानकम् ॥ १३५ ॥

[स्कन्दलक्षणम्[13]]

देव्यास्तु लक्षणं ह्येवं स्कन्दलक्षणमुच्यते । विष्टरोपरि देव्यास्तु हिक्कान्तं वा स्तनान्तकम् ॥ १३६॥
तयोर्मध्येऽष्टभागे [14] तु नवधा स्कन्दतुङ्गकम् । [15]स्कन्दस्य लक्षणं युक्त्या कुर्याद्वै पञ्चतालकम् १३७
केशान्ते [16]वा शिखोपेतं करण्ड[17]मकुटान्वितम् । [18]मुद्रिकादिपरिच्छाद्य[19]बालभूषणभूषितम् ॥१३८॥

सस्यश्यामनिभा देवी सर्वाभरणभूषिता । रक्ताम्बरधरा देवी छन्नवीरसमन्विता ॥
अथवान्यप्रकारेण देवीभङ्गं वदामि ते । वामोरुबाह्यपीठे तु वामहस्ततलं न्यसेत् ॥
प्राग्वदुत्पलसंयुक्तं दक्षिणं हस्तमुच्यते । पीठात्तु दक्षिणं जानु किंचिदुद्धृतसंयुतम् ॥
त्रिचतुष्पञ्चमात्रं वा पीठाज्जान्वन्तरं भवेत् । षट्सप्ताष्टाङ्गुलं वाथ पीठाज्जान्वन्तरं भवेत् ॥
एवं द्विविधरीत्या तु देवीभङ्गं विधीयते । स्त्रीमानस्योक्तमार्गेण देवीमानं तु गृह्यताम् ॥
स्थानकानां तु देवानां देवी च स्थानका भवेत् । आसने चासनं ख्यातं विपरीतं विपत्करम् ॥
देवीलक्षणमेवोक्तम्"

voir aussi *Ajitāgama* 36, 268-272.

17 A : संविष्टरेन्दु pour तद्विष्टरेन्दु 18 A : यवांशं pour द्वयांशं 19 A : विस्तारात् pour विस्तार
20 A : द्विगुणितावरम् ; B : द्विगुणितं परम्

1 B : तयोर्मध्याष्टभागे तु 2 C : विष्टरांशतः 3 G : अन्त pour अङ्ग
4 A : कर्तव्यं तिथिसुन्दरम् 5 B : प्रकल्पयेत् 6 A : प्रलम्बिता ; G : प्रलम्बितम्
7 B : समीक्ष्यैवं ; G : समीक्ष्यैव 8 A : युक्त pour युक्त्या ; C : युक्तां
9 A : वामोरुबाह्ये पीठे ; C : पामरं बाह्यपीठे 10 A : वामहस्ते तलं
11 A : जातुमुद्धता ; C : जानुमध्यता 12 B : आख्यातं pour आयार्धं
13 cf. *Aṃśumatkāśyapa* 65, 12-36:

"स्कन्दलक्षणमुच्यते ।
देवीदेवेशयोर्मध्ये स्थापयेत्स्कन्दमूर्तिनम् । देव्या हिक्कावसानान्तं स्कन्दमानं तदुत्तमम् ॥
स्तनाक्षान्तं कनिष्ठं स्यात्तयोर्मध्येऽष्टभाजिते । नवधा स्कन्दमानं तु उत्तमादि त्रयं त्रयम् ॥
जात्यंशकयुतं वापि हीनं वापि प्रकल्पयेत् । वेदषड्धर्मभागे तु तन्माने तु विभाजिते ॥
एकांशमङ्गुलं ख्यातं तदष्टांशं यवं भवेत् । एकाङ्गुलं शिरोमानं केशान्तं चैव तत्समम् ॥
द्विभागं नेत्रसूत्रान्तं पुटान्तं चैव तत्समम् । गुणांशं हनुसीमान्तं ग्रीवोच्चं तु गुणाङ्गुलम् ॥

[1]आसीनं वा स्थितं वापि नृत्तं वा स्कन्दमाचरेत् । [2]आसीनं चेत्तु पीठोर्ध्वे [3]देवदेव्योस्तु मध्यमे ॥
[4]चरणौ शाययित्वा तु हस्तयोरुत्पलं धरेत् । [5]स्थिते कुञ्चितपादौ [6]चोभयजानू च [7]नीव्रकौ ॥१४० ॥

[वृषारूढलक्षणम् [8]]

उमास्कन्दयुतं प्रोक्तं वृषारूढमथोच्यते[9] । उक्षारूढमहं वक्ष्ये शृणुष्वैकाग्रमानसः ॥ १४१ ॥
आभङ्गं समभङ्गं वाप्यतिभङ्गमथापि वा । सुस्थितं सव्यपादं तु कुञ्चितं वामपादकम् ॥ १४२ ॥

हिक्कासूत्रात्स्तनान्तं तु नवभागमुदाहृतम् । स्तनान्तान्नाभिसीमान्तं वस्वङ्गुलमुदाहृतम् ॥
नाभेस्तु मेढ्रमूलान्तं सप्तभागमिति स्मृतम् । भान्वंशमूरुदीर्घं स्याज्जानुदीर्घं द्वियङ्गुलम् ॥
जङ्घादीर्घेरुतुल्यं स्याद्द्व्यंशं पादतलोन्नतम् । दशाङ्गेस्तु तलायामं बाहुदीर्घं चतुर्दश ॥
कोष्ठायामं दशांशं तु तलं वेदाङ्गुलायतम् । युगांशं मध्यमायां तु सार्धहीनमनामिका ॥
तत्समं तर्जनीदीर्घं कनिष्ठोच्चं गुणाङ्गुलम् । अङ्गुष्ठायाममन्यंशं युगांशं तलविस्तृतम् ॥
प्रकोष्ठाग्रं गुणांशं तु तन्मूलं चतुरङ्गुलम् । भूतांशं बाहुमूले तु विस्तारं द्विजसत्तम ॥
साधिष्ठांशं मुखव्यासं सप्तांशं कर्णविस्तृतम् । कक्षयोरन्तरव्यासं त्रयोदशाङ्गुलं भवेत् ॥
भान्वंशं हृदयविस्तारं रुद्रांशं मध्यविस्तृतम् । श्रोणिस्थाने तु भान्वंशं कटिस्थाने त्रयोदश ॥
ऊरुमूलविशालं तु वस्वङ्गुलमुदाहृतम् । षडंशं जानुविस्तारं जङ्घामूलं युगाङ्गुलम् ॥
गुणांशं नलकातारं षडंशं तलविस्तृतम् । पार्ष्णिव्यासं युगांशं स्याच्छेषं युक्त्या तु कल्पयेत् ॥
केशान्ते वा शिखोपेतं करण्डमकुटान्वितम् । उभयोर्हस्तयोः पुष्पं वामं वरदमेव वा ॥
कटकं वाथ तद्धस्ते सिंहकर्णमथापि वा । दक्षिणं पुष्पहस्तं वा कपित्थाम्रफलं तु वा ॥
कट्यिसूत्रयुतं नग्नं छन्नवीरसमन्वितम् । मुद्रिका चोपग्रीवादिबालभूषणभूषितम् ॥

आसीनं वा स्थितं वापि नृत्तं वा स्कन्दमाचरेत् । आसीने चरणौ द्वौ तु विष्टरोपरि शाययेत् ॥
स्थिते पादतलौ द्वौ तु समभङ्गमिति स्थितौ । चरणौ कुञ्चिताभौ तु युक्त्या जानू च नीव्रकौ ॥
द्वौ पादौ कुञ्चितौ किंचिर्त्किंचिद्वमनमेव वा । नृत्तं चेत्सुस्थितं सव्यपादं वक्रसमन्वितम् ॥
उद्धृत्य चान्यपादं तु पीठात्सप्ताङ्गुलावधि । षण्मात्रमथवा पञ्चमात्रान्तं वा समुद्धरेत् ॥
फलेन वरदं वामहस्तमन्यं तु सूचिकम् । अथवा वामहस्ते तु फलं न्यस्त्वा प्रसारयेत् ॥
हिक्कासूत्रसमोद्धृत्य मणिबन्धोर्ध्वसीमकम् । द्वयन्तरं लम्बसूत्रं च नृत्तमूर्तिवदाचरेत् ॥
उमास्कन्दसहितं प्रोक्तम्"

[4] B : भागं pour भागे [15] A : स्कन्दलक्षणयुक्त्या तु [16] A : वाचिकोपेतम्
[17] A : मुकुट pour मकुट [18] A : मुद्रिकाद्विपरिच्छादि [19] B : बाल्य pour बाल

[1] B : आसीनो वा स्थितो वापि ; C : अस्तिर्नावस्तिलो वापि [2] A : आसनं [3] A : देवं देव्यास्तु
[4] B : चरणे [5] B : स्थितौ [6] B : वा pour च [7] B : निवृत्तिकौ
[8] cf. *Aṃśumatkāśyapa* 67, 1-6:
वृषवाहनमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना । समभङ्गमतिभङ्गं वा कल्पयेत्कल्पवित्तमः ॥
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् । उष्णीषमध्यमाद्वामे ललाटाद्वामके तथा ॥
वामनेत्रावसाने च वामनासापुटान्तके । दक्षिणे स्तनपीठस्य वामे नाभेश्च मध्यमे ॥
वामोरुमध्यमे पार्ष्ण्योर्मध्ये सूत्रं प्रलम्बयेत् । एवं तु समभङ्गं स्यान्नतमानं युगाङ्गुलम् ॥
मुखे पूर्ववदुद्दिष्टे दक्षिणे तु स्तने तथा । नाभेर्वामे गुणांशे तु वामोरोर्मध्यमे तथा ॥
सुस्थिताङ्घ्रौ तु गुल्फस्य मध्ये सूत्रं प्रलम्बयेत् । अतिभङ्गमिति ह्यातं नतं पञ्चाङ्गुलं भवेत् ॥
voir aussi *Ajitāgama* 36, 279-282.
[9] B : इहोच्यते pour अथोच्यते

[1]ललाटमध्याद्वामे तु नेत्रान्ते [2]तद्युगान्तके । दक्षिणस्तनवामे तु नाभिमध्ये तथैव च ॥ १४३ ॥
वामोरुमध्यमे चैव पादपार्ष्ण्योश्च मध्यमे[3] । [4]उक्षस्य [5]मस्तकोर्ध्वे तु न्यस्तव्यं वामकूर्परम्[6] ॥ १४४ ॥
कलांशं [7]द्विनवांशं वा हिक्काधो लम्बितं [8]हि तत् । [9]तत्कूर्पराच्तु पीठान्तमुक्षस्योदयमीरितम् ॥ १४५ ॥
उक्ष[10]मूर्ध्नस्थहस्ते तु [11]मध्याङ्गुलाग्रसीमकम् । नाभिसूत्रसमं कुर्यादङ्गुलं वा नतोन्नतम् ॥ १४६ ॥
[12]तद्धस्ततलमध्ये तु [13]ब्रह्मसूत्रं यवद्वयम् । अधोमुखं प्रकर्तव्यं [14]तद्धस्तं तु [15]प्रसारयेत् ॥ १४७ ॥
[16]सव्ये तु पूर्वहस्तात्तु[17] पार्ष्णेर्नाभेरधो गतम् । त्रिपञ्चाक्षरमात्रं वा लम्बं [18]तत्सिंहकर्णवत् ॥१४८॥
[19]गदां वा वक्रदण्डं वा बाणं [20]तत्तत्करे धृतम् । [21]तत्करे मणिबन्धात्तु चोरुमूलावसानकम् ॥१४९॥
[22]मूर्तिमात्रं प्रवेशं वा दशमात्रान्तरं तु वा । [23]परहस्तद्वयोः सव्ये [24]टङ्को वामे मृगो भवेत् ॥१५० ॥

---

[1] C : ललाटमध्यभागे तु ; G : ललाटमध्यवामे तु [2] G : तद्युतान्तके

[3] Il semble y avoir une lacune entre les *śloka* 144a et 144b ; on ne trouve en effet aucune description de सूत्रपात pour आभङ्ग, समभङ्ग et अतिभङ्ग ; à ce sujet voir *Aṃśumatkāśyapa* 67, 4-6.

[4] cf. *Aṃśumatkāśyapa* 67,7-10:

वृषस्य मस्तकोर्ध्वे तु न्यसेद्वै वामकोर्परम् । हिक्कासूत्रादधो विप्र कला वा द्विनवाङ्गुलम् ॥
वामकोर्परलम्बं स्यात्तस्मादासनसीमकम् । वृषभस्योदयं ख्यातं वृषलक्षणवत्कृतम् ॥
वृषमूर्ध्नि तु हस्ते तु मध्याङ्गुलाग्रसीमकम् । नाभिसूत्रसमं कुर्यादङ्गुलं वा नतोन्नतम् ॥
तद्धस्ततलमध्यात्तु पूर्वसूत्रं यवद्वयम् । अधोमुखं प्रकर्तव्यं तद्धस्तं तु प्रसारयेत् ॥

[5] A, B : मध्यकोर्ध्वे [6] A, C : कोर्परम् pour कूर्परम् [7] B, G : द्विर्नवांशं वा ; C : छिन्नपार्श्वं वा

[8] A : हितम् [9] A : तत्कोर्परात्तु ; C : गोपुरान्तान्त [10] A : मूर्ध्निस्थ pour मूर्धस्थ

[11] C : दक्षिणे परशुं धरेत् [12] A : तद्धस्ततलमध्यं तु ; G : तस्यास्तु तलमध्यात्तु

[13] B : ब्रह्मसूत्रान्वयद्वयम् [14] A : तत्स्तनं तु [15] G : प्रधारयेत्

[16] cf. *Aṃśumatkāśyapa* 67, 11-14:

दक्षिणे पूर्वहस्तात्तु पार्ष्णेर्नाभेरधो बुधः । पक्षषोडशमात्रं वा नतं तत्सिंहकर्णवत् ॥
वक्रदण्डायुधं तस्मिन्कल्पयेत्तु चलावलम् । स्थिताङ्घ्रिजानूर्ध्वसीमान्ताद्धिक्कासूत्रान्तमुन्नतम् ॥
कनिष्ठाङ्गुलिपरीणाहमग्रे वक्त्रान्वितं भवेत् । लोहजं दारुजं वाथ वक्रदण्डं तु कारयेत् ॥
तद्धस्तमणिबन्धात्तु ऊरुमूलात्तु द्वयन्तरम् । पञ्चषट्सप्तमात्रं वा वसुनन्दाङ्गुलं तु वा ॥

[17] A : सव्येन पूर्वहस्तं तु [18] C : तत्सिंहकण्ठवत् ; G : तत्सिंहकण्ठकम्

[19] A : गदा वाचकदण्डं वा ; B : गदां वा कशदण्डं वा

[20] A : ततद्धरेद्धृतम् ; C : तत्तत्करैर्धृतम् ; G : तत्तत्करे कृतम्

[21] C, G : तत्करो मणिबन्धं तु [22] G : मूर्तिमात्रप्रवेशं वा

[23] cf. *Aṃśumatkāśyapa* 67, 15-16:

परहस्तद्वयोश्चैव टङ्कं कृष्णमृगं धरेत् । टङ्कं दक्षिणहस्ते तु वामहस्ते मृगो भवेत् ॥
परहस्तद्वयारभ्य हिक्कासूत्रसमं भवेत् । एकद्वित्रिचतुष्पञ्चमात्रं वाथ नतं तु वा ॥

[24] A, B, G : टङ्कं वामे मृगं

[1]हिक्कान्तं तद्द्वयोश्चैव [2]कर्तर्यग्रौ प्रकल्पयेत् । त्रिचतुष्पञ्चमात्रं वा [3]हिक्कासूत्रान्ततो नतम् ॥ १५१
[4]जटामकुटयुक्तं वा[5] [6]जटाबन्धेन वा युतम् । [7]पार्वती[8] तस्य वामे तु दक्षे वामे प्रकल्पयेत् ॥१५२॥
सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् । [9]आभङ्गं समभङ्गं [10]वाप्यतिभङ्गमथापि वा ॥ १५३ ॥
अथवा वामपादं [11]तदुद्धृतं [12]तिर्यगञ्चितम् । दक्षिणे [13]सव्यपादस्य [14]पृष्ठे मात्रार्धके न्यसेत् ॥ १५४ ॥
यथासौन्दर्ययुक्त्या [15]तु ह्यन्तरं परिकल्पयेत् । [16]पूर्ववत्पूर्वहस्तं तु परहस्तौ विना तु वा ॥ १५५ ॥

[त्रिपुरारिलक्षणम्[17]]

[18]उक्षारूढमिदं ख्यातं त्रिपुरारिरथोच्यते । [19]आभङ्गं समभङ्गं [20]वाप्यतिभङ्गमथापि वा ॥ १५६ ॥
बिम्बोच्चादङ्गिमात्रं तु [21]ह्याभङ्गस्य नतं भवेत् । [22]समभङ्गे चतुर्मात्रं पञ्चमात्रातिभङ्गके ॥ १५७ ॥

[आभङ्गादिष्वन्तरम्[23]]

आभङ्गे तु कलामात्रं [24]समभङ्गेऽधिकद्वयम् । अतिभङ्गे तु [25]विंशत्स्यात्पादाङ्गुष्ठद्वयान्तरम् ॥ १५८ ॥

---

1 C : हिक्कान्ततो द्वयोश्चैव
2 B : कर्तव्याग्रं ; C : कर्तव्यं द्वौ
3 B : हिक्कासूत्रां तथैव च ; C, G : हिक्कासूत्रं ततोन्नतम्
4 cf. *Aṃśumatkāśyapa* 67. 17-18a:
जटामकुटयुक्तं वा जटाभारं तु लम्बितम् । जटाबन्धशिरो वापि कर्तुरिच्छावशान्नयेत् ॥
सर्वाभरणसंयुक्तं रक्ताभं रक्तवासभृत् ।
5 C : संयुक्तं pour युक्तं वा
6 A : जटाबन्धनवानतम् ; B : जटाबन्धेन वामनम् ; C : जटाबन्धनवायुतम्
7 cf. *Aṃśumatkāśyapa* 67, 18b-20:
वामपार्श्वे ह्युमादेवी दक्षिणे वा विशेषतः । सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥
उत्पलं दक्षिणे हस्ते वामहस्ते प्रसारितम् । श्रीमानोक्तविधानेन उमादेवीं तु कारयेत् ॥
वृषवाहनमाख्यातम्"
8 B : पार्वती pour पार्वतीं
9 C : त्रिभङ्ग pour आभङ्गं
10 C : वा व्यतिभङ्गम् pour वाप्यतिभङ्गम्
11 A : तु उद्धृतं
12 A : तिर्यतं गतम् ; C : तिर्यक्गगतम् ; G : तिर्यग्गतम्
13 C, G : वाम pour सव्य
14 A : पीठे मात्राथक न्यसेत् ; B : पीठमात्रार्धकं न्यसेत् ; G : पीठे मात्राधका न्यसेत्
15 B : त्वभ्यन्तरं pour तु ह्यन्तरं
16 B : परि pour पूर्व
17 cf *Aṃśumatkāśyapa* 7 . 1-2:
त्रिपुरान्तकमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना । त्रिचतुष्पञ्चमात्रं स्यान्नतमानं यथाक्रमम् ॥
आभङ्गे समभङ्गे चाप्यतिभङ्ग इति त्रिधा । प्रतिमोच्चनतं भङ्गमानमेवं हि कल्पयेत् ॥
18 A : वृषारूढमिदं स्यात्तु
19 B : त्रिभङ्गं pour आभङ्गं
20 G : वा प्रति pour वाप्यति
21 A : आतुङ्गस्य
22 B : वाम pour सम
23 cf. *Aṃśumatkāśyapa* 70, 3-4:
पादाङ्गुष्ठद्वयोश्चैव त्वन्तरं षोडशाङ्गुलम् । आभङ्गं तद्विजानीयादष्टादशाङ्गुलं समम् ॥
विंशत्यङ्गुलमाख्यातमतिभङ्गमिति त्रिधा । तत्त्रिभागैकभागं तु पाण्योश्च त्वन्तरं भवेत् ॥
24 A, B : समभङ्गे यवद्वयम्
25 A, B : विन्यस्य pour विंशत्स्यात्

[1]तत्त्रिभागैकभागं तु तत्तत्पार्ष्ण्यन्तरं गुरो ।

[आभङ्गम्[2]]

[3]उष्णीषमध्यमाद्धामे[4] नेत्रान्ते तत्पुटान्तके ॥ १५९ ॥

[5]स्तनाक्षाद्दक्षिणे वामे [6]लम्ब्यं नाभेस्तु दक्षिणे । वामोरु[7]सव्यपार्श्वे तु [8]सव्याङ्घ्रिपार्ष्णिवामतः ॥१६०॥

[9]आभङ्गस्याग्रसूत्रं तु [10]ह्येवमेव प्रलम्बयेत् ।

[समभङ्गम्[11]]

समे [12]तूष्णीषमध्यात्तु नासाग्रात्पार्ष्णिमध्यमे ॥ १६१ ॥

लम्बयेत्पूर्वसूत्रं तु [13]ह्यन्तरं तु वदाम्यहम् । हिक्कामध्यं तु [14]तत्सूत्राद्धामपार्श्वे तु [15]मात्रकम् ॥१६२॥

सूत्राद्धृदयवामं तु वामपार्श्वे चतुर्यवम् । सूत्रात्तु दक्षिणे [16]नाभि[17]मध्यमं त्वक्षिमात्रकम् ॥ १६३ ॥

सव्यपार्श्वे तु [18]सूत्रात्तु [19]मेढ्रमूलस्य मध्यमम् । वेदमात्रमिति [20]प्रोक्तं वामजान्वन्तरेऽर्कम् ॥१६४॥

यवमानं प्रकर्तव्यं समभङ्गस्य [21]सुव्रत ।

---

[1] C : तत्र pour तत्ति

[2] cf. *Aṃśumatkāśyapa* 70, 5-7a:

उष्णीषाद्धामपार्श्वे तु नेत्रान्ते तत्पुटान्तके । हनोर्वामे समालम्ब्यं दक्षिणस्तनवामके ॥
नाभेर्दक्षिणपार्श्वे तु वामोरोः सव्यपार्श्वके । दक्षिणाङ्घ्रौ तु पार्ष्ण्योस्तु वामपार्श्वे तु लम्बयेत् ॥
आभङ्गसूत्रमाख्यातम् ''

[3] C : सोष्णीष pour उष्णीष [4] B : वाम pour वामे [5] A : स्तनाक्षादक्षिणे ; B : स्तनान्ताद्दक्षिणे

[6] A : लम्ब्य pour लम्ब्यं [7] A : पर्व pour सव्य ; B, C, G : पर्व

[8] B : सव्याङ्घ्रिः pour सव्याङ्घ्रि ; G : सव्यपात [9] A : आभङ्गस्य तु सूत्रं तु ; B : त्रिभङ्गस्य च सूत्रं तु

[10] B : एवमेवं प्रलम्बयेत्

[11] cf. *Aṃśumatkāśyapa* 70, 7-11a

''समभङ्गमथ शृणु ।
ललाटमध्ये नासाग्रे पादयोः पार्ष्णिमध्यमे । लम्बयेत्पूर्वसूत्रं तु द्वयन्तरं तु वदाम्यहम् ।
तत्सूत्राद्धामपार्श्वे तु हिक्कामध्यं शिवाङ्गुलम् । अर्धाङ्गुलं तु तत्सूत्राद्धामे हृदयमध्यमम् ॥
तत्सूत्राद्दक्षिणे नाभिमध्यमं तु द्वयाङ्गुलम् । तत्सूत्राद्दक्षिणे मेढ्रमूलमध्यं युगाङ्गुलम् ॥
तत्सूत्राद्धामतो जानोरन्तरं द्वादशं यवम् । समभङ्गमिति ख्यातम् ''

[12] B : तत्पार्ष्णि pour तूष्णीष [13] A : व्यन्तरालं pour ह्यन्तरं तु ; B, C : व्यन्तरं तु

[14] : A : तत्सूत्रं pour तत्सूत्राद् ; C : तत्सूत्र [15] B : मन्त्रकम्

[16] G : नाभिं pour नाभि

[17] C : मध्यमध्यक्ष pour मध्यमं त्वक्षि ; B : मध्यमत्वेक्ष ; G : मध्यमं चाक्ष

[18] A : सूत्रं तु ; B : सूत्रं च [19] A : मेध्य pour मेढ्

[20] A : प्रोक्तं जानुनन्वन्तरार्कम् ; B : प्रोक्तं जानुनन्वन्तरार्कक्रम् ; C : प्रोक्तमवाजान्वन्तरात्परम् ; G : प्रोक्तं वाजनन्वन्तरान्तरम्

[21] A : संवृतम्

[अतिभङ्गम् [1]]

ललाटमध्याद्वामे तु [2]नेत्रान्ते तत्पुटान्तके ॥ १६५॥
[3]दक्षिणस्तनमध्ये तु वामपार्श्वे गुणाङ्गुलम् । नाभिमध्या[4]त्तु [5]वामेऽग्निमात्रं [6]स्यात्तु चतुर्यवम्॥१६६॥
[7]वामजान्वन्तरं [8]विद्याद्वामपार्श्वे तु दक्षिणे । लम्बयेत्पूर्वसूत्रं तु वेशादीनि समोक्तवत् ॥ १६७॥

[त्रिपुरारिमूर्तिस्वरूपम् [9]]

दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् । दक्षिणे पूर्वहस्तं तु नाभिसूत्रसमोद्धृतम् ॥ १६८ ॥
तत्करं [10]सिहकर्णं स्याद्वाणमध्यं तु [11]पीडितम् । [12]पूर्वहस्तस्थसव्ये तु [13]धनुर्धृत्वा तु मुष्टिना ॥१६९॥
[14]तन्मुष्ट्यूर्ध्वं तु [15]कक्षान्तमग्र्यंशं वा [16]नतोन्नतम् ।[17]कर्तरी[18]परहस्तौ तु ढिक्कासूत्रसमोद्धृतौ[19]॥१७०

---

[1] cf. *Aṃśumātkāśyapa* 70, 11-14a:

"अतिभङ्गं ततः शृणु ।
उष्णीषाद्वामपार्श्वे तु नेत्रान्ते च पुटान्तके । दक्षिणस्तनमध्ये तु तत्सूत्रं तु गुणाङ्गुलम् ॥
नाभिमध्यात्तु वामे तु सूत्राग्नीत्रं गुणाङ्गुलम् । तत्सूत्राद्वामजान्वन्तमर्धमात्रं विधीयते ॥
वामाङ्घ्रिपार्ष्णिसव्ये तु पार्श्वसूत्रं प्रलम्बयेत् । स्पर्शनं वेशनं नीत्रं समपादस्थानकोक्तवत् ॥

[2] B : नेत्रान्ते तत्पुटान्तरम् ; G : नेत्रमेतत्पुटान्तके

[3] A : दक्षिणस्तनमध्यात्तु ; G : दक्षिणे स्तनमध्यं तु [4] B : मध्याग्नि pour मध्यात्तु

[5] C : धामे pour वामे [6] A : यस्याच्चतुर्यवम् ; B : ये स्याच्चतुर्यवम्

[7] G, C : वाजनान्वन्तरं [8] A : विद्याद्वामपार्श्वेऽस्तु ; C : विद्याद्वामपार्श्वस्तु

[9] cf. *Aṃśumatkāśyapa* 70, 16-26:

दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् । दक्षिणे पूर्वहस्तोर्ध्वं नाभिसूत्रावसानकम् ॥
सिंहकर्णं तु तद्धस्तं बाणमध्यं तु पीडितम् । ···वामहस्ते धनुर्धृत्वा कक्षान्तं तत्करार्ध्वकम् ॥
एकद्वित्र्यङ्गुलं वापि तस्य नेत्राद्धृतं तु वा । ···कर्तरीपरहस्तौ द्वौ टङ्ककृष्णमृगान्वितौ ॥
टङ्कं दक्षिणहस्ते तु वामहस्ते मृगं धृतम् । जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥
प्रवालसदृशप्रख्यं वामे गौरीसमन्वितम् ॥

cf. *Śilparatna* II, 42, 72b-76:

अथाष्टधा प्रवक्ष्यामि त्रिपुरान्तकमूर्तिनम् । दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥
दक्षिणे पूर्वहस्तं तु नाभिसूत्रावसानके । सिंहकर्णं तु तद्धस्तं बाणमध्यनिपीडितम् ॥
वामहस्ते धनुर्धृत्वा कक्षान्तोर्ध्वे समुद्धृते । कर्तरी परहस्तौ द्वौ टङ्ककृष्णमृगान्वितौ ॥
टङ्कं तु दक्षिणे वामे कृष्णसारङ्गमेव हि । जटामकुटसंयुक्तं सर्वाभरणसंयुतम् ॥
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ॥

voir aussi *Ajitāgama* 36, 283-285.

[10] B : सिंहकर्णे ; C, G : सिंहकण्ठं [11] A : पीठितम् [12] B : पूर्वहस्तस्य सव्ये तु ; C : पूर्वहस्तस्स सर्वे तु

[13] B : धनं कृत्वा [14] B : तन्मुष्टयन्तं तु ; C : तन्मुष्टयर्धं तु [15] A : कर्कान्तम् pour कक्षान्तम् ; B : कर्काङ्कम्

[16] B : नवोन्तकम् ; C, G : ततोन्नतम् [17] A : कर्करी pour कर्तरी [18] A : परहस्ते तु ; B : वरहस्तस्ते

[19] A : समोद्धृता pour समोद्धृतौ ; B : समोद्धृतम्

तयोः [1]सव्ये तु टङ्कः स्यादितरे[2] मृगमुद्धरेत् । जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥ १७१ ॥
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् [3] । त्रिपुरान्तकमाख्यातं वक्ष्येऽहं चन्द्रशेखरम् ॥ १७२ ॥

[चन्द्रशेखरलक्षणम् [4]]

केवलं [5]गौरीसहितमालिङ्गं च[6] त्रिधा भवेत् । केवलं समपादं तु स्थानकं परिकीर्तितम् ॥ १७३ ॥

[सूत्रन्यासः [7]]

मकुटस्य तु [8]मध्याच्च ललाटस्य [9]तु [10]मध्यमात् । [11]नासाग्रमध्यमाच्चैव [12]हनोर्मध्ये तथैव च॥ १७४॥

---

[1] C : सर्वे pour सव्ये

[2] La forme grammaticale correcte est इतरस्मिन् ; mais le mètre ne serait pas respecté.

[3] C, G : समन्वितम् pour समायुतम्

[4] cf. *Aṃśumatkāśyapa* 66, 1-4a:

अथ वक्ष्ये विशेषेण चन्द्रशेखरलक्षणम् । केवलं गौरीसहितमालिङ्गं त्रिविधं भवेत् ॥
केवलं गौरीरहितं सहजं गौरिसंयुतम् । आलिङ्गमेकहस्तेन देवीदेवौ परस्परम् ॥
उमालिङ्गमिति ख्यातमेवं त्रिविधमुच्यते । केवलं समपादं तु स्थानकं सहितं तु वा ॥

समभङ्गं वातिभङ्गं वालिङ्गं चन्द्रशेखरम् ।

[5] B, C : गौरि pour गौरी [6] B : उमालिङ्गं च pour आलिङ्गं च

[7] cf. *Aṃśumatkāśyapa* 66, 9-20:

सीमासूत्रं विनिश्चित्य प्रलम्बफलकोपरि । पूर्वे परे च पार्श्वे च मानसूत्रं प्रसारयेत् ॥
तदन्ते सुषिरं कल्प्य सूत्राण्यालम्बयेत्ततः । सूत्रस्यानुगुणं बिम्बं कारयेद्द्विजसत्तम ॥

पूर्वे च पार्श्वयोः पृष्ठे कायमध्ये च लम्बयेत् । एतानि पञ्च सूत्राणि ब्रह्मसूत्रमुदाहृतम् ॥
कक्षान्तरे मुखान्ते च द्वे सूत्रे च प्रलम्बयेत् । एवं हि नवसूत्राढ्यं स्थानकं चासनं तथा ॥
मकुटस्य तु मध्ये च ललाटस्य तु मध्यमात् । नासाग्रमध्ययमे चैव हनोर्मध्ये तथैव च ॥
हिक्काद्वन्मध्यमाच्चैव नाभेश्चैव तु मध्यमात् । लिङ्गमध्योरुमध्यात्तु पादयोश्च तलान्तरे ॥
लम्ब्यैवं पूर्वसूत्रं स्यादपरस्थमथोच्यते । मकुटस्य मध्यमाच्च कुकटिकायास्तु मध्यमात् ॥
ककुन्मध्याद्वंशमध्यात्स्फिक्पिण्डयोरन्तरे तथा । ऊरुजान्वोश्च जङ्घान्तं पार्ष्णिद्वयान्तरे तथा ॥
एवमालम्बयेत्सूत्रमपराश्रितमेव हि । पार्श्वयोः कर्णपाल्यन्ताद्भ्रीवामध्यात्तथैव च ॥
बाहोस्तु मध्यमालम्ब्य गुल्फमध्ये तु लम्बयेत् । देहमध्यगतेनैव पञ्चसूत्रं प्रलम्बयेत् ॥

श्रोत्राभ्यन्तरगं सूत्रं स्तनचूचुकमध्यगम् । पादमध्यप्रदेशिन्यां मध्यमे तु प्रलम्बयेत् ॥
ऊरुजान्वोश्च जङ्घान्ते पार्ष्णिद्वयान्तरे तथा । अक्षमध्ये कटीपार्श्वे मध्ये चैव तु लम्बयेत् ॥

cf. *Kāmikāgama* II 48, 14-20a:

"ततः सूत्राणि लम्बयेत् ।
पार्श्वयोः स्मृतिसूत्राणि मुखकर्णभुजावधि । पुरः पृष्ठे च मध्ये च नव तान्यवलम्बयेत् ॥
प्रलम्बफलकामूर्ध्वं स्थापयित्वावलम्बयेत् । ललाटघ्राणहृन्नाभिमेढ्राङ्घ्रियुगमध्यमे ॥

[1]हिक्काहृदयनाभीनां मध्याल्लिङ्गस्य मध्यमात् । [2]ऊर्वोर्जान्वोश्च मध्ये तु पादयोश्च तलान्तके ॥ १७५॥
[3]लम्ब्यैवं पूर्वसूत्रं स्यादपरे [4]मध्यमे तथा । [5]पूर्वसूत्रात्तु[6] [7]मौल्यग्रमध्यमर्काङ्गुलं भवेत् ॥ १७६ ॥
मौल्यग्रादपरे सूत्रं रस[8]मात्रमुदाहृतम् । [9]पूर्वसूत्राल्ललाटस्थमक्षाङ्गुलमुदाहृतम् ॥ १७७ ॥
हिक्कासूत्रान्तरं पूर्वे रसमात्रमुदाहृतम् । [10]उरःपूर्वसूत्रान्तरक्षाङ्गुलसमं भवेत् ॥ १७८ ॥

सूत्रं पुरः स्थितं नासाकुक्षिस्पर्शं यथा भवेत् । मुखान्तं पिप्पलीकर्णमूलचूचुकपात्तले ॥
कर्णकण्ठस्तनानां तु बाह्ये श्रोणिस्पृगेव च । मुखान्मुखान्तं नीत्वादौ दोःस्पृश्यपरं मतम् ॥
एवं पार्श्वे त्रिसूत्राणि लम्बयेद्देशिकोत्तमः । कृकाटिकाककुत्कर्णस्फिक्पार्ष्णीनां तु मध्यमे ॥
मस्तकाल्लम्बनीयं स्याद्यथापृष्ठककुद्गतम् । देहस्यान्तर्गतं मध्यसूत्रं स्यान्मुनिपुङ्गवाः ॥

[8] C, G : मध्यात्तु [9] B : च pour तु [10] A : मध्यमा ; B : मध्यमे
[11] A : नासाग्रं मध्यमं चैव ; G : नासाग्रस्य तु मध्यमात् [12] G : वङ्क्षेर्मध्ये

[1] A : हिक्काद्धृदय pour हिक्काहृदय [2] B : ऊरुजान्वोश्च ; G : ऊरोर्जान्वोश्च
[3] C, G : बिम्बेवं [4] A : मध्यमं तथा
[5] cf. *Aṃśumatkāśyapa* 66, 21-42a:
पूर्वसूत्रात्तु मौल्यग्रमध्यं द्वादशमात्रकम् । अपरसूत्रात्तु मौल्यग्रमध्यं षण्मात्रमुच्यते ॥
पूर्वसूत्राल्ललाटान्तमन्तरं तु द्विमात्रकम् । अपरसूत्राच्छिरःपृष्ठं पादोनं तु युगाङ्गुलम् ॥
पूर्वसूत्रात्तु हन्वन्तं सयवद्व्यंशमुच्यते । कृकाटिकापरसूत्रात्तु यवोनाष्टयङ्गुलान्तरम् ॥
पूर्वसूत्रात्तु हिक्कान्तं त्वभ्यन्तरं रसाङ्गुलम् । ककुदः परसूत्रात्तु षोडशं तु यवान्तरम् ॥
उरसः पूर्वसूत्रात्तु द्वयन्तरं तु द्विमात्रकम् । ककुन्मध्यात्परसूत्राद्द्वयन्तरं मनुयवार्धकम ॥
मध्योदरं स्पृशेत्पूर्वसूत्रं वै तत्समं परे । वंशनिम्नापरं सूत्रं पादोनद्वयङ्गुलान्तरम् ॥
प्राक्सूत्रान्नाभिसूत्रात्तु त्वन्तरं सार्धमात्रकम् । नाभिसूत्रसमे पृष्ठे सार्धपक्षाङ्गुलं भवेत् ॥
प्राक्सूत्रान्मेढ्रमूलान्तं गुणाङ्गुलमुदाहृतम् । तत्समे त्वपरे सूत्रादन्तरं सार्धमात्रकम् ॥
ऊरुमध्ये तु पुरतो जानुमध्ये तथैव च । जङ्घामध्ये च नलकामध्ये चैव पुरोगतम् ॥
तिर्यक्सूत्रं तु संकल्प्य त्वन्तरं तु प्रमीयते । ततत्स्थाने परे चैव तिर्यक्सूत्रं प्रकल्पयेत् ॥
ऊरुमध्यमसूत्रात्तु पूर्वसूत्राद्द्व्याङ्गुलम् । तत्रैवापरसूत्रान्तं यवोनचतुरङ्गुलम् ॥
जानुमध्यमसूत्रात्तु पूर्वसूत्राद्रसाङ्गुलम् । तत्रैव परसूत्रान्तात्पादोनपञ्चमात्रकम् ॥
जङ्घामध्यं तु प्राक्सूत्राद्व्यङ्गुलमुदाहृतम् । तत्रैवापरसूत्रान्तं षड्विंशतियवं भवेत् ॥
प्राक्सूत्रान्नलकामध्यं सार्धवस्वङ्गुलं भवेत् । नलकापरसूत्रान्तं पादोनपञ्चमात्रकम् ॥
द्व्यर्धमङ्गुष्ठयोरग्रं पूर्वसूत्राद्विशेषतः । तत्सूत्रात्पार्ष्णिपर्यन्तं सार्धमन्वंशमिष्यते ॥
प्राक्सूत्रात्कायमध्यस्थसूत्रं स्याद्दिनवाङ्गुलम् । तत्कायमध्यसूत्रात्तु शिरःपृष्ठं युगार्धकम् ॥
तत्कायमध्यसूत्रात्तु ककुत्पञ्चाङ्गुलार्धकम् । उरोमध्यप्रदेशे तु पृष्ठे सार्धषडङ्गुलम् ॥
सूत्रान्मध्योदरे पृष्ठे सार्धवेदाङ्गुलं भवेत् । नाभिप्रदेशे पृष्ठे तु सार्धभूताङ्गुलं भवेत् ॥
कट्टीनाभ्रं षडर्धं स्यात्साधार्धांशं स्फिगग्रकम् । ऊरुमध्यापरं वेदो जानुपृष्ठं तथैव च ॥

जानुसूत्रान्तरं षट्स्याज्जङ्घामध्याच्चतुर्यवम् । [1]सूत्रात्तु [2]नलकादन्तः सार्धवस्वङ्गुलं भवेत् ॥ १७९ ॥
सार्धद्विमात्रमित्युक्तमङ्गुष्ठाग्रात्तु[3] सूत्रकम् ।

[केवलम् [4]]

कर्तरी [5]परहस्ते च [6]हिक्कासूत्रसमा भवेत् ॥ १८० ॥
अभयं दक्षिणे [7]पूर्वे वामे वरदहस्तकम् । सूत्रादभयहस्तस्य मध्यं भूतत्रियङ्गुलम् [8] ॥ १८१ ॥
अधोमुखं वामहस्तं [9]तलमूलं कटिं स्पृशेत् । तत्करे [10]मध्यमाग्रं तु [11]मेढ्राग्रान्तं [12]प्रलम्बकम् ॥१८२॥

जङ्घामध्ये गुणांशं तु नलका द्वयङ्गुलं भवेत् । गुल्फात्पार्ष्णियुगाङ्गुल्यं पूरसूत्रे समायुतम् ।
पार्श्वसूत्रे च मध्यस्थं समसूत्रे तु संस्थिताः । पार्श्वसूत्रात्पुरो बाहुपर्यन्तं चतुरङ्गुलम् ॥
तत्सूत्रादपरे बाहुपर्यन्तं वसुमात्रकम् ॥

[6] C, G: पूर्वसूत्रान्त pour पूर्वसूत्रात्तु [7] A : मौल्यग्रं pour मौल्यग्र [8] B : सूत्र pour मात्र
[9] B omet le *śloka* 177b ; A : पूर्वसूत्र pour पूर्वसूत्रात् [10] G : उरःपूर्वकसूत्रान्तगरमक्षाङ्गुलं भवेत्
[1] C : सूत्रान्त pour सूत्रात्तु [2] B : नालक pour नलक
[3] A : अङ्गुष्ठाग्रं तु pour अङ्गुष्ठाग्रात्तु ; C : अङ्गुष्ठानां तु ; G : अङ्गुष्ठारात्तु
[4] cf. *Aṃśumatkāśyapa* 66, 42b-57:

पूर्वापरकरौ मध्ये कोर्परान्तं तु लम्बकौ । तत्करबाह्यविस्तृतौ चतुरङ्गुलमिष्यते ॥
कर्तरी परहस्ताग्रे हिक्कासूत्रसमा भवेत् । मध्याङ्गुलाग्रमुभयोः स्तनसूत्रसमं भवेत् ॥
अभयं दक्षिणं हस्तं वरदं वाममुच्यते । प्राक्सूत्रादभये हस्ते मध्यं पञ्चदशाङ्गुलम् ॥
वरदं वामहस्तं तु अधोमुखं तु कल्पयेत् । तलमूलं कटिं स्पृष्ट्वा मेढ्रान्तं च तत्करे ॥

मध्याङ्गुलाग्रमालम्ब्य ऊरोर्नीत्रं युगाङ्गुलम् । ऊरुवक्त्रं तु वरदं पृष्ठं नभिसमोद्धृतम् ॥
वरदहस्ततले मध्यात्पूर्वसूत्रात्कलाङ्गुलम् । कर्तरीमणिबन्धात्तु बाहुबाह्यं मुखं भवेत् ॥

अथवा रुद्रभागं तु दशाङ्गुलमथापि वा । कोर्परात्पूर्वसूत्रान्तं नीत्रं सप्तदशाङ्गुलम् ॥
अष्टादशाङ्गुलं वाथ एकोनविंशदेव वा । ऊरुमूलाद्द्वयोरन्तरेकाङ्गुलमुदाहृतम् ॥
ऊरोर्मध्यान्तरं विंशद्यवमानमुदाहृतम् । जान्वन्तरं चतुर्मात्रं जङ्घयोः पञ्चमात्रकम् ॥
नलकान्तरं रसांशं तु भूतांशं गुल्फयोर्भवेत् । पार्ष्ण्यन्तरं चतुर्मात्रं रसांशं पादतलान्तरम् ॥
पादाङ्गुष्ठाग्रयोरन्तद्वर्यन्तरं वसुमात्रकम् । आर्जवं राजसं भावं कल्प्यैवं द्विजसत्तम ॥
कर्तरीपरहस्तौ द्वौ टङ्कं वै दक्षिणे करे । हरिणीं वामहस्ते तु टङ्कं कृत्वा बहिर्मुखम् ॥
हरिणी बाह्यपार्श्वं[मूलं?]वाभ्यन्तराननमेव वा । जटामकुटसंयुक्तं दक्षिणेऽर्धेन्दुशेखरम् ॥
वामेन्दुशेखरं वाथ प्रवालसदृशप्रभम् । त्रिणेत्रं सौम्यवदनं सर्वाभरणभूषितम् ॥
पीताम्बरधरं देवं वस्त्राग्रं नलकान्तकम् । उभयोः पार्श्वयोरेवमम्बरं चोरुमध्यमे ॥

केवलं ह्येवमाख्यातम् ”

[5] cf. *Kāmikāgama* II 48, 1-14a:

इन्दुमौलिप्रतिष्ठां तु वक्ष्ये लक्षणपूर्विकाम् । आहृत्य च शिलादीनि तैः कुर्यात्प्रतिमां गुरुः ॥
चतुर्भुजत्रिणेत्रश्च समपात्स्थानके स्थितः । वराभयहस्तसमायुक्तः पूर्वस्थकरपल्लवः ॥

शैलजं मृण्मयं दारु कर्तव्यं [1]लोहजेऽन्यथा। [2]वेदभूतरसांशं वा ह्यरुमूलात्करान्तकम् ॥ १८३ ॥
तत्करे [3]मध्यमाप्रान्तं कटिसूत्रसमं भवेत्। तत्करं [4]श्रोत्रवक्त्रं वा [5]नाभिसूत्रसमोद्धृतम् ॥ १८४ ॥
तत्करे [6]मध्यमात्सूत्रं कलाङ्गुलमिति स्मृतम्। कर्तरीमणिबन्धात्तु [7]बाहुमानं गुणं भवेत् ॥ १८५ ॥
नवद्व्यङ्गुलं प्रोक्तं [8]कूर्परात्पूर्वसूत्रकम्। ऊरुमूलद्वयोरन्तर्व्योमाङ्गुलमुदाहृतम्[9] ॥ १८६ ॥

वरदं वामहस्ते स्यादभयं दक्षिणे करे। वरदं यदि तं कुर्यादथान्यत्सिंहकर्णकम् ॥
ऊरुसृष्टकरो वापि कटको वा विधीयते। मृगटङ्ककरावन्यौ दोःसीमान्तं व्यवस्थितौ ॥
मृगटङ्कौ तु कर्णान्तौ कर्तरीसंव्यवस्थितौ। पराङ्मुखोऽभिमुख्यो वा मृगटङ्कपराङ्मुखः ॥
दिङ्मात्रं कर्तरीबाहुमध्यमं परिकीर्तितम्। हिक्काया: कर्तरीमध्यमेकत्रिंशदथाङ्गुलम् ॥
मणिबन्धकबाहोस्तु मध्यमं द्वादशाङ्गुलम्। श्रोण्यन्तात्कूर्परादर्वागन्तरं पूर्वहस्तयोः ॥
शरैर्वा कौशकैर्वापि साधैकाङ्गुलरसैस्तु वा। स्तनान्तमभयान्तोच्चं नाभ्यूर्ध्वे पुष्करोदयः ॥
नाभेरभयहस्तान्तं गुणाङ्गुलमुदाहृतम्। स्तनान्तादभयाग्रान्तं द्वादशाङ्गुलमिष्यते ॥
कटकाधःप्रदेशं तु मेढ्रमूलसमं भवेत्। ऊरुमूले कटकान्तं स्पृष्टं वाथ गुणान्तरम् ॥
सार्धभागद्वयेनाथ भागाभ्यां वाथ कल्पयेत्। ऊर्वादिमध्यमात्राणां जान्वोरप्यन्तरः क्रमात् ॥
एकेनार्धेन साधाभ्यां त्रिभिश्च परिकल्पयेत्। अथवा जानुमध्यात्तु साधाङ्गुलमिति स्मृतम् ॥
जङ्घोर्मूलमधाग्रं वेदभूतरसान्तकम्। अङ्गुष्ठपार्ष्ण्योर्मध्यं विद्येशाङ्गुलमीरितम् ॥
भागं पार्ष्ण्यन्तरं प्रोक्तम्।"

cf. *Silparatna* II 22. 17-21:

केवलं गौरिसहितमालिङ्गं च त्रिधा भवेत्। केवलं समपादं च स्थानकं परिकल्पयेत् ॥
अभयं दक्षिणं हस्तं वरदं वाममुच्यते। हरिणीं वामहस्ते तु टङ्कं वै दक्षिणे करे ॥
जटामकुटसंयुक्तं दक्षिणेऽर्धेन्दुशेखरम्। वामेन्दुशेखरं वाथ प्रवालसदृशप्रभम् ॥
त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषितम्। पीताम्बरधरं देवं वस्त्राद्यौ नलकान्तगौ ॥
उभयोः पार्श्वयोरेव मध्यतश्चोरुमध्यमम्। केवलं त्वेवमाख्यातम्।"

[5] A : परहस्तौ च [6] A : हिक्कासूत्रं समं ; B, C : हिक्कासूत्रसमं [7] A : पूर्व
[8] La forme grammaticale correcte est : व्यङ्गुलम् [9] C : स्थूल pour तल
[10] C : मध्यनम्रं ; G : मध्यमूलं [11] G : मेढ्राक्रान्तं [12] A, C : प्रलम्बय

[1] A : लोहजं त्यजेत् [2] A : देव pour वेद [3] C : मध्यनिभ्रान्तं ; G : मध्यमे प्रोक्तं
[4] La meilleure lecture semble être उरुवक्त्रं [5] B : नाभिसूत्रमथोद्धृतम् [6] B : मध्यमासूत्रं
[7] A : बाहुमान्यगुणं भवेत् ; G : : बाहुमाद्य गुणं भवेत; la meilleure lecture semble être : बाहुबाह्य मुखं भवेत्
[8] A : कूर्परात् [9] C : व्योमाङ्गुलमिति स्मृतम् ; G : सोमाङ्गुलमुदाहृतम्

[1]ऊरुमध्यान्तरं सार्धयवद्वयान्तरं [2]युगम् । भूतांशं [3]जङ्घयोरन्ता रसांशं नलकान्तरम् ॥ १८७ ॥
गुल्फान्तरं [4]च भूतांशं पार्ष्ण्यन्तं चतुरङ्गुलम् । [5]पादाङ्गुष्ठाग्रयोरन्तर्वसुमात्रमुदाहृतम् ॥ १८८ ॥
कर्तरीमणिबन्धान्तमूर्ध्वं [6]करसमं भवेत् । [7]कर्तर्यग्रं तु हिक्कान्तं[8] दक्षिणेऽदक्षिणेऽपि च ॥ १८९ ॥
टङ्कं कृष्णमृगं धृत्वा [9]बाह्येऽबाह्ये तु वाम्रके । आर्जवं राजसो भावो जटामकुटमण्डितम् [10]॥ १९० ॥
[11]मकुटे दक्षिणे कृत्वा [12]प्रवालाद्यङ्गसाधनम् । सर्वाभरणसंयुक्तं पीताम्बराग्निनेत्रकम् ॥ १९१ ॥

[गौरीसहितम् गौर्यालिङ्गितं च[13]]

एवं केवलमाख्यातम् ; वामे गौरीसमायुतम् [14]। [15]सहितं तदिति[16] ख्यातमालिङ्गं[17] वक्ष्यतेऽधुना॥१९२

---

[1] A : ऊरुमध्यान्तरस्यार्ध pour ऊरुमध्यान्तरं सार्ध
[2] B : युतम्
[3] B : जङ्घयोरन्तः सांशुजं नालकान्तरम्
[4] B : तु pour च
[5] B : पादकाङ्गुष्ठयोरन्तर् ; G : पादाङ्गुष्ठाग्रयोरन्तं
[6] A : कारसमं ; G : कायरसं
[7] B omet le demi-*śloka* 189b
[8] A : कर्तर्या न तु हृत्कान्तं
[9] A, G : बाह्यबाह्यं तु वाम्रकौ ; B : बाह्यबाह्ये तु वाम्रके
[10] cf. *Kāmikāgama* II 48, 20b-25a:

उष्णीषभूषणं कुर्यात्त्रिमात्रेण विशेषतः । पार्श्वयोः पुरतः पृष्ठे चतुष्पूरिसमन्वितम् ॥
मध्ये मकरकूटं स्यात्सप्तकोटरसंयुतम् । पार्श्वयोः पत्रकूटं स्यात्पृष्ठे स्याद्रत्नकूटकम् ॥
अग्रे दशाङ्गुलं तस्य मूले तु मुखविस्तरम् । तत्तत्त्रिगुणनाहं तु वामेऽवामेऽर्धचन्द्रकम् ॥
वामे महाफणिं तस्य सर्वालंकारभूषितम् । जटाभिः पञ्चभिर्ग्रन्थि त्रिमात्रेण विशेषतः ॥
एकधा तु त्रिधावृत्य शेषाभिः पार्श्वलम्बनम् । जटामकुटमेतद्धि सर्वालंकारसंयुतम् ॥

[11] A : मकुटं
[12] A : प्रवालाभ्यंगसाधनम् ; B : प्रावला भङ्गसाधनः ; C : प्रवालभगबाधनः ; G : प्रवालद्विगबाधनः
[13] cf. *Aṃśumatkāśyapa* 66, 56-62a:

वामे गौरीसमन्वितम् ।

तद्गौरीसहितं ख्यातं भिन्नपीठैक एव वा । तदेव भङ्गसंयुक्तं देवीदेवौ परस्परम् ॥
देववरदहस्तेन देव्या बाह्यपराश्रितम् । स्तननाभ्यन्तरे वामपार्श्वमालिङ्गितं कुरु ॥
पार्श्वसूत्रात्परे वामबाहुमालिङ्गितं तु वा । देवीदक्षिणहस्तेन शम्भोर्दक्षिणपार्श्वतः ॥
कटिसूत्रोपरि स्पृष्ट्वा पुष्पं वामकरोद्धृतम् । अथवा प्राग्वदेवेशो देव्यास्तु दक्षिणे करे ॥
रक्तोत्पलं परिग्राह्य वामहस्तं प्रलम्बितम् । एवमालिङ्गमूर्तिं तु त्रिधा मार्गेण कल्पयेत् ॥
सर्वाभरणसंयुक्तं प्रभामण्डलसंयुतम् । चन्द्रशेखरमाख्यातम् ।"

देवस्य [1]वामहस्तेन [2]गौरीमालिङ्गितां कुरु । [3]देव्याः सव्यकरेणैव [4]देवदेवं तथा कुरु ॥ १९३ ॥
संस्थितौ [5]पद्मपीठे तु [6]ह्यालिङ्गं चासनेऽपि वा । [7]देवं यथासुखासीनं तथा [8]भद्रासने कुरु ॥ १९४ ॥
तस्य वामकरोर्ध्वे तु [9]देव्यासीनाङ्घ्रिसारिका । उत्पलं दक्षिणे हस्ते [10]धृतं वरदवामकम् [11]॥ १९५ ॥
देवस्य वामहस्तेन[12] [13]देवीमालिङ्गितां कुरु । [14]विनाभयं तु देवस्य करं विज्ञेयमुद्रया ॥ १९६ ॥

[कालहारिलक्षणम् [15]]

[16]चन्द्रशेखरमेवं स्यात् ; [17]कालहारी त्वथोच्यते । वसुप्रवेशधर्मांशं [18]रुद्रार्काङ्गुलमानतम् ॥ १९७ ॥
ललाटमध्यतः [19]सव्यनेत्रमध्ये[20] तथैव च । हिक्कामध्यस्य वामे तु [21]वामस्तनाक्षदक्षिणे ॥ १९८ ॥
[22]वामे तु नाभिमध्यस्य [23]सूत्रान्तरं शिवाङ्गुलम् । वामे तु [24]मेढ्रमूले [25]तु सूत्रं [26]भूताङ्गुलं भवेत् ॥१९९॥
स्थिताङ्घ्रिगुल्फमध्ये तु पूर्वसूत्रं [27]प्रलम्बयेत् ।

---

cf. *Kāmikāgama* II 48, 32-34a:

चन्द्रशेखर एवं स्याद्देव्या च सहितो न वा । सापीठाभिन्नपीठा वा देवेनालिङ्गिताथवा ॥
तयालिङ्गितदेवो वा अन्योन्यालिङ्गितस्तु वा । आलिङ्गनयुतो वा स्यान्निराभङ्गोऽथ वामतः ॥
एवं लक्षणमाख्यातम् ''

voir aussi *Ajitāgama* 36, 245-246.

[14] C, G : समन्वितम् pour समायुतम् [15] B : विहितं pour सहितं [16] G : इह pour इति
[17] B : ह्युमालिङ्गं pour आलिङ्गं

[1] G : वामहस्ते तु [2] A : गौरीमालिङ्गनं कुरु ; B : गौर्यामालिङ्गनं कुरु ; C, G : गौरीमालिङ्गितं कुरु
[3] A : देवस्यास्सकरेणैव ; B : देवस्यापि करेणैव [4] A : देवदेवीं [5] A : पद्मपीठं तु
[6] A : मूललिङ्गं चासनेऽपि वा ; B : मूललिङ्गासनेऽपि वा [7] C, G : देवी pour देवं
[8] C, G : भद्रासनं कुरु
[9] G : देव्यासीनं प्रसारिका [10] A : धृता pour धृतं [11] B : वामके pour वामकं [12] A : वामहस्ते तु
[13] A, B : देवीमालिङ्गनं कुरु ; C : देवीमालिंङ्गनं कुरु [14] C : विना भावं तु
[15] cf. *Aṃśumatkāśyapa* 80, 1-4:

अथ वक्ष्ये विशेषेण कालदाहस्य लक्षणम् । वसुनन्ददशांशं वा नतमानं द्विजोत्तम ॥
रुद्रभान्वङ्गुलं वाथ नतमानमथोच्यते । ललाटदक्षिणे सव्यनेत्रमध्ये तथैव च ॥
हिक्कामध्यस्य वामे तु वामस्तनाक्षदक्षिणे । नाभिमध्यात्तु वामे तु सूत्रान्तरं यवाष्टकम् ॥
मेढ्रमूलस्य मध्यात्तु वामे षडङ्गुलं नयेत् । स्थिताङ्घ्रिगुल्फमध्ये तु पूर्वसूत्रं प्रलम्बयेत् ॥

[16] C. G : इन्दु pour चन्द्र [17] A : कलाहारीमथोच्यते ; C : कालहारिरथोच्यते
[18] A : रुद्रार्काङ्गुलवानकम् ; B : रुद्रार्काङ्गुलमेनकम् ; C : रुद्रार्काङ्गुलवानतम् [19] A : सर्वे pour सव्य
[20] B : वामनेत्रे pour नेत्रमध्ये [21] A : वामहस्तेन दक्षिणे
[22] C omet le demi-*śloka* 199a [23] A : सूत्रान्तरशिखाङ्गुलम् [24] C : बाहु pour मेढ्र
[25] B : च pour तु [26] B : सूत pour भूत [27] C : प्रकल्पयेत

[चतुर्भुजकालारिरूपम् [1]]

सव्यपादं स्थितं पीठे नृत्तस्य [2]स्थितपादवत् ॥ २०० ॥

उद्धृतं वामपादं तु कुञ्चितं तलमुद्धृतम् । [3]तदङ्गुष्ठं स्पृशेदीषत्कालस्य हृदयं विदुः ॥ २०१ ॥

[4]सदंष्ट्राग्रं त्रिनेत्रं च जटामकुटमण्डितम् । युगं वा मूर्तिहस्तं [5]वाप्येवमेव प्रकल्पयेत् ॥ २०२ ॥

त्रिशूलं दक्षिणे [6]पूर्वे [7]कर्णान्तं [8]तत्समुद्धरेत् । परशुं परहस्ते तु [9]सूचिं वामे तु योजयेत् ॥ २०३ ॥

वामपार्श्वेऽपरं हस्तं[10] कर्तव्यं [11]हरपल्लवम् । [12]सूच्यग्रात्पूर्वसूत्रान्तं चतुर्दशाङ्गुलं भवेत् ॥ २०४ ॥

[13]कर्णमूलधृते हस्ते मणिबन्धान्तरं तथा । [14]हिक्कासूत्राच्तु मुष्टिस्थ[15]परशोद्वर्यन्तरं मुखम् ॥ २०५ ॥

[16]हरपल्लवहस्ते त्वनामिकोष्णीषमन्विता । [17]कर्णान्तमणिबन्धान्तं शूलहस्तसमान्तरम् ॥ २०६ ॥

---

[1] cf. *Aṃśumatkāśyapa* 80, 5-12:

देवस्य दक्षिणं पादं पद्मपीठोपरि स्थितम् । प्रथमनृत्तमूर्तेस्तु दक्षिणस्थितपादवत् ॥
वामपादं तथोद्धृत्य कुञ्चितं तलमुद्धृतम् । अङ्गुष्ठमुद्धृताङ्घ्रेस्तु कालस्य हृदये न्यसेत् ॥
सदंष्ट्रास्यं त्रिणेत्रं च जटामकुटमण्डितम् । चतुर्हस्तसमायुक्तमष्टहस्तमथापि वा ॥
दक्षिणे पूर्वहस्ते तु शूलं कर्णान्तमुद्धृतम् । दक्षिणे परहस्ते तु परशुं वरदं तु वा ॥
वामे पूर्वकरं नाभिसीमान्तं सूच्यधोमुखम् । सूच्यग्रात्पूर्वसूत्रान्तं कला मन्वङ्गुलं तु वा ॥
कर्णाच्छूलधरे हस्ते मणिबन्धान्तरं तथा । वामे तु परहस्तं तु विस्मयं परिकल्पयेत् ॥
हिक्कासूत्रसमं टङ्ककरं तद्वयन्तरं मुखम् । उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ॥
कर्णान्तमणिबन्धान्तं शूलहस्तसमान्तरम् । चतुर्हस्तं समाख्यातम्"

voir aussi *Ajitāgama*, 36, 258-259.

[2] **B** : स्थिति pour स्थित

[3] **A** : तदङ्गुष्ठसमं स्पृशेदीषत्कालस्य ; **B** : तदङ्गुष्ठसमं स्पर्शे कालस्य ; **C** : तदङ्गुष्ठे समं दीर्घकालस्य ; **G** : तदङ्गुष्ठसमं स्पृशेत्कालस्य

[4] **A** : सदंष्ट्रा श्रान्तिनेत्रं च ; **B** : सदंष्ट्रा श्रान्तनेत्रं च [5] **A** : वा एवमेव ; **C** : वा एवमेवं

[6] **A** : पर्व pour पूर्वे ; **B** : पर्वे ; **C** : पुण्यं ; **G** : पूर्वं [7] **B** : कर्णान्ते ; **G** : कण्ठान्तं

[8] **B** : तत्समुत्सरेत् [9] **A** : सूचिर्वामेन योग्यकम् ; **B** : सूचिं वामेन योग्यकम् ; **C, G** : शुचिर्वामेन-योगतम्

[10] Le mot हस्त se trouve ici au neutre au lieu du masculin

[11] **A** : हलपल्लवम् ; voir *paṭala* 32 *śloka* 13a [12] **C** : सुव्यग्रात् pour सूच्यग्रात्

[13] **B** : कर्णमूले धृते ; **C, G** : कण्ठमूलं धृते

[14] **A** : हिक्कामन्दाग्रमुष्टिस्थ ; **B** : हिक्कामन्दाग्रिमुष्टिस्त ; **C** : हिक्कामदाङ्घ्रयष्टिस्थ

[15] **C** : परशुवज्रकम् [16] **A** : हलपल्लवहस्ते तु : **B** : फलपल्लवहस्तेषु ; **G** : फलं पल्लवहस्ते तु

[17] **G** : कण्ठान्तं pour कर्णान्तं

[अष्टभुजकालारिरूपम्[1]]

अन्यदष्टभुजं[2] वक्ष्ये शूलं परशुवज्रकम् । खड्गं दक्षिणहस्ते तु विस्मयं खेटपाशकम् ॥ २०७ ॥
सूचिर्वामकरेषूक्तं[3] [4]विद्रमाभासरौद्रकम् । अधस्ताच्छयितः कालः पादौ हस्तौ द्विनेत्रयुक्[5]॥ २०८ ॥
[6]सदंष्ट्रं पाशपाणिं च [7]करण्डमकुटान्वितम् । असृग्धाराश्च [8]निष्क्रान्ता महाभीतिसमन्वितम् २०९
शाययेदूर्ध्ववक्त्रं तु [9]सपाशं हृदयेऽञ्जलिः[10] । [11]कालारिमूर्तिराख्याता कल्याणमथ वक्ष्यते ॥२१०॥

[कल्याणमूर्तिः[12]]

ललाटमध्यमाद्धामे तन्नेत्रस्यावसानके । वामनासापुटान्ते च हिक्कामध्ये तु लम्बयेत् ॥ २११ ॥

---

[1] cf. *Aṃśumatkāśyapa* 80, 12-16:

"अष्टहस्तमथ शृणु ॥
शूलं च परशुं वज्रं खड्गं दक्षिणहस्तके । विस्मयं खेटकं पाशं सूचिहस्तं च वामके ॥
विद्रुमस्य निभाकारं सर्वाभरणभूषितम् । कालहा मूर्तिराख्याता अधस्तात्काल उच्यते ॥
द्विभुजं च द्विपादं च सुदंष्ट्रं पाशपाणिनम् । करण्डमकुटोपेतमसृग्धारासुनिर्गमम् ॥
महाभयसमायुक्तं सपाशहृदयाञ्जलिम् । विकीर्णपादं मां दृष्ट्वा शाययेदूर्ध्ववक्त्रकम् ॥
कालहा मूर्तिराख्याता"

[2] A : अष्टभुजं pour अष्टभुजं [3] A : सूक्तं pour षूक्तं ; C : युक्तं [4] B : विद्रुमासनरौद्रकम्
[5] G : धृक् pour युक् [6] A : संदष्ट pour सदंष्ट्रं [7] B : करण्डं कुक्कुटान्वितम्
[8] G : निष्कामत् pour निष्क्रान्ता [9] A, B : सपाद pour सपाशं
[10] B : हृदयाञ्जलिः pour हृदयेऽञ्जलिः [11] A : कालहा pour कालारि

[12] cf. *Aṃśumatkāśyapa* 71, 1-19:

अथ कल्याणमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना । ललाटम-यमाद्धामे वामनेत्रावसानके ॥
वामनासापुटान्ते च हिक्कामध्ये तु लम्बयेत् । दक्षिणे नाभिम-यात्तु वेदवह्न्यङ्गुलं तु वा ॥
नीत्वा हिक्काङ्घ्रिगुल्फस्य मध्ये सूत्रं प्रलम्बयेत् । अन्तरं मानसूत्रं च समभङ्गं यथा तथा ॥
सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् । दक्षिणे पूर्वहस्तं तु गौरीदक्षिणहस्तधृत् ॥
वरदं वामहस्तं तु परहस्तद्वये ततः । दक्षिणे परशुं वामे परे कृष्णमृगीधरम् ॥
जटामकुटसंयुक्तं सर्वाभरणभूषितम् । देवं प्रवालवर्णाभं देवेशस्य विशेषतः ॥
सस्यश्यामनिभा देवी प्राग्वन्मानादिसंयुता । उत्पलं वामहस्तेन धृतं दक्षिणहस्तकम् ॥
शम्भोर्हस्तेन संग्राह्य लज्जया लम्बनान्विता । पार्वत्यानुगता श्रीर्भूः सर्वाभरणभूषिता ॥
हस्ताभ्यां संस्पृशेदेते गौर्यास्तु[हि]कटिं द्विज । देवाग्रे कारयेत्कुण्डे होमकर्म प्रजापतिः ॥
शम्भोर्वै स्तनसीमान्तं प्रजेशस्योदरं बुधः । चतुर्भुजं चतुर्वक्त्रं सर्वाभरणभूषितम् ॥
कुण्डिकां साक्षमालां च वामेऽवामे धरेत्परे । स्रुक्स्रुवौ पूर्वहस्ते तु धरेद्वामेतरे क्रमात् ॥
उत्तराभिमुखासीनं पद्मपीठे प्रजापतिम् प्राग्गौ देवीदेवेशौ देवी देवस्य दक्षिणे ॥

सव्ये [1]च नाभिमध्ये तु सूत्रान्तं गुणमात्रकम् । स्थिताङ्घ्रिगुल्फमध्ये[2] तु पूर्वसूत्रं [3]प्रसारयेत् ॥२१२॥
द्वयन्तरं च [4]तथांशं च समभङ्गं [5]यथा कुरु । कुञ्चितं दक्षिणं पादं वामपादं तु [6]सुस्थितम् ॥ २१३ ॥
[7]सव्यपूर्वकरेणैव देव्याः सव्यकरं ग्रहेत् । वरदं वामहस्तं तु [8]परहस्तद्वयोरपि ॥ २१४ ॥
परशुं सव्यहस्ते तु मृगं वामे तु [9]संधरेत् । जटामकुटसंयुक्तं दिव्याभरणभूषितम् ॥ २१५ ॥
दिव्यवस्त्रैरलंकृत्य [10]प्रवालसदृशप्रभम् । श्यामवर्णनिभां गौरीं दुकूलवसनान्विताम् ॥ २१६ ॥
उत्पलं वामहस्ते तु [11]मकुटं केशबन्धितम् । [12]सुस्थितं वामपादं [13]चापीतरं कुञ्चितान्वितम् ॥ २१७ ॥
ईषल्लम्बितवक्त्राढ्यां[14] दक्षिणे तु व्यवस्थिताम् । [15]तस्याश्चैवापरे पार्श्वे [16]श्रीभूमी चैव [17]कारयेत् ॥
तयोर्हस्तोभयाभ्यां तु [18]गौर्यास्त्वपरं संस्पृशेत् । देवस्याग्रे [19]च कुण्डे तु जुहुयात्तु प्रजापतिः ॥ २१९ ॥
होमस्योत्तरदेशे तु [20]हरिर्वर्धनि[21]संयुतः । देवस्य वरदे हस्ते [22]गौरीं ददेत्तदम्बुना ॥ २२० ॥
शक्रादिसर्वदेवाश्च[23] शक्तियुक्ता वृताः स्थिताः[24] ।

दक्षिणाभिमुखो विष्णुर्हिमस्योत्तरदिक्स्थितः । शम्भो स्त्रिग्रसीमान्तं श्रेष्ठं हीनं स्तनान्तकम् ॥
तयोर्मध्येऽष्टभागेन नवधा केशबोधयम् । श्यामवर्णः समाभङ्गः शङ्खचक्रं परे करे ॥
हिरण्यकरकेणापः पूर्वहस्तद्वयोरपि । संग्राह्य वरदे हस्ते दद्यादुदकपूर्वकम् ॥
अनादिगोत्रसंभूतः स शिवः परमेश्वरः । आदिगोत्रासुमां गौरीं तथैवास्मै ददाम्यहम् ॥
इत्युक्त्वा वरदे हस्ते दद्याद्भक्त्योदकं हरिः । अष्टलोकेशविद्येशाः सिद्धयक्षगणादयः ॥
ऋषयश्चैव गन्धर्वा मातरश्चान्यदेवताः । ततश्छक्तिसमोपेता हृदयाञ्जलिसंयुताः ॥
संभ्रान्तमनसोपेताः संवीक्ष्य परितः स्थिताः । एवं कल्याणमूर्तिस्तु..... ॥

voir aussi *Ajitāgama*, 36, 260-267.

[1] A : तु pour च [2] A : मध्यं pour मध्ये [3] C, G : वि pour प्र
[4] B : तथेशश्च [5] A : तथा pour यथा [6] C, G : संस्थितम्
[7] A : सव्ये पूर्वं pour सव्यपूर्व [8] A : त्रिपा pour पर
[9] A : संस्मरेत् [10] A : प्रवालसदृशं विभुम् [11] C : मुकुटं [12] A : संस्थितं ; C : सस्मितं
[13] A : तु इतरं pour चापीतरं [14] A, B : वस्त्राढ्यां pour वक्त्राढ्यां [15] A : तस्यां चैव परे
[16] A : श्रीभूमिं चैव ; B : स्त्रीभूमिश्चैव ; G : श्रीभूमिश्चैव [17] C : तारयेत्
[18] A : गौर्या स्वपरसंस्पृशौ ; B : गौर्या स्वपरसस्पृशौ ; C : भार्या स्वपरसंस्पृशौ [19] A : तु pour च
[20] A : हरिर्वर्धनसंधृतः
[21] La forme grammaticale correcte est वर्धनी ; mais le mètre ne serait pas respecté.
[22] A : गौरीदत्तं pour गौरीं ददेत्
[23] A : सर्वदेवश्च pour सर्वदेवाश्च ; B : सर्वे देवाश्च ; G : दिव्यदेवांश्च
[24] Il semble qu'il y ait là une lacune; voir page 75 note 9

[[1]नृत्तरूपम् ; तत्र भुजङ्गत्रासनृत्तम्]

भुजङ्गत्रासमुद्दण्डमत्युद्दण्डं त्रिधा भवेत् ॥ २२१ ।
[2]त्र्यक्षं चतुर्भुजं शान्तं द्विपादं [3]च [4]जटाधरम् । [5]सुस्थितं दक्षिणं पादमपस्मारोपरि स्थितम् ॥२२२
तस्य जान्वन्तमुद्धृत्य[6] वामपादं [7]तिरस्तलम् । पताका [8]दक्षिणे हस्ते [9]वामहस्तं तु वर्तितम् ॥२२३॥
[10]प्रकोष्ठे तु [11]पताकायां सपत्रं पन्नगं न्यसेत् । [12]डमरुं सव्यहस्ते तु वामहस्तेऽग्निमुद्धरेत् ॥ २२४ ॥
[13]कर्णान्तं दक्षिणे सूचि हिक्कान्ताग्निकराग्रकम्[14] । हिक्कान्तं स्यात्पताकाग्रं नाभ्यन्तं जानुरुद्धृतः ॥
तज्जानुपरिवृत्तस्य[15] मणिबन्धान्तरं [16]मनुः । [17]तज्जङ्घादक्षिणे हस्ते [18]मध्याग्रान्तं मुखं भवेत् ॥ २२६ ॥

---

[1] cf. *Kāmikāgama* II 45, 1-13a:

नृत्तमूर्तिप्रतिष्ठां तु वक्ष्ये तल्लक्षणान्विताम् । चतुर्भुजस्त्रिणेत्रश्च संविकीर्णजटायुतः ॥
जटामकुटसंयुक्तो वक्रनागफणावृतः । पृष्ठगाः पार्श्वगास्ताः स्युः पश्चाद्येकैकवृद्धितः ॥
त्रिंशत्संख्यावसानाः स्युर्जटास्ताः सान्तरालकाः । धुत्तूरारग्वधार्कादिपुष्पयुक्ताः सपिङ्गलाः ॥
कृताञ्जलिपुटोपेतजाह्नव्या दक्षिणस्थया । बालचन्द्रेण संयुक्तो वामपार्श्वस्थितेन च ॥
युक्तो वकुलमालाभिर्मुक्तादामोरगादिभिः । व्याघ्राजिनाम्बरो दीप्तः सर्वाभरणभूषितः ॥
वामदोर्मूलमालम्बिद्वीपिचर्माम्बरान्वितः । दिव्याम्बरान्वितो वापि मृगाजिनयुतोऽपि वा ॥
करस्थब्रह्मकपालेन नानापुष्पैरलंकृतः । धृतवाराहदन्ताग्रः शार्दूलनखकच्छपः ॥
शाङ्खिकैर्मणिभिः प्रोतमालया हृदि भूषितः । स्थितो दक्षिणपादेन वामेनोपरिवर्तिना ॥
कुञ्चितावर्तमानाङ्घ्रिः सुप्रसारिततत्करः । अम्बिकामुखबिम्बाब्जभ्रमरीकृतलोचनः ॥
आबद्धकिङ्किणीयुक्तस्तद्वन्नूपुरशोभितः । वामदक्षिणकर्णाढ्यपत्रिकानककुण्डलः ॥
दक्षाभयकरस्थेन भुजङ्गेनोत्फणेन च । वामापरकरस्थेन वह्निना दक्षकेन तु ॥
डिण्डिमेन समायुक्त उपवीतेन संयुतः । गोक्षीरधवलप्रख्य आदित्याङ्गुलभङ्गयुक् ॥
नानासर्पसमायुक्तस्त्वपस्मारोपरि स्थितः ।

voir aussi *Ajitāgama* 36, 228b-233

[2] A : त्रियक्षं pour त्र्यक्षं [3] A : तु pour च [4] A : जटाधनुः; C : जटातनम् ; G : जटाननम्
[5] A : संस्थितं [6] B : उत्सृज्य pour उद्धृत्य [7] A : त्र्यकरतलम् ; B : त्रिकराङ्गुलम् [8] A : दक्षिणं हस्तं
[9] Le ms. B omet la portion entre le premier *pāda* du *śloka* 223b et le second *pāda* du *śloka* 224b et lit: पताका दक्षिणे हस्ते वामहस्तेऽग्निमुद्धरेत्
[10] B omet le *śloka* 224 [11] C : पदार्कायां [12] A : डमरुकं pour डमरुं
[13] A : कर्णादं ; C : अर्कान्तं ; G : कण्ठान्तं
[14] A : करागृहम् pour कराग्रकम् ; C : कशागृहम् ; G : कशाग्रहम्
[15] A : परिवर्तस्य pour परिवृत्तस्य [16] C, G : मनुम् pour मनुः
[17] A : तज्जङ्घादक्षिणे ; C, G : तज्जङ्घार्तिसे [18] B : मध्याकान्तं

अर्धचन्द्र [1]तु धुत्तूरं नाग[2]स्फीतशिरस्तथा । बकपक्षसमायुक्तं भानुपुष्पयुतं[3] शिरः ॥ २२७ ॥
[4]तनवस्तु जटाभारा जटाग्रे जाह्नवीं धरेत् [5]। [6]दक्षिणे तां विना वापि शिरश्चक्रसमन्वितः ॥ २२८ ॥
कुण्डलं दक्षिणे कर्णे पत्रं वै वामकर्णके । दक्षिणे [7]कर्णपुष्पं वाप्युभयोरपि चैव वा ॥ २२९ ॥
व्याघ्रचर्मोत्तरीयं च कृष्ण[8]चर्माम्बरैर्युतम् । प्रभामण्डलसंयुक्तमपस्मारोपरि स्थितम् ॥ २३० ॥

[[9]नतमानं सूत्रपातश्च]

धर्मरुद्रार्कमात्रं वा नतमानं विधीयते । प्रभामण्डलमध्यात्तु ललाटोष्णीषमध्यमात् ॥ २३१ ॥
नीत्वा तु दक्षिणे व्योममात्रं[10] नेत्रान्तमाश्रितम् । सव्यनासापुटान्ते च[11] हिक्कायां[12] नाभिमध्यमे २३२
[13]वामोर्वभ्यन्तरे [14]लम्ब्यं [15]सव्याङ्घ्रिगुल्फमध्यमे । लम्बितं पूर्वसूत्रं [16]स्याल्ललाटसूत्रकान्तरम् ॥२३३
[17]गुल्फसूत्रान्तरं चैव वेद[18]मात्रमिति स्मृतम् । हिक्कामध्यात्तु[19] सूत्रान्तं[20] वसुमात्रमुदाहृतम् ॥२३४

---

[1] B : च pour तु [2] B : शीत pour स्फीत ; G : बीत [3] G : धृतं pour युतं
[4] A, G : तनवस्तु जटाभारं जटाग्रे ; C : तनवस्तत्तटाभारजटाग्रे
[5] Pour la définition de la जाह्नवी voir *Kāmikāgama* II 46, 45-47a:
देवस्य वक्त्रमानेन जाह्नव्यायाम उच्यते । द्विभुजा च त्रिनेत्रा च करण्डमकुटान्विता ॥
सर्वाभरणसंयुक्ता कृताञ्जलिपुटान्विता । ऊर्ध्वभागादधोभागं तोयाकारेण कारयेत् ॥
गङ्गादेव्यानया देवः संयुक्तो वा विवर्जितः ।
[6] A : दक्षिणे तां विनो वापि ; B : दक्षिणे तापिनो वापि [7] B, G : पुष्पमालां pour कर्णपुष्पं
[8] C : वर्ण pour चर्म
[9] cf. *Aṃśumatkāśyapa* 68, 4b-8a:
प्रागुक्तविधिना ग्राह्य बिम्बमानं द्विजोत्तम । उत्तमदशतालेन सर्वाङ्गं परिकल्पयेत् ॥
भानुरुद्रदशांशेन तुङ्गे वृत्तानतं भवेत् । उष्णीषमध्यमात्सव्ये ललाटान्मध्यदक्षिणे ॥
नीत्वा शिवाङ्गुलं सव्ये नेत्रान्ते च पुटान्तके । हनोः सव्ये तु हिक्कायां मध्ये नाभेश्च मध्यमे ॥
वामोर्वभ्यन्तरे चैव स्थिताङ्घ्रौ गुल्फमध्यमे । प्रभामण्डलमध्यात्तु पूर्वसूत्रं प्रलम्बयेत् ॥
[10] A, B, C : मात्रां pour मात्रं [11] A : पुटं चैव pour पुटान्ते च [12] A : हिक्काया pour हिक्कायां
[13] B, C, G : वामोर्वभ्यन्तरे [14] C : लङ्घ्य ; G : लम्ब्य
[15] A : सव्याङ्घ्री pour सव्याङ्घ्रि ; B : सव्याङ्घ्रेः [16] B : स्याल्ललाटे सूत्रयेऽन्तरम्
[17] cf. *Aṃśumatkāśyapa* 68, 8b-10:
ललाटात्सूत्रनीत्रं तु युगांशं वार्धहीनकम् । गुल्फात्सूत्रान्तरं चैव तद्वदेव विधीयते ॥
हिक्कामध्यात्तु सूत्रान्तं सार्धं सप्ताष्ट वाङ्गुलम् । मकुटे बकपक्षाग्रात्तार्धाष्टांशं तथैव च ॥
ऊर्ध्वकुक्षिं स्पृशेत्पूर्वसूत्र एवं प्रकल्पयेत् ।
[18] A : सूत्र pour मात्र [19] C : मध्यं तु pour मध्यात्तु [20] C, G : सूत्रान्तर pour सूत्रान्तं

[1]सूत्रात्तु बकपक्षाग्रे[2] मूर्तिरङ्गुलमिष्यते । [3]स्पृष्टोर्ध्वकुक्षिमालम्ब्यं [4]युक्त्या शेषान्तरं विदुः ॥ २३५ ॥
[5]सूत्राद्वर्तितबाह्वग्रं[6] [7]ससप्ततत्कराग्रजम् । [8]तस्मादपरबाह्वग्रं वेदमात्रमुदाहृतम् ॥ २३६ ॥
[9]तस्मादनलहस्ताग्रं [10]चत्वारिंशतिमात्रकम् । तत्सूत्रात्सव्यबाह्वग्रं विंशत्यङ्गुलमिष्यते ॥ २३७ ॥
[11]तस्माद्डमरुके हस्ते मणिबन्धस्य [12]बाह्यके । विंशत्यङ्गुलमाख्यातं चत्वारिंशति वाङ्गुलम् ॥२३८॥
[13]हिक्कान्तमणिबन्धोर्ध्वं [14]सूच्यग्रात्कर्णसीम तु । [15]सूच्यग्रात्कर्णबाह्यान्तं चत्वारिंशतिमात्रकम् ॥२३९
सपञ्चचत्वारिंशद्वा [16]पञ्चाशद्धान्तराङ्गुलम् । [17]पताका[18]तलमध्यात्तु सूत्रमर्कद्वयाङ्गुलम [19] ॥२४० ॥
[[20]तन्मध्यमाङ्गुलाग्रं तु हिक्कासूत्रसमोद्धृतम् ।] [21]तद्वस्ते कूर्परं सूत्राच्चत्वारिंशतिमात्रकम् ॥२४१

---

[1] A : सूत्रं तु [2] A : अग्र pour अग्रे ; C, G : अग्रं [3] A : स्पृष्टोर्ध्वं pour स्पृष्ट्वोर्ध्वं

[4] A : युक्ता pour युक्त्या

[5] cf. *Aṃśumatkāśyapa* 68, 11-12, 16b-19 et 23:
तत्सूत्राङ्गोलबाह्वग्रमर्धाधिककलाङ्गुलम् । तस्मादपरबाह्वग्रं युगाङ्गुलमुदाहृतम् ॥
तस्मादग्निकराग्रान्तं साष्टत्रिंशाङ्गुलं तु वा । चत्वारिंशतिमात्रं वा"..... ॥
दक्षिणे पूर्वसूत्रात्तु बाह्वग्रं विंशदङ्गुलम् । तस्माद्डमरुके हस्ते मणिबन्धस्य बाह्यकम् ॥
अष्टात्रिंशतिमात्रं वा त्रिंशदङ्गुलमेव वा । चत्वारिंशतिमात्रं वा वामे संख्याः क्रमान्नयेत् ॥
तद्वस्ते मणिबन्धोर्ध्वं हिक्कासूत्रसमं भवेत् । डमरुके मध्यपीठस्य सूचि कर्णान्तमुद्धृतम् ॥
तर्जन्यग्रं तु सूचिः स्यात्तर्जनी ऋजुका भवेत् । सूच्यग्रात्कर्णसीमान्तं चत्वारिंशतिमात्रकम् ॥
सपञ्चचत्वारिंशच्च पञ्चाशन्मात्रकं तु वा ।

[6] B : सूत्राद्वर्तनबाह्याग्रं [7] A : सप्तदशकराग्रजम् [8] A : तस्मादापर pour तस्मादपर

[9] Les manuscrits C et G omettent les *śloka* 237 et 238a

[10] La forme grammaticale correcte est चत्वारिंशद्

[11] B : तस्माडमरुघं हस्ते [12] A : बाह्यकम्

[13] B : हिक्कान्तमणिबन्धार्धं ; C : हिक्कान्तं मणिबन्धोच्चं [14] C : सूच्यग्रं कर्णसीमकम्

[15] B : मध्याग्रात् pour सूच्यग्रात् [16] C : पञ्चाशद्व्यन्तराङ्गुलम्

[17] cf. *Aṃśumatkāśyapa* 68, 24b-26a:
दक्षिणे पूर्वहस्तं तु अभयं परिकल्पयेत् । प्राक्सूत्रादभये हस्ते मध्यं भानुद्व्याङ्गुलम् ॥
तन्मध्यमाङ्गुलाग्रं तु हिक्कासूत्रसमोद्धृतम् । सूत्रात्कोर्परनीत्रं च चत्वारिंशतिमात्रकम् ॥

[18] B : पताकि pour पताका ; C : पदार्क

[19] Après 240b les mss A, B et C ajoutent les demi-*śloka* 243b et 244a.

[20] Les Mss A, B et C omettent le demi-*śloka* 241a

[21] A : तद्वस्त्रैः कोर्परं pour तद्वस्ते कूर्परं

[1]सूत्रात्कक्षान्तरं तत्र भान्वङ्गुलमिति स्मृतम् [2]। सूत्रान्मध्योदरे[3] वामे नीव्रं वेशाङ्गुलं भवेत् ॥२४२॥
वामस्फिक्पिण्डनीव्रं तु सूत्राद्वै द्वादशाङ्गुलम्। सूत्रात्कुञ्चितजानोस्तु[4] द्वयन्तरं तु दशाङ्गुलम् ॥२४३॥
स्थिताङ्घ्रिजानोर्वामाङ्घ्रिजानुनीव्रं कलाङ्गुलम् । [5]स्थिताङ्घ्रेर्वामपार्ष्ण्यन्तं वेदरुद्राङ्गुलं भवेत् ॥ २४४॥
[6]स्थितजानूद्धृतपार्ष्णेः पञ्चविंशतिमात्रकम्। [7]कूर्पराड्डोलहस्तस्य नाभिरेकादशाङ्गुलम् ॥ २४५॥
तद्धस्ते मणिबन्धात्तु वामजान्वन्तरं गुरो[8]। वसुनन्दशांशं वा जङ्घामध्याग्रकान्तकम् ॥ २४६॥
नवधर्माङ्गुलं वापि रुद्राङ्गुलमथापि वा। डोलादभयहस्तान्तं दशनन्दाङ्गुलं तु वा ॥ २४७॥
[9]तत्रानुक्तानि नीव्राणि यथासौन्दर्यमाचरेत्। वामे गौरीसमायुक्तं [10]चर्ममुण्डासमायुतम् [11]॥ २४८॥

---

[1] cf. *Aṃśumatkāśyapa* 68, 28-39:
सूत्रात्कक्षान्तरं सव्यपार्श्वे द्वादशमात्रकम् । सूत्रान्मध्योदरं वामे नवाङ्गुलमुदाहृतम् ॥
वामस्फिक्पिण्डनीव्रं तु सूत्रादष्टादशाङ्गुलम् । सूत्रात्कुञ्चितजानोस्तु द्वयन्तरं तु दशाङ्गुलम्
नवाङ्गुलं चाष्टमाग्रं च जानुनीव्रं यथाक्रमम् । भानुरुद्रदशाङ्गुल्यं नतमानेन कल्पयेत् ॥
स्थिताङ्घ्रिजानोर्वामाङ्घ्रिजानुनीव्रं कलाङ्गुलम् । त्रिपञ्चमनुमात्रं वा जान्वोरन्तरमान्तरम् ॥
स्थिताङ्घ्रिनलकामध्याद्वामपार्ष्ण्यन्तरं बुधः । सवेदचत्वारिंशच्च त्वङ्गुलं तु विधीयते ॥
ससप्तषट्चत्वारिंशदङ्गुलं वाथ तद्भवेत् । स्थितजानूद्धृतपार्ष्ण्योश्चतुर्विंशतिमात्रकम् ॥
त्रयस्त्रिंशतिमात्रं वा जानोः पार्ष्ण्यन्तरं द्विधा । उद्धृताङ्घ्रितलान्तं च स्थितजानूर्ध्वतः समम् ॥
उद्धृताङ्घ्रेस्तु जानूर्ध्वं नाभिसूत्रसमं भवेत् । कोर्पराड्डोलहस्तस्य नाभिसूत्राद्दशाङ्गुलम् ॥
एकादशाङ्गुलं वाथ कल्पयेत्कोर्परान्तकम् । तद्धस्ते मणिबन्धात्तु वामजानोस्तु द्वयन्तरम् ॥
दशाङ्गुलं वाथ कर्तव्यं नवाङ्गुलमथापि वा । डोलहस्ते तु मध्यस्थादङ्गुलाग्राद्विशेषतः ॥
वामपादे तु जङ्घान्तमन्तरं धर्ममात्रकम् । नवाङ्गुलान्तरं वापि रुद्राङ्गुलमथापि वा ।
डोलहस्ताभयान्तं तु द्वयन्तरं तु दशाङ्गुलम् । अन्यान्युक्तानि नीव्राणि यथासौन्दर्यमाचरेत् ॥

[2] Le ms. C omet les *śloka* 242 et 243

[3] A : उदरं pour उदरे ; G : अन्तरं [4] A : जान्वोस्तु pour जानोस्तु

[5] B omet le demi-*śloka* 244b

[6] B : स्थितजानूर्ध्वपार्ष्ण्यन्तं; C : स्थितवामोद्धृतं पार्ष्णेः ; G : स्थितं जान्वोद्धृतं पार्ष्णेः

[7] A : कोर्पर pour कूर्पर

[8] A : गुरोः pour गुरो [9] C, G : अत्र pour तत्र [10] A : धर्मपिण्डि pour चर्ममुण्डा ; B : चर्ममुण्डी C : वर्ममुण्डि

[11] cf. *Kāmikāgama* II 46, 49b-50:
"पार्श्वगां देवीं कल्पयेत्तद्विधानतः ॥
कुर्याद्भद्रीरिटिं वाथ भद्रकालीमथापि वा । भुजङ्गत्रास आख्यातः"

[उद्दण्डनृत्तम्[1]]

भुजङ्गत्रासमाख्यातमुद्दण्डमधुनोच्यते । त्रियक्षं चाष्टहस्तं च द्विपादं क्षीरसन्निभम् ॥ २४९ ॥
जटामकुटसंयुक्तं [2]नागेन्द्रकं च धुत्तुरम् । नानावर्णाम्बरैर्युक्तं सर्वाभरणसंयुतम् ॥ २५० ॥
[3]सवक्रं दक्षिणं पादमपस्मारोपरि स्थितम् । उद्धृतं वामपादं [4]चाप्युष्णीषोर्ध्वार्कमात्रकम् ॥ २५१॥
[5]अभयं शूलपाशं च डमरुं दक्षिणे करे । [6]घण्टां चैव कपालं च [7]डोलं चैवाग्निपात्रकम् ॥ २५२ ॥
अङ्गुष्ठमुद्धृताङ्गैस्तु [8]कर्णाद्धानुद्वयाङ्गुलम् । [9]जङ्घामध्यात्तु [10]बाहून्तर्भान्वङ्गुलमुदाहृतम् ॥२५३ ॥
[11]जानोस्तु डोलाबाहूग्रं द्वादशाङ्गुलमिष्यते । लम्बान्तराग्रसूत्रस्य [12]पार्श्वादेवं विधीयते ॥ २५४ ॥
वामे गौरीसमायुक्तमुभयोर्हस्तयोरपि । स्कन्दं धृत्वा तु [13]लज्जाढबामीषद्वै लम्बिताननाम् । २५५ ॥

---

[1] cf. *Aṃśumatkāśyapa* 68, 78-81:

उष्णीषोर्ध्वेऽर्कमात्रान्तं सव्यपादं समुद्धरेत । सवक्रं वामपादं तु अपस्मारोपरि स्थितम् ॥
भुजाष्टकसमायुक्तमेतत्पञ्चकमुच्यते । अभयं शूलपाशं च डमरुं दक्षिणे करे ॥
कपालमग्निपात्रं च घण्टां हस्तिकरोपमम् । गजहस्तोपमं हस्तं प्रसार्यं दक्षिणामुगम् ।
यद्वत्प्रथमनृत्तस्य पूर्वसूत्रं प्रसारयेत् । चिह्नं पञ्चमनृत्तस्य एवमेवेति विद्यते ॥

cf. *Śritattvanidhi* (éd. Bombay) pp. 66-67:

अथ संहारताण्डवध्यानम् —
त्रिनेत्रं चाष्टहस्तं च सुविकीर्णजटान्वितम् । कुञ्चितं वामपादं तमपस्मारोपरि स्थितम् ॥
उद्धृतं दक्षिणं पादं व्याघ्रचर्मोत्तरीयकम् । अभयं शूलपाशौ च डमरुं दक्षिणे करे ॥
कपालं चाग्निपात्रं च दर्धं[दधद्?] विस्मयहस्तकम् । गजहस्तोपमं वामे चतुर्दोर्भिः समन्वितम् ॥
गजहस्तोपमं सव्यमपसव्यानुगं तथा । नन्दीशं सव्यभागे तु वामे गौरीसमन्वितम् ॥
सप्तमं नृत्तमाख्यातं जगद्बुद्धिकरं भवेत् ॥ शिष्टं प्रथमनृत्तवत् ॥ गौरवर्णः ॥

voir aussi *Ajitāgama* 36, 236-237.

[2] A : नागेन्वर्कधरूयुतम् ; B : नागेन्द्रर्कधरूपकम् ; C : नागे चार्कं च धुत्तुरम् ; G : नागोवार्कं च धुर्धुरम्
[3] A : स्वक्रन्दं pour सवक्रं ; C, G : सचक्रं [4] A : तु उष्णीष pour चाप्युष्णीष
[5] A : अभयं शूलकपालं च ; C, G : अभयाङ्कशपाशं च [6] B : खण्डां [7] A : डोलां
[8] G : कण्ठो pour कर्णाद् [9] C : जङ्घामध्यं तु ; G ; जङ्घामध्ये तु [10] B : जान्वन्तं pour बाहुन्तर्
[11] A : जान्वोस्तु [12] A : पार्श्वदेव pour पार्श्वदिवं ; B : पार्श्वदिव ; C : प्रारदेवं तु ; G : पृथरदेवी
[13] A : लज्जास्याम् pour लज्जाढ्याम्

[अत्युद्दण्डनृत्तम्[1]]

उद्दण्डमेवमाख्यातम् ; अत्युद्दण्डमथोच्यते । [2]स्वतः स्ववस्थितं वामपादमब्जेऽन्यमूर्ध्वगम्[3] ॥२५६॥

[4]द्विरष्टकसमायुक्तं जटामकुटमण्डितम् । डमरुकाभयवज्रं[5] च शूलं पाशं तथैव च ॥ २५७ ॥
[6]टङ्कं दण्डं च नागं च दक्षिणेऽष्टभुजे[7] भवेत् । [8]डोलं गजोपमं चाग्निं मिथुनं वलयं तथा ॥ २५८ ॥
षण्मुद्वयं च घण्टां च कपालं वामपार्श्वके । [9]प्रागुक्तं पूर्वसूत्रं तु वामपार्श्वे प्रसारयेत् ॥ २५९ ॥
[10]नीत्रं वेदांशतः सर्वे[11] प्रागिवैव प्रकल्पयेत् । वामपार्श्वे स्थितं स्कन्दं [12]सव्यहस्तोद्धृतं नतम ॥२६०

---

[1] cf. *Aṃśumatkāśyapa* 68, 83-86a:
दोर्भिः षोडशभिर्युक्तं वामे गौरीसमायुतम् । हस्ताभ्यामुद्धृतं स्कन्दं स्तनं तस्य प्रसारितम् ॥
अभयं शूलपाशं च वज्रं डमरुकं ध्वजम् । वेतालं सूचिहस्तं च दक्षमष्टकरं भवेत् ॥
अनलं गजहस्ताभं खेटकं विस्मयं तथा । घण्टां चैव कपालं च क्षुरिकां सूचिमेव च ॥
वामे त्वष्टभुजा ख्याताः शेषं पञ्चमनृत्तवत् ।

cf. *Śritattvanidhi* (éd Bombay) p.66:
दोर्भिः षोडशभिर्युक्तं वामे गौरीसमाश्रितम् । स्कन्दं दक्षिणपार्श्वे तु सव्यहस्ते धृताञ्जलिम् ॥
अभयं डमरुं चैव वज्रं शूलं च बिभ्रतम् । पाशं टङ्कं तथा दण्डं नागं वै दक्षिणे करे ॥
सव्यानुगं करं चैव वामे पूर्वकरं तथा । अनलं पुस्तकं चैव वरदं केतुखेटकम् ॥
घण्टां चैव कपालं च वामपार्श्वेऽष्टभिः करैः । सर्वलक्षणसंयुक्तं शेषं प्रथमनृत्तवत् ॥
त्रैपुरं ताण्डवं प्रोक्तम् ॥ गौरवर्णः ।

cf. *Śilparatna* II 22, 53-57:
दोर्भिः षड्भुजसंयुक्तं [षोडशभिर्युक्तं?] वामे गौरीसमायुतम् । स्कन्दो भयात्कराभ्यां तु मातुः स्तनहृदोदरात् ॥
निपीड्य वा कराभ्यां तु वामभागोद्धृताञ्जलिम् । एवं गौरी निरीक्ष्येशं भीत्यातिस्नेहविस्मयात् ॥
अभयं डमरुं चैव वज्रं शूलं तथैव च । पाशं टङ्कं तथा दण्डं नागं वै दक्षिणे करे ॥
सजानुगकरं डोलं वामं गजकरोपमम् । अनलं मिथुनं चैव वलयं केतुमेव च ॥
घण्टां चैव कपालं च वामपार्श्वेऽष्टहस्तके । पादौ पञ्चमनृत्तस्य विधिवत्तद्विधीयते ॥

[2] C : सपादं सुस्थितं ; G : सपदं सुस्थितं [3] B : अन्यमूर्धगम् pour अन्यमूर्ध्वगम्
[4] C, G : भुजाष्टक pour द्विरष्टक [5] C : वक्त्रं pour वज्रं [6] A : टङ्कं च दण्डनागं च
[7] A : भुजं pour भुजे [8] A : डोलागजोपपञ्चाग्निमिथुनं ; C : डोलं गजेन पञ्चाग्निं [9] A : प्रागुक्तपूर्वसूत्रं तु
[10] A : नीत्रे वेदांशमः सर्वे ; B : नीत्रे वेदांशभः सर्वे
[11] La forme grammaticale correcte est सर्वस्मिन्
[12] A : सव्यहस्ताज्जनमानता ; B : सव्यहस्तं ; C : सव्यहस्ता जनानता ; G : सव्यहस्ता जनानतम्

करण्ड[1]मकुटोपेता सर्वाभरणभूषिता । [2]गौरी चैवं तु[3] वामे तु ह्यन्यत्र चर्ममुण्डनी ॥ २६१ ॥
नृत्तं करोति [4]स ह्येवमृषयश्चामराः स्थिताः । नृत्तमेवं समाख्यातं भिक्षाटनमथ शृणु ॥ २६२ ॥

[भिक्षाटनलक्षणम्[5]]

पादयोः पादुकोपेतं वामपादं तु सुस्थितम् । गमनोत्सुकमन्यं तु हीषदुद्धृतपार्ष्णिकम्[6] ॥ २६३ ॥

[7]सुविकीर्णजटाभारं जटामण्डलमेव वा । [8]कोपिनं वाथवानन्दं[9]नानानागैश्च भूषितम् ॥ २६४ ॥
[10]सव्ये पूर्वकरं कृष्णमृगाढ्यं वेशमुद्रया । कपालं तु धरेद्वामे [11]ब्रह्मणस्तूर्ध्वमूर्धजम्' ॥ २६५ ॥
[12]डमरुं दक्षिणे त्वन्ये[13] [14]वामे त्वन्यच्च पिञ्छभृत् । सितवस्त्रोत्तरीयं वा [15]नागं वा हरिणीत्वचम् ॥२६६
द्विभुजं वाथ कर्तव्यं विना पिञ्छमृगाढ्यकम् । डमरुकं विना शूलं तत्करेणैव धारयेत् ॥ २६७ ॥

[16]शूलाग्रेण धरेद्दैत्यं दैत्येन्द्रस्य शिरोऽथवा । पूर्वसूत्रप्रसारं[17] तु कङ्कालस्याग्रकस्य च ॥ २६८ ॥
एवं भिक्षाटनं प्रोक्तम् ; कङ्कालमथ-वक्ष्यते ।

[कङ्कालक्षणम्[18]]

रक्तकञ्चुकबद्धाङ्गं जटामकुटमण्डितम् ॥ २६९ ॥

---

[1] C, G : मुकुट pour मकुट [2] C et G omettent le demi *śloka* 261b
[3] A : गौरीमेवं तु ; B : गौरीमेव तु [4] A : सच्चैवम् pour सह्येवम्
[5] cf. *Kāraṇāgama* I 11,351-356a:

त्रिणेत्रं चतुर्भुजं नग्नरूपं किञ्चित्स्मिताननम् । आवृतालंकृताभङ्गि पादे पादुकसंयुतम् ॥
दक्षिणे तु कराग्रं तु हरिणास्यानुगं भवेत् । दक्षिणावरहस्तं तु डमरुकयुतं भवेत् ॥
वामे कपालहस्तं तु अपरं पिञ्छधारिणम् । कुञ्चितं दक्षिणं पादं वामपादं तु सुस्थितम् ॥
सभङ्गस्थानकं कुर्याद्गमनोत्सुकरूपकम् । कपालोपेतहस्तस्य पृष्ठं नाभिसमं भवेत् ॥
मणिबन्धाच्च नाभेस्तु द्वयन्तरं षोडशाङ्गुलम् । शेषं सर्वं विशेषेण कङ्कालस्योक्तवद्भवेत् ॥
एवं भिक्षाटनं प्रोक्तम्''

voir aussi *Ajitāgama* 36, 219-223.

[6] B : पाणिकम् pour पार्ष्णिकम्
[7] A : स्व pour सु [8] A : कोपिनं वाथ नन्दं वा [9] B : नानानागविभूषितम्
[10] C : सर्वे pour सव्ये [11] A : त्रिगुणः pour ब्रह्मणः ; B : त्रिगुणा [12] A : डमरुकं pour डमरुं
[13] La forme grammaticale correcte est त्वन्यस्मिन्
[14] A : वामे त्वन्यं च [15] A, B : नाहं pour नागं
[16] A : शूलाग्रे वा pour शूलाग्रेण [17] C : प्रसादं pour प्रसारं ; G : प्रवादं
[18] cf. *Kāraṇāgama* I 11,303-310a:

''कङ्कालं त्वधुना शृणु ।
चतुर्भुजं त्रिणेत्रं च कपर्दमकुटान्वितम् । पादे पादुकसंयुक्तं किंचिद्वै गमनोत्सुकम् ॥
सर्वाभरणसंयुक्तं यज्ञसूत्रोपशोभितम् । शङ्खं तु वामकर्णे तु दक्षिणेन च कुण्डलम् ॥

[1]धुत्तूरपुष्पं नागं च वामे [2]सव्येन्दुशेखरम् । किंचित्प्रहसितास्यं च [3]गणैर्गेयसमन्वितम् ॥ २७० ॥
कर्णकुण्डलसंयुक्तं वामे शङ्खदलं[4] तु वा[5] । वामे पूर्वकरे[6] ढक्कां प्रहारं दक्षिणे धरेत् ॥ २७१ ॥
[7]दक्षिणे [8]परहस्तस्तु [9]मृगवक्त्रे तु व्यापृतः । वामे परे तु [10]पिञ्छं स्यात्सकलास्थि[11]समन्वितम् ॥२७२

क्षौमवस्त्रधरं कुर्याद्दक्षिणे क्षुरिकायुधम् । डमरुं वामहस्ते तु प्रहरं दक्षिणे करे ॥
कङ्कालदण्डमूले तु पिञ्छदण्डस्य मूलकम् । वामे त्वपरहस्तेन संगृहीतं तु कल्पयेत् ॥
उभयोर्दण्डकाग्रं तु अंसकोपरि विन्यसेत् । कृष्णामुखगतं हस्तं दक्षिणे परहस्तकम् ॥
नानानागसमायुक्तं किंचित्प्रहसिताननम् । बलिपात्रधरं भूतदेवं वामे तु कारयेत् ॥
भिक्षादानोन्मुखस्त्रीभिर्मोहिताभिः समाकुलम् । नानाभूतसमायुक्तं नानालीलासमन्वितम् ॥

cf. *Aṃśumatkāśyapa* 75,2b-6a:

शुद्धश्वेताभवर्णं च सर्वाभरणभूषितम् । रत्नकञ्चुकबद्धाङ्गजटामकुटमण्डितम् ॥
धूत्तूरपुष्पं नागं च वामे सव्येन्दुशेखरम् । हसितं वक्त्रं संधार्य सुगेयगणसेवितम् ॥
किंचित्प्रकाशितान्तस्थदशनं सुविलासितम् । गेयशृङ्गारसंयुक्तमास्थमेवं प्रकीर्तितम् ॥

कर्णौ कुण्डलसंयुक्तौ वामे शाखा[शङ्ख?]दलं तु वा । पूर्वहस्तद्वयोर्वामे ढक्का सव्ये प्रहारकम् ॥

cf. *Śilparatna* II 22,116b-119:

कङ्कालमूर्तिनं वक्ष्ये पादत्रोः पादुकान्वितम् । सुस्थितं वामपादं तु गमनापेक्षयापरम् ॥
पादमीषत्समुद्धृत्य करोत्यधिकसुन्दरम् । शुद्धश्वेतनिभं चारुसर्वाभरणभूषितम् ॥
रत्नकञ्चुकबद्धाङ्गं जटामकुटमण्डितम् । धूर्धूरपुष्पं नागं च वामे दक्षेन्दुशेखरम् ॥
किंचित्प्रकाशितान्तस्थदशनांशुविराजितम् ।

voir aussi *Ajitāgama* 36, 224-228.

[1] A : धुर्धूर pour धुत्तूर [2] B : सव्ये तु pour सव्येन्दु
[3] La meilleure lecture semble être गणगेयसमन्वितम् ou गणैर्गेयैः समन्वितम्
[4] A : जलं pour दलं [5] G : मुचा pour तु वा [6] A : धरे pour करे
[7] cf. *Aṃśumatkāśyapa* 75, 6b-10a:

दक्षिणं हरिणीवक्त्रे व्याहितं (व्यापृतं?) सिंहकर्णवत् । वामहस्ते तु पिञ्छं च कङ्कालास्थि च धारयेत् ॥
तदस्थ्याकृति निर्मांसं द्विपादद्विकरान्वितम् । कृष्णश्यामनिभाकारमपाने दण्डवेशनम् ॥
दण्डं कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः । केतुकिङ्किणिनेत्राढ्यं निष्क्रान्तं रुचिरं [रुधिरं?] तु वा ॥
एतत्कङ्कालनाम्ना तु वामस्कन्धोपरि न्यसेत् । अनेकभूतैर्जयाभिः सेवितं त्वादरान्वितः ॥

cf. *Śilparatna* II 22, 120-123a:

दक्षिणं हरिणीवक्त्रे व्यापितं सिंहकर्णवत् । वामहस्ते च दण्डं तु कङ्कालास्थि च धारयेत् ॥
तदस्थ्याकृति निर्मांसं द्विपादं द्विकरान्वितम् । कृष्णश्यामनिभाकारमपाने दण्डवेशनम् ॥
दण्डं कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः । केतुदण्डेन नेत्राभ्यां निष्क्रान्तं रुधिरं तु वा ॥
एवं कङ्कालदण्डं तु वामस्कन्धोपरि न्यसेत् ।

[8] A : परहस्तं तु [9] A : मृगे वक्त्रे तु व्यापितम् [10] G : खड्गं pour पिञ्छं [11] A : अहि pour अस्थि

[1]तदस्थ्याकृति निर्मांसं द्विपादं द्विकरान्वितम् । कृष्णश्यामनिभाकारमपरे दण्डवेशनम् ॥ २७३ ॥
[2]दण्डे [3]कङ्कालपादौ द्वौ नागपाशेन बन्धयेत् । नेत्राभ्यां किङ्किणीकेतु [4]वाक्रान्तं त्वग्जधारया ॥ २७४ ॥
[5]कङ्कालमेतदस्थि स्यात्स्कन्धोपरि निधापयेत् । [6]विविधैर्भूतजायाभिः[7] सेवितं त्वति[8]कामतः ॥ २७५ ॥
[9]बलिपात्रं धरेद्भूतं[10] [11]वामपार्श्वे मनोत्सुकम् । [12]दर्व्या पात्रे बलिं दद्युर्जायास्तु [13]नतवाससः ॥ २७६
[14]ललाटे वामपार्श्वे तु नेत्रान्ते तत्पुटान्तके । अधरस्य तु [15]हिक्काया मध्ये हृदयमध्यमे ॥ २७७ ॥
नाभेस्तु दक्षिणे [16]वेदमात्रं नीत्वा प्रसारयेत् । वामपादे तु गुल्फस्य मध्ये सूत्रं प्रलम्बयेत् ॥ २७८ ॥
आभङ्गं समभङ्गं वाप्यतिभङ्गमथापि वा । [17]व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ॥ २७९ ॥

---

[1] A : तस्याकृति pour तदस्थ्याकृति ; G : तदस्याकृति ; le mot आकृति se trouve ici au neutre au lieu du féminin.

[2] A : दण्ड pour दण्डे ; B : दण्डं [3] B : कराल pour कङ्काल

[4] A : कन्तान्ताद्गधारया ; B : कन्तान्ताद्गधारया ; C, G : कान्तान्तद्गधारया

[5] B : कङ्कालमेकदा स्थित्या स्कन्धेपरि [6] B : सविधैः pour विविधैः

[7] A : जाताति pour जायाभिः ; B : जायादि [8] A : अधि pour अति

[9] cf. *Aṃśumatkāśyapa* 75, 10b-12a:
बलिपात्रधरं भूतं वामाग्रे गमनान्वितम् । दर्व्या त्वन्नं तु तत्पात्रे निधाय कृतजायया ॥
किंचित्प्रकाशितं योनि संवृत्ता नग्नवाससः । संभ्रान्तमनसोपेता जायाः सर्वास्त्वनेकशः ॥
cf. *Śilparatna* II 22, 123b-125a:
बलिपात्रधृतं भूतं वामेऽग्रे गमनान्वितम् । दक्षिणेऽन्नं तु तत्पार्श्वे निधाय कृतजायया ॥
किंचित्प्रकाशितं योनिं संयुतानतवाससा । संभ्रान्तमनसोपेतं [ता?] जायाः सर्वास्त्वनेकशः ॥

[10] A : बलिपात्रान्तरे भूतं ; B : बलिपात्रं तरेद्भूतं

[11] A : वामे पार्श्वे गमनोसुकम् ; B : वामपार्श्वे गमनोसुकम् ; la meilleure lecture semble être गमनोत्सुकम

[12] C : सर्व pour दर्व्या [13] A : नतवाससा

[14] cf. *Aṃśumatkāśyapa* 75, 12b-14:
ललाटवामपार्श्वे तु नेत्रान्ते तत्पुटान्तके । हन्वन्तस्य तु वामे तु हिक्कामध्ये हृदस्तथा ॥
नाभेः सव्ये युगाङ्गुल्यं वामपादस्य गुल्फके । मध्ये तु लम्बयेद्ब्रह्मसूत्रं हीनाधिकं विना ॥
आभङ्गस्योक्तमार्गेण नतमानं प्रकल्पयेत् ।

[15] A : हिक्कायां [16] A : देव pour वेद

[17] cf. *Aṃśumatkāśyapa* 75, 15-18a
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम । दक्षिणे कटिपार्श्वे तु क्षुरिकां चैव बन्धयेत् ॥
क्षुरिकां हेमसंकाशामुपबन्धसमन्विताम् । उभयोः पार्श्वयोर्हस्ते नानानागविभूषितम् ॥
ऋषिभिर्देवगन्धर्वसिद्धविद्याधरादिभिः । हृदयाञ्जलिसंयुक्तैः संभ्रान्तमनसान्वितैः ॥
संमानितं सदानन्दं सेवितं तैः सुपूजितम् ।
cf. *Śilparatna* II 22, 125b-128:
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् । दक्षिणे कटिपार्श्वे तु क्षुरिकां चैव बन्धयेत् ॥
क्षुरिका हेमसंकाशा रूपबन्धसमन्विता । यक्षकिन्नरसिद्धाद्यैः सेवितं पूजितं नुतम् ।
चामरैरर्कचन्द्राभ्यां वीजितं रत्नभूषितैः । अण्डानां सुस्थितार्थं तु सर्वलोकोपकारकम् ॥
कङ्कालमोचनार्थं तु[स]स्यात्कङ्कालकाभिधः ।

नानानागसमोपेतं सर्वाभरणभूषितम् । [1]भिक्षाटनमिवायुक्तं [2]युक्तं चान्यं प्रकल्पयेत् ॥ २८० ॥

एवं कङ्कालमाख्यातमर्धनारिर्ह्यथोच्यते ।

[अर्धनारीश्वरलक्षणम्[3]]

चतुर्बाहुर्द्विबाहुश्च [4]द्विविधः स विधीयते ॥ २८१ ॥

[5]समभङ्गोऽप्यभङ्गः स्यात्सूत्रादयस्त एव हि । दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥ २८२ ॥

गौरीरूपं तु वामे तु दक्षिणार्धेश्वरात्मकम् । अभयं परशुं सव्ये [6]त्वन्यमुक्षणस्तु कूर्परे ॥ २८३ ॥

[7]तदन्यवामहस्तं तु [8]पुष्पधृक्कटकं भवेत् । द्विभुजे सव्यहस्तं[9] तु [10]वरदं ह्यभयं तु वा ॥ २८४ ॥

वामं पुष्पधरं ख्यातं दक्षिणेश्वरभूषणम् । गौर्यास्त्वाभरणं वामे तथैव[11] दिव्यवाससम् ॥ २८५ ॥

[12]पुंस्तनं दक्षिणे विद्याद्वामे स्त्रीणां पयोधरम् । शेषं युक्त्या तु कर्तव्यं पुंस्त्वं स्त्रीत्वं विशेषतः ॥२८६ ॥

अर्धनारिः[13] समाख्यातः; दक्षिणामूर्तिकं शृणु ।

[दक्षिणामूर्तिलक्षणम्[14]]

[15]त्र्यक्षं चतुर्भुजं शान्तमार्जव[16]मार्दवान्वितम् ॥ २८७ ॥

---

[1] C : भिक्षाटनसमायुक्तं [2] C, G : युक्त्या चण्डं pour युक्तं चान्यं

[3] cf. *Aṃśumatkāśyapa* 72, 1-9:

अथार्धनारीमूर्तेस्तु वक्ष्येऽहं शृणु सुव्रत । चतुर्भुजं च द्विभुजं द्विविधं परिकीर्तितम् ॥
समभङ्गस्थानकोक्तमार्गेणैव नतादयः । सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥
वामेऽर्धपार्वतीयुक्तं दक्षिणेऽर्धं महेश्वरम् । अभयं परशुं सव्ये हस्ते तत्तु शिवांशकम् ॥
वृषभमूर्ध्नि विन्यस्तकोर्परं वामहस्तकम् । तदन्यवामहस्ते तु कटकं पुष्पसंयुतम् ॥
द्विभुजे वरदं सव्ये वामहस्ते तु पुष्पधृत् । शिवस्याभरणं सव्ये वामे स्त्रीभूषणान्वितम् ॥
पुंस्तनं दक्षिणे पार्श्वे वामे स्त्रियः पयोधरम् । अथवा कुञ्चितं सव्यं पादं वामं तु सुस्थितम् ॥
सव्यं शूलधरं हस्तं वामं पुष्पधरं भवेत् । वरदं दक्षिणं हस्तमन्योक्षशिरकोर्परम् ॥
कपालं दक्षिणे हस्ते वामहस्तं प्रसारितम् । दक्षिणे रौद्रदृष्टिः स्याद्वामपार्श्वे तु शीतलम् ॥
दुकूलं चोरुमध्यान्तं सव्ये गुल्फान्तमन्यके । एवं समासतः प्रोक्तमर्धनारीश्वरं हरम् ॥

voir aussi *Ajitāgama* 36, 247-251.

[4] B : द्विपादं च pour द्विविधः स ; C G : द्विविधं तद् [5] A : समभङ्गास्यभङ्गं स्यात्

[6] A : त्वदीयमुक्षस्तु कोर्परम् C : अन्यमुक्ष्णस्तु कोर्परम् ; G : अन्यकक्षस्तु कोर्परम्

[7] C, G : तदन्यं वामहस्ते तु [8] B : पुष्पं हृत्कण्टकं भवेत् [9] B : हस्ते pour हस्तं

[10] B : वरदस्य परं तु वा [11] B, C, G : तथैवं [12] A : पुंस्तद्वद्दक्षिणे ; B : पुंस्त्वं तु दक्षिणे

[13] A : अर्धनारी

[14] cf. *Aṃśumatkāśyapa* 79, 20b-23:

अन्योन्याङ्घ्रितलं विप्र स्फिक्पिण्डाधः प्रकल्पयेत् । ज्ञानमुद्रा हृदः स्थाने त्वभ्यन्तरमुखं करम् ॥
वरदं वामहस्तं तु मेढ्रपीठोपरि न्यसेत् । अपरे दक्षिणे चाज्यं मालाक्षं वामहस्तके ॥
नासाग्रं तु समीक्ष्याक्षावार्जवं सूत्रदेहके । अपरे तु जटा लम्बा ऋषिभिः सेवितं वरम् ॥
योगमूर्तिरिति ख्यातम् ”

अन्योन्याङ्घ्रितलौ द्वौ च स्फिक्पिण्डाधः प्रकल्पयेत् । हृदये ज्ञानमुद्रां तु ह्यभ्यन्तरमुखं करम् ॥ २८८॥
वरदं वामहस्तं तु कटिसूत्रोपरि न्यसेत् । दक्षिणे परहस्तेऽक्षमालाधृग्वामसूचिका ॥ २८९ ॥

---

cf. *Kāmikāgama* II 51, 1b-9a; 10-14a ; 21-25 et 30-40:

व्याख्यानगेययोगेषु निष्ठस्य त्रिविधस्य च । व्याख्यायुग्ज्ञानमुद्रातो गेयी वीणासमन्वितः ॥
द्वाभ्यां विरहितो योगी स नानाकारभेदतः । चतुर्भुजस्त्रिणेत्रस्तु कुन्देन्दुधवलप्रभः ॥
श्वेतविद्रुमहेमाभः श्यामाभो वा प्रकीर्तितः । व्याघ्रचर्माम्बरो वापि दिव्याम्बरधरस्तु वा ॥
उत्तरीयसमोपेतः शुक्लयज्ञोपवीतकः । विकीर्णमूर्धजो वापि जटामकुट एव वा ॥
पट्टिकाबन्धनो वापि सत्करोटिकया युतः । धुर्त्तूरारग्वधैर्नागपत्रैश्चन्द्रेण मण्डितः ॥
पद्ममुद्रासमोपेतो गङ्गाकिङ्किणिसंयुतः । अधस्ताद्वटवृक्षस्य शैलादूर्ध्वं श्रितः पुनः ॥
व्याघ्रचर्मोपरिष्टात्तु स्थितो वीरासनोऽथवा । लम्बितं दक्षिणं पादं तज्जानूपरि संस्थितम् ॥
वामाङ्घ्रिनालकं कुर्यात्सव्यहस्तं तु मुद्रया । संदंशसंज्ञयोपेतो वामहस्तस्थपुस्तकः ॥.....
अथवा नागसंयुक्तो वामहस्तः समीरितः । वरदं तं विजानीयाज्जानुस्थमणिबन्धकः ॥
दण्डहस्तो यदा स स्यात्प्रकोष्ठं जानुसंस्थितम् । विकसत्पद्मसंकाशस्त्वधस्ताद्विस्तृताङ्गुलिः ॥
परहस्तद्वये चाक्षमालाज्वालासमन्वितः । पद्मं वा चोत्पलं वापि व्यालं वामे तु कल्पयेत् ॥
कटकौ तौ प्रकर्तव्यौ प्रसन्नसमलोचनः । नासाग्रदृष्टियुग्वामहस्तो वा स्यात्सुपुस्तकः ॥
आभङ्गसहितं कुर्याद्देहमध्ये तु वामतः । .....सजटामकुटा देवचूचुकास्यगलान्तकाः ॥
तत्तत्कलासमोपेताः शुक्लयज्ञोपवीतिनः । शुक्लाद्यम्बरसंयुक्ता भस्मरुद्राक्षसंयुताः ॥
कौशिकः काश्यपः श्यामस्त्वितरः पीतवर्णकः । रक्तवर्णो भरद्वाजो धूम्राभावत्रिगौतमौ ॥
एषामेकं द्वयं वापि त्रयं वा पार्श्वयोर्न्यसेत् । व्याख्यानमूर्तिरेवं स्याद्गेयमूर्तिस्ततो मतः ॥
ऊर्ध्वाधोमध्यकटकौ तस्यां सर्पकरावुभौ । वीणा तु दक्षिणे वाग्रे दक्षिणे कटकस्थिता ॥
दक्षिणे कटकं चोरुस्थितायां विनिवेशयेत् । व्याख्यानसहितस्त्वेव संदंशस्य समास्ययुक् ॥
तत्राक्षिपातयोगेन सदा कुञ्चितलोचनः । प्रसृतो वामहस्तः स्याद्योगमूर्तिरयं मतः ॥
अथ कुञ्चितवामाङ्घ्रियुग्मस्फिग्गतपार्ष्णिकः । उद्धृतं तस्य जान्वग्रं दण्डकोर्परकान्तयुक् ॥
सदंशदृष्टिपातश्च आभङ्गं चैव पूर्ववत् । नानामृगैस्तु संकीर्णं नानाव्यालैस्तु संयुतम् ॥
नानामुनिगणैः सार्धं सिद्धविद्याधरैरपि । भूतैश्च किन्नरैरन्यैः पुष्पवृक्षैश्च मण्डितम् ॥
शैलं कुर्यात्तु तत्पार्श्वे वटवृक्षस्तु शाङ्वलः । फलशाखोपशाखाढ्यो नानापक्षिसमायुतः ॥
तन्मूले दक्षिणे छायानिषण्णः कृपया युतः । रत्नोपशोभिते पीठे व्याघ्रचर्मोत्तरच्छदे ॥
आसीनो मुनिभिः सम्यक्कौशिकादिभिरादरात् । शिवद्विजकुलस्यादिभूतैस्तु परितः स्थितैः ॥
आगमाहितचेतोभिः परमेशेन दीक्षितैः । एवं तु दक्षिणामूर्तेर्मूर्तिभेदा उदाहृताः ॥
व्याख्यायुग्ज्ञानदः प्रोक्तो गेययुग्भुक्तिदो मतः । सयोगो मुक्तिदो ज्ञेय इति ज्ञात्वा समाचरेत् ।
आसीनो वा स्थितो वापि ऋषिभिः संवृतो न वा । वटवृक्षविहीनो वा भूताद्यावृत एव वा ॥
भूतस्थलम्बपादो वा दक्षिणेशः समीरितः ।

voir aussi *Ajitāgama* 36, 252-256.

15 A : त्रिणेत्रं pour त्र्यक्षं 16 A : मार्दवं स्थितम्

[1]नासाग्रं तु [2]समीक्ष्याक्षि स्वल्पासितप्रकाशकम् । अपरे पार्श्वयोश्चैव जटाधाराः [3]प्रलम्बयेत् ॥२९०॥
ऋषयः पार्श्वयोश्चैव [4]नीत्या तृप्तिं प्रकल्पिताः । [5]बाहोश्चैव जटाभारे [6]व्याला यानसमन्विताः॥२९१
मृगपक्ष्यादयश्चैव [7]योगाभ्यासं प्रचारिताः । [8]दक्षिणामूर्तिराख्याता [9]योगमूर्तिस्तथैव हि ॥ २९२ ॥

[रत्नन्यासः[10]]

प्रतिमालक्षणं[11] ह्येवं प्रतिष्ठां शृणु सुव्रत[12] । [13]सुकृते मण्डपे रम्ये वितानाद्यैरलंकृते[14] ॥ २९३ ॥
स्थण्डिलं शालिभिः कुर्याद्दर्भैः पुष्पैः परिस्तरेत् । विष्टरं स्थापयेत्तस्मिन्प्रोक्षयेद्धृदयेन तु ॥ २९४ ॥
[15]माणिक्यं [16]मरकतं चैव [17]वैडूर्यं चैव नीलकम् । मौक्तिकं स्फटिकं चैव पद्मरागं च वज्रकम् ॥
प्रवालं नव रत्नानि मध्यादीशावसानकम् । ब्रह्मादिलोकपालानां मन्त्रेणैव क्रमेण तु ॥ २९६ ॥
हिरण्यशकलांस्तत्र विन्यसेद्धृदयेन तु । गन्धादिभिः समभ्यर्च्य सर्वातोद्यसमन्वितम् ॥ २९७ ॥
ततो बिम्बं हृदा योज्य स्थपतिः स्निग्धमाचरेत् ।

---

[1] A : नासाग्रात्तु

[2] A : समीक्ष्याक्ष्य स्वल्पशीताः प्रकाशिताः ; C : समीक्ष्याथ स्वल्पाशीताः प्रकाशिताः ; G : समीक्ष्याक्ष्यस्वल्पासिता प्रकाशिता

[3] A : प्रलम्बिताः [4] A : नीत्वा pour नीत्या [5] C : बालेन्दुजटाभारं

[6] A : व्याला यातसमन्विताः ; C, G : व्यालयानसमन्वितम्

[7] A : योगान्मासं प्रचारिताः; B : योगाभ्यासं प्रकल्पिताः; C : योगात्मा संप्रसारिताः ; G : योगात्मसंप्रचारिताः

[8] A : दक्षिणामूर्तिमाख्यातं [9] A : योगमूर्तिस्तदेव हि ; G : योगमूर्तिं तदेव हि

[10] cf. *Virāgama* 63, 23-28a:

रत्नन्यासं प्रकर्तव्यमाचार्यः शिल्पिना सह । रत्नन्यासं प्रकर्तव्यं सत्यकस्य पदेऽथवा ॥
शालिना विकिरेत्तत्र तण्डुलं च तिलं न्यसेत् । नववस्त्रसमायुक्तां प्रतिमां तत्र विन्यसेत् ॥
माणिक्यं मध्यमे स्थाप्य परितः स्थापयेत्क्रमात् । इन्द्रनीलं च वैडूर्यं स्फटिकं मरकतं तु च ॥
पद्मरागं प्रवालं च वज्रं मौक्तिकमुच्यते । पूर्वादिषु न्यसेदेतान्पञ्चब्रह्म समुच्चरन् ॥
सिंहासनस्थदेव्याश्च रत्नन्यासं च कारयेत् । अर्धनारीश्वरस्यैव शिवभागे तु विन्यसेत् ॥
सुस्निग्धं कारयेत्तत्र क्षालयेत्प्रतिमां ततः ॥

voir aussi *Ajitāgama* 40, 14-20a.

[11] A : लक्षणे pour लक्षणं

[12] Le ms. C ajoute: इति श्रीमद्रौरवतन्त्रे प्रतिमालक्षणविधिर्नाम एकोनत्रिंशत्पटलः; Le ms. G ajoute: इति श्रीमद्रौरवतन्त्रे प्रतिमालक्षणविधिः नवविंशतिः । महेशस्थापनविधिः

[13] C, G : सुकूर्मे pour सुकृते [14] B : कृतम् pour कृते [15] B, G : माणिक्कं [16] G : मरतकं

[17] Le ms. B omet la portion entre le premier pāda du *śloka* 295a et le second pāda du *śloka* 295b et lit: माणिक्कं मरकतं चैव पद्मरागं च वज्रकम्

[नेत्रोन्मीलनम्[1]]

बिम्बशुद्धिं ततः कृत्वा स्थण्डिलेऽन्यत्र विन्यसेत् ॥ २९८ ॥

नेत्र[2]द्वययुते ऋक्षे नेत्रमोक्षणमाचरेत् । स्वर्ण[3]सूचिप्रहाराभ्यां भ्रूरेखादीन्सुलेखयेत्[4] ॥ २९९ ॥

भ्रूरेखां [5]पक्ष्मरेखां च[6] कृष्णमण्डलरेखया । ज्योतिर्मण्डलरेखां च[7] लेखयेन्नेत्रमन्त्रतः ॥ ३०० ॥

ततः स्वर्णनखाभ्यां तु नेत्रेणोन्मीलनं कुरु । क्षीराज्यमधुसंयुक्तमक्षेणाक्षेषु तर्पयेत् ॥ ३०१ ॥

[8]मधुवाता ऋतायेति [9]मधुपात्रं प्रदर्शयेत् । [10]घृतं मिमिक्षेति मन्त्रेण [11]घृतपात्रं तु दर्शयेत् ॥३०२॥

[12]गौर्धेनुमध्यमन्त्रेण सवत्सां गां प्रदर्शयेत्[13]।

[कुम्भाभिषेकः[14]]

.....कुम्भाद्बीजसमन्वितम् ॥ ३०३ ॥

---

[1] cf. *Santānasaṃhitā* 21, 14b-21a:

ताम्रपात्रमयं कृत्वा तस्याग्रे विन्यसेद्बुधः । क्षीरं मधु घृतं चैव विन्यसेद्देशिकोत्तमः ॥

सवत्सां कपिलां धेनुं प्रतिमाग्रे व्यवस्थिताम् । सुवर्णनखसंयुक्तं स्वर्णकूर्चसमन्वितम् ॥

वस्त्रेण प्रतिमां बध्वा स्वर्णसूच्या च लेखयेत् । भ्रुवं च लेखयेत्तत्र पक्ष्मरोमाणि लेखयेत् ॥

कृष्णं च मण्डलं लिख्य करवीरोपमं भवेत् । श्वेतं कृष्णं तथा रक्तं त्रिविधं लोचनप्रभम् ॥

कपिलां दर्शयेत्पश्चाद्ब्राह्मणान्दर्शयेत्ततः । शिल्पिना मोक्षयित्वा तु पुण्याहं कारयेद्बुधः ॥

नेत्रे तु विन्यसेत्क्षीरमयुताक्षरमूर्तिना । मधुवाता ऋतायेति मधु तत्रैव लेपयेत् ॥

घृतं मिक्षेति मन्त्रेण घृतं कूर्चसमन्वितम् । नखयुक्तेन हस्तेन विन्यसेन्नेत्रमध्यमे ॥

voir aussi *Ajitāgama* 40, 20b–32.

[2] A : त्रय pour द्वय [3] C : सूची pour सूचि [4] A : सुलेपयेत् ; B : सुयोजयेत्

[5] A : पक्षरेखां ; B : पद्मरेखां ; C : पत्ररेखां [6] B : वा pour च [7] B : वा pour च

[8] cf. *Mahānārāyaṇa Upaniṣad* 9, 8.

[9] A : मधुपात्रेषु दर्शयेत् ; C, G : मधुपात्रेण दर्शयेत्

[10] cf. *Mahānārāyaṇa Upaniṣad*, 9, 11.

[11] A : घृतपात्रेण दर्शयेत् ; B : घृतं पात्रेण दर्शयेत् ; C : घृतपात्राणि दर्शयेत्

[12] cf. *Āpastambamantrapāṭha* 2, 10, 9

[13] Dans tous les manuscrits utilisés pour cette édition il y a une lacune après *śl.* 303a: les portions traitant जलाधिवास, शयनाधिवास, कुम्भस्थापन, होम et une partie du rituel à exécuter le jour du कुम्भाभिषेक sont omises. Voir *Ajitāgama*, *paṭala* 40, *śloka* 32b-114 pour les passages correspondants.

[14] cf. *Kāmikāgama* I 68, 91-94 et 97-98:

शिवकुम्भं समुद्धृत्य वर्धन्या सह देशिकः । परिवारघटैर्युक्तं सर्वालंकारसंयुतम् ॥

हर्म्यप्रदक्षिणं कृत्वा प्रतिमाग्रे नयेद्घटान् । कुम्भाद्बीजं समादाय प्रतिमाहृदि विन्यसेत् ॥

तत्कुम्भस्थजलेनैव स्नापयेत्परमेश्वरम् । वर्धन्या बीजमादाय तत्पीठे विन्यसेद्गुरुः ॥

देवेन सहजा देवी तस्यास्तु हृदि विन्यसेत् । विभिन्नपीठा देवी चेत्पृथक्स्नापनमारभेत् ॥.....

अर्चनोक्तं समभ्यर्च्य वस्त्राभरणपुष्पकैः । प्रभूतं तु हविर्दद्यात्ताम्बूलादिसमन्वितम् ॥

स्नापनं कल्पयेद्वा चेदुत्सवेन युतं तु वा । अत्रानुक्तं तु यत्सर्वं लिङ्गस्थापनवन्नयेत् ॥

voir aussi *Ajitāgama* 40, 106-112.

आदायाञ्जलिहस्ताभ्यां प्रतिमांहृदि विन्यसेत् । गौरीं तथैव वर्धन्या [1]गौर्यास्तु हृदि विन्यसेत् ॥३०४
[2]कुम्भाद्भिरभिषिच्याथ चार्चनोक्तं समर्चयेत् । चलोदरं [3]चेद्बिम्बं तु प्रासादाभ्यन्तरे द्वयम् ॥ ३०५॥
[4]एकत्रिपञ्चसप्ताहं [5]व्याप्य [6]सोत्सवमाचरेत् । स्नपनं कारयेत्पश्चान्महाहविर्निवेदयेत् ॥ ३०६ ॥
एवं यः कुरुते [7]पुंसां स याति परमां गतिम् ॥ ३०७ ॥

इति [8]श्रीमद्रौरवतन्त्रे क्रियापादे [9]प्रतिमालक्षणविधिर्नाम [10]पञ्चत्रिंशः पटलः

---

[1] C : गौर्यां च [2] A : रम्भाद्भिः pour कुम्भाद्भिः ; C : कुम्भाद्यैः [3] A : च pour चेद
[4] A : एकं pour एक [5] A : वाप्यं pour व्याप्य [6] B : सोत्सत्वम् pour सोत्सवम्
[7] G : पुंसः pour पुंसां [8] B omet श्रीमद्रौरवतन्त्रे क्रियापादे
[9] A : महेशस्थापनपटलः षट्त्रिंशः ; G : महेशस्थापनविधिपटलस्त्रिंशतितमः
[10] B : षट् pour पञ्च

[षट्त्रिंशः पटलः]

[विष्णुस्थापनविधिः[1]]

[विष्णुस्थानम्[2]]

विष्णुपूजां प्रवक्ष्यामि [3]संक्षेपात्तु गुरो शृणु । [4]ग्रामादिषु च मध्ये [5]च [6]दिशाष्टास्वन्तरालके ॥ १ ॥
सागराणां तु पार्श्वे वाप्यरण्ये नदितीरके[7] । तटाकतीरोक्तदिशि कर्तव्यं हरिमन्दिरम् ॥ २ ॥
प्रासादमण्डपादीनि[8] [9]कर्तव्यान्युक्तमानवत् ।

[विष्णुलक्षणम्[10]]

चतुर्भुजं द्विनेत्रं च प्रशान्तं कृष्णसंनिभम् ॥ ३ ॥
किरीटमकुटं दिव्यं [11]राजभूषणभूषितम् । [12]संपातस्थानकं पद्मपीठस्योपरि संस्थितम् ॥ ४ ॥
अभयं [13]दक्षिणे [14]पूर्वहस्ते वामे तु [15]दण्डधृक् । दक्षिणे परहस्ते [16]च चक्रं वामे तु शङ्खधृक् ॥ ५ ॥
[17]पीताम्बरधरं नाना[18]चित्रवस्त्रविभूषितम् । दक्षिणेऽदक्षिणे श्रीर्भूः [19]संस्थिते [20]हरिदीक्षिते[21] ॥ ६ ॥
तयोरङ्घ्री[22] हरेः पार्श्वे सुस्थितावन्यकुञ्चितौ[23] । कृत्वैवं प्रतिमां [24]लोहैर्मृदा वा [25]धातुजैरपि ॥ ७ ॥

---

[1] Pour विष्णुस्थापनविधि voir *Acintyaviśvasādākhya* 64, *Kāraṇāgama* I 99, *Pārameśvarāgama* (T. No 140) pp 46-47, *Virāgama* (T. No. 123) pp. 32-37 et *Santānasaṃhitā* 33.

[2] cf. *Kāmikāgama* I, 67, 15a: वरुणे विष्णुवासः स्यात्

cf. *Kāraṇāgama* I 99, 6b-7a:
ग्रामस्य वारुणे भागे समं कुर्याद्विशेषतः । अथवा वायुदिग्भागे गरुडालयमुत्तमम् ॥

[3] B : संक्षेपेण ; C : संक्षेपाच्च [4] B : ग्रामादीनां च [5] B : तु pour च

[6] B : दिशावष्टान्तरालके ; E, F, G : दिशिरष्टान्तरालके

[7] La forme grammaticale correcte est नदीतीरके ; mais le mètre ne serait pas respecté.

[8] B : आदीनां pour आदीनि [9] B : कर्तव्यमुक्त pour कर्तव्यान्युक्त

[10] cf. *Virāgama* (T. No. 123) pp. 32-33:
आसीनं स्थानकं वापि शयनं वापि कारयेत् । स्वतन्त्रं परिवारेण स्थापनं विधिपूर्वकम् ॥...
एकवक्त्रं द्विपादं च चतुर्हस्तसमायुतम् । चक्रं दक्षिणहस्ते तु शङ्खकं वामहस्तके ॥
अभयं दक्षिणे हस्ते वामे दण्डं च हस्तके । नेत्रद्वयसमायुक्तं सुस्थितं पद्मपीठके ॥
कौस्तुभमणिसंयुक्तं ललाटे हेमपट्टकौ । पीताम्बरधरं देवं श्यामवर्णसमन्वितम् ॥
सर्वाभरणसंयुक्तं किंचित्प्रहसिताननम् । श्रीभूमिसहितं चैव कारयेद्वैशिकोत्तमः ॥
शिलालोहमृदा कुर्याच्छास्त्रदृष्टेन कर्मणा ॥
voir aussi *Ajitāgama* 36, 289-293.

[11] B : राजभूषितभूषणम् [12] A : संपादस्थापनं पद्मं पीठस्योपरि सुस्थितम्

[13] C, F, G : दक्षिणं [14] B : पूर्वं हस्ते ; C, F, G : पूर्वं हस्तं [15] B : दण्डवत् ; F : दण्डधृत्

[16] C : तु pour च [17] B : पीताम्बरं गदायुक्तं [18] E, F : छत्र pour चित्र

[19] A : संस्थितो ; B, C, F, G : संस्थितौ [20] हरित् = विष्णुः [21] C, F : हरिति क्षितौ

[22] B, C : अङ्घ्रिः pour अङ्घ्री [23] B : कुञ्चितम् pour कुञ्चितौ ; C F G : कुक्षितौ

[24] B : लोहैर्भूतजातानुजन्तु वा [25] A : धातुजं तु वा

[प्रतिमामानम्[1]]

द्वारोदयसमं तुङ्गं [2]परं मध्यं कनीयसम् । तयोर्मध्ये तु [3]षट्त्रिंशत्त्रिंशतित्रिनवोदयम् ॥ ८ ॥
[4]महाबेरोदयं ख्यातं [5]कर्मार्चां चाथ वच्मि ते। [6]मूलबेरोदये ऽन्यंशं परं [7]धात्वंशकेशवम् ॥ ९ ॥
[8]कन्यसं स्यात्तयोर्मध्ये[9] [10]प्रशस्तं सप्तविंशतिः ।

[मन्त्राः[11]]

[12]वान्तमीकारसंयुक्तमग्निबीजसमन्वितम् ॥ १० ॥
बिन्दुनादसमायुक्तं मूलमन्त्रं हरेर्विदुः । स्वनामाद्यक्षरेणैव बिन्दुनादसमन्वितम् ॥ ११ ॥
[13]देव्योर्मूलं समाख्यातं [14]ब्रह्माङ्गान्प्राग्वदुद्धरेत् ।

[रत्नन्यासो नेत्रोन्मीलनं च[15]]

रत्नन्यासं हृदा कुर्यान्नेत्रेणैवाक्षिमोचनम्[16] ॥ १२ ॥

---

1 cf. *Virāgama* (T. No. 123) p. 33:
पूजांशोच्चप्रमाणेन कर्तव्यं प्रतिमां प्रति । तेन गर्भं तथा हित्वा एकैकं प्रतिमोच्छ्रयम् ॥
चतुर्वा पञ्च षट्तालं प्रतिमां कारयेत्ततः ।

2 A : मध्यं चैव pour परं मध्यं ; C : परमध्य ; G : परं मध्य 3 C : षड्विंशत्रिंशतित्रिनवोदयम्

4 A : महाश्चेदोदयं ; B : महाश्वेतोदयं ; E : महाचरोदयं ; F : महाश्वर्योदयं ; G : महेश्वरोदयं

5 A : कर्मश्चामथ वर्जिते 6 A : मूलं वरोदये न्यंशं ; B, C : मूलं परोदये न्यंशं 7 B : धात्वंशकेश्वरम्

8 C : कन्यसः स्यात् 9 A : मध्यं 10 A : प्रशस्तात्

11 cf. *Virāgama*, p. 34:
सप्तमे तु चतुर्थं तु सप्तमे तु द्वितीयकम् । प्रथमस्यादिसंयुक्तं बिन्दुनादसमन्वितम् ॥
विष्णुमूलमिदं ज्ञेयं विष्णुबीजं ततः शृणु । प्रथमस्यादिसंयुक्तं बिन्दुनादविभूषितम् ॥
विष्णुबीजमिदं मन्त्रं त्रिदशैरपि दुर्लभम् । ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि चोच्यते ॥

12 A : वान्तमौकारसंयुक्तम् ; B : वान्तमोंकारसंयुक्तम् ; E : मान्तमौकारसंयुक्तं

13 A : देव्या मूलं 14 Le mot अङ्ग se trouve au masculin au lieu du neutre.

15 cf. *Virāgama* pp. 34-35:
रत्नन्यासं प्रकर्तव्यं लक्षणेन समन्वितम् । शैलजे लोहजे वापि मृण्मये वापि कारयेत् ॥
स्थितिमूर्तिं प्रतिष्ठाप्य रत्नन्यासं तु कारयेत् । नयनमोक्षणं कुर्यान्नेत्रद्वययुते दिने ॥
स्वर्णसूचिकया चैव भ्रूरेखां शिल्पिना लिखेत् । मण्डलं च समालिख्य प्रच्छन्नपटसंयुतम् ॥
सुवर्णनखसंयुक्तं मध्वाज्यं चैव तर्पयेत् । अक्षिहोमं तु नेत्रेण आज्येनैव शताहुतिः ॥
कपिलां दर्शयेत्पश्चान्नेत्रद्वययुते दिने । ब्राह्मणान्भोजयेत्तत्र[न्दर्शयेत्तत्र?]ब्रह्मजज्ञानमन्त्रतः ॥

16 B : अक्षिमोक्षणम् pour अक्षिमोचनम् ; C : अग्निमोचनम्

[1]गावं [2]गौर्धेनुभव्येन [3]ब्रह्मजज्ञानतो [4]द्विजम् । [5]इदं विष्णवति मन्त्रेण [6]क्षत्रियं संप्रदर्शयेत् १३ ॥

[प्रतिमाशुद्धिः, जलाधिवासश्च[7]]

ब्रह्माङ्गैः [8]प्रतिमाशुद्धिं कृत्वा गन्धादिभिर्यजेत् । सर्वालंकारसंयुक्तं ग्रामं कुर्यात्प्रदक्षिणम् ॥ १४ ॥

जलाधिवासनं कुर्यात्सकल[9]स्थापनोक्तवत् [10] । [11]प्रतिष्ठामण्डपं[12] चैव कुण्डसंस्कारकं तथा ॥ १५ ॥

[शयनाधिवासः[13]]

स्थण्डिलं वेदिकायां तु शालिभिस्तिलतण्डुलैः । कृत्वा पद्मं समालिख्य दर्भान्पुष्पान्[14] परिस्तरेत् ॥ १६

शयनं कल्पयेत्तस्मिन्नण्डजाद्यैरनुक्रमात् । [15]नागेन्द्रं चार्चयेत्तत्र गन्धपुष्पादिभिर्बुधः[16] ॥ १७ ॥

जलादानीय बिम्बं तु स्नानवेद्यां निधापयेत् । गव्यैर्गन्धोदकैश्चैवाप्यस्त्रेणैवाभिषेचयेत् ॥ १८ ॥

गन्धाद्यैरर्चयेद्धीमान्बध्वा प्रतिसरं ततः । लम्बकूर्चसमायुक्तं नववस्त्रेण वेष्टयेत ॥ १९ ॥

शयने शाययेत्पश्चात्प्राक्शिरश्चोर्ध्ववक्त्रकम् । पीताम्बरेण संछाद्य [17]श्रीभूमी पार्श्वयोस्तथा ॥ २० ॥

---

[1] C : गन्धं pour गावं ; G : गवां

[2] cf. *Āpastambamantrapāṭha* 2, 10, 9 [3] cf. *Taittiriyāraṇyaka* 10, 1, 10

[4] B : द्विजाः pour द्विजम् [5] cf. *Taittiriyasaṃhitā* 1, 2, 13, 1

[6] A : व्यक्षत्र्यं pour क्षत्रियं

[7] cf. *Santānasaṃhitā* 33, 21b-25a:

जलाधिवासनं पश्चात्पूर्वोक्तविधिना सह । ग्रामप्रदक्षिणं कुर्यात्सर्वातोद्यसमन्वितम् ॥
नववस्त्रेण संवेष्ट्य प्रतिमां कूर्चसंयुताम् । प्रतिमां कण्ठदघ्ने तु जले चैवाधिवासयेत् ॥
अष्टौ कुम्भान्समादाय सूत्रेण परिवेष्टितान् । कूर्चेनैव समायुक्तान्पूरयेद्गन्धतोयकैः ॥
पूर्वादीशानपर्यन्तमष्टमूर्तीश्च विन्यसेत् । गन्धपुष्पादिना पूज्य गीतवृत्तेन संयुतम् ॥

[8] A : प्रतिमां शुद्धिं ; G : प्रतिमा शुद्धं [9] A : सकलं pour सकल

[10] La portion traitant du rituel de जलाधिवास dans le सकलस्थापन ou प्रतिमालक्षण *paṭala* est omise dans tous les manuscrits utilisés pour cette édition. voir page 122 note 13

[11] cf. *Virāgama* p. 35:

मण्टपं कारयेत्तत्र सप्ताष्टनवहस्तकम् । मध्यमे वेदिकां कुर्यात्परितः कुण्डमुच्यते ॥
दिशासु चतुरश्राणि वृत्तकुण्डं विदिक्षु च । इन्द्रईशानयोर्मध्ये योन्याकारं भवेत्तथा ॥

[12] B : प्रतिष्ठां मण्टपे ; C : प्रतिष्ठां मण्टपं

[13] cf. *Virāgama* p. 36:

शालिना विकिरेद्वेद्यां तण्डुलार्धं तिलं न्यसेत् । वास्तुहोमं दिना कुर्याल्लक्षणेन समन्वितम् ॥
शयनं पञ्चभिः कल्प्य मूलेन प्रतिमां न्यसेत् । प्रच्छन्नपटसंयुक्तं गन्धपुष्पादिनार्चयेत् ॥
श्रीभूमी चैव विप्रेन्द्र दक्षिणे चोत्तरे न्यसेत् ॥

[14] Le mot पुष्प se trouve au masculin au lieu du neutre.

[15] A : नागेन्द्रमर्चयेत्तत्र ; G : नागेन्द्रचर्म चेतत्र [16] A : बुधाः pour बुधः [17] B : श्रीं भूमिं

[कुम्भस्थापनम्[1]]

रुद्रसंख्यान्नवान्कुम्भान्सूत्रवस्त्राम्बुसंयुतान्[2]।[3]सकूर्चान्हेमपुष्पाढ्यान्परितोऽष्टौ घटान्न्यसेत् ॥ २१
त्रिषु मध्ये हरिं [4]ध्यायेच्छ्रीभूमी [5]दक्षिणोत्तरे। वासुदेवं हरिं कृष्णमच्युतं [6]चानिरुद्धकम् ॥ २२ ॥
प्रद्युम्नं श्रीधरं देवं धरणीपतिमेव च। शक्राद्यष्ट घटेष्वर्च्य[7] तत्तन्मूलेन पूजयेत् ॥ २३ ॥

[होमः, कुम्भाभिषेकश्च[8]]

[9]हविष्यान्तं समभ्यर्च्य ततो होमं समाचरेत्। अग्न्याधानादिकं सर्वमग्नि[10]कार्योक्तमाचरेत् ॥ २४ ॥
समिदाज्य[11]चरूँल्लाजान्दधि[12]दुग्धं प्रियङ्गु च। [13]शिरोऽन्तं [14]सद्यमन्त्रादि प्रत्येकं तु शताहुतिः॥ २५ ॥
[15]इदं विष्णवितिमन्त्रेण [16]पूर्णाहुतिमथाचरेत्। प्रभाते स्नानवेद्यां तु स्थापयेच्च [17]यथाक्रमम् ॥ २६ ॥
[18]कुम्भान्मन्त्रं न्यसेद्विम्बहृदि ह्यभ्यर्च्य सेचयेत्। [19]श्रीभूमी च तथाभ्यर्च्य [20]हविष्यान्तं प्रपूजयेत् ॥

---

[1] cf. *Santānasaṃhitā* 33, 33b-37:

अभितः कलशानष्टौ विन्यसेत्साधिदैवतान्। विष्णुश्च पूर्वतः स्थाप्यो महाविष्णुर्महानसे ॥
याम्ये चैव सदाविष्णुं निऋतौ नारायणं तथा। पश्चिमे वासुदेवं तु संकर्षणं तु वायवे ॥

प्रद्युम्नं चोत्तरे न्यस्य ईशान्यामनिरुद्धकम्। स्वैः स्वैर्मन्त्रैश्च संस्थाप्य पूजयेच्छिवशास्त्रवित् ॥
सकूर्चान्सापिधानांश्च सवस्त्रान्हेमसंयुतान्। प्रधानकुम्भमीशान्यां विन्यसेद्विष्णुमूलतः ॥
पार्श्वयोर्वर्धनी न्यस्या श्रीर्भूमिस्तत्र देवता ॥

[2] A : सूत्रवक्त्राम्बुसंयुतान् ; C : स्वर्णवस्त्राम्बुपूरितान् ; G : सवस्त्राम्बुप्रपूरितान् [3] G : सकूर्चं pour सकूर्चान्
[4] B : स्थाप्य श्रीभूमिं ; C, F, G : चैव श्रीभूमी [5] C, F, G : दक्षिणेतरे [6] A omet च
[7] A : घटेऽभ्यर्च्य pour घटेष्वर्च्य
[8] cf. *Virāgama* p. 36:

ततो होमः प्रकर्तव्यः पलाशसमिधा सह। समिदाज्यचरूँल्लाजान्मन्त्रैर्हुत्वा तु देशिकः ॥

इदं विष्णुर्विचक्रमेण आज्येनैव शताहुतिः। विष्णोर्नुकं च मन्त्रेण चरुणा च शताहुतिः ॥
हुत्वा हुत्वा स्पृशेत्प्रतिमां व्याहृतिं जुहुयात्ततः। वेदना वेदनत्वात्तु[?] गणानां त्वेति होमयेत् ॥
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः। स्थितिन्यासं प्रकर्तव्यं पूर्वलक्षणसंयुतम् ॥
ततोऽवसानहोमं तु समिदाज्यचरून्सह। विष्णबीजेन मूलेन हृदयेन क्रमाद्धुनेत् ॥
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन्। स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम ॥
स्थापयेत्प्रतिमां तत्र मानुषे तु पदे तथा। स्नापयेद्विष्णुकुम्भं तु विष्णबीजेन संयुतम् ॥
देव्योः कुम्भेन देव्योस्तु स्नापयेत्स्वस्वमन्त्रतः ॥

[9] A : हविषान्तं [10] B : कार्योक्तमार्गतः [11] C, G . चरुं क्षीरं pour चरूँल्लाजान्
[12] A : दुग्ध pour दुग्धं ;;B : मुद्गं [13] A : शिरोस्तं pour शिरोऽन्तं [14] C : च सदा मन्त्र्य pour सद्यमन्त्रादि
[15] cf. *Taittiriyasaṃhitā*, 1, 2, 13, 1
[16] C, F, G : पूर्णाहुतिं समाचरेत् [17] A, B : नराद्धरिम pour यथाक्रमम्
[18] B : कुम्भान्मन्त्रं न्यसेन्मन्त्रं ; C, G : कुम्भं मन्त्रं न्यसेद्विम्बे [19] G : श्रीभूमिश्च
[20] A : हविषान्नं प्रयोजयेत ; B : हविषान्तं प्रयोजयेत्

[1]इदं विष्णवति मन्त्रेण [2]नित्यार्चनं समाचरेत् ।

[परिवारपूजा[3]]

द्वारस्य दक्षिणे शङ्खमूर्तिं [4]वामे तु चक्रकम् ॥ २८ ॥

पुरस्ताद्गरुडं पूज्य [5]हृदयेऽञ्जलिसंयुतम् । [6]विमलं च विधातारं विक्रमं विजयं तथा ॥ २९ ॥

पुष्टिमूर्तिं च वृद्धिं च त्रिपदं [7]चाभिवृद्धिदम् । [8]गरुडध्वजमारोप्याप्युत्सवं चोक्तमार्गतः ॥ ३० ॥

[स्नपनम्]

कर्तव्यं स्नपनं चैव मध्यकुम्भे हरिं यजेत् । [9]वर्धन्योः पार्श्वयोश्चैव [10]श्रीभूमी च क्रमाद्यजेत् ॥ ३१ ॥

[11]परिवारार्चनादेवानर्चयेत्कलशे न्यसेत् । तत्तन्मन्त्रमनुस्मृत्य स्थाप्याभ्यर्चनमाचरेत् ॥ ३२ ॥

[12]अनुक्तमन्त्रोपचारादि [13]कर्तव्यं तु ममोक्तवत् ॥ ३३ ॥

इति [14]श्रीमद्रौरवतन्त्रे[क्रियापादे][15]विष्णुस्थापनविधिर्नाम षट्त्रिंशः पटलः

---

[1] cf. *Taittiriyasaṃhitā* 1, 2, 13, 1.

[2] B : नित्यार्चनमाचरेत्

[3] cf. *Aparājitapṛcchā* p. 332:

शङ्खचक्रः प्रचण्डश्च जयश्च विजयस्तथा । धाता चैव विधाता च सुभद्रो भद्र एव च ॥
दक्षिणोत्तरक्रमेण गङ्गा च यमुना स्थिते । उत्तरङ्गे भवेल्लक्ष्मीः क्षेत्रपाला उदुम्बरे ॥
कण्ठके मातरः कार्या ग्रहास्त्रिपुरुषस्तथा । वासुदेवादिभेदांश्च द्वारेषु परिकल्पयेत् ॥
वासुदेवं संकर्षणं प्रद्युम्नं चानिरुद्धकम् । चतुर्युगप्रभेदेषु द्वारेषु परिकल्पयेत् ॥
येषां परिकरा ये स्युस्तांस्तद्द्वारेषु कल्पयेत् । भवेयुः सुखदा नित्यं कर्तुश्चावरकस्य तु ॥
इति विष्ण्वायतने द्वारदेवताः ॥

cf. *Kāraṇāgama* I 99, 18b-20a:

परिवारादिसंयुक्तं स्थापयित्वा विशेषतः । संकर्षणादिमूर्तीनां (मूर्तीस्तु?) पूर्वादिषु च विन्यसेत् ॥
अथवान्यप्रकारेण परिवारविहीनकम् । मया संक्षेपतः प्रोक्तं विशेषं पाञ्चरात्रवत् ॥

[4] C : वामेन च क्रमम् ; F : वामेन वा क्रमम् ; G : वामे क्रमं तथा [5] G : हृदये भूमिसंयुतम्

[6] C, F : विमानं च [7] C, F, G : चाभिवृद्धिभिः [8] A : गरुडध्वजं समारोप्य

[9] C, F, G : अन्यौ पार्श्वद्वयोश्चैव [10] B : श्रियं भूमिं च योजयेत् ; C, F, G : श्रीभूमिं च ततो यजेत्

[11] B : परिवारार्चनादेवमर्चयेत् [12] A : अनुक्तात्रोपचारी च ; C : अनुक्तात्रोपचारादि

[13] A : कर्तव्यं तु नमोक्तवत् ; B : कर्तव्यं तु नमोन्तकम् [14] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे

[15] A : विष्णुस्थापनपटलः सप्तत्रिंशः ; B : विष्णुस्थापनं नाम सप्तत्रिंशः पटलः ; C : विष्णुस्थापनविधिर्नाम अष्टत्रिंशत्पटलः ; F : विष्णुस्थापनविधिरष्टत्रिंशत्पटलः ; G : विष्णुस्थापनविधिः पटलः अष्टत्रिंशत्

[सप्तत्रिंशः पटलः]

[मोहिनीस्थापनविधिः[1]]

[मोहिन्युत्पत्तिः[2]]

प्रवक्ष्यामि समासेन मोहिनीस्थापनं परम् । [3]देवासुरमहायुद्धे त्वमृतोन्मथने सति ॥ ॥
[4]अमृते मन्थनेनैव [5]संभूते च विलोडनात् । [6]देवांस्तानपि संगृह्य [7]व्यतिक्रमकृतासुरान् ॥ २ ॥
[8]हिंसार्थं [9]मित्रवद्भाव्य [10]भजेवमशनीयकम् । [11]इत्युक्त्वा सुहृदः कार्य [12]तेऽमृते तु यदा कृताः ॥
[13]तदा जायात्मना कृष्णो[14]ऽददात्तेषां भृतामृतम् । [15]विजिता दानवास्त्वेवं संविशेयुस्तु मां यदा ॥ ४ ॥
[16]तदा तु कृष्णजायां चामोहयं यत्तु मोहिनी ।

---

[1] Pour मोहिनीस्थापनविधि voir *Kāraṇāgama* I, 101 et *Sūkṣmāgama* cité dans la *Śivālaya-nirmāṇasthāpanadīpikā* (T. No 122) pp. 152-158.

[2] cf. *Kāraṇāgama* I 101, 1-5a:
मोहिनीस्थापनं वक्ष्ये समासेन प्रजापते । देवासुरमहायुद्धे त्वमृतं मथने सति ॥
पीयूषमथने काले संभवे च विलोटने । देवस्थावपि संग्राह्य वति...कृतासुरान् ॥
हिंसार्थं मे मन्त्रवद्भास्य भवामो तांशनी वयम् । इतरत्वा सहकारी ते अमृता देयदा कृता ॥
तदा जायात्मना कृष्णन्दद्यात्तेनामृतामृतम् । विजित्वा दानवास्त्वेवं संविशेयुस्तु मां सदा ॥
तदा तत्कृष्णजायां तु हैमे माभात्तु मोहिनी ।

cf. *Sūkṣmāgama*. p. 152:
प्रवक्ष्यामि समासेन मोहिनीस्थापनं परम् । देवासुरमहायुद्धे त्वमृतं मथने सति ॥
अमृतं मथनं चैव संवेशु चच्चलोटके । देवस्थापितसंगृह्य व्यतिरिक्तकृतासुरान् ॥
हंसमन्त्रैव तद्भाव्य भवामेतांशनीयताम् । उदरत्वासहत्कारीदमृता देवता कृता ॥
तदा जायन् मनः कृष्ण दद्यात्तेषां मृतामृतम् । विजिता दानवास्त्वेवं संविरेचय मां यदा ॥
तदा तत्कृष्णमायां तु अहं मोहात्तु मोहिनी ॥

Pour la légende de la *Mohinī* voir le *Brahmāṇḍapurāṇa, uttarabhāga*, adhyāya 9 et 10 et le *Bhāgavatapurāṇa* VIII 8-12.

[3] B : देवासुरमहायुद्धं सति त्वमृतमन्थने

[4] A : अमृतोन्मथनं चैव ; G : अमृतानां मथनेनैव ; E, G : अमृतानां मथं चैव

[5] A : संभवे च द्विलोटने ; B, G : संभवेच्च विलोडने ; C : संभवे तद्विलोडने

[6] A, B, E, G : देवास्थावपि ; G : देवास्तावपि

[7] A : व्यतिक्रमकृतान्सुरान् ; B : व्यतिक्रमकृतीन्सुरान् ; C : व्यक्तिं चापि सुरासुरान् ; E : व्यक्तिं चमसुरासुरान्

[8] A : हंसार्थं ; B : हंसार्धं [9] A : मैत्र pour मित्र

[10] A : भवामेतांशनीयकम् ; C : हवामेतांशरीवयम् ; G : हवामेताः शनीवयम्

[11] A : इतरत्वा सुहृत्कारी ; B, C, G : इतरत्वा सहत्कारी

[12] A : दमृतादेयता कृता ; B : अमृतादेयता कृता ; C : ते अमृते यदा तु तम् G : ते अमृते यदा कृता

[13] A : तदा जायान्मनः कृष्णः ; B : तदा जायां मनः कृष्णः [14] A : दद्यात्तेषाममृतामृतम्

[15] C : जित्वान्तरजरवास्त्वेवं [16] C : तदा तत्त pour तदा तु

[मन्त्रोद्धारः[1]]

[2]कलार्णं तु समुद्धृत्य चतुर्दशस्वरान्वितम् ॥५॥

बिन्दुनादसमायुक्तमस्यास्तु[3] मूलमन्त्रकम् । ब्रह्माङ्गान्यपि तेनैव [4]चोध्दरेदुक्तमार्गतः ॥ ६ ॥

[मोहिनीस्थानम्[5]]

[6]ग्रामबाह्येष्टदेशे च मोहिन्यावासकं परम् । प्रागुक्तेनैव हर्म्यं तु कर्तव्यं [7]मण्डपादिकम् ॥ ७ ॥

गरुडं [8]सिंहमुक्षं वा कल्पयेद्वीवमञ्चके ।

[प्रतिमा[9]]

[10]प्रतिमां द्वारमानेन गर्भमानेन वा कुरु ॥ ८ ॥

[11]लोहजं शैलजं वापि [12]मृण्मयं दारुजं तु वा । धातुजं वाथ कर्तव्यमनेनैव प्रकारतः ॥ ९ ॥

---

[1] cf. *Kāraṇāg ama* I 101, b-6:

कालार्णं तु समुद्धृत्य चतुर्दशस्वरान्वितम् । बिन्दुनादसमायुक्तमस्यास्तु मूलमन्त्रकम् ॥
ब्रह्माङ्गान्यपि तेनैवाप्युद्धरेदुक्तमार्गतः ।

[2] A : कालार्णं तु ; C : कलशान्तरं [3] A : मध्यास्तु pour अस्यास्तु ; B : मध्यास्तु ; F : तस्यास्तु

[4] C : उत्तरेदुत्तमाहतः ; E : उत्तरेदुक्तमाहतः

[5] cf. *Kāraṇāgama* I 101, 7-8a;

ग्रामबाह्ये मनोरम्ये मोहिन्यावासकं परम् । प्रागुक्तेनैव हर्म्यं तु कर्तव्यं मण्टपादयः ॥
गरुडं सिंहमुक्षं वा कल्पयेद्वीवमञ्चके ।

[6] C : ग्रामबाह्याष्टदेशे च मोहिन्यावासकोपरि [7] A : मण्टपादिश ; C : मण्टपादिशः [8] E : वृषम् pour सिंहम्

[9] cf. *Kāraṇāgama* I 101, 8b-16;

प्राग्द्वारस्य समानेन गर्भमानेन तत्कुरु । लोहजं शैलजं वापि मृण्मयं दारुजं तथा ॥
धातुजं वाथ कर्तव्यमनेनैव प्रकारतः । द्विनेत्रा द्विभुजा शान्ता द्विपादा श्यामलप्रभा ॥
करण्डमकुटोपेता सर्वाभरणभूषिता । पद्मपीठोपरिष्टात्तु पीतवस्त्रधृता वरा ॥
आसीनं स्थानकं वापि कल्पयेत्कल्पवित्तमः । त्रिभङ्गस्थानकं चेत्तु [पीठे] सव्याङ्घ्रिशायिनी ॥
लम्बितं वामपादं तु सव्यहस्तधृतोत्पला । प्रसार्यं वामहस्ते तु वरदं कटकं तु वा ॥
अन्यत्सव्ये तु शूलं वा कपालं वामहस्तके । एवं संकल्पयेन्मोहीदक्षिणे द्विभुजं हरम् ॥
चतुर्हस्तं प्रकर्तव्यं वामाङ्घ्रिं विष्टरे शयेत् । लम्बयेद्दक्षिणं पादमभयं वरदान्वितम् ॥
टङ्कं कृष्णमृगं वामे दक्षिणेऽवरकेसरी(ऽपरे?) । जटामकुटसंयुक्तं सोमेश्वरमिवाकृति ॥
केवलं मोहिनीं चैव कल्पयेत्कल्पवित्तमः ।

[10] A : प्रातर्द्वारसमानेन ; B : प्रातर्द्वारे समानेन ; C : प्रातर्द्वारं च मानेन G : प्राक् तद्वारं तु मानेन

[11] C : हैमजं ; G : हेमजं [12] B : मृन्मयं

[1]द्विनेत्रां द्विभुजां शान्तां द्विपादामञ्जनप्रभाम् । [2]करण्डमकुटोपेतां सर्वाभरणभूषिताम् ॥ १० ॥
[3]पद्मपीठोपरिष्टात्तु [4]पीतवासोधृताम्बराम् । स्थानकं [5]वासनं वापि कल्पयेत्कल्पवित्तमः ॥ ११ ॥
त्रिभङ्गस्थानकं चेत्तु पीठे [6]सव्याङ्घ्रिशायिनीम् । लम्बितं वामपादं तु [7]सव्यहस्ते धृतोत्पलाम् ॥ १२ ॥
[8]प्रसार्यवामहस्ते तु वरदं कटकं तु वा । [9]अन्यत्सव्ये तु शूलं वा कपालं वामहस्तके ॥ १३ ॥
एवं संकल्पयेन्मोही[10] दक्षिणे [11]द्विभुजं हरम् । चतुर्भुजं [12]वा कर्तव्यं वामाङ्घ्रिं विष्टरे शयेत् ॥ १४॥
लम्बयेद्दक्षिणं पादमभयं वरदान्वितम् । टङ्कं कृष्णमृगं [13]वामेऽवामे वरकरे धरेत् ॥ १५ ॥
जटामकुटसंयुक्तं [14]सोमेश्वरमिवाकृतौ । केवलं [15]मोहिनीं चैव कल्पयेत्कल्पवित्तमः ॥ १६ ॥

[द्वारपालिकाः[16]]

अष्टाङ्गीं कोटरी चैव दक्षिणेऽदक्षिणे [17]स्थिते । [18]द्विनेत्रे द्विभुजे शान्ते [19]चामरामालिकाकरे ॥ १७ ॥
पार्श्वयोर्गर्भगेहे तु [20]प्रवेशस्य तु पार्श्वयोः । [21]रक्तश्यामनिभे एते कल्पयेत्केशबन्धिते[22] ॥ १८ ॥
शङ्खिनी टङ्किनी चैव [23]बाह्यद्वारे तु पार्श्वयोः । दक्षिणेऽदक्षिणे [24]शूलं डमरुं चैव धारयेत् ॥ १९ ॥

---

1 E, F : द्विनेत्रा द्विभुजा शान्ता द्विपादमञ्जनप्रभा ; G : द्विनेत्रा द्विभुजं शान्ता द्विपादान्त्वञ्जनं प्रभा
2 E, G : करण्डमकुटोपेता सर्वाभरणभूषिता 3 B : पद्मपीठोपरि प्रविष्टां तु
4 A : पीतवासोधृतावराम् ; B : पीतवासोद्धृतां परम् ; C : पीतं वासाग्रताम्बराम् : G : पीतं वासधृताम्बराम
5 A : वासकं 6 C : सव्यास्त्र pour सव्याङ्घ्रि ; E : सर्वास्त्र 7 B : सव्यहस्तोद्धृतोत्पलाम्
8 C : आचार्य वामहस्तेन ; G : आसार्य वामहस्ते वा 9 B : अपसव्ये च शूलं तु
10 A : मोहीं pour मोही 11 B : द्विभुजां हराम् 12 A : वाथ pour वा
13 A : वामे वरकरे धरेत् ; B : वामे वरदं च करे धरेत्
14 A : सोमेश्वरमिवाकृतिम् ; C : सोमेश्वरमथाकृतिम् ; G : सोमेश्वरमिवाकृतिः 15 A : मोहिनी तस्य
16 cf. *Kāraṇāgama* I 101, 17-19:

अष्टाङ्गी कोटरी चैव दक्षिणेऽदक्षिणे स्थिता । द्विनेत्रे द्विभुजे शान्ते चामरमालिकाकरे ॥
पार्श्वयोर्गर्भगेहे तु प्रवेशस्य तु पार्श्वयोः । रक्तश्यामनिभे एते कल्पयेत्केशबन्धिते ॥
शङ्खिनी टङ्किनी चैव बाह्यद्वारसुपार्श्वयोः । दक्षिणेऽदक्षिणे शूलं डमरुं चैव धारयेत् ॥

17 A : स्थिताः ; B : स्थिताम् ; C, F : स्थितः
18 A : द्विनेत्रौ द्विभुजौ चान्तौ ; G : द्विनेत्रौ द्विभुजौ शान्तौ
19 A : चामरामालिकः करः ; C, F : चामरौ मालिकाकरः ; G : चामरौ मल्लिकाकरः
20 B : प्रवेश्य तु च पार्श्वयोः 21 A : रक्तश्यामनिभावेतौ ; C, F : रक्तश्यामनिभाकारौ
22 A, C, F : बन्धितौ pour बन्धिते 23 A : बाह्यद्वारसुपार्श्वयोः 24 G : शूलडमरुकं चैव

[षोडशपरिवारदेवताः[1]]

अंगिनी आंगिनी चैव [2]इंगिनी ईंगिनी तथा । उंगिनी [3]ऊंगिनी चैव ऋंगिनी ॠंगिनी तथा ॥ २० ॥
लृंगिनी लॄंगिनी चैव एंगिनी ऐंगिनी तथा । ओंगिनी औंगिनी चैव अंगिनी [4]अःगिनी तथा ॥ २१ ॥
इन्द्रादिक्रमयोगेन स्थापयेत्परिवारकान् । [5]एवं षोडशपरीवारान्दिग्विदिक्स्थापयेत्ततः[6] ॥ २२ ॥
[7]अभया वरदाः सर्वे[8] प्रासादाभिमुखे[9] स्थिताः ।

[मण्टपः[10]]

प्रासादस्याग्रतः कुर्यान्मण्डपं नवहस्तकम् ॥ २३ ॥
मध्ये तु वेदिकां कुर्यादग्निभागैकविस्तृताम्[11] । [12]तदग्न्यंशसमुत्सेधा [13]कर्तव्या [14]सोपवेदिका ॥ २४ ॥
चतुर्दिक्ष्वग्निकुण्डानि वृत्ताकाराणि कल्पयेत् ।

[रत्नन्यासः, नेत्रोन्मीलनं च[15]]

रत्नन्यासं तु मूलेन[16] हृदा नयनमोक्षणम् ॥ २५ ॥
मधु घृतं सवत्सां गां ब्राह्मणान्दर्शयेत्ततः । नेत्रमन्त्रं समुच्चार्य [17]पञ्चकन्याः प्रदर्शयेत् ॥ २६ ॥

---

[1] cf. *Kāraṇāgama* I 101, 20-23a:
अंगिनी आंगिनी चैव इंगिनी ईंगिनी तथा । उंगिनी ऊंगिनी चैव ऋंगिनी ॠंगिनी तथा ॥
लृंगिनी लॄंगिनी चैव एंगिनी ऐंगिनी तथा । ओंगिनी औंगिनी चैव अंगिनी अःगिनी तथा ॥
इन्द्रादिक्रमयोगेन स्थापयेत्परिवारकन् । एवं षोडशपरीवारान्दिग्विदिक्स्थापयेत्ततः ॥
अभयवरदाः सर्वे प्रासादाभिमुखस्थिताः ।

[2] E, F : इन्दुनी राङ्गिनी तथा [3] E, G : इङ्गिनी [4] A : अंगिनी तथा

[5] B : षोडशैवं परिवारान् ; C, G : एवं षोडश परीवारं [6] C : दिशो दिक्स्थापयेद्बुधः

[7] C, F, G : अभयं pour अभया [8] B : चैव pour सर्वे

[9] B : अभिमुख pour अभिमुखे ; E, F, G : अभिमुखाः

[10] cf. *Sūkṣmāgama* pp. 154-155:
प्रासादस्याग्रतः कुर्यान्मण्टपं नवहस्तकम् । मध्ये तु वेदिका कार्या अग्निभागैकविस्तृता ॥
तदर्धांशसमुत्सेधा कर्तव्या वेदिका तथा । चतुर्दिक्ष्वग्निकुण्डानि वृत्ताकाराणि कल्पयेत् ॥

[11] A : विस्तृतम् pour विस्तृताम्

[12] A : तदग्न्यंशं समुत्सेधं ; B : तस्य न्यासं समुत्सेधं ; C, F, G : तस्यामंशं समुत्सेधं

[13] B, C, F, G : कर्तव्यं pour कर्तव्या [14] B : स्नानवेदिका

[15] cf. *Kāraṇāgama* I 101, 25-26a:
रत्नन्यासं तु मूलेन हृदा नयनमोक्षणम् । सर्पिर्मधु सवत्सां गां धान्यं विप्रं प्रदर्शयेत् ॥
नेत्रमन्त्रं समुच्चार्य पञ्च कन्याः प्रदर्शयेत् ।

[16] A : हृदा वै धनमोक्षणम् ; E, G : हृदा वै नयमोक्षणम् [17] A : पञ्चकन्यां

[जलाधिवासः[1]]

हृदा स्नाप्य [2]सुवस्त्राद्यैरलंकृत्य विशेषतः । [3]ग्रामप्रदक्षिणं कृत्वा जलाधिवासनं कुरु ॥ २७ ॥
एकरात्रं त्रियामं वा यामं वापि जले वसेत् ।

[शयनाधिवासः[4]]

स्थण्डिलं कारयेद्वेद्यां [5]शालिभिस्तिलतण्डुलैः ॥ २८ ॥
[6]लाजपुष्पकुशांस्तीर्य शयनं नववस्त्रतः । गन्धाद्यैस्तु समभ्यर्च्य बध्वा प्रतिसरं ततः ॥ २९ ॥
शयने शाययेद्देवीं प्राक्शिरश्चोर्ध्ववक्त्रकाम्[7] । नववस्त्रेण संछाद्य गन्धाद्यैस्तु समर्चयेत् ॥ ३० ॥

[कुम्भस्थापनम्[8]]

[9]स्थापयेन्मोहिनीकुम्भं [10]तद्विम्बस्य शिरोऽन्तिके । [11]सकूर्चवस्त्रहेमाढ्यमद्भिः पूर्यं पिधाय च ॥ ३१ ॥
मूलमन्त्रं न्यसेत्तस्मिन्ध्यात्वा [12]मोहिनीमर्चयेत् । [13]दौवारिकावृतान्कुम्भान्परितः परिकल्पयेत् ॥ ३२ ॥

[होमः[14]]

[15]हविरन्तं समभ्यर्च्य ततो होमं समाचरेत् । पलाशखदिराश्वत्थमुदुम्बर[16]समित्क्रमात् ॥ ३३ ॥
[17]समिदाज्यचरूँल्लाजान् सर्षपांश्च यवांस्तिलान् । [18]अजमांसमपूपं च फलं सक्तुं हृदादिभिः ॥ ३४ ॥

---

[1] cf. *Kāraṇāgama* I 101, 26b-27:
हृदा स्नाप्य सुवस्त्राद्यैरलंकृत्य विशेषतः । ग्रामप्रदक्षिणं कृत्वा जलाधिवासनं कुरु ॥
एकरात्रं त्रिरात्रं वा प्रहरं वा जले वसेत् ।

[2] A : सुवर्णाद्यैः pour सुवस्त्राद्यैः [3] C et F omettent les *śloka* 27b et 28a

[4] cf. *Kāraṇāgama* I 101, 28-30a:
स्थण्डिलं कारयेद्वेद्यां शालिभिस्तिलतण्डुलैः । लाजपुष्पकुशांस्तीर्यं शयनं नववस्त्रतः ॥
गन्धाद्यैस्तु समभ्यर्च्य बध्वा प्रतिसरं ततः । शयने शाययेद्देवीं प्राक्शिरश्चोर्ध्ववक्त्रकाम् ।
नववस्त्रेण संछाद्य गन्धाद्यैस्तु समर्चयेत् ।

[5] C, F, G : शालिभिस्तण्डुलैरपि [6] A : लाजपुष्पांकुरजाः र्यं [7] A : वक्त्रकम् pour वक्त्रकाम्

[8] cf. *Kāraṇāgama* I 101, 30b-32:
स्थापयेन्मोहिनीकुम्भं तद्विम्बस्य शिरोऽन्तिके । सकूर्चवस्त्रहेमाढ्यमद्भिः पूर्यं पिधाय च ॥
मूलमन्त्रं न्यसेत्तस्मिन्ध्यात्वा च मोहिनीं यजेत् । दौवारिकावृतान्कुम्भान्परितः परिकल्पयेत् ॥
हविष्यान्तं समभ्यर्च्य ''

[9] A, B : स्थापयेन्मोहिनीं कुम्भे [10] A : तद्विम्बं च [11] B सकूर्चवस्त्रहेमाद्भिः परिपूर्णं विधाय च
[12] A : मोहिनिम् pour मोहिनीम् [13] A : दौवारिकान्वृतान्

[14] cf. *Kāraṇāgama* I 101, 32b-36a:
''तथो होमं समाचरेत् ।
पलाशखादिराश्वत्थोदुम्बरं च समित्क्रमात् । समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ॥
अजमांसमपूपं च फलं सक्तुं हृदादिभिः । शतमर्धं तदर्धं वा प्रत्येकाहुतिमाचरेत् ॥

शतमर्धं तदर्धं वा प्रत्येकाहुतिमाचरेत् । द्रव्यान्ते व्याहृतिं हुत्वा [1]तत्तदङ्गैः स्पृशाहुतिः ॥ ३५ ॥
ततः पूर्णाहुतिं कुर्यान्मूलमन्त्रेण देशिकः ।

[कुम्भाभिषेकः[2]]

एवं [3]जागरणं रात्रौ प्रभाते सुमुहूर्तके ॥ ३६ ॥
शयनाद्देवीमुद्धृत्य सर्वालंकारसंयुताम् । [5]हर्म्यं प्रदक्षिणीकृत्य गर्भगेहं [6]समाविशेत् ॥ ३७ ॥
स्थापयेन्मूलमन्त्रेण तत्तदङ्गानि [7]विन्यसेत् । घटाद्बीज हृदि [8]न्यस्य [9]तदद्भिरभिषेचयेत् ॥ ३८ ॥

द्रव्यान्ते व्याहृतिं हुत्वा तत्तदङ्गैः स्पृशादिभिः [स्पृशेत्तथा] । ततः पूर्णाहुतिं कुर्यान्मूलमन्त्रेण देशिकः ॥
एवं जागरणं रात्रौ"

cf. *Sūkṣmāgama* p. 156:

"ततो होमं समाचरेत् ।
पलाशखादिराश्वत्थमुदुम्बरसमित्कमात् । संमिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ॥
गोधूमं च अपूपं च फलं सक्तुं हृदादिभिः । शतमर्धं तदर्धं वा प्रत्येकाहुतिमाचरेत् ॥
द्रव्यान्ते व्याहृतिं हुत्वा तत्तदङ्गैः स्पृशेत्तथा । ततः पूर्णाहुतिं कुर्यान्मूलमन्त्रेण देशिकः ॥
एवं जागरणं रात्रौ"

[16] **A** : हविषान्तं [16] **C, F, G** : औदुम्बर pour उदुम्बर

[17] **A** : समिदाज्यचरुं ; **C** : समिदाज्ये चरून्

[18] On trouve dans le *Sūkṣmāgama* अजमांस au lieu de गोधूम ; voir page 133, note 14.

[1] **A** : तत्तदङ्गैः स्पृशादिभिः ; **B** : तत्तदङ्गे स्पृशाहुतिः ; **C** : तदङ्गैश्च हृदादिभिः ; **E, F** : तदङ्गैश्च स्पृशादिभिः

[2] cf. *Kāraṇāgama* I 101, 36-40:

"प्रभाते सुमुहूर्तके ।
शयनाद्देविमुद्धृत्य सर्वालंकारसंयुतम् । हर्म्यं प्रदक्षिणीकृत्य गर्भगेहं समाविशेत् ॥
स्थापयेन्मूलमन्त्रेण तत्तदङ्गानि विन्यसेत् । घटाद्बीजं हृदि न्यस्य तदद्भिरभिषेचयेत् ॥
परिवारघटांश्चैव ततत्पीठेऽभिषेचयेत् । ब्रह्माङ्गैरभिषिच्याथ हृदा गन्धादिभिर्यजेत् ॥
हविष्यान्तं समभ्यर्च्य बस्तमांसं हृदा ददेत् । परिवारबलिं चैव तद्द्रव्येणैव दापयेत् ॥
प्रतिष्ठा यजनं ह्येवम्"

cf. *Sūkṣmāgama* pp. 156 157:

प्रभाते सुमुहूर्तके ।
शयनाद्देविमुद्धृत्य सर्वालंकारसंयुताम् । हर्म्यं प्रदक्षिणीकृत्य गर्भगेहं समाविशेत् ॥
स्थापयेन्मूलमन्त्रेण तत्तदङ्गानि विन्यसेत् । घटाद्बीजं हृदि न्यस्य तदद्भिरभिषेचयेत् ॥
परिवारघटांश्चैव ततत्पीठेऽभषेचयेत् । ब्रह्माङ्गैरभिषिच्याथ हृदा गन्धादिभिर्यजेत् ॥
हविष्यान्तं समभ्यर्च्य **धूपदीपं** हृदा ददेत् । परिवारबलिं चैव तद्द्रव्येण[च]दापयेत् ॥
प्रतिष्ठामर्चनं ह्येवम्"

[3] **F, G** : जागरकं [4] **B, E, F, G** : देविम् pour देवीम् [5] **G** : हर्म्यंप्रदक्षिणं कृत्वा

[6] **C, F, G** : समाचरेत् [7] **B** : कल्पयेत् [8] **C** : न्यस्येत् pour न्यस्य [9] **C** : तत्तत्कुम्भाभिषेचयेत्

परिवारघटांश्चैव तत्तत्पीठेऽभिषेचयेत् । ब्रह्माङ्गैरभिषिच्याथ हृदा गन्धादिभिर्यजेत् ॥ ३९ ॥
[1]हविरन्तं समभ्यर्च्य [2]बस्तमांसं[3] हृदा ददेत् । परिवारबलिं चैव [4]तद्द्रव्येणैव दापयेत् ॥ ४० ॥

[उत्सवः[5]]

प्रतिष्ठा [6]चार्चनं ह्येवमुत्सवं[7] चाधुनोच्यते । सिंहध्वजोक्षकेतू वा [9]गरुडं [10]वापि रोपयेत् ॥ ४१ ॥
पञ्चायुधसमायुक्तं चक्रमूर्ति[11]समन्वितम् । सन्धिदेवावाहनादि सर्वं [12]कुर्यान्महोत्सवम् ॥ ४२ ॥
शूलं [13]कपालं दण्डं च [14]खड्गचापौ तथैव च । [15]मोहिन्यायुधाः पञ्चैते [16]पञ्चमूर्त्यधिदैवताः ॥ ४३ ॥
यागे तु वेदिकायां तु स्थापयेन्मोहिनिवर्धनीम [17]। [18]अंगिन्यादीनि [19]वर्धन्याः परितः स्थापयेद्बुधः ॥

---

[1] A : हविषान्तं [2] C : वस्त्रमांसं
[3] On trouve dans le *Sūkṣmāgama* बस्तमांस au lieu de धूपदीप ; voir page 134, note 2.
[4] G : द्रव्येणैव तदर्पयेत्
[5] cf. *Kāraṇāgama* I 101, 40b-52a:

उत्सवं चाधुनोच्यते ॥
सिंहध्वजोक्षकेतू वा गरुडं वापि रोपयेत् । पञ्चायुधसमायुक्तं चक्रमूर्तिसमन्वितम् ॥
संधिदेवावाहनाद्यं सर्वं कुर्यान्महोत्सवे । शूलं कपालं दण्डं च खड्गं चापं तथैव च ।
मोहिन्यायुधाः पञ्चैते पञ्चमूर्त्यधिदेवताः । यागे तु वेदिकायां तु स्थापयेन्मोहिवर्धनीम् ॥
अंगिन्यादीनि वर्धन्या परितः स्थापयेद्बुधः ॥

तत्तन्मन्त्रं न्यसेद्ध्यायेद्धविषान्तं समर्चयेत् । तस्यैन्द्रेऽग्निं तु संकल्प्य पद्मकुण्डे तु होमयेत् ॥
समिदाज्यचरूँल्लाजान्सर्षपांस्तिलमुद्गकान् । बस्तानां रुधिरं मांसमपूपं च कुलुत्थकम् ॥
सद्याद्यस्त्रान्तमन्त्रैस्तु मोहिन्यास्तु शताहुतिम् । पञ्चाशत्पञ्चविंशत्या प्रतिद्रव्यं तु होमयेत् ॥
होमान्ते तु बलिं दद्यात्सर्वालंकारसंयुतम् । घोषिणी मर्दिनी घोरी पालिनी पिङ्गली तथा ॥
मद्भूतिर्विकृतिर्मार्दी भृङ्गिणी संधिदेवताः । मध्यादीशावसानेषु बलिं दद्यात् संधिषु ॥
शुद्धान्नं मांससंयुक्तं बलिं दद्यात्स्वमन्त्रतः । नवाहं वाथ सप्ताहं पञ्चाहं ह्येवमाचरेत् ॥
बल्यन्ते चोत्सवं कुर्याद्देवीं मोहनमूर्तिकाम् । यानं च परिवेषं च युक्त्या शेषं समाचरेत् ॥
एवं द्वित्रिदिनं वापि वनयात्रां समाचरेत् । अन्यत्सर्वं च कर्तव्यमुत्सवस्य ममोक्तवत् ॥

[6] B : हि pour च
[7] Le mot उत्सव se trouve au neutre au lieu du masculin.
[8] A : सिंहध्वजोक्षके ऊर्ध्वा [9] C, F, G : गारुडं [10] C, F : वा विरोपयेत्
[11] E : मुक्ति pour मूर्ति [12] A : कुर्युर्ममोत्सवम् ; B : कुर्यान्ममोत्सवम्
[13] A : कपालदण्डं च [14] A : खड्गं चापं तथैव च ; B : खड्गं च परशुं तथा
[15] A : मोहिन्यायुधपञ्चैते ; C, F : मोहिन्यायुधं पञ्चैते [16] A : पञ्चमूर्ताधिदैवतम्
[17] A: मोहवर्धनीम् ; B : मोहिनीं वर्धनीम् [18] C : अङ्गन्यासादीनि [19] A : वर्धिन्यां

तत्तन्मन्त्रं न्यसेद्ध्यायेद्धविरन्तं[1] समर्चयेत् । [2]तस्यैन्द्रेऽग्निं तु संकल्प्य [3]पद्मकुण्डे तु होमयेत् ॥ ४५॥
समिदाज्यचरूल्लाँजान्सर्षपांस्तिलमुद्गकान् । [4]बस्तोधिरं च मांसं च त्वपूपं च कुलत्थकम् ॥ ४६ ॥
सद्याद्यस्त्रान्तमन्त्रैस्तु मोहिन्यास्तु [5]शताहुतीः । पञ्चाशत्पञ्चविंशत्या प्रतिद्रव्यं तु होमयेत् ॥ ४७ ॥
होमान्ते तु बलिं दद्यात्सर्वालंकारसंयुतम् । [6]घोषिणी मर्दिनीं घोरी [7]पालिनीं पिङ्गलीं तथा ॥ ४८ ॥
[8]मर्षिणीं विकृतिमार्दी [9]भृङ्गिणी सन्धिदेवताः । मध्यादीशावसानेषु[10] बलिं दद्यात्तु सन्धिषु ॥ ४९ ॥
शुद्धान्नं मांससंयुक्तं बलिं दद्यात्स्वमन्त्रतः । नवाहं वाथ सप्ताहं पञ्चाहं [11]वा समाचरेत् ॥ ५० ॥
बल्यन्ते चोत्सवं [12]कुर्याद्देव्यै मोहिनिमूर्तये । यानं च परिवेषं च युक्त्या शेषं समाचरेत् ॥ ५१ ॥
एवं द्वित्रिदिनं वापि वनयात्रां समाचरेत् । अन्यत्सर्वं च [13]कर्तव्यमुत्सवस्य ममोक्तवत् ॥ ५२ ॥

इति [14]श्रीमद्रौरवतन्त्रे[क्रियापादे][15]मोहिनीस्थापनविधिर्नाम सप्तत्रिंशः पटलः

---

[1] B, C, F, G : हविषान्तं pour हविरन्तं [2] A : तस्यैन्द्रोग्निं ; B : तस्येन्द्राग्निं ; C, F, G : तस्येन्द्रोग्निं
[3] G, G : पद्मकुण्डं तु [4] B : बस्तमांसप्रतिनिधिरपूपं च गुलोद्भवम् [5] A : शताहुति ; C, G : शताहुतिम्
[6] A : घोरी घोषिणी मर्दिनी च ; B : घोरिणी घोषिणी चैव ; G : घोरी घोषिणी मर्दिनी च
[7] B : भदिनी पालि पिङ्गली
[8] B : मर्षिणी विकृती मार्द्री ; F : मरीची विक्षति मदी ; C, G : मरिमी विकृती मादी
[9] C : ब्रहिणी pour भृङ्गिणी ; F : ब्रह्मणी ; G : ब्रह्मिणी
[10] B, C, F, G : तु pour षु [11] A : वैवमाचरेत् ; C, F, G : ह्येवमाचरेत्
[12] A : कुर्याद्देवीं मोहिनिमूर्तिनीम् ; B : कुर्याद्देवीं मोहनमूर्तिकाम्
[13] B : कर्तव्यमुत्सवस्य मयोक्तवत् ; C, F, G : कर्तव्यमुत्सवं ह्येवमुक्तवत्
[14] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे
[15] A : मोहिनीस्थापनविधिपटलोऽष्टत्रिंशः ; B : मोहिनीस्थापनं नामाष्टात्रिंशः पटलः ; C : मोहिनीस्थापनविधिर्नाम षट्त्रिंशः पटलः ; E : मोहिनीस्थापनविधिः सप्तत्रिंशत्पटलः ; F, G : मोहिनीस्थापनविधिपटलः सप्तत्रिंशत्

[अष्टत्रिंशः पटलः]

[नागराजप्रतिष्ठा[1]]

[मन्त्रोद्धारः[2]]

नागराजप्रतिष्ठां तु[3] प्रवक्ष्यामि समासतः । [4]सप्तमस्वरमुद्धृत्य [5]प्रथमस्वरमथापि वा ॥ १ ॥
बिन्दुनादसमायुक्तं मूलमन्त्रमिति स्मृतम् । [6]ब्रह्माङ्गानि च तेनैवमुद्धरेत्तत्क्रमेण तु[7] ॥ २ ॥

[प्रतिमालक्षणम्[8]]

[9]रुद्रमात्रं समारभ्य द्विद्व्यङ्गुलविवर्धनात् । [10]सैकसप्ततिमात्रान्तमायामं [11]त्रिंशतिर्भवेत् ॥ ३ ॥

---

[1] Pour नागराजप्रतिष्ठाविधि voir *Kāraṇāgama* II, pp. 403-404, et *Kāraṇāgama* (T. No. 120) pp. 82-90, *Virāgama, paṭala* 91, *Sūkṣmāgama, paṭala* 83 et 84 et *Siddhāntadīpikā* (T. No. 120) pp. 98-128.

[2] cf. *Siddhāntadīpikā* (T. No. 120), p-114:
प्रणवं पूर्वमुच्चार्य त्वष्टवर्गस्य चादिकम् । आदिवर्गद्वितीयेन तच्चतुर्दशसंयुतम् ॥
बिन्दुनादसमायुक्तं शेषराजस्य मन्त्रकम् ॥

[3] B : च pour तु [4] A : सप्तस्वरं समुद्धृत्य [5] B : चाथवा प्रथमस्वरम्

[6] A : ब्रह्माङ्गानि चोक्तेनैवम् [7] B : उत्तरे तत्क्रमेण

[8] cf. *Sūkṣmāgama* 83, 1-13:
नागस्य लक्षणं वक्ष्ये शृणु त्वं तत्प्रभञ्जन । स्वर्णरजतताम्रेण शिलयेष्टकयाथवा ॥
दारुजैर्दर्भमृद्भिर्वा भुजङ्गं तं प्रकल्पयेत् । एकहस्तं समारभ्य वस्वङ्गुलविवर्धनात् ॥
चतुर्विंशतिहस्तान्तं नागायामं प्रकल्पयेत् । आयादिशोभनोपेतं शुभमानं परिग्रहेत् ॥
तन्मानं शतधा भज्यैकांशं चाङ्गुलं भवेत् । वेदांशं मुखमानं स्याद्द्व्यंशं मुखविस्तृतम् ॥
भान्वंशं फणदीर्घं स्यात्पञ्चांशं फणविस्तृतम् । नासापुटान्तरं पादं नासितारं शिवाङ्गुलम् ॥
तत्समं नासिदीर्घं स्याद्व्योमांशं दृष्टिमण्डलम् । तन्मध्ये यवमानेन कृष्णमण्डलमाचरेत् ॥
तद्विस्तारार्धमानेन ज्योतिर्मण्डलकं भवेत् । पक्षदीर्घं द्विभागं स्यात्तद्विस्तारं शिवांशकम् ॥
पक्ष्म पञ्चाङ्गुलार्धं तु कर्णं पक्षाङ्गुलं भवेत् । वेदांशं कर्णविस्तारं युज्य सिंहस्य कर्णवत् ॥
चतुर्दन्तसमायुक्तं दन्तदीर्घं तदङ्गुलम् । करण्डमकुटैर्वापि चित्रवस्त्राकृतिस्तु वा ॥
मध्ये फणार्धमानेन तस्य पार्श्वे फणो भवेत् । फणसप्तेषु वा प्रोक्तं त्रिफणं वा समाचरेत् ॥
नाहं वै षोडशाङ्गुल्यं वालान्तं चाङ्गुलं भवेत् । पद्मपीठोपरिष्टात्तु त्रिपद्ममण्डलान्वितम् ॥
नासिमध्यसूत्रं तु वालाग्रमृजुसूत्रकम् । अंशं वा द्वित्रियंशं वा हीनाधिक्यं न दोषभाक् ॥
शोभाङ्गुलसमोपेतं युक्त्या सर्वं समाचरेत् । नागलक्षणमेवोक्तम् ”

[9] A : रुद्रमात्रसमारभ्य ; B : रुद्रमात्रं समावाह्य ; C, G : मुद्रामात्रं समारभ्य

[10] B : सैकविंशतिमात्रान्त्रम् ; C : सैकसप्तत्रिमात्रान्तं

[11] La forme grammaticale correcte est त्रिंशद् ; mais le mètre ne serait pas respecté.

[1]आयादि[2]षङ्गुणोपेतं [3]यत्तन्मानं प्रगृह्य च । [4]सैकसप्ततितन्मानं भजेदेकांशमङ्गुलम् ॥ ४ ॥
[5]वेदांशं मध्यविस्तारं भान्वंशं [6]तत्र नाहकम् । अधः [7]पुच्छाग्रविस्तारो [8]मध्यादग्रं क्रमात्कृशम् ॥ ५ ॥
फणायामं तु भान्वंशं वस्वंशं फणविस्तृतम् । [9]घनमर्धाङ्गुलं प्रोक्तं [10]मध्यमग्र्यङ्गुलं भवेत् ॥ ६ ॥
एवं [11]पञ्चफणावक्त्रं पञ्च [12]मूर्धसमन्वितम् । अक्षिद्विपञ्चसंयुक्तं जिह्वाविंशतिसंयुतम् ॥ ७ ॥
दशश्रोत्रसमायुक्तं दशशृङ्ग[13]समायुतम् । दशदंष्ट्रासमायुक्तं हिरण्यसदृशप्रभम् ॥ ८ ॥
श्रोत्रं सुषिरमात्रं [14]स्याच्छृङ्गमर्धाङ्गुलं भवेत् । एवं [15]वै [16]नागराजं तं [17]युक्तं युक्त्या तु कल्पयेत् ॥ ९ ॥
लोहजं शैलजं [18]वापि दारुजं [19]वा प्रकल्पयेत् । मृण्मयं वाथ कर्तव्यं [20]धातुजं वा विशेषतः ॥ १० ॥
भद्रे [21]वा पद्मपीठे वा [22]शाययेदपरार्धकम् । [23]पूर्वार्धं वक्त्रमुद्धृत्य प्राङ्मुखं [24]वापरार्धकम् ॥ ११ ॥
द्वित्र्येकपञ्चवलयं [25]कृत्वान्योद्धृतमेव वा । [26]अन्यद्विपाद्द्विभुजं नेत्र[27]द्वयसमन्वितम् ॥ १२ ॥
करण्डमकुटोपेतं [28]नागपञ्चफणं शिरः । अभयं दक्षिणे हस्ते वरदं वामहस्तके ॥ १३ ॥
पीठे तु [29]शाययेद्वामपादमन्यं तु[30] लम्बयेत् । [31]त्रयद्व्येकफणोपेतं नागरूपं तु वा कुरु ॥ १४ ॥

[रत्नन्यासः, नेत्रोन्मीलनं च[32]]

रत्नन्यासं तु मूलेन हृदा वै नेत्रमोचनम्[33]। कृत्वा तु मधु सर्पिश्च सलिलं नालिकेरकम् ॥ १५ ॥

---

[1] B : आयतिः pour आयादि [2] A : षट्सुत pour षङ्गुण
[3] B : यत्तमानं तु विंशतिः [4] B : सैकसप्ततिकं मानं
[5] C : वेदान्त pour वेदांशं ; F : वेदाङ्ग [6] C : तत्रिनाहकम् [7] A : पूजा pour पुच्छ
[8] A : मध्यभागं [9] A : वनमध्याङ्गुलं ; C, F : वनं मध्याङ्गुलं [10] A : मध्यमध्यङ्गुलं ; B : मध्यं मध्याङ्गुलम्
[11] A : पञ्चफणं वक्त्रं [12] C, G : मूर्ध्नि pour मूर्ध [13] C : समायतम् pour समायुतम्
[14] A : वा शृङ्गमध्याङ्गुलं [15] B : हि pour वै [16] A : नागराजानां
[17] A : युक्तियुक्त्या तु ; B : युक्तियुक्तं तु ; C : युक्त्या युक्त्यानु ; G : युक्तियुक्तानु
[18] C, G : वाथ [19] B : वाथ कल्पयेत् [20] C, G : भानुजं ; F : भुमानं [21] C, F : च pour वा
[22] B : शाययेत परार्धकम् ; G : शाधयेदपरार्धकम्
[23] B : पूर्वार्धं वक्त्रमुद्धृत्य ; C : पूर्वं वक्त्रं च मुद्धृत्य ; F, G : पूर्वं वक्त्रं समुद्धृत्य [24] A : वा परान्तकम्
[25] G : धृत्वा pour कृत्वा [26] B : अन्यं द्विपादं द्विभुजं [27] A : त्रय pour द्वय [28] C : नागं pour नागं
[29] C : शाधयेद् pour शाययेत् [30] A : अन्यत्तु pour अन्यं तु
[31] A : त्रिद्वेकत्रत्रणोपेतं ; B : त्रिद्व्येकप्रत्रणोपेतं
[32] cf. *Virāgama* 91, 30b-35a:
रत्नन्यासं प्रकर्तव्यं लक्षणेन समन्वितम् । शैलजे लोहजे वापि दारुजे वापि कारयेत् ॥
स्थितमूर्तिं प्रतिष्ठाप्य रत्नन्यासं तु कारयेत् । नयनोन्मीलनं कुर्यान्नेत्रद्वययुते दिने ॥
स्वर्णसूचिकया चैव भ्रूरेखां शिल्पिना लिखेत् । मण्डलं च समालिख्य प्रच्छन्नपटसंयुतम् ॥
स्वर्णसूचिसमायुक्तं मध्वाज्यं चैव तर्पयेत् । अक्षिहोमं तु नेत्रेण आज्येनैव शताहुतिम् ॥
कपिलांदर्शयेत्पश्चान्नेत्रद्वययुते दिने । ब्राह्मणान्दर्शयेत्तत्र ब्रह्मजज्ञानमन्त्रतः ॥
[33] B : मोक्षणम pour मोचनम्

क्षीरं हिरण्यसंयुक्तं तन्मन्त्रेण प्रदर्शयेत् । ईशानेन तु मन्त्रेण [1]ब्राह्मणान्दर्शयेत्ततः[2] ॥ १६ ॥

हृदा [3]गव्याभिषेकं तु स्नापयेद्गन्धतोयकैः ।

[जलाधिवासः[4]]

नानापुष्पैरलंकृत्य ग्रामं कृत्वा प्रदक्षिणम् ॥ १७ ॥

[5]जलमध्ये न्यसेद्बिम्बं पूर्वोक्तविधिना कुरु ।

[यागमण्डपः[6]]

प्रासादस्याग्रतः कुर्यान्मण्डपं सप्तहस्तकम् ॥ १८ ॥

[7]मध्ये तु वेदिकां कृत्वा मण्डपस्य त्रिभागतः । [8]तत्त्रिभागैकमुत्सेधं दर्पणोदरसन्निभम् ॥ १९ ॥

प्राच्यां कृत्वाग्निकुण्डं तु पद्मं वा वृत्तमेव वा ।

---

[1] G : ब्राह्मणं pour ब्राह्मणान् [2] C : पुनः pour ततः [3] G, C : गव्याभिषिच्याथ

[4] cf. *Kāraṇāgama* (T. No. 120), pp. 83-84:

बिम्बशुद्धिं ततः कृत्वा पश्याद्ग्रामप्रदक्षिणम् । जलाधिवासनं कार्यं कण्ठदघ्ने जले शुभे ॥
गङ्गां च यमुनां चैव नर्मदां च सरस्वतीम् । सिन्धुं गोदावरीं चैव कावेरीं च जलान्तरे ॥
संकल्प्य स्वस्वनामानि जले नागं तु शाययेत् । अभितः कलशानष्टौ पूर्ववत्स्थापयेद्गुरुः ॥
दिवसं दिवसार्धं वा एकयामं जलोषितम् ।

cf. *Virāgama* 91, 35b-39a:

धामप्रदक्षिणं कुर्याल्लोहजस्य विधीयते । जलाधिवासनं कुर्यात्पञ्चगव्येन स्नापयेत् ॥
प्रतिमां कण्ठदघ्ने तु जले चैवाधिवासयेत् । वस्त्रयुग्मेन संवेष्ट्य प्रच्छन्नपटसंयुतम् ॥
मूलमन्त्रेण बिम्बेन्द्र जले चैवाधिवासयेत् । अभितः कलशानष्टौ लोकपालाधिदेवतान् ॥
गन्धपुष्पादिना पूज्य पायसान्नं बलिं ददेत् । एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ॥

cf. *Sūkṣmāgama* 84, 20:

बिम्बशुद्धिं ततः कुर्याद्ग्रामावृत्तं तदन्तके । जलाधिवासनं पश्चात्''

[5] Les manuscrits A, B, C, E et F omettent le demi-*śloka* 18a.

[6] cf. *Virāgama* 91, 40-41a:

मण्डपं कारयेत्तत्र सप्ताष्टनवहस्तकम् । तन्मध्ये वेदिकां कुर्यात्परितः कुण्डमुच्यते ॥
चतुरश्राणि कुण्डानि पूर्ववद्धोममाचरेत् ।

cf. *Sūkṣmāgama* 84, 11b-14a:

शिवालयेऽन्यदेशे तु मण्डपं चतुरश्रकम् । धर्मरन्ध्राष्टहस्तं वा कलास्तम्भसमन्वितम् ॥
मण्टपं तु त्रिधा भज्य मध्यभागे तु वेदिका । रत्निमात्रसमुत्सेधा दर्पणोदरसंनिभा ॥
चतुर्द्वारसमायुक्तमलंकुर्याद्विशेषतः । योनिकुण्डाब्जकुण्डं वा पश्चिमे तु प्रकल्पयेत् ॥

[7] Le ms. G omet le second pāda du *śloka* 19a, les *śloka* 19b, 20a et le premier pāda du *śloka* 20b et lit : मध्ये तु वेदिकां कृत्वा प्रोक्षयेदस्त्रमन्त्रतः

[8] B :तत्र pour तत्त्रि

[शयनाधिवासः[1]]

गोमयालेपनं कृत्वा प्रोक्षयेदस्त्रमन्त्रतः ॥ २० ॥
स्थण्डिलं वेदिकायां तु शालिभिस्तिलतण्डुलैः । शयनं कल्पयेत्तत्र गन्धपुष्पादिभिर्यजेत् ॥ २१ ॥
जलादानीय बिम्बं तु स्नापयेत्पञ्चगव्यकैः । [2]शुद्धाद्भिरभिषिच्याथ [3]बध्वा प्रतिसरं हृदा ॥२२॥
गन्धादिभिः समभ्यर्च्य नववस्त्रेण वेष्टयेत् । शयने शाययेत्पश्चात् [4]प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥ २३ ॥

[कुम्भस्थापनम्[5]]

तस्य दक्षिणपार्श्वे तु [6]कूर्चादिभिः समन्वितम् । गन्धाम्बुपूरितं कुम्भं नागराजाभिमन्त्रितम् ॥२४॥

---

[1] cf. *Sūkṣmāgama* 84, 14b-15a:

उद्वास्य शिल्पिनं पश्चाद्भूसुरान्भोजयेत्क्रमात् । गोमयेनोपलिप्याथ वास्तुहोमं च कारयेत् ॥

cf. *Kāraṇāgama* (T. No. 120) p. 84:

गोमयेनानुलिप्याथ शालिपिष्टेन रञ्जितम् । स्थण्डिलं वेदिकोर्ध्वे तु द्रोणाष्टकसुशालिभिः ॥
तण्डुलैश्च चतुर्द्रोणैर्द्रोणद्वयतिलैरपि । तन्मध्ये नलिनं कृत्वा साष्टपत्रं सकर्णिकम् ॥

[2] C : शुद्धाद्यैः pour शुद्धाद्भिः

[3] Le ms. B omet le second pāda du *śloka* 22b et le premier pāda du *śloka* 23a et lit शुद्धाद्भिरभिषिच्याथ नववस्त्रेण वेष्टयेत्

[4] C : शिरश्चोर्ध्वं च वक्त्रकम्

[5] cf. *Virāgama* 91, 39b-46a:

जलादुत्तीर्य पूर्वेद्युः स्नापयेत्पञ्चगव्यकैः ।.....शयनं पञ्चभिः कल्प्य मूलेन प्रतिमां न्यसेत् ॥
प्रच्छन्नपटसंयुक्तं गन्धपुष्पादिनार्चयेत् । अभितः कलशानष्टौ विन्यसेन्नागबीजतः ॥
सवस्त्रान्सापिधानांश्च सहिरण्यान्सकूर्चकान् । अनन्तो वासुकिश्चैव तक्षः कार्कोट एव च ॥
शङ्खश्चैव महाशङ्खः शङ्खपालस्तथैव च । गुलिकाद्यष्टनागानां वेदिकुम्भेषु पूजयेत् ॥
मध्यकुम्भे तु संपूज्य नागराजं प्रपूजयेत् । तत्तत्स्वनाममन्त्रेण पूजयेत्तु यथाक्रमम् ॥
दद्याद्गुलौदनं चैव ताम्बूलं दापयेत्ततः ।

cf. *Sūkṣmāgama* 84, 20b-26a:

"रक्षाबन्धं ततः परम् ॥
निद्राकुम्भसमायुक्तं शयनं परिकल्पयेत् । वेदिमध्ये विशेषेण साष्टद्रोणैश्च शालिभिः ॥
तन्मध्ये नलिनं लिख्य तिलतण्डुलसंयुतम् । दशकुम्भसमायुक्तं त्रिसूत्रैः परिवेष्टितम् ॥
अन्तःकूर्चसमायुक्तं नालिकेरोपरि न्यसेत् । प्रतिमारत्नसंयुक्तं कूर्चवस्त्रादिवेष्टितम् ॥
आवाहनादिमार्गेण स्थापयेत्तु विचक्षणः । मध्यमे नागराजं च नागबिम्बे तु पूजयेत् ॥
नागकन्यां समावाह्य तद्वामे वर्धनीं न्यसेत् । पूर्वादीशानपर्यन्तमनन्ताद्यर्चयेत्सुधीः ॥
गन्धाक्षतैश्च पुष्पैश्च नैवेद्यैश्च प्रपूजयेत् ।

[6] B : कूपादिभिः ; F : वामादिभिः

स्थापयेत्परितोऽष्टौ च कुम्भान्संस्थापयेत्तथा[1] । [2]अनन्तादीन्न्यसेत्तेषु[3] [4]हविरन्तं [5]समर्चयेत् ॥ २५॥

[होमः[6]]

ततो होमं प्रकुर्वीत ह्यनेन विधिना बुधः । समिदाज्यचरूँल्लाजान् [7]सक्तुक्षीरयवांस्तिलान् ॥ २६ ॥
कदलीं पनसं चैव सर्षपांश्च यथाक्रमम् । [8]सद्याद्यस्रावसानैस्तु प्रत्येकं पञ्चविंशतिः ॥ २७ ॥

[9][स्पर्शाहुतिं ततो हुत्वा पूर्णाहुतिमथाचरेत् ।

[कुम्भाभिषेकः[10]]

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः ॥ २८ ॥
उत्थाप्य शयनान्नागं स्थापयेच्च ततः परम् । प्रायश्चित्तं ततो हुत्वा त्वष्टोत्तरसहस्रकम् ॥ २९ ॥

---

[1] B, C : ततः pour तथा

[2] Le ms. A ajoute: तस्य दक्षिणपार्श्वे तु कूर्चादिभिः समन्वितम् ; voir *śloka* 24a

[3] B : न्यसेत्तत्र pour न्यसेत्तेषु ; C : यजेत्तेषु [4] A : हविषान्तं [5] C : समर्पयेत्

[6] cf. *Kāraṇāgama* (T. No. 120) pp 87-88:

अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् । कुण्डमध्ये यजेद्धीमान्नागस्याकृतिरूपकान् ॥
समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् । होमद्रव्याणि सप्तैतान्होमयेद्देशिकोत्तमः ॥
षडङ्गमूलमन्त्रैश्च प्रत्येकं तु सहस्रकम् । सर्पगायत्रिमन्त्रैश्च अष्टोत्तरसहस्रकम् ॥
द्रव्यं प्रति विशेषेण कुर्यात्स्पर्शाहुतिं तथा । मकुटं वदनं चैव हृदयं नाभिगुह्यकम् ॥
पादौ चैव तु तद्द्रव्यं हुत्वा तेनैव मन्त्रतः । मूर्धादिपादपर्यन्तं हुत्वान्ते च तथा स्पृशेत् ॥
एवं जागरणं रात्रौ प्रभाते स्थापनं कुरु ॥

cf. *Virāgama* 91, 46b-50a:

ततो होमं प्रकर्तव्यं पलाशसमिधा सह । समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ॥
शालिनीवारगोधूमं मुद्गेनैव समन्वितम् । पञ्चब्रह्मषडङ्गेन क्रमाद्धुत्वा तु देशिकः ॥
इदं विष्णुरिति मन्त्रेण आज्येनैव शताहुतिम् । विष्णोर्नुकं च मन्त्रेण चरुणा च शताहुतिम् ॥
हुत्वा हुत्वा स्पृशेन्मूर्तिं व्याहृतिं जुहुयात्ततः । वेदना वदन त्वा तु गणानां त्वेति होमयेत् ॥

cf. *Sūkṣmāgama* 84, 26b-30:

ततः कुण्डान्तिकं गत्वा होमं कुर्याद्विचक्षणः । अग्निकार्योक्तमार्गेणाग्निमध्ये सुपूजयेत् ॥
समिदाज्यान्नशालींस्तु यवगोधूमवैणवम् । अपामार्गं च नीवारं प्रियङ्गुतिलसर्षपम् ॥
लाजं पलाशसंयुक्तं होमयेत्तु यथाक्रमम् । नागब्रह्माङ्गमूलैस्तु प्रत्येकं होममाचरेत् ॥
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा । अष्टोत्तरशतं वापि पञ्चाशत्पञ्चविंशतिः ॥
प्रायश्चित्ताहुतिं हुत्वा पूर्णाहुतिमथाचरेत् ॥

[7] A : सक्थु pour सक्तु [8] A : सद्यश्चास्रवनान्ते तु ; B : सद्याद्यस्रावसानं तु ; C : सद्याद्यस्रावसाने तु

[9] Dans tous les manuscrits utilisés pour cette édition, il semble qu'il y ait une lacune après le *śloka* 27b et avant 32a, on ne trouve en effet aucune description de कुम्भाभिषेक. Les *śloka* proposés entre crochets à titre de reconstruction hypothétique, ont pour seul objet de suggérer le contenu de cette lacune, et s'appuient pour cela sur l'autorité du *Rauravāgama-paddpati* (T. No 120)

[10] cf. *Kāraṇāgama* (T. No. 120) pp. 89-90:

आचार्यो मूर्तिपैः सार्धं स्नानत्रयमथाचरेत् । उत्थाप्य शयनान्नागं स्थापनं च ततः परम् ॥
प्रायश्चित्तं ततो हुत्वा अष्टोत्तरसहस्रकम् । अष्टबन्धं ततः कृत्वा बन्धयेत्सुदृढं कुरु ॥
सुमुहूर्ते सुलग्ने च गुरवे संनिवेदयेत् । कुम्भानुद्धृत्य शिरसा आवृतान्कलशोदकान् ॥

सुमुहूर्ते सुलग्ने च गुरवे संनिवेदयेत् । कुम्भानुद्धृत्य शिरसा चावृतान्कलशोदकान् ॥ ३० ॥
अभिषिच्य यथाम्यायं पूजयेत्सर्पराजकम् । पञ्चामृतैः पञ्चगव्यैर्गन्धोदकेक्षुसारकैः ॥ ३१ ॥]
क्षीरतण्डुलचूर्णेन नारिकेलोदकेन च । [अभिषिच्य क्रमेणैवमुपचारांश्च दापयेत् ॥ ३२ ॥]
पाद्यं सद्येन दत्त्वा तु वामेनाचमनीयकम् । अघोरेणार्घ्यकं दत्त्वा चास्त्रेणैवाभिषेचनम् ॥ ३३ ॥
गन्धमीशानमन्त्रेण पुष्पं वै हृदयेन तु । धूपं तु शिरसा दत्त्वा दीपं नेत्रेण दापयेत् ॥ ३४ ॥
माल्यमाभरणं चैव [1]कवचेनैव दापयेत् । नैवेद्यं हृदयेनैव [2]नमस्कारोऽस्त्रमन्त्रतः ॥ ३५ ॥
[3]वेदिकायां स्थापयित्वा [4]स्नपनोक्तं समाचरेत् । एवं यः कुरुते मर्त्यः सर्वरोगाद्विमुच्यते ॥ ३६ ॥

इति [5]श्रीमद्रौरवतन्त्रे [क्रियापादे] [6]नागराजप्रतिष्ठा नामाष्टत्रिंशः पटलः ॥

अभिषिच्य क्रमेणैताञ्ज्ञात्वा चैव समाचरेत् । धूपदीपं च नैवेद्यं ताम्बूलाद्युपचारकैः ॥
पुष्पाञ्जलिं ततो दत्त्वा प्रणम्य दण्डवद्भुवि । मन्त्रहीनं क्रियाहीनं द्रव्यहीनं कृपानिधे ॥
यत्पूजितं मया देव परिपूर्णं तदस्तु ते । यजमानस्ततो द्रव्यवस्त्रालंकारभूषणैः ॥
शान्तिकुम्भाभिषेकं च दानानि च यथाक्रमम् । आचार्यं पूजयेत्पश्चाद्गोदानं भूमिदानकम् ॥
उत्तमं पञ्चनिष्कं स्यान्मध्यमं तु तदर्धकम् । तदर्धमधमं ज्ञेयमाचार्यस्य तु दक्षिणा ॥
ऋत्विग्भ्यो दक्षिणां दद्याद्दम्पती पूजयेत्क्रमात् । दशदानं ततः कृत्वा सर्वेभ्यो भूरिदक्षिणाम् ॥
ब्राह्मणान्भोजयेत्तत्र अष्टोत्तरशतानि च । आशीर्वादास्ततो ग्राह्याः सर्वान्कामानवाप्नुयात् ॥

cf. *Vīrāgama* 91, 50b-54a:

ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः । स्थितिन्यासं प्रकर्तव्यं पूर्ववल्लक्षणान्वितम् ॥
ततोऽवसानहोमं तु समिदाज्यचरुभिः सह । नागमूलेन हृदये मन्त्रेणैव क्रमान्न्यसेत् ॥
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् । स्विष्टमग्नेतिमन्त्रेण जुहुयात्तदनन्तरम् ॥
ब्राह्मणान्भोजयेत्तत्र यागकुम्भाभिषेचयेत् । महाहविर्निवेद्याथ ताम्बूलं दापयेत्ततः ॥

cf. *Sūkṣmāgama* 84, 31-39:

उत्थाप्य शयनाद्बिम्बं स्पर्शाहुतिमथाचरेत् । स्वस्थाने स्थापयेद्बिम्बं न्यासं कृत्वा यथाक्रमम् ॥
अग्नौ मूर्तिं समुत्थाप्य कुम्भस्योपरि विन्यसेत् । आचार्यं पूजयेत्पश्चाद्दक्षिणां च प्रदापयेत् ॥
यात्रादानं पुरा कृत्वा दशदानं ददेत्क्रमात् । वेद्याः कुम्भं समुत्थाप्य बिम्बाग्रे विन्यसेत्क्रमात् ॥
कुम्भाद्बीजं समुत्थाप्य सर्पस्योपरि विन्यसेत् । तद्वामे वर्धनीं न्यस्य एकं चेत्पीठके न्यसेत् ॥
अनन्ताद्यष्टनागांश्च पूर्वादिकलशान्न्यसेत् । महाभिषेकसंयुक्तं वस्त्रैर्गन्धैरलंकृतम् ॥
पुष्पमाल्यैरलंकृत्य सर्वाभरणभूषितम् । महानैवेद्यसंयुक्तं ताम्बूलं धूपदीपकम् ॥
उपचाराणि सर्वाणि दापयेत्तु विचक्षणः । ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च दापयेत् ॥
अनेन विधिना यस्तु करोति स्थापनं यदि । नागेन्द्रस्य प्रसादेन सर्वान्कामानवाप्नुयात् ॥
आयुरारोग्यपुत्रार्थमैश्वर्यादिसमृद्धिदम् । इह लोके सुखं प्राप्य पुण्यलोकं लभेत्सुधीः ॥

[1] B : कवचेनैवमाचरेत् ; C : कवचेनैव तु दापयेत्
[2] B : वन्दनं चास्त्रमन्त्रतः
[3] A : वेद्यायां स्थापनेनैव ; C : नैवेद्यस्थापनेनैव
[4] A : स्नपनं तु
[5] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे
[6] A : नागराजप्रतिष्ठा एकोनचत्वारिंशः पटलः ; B : नागराजप्रतिष्ठा नामैकोनचत्वारिंशः ; C : नागराजप्रतिष्ठाविधिर्नाम पञ्चत्रिंशत्पटलः ; E : नागराजप्रतिष्ठाविधिः षट्त्रिंशत्पटलः ; F : नागराजविधिपटलः षट्त्रिंशतितमः

[एकोनचत्वारिंशः पटलः]

[प्रासादलक्षणविधिः[1]]

[सदनविधानम्[2]]

वक्ष्येऽहं सदनानां तु संक्षेपाल्लक्षणं [3]गुरो । एकहस्तं समारभ्य [4]द्विद्विहस्तविवर्धनात् ॥ १ ॥
[5]एकसप्ततिहस्तान्तं षट्त्रिंशत्सदनं भवेत् [6] । [7]विस्तारसदृशादूर्ध्वं पादमर्धं त्रिपादकम् ॥ २ ॥

---

[1] Pour प्रासादलक्षण voir *Aṃśumatkāśyapa, paṭala* 6, 8, 9, 21, 22, 24 et 26 à 40, *Ajita, paṭala* 12 à 14, *Kāmika* I 49, 50, 53, 55et 60, *Kāraṇa* I 5 et 7, *Kiraṇa* III 25, *Dipta, paṭala* 2, 5 et 6 à 9, *Santānasaṃhitā, paṭala* 5, et *Suprabheda* I 31.

[2] cf. *Aṃśumatkāśyapa* 22, 37b-58a:

त्रिचतुर्हस्तमारभ्य द्विद्विहस्तविवर्धनात् । नवपङ्क्तिकरान्तं तु आभासैकतलं भवेत् ॥
एवमष्टविधं मानं युग्मायुग्मं चतुश्चतुः । पञ्चषड्हस्तमारभ्य द्विद्विहस्तविवर्धनात् ॥
रुद्रभानुकरान्तं तु आभासद्वितलेऽष्टधा । सप्ताष्टहस्तमारभ्य द्विद्विहस्तविवर्धनात् ॥
तिथिकलाकरान्तं तु आभासत्रितले दश । ग्रहकर्म समारभ्य सप्ताष्टाधिकपङ्क्तयः ॥
चतुष्पञ्चतलं वाथ युग्मायुग्माश्च ते दश । विस्तारं सप्तषट्पञ्चभागं कृत्वा द्विजोत्तम ॥
रसभूतयुगांशं तु विस्ताराद्रोपयेत्क्रमात् । विस्तारद्विगुणं चैव तस्मादष्टांशमाधिकम् ॥
पञ्चधाभ्युदितं तुङ्गमाभासे सदने द्विज । शान्तिकं पौष्टिकं चैव जयदं चाद्भुतं तथा ॥
सार्वकामिकमित्येतदभिधानं क्रमाद्भवेत् । हस्तैरेतैस्तु वृद्ध्या वा हान्या वा पूर्णमाचरेत् ॥
आभासं हर्म्यमाख्यातं विकल्पमधुना शृणु । नवपङ्क्तिकरात्पञ्चषट्पञ्चाशत्करान्तकम् ॥
द्विद्विहस्तविवृद्धया तु चतुर्विंशतिसंख्यया । पञ्चभूमिं समारभ्य यावदर्कतलं क्रमात् ॥
अधममध्यमोत्कृष्टास्त्रयो भेदास्तलं प्रति । सप्ताष्टाधिकपङ्क्तयादि त्रित्रिहस्तविवर्धनात् ॥
षट्सप्ताधिकाशीत्यन्तमुच्चं प्रागिव संख्यया । एवं विकल्पमाख्यातं छन्दमार्गमथ शृणु ॥
त्रिचतुर्दशहस्तादि द्विद्विहस्तविवर्धनात् । पञ्चषट्षष्टिहस्तान्तं व्यासं वै सप्तविंशतिः ॥
वेदभूमिं समारभ्य भानुभूम्यवसानकम् । अधममध्यमोत्कृष्टं मानं स्याद्वै तलं प्रति ॥
सप्ताष्टदशहस्तादि त्रित्रिहस्तविवर्धनात् । पञ्चषण्णवतिर्यावदुच्चं प्रागिव संख्यया ॥
अधममध्यमोत्कृष्टं तुङ्गभेदं तलं प्रति । छन्दमेवं समाख्यातं जातिहर्म्यमथ शृणु ॥
सप्ताष्टदशहस्तादि द्विद्विहस्तविवर्धनात् । यावत्सप्ततिहस्तान्तं सप्तविंशतिसंख्यया ॥
चतुर्भूमिं समारभ्य यावदर्कतलावधि । तावद्विस्तारमाख्यातमुत्सेधं शृणु सुव्रत ॥
एकद्वाविंशहस्तादि त्रित्रिहस्तविवर्धनात् । यावदाशतहस्तान्तमुच्चं प्रागुक्तसंख्यया ॥
अधममध्यमोत्कृष्टमुत्सेधं वै क्रमोदितम् । एवं जातिविमानं तु सप्तविंशतिधोदितम् ॥
जातिच्छन्दविकल्पं च आभासेन द्विजोत्तम । महतीष्वन्तरालपाश्च क्षुद्रनाम्ना क्रमोदिताः ॥

[3] B : शृणु pour गुरो [4] A : द्विहस्तं च pour द्विद्विहस्त ; B : द्विहस्तादि
[5] B, G : सैक pour एक ; F : चैक [6] A, B : तदनन्तरम् pour सदनं भवेत्
[7] G : विस्तारं pour विस्तार

[1]समं सपादमुत्सेधः पञ्चधा शान्तिकादयः। शान्तिकं पौष्टिकं चैव जयदाद्भुतमेव च ॥ ३ ॥
[2]सार्वकामिकमित्येते सदनस्य [3]प्रकीर्तिताः। आदौ तु सप्तमानं तु क्षुद्राख्यसदनस्य तु ॥ ४ ॥
तदन्ते सप्तमानं [4]चाप्याभासाख्यं प्रशंसितम्। [5]सप्तसंख्योदिताद्यन्ते विकल्पमभिधीयते ॥ ५ ॥
तदन्ते [6]तत्समं छन्दं [7]शेषाष्टौ [8]जातिरुच्यते। एकद्वित्रितलं वापि क्षुद्रमानेषु कारयेत् ॥ ६ ॥
त्रिचतुष्पञ्चभूमीर्वा कुर्यादाभासमानके। षट्सप्ताष्टतलं वापि [9]विकल्पे तु विधीयते ॥ ७ ॥
[10]दशनवाष्टभूमीर्वा छन्दमाने तु कल्पयेत्। त्रयोदशकलाभूमी [11]जातिहर्म्ये [12]प्रशंसिते ॥ ८ ॥
त्रिचतुर्भागमारभ्य द्विद्विभागविवर्धनात्। ससप्तवसुभागाढ्य[13]चत्वारिंशांशकावधिः ॥ ९ ॥
[14]एकाद्यर्कतलान्तानां यथायुक्त्या प्रकल्पयेत्।

---

[1] cf. *Aṃśumatkāśyapa* 26, 15-27a:

हर्म्योच्चं वसुधा भज्य एकांशं हि तलोन्नतम्। द्विभागं चरणायामं प्रस्तरं चैकभागया ॥
गलोच्चं त्वेकभागेन द्विभागं शिखरोदयम्। एकांशं स्तूपितुङ्गं तु कल्प्यैवं शान्तिकं भवेत् ॥
शान्तिके मञ्चमानं तु दशाष्टसप्तभागकम्। एकांशरहितं शेषं मञ्चं वा प्राग्वदेव वा ॥
एवं शान्तिकमाख्यातं पौष्टिकं चाधुना शृणु। सदनोच्चे नवांशे तु शिवांशं तु तलोदयम ॥
अर्धपादसमायुक्तं द्व्यंशं तु चरणोदयम्। मञ्चमानं तथैकांशं सार्धपादांशकं गलम् ॥
सत्रिभागत्रिभागं तु शिखरोदयमीरितम्। स्तूप्युत्सेधं तथैकांशं पौष्टिकं सदनं त्विदम् ॥
सदनोच्चे दशांशे तु अधिष्ठानोदयं शिवम। सार्धद्व्यंशं तु पादोच्चं प्रस्तरं तु शिवांशकम् ॥
साधैंशं गलमानं तु गुणांशं शिखरोदयम्। एकांशं स्तूपिमानं तु जयदं तदुदाहृतम् ॥
रुद्रांशे हर्म्यतुङ्गे तु सपादांशं धरातलम्। सार्धद्व्यंशं तु पादोच्चं प्रस्तारं तु शिवांशकम् ॥
अध्यर्धांशं तु कण्ठोच्चं सार्धत्र्यंशं तु शीर्षकम्। शेषं स्तूप्युदयं ख्यातं त्वद्भुतं सदनं भवेत् ॥
तुङ्गे सप्तांशभागे तु त्रिपादांशं धरातलम्। पक्षांशं पादतुङ्गं तु त्रिपादांशं तु प्रस्तरम् ॥
त्रिपादांशं गले मानं शिखरोच्चं द्विभागकम्। स्तूप्युत्सेधं तथैकांशमेतत्स्यात्सार्वकामिकम् ॥
शान्तिकाद्युदयोपेतं हर्म्यगण्यं क्रमोदितम् ॥

[2] A, B : सार्वकालिक pour सार्वकामिक [3] G : प्रकीर्तितम्
[4] A : आभासाख्यप्रशासिता ; B : आभासाख्या प्रशासिता
[5] A : सप्तसंख्यादिता द्व्यान्ते ; B ; F : सप्तसंख्यादि तद्यान्ते ; G : सप्तसंख्योदिताद्यान्ते
[6] C : सप्तमछन्दं pour तत्समं छन्दं [7] B : शेषेऽष्टौ [8] C, F G : ज्योति pour जाति
[9] A : विकल्पं तु
[10] B : नवाष्टदश pour दशनवाष्ट [11] A : छन्दमाने pour जातिहर्म्ये [12] A : प्रशंसित:
[13] A, B : चत्वारिंशत्करावधि [14] A, B : एकाद्येक pour एकाद्यर्क

[प्रासादालंकारः[1]]

[2]गृहपिण्डयलिन्दहारं च [3]युक्तियुक्तं तु [4]कल्पयेत् ॥ १० ॥

[5]व्योमांशं [6]कर्णकूटानां [7]पञ्जराणां तथैव च । [8]कोष्ठायामं तदक्षांशं [10]हारान्तरमथार्धकम् ॥११॥

---

[1] cf. *Aṃśumatkāśyapa* 28, 64-66:

मानसूत्रान्तरं धर्मभागं कृत्वा द्विजोत्तम । गर्भगेहं तु वेदांशं गृहपिण्डयंशमावृतम् ॥
परितोऽलिन्दमेकांशं हारं भागेन कल्पयेत् । तेष्वेककूटविस्तारं मध्ये कोष्ठायतं द्वयम् ॥
तयोर्मध्यैकभागेन पञ्जरव्यासमुच्यते । हारान्तरमथांशेन पञ्जरस्य तु पार्श्वयोः ॥

cf. *ibid*, 29, 2:

रव्यंशे मानसूत्रान्तः कृते गर्भगृहं रसम् । गृहपिण्डयलिन्दहारादि प्रत्येकं चैकभागया ॥

cf. *ibid*, 29, 37-38a:

मानसूत्रान्तरं नन्दभागं कृत्वा विशेषतः । गर्भगेहं गुणांशं स्याद्भागेन गृहपिण्डिका ॥
अलिन्दमंशेन कर्तव्यं हारं भागेन कल्पयेत् ॥

cf. *ibid*, 29, 46b-47:

गेहव्यासं तु धर्मांशं कृत्वा नाळीगृहं चतुः । गृहपिण्डयंशमानेन अलिन्दं चैकभागया ॥
हारव्यासं शिवांशेन परितः परिकल्पयेत् ॥

cf. *ibid* , 31, 2-3a:

विस्तारं रुद्रधा भज्य गुणांशं गर्भगेहकम् । द्विभागं गृहपिण्डी स्यादलिन्दं चैकभागया ॥
हारा भागेन कर्तव्या ''

[2] A : ग्रहाणाषाढयमिन्द्रहारा च ; B : ग्रहषाणाढयमिन्द्रहारा ; G : ग्रहषण्मुद्रहारा च

[3] A : युक्तियुक्त्या [4] B : योजयेत् [5] C : व्योमांशु

[6] Pour कर्णकूट voir *Aṃśumatkāśyapa* 30, 30, 2a:

तलं प्रत्युदितव्याससमाश्रं कर्णकूटकम् ॥

[7] Pour पञ्जर voir *Aṃśumatkāśyapa* 30, 20-27:

'' पञ्जरस्त्वधुनोच्यते ॥

उपानादुत्तरान्तं तु नवभागविभाजिते । उपपीठमथांशेन पक्षांशं तु धरातलम् ॥
वेदांशं चरणायामं मध्यमध्यर्धभागया । अर्धांशं वेदिकामानं कपोतान्तं गलोदयम् ॥
प्रतिराजनसीमान्तं पञ्जरोच्चमुदाहृतम् । प्रासादस्य च बाह्ये तु यथाशोभांशनिर्गतिः ॥
पञ्जरं नासिकाकारं कूटकोष्ठाकृतिस्तु वा । हस्तिपृष्ठविमानस्य शिखराभमथापि वा ॥
एवं त्वनेकभेदेन पञ्जराकृतिरुच्यते । यथेष्टं तत्र कर्तव्यं हर्म्येष्वनेकभूमिषु ॥
एवमादितले कुर्यादन्तरप्रस्तरान्वितम् । मानसूत्रात्तु निष्क्रान्तं युक्तमेवं समाचरेत् ॥
पञ्जरं नीव्ररहितं प्रस्तरोर्ध्वे विशेषतः । कर्णकूटसमं सार्धं त्रिपादं वाथ विस्तृतम् ॥
तद्व्यासदृशं तुङ्गं युक्त्या पञ्जरमाचरेत् ॥

[8] Pour कोष्ठ voir *Aṃśumatkāśyapa* 30, 2b:

आयताश्रं तु कोष्ठं स्याच्चतुष्पादैकभित्तितः ।

[9] A : कोष्ठावस्तु पदक्षांशं ; B : पदाक्षांशं तु कोष्ठायां

[10] A : हारान्तत्परमार्थकम् ; B : हारां तत्परमार्धकम ; G : हाराणां तत्परार्थकम्

[1]सद्ममध्येऽर्धमध्ये च [2]कोष्ठान्संकल्पयेद्बुधः। [3]कण्ठेषु कर्णकूटानि [4]तयोर्मध्ये तु पञ्जरान् ॥ १२ ॥
[5]हारान्तरं तयोर्मध्ये कल्पयेत्कल्पवित्तमः। अधिष्ठानोपरिष्टात्तु [6] [7]प्रस्तरोर्ध्वे तु वा बुधः ॥ १३ ॥
देवेश्वरप्रतिष्ठा[8] तु कर्तव्या [9]सकलस्य वा।

[गर्भगृहम्[10]]

[11] प्रासादव्यासस्याग्र्यंशे व्योमांशं गर्भगेहकम् ॥ १४ ॥

प्रासादार्धं[12] तु वा [13]भूतभागेऽग्र्यंशं तु वा गृहम्। शेषं [14]भित्तिविशालं स्यात्क्षुद्राणां तु रुरो विदुः ॥
[15]गृहपिण्डथलिन्दहाराश्चाप्याभासाद्ये[16] तु योजयेत्। [17]हारालिन्दं [18]गृहपिण्डेर्बाह्यतः परिकल्पयेत् ॥
एकादिनवसंख्यातमलिन्दं [19]युक्तितो भवेत्। [20]कण्ठे कण्ठे तु सोपानमलिन्देषु[21] [22]प्रकल्पयेत् ॥ १७ ॥
[23]अलिन्दालिन्दसंवेशं प्रदक्षिणवशात्कुरु। गर्भगेहादलिन्दान्तं[24] घनं शैलेष्टकादिभिः ॥ १८ ॥
उपर्यूपरि सोपानं [25]हारालिन्दं क्रमाग्नयेत्[26]।

---

[1] B : सन्मध्यमे pour सद्मध्ये ; G : सभामध्ये [2] B : कोष्ठात् pour कोष्ठान्
[3] A : कर्णेषु कर्णकूपानि ; C : कण्ठेषु कण्ठकूटानि [4] B : तयोर्मध्यं तु पञ्जरम्
[5] A : हारात्तयोन्तरार्मध्ये ; B : हाविक्तयोन्तरं मध्ये ; C : हारान्तरान्तयोर्मध्ये [6] A : वा pour तु
[7] A : प्रस्तरोर्ध्वे तु वार्षयः : C : प्रस्तरोर्ध्वोत्सव बुधः ; G : प्रस्तरोर्ध्वोद्भवा बुधः
[8] C, G : प्रतिष्ठां pour प्रतिष्ठा [9] A, B, G : सकलं तु वा
[10] cf. *Aṃśumatkāśyapa* 26, 11-14a;
हर्म्यतारत्रिभागैकं गर्भगेहस्य विस्तृतम्। पञ्चभागे त्रिभागं च वेदांशं सप्तभाजिते ॥
दशांशे भूतभागं तु रसांशं रुद्रभाजिते। त्रयोदशांशे सप्तांशं वस्वंशं तिथिभाजिते ॥
सप्तदशांशे नवांशं च व्यासार्धं च द्विजोत्तम। गर्भगेहस्य विस्तारं नवधा कीर्तितं मया ॥
शेषं भित्तिविशालं स्यात्परितः कल्पयेद्बुधः।
voir aussi *Ajitāgama* 12, 21-27.
[11] A : प्रासादव्यासमंशेऽशे [12] G : अल्पं pour अर्धं [13] A : भूतभागारग्र्यंशं
[14] C, G : भक्ति pour भित्ति
[15] A : गृहाणामिन्द्रहारा च ; B : हेषणामिन्द्रहारा च ; C : गृहषण्मुद्रहारा च
[16] A : आभासाभ्यां pour आभासाद्ये [17] B : हारालिन्द्रं ; C : आराविन्द्रं ; G : आराविन्दुं
[18] A : गृहे षण्डिबाह्यतः ; C : गृहे षण्डं बाह्यतः ; G : गृहे षण्डमग्रतः
[19] A : युक्तितो परे ; B : युक्तितो वरे [20] A, B : कर्णे कर्णे तु [21] B : अलिन्देषु pour अलिन्देषु
[22] B : परिकल्पयेत्
[23] A : अलिन्ददिन्द्रसंवेशं ; B : अलिन्द्रमिन्द्रसंवेशं ; C : अलिन्द्रादिन्दुसंसंवेशं ; F : अलिन्द्रादिन्द्रसंवेशं
[24] B : अलिन्द्रान्तं pour अलिन्दान्तं [25] C : हारालिन्द्रं ; C, F : हारमिन्द्रं [26] B : न्यसेत् pour नयेत्

[षड्वर्गः[1]]

व्योमाक्षिशिवचन्द्राश्विनीरुद्राश्चाष्टभागके ॥१९॥
[2]आधारं चरणं [3]मञ्चं [4]ग्रीवशीर्षं च कुण्डलम् । मानमेकतले कुर्याद्द्व्याद्रे द्वितलोदये[5] ॥ २० ॥
अधिष्ठानाङ्घ्रिमञ्चाङ्घ्रि [6]प्रस्तरं गलमस्तकम् । [7]स्थूपिमानं क्रमादेकं [8]द्वैकद्वैककमक्षिकम् ॥ २१ ॥
[9]एकस्मादस्य भागोर्ध्वं गुणभागेन भाजिते । त्रितलस्य तलादीनामुच्चमेवं विधीयते ॥ २२ ॥
[10]कृत्वैवं मानकं युक्त्या कलाभौमान्तकं नयेत् ।

[नागरादिलक्षणम्[11]]

[12]कुण्डलान्तमधिष्ठानाद्वेदाश्रं[13] नागरं भवेत् ॥ २३ ॥

---

[1] cf. *Aṃśumatkāśyapa* 26, 15-16:
हर्म्यं च वसुधा भज्य एकांशं हि तलोन्नतम् । द्विभागं चरणायामं प्रस्तरं चैकभागया ॥
गलोच्चं त्वेकभागेन द्विभागं शिखरोदयम् । एकांशं स्तूपितुङ्गं तु कल्प्यैवं शान्तिकं भवेत् ॥
cf. *ibid.*, 27, 6-9a:
प्रसादोच्चं तु विभजेदष्टाविंशतिसंख्यया । गुणांशं धरातलोत्सेधं रसांशं चरणोदयम् ॥
प्रस्तरोत्सेधमग्न्यंशं भूतांशं चरणोदयम् । द्विभागं प्रस्तरोत्सेधमेकांशं वेदिकोदयम् ॥
द्विभागं गलमानं तु सार्धवेदांशशीर्षकम् । स्तूप्युच्चं सार्धभागं तु कल्पितं शान्तिकं भवेत् ॥
cf. *ibid.*, 28, 6b-10a:
प्रासादस्योच्छ्रये भानुद्विगुणांशे विभाजिते । द्विभागं धरातलोच्चं वै वेदांशं चरणोदयम् ॥
मञ्चमानं द्विभागेन पादोनचतुरंशकैः । पादायामं च साधांशं प्रस्तरोच्चमुदाहृतम ॥
सार्धत्रिभागं पादोच्चं सपादांशं तु मञ्चकम् । अर्धांशं वेदिकाभागं गलमानं शिवांशकम् ॥
सार्धत्र्यंशं तु शिखरं स्तूप्युच्चं त्वेकभागकम् । एवं हि कल्पितं गेहं शान्तिकं त्विति विद्यते ॥
voir aussi *Ajitāgama* 12, 6 -65a:

[2] A : आधारशरणं [3] C, F : पद्मं pour मञ्चं [4] B : चक्री pour ग्रीव
[5] C, F, G : द्वितलोदयम् [6] A : प्रस्तरा pour प्रस्तरं [7] C, F : स्तूपि pour स्तूपि
[8] A : द्वैकं द्वैकतमक्षकम् ; G : द्वैकद्वैकैकमक्षकम् [9] A : एकस्यादस्य ; B : एकः स्यादस्य
[10] A : कृत्वैवमनका युक्त्या ; F : कृत्वैवमगसा युक्त्या ; G : कृत्वैवं मनसा युक्त्या
[11] cf. *Aṃśumatkāśyapa* 24, 31-32:
जन्मादि स्तूपिपर्यन्तं युगाश्रं नागरं भवेत् । वस्वश्रं शीर्षकं कण्ठं द्राविडं भवनं भवेत् ॥
वृत्तग्रीवशिरोपेतं वेसरं हर्म्यमीरितम् । कूटकोष्ठविहीनानां हर्म्याणां कथितास्त्विमे ॥
cf. *Kāmikāgama* I 49, 108b-110a:
उपानात्स्तूपिपर्यन्तं युगाश्रं नागरं भवेत । कण्ठात्प्रभृति वृत्तं यद्वेसरं परिकीर्तितम् ॥
कण्ठात्प्रभृति वश्वश्रं द्रामिडं परिकीर्तितम् । सार्वदेशिकधाम्न्येतन्नागरात्र्यं प्रकीर्तितम् ॥
cf. *Diptāgama* 7, 12b-15:
जातित्रयं विधातव्यं प्रासादानां विशेषतः । नागरं द्राविडं चैव वेसरं च त्रिधा मतम् ।
उपानात्स्तूपिपर्यन्तं युगाश्रं नागरं भवेत् । चतुरश्रायतं चैव अष्टाश्रं वा विशेषतः ॥
प्रासादं द्राविडं विद्याद्वेसरं चाथ वक्ष्यते । वृत्तं वृत्तायतं चैव द्व्यश्रवृत्तं तथैव च ॥
प्रासादं वेसरं विद्यात्त्रिविधं तत्प्रशस्यते ॥

[1]तला रुद्रावधि प्रोक्ताः [2]कण्ठाद्या कुण्डलान्तकम् । कुण्डलान्तमुपानादि वृत्तं[3] वेसरमुच्यते ॥२४॥
[4]मण्डलं स्याद्दलादूर्ध्वं [5]शेषं वेदाश्रमेव वा ।

[अधिष्ठनम्[6]]

प्रतिबन्धाङ्घ्रिबन्धं [7]वाप्यधिष्ठानं तु कारयेत् ॥ २५ ॥

[स्तम्भाः[8]]

ब्रह्मकान्तं तु वा विष्णुकान्तं वा रुद्रकान्तकम् । चरणाकृति[9] कर्तव्यं कुम्भ[10]मण्डयादिसंयुतम् ॥ २६ ॥
कुम्भ[11]मण्डयादिरहितं [12]बोधिकासहितं तु वा । सवेदिकन्धरं पादं [13]मञ्चं प्रत्यभिपञ्जरम्[14]॥ २७ ॥

---

cf. *Santānasaṃhitā* 5, 10-11a:
उपानादिस्तूपिपर्यन्तं चतुरश्रं नागरं भवेत् । चतुरश्रायताष्टाश्रं प्रासादं द्राविडं भवेत् ॥
वृत्तं वृत्तायतं चापि द्व्यश्रवृत्तं तु वेसरम् ॥
voir aussi *Ajitāgama* 12, 65b-68a:

[12] A : कुण्डलान्नवधिष्ठानाद् ; C : कुण्डलान्तावधिष्ठानाद् [13] G : बेदाग्रं pour बेदाश्रं

[1] C, F, G : कला pour तला [2] A : कर्णाद्या pour कण्ठाद्या [3] A : युक्तं pour वृत्तं

[4] A : मण्डलस्थ pour मण्डलं स्याद् [5] A : शेषयोदाश्रमेव वा ; B : शेषयोधाश्रमेव वा

[6] Pour प्रतिबन्ध voir *Aṃśumatkāśyapa* 6, 30b-32:
अधिष्ठानस्य चोत्सेधे एकोनविंशदंशके । उपानं चैकभागेन सप्तांशैर्जगती भवेत् ॥
षडंशं कुमुदोच्चं तु आलिङ्गं चैकभागया । त्रिपट्टं चैकभागेन प्रत्युत्सेधं द्विभागया ॥
वाजनं चैकभागेन प्रतिबन्धमिदं भवेत् ।
voir aussi *Ajitāgama* 13, 18-19.
Pour अङ्घ्रिबन्ध voir *Aṃśumatkāśyapa* 6, 33b-36a:
अधिष्ठानस्य चोत्सेधे पञ्चविंशति भाजिते । शिवांशं पादुकोत्सेधं जगती वसुभागया ॥
धात्वंशं कुमुदाच्चं तु व्योमांशं कम्पमानकम् । अनलांशं गलोत्सेधं शशयंशं चोर्ध्वकम्पकम् ॥
महापट्टी गुणांशं तु तदूर्ध्वेऽशेन कम्पकम् । पादबन्धमिति ख्यातम्"
voir aussi *Ajitāgama* 13, 2-4.

[7] A : वा अधिष्ठानं तु

[8] cf. *Aṃśumatkāśyapa* 8, 10-14a:
मूलादग्रं युगाश्रं तु कुम्भमण्डयादिसंयुतम् । ब्रह्मकान्तमिति ख्यातं वस्वश्रं विष्णुकान्तकम् ॥
रसाश्रमिन्द्रकान्तं स्याच्चन्द्रकान्तं कलाश्रकम् । कण्ठमानेन तन्मूले वेदाश्रं तु प्रकल्पयेत् ॥
स्तम्भाग्रं चैकभागेन चतुरश्रसमन्वितम् । तयोर्मध्यं तु वस्वश्रं षोडशाश्रमथापि वा ॥
वृत्ताकारं तु वा विप्र कुम्भमण्डयादिसंयुतम् । रुद्रकान्तमिदं ख्यातं मूलादग्रं तु वर्तुलम् ॥
कुम्भमण्डयादिहीनं यत्तद्वापि रुद्रकान्तकम् ।
cf. *Kāmikāgama* I 53, 15-21a:
पञ्चषड्गुणितो वापि स्तम्भालंकार इष्यते । उच्यते चतुरश्रं च वृत्तं वा तत्प्रकीर्तितम् ॥
सर्वं तच्चतुरश्रं तु कुम्भमण्डीसमन्वितम् । ब्रह्मकान्तं विजानीयाद्व्यासत्रिगुणमानतः ॥
मध्येऽष्टाश्रं पोतिकान्तं मध्याष्टाश्रं प्रकल्पयेत् । सर्वत्राष्टाश्रसंयुक्तं कुम्भमण्डयादिसंयुतम् ॥
विष्णुकान्तं स्वयं नाम्ना..... । समत्रिभागमानेन चतुरश्राष्टाश्रवृत्तकः ॥
कुम्भमण्डयादिसहिता रुद्रकान्तस्तु कीर्तितः ।
voir aussi *Ajitāgama* 14, 14-19a.

[1]शिखरे [2]तु महाशासु कल्पयेद्भद्रनासिकाः[3] । अभद्रनासिकाः[4] कोणे कल्पयेद्वेसरे बुधः ॥२८॥
विना वाप्यल्पनासायास्तस्मिन्निष्टं[5] सभद्रकम् ।[6]नागरे दिशि [7]भद्राः स्युः कोणेषु युगमल्पकम् ॥ २९
[8]तदल्परहितं वापि सभद्रं भद्रनासिकम [9] ।

---

[9] Le mot आकृति se trouve au neutre au lieu du féminin.

[10] A : दण्डादि pour मण्ड्यादि ; C F, G : मध्यादि [11] A : मण्डादि ; F : मध्यादि

[12] Pour बोधिका voir *Sūkṣmāgama* 35, 26-27a:
स्तम्भाग्रतारमानं स्याद्बोधिकोत्सेधमुच्यते । उत्सेधत्रिगुणं वापि चतुःपञ्चगुणं तु वा ॥
षट्सप्ताष्टगुणं वाथ बोधिकादीर्घमिष्यते ।
voir aussi *Ajitāgama* 37, 29-30.

[13] Pour मञ्च voir *Kāmikāgama* I 55, 204b-205a:
प्रस्तरं चैव गोपानं कपोतं मञ्चमेव वा । नीव्रमित्येवमाख्यातं प्रस्तरस्य द्विजोत्तमाः ॥

[14] B : अङ्गप्रत्यङ्गपञ्जरम्

[1] cf *Aṃśumatkāśyapa* 21, 21b-23:
पादं प्रति कपोतेषु कल्पयेत्स्वस्तिकाकृतिम् । मध्ये च कूटशालानां पञ्जरे चाल्पनासिकाः ॥
कल्पयेत्तु विशेषेण शिखरे भद्रनासिका. । शालाग्रयोस्तु कर्तव्या ललाटाख्या तु नासिका ॥
कल्पयेत्पञ्जरस्थाने महानास्याख्यनासिका ॥
ibid., 26, 43b-45a:
तदेव वेदिकाकण्ठं शिखरं च घटं तथा । वस्वश्रपट्टसंयुक्तं चतुर्दिग्भद्रनासिकाः ॥
अभद्रनासीचत्वारः शिखरे तु विदिक्स्थिताः । पादं प्रत्यल्पनास्याढ्यं स्वस्तिबन्धं तदुच्यते ॥
ibid., 24, 8b-12:
"आकृतिं शृणु सुव्रत ॥
कूटकोष्ठादिनिष्कान्तिर्मानसूत्रे तु संस्थिता । उन्नतावनतोपेतौ कूटकोष्ठौ यथाक्रमम् ॥
एकाकारतलस्तम्भपत्रतोरणसंयुतम् । क्षुद्रकोष्ठसमायुक्तं महानास्यपरे द्विज ॥
वेदिकाजालकोपेतं कूटं वेदाश्रशीर्षकम् । एकानेकतलं वापि सालिन्दं वा विहीनकम् ॥
वेदाश्रशीर्षकं कण्ठं शालाकारमथापि वा । नागरं भवनं ख्यातं तद्देशे तु प्रकल्पितम् ॥
cf. *ibid.*, 29, 26-30:
वेसरे कूटकोष्ठादिनीव्रं स्यात्समसूत्रकम् । वृत्ताकारशिरोपेतं कर्णकूटं प्रकल्पयेत् ॥
वृत्तं गर्भगृहाकारं बाह्ये वृत्ताभमेव वा । वृत्तग्रीवशिरोपेतं यथेष्टशिखरेण वा ॥
सालिन्दं वा सभद्रं वा ह्येकानेकतलं तु वा । समाश्रं सायताश्रं वा वृत्तं वृत्तायतं तु वा ॥
द्व्यश्रवृत्तं तु वा हर्म्यं कूटकोष्ठादिभिर्युतम् । उन्नतावनतोपेतौ कूटकोष्ठौ यथाक्रमम् ॥
समौ वा कूटकोष्ठौ वा बहुभूम्येकमेव वा । वेसरं भवनं ख्यातम् "

[2] B, G : सु pour तु [3] A : नासयः pour नासिकाः [4] A : नासयः pour नासिकाः
[5] A : तस्मिद्राष्टौ ; C : तस्मिन्तिवष्टौ ; G, F : तस्मिन्राष्टौ [6] A : नागरो ; C, G : नागरा
[7] A : भाद्रासु pour भद्राः स्युः [8] B : सत्तल्परहितं ; C, G : तदल्पहरितं
[9] C, F, G : नासिका pour सिकम्

[प्रस्तरोपरि वृषभूतादिकल्पनम्[1]]

प्रस्तरे गलमूले तु [2]कोणेषूक्षान् प्रकल्पयेत् ॥३०॥
[3]तत्रोक्षांस्तु [4]विना भूतान् हृदयेऽञ्जलिं विन्यसेत् । कल्पयेद्वाह्यवक्त्रांस्तु[5] नृपतेस्तु जयार्थिभिः[6]॥
[7]पुष्टिकामाद्वृषः कल्प्यस्ताविमौ[8] मोक्षकामिनाम्[9]। करालमुद्गकुल्माषकल्कचिक्कणवर्णकम् ॥ ३२
क्रमशः कल्पयेद्धीमान्"

[दिशामूर्तिकल्पनम्[10]]

दिशामूर्तिरथोच्यते[11] । स्कन्दं हर्म्यमुखे[12] [13]कल्प्य [14]सहजं वा विनायकम् ॥ ३३ ॥

---

[1] cf. *Aṃśumatkāśyapa* 26, 68b-74a;
गलाधस्तात्तु मञ्चोर्ध्वे कोणेषु वृषभं कुरु । कोणं प्रति द्वयं वैकं वृषभं शयनं कुरु ॥
भूतं वाथ चतुष्कोणे हृदयाञ्जलिसंयुतम् । कल्पयेत्पद्मपीठोर्ध्वे त्वासीनं तु बृहत्तनु ॥
आमोदमग्निकोणे तु प्रमोदं नैऋते भवेत् । प्रमुखं वायुकोणे तु दुर्मुखं त्वीशकोणके ॥
श्वेतं रक्तं तथा पीतं कृष्णमन्यादिषु क्रमात् ।... करालमुद्गकुल्मासकल्कचिक्कणलेपनम् ॥
नानालंकारसंयुक्तं नानालीलासमन्वितम् । नानाक्रीडासमायुक्तं सुधया दारुभिस्तथा ॥
उचितं कल्पयेद्धीमान्"

cf. *Kāraṇāgama* I 7, 88b 89:
प्रस्तरोपरि कोणेषु भूतं वा वृषभं कुरु । भूतं चेदासनं कुर्यात्कृताञ्जलिपुटान्वितम् ॥
वृषभं शयनं कुर्यात्सर्वलक्षणसंयुतम् ॥

cf. *Diptāgama* 6, 22b: उक्षं कुर्याच्चतुष्कोणे प्रस्तरोपरि सुस्थितम् ॥

[2] A : कोणेषूर्ध्वकं प्रकल्पयेत् ; B : कोणेषूल्कं प्रकल्पयेत् ; C, F, G : कोणेषु क्षिप्र कल्पयेत्

[3] A : तन्त्रोक्षास्तु ; B : तत्रोक्षास्तु ; F : तद्रक्षास्तु [4] C, F : पिता pour विना

[5] B : वक्त्रं तु pour वक्त्रांस्तु ; G : वक्त्रस्तु [6] B : दयार्थिभिः

[7] A : पुष्टिकामार्थं कल्प्य ; B : पुष्टिकामो वृषं कल्प्य ; F : इष्टकाम्यार्थसंकल्प्य

[8] A : तौ विना pour ताविमौ [9] C, F : कामिना pour कामिनाम्

[10] cf. *Aṃśumatkāśyapa* 29, 58b-67:
तलं प्रति विमानानां दिङ्मूर्तिरथ वक्ष्यते । स्कन्दं वै पूर्वदिग्भागे दक्षिणामूर्तिं दक्षिणे ॥
पश्चिमे विष्णुमूर्तिं वा लिङ्गोद्भवमथापि वा । धातारमुत्तरे विप्र द्वारस्थाने तु वर्जयेत् ॥
मण्टपे दक्षिणे भद्रे स्थापयेत्तु विनायकम् । पूर्वे च पश्चिमे तस्य नृत्तमूर्तिं प्रकल्पयेत् ॥
दुर्गामुत्तरदिग्भागे क्षेत्रपालं तथैव च । स्थानकं वासनं वाथ दिशामूर्तिं प्रकल्पयेत् ॥
एवं धरातलोर्ध्वे तु कर्तव्यं द्विजसत्तम । स्कन्दं वा पूर्वदिग्भागे शक्रो वा हस्तिरोपितः ॥
दक्षिणे दाक्षिणामूर्तिं वीरभद्रमथापि वा । पश्चिमे नारसिंहं तु सौम्यमूर्तिमथापि वा ॥
उत्तरे तु विधातारं धनदं वा द्विजोत्तम । प्रस्तरोपरि कर्तव्यमेकद्वित्रितले तथा ॥
चतुर्भूम्यादिमहाशासु महेशास्तु यथेष्टकम् । उमास्कन्दादिसहिता महेशाः परिकीर्तिताः ॥

दक्षिणामूर्तिनं याम्ये हरिलीलां तु वारुणे ।[1]सौम्यदेशे विधातारं धनदं वा प्रकल्पयेत् ॥ ३४ ॥
[2]सुखासनादिदेवांस्तु सर्वत्र परिकल्पयेत् । प्रासादलक्षणं प्रोक्तं शृणु [3]मण्टपलक्षणम् ॥ ३५ ॥
इति [4]श्रीमद्रौरवतन्त्रे [क्रियापादे] [5]प्रासादलक्षणविधिर्नामैकोनचत्वारिंशः पटलः

अन्यामरांश्च गन्धर्वान्सिद्धान्दैत्यमरुद्गणान् । कलान्तं युगभूम्यादि ग्रीवे च प्रस्तरान्तके ॥
एष्वष्टमूर्तिमष्टासु कल्पयेत्कल्पवित्तमः ॥

cf. *Diptāgama* 6, 78b-80:
प्रासादपार्श्वे पृष्ठे च दिशामूर्तिं तु विन्यसेत् । सेनापतिर्भवेत्पूर्वे दक्षिणामूर्तिर्दक्षिणे ॥
पश्चिमे नारसिंहं तु उत्तरे च पितामहम् । तन्मण्डपस्य पार्श्वे तु विघ्नमूर्तिं प्रकल्पयेत् ॥
सौम्ये कात्यायनीं कुर्यान्महिषस्य शिरःस्थिताम् ॥

cf. *Santānasaṃhitā* 5, 62b-64:
प्रासादपार्श्वे पृष्ठे च दिशामूर्तिं च विन्यसेत् । स्कन्दं तु पूर्वदेशे तु दक्षिणामूर्तिं दक्षिणे ॥
पश्चिमे लिङ्गोद्भवं च उत्तरे तु पितामहम् । मण्डपस्य तु पार्श्वे तु विघ्नमूर्तिं तु दक्षिणे ॥
उत्तरे चैव दुर्गां च कुर्यादेकतलस्य तु ।

[11] B, C, F, G : दिशामूर्तिमथोच्यते [12] B : मुखं pour मुखे [13] C, F, G : कृत्वा
[14] A : सहजा वा विनायकम् ; B : सहजा वापि नायकम् ; C, F, G : सगजं वा विना गजम्

[1] A : सौम्ये देशे [2] C : मुख pour सुख , G : उप [3] A : मण्डप pour मण्टप
[4] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे
[5] A : प्रासादलक्षणविधिश्चत्वारिंशः पटलः; B : प्रासादलक्षणं नाम चत्वारिंशः पटलः; C : प्रासादलक्षणविधिर्नाम द्वात्रिंशत्पटलः; F, G : प्रासादलक्षणविधिपटलः द्वात्रिंशत्

[चत्वारिंशः पटलः]

[मण्डपलक्षणविधिः[1]]

[मुखमण्टपः[2]]

प्रवक्ष्यामि [3]समासेन मण्डपानां [4]तु लक्षणम् । प्रासादसदृशं [5]सार्धत्रिपादं मुखमण्डपम् ॥ १ ॥
सर्वेषां विस्तृतं [6]हर्म्यतारतुल्यं विधीयते । एकं वा द्वित्रिदण्डं वा [7]पार्श्ववेशार्धमण्डपम् ॥ २ ॥

[मण्डपमानम्[8]]

साष्टहस्तं समारभ्य द्विद्विहस्तविवर्धनात् । [9]त्रयोविंशच्छतं यावत्तावन्मण्डप[10]विस्तृतम् ॥ ३ ॥
विस्तारसदृशायामं सपादं सार्धमेव वा । पादोनद्विगुणं वाथ द्विगुणं वा सपादकम् ॥ ४ ॥
[11]सार्धं त्रिपादं त्रिगुणं नवधायामसंमतम् ।

[अन्तरालम्[12]]

[13]मण्डपाख्यद्वयोरन्तरन्तरालं प्रकल्पयेत् ॥५॥

---

[1] Pour मण्टपलक्षण voir *Aṃśumatkāśyapa* 43, *Ajita* 37, *Kāmika* I 70, *Kāraṇa* II 6, *Kiraṇa* III 25, *Dīpta* 14, *Santānasaṃhitā* 12 et *Sūkṣma* 45.

[2] cf. *Kāmikāgama* 1 70 1-9a:

लक्षणं मण्डपानां तु वक्ष्यते विप्रसत्तमाः । उक्तानामपि सर्वेषां धान्नामग्रेऽग्रमण्डपम् ॥
तन्मानसममानं तु श्रेष्ठमित्यभिधीयते । मण्डपं सममानं चेत्सान्तरालं सवेशकम् ॥
युग्मस्तम्भसमायुक्तं युक्त्या सर्वाङ्गशोभितम् । सार्धहस्तं द्विहस्तं वा प्रासादार्धमथापि वा ॥
अन्तरालस्य दीर्घं स्यादन्यत्संधिगतं तु यत् । तन्मध्यममिति प्रोक्तं त्रिगुणं चोत्तमं भवेत् ॥
एकदण्डं द्विदण्डं वा त्रिदण्डं तस्य वेशनम् । सावकाशान्तरालं चेत्तस्माद्द्वित्रिगुणं भवेत् ॥
पार्श्वसोपानसंयुक्तं मूलसोपानभित्तिकम् । तदर्धं भित्तियुक्तं वा तदष्टांशेन भित्तिकम् ॥
प्रासादमष्टधा कृत्वा ह्रासयेदष्टभागतः । यावद्विभागमानं तु भवेद्दादशमानकम् ॥
मूलभाग्रो भवेच्छुद्धिर्मण्डपं तद्विपार्श्वयोः । अन्तरालप्रदेशोक्तं वेशयुक्तं प्रकीर्तितम् ॥
अग्रममण्डपमीदृक्स्यात्प्रासादसमनुङ्गकम् ॥

voir aussi *Ajitāgama* 37, 39b-41.

[3] F : महासेन pour समासेन [4] C : च pour तु

[5] C : सद्यः त्रिपादमुपमण्टपम् ; E : साद्यत्रिपादमुपमण्टपम् G : सार्धत्रिपादमुपमण्टपम्

[6] A : हर्म्य तारतुल्यं ; C, G : हर्म्यतारं तुल्यं [7] C : पार्श्वे वेदार्थमण्टपम् ; F, G : पार्श्ववेदार्धमण्टपम्

[8] cf. *Kāmikāgama* I 70, 34-35:

पञ्चहस्तं समारभ्य व्योमहस्तविवृद्धितः । एकत्रिंशत्करान्तं तु विस्तारस्तस्य संमतः ॥
विस्तारपादवृद्धया तु यावद्वेदगुणं भवेत् । आयामं कल्पयेत्तस्य विस्तारे भित्तिरुच्यते ॥

Voir aussi *Ajitgama* 37, 1-3.

[9] C : द्वयोविंशशतं [10] C, G : मण्टप pour मण्डप [11] A : सार्धत्रिपादद्विगुणं

[12] cf. *Ajitāgama* 37, 37-39.

[13] A : मंण्डपाख्य pour मण्डपाख्य

सावकाशान्तरालं वा [1]मण्डपाकारमेव वा । [2]एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टकरं तु वा ॥ ६ ॥
नवहस्तं तु [3]वा तस्य तत्संख्यापङ्क्तिमेव वा । [4]पङ्क्तिश्चेन्मण्डलस्योक्तपङ्क्तिमानवशान्नयेत् ॥ ७ ॥
पार्श्वयोर्वेश[5]मुक्तं वा [6]जालकं वा विनाथवा[7] ।

[समाश्रमण्डपः[8]]

समाश्रमण्डपं[9] चादौ प्रवक्ष्यामि समासतः ॥ ८ ॥
पङ्क्तित्रय[10]समायुक्तं कलास्तम्भसमन्वितम् । अधिष्ठानाङ्घ्रि[11]मञ्चाख्यवर्गत्रयसमन्वितम् ॥ ९ ॥
पञ्चपङ्क्तिविशालं [12]वा स्यादायामे[13] तथैव च । [14]षट्त्रिंशद्गात्रसंयुक्तं मध्येऽशं कूटमेव वा ॥ १० ॥

---

[1] A, C, G : मण्टपाकार एव वा

[2] B : एकद्वित्रिचतुष्कं वा षड्वा सप्ताष्टकं तु वा

[3] B : तत्संख्या pour वा तस्य

[4] C : पठन्ति चेन्मण्डलस्य पङ्क्तिमावसथं नयेत् ; G : पङ्क्तिश्चेन्मण्डलस्योर्ध्वे पङ्क्तिमानवशन्नयेत्

[5] C, F, G : वेद pour वेश

[6] Pour जालक voir *Kāmikāgama* I 35, 158b-163:

ऋजुजालकमाद्यं स्याद्गवाक्षं कुञ्जराक्षकम् । गोमूत्रं गणिका पत्रं नन्द्यावर्तं च सप्तधा ॥
ऋजुकम्पयुतं यत्तु ऋजुजालकमुच्यते । कर्णगत्या यदा श्रोत्रं गवाक्षमिति कीर्तितम् ॥
तदेव चतुरश्रोत्थं कुञ्जराक्षमिति स्मृतम् । विदिग्वक्त्रगता दृष्टिर्गोमूत्रमिति कीर्तितम् ॥
मूलमध्याग्रगुलिकमृदुभित्त्यन्तरार्चितम् । नानाच्छिद्रसमायुक्तं गणिकाजालकं भवेत् ॥
पत्रैर्विचित्रितं रन्ध्रं पत्रजालकमिष्यते । पञ्चसूत्रगतं रन्ध्रं प्रादक्षिण्यक्रमेण तु ॥
नन्द्यावर्तमिति प्रोक्तं वेद्यूर्ध्वे जालकं नयेत् ॥

[7] B : वापि नाथवा

[8] *cf.* *Aṃśumatkāśyapa* 43, 44 84a:

उपपीठमधिष्ठानं चरणं प्रस्तरं तथा । नीव्रवेशमलंकारं गण्यं प्रागिव विद्यते ॥
भक्तित्रयसमायुक्तं षोडशस्तम्भसंयुतम् । कलाल्पनासिकोपेतं मध्ये कूटं तु एव वा ॥
मण्डितं वाथ सर्वत्र चतुर्द्वारयुतं तु वा । इष्टदिग्द्वारमेवं वा द्वयजालककोष्ठदिक् ॥
बाह्ये सोपानसंयुक्तं चित्रं तत्तोरणादिभिः । तोरणादिविहीनं वा कल्प्यैवं प्रथमं भवेत् ॥
चतुर्भक्त्या विशालं तु इष्टदिग्द्वारसंयुतम् । पूर्वे परे द्विभक्त्यैकभक्त्या विस्तृतनीव्रकम् ॥
मध्यस्थाङ्घ्रिं परित्यज्य ऊर्ध्वे कूटद्विभक्तिकम् । भानुद्विगुणसंख्याङ्घ्रियुक्तं विंशतिनासिकाः ॥
द्वाराशासु च सोपानं कर्णे लाङ्गलभित्तिकम् । वसुपञ्जरसंयुक्तं द्वितीयं मण्टपं भवेत् ॥
पञ्चभक्त्या युगार्धं तु मध्ये कूटं त्रिभागया । मण्टपं परितोऽशेन द्वात्रिंशच्चरणान्वितम् ॥
भानुद्विगुणनासाढ्यं पञ्जराष्टकसंयुतम् । इष्टदिग्द्वारसंयुक्तं द्वारान्यत्रैव कुड्यकम् ॥
द्वारस्थाने तु सोपानं सर्वालंकारसंयुतम् । कुड्यं कुम्भलतावैस्तु भूषितं तु तृतीयकम् ॥
चतुरश्रं तु षड्भक्त्या मध्ये कूटं द्विभागया । तत्कूटमष्टपादाढ्यं मध्ये रङ्गसमायुतम् ॥
चतुर्द्वारसमायुक्तमिष्टदिग्द्वारमेव वा । द्विभक्तिविस्तृतं चैव भक्त्या नीव्रं समायुतम् ॥
इष्टदिग्भद्रसंयुक्तं चतुर्दिग्भद्रमेव वा । चत्वारिंशति चाष्टाङ्घ्रियुक्तं वा तत्र योजयेत् ॥
चतुर्विंशाल्पनासाढ्यं कुड्यं कुम्भलतान्वितम् । तोरणाष्टकसंयुक्तं चतुर्थं मण्टपान्वितम् ॥
चतुरश्रं तु सप्तांशं षष्ट्यङ्घ्रिकसमायुतम् । नवभागेन तन्मध्ये कूटं वा मण्डिताङ्गणम् ॥
द्वात्रिंशदल्पनासाढ्यं चतुर्दिग्भद्रसंयुतम् । त्रिभागैकांशविस्तारं निर्गमं मुखभद्रकम् ॥

मध्ये [1]नन्दांशकूटं वा सर्वमण्डितमेव वा । [2]सप्तांशे विस्तृतायामे चतुष्षष्टयङ्घ्रिसंयुतम् ॥ ११ ॥
[3]मण्डितं स्यात्त्रिवर्गाढ्यं [4]षष्टयङ्घ्रिसहितं तु वा । [5]मध्ये वांशं तु कूटं [6]स्यान्नन्दांशे विस्तृतायते ॥

मध्ये रङ्गसमोपेतं इष्टदिक्कुड्यसंयुतम् । सर्वालंकारसंयुक्तं पञ्चमं परिकीर्तितम् ॥
युगाश्रमष्टभक्त्या तु अशीतिचरणान्वितम् । चतुर्भागेन तन्मध्ये ह्यूर्ध्वकूटं प्रकल्पयेत् ॥
चतुर्दिग्द्वारसंयुक्तं मध्यैकांशेन कूटकम् । सर्वालंकारसंयुक्तं षष्ठमं मण्टपं भवेत् ॥
नवभक्त्या युगाश्रं तु शतपादसमन्वितम् । गुणांशकांशविंशं तु नीत्रभद्रं चतुश्चतुः ॥
चतुर्द्वारसमायुक्तमिष्टदिग्द्वारमेव वा । मुखे सोपानमन्यंशैर्व्यासदीर्घसमन्वितम् ॥
मध्यरङ्गसमायुक्तं षडष्टनासिकान्वितम् । सर्वालंकारसंयुक्तं सप्तमं मण्टपं भवेत् ॥
चतुरश्रं दशांशं तु भान्वधिकदशांशकम्[शताङ्घ्रिकम्] । मध्ये चैवाष्टदिशि च नवकूटसमायुतम् ॥
कूटोपरि नीत्रतांशे त्वन्तरालं प्रकल्पयेत् । प्राग्वन्मुखेन सोपानं दिशि भद्रसमन्वितम् ॥
सर्वालंकारसंयुक्तमष्टमं मण्टपं भवेत् । रुद्रभक्त्या युगाश्रं तु मध्येऽन्यंशेन कूटकम् ॥
मुखे सोपानसंयुक्तमिष्टदिग्भद्रसंयुतम् । द्वारान्यत्रैव कुड्यं वा इष्टभागावसानकम् ॥
सर्वालंकारसंयुक्तं नवमं मण्टपं भवेत् । द्वादशांशे युगाश्रं तु मध्ये द्व्यंशेन कूटकम् ॥
मण्टपस्य तु बाह्ये चाप्यंशेनालिन्दमिष्यते । चतुर्द्व्यंशेन विस्तारं निष्कान्तं स्याच्चतुर्दिशि ॥
साष्टषष्टिशतं पादान्मध्यरङ्गे तु कल्पयेत् । सर्वालंकारसंयुक्तं दशमं मण्टपं भवेत् ॥
युगाश्रं त्रयोदशांशेन मध्येऽन्यंशेन कूटकम् । इष्टदिक्कुड्यसंयुक्तं चतुर्दिग्भद्रसंयुतम् ॥
प्राङ्मुखे नन्दभागेन मुखभद्रं प्रकल्पयेत् । सद्व्यनवतीयुक्तैरङ्घ्रिभिश्च समन्वितम् ।
तोरणैर्जालकैश्चान्यैरलंकारसमन्वितम् । सर्वालंकारसंयुक्तं रुद्रांशं मण्टपं भवेत् ॥
मनुभागैर्युगाश्रं तु मध्ये द्व्यंशेन कूटकम् । वेदाधिक्यं तु विशांशं द्विशतं चरणान्वितम् ॥
मण्टपं कुड्यसंयुक्तं चतुर्दिग्भद्रसंयुतम् । नन्दादिभद्रसंयुक्तमिष्टभक्त्या विशेषतः ॥
सर्वालंकारसंयुक्तं द्वादशं मण्टपं भवेत् । त्रिपञ्चभित्तिविस्तारमायतं चतुरश्रकम् ॥
मध्ये कूटं गुणांशेन ऊर्ध्वं कूटसमन्वितम् । गुणांशं विस्तरायामं मुखभद्रसमन्वितम् ॥
इष्टदिक्कुड्यसंयुक्तमन्यत्राङ्घ्रिसमन्वितम् । तोरणैर्जालकैश्चान्यैरलंकृत्यसमन्वितम् ॥
पञ्चाशद्द्व्यं चाधिक्यं द्विशतं चरणान्वितम् । सर्वालंकारसंयुक्तं मण्टपं तु त्रयोदश ॥
एवं हि मानभेदेन युगाश्रं मण्टपं विदुः । इत ऊर्ध्वं चतुस्त्रिंशद्दशसीमावसानकम् ॥
चतुरश्रं मण्टपं कुर्यात्सर्वालंकारसंयुतम् । भिन्नस्तम्भं च परितः कर्तुरिच्छावशान्नयेत् ॥
समाश्रमण्टपं कुर्यात् ”

[9] C, G : मण्टपं pour मण्डपं [10] F : न्याय pour त्रय ; G : नव
[11] A : पञ्चाढ्यं वर्गत्रय pour पञ्चाढ्यवर्गत्रय ; B : पञ्चाढ्यं वर्गद्वय ; C, G : पञ्चाढ्यपङ्क्तित्रय
[12] B omet वा [13] B ajoute च après स्यादायामे [14] B : षट्त्रिंशगात्र
[1] B : मन्दांश pour नन्दांश
[2] C : सप्तविंशद्भदायामे ; F : सप्तविंशहृतायामे G : सप्तांशविस्तृतायामे
[3] G : मण्डितस्य त्रिवर्गाढ्यं [4] C : तदङ्घ्रिसहितं तु वा , G : षडङ्घ्रिसहितं तु वा
[5] B : मध्येऽप्यासन्तकूटं [6] C, F, G : स्यान्नन्दांशविस्तृतायतम्

[1]शतपादयुतं [2]मण्डं [3]मध्ये कूटं [4]नवांशकम् । सवर्णवलिपादाढ्यमेतद्युक्ति[5]परश्चरेत् ॥ १३ ॥

[आयताश्रमण्डपः]

पञ्चपङ्क्तिविशाले तु [6]चायामे सप्तपङ्क्तयः । समूर्तिश्चत्वारिंशत्स्यादङ्घ्रिसंख्यास्य[7] कथ्यते ॥ १४ ॥

मध्येऽग्निपञ्च तारायं[8] पङ्क्तयः कूटमाचरेत् । [9]साक्षच्चत्वारिंशत्यङ्घ्रिप्रयोगस्तु[10] विधीयते ॥ १५ ॥

द्विद्विपङ्क्ति[11]विवर्द्धयैव त्रिगुणान्तं समाचरेत् । [12]अपरेऽग्निपङ्क्तिरङ्गः स्यादग्र [13]त्वेकाग्रभद्रकम् ॥

[14]विस्तारे सप्तपङ्क्तिः स्यादायामे[15] नवपङ्क्तयः । [16]अशीतिचरणाढ्यं [17]स्यात्तिवर्गाढ्यं तु मण्डितम् ॥

[18]अन्यथान्यावृतं मण्डयमन्तः पक्षांशकूटकम् । तत्र मूर्त्यङ्घ्रिरहितमपरेऽन्यंशरङ्गकम्[19] ॥ १८ ॥

त्रिगुणान्ताक्षपङ्क्तिः [20]स्याद्वृद्धयानेन सयुक्तिना । [21]बलार्थं बाह्यतः कुड्यमिष्टपङ्क्तिषु कल्पयेत् ॥

[22]एकानेकतलं वापि कर्णकूटादिभिस्तु वा । समाश्रं स्रपनार्थं तु [23]परिवेषार्थमायतम्[24] ॥ २० ॥

उक्तमाने समाश्रांश्च त्वायतांश्चैवमाचरेत् । अधिष्ठानाङ्घ्रिमञ्चं च मूलधाम्नः समं नयेत् ॥ २१ ॥

---

[1] B : शतपादैर्युक्तमण्डं [2] C, G : मण्डलं pour मण्डं [3] B : मध्यकूटं [4] C, G : च pour न
[5] A : परि pour पर [6] A omet च dans चायामे [7] A : च pour अस्य
[8] C : तारायां pour तारायं [9] A : साक्षात् pour साक्ष [10] A, G : प्रयोगस्य pour प्रयोगस्तु
[11] B : प्र pour वि [12] A : अपरो pour अपरे ; C : अपरे पङ्क्तिरेवं स्याद्
[13] C : त्वेकाग्रभागिकम् ; G : त्वग्राग्रभद्रकम्
[14] A : विस्तारं pour विस्तारे [15] B : आयामं pour आयामे [16] A, B : अशीतिश्चरणास्थं
[17] A : स्यं तु त्रिवर्गाढ्यमण्डितम् ; B : स्यात्तत्र वर्गाढ्यमण्डितम्
[18] A : तन्यतन्यावृतं ; C, F, G : अन्यतान्यावृतं [19] C, F : अपरेऽन्या शरांशकम्
[20] A : स्याद्धयात्वानेन सयुक्तिना ; B : स्याद्धयात्वाजन सुभक्तिका [21] B : बलार्धबल्यन्तकुड्यं शीर्षपङ्क्तिषु
[22] A : एकानेन तलं ; B : एकाजनतलं
[23] A : परिवेषाढ्यमुच्यते ; B : परिवेषार्थमन्ततः ; C : परिषेकार्थमायतम्
[24] Pour आयताश्रमण्डप voir *Aṃśumatkāśyapa* 43, 88b-125a:

भक्तित्रयविशालं तु पञ्चभक्त्यायतान्वितम् । एकपार्श्वे पुरे वाथ द्वारमंशेन कल्पयेत् ॥
पार्श्वे वारयुतं चेत्तु त्रिंशदङ्घ्रिसमन्वितम् । तदेव परितोऽशेन मण्टपाभ्यन्तरस्य च ॥
लुपारोहणकं कुर्यादष्टाविंशाङ्घ्रिसंयुतम् । पुरे वारयुतं चेत्तु चरणं चाष्टविंशतिः ॥
अथवा वारहीनं तु त्रिरष्टचरणान्वितम् । पादं प्रत्यल्पनासाढ्यं वेदिजालकृतोरणम् ॥
नानाकुम्भलताद्यैस्तु कल्पितं प्रथमं भवेत् । चतुर्भक्तिविशालं तु आयामे तु षडंशकम् ॥
मण्टपं परितोऽशेन कूटमभ्यन्तरेतरम् । द्विभक्तिविस्तृतं चैकभक्त्यायतमुखभद्रकम् ॥
द्वात्रिंशच्चरणोपेतं मण्टपस्य द्वितीयकम् । विशाले पञ्चभक्तिः स्यादायामे सप्तभक्तयः ॥
त्रिपञ्चभक्तिविस्तारं दीर्घमध्ये सभा भवेत् । मण्टपं परितोऽशेन इष्टदिग्भद्रसंयुतम् ॥
चत्वारिंशतिपादाढ्यं सर्वालंकारसंयुतम् । वेदिकाद्यैः समायुक्तं तृतीयं मण्टपं भवेत् ॥
रसभक्तिविशालं तु वसुभक्त्यायताश्रकम् । द्विचतुर्भक्तिविस्तारं दीर्घमध्ये सभोदयम् ॥

[1]अन्त्यं व्योमाङ्गुलारभ्य यावत्सप्तदशाङ्गुलम् । द्विद्व्यङ्गुलविवृद्ध्या तु नवमानान्तरं [2]गुरो ॥ २२ ॥
[3]मूलहर्म्यसमादूर्ध्वं हीनं वाप्यधिकं त्रिषु । [4]सवेशं परितः [5]कुड्यमिष्टांशे कुड्यमेव वा ॥ २३ ॥
इति [6]श्रीमद्रौरवतन्त्रे [क्रियापादे] [7]मण्डपलक्षणविधिर्नाम चत्वारिंशः पटलः

मण्टपं परितोऽक्षांशमिष्टदिङ्मुखभद्रकम् । षष्टिसंख्याङ्घ्रिसंयुक्तं नासिकादिविभूषितम् ॥
नानालंकारसंयुक्तं चतुर्थं मण्टपं भवेत् । तारे सप्तविभागे तु नवभक्त्यायतान्वितम् ॥
त्रिभक्तिविस्तृतं पञ्चभक्त्यायामं सभाङ्गणम् । मण्टपं परितोऽक्षांशमिष्टदिग्भद्रसंयुतम् ॥
त्रिभक्तिविस्तृतं चैकभक्त्यायाममुखभद्रकम् । सप्ततिः स्याद्द्याधिक्यं पादमित्यभिधीयते ॥
सर्वालंकारसंयुक्तं पञ्चमं मण्टपं भवेत् । वसुभक्तिविशालं तु दशभक्त्यायतान्वितम् ॥
द्विचतुर्भागविस्तारं दीर्घमध्ये सभोदयम् । परितो मण्टपोऽन्यंशमध्यस्तम्भविवर्जितम् ॥
इष्टदिङ्मुखभद्रांशं चतुर्द्व्यंशे च सुव्रत । षण्णवत्यङ्घ्रिसंयुक्तं सर्वालंकारसंयुतम् ॥
षष्ठं मण्टपं ह्येवं प्रोच्यते तु शिवार्हकम् । नवभक्त्या विशालं तु रुद्रभक्त्यायतान्वितम् ॥
एकांशं भक्तिविस्तारं दीर्घमध्ये सभा भवेत् । परितो वेदभागं तु मण्टपं परिकल्पयेत् ॥
त्रिचतुर्भागविस्तारदीर्घं स्यान्मुखमण्टपम् । सर्वालंकारसंयुक्तं सप्तमं मण्टपं भवेत् ॥
दशभक्त्या विशालं तु द्विभक्त्यधिकमायतम् । द्विचतुर्भागायतं तारं तयोर्मध्ये सभाङ्गणम् ॥
परितोऽलिन्दमेकांशं मण्टपाद्द्व्यंशबाह्यतः । तद्बाह्येऽलिन्दमेकांशं युक्त्यान्तस्तम्भसंयुतम् ॥
इष्टदिग्भद्रसंयुक्तमष्टमं मण्टपं भवेत् । तदेव शिवांशाधिकं विस्तृतायामे त्रिपञ्चांशेन सभाङ्गणम् ?॥
परितोऽलिन्दमेकांशं मण्टपं द्व्यंशबाह्यतः । तद्बाह्येऽलिन्दमेकांशं नवमं मण्टपं भवेत् ॥
आदित्यांशविशाले तु द्विभागाधिकमायतम् । चतुष्षडंशमध्ये तु सभायारंकर्णं[सभाकाराङ्गणं ?] तु वा ॥
बाह्यकेऽलिन्दमेकांशं मण्टपे द्व्यंशबाह्यके । सान्ततालिन्दमेकांशं दशमं मण्टपं भवेत् ॥
विस्तृते तु जगत्यंशे तद्द्व्यंशाधिकमायतम् । त्रिपञ्चांशे सभामध्ये तस्यालिन्दांशमावृतम् ॥
मण्टपेऽत्र विमानं तु तद्बाह्येऽलिन्दभागया । आलिन्दं तु विना वापि मण्टपं तु युगांशकम् ॥
भद्र[रुद्र?] मण्टपमाख्यातमिष्टदिग्भद्रसंयुतम् । मन्वंशे तु च विस्तारे द्विभागाधिकमायतम् ॥
द्विचतुर्भागधायामं तारमध्ये सभाङ्गणम् । तद्बाह्येऽलिन्दमेकांशं मण्टपं चतुरश्रकम् ।
मण्टपाद्बाह्यतोऽलिन्दं भागमेवं विधीयते । चतुर्दशं[द्वादशं?] मण्टपं ख्यातमिष्टदिग्भद्रसंयुतम् ।
त्रिपञ्चांशे विशाले तु द्विभागाधिकमायतम् । तिथ्यंशमण्टपं मध्ये सभाङ्गणमिति स्मृतम् ।
अङ्गणावृतमेकांशमलिन्दं तु विधीयते । तद्बाह्ये चतुरश्रं स्यान्मण्टपं प्रविधीयते ।
तस्यावृतांशतोऽलिन्दं त्रयोदशं मण्टपं भवेत् । षोडशांशे विशाले तु द्विभागाधिकमायतम् ।
चतुर्विंशाङ्गणोपेतं बाह्येऽलिन्दांशमानतः । तद्बाह्ये चतुरंशेन मण्टपं स्याद्विशेषतः ॥
तस्यावृतांशतोऽलिन्दं चतुर्दशं मण्टपं भवेत् । जात्यादि आयतं विद्यात्तद्विन्यासमुच्यते ॥
जालकं च कवाटं च ग्राह्यं युक्त्या विशेषतः । इष्टदिक्चरणं कुड्यं कल्पयेत्परितो बुधः ॥
एवं हि मनुभेदं च सायतं मण्टपं विदुः ॥

[1] A : अन्य pour अन्त्यं ; G : अन्यं [2] A : गुरोः pour गुरो
[3] A : मूलमन्त्रे समामूर्ध्वं ; C, F, G : मूलहर्म्ये समादूर्ध्वं [4] B : सत्वांशं pour सवेशं
[5] A : कुर्यादिष्टांशे [6] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे
[7] A : मण्डपलक्षणविधिरेकचत्वारिंशः पटलः ; B : मण्डपलक्षणं नामैकचत्वारिंशः पटलः; C : मण्टपलक्षणविधिर्नाम त्रयस्त्रिंशत्पटलः ; F : मण्टपलक्षणविधिर्नाम पटलस्त्रयस्त्रिंशत् ; G : मण्टपलक्षणविधिः पटलः त्रयस्त्रिंशतिः

[एकचत्वारिंशः पटलः]

[प्राकारलक्षणविधिः[1]]

[प्राकारमानम्[2]]

प्रवक्ष्यामि [3]समासेन प्राकाराणां तु लक्षणम् । [4]प्रासादसदृशव्यासं त्रिपादं [5]वार्धमेव वा ॥ १ ॥
अन्तर्मण्डलविस्तारं त्रिविधं [6]पादबाह्यतः । [7]जगतीबाह्यतो वापि होमाद्बाह्यमथापि वा ॥ २ ॥
[8]अन्तर्मण्डलविस्तारद्विगुणोऽन्तरहारकः । त्रिगुणं [9]मध्यहारं स्यान्मर्याद्यपि[10] चतुर्गुणम् ॥ ३ ॥

---

[1] Pour प्राकारलक्षण voir *Aṃśumatkāśyapa* 42, *Ajita* 38, *Kāmika* I 71, *Kāraṇa* I 8, *Dipta* 12, *Santānasaṃhitā* 11 et *Suprabheda* I 31.

[2] cf. *Aṃśumatkāśyapa* 42, 2-7a:

प्रासादस्य विशालार्धं गुणभागविभाजिते । चतुर्भागैकभागं वा अन्तर्मण्डलविस्तृतम् ॥
अन्तर्हारविशालं तु तद्बाह्ये द्विगुणं हि तत् । मध्यहाराविशालं तु बाह्ये तन्मण्डलत्रयम् ॥
मर्यादेस्तु विशालं तु बाह्ये त्वादिचतुर्गुणम् । महामर्यादिविस्तारमादेः पञ्चगुणं भवेत् ॥
प्रासादचरणान्नीत्रं होमाद्वा प्रथमस्य तु । नीवं द्वितीये प्रथमाद्द्वितीयात्तृतीयनीत्रकम् ॥
तृतीयाच्चतुर्निष्क्रान्तं तस्मान्नी तु पञ्चके । प्राकारं प्रति निष्क्रान्तान्युक्तानि कुड्यसीमकम् ॥
कुड्यमध्यावसानं वा कुड्यबाह्यमथापि वा ।

cf. *Kāmikāgama* I 71, 1-10 et 63-64a

अथ वक्ष्ये विशेषेण प्राकाराणां तु लक्षणम् । प्रासादस्य विशालार्धं दण्डमित्यभिधीयते ।
एकद्वित्रिचतुष्पञ्चदण्डैर्मध्यात्समन्ततः । एकप्राकारकल्प्तिस्तु पञ्चधा परिकीर्तितम् ॥
मूलालयविशाले तु त्रिधाभक्ते पदं भवेत् । तेन भागेन तद्बाह्ये द्विगुणत्रिगुणं तु वा ॥
त्रिचतुर्गुणकं चापि चतुष्पञ्चगुणं तु वा । पञ्चषड्गुणमिष्टं च प्राकारद्वयकल्पनम् ॥
एवं चतुर्विधं प्रोक्तं त्रिप्राकारस्तु कथ्यते । प्रासादस्य चतुर्भागो यस्तु दण्डमिहोच्यते ॥
तस्य द्वित्रिचतुर्भागैस्त्रिचतुष्पञ्चभिस्तथा । चतुष्पञ्चषडंशैस्तु पञ्चषट्सप्तभिस्तथा ।।
षट्सप्ताष्टभिरुद्दिष्टं त्रिप्राकारप्रकारकम् । पञ्चधा कथितं वेदप्राकारं शृणुत द्विजाः ॥
त्रिप्राकारस्य बाह्ये तु एकैकाङ्गुलवर्धनात् । नवभागावसानं तु समन्तात्परिवर्धयेत् ।।
एवं पञ्चविधं प्रोक्तं चतुष्प्राकारमानकम् । एवं चतुष्प्राकारेऽपि प्रासादस्य विशालकम् ॥
समन्ताद्वर्धमानं च त्रिचतुर्भागमानकम् । दण्डार्धं योजयेद्धीमान्..... ।।
अन्तर्मण्डलमाद्यं स्यादन्तर्हारा द्वितीयिका । तृतीया मध्यहरा स्याद् मर्यादाख्या चतुर्थिका ॥
महामर्यादिकाख्या च पञ्चमी परिकीर्तिता ॥

voir aussi *Ajitāgama* 38, 1-7.

[3] F : महासेन pour समासेन

[4] A : प्रासादसदृशं वाथ ; B : प्रासादसदृशस्यार्ध

[5] A : सार्धमेव वा ; C, G : वार्ध एव वा

[6] A : पात pour पाद

[7] A : जडतो pour जगती ; B : जडंता ; G : जगते

[8] A : अन्तर्मण्डपविस्तारं त्रिगुणान्तरुहारका ; B : अन्तर्मण्डलविस्तारं त्रिगुणान्तरुदाहृतम

[9] A : मध्यहारस्यामयाश्चापि ; B : मध्यहारस्यायामश्चापि

[10] C : मर्यादापि pour मर्याद्यपि ; G : मर्त्यादावपि

पञ्चषट्सप्तगुणितं [1]महामर्यादिकं तथा । [2]सकुड्यमुक्तमानं तु [3]कुड्याद्यन्तरमेव वा ॥ ४ ॥
प्राकाराद्बाह्यतो [4]व्यासं प्रत्येकं परिकल्पयेत् ।

[प्राकाराणां हस्तमानम्[5]]

त्रिपञ्चसप्तहस्तेन विस्तारः प्रथमस्य तु ॥ ५ ॥
नवैकादशहस्तं च त्रयोदशं [7]द्वितीयके । पञ्चसप्तदशं हस्तं [8]तृतीयकोनविंशतिः ॥ ६ ॥
[9]पञ्चहस्तसमाधिक्यहस्तं स्याच्तु चतुर्थके । एकोनत्रिंशतिहस्तमेकत्रिंशतिहस्तकम् ॥ ७ ॥
[10]त्रयत्रिंशतिहस्तं च [11]पञ्चमस्य विशालकम् ।

[कुड्यविस्तारः[12]]

एकहस्तं समारभ्य गुणाङ्गुलविवर्धनात् ॥८॥

---

[1] B : महामायादिकं

[2] cf. *Kāmikāgama* I 71, 28:

भित्त्यन्तरालमानं वा भित्तिबाह्यमथापि वा । भित्तिमध्यं तु वा कुर्यात्प्राकाराणां प्रमाणकम् ॥

[3] A : कुड्याड्यन्तरमेव वा ; G : कुड्याढयन्तरमेव वा

[4] A : वासं pour व्यासं

[5] cf. *Kāmikāgama* I 71, 10b-16a:

हस्तमानेन चोच्यते ।।

द्विहस्तादेकवृद्ध्या तु नवहस्तावसानकम् । एषु प्राकारमानं तु क्षुद्राणामष्टधा मतम् ॥
द्विहस्तं च त्रिहस्तं च त्रिचतुर्हस्तमेव च । चतुष्पञ्चकरं चैव पञ्चषट्करमेव च ॥
षट्सप्ताष्टकरं चैव अष्टनन्दं तथैव च । नन्ददीर्घाष्टकं चैव द्विप्राकारप्रमाणकम् ॥
अस्मादेककरवृद्ध्या तु रुद्रहस्तान्तमेव च । त्रिप्राकारप्रमाणं तु वेदप्राकारकं तथा ॥
एकैकहस्तवृद्ध्या तु रविहस्तावसानकम् । चतुष्प्राकारमानं तु क्षुद्रादीनां प्रकीर्तितम ॥
जातिच्छन्दविकल्पाभासादीनां तु समीरितम् ॥

voir aussi *Ajitāgama* 38, 8-12.

[6] G : तथा pour नव [7] B : तृतीयके

[8] B : तृतीयेकोनविंशतिः ; la forme grammaticale correcte est तृतीय एकोनविंशतिः

[9] A : पञ्चहस्तसमाधिक्यं ; C, G : पञ्चहस्तं समाधिक्यं [10] A भूयसू pour त्रयसू

[11] C : पञ्चमध्य pour पञ्चमस्य

[12] cf. *Kāmikāgama* I 71, 36-39a:

एकहस्तं समारभ्य चैकाङ्गुलविवर्धनात् । द्विहस्तान्तः समुद्दिष्टः सालानां चैव विस्तरः ॥
तद्विस्तारप्रमाणेन यावत्त्रिशद्गुणं भवेत् । त्रिगुणं तु समारभ्य क्षुद्रे महति मन्दिरे ॥
प्राकारोत्सेध उद्दिष्टो मूलादूर्ध्वं तदग्रतः । षडंशं तु समारभ्य यावत्षोडशभागिकम् ॥
तावत्कृत्वा समूलं तु चैकांशेन तदग्रकम् ॥

voir aussi *Ajitāgama* 38, 18-22.

[1]हस्तद्वयावधिर्यावन्नवधा कुड्यविस्तरम् । [2]कुड्यव्यासत्रयारभ्य [3]यावत्तद्द्विगुणावधि ॥ ९ ॥
नवधा सालतुङ्गं तु ;

[प्राकारविधिः[4]]

[5]मालिका ह्यन्तरे विदुः । त्रिचतुष्पञ्चहस्तं वा मालिकाव्यासमीरितम् ॥ १० ॥
मूलहर्म्य[6]तलोत्तुङ्गत्रिपदाधारमस्य तु । चरणं प्रस्तरं चैव [7]मूलहर्म्यसमं नयेत् ॥ ११ ॥
[8]ओज ख्या तु पङ्क्तिः स्यात्कुर्यात्सर्वत्र [9]पङ्क्तिकाः । [10]मूलप्रकृतितुल्यं स्यात्प्रकृतिः[11] प्रथमस्य तु ॥
गुणमात्रं तु वा षट्कं प्रत्येकं [12]बाह्यतोन्नतम् । [13]एकद्वयत्रिसालं वा कल्पयेदनुपूर्वशः ॥ १३ ॥
[14]छत्राभं बुद्बुदाकार[15]मर्धचन्द्राकृतिः शिरः । [16]ओजस्संख्यावृतं वापि भूतं वा परिकल्पयेत् ॥ १४ ॥

इति [17]श्रीमद्रौरवतन्त्रे [क्रियापादे][18]प्राकारलक्षणविधिर्नामैकचत्वारिंशः पटलः

---

[1] A : हस्तद्वयविधि pour हस्तद्वयावधि [2] A : कुड्यावास pour कुड्यव्यास
[3] B : यावदादि pour यावत्तद्
[4] cf. *Kāmikāgama* I 45, 1-5:
अथ वक्ष्ये विशेषेण मालिकालक्षणं द्विजाः । चतुर्धा मालिका शाला सभा मुण्डजसौधजे ॥
शालायामपि शालाङ्गा निष्क्रान्ता नतशोभिता । सा शाला मालिका ज्ञेया शास्त्रेऽस्मिन्कामिकाह्वये ॥
सभावद्विहिता बाह्ये प्रासादवदलंकृता । ऊहप्रत्यूहसंयुक्ता या सभा सा च मालिका ॥
यथेष्टदिशि संयुक्ता भोगभूमिसमन्विता । प्रासादव्यासदीर्घोच्चा प्रोक्ता प्रासादमालिका ॥
मण्डपस्योक्तविस्तारायामतुङ्गविभूषिणी । सर्वत्र मुण्डाकारत्वात्कथिता मुण्डमालिका ॥
voir aussi *Ajitāgama* 38, 23-29a.
[5] A : मालिकाभ्यन्तरे विदुः [6] C : तलोत्तुङ्गात् pour तलोत्तुङ्ग
[7] A : मूलहस्त्यसमुन्नयेत् ; B : मूलहस्तसमं नयेत्
[8] A : ओजसंख्यानुपङ्क्तिः ; G : दशसंख्यानुपङ्क्तिः [9] A : पङ्क्तयः [10] A : मूलं pour मल
[11] B : प्रकृति pour प्रकृतिः
[12] C : बाह्यतोन्नतिः ; la forme grammaticale correcte est बाह्यत उन्नतम्
[13] A : एकद्वित्रितलासं वा ; B : एकद्वित्रितसालं वा
[14] cf. *Aṃśumatkāśyapa* 42, 55-61a:
"ऊर्ध्वभूमिं वदाम्यहम् ।
मूलाग्रस्तम्भतुङ्गं तु धर्मनन्दाष्टधा भजेत् । एकांशहीनमङ्घ्र्युच्चं तथैवोर्ध्वं तु भूमयः ॥
प्रस्तरं च तथा कार्यमेकानेकतलेऽपि वा । प्रस्तरोपरि कर्तव्यं भित्तिमेककरोदयम् ॥
छत्राकारशिरोपेतं सभाकारमथापि वा । गोपानं वाथ वारं वा संकल्प्याभ्यन्तरे द्विज ॥
मृल्लोष्टैर्लोहलोष्टैर्वा सारदारुमयैस्तु वा । गोपानाच्छादनं कुर्याल्लुपोपरि शिरोऽन्वितम् ॥
सभाकारमिदं ख्यातं लुपावारविहीनकम् । मण्टपाकृतिरित्युक्तं प्रस्तरोर्ध्वे विशेषतः ॥
बाह्यकुड्यविहीनं तु मण्टपाकारमण्डितम् । छत्राकारमिदं ख्यातं यथेष्टं तेषु कल्पयेत् ॥
cf. *Kāmikāgama* I. 71, 39b-40:
अधिष्ठानादिवर्गाढ्यं खण्डहर्म्यादिमण्डितम् । ऋजुभक्तियुतं वापि प्राकारं तु प्रकल्पयेत् ॥
छत्रादिशिखरोपेतमूर्ध्वस्थवृषभान्वितम् ॥
[15] C : चित्राभं बुद्बुदाकार ; G : छत्रचित्राम्बुदाकार
[16] B : द्रव्यसंख्यावृतं वापि ; G : दशसंख्यावृतं वापि [17] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे
[18] A : प्राकारविधिः द्विचत्वारिंशः पटलः ; B : प्राकारविधिर्नाम द्विचत्वारिंशः पटलः; C : प्राकारलक्षणविधिर्नाम चतुस्त्रिंशत्पटलः; F : प्राकारलक्षणविधिपटलश्चतुस्त्रिंशत् ; G : प्राकारलक्षणविधिः पटलः चतुस्त्रिंशत्

[द्विचत्वारिंशः पटलः]

[गोपुरलक्षणविधिः[1]]

[गोपुरमानम्[2]]

प्रवक्ष्यामि समासेन गोपुराणां तु लक्षणम् । मूलप्रासादसदृशं गोपुराणां तु [3]विस्तृतम् ॥ १ ॥
[4]सपादं सार्धं पादोनद्विगुणं [5]द्विगुणं तु वा । आयामं गोपुराणां तु पञ्चसाले तु संमतम् ॥ २ ॥
एको वानेकभूमिर्वा [6]गण्यादीन्सदृशोक्तवत् । आयामसदृशं तुङ्गं [7]सदृशं तारद्वयं तु वा ॥ ३ ॥

---

[1] Pour गोपुरलक्षण voir *Aṃśumatkāśyapa* 44, *Aṃśumdāgama* 45, *Kāmika* I 75, *Kāraṇa* I 8 et II 5 et 94, *Dipta* 12, *Suprabheda* I 31 et *Sūkṣma* 34.

[2] cf. *Aṃśumatkāśyapa* 44, 1-6:

अथ वक्ष्ये विशेषेण गोपुराणां तु लक्षणम् । अन्तर्मण्डलसालादिष्वधुना प्रोच्यते क्रमात् ॥
द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यके । द्वारगोपुर इत्येते क्रमान्नाम्ना प्रकीर्तिताः ।
एकद्वित्रितलं वापि द्वारशोभां तु कल्पयेत् । द्विभूमिर्वा त्रिभूमिर्वा चतुर्भूमिरथापि वा ॥
द्वारशाला तु कर्तव्या साले स्यात्तु द्वितीयके । त्रिचतुष्पञ्चभूमिं वा द्वारप्रासादमारभेत् ॥
चतुष्पञ्चतलं वाथ षट्तलं वाथ हर्म्यकम् । पञ्चषट्सप्तभूमिर्वा द्वारगोपुर इष्यते ॥
अथवा सर्वसालेषु एकद्वित्रितलं तु वा । सोपपीठमधिष्ठानं विना वा उपपीठकम् ॥

cf. *Aṃśumadāgama* 45, 9b-10 et 14-19a:

विस्तारायाममुत्सेधं प्रोच्यते रविसत्तम । मूलप्रासादविस्तारं द्विगुणं त्रिगुणं तु वा ॥
चतुष्पञ्चगुणं वाथ शोभादीनां च विस्तृतम् ।.....
आयामं च ततः शृण ॥
सपादं सार्धपादोत्ति[पादोन?]द्विगुणं त्रिगुणं तु वा । द्विगुणं तु सपादांशमेवमायं प्रगृह्यताम् ॥...
उत्सेधमधुनोच्यते ॥
विस्तारं सप्तधा भज्य शोभोच्चं रुद्रभागया । विस्तारमष्टधा कृत्वा साधांशांशसमन्वितम् ॥
द्वारशालोदयं ख्यातं त्रिपादं त्रिगुणं तु वा । द्विगुणं साष्टभागं तु प्रासादस्य तदुच्छ्रयम् ॥
उत्तरादि शिखान्तं च मात्रोच्चं तु प्रगृह्यताम्।

cf. *Aṃśumatkāśyapa* 44, 30-33a:

" तेषां तुङ्गमथोच्यते ॥
विस्तारं सप्तधा भज्य शोभोच्चं रुद्रभागया । तारादर्धाधिकं तुङ्गं द्वारशालोच्छ्रयं भवेत् ॥
सप्तभागे तु रुद्रांशं भान्वंशं वा तृतीयके । विस्तारे तु नवांशे तु मन्वंशोच्चं चतुर्थके ॥
विस्तारद्विगुणोत्सेधं महागोपुरमिष्यते । होमादिस्थूपिपर्यन्तं प्रोक्तोच्चं तु प्रगृह्यताम् ॥

voir aussi *Ajitāgama* 38, 31-42

[3] B : विश्रुतम्

[4] A : सपादं सार्धपादोनं ; B : सपादसार्धपादोनं ; C : सपादं सार्धपादेन

[5] A : त्रिगुणं pour द्विगुण

[6] A : गण pour गण्य

[7] B : सदृशान्तारद्वयं तु वा ; C : सदृशान्तरयन्तु वा ; G : सदृशान्तारयन्तु वा

[अलंकारः[1]]

[2]शालाकारं शिरः कार्यं हर्म्याकारमथापि वा । [3]लुपारोहशिरो वापि [4]मण्डपं वा सहारकम् ॥ ४ ॥
[5]छत्राकारं तु वा मूर्ध्नि कल्पयेत्कल्पवित्तमः ॥ ५ ॥

इति [6]श्रीमद्रौरवतन्त्रे [क्रियापादे] [7]गोपुरलक्षणविधिर्नाम द्विचत्वारिंशः पटलः

[1] cf. *Aṃśumadāgama* 45, 193b-202a:

मण्टपं वा यथा द्वारशोभां चैव प्रकल्पयेत् । दण्डवद्द्वारशालां च प्रासादं रथवत्कुरु ॥
मालिकाकृतिः कर्तव्या द्वारहर्म्यमिति स्मृतम् । शालाकारं प्रकर्तव्यं महागोपुरमिष्यते ॥
सर्वांश्च गोपुराकारं कल्पयेद्विप्रपुङ्गव । अथवा द्वारशालादि शृणु वक्ष्ये विशेषतः ॥
एकद्वित्रिलं वापि सर्वालंकारसंयुतम् । मुखे मुखे महानासी पार्श्वयोर्वंशनासिका ॥
पादं प्रत्यल्पनासाढ्यं युग्मस्थूपिसमन्वितम् । लुपारोहशिखायुक्तं मण्टपाकृतिकं तु वा ॥
श्रीकरं त्विति विख्यातं सर्वकामफलप्रदम् । शालाकारशिरोयुक्तं षण्णासि मुखपृष्ठयोः ॥
पार्श्वयोर्वंशनासाढ्यं युग्मस्थूपिकयान्वितम् । अन्तः पादोत्तरैर्युक्तं सर्वालंकारसंयुतम् ॥
अतिक्रान्तमिदं नाम सर्वदेशेषु योग्यकम् । मुखे मुखे च षण्णासी पार्श्वयोर्वंशनासिका ॥
सभाकारं शिरः स्कन्दकान्तं विजयमेव च । एवं त्रिविधमाख्यातं द्वारशोभादि कल्पयेत् ॥

cf. *Aṃśumatkāśyapa* 44, 112-120:

"अलंकारमथोच्यते ॥
मण्टपाभां यथा द्वारशोभां कुर्याद्द्विजोत्तम । दण्डं वा द्वारशाला स्यात्प्रासादं सदनाकृतिः ॥
मालिकाकृति कर्तव्यं द्वारहर्म्यं द्विजोत्तम । शालाकारं प्रकर्तव्यं द्वारगोपुरमुच्यते ॥
सर्वं वै गोपुराभं वा कल्पयेत्कल्पवित्तमः । तेष्वादौ द्वारशोभां तु वक्ष्येऽहं द्विजसत्तम ॥
एकद्वित्रितलं वापि सर्वालंकारसंयुतम् । मुखे मुखे महानासी पार्श्वयोर्वंशनासिका ॥
स्वस्त्याकृत्यल्पनासाढ्यं प्रागुक्तविधिना द्विज । युग्मस्थूपिसमायुक्तं लुपारोहशिरस्तु वा ॥
मण्टपाकृतिकं वापि श्रीकान्तं तदुदाहृतम् । शालाकारशिरस्तस्मिन् षण्णासी मुखपृष्ठयोः ॥
पार्श्वयोर्वंशनासाढ्यं युग्मस्थूपिसमन्वितम् । अन्तः पादोत्तरैर्युक्तमतिक्रान्तमिदं परम् ॥
मुखे मुखे च षण्णासी पार्श्वयोर्वंशनसिका । सभाकारं शिरः स्कन्दकान्तं विजयमेव हि ॥
एवं त्रिविधनीत्या तु द्वारशोभाः प्रकल्पयेत् ॥

[2] G : शालाकारमलंकार्यं [3] A, B : लुपारुह्यशिरो [4] G : मण्डं वापि pour मण्डपं वा
[5] A: चित्राकारं [6] A : श्रीरौरवतन्त्रे ; B omet श्रीमद्रौरवतन्त्रे
[7] A : गोपुरविधिः त्रिचत्वारिंशः पटलः ; B : गोपुरलक्षणं नाम त्रिचत्वारिंशः पटलः ; C : गोपुरलक्षणविधिर्नाम पञ्चत्रिंशत्पटलः ; F : गोपुरलक्षणविधिपटलः पञ्चत्रिंशत् ; G : गोपुरलक्षणविधिः पटलः पञ्चत्रिंशत्

[त्रिचत्वारिंशः पटलः]

[मुकुटादिविभूषणविधिः[1]]

[मकुटलक्षणम्[2]]

अथ संक्षेपतो वक्ष्ये [3]मकुटादिविभूषणम् । [4]शुद्धजाम्बूनदं वापि सौवर्णं [5]राजतं तु वा ॥ १ ॥

ताम्रं वापि प्रकर्तव्यं यथावित्तानुसारतः । स्वायम्भुवादिलिङ्गानां [6]शुद्धजाम्बूनदेन तु ॥ २ ॥

---

[1] Pour मकुटादिविभूषणविधि voir *Aṃśumatkāśyapa* 64, *Ajita* 22, *Kāraṇa* I 18, *Dipta* 98, *Vimalāgama* 40, *Suprabheda* I 22 et *Sūkṣma* 51, 52 et 55.

[2] cf. *Sūkṣmāgama* 51, 1-2 et 12-24:

मकुटस्य विधिं वक्ष्ये शृणु त्वं तत्प्रभञ्जन । तल्लक्षणं त्रिधा प्रोक्तं किरीटं च करण्डकम् ॥
जटामकुटमेतेषु जटामकुटलक्षणम् । वक्ष्यते निष्कलस्यापि सकलस्य च साम्प्रतम् ॥
देहबन्धा[लब्धा?]ङ्गुलं गृह्य सकले तत्प्रमाणतः । चतुर्विंशाङ्गुलं वापि त्रिःसप्ताङ्गुलमेव वा ।
अष्टादशाङ्गुलं वाथ मकुटोत्सेधकं कुरु । सकलेऽप्येवमेव स्यान्निष्कले तु विधीयते ॥
शिरोवर्तनतस्तारं नाहं तत्समुच्यते । विस्तारसमतुङ्गं स्यात्सप्ताष्टनवकांशके ॥
एकांशेनाधिकं वापि कुर्यादायादिसंयुतम् । तुङ्गतारवशेनैव आयादीनपि कारयेत् ॥
ललाटमुकुलान्तं च मानयेन्मानसूत्रकम् । युग्मसंख्याजटायुक्तं तज्जटापरितोवृतम् ॥
अथवा तिर्यगूर्ध्वस्थजटाभिः परिमण्डितम् । अर्कांशे तु तदुत्सेधे एकांशेन जटोदयम् ॥
कनिष्ठानामिकामध्याङ्गुलीनाहमथापि वा । ललाटपट्टसंयुक्तं शिरसो वर्तनोर्ध्वतः ॥
चतुष्पूरितसंयुक्तं तदुत्सेधवशेन च । अथवा पूरितोत्सेधं तदर्धेन विराजितम् ॥
मौलिमूलविशालं च तत्त्रिभागैकमेव वा । तदग्रविस्तरं चैव क्रमेण तु शतं[कृशं?]नयेत् ॥
तज्जटोदयमानेन द्विगुणं मुकुलोदयम् । तद्रूपं मुकुलं वाथ यथावत्तु समाचरेत् ॥
वामे तु शिवगङ्गां च तदर्धद्वयमानतः । वामेऽर्धशशिसंयुक्तं सव्ये नागार्कपुष्पकैः ॥
नागार्कपुष्पसंयुक्तं नानारत्नोपशोभितम् । नानाचित्रक्रियोपेतं मकुटं कारयेद्बुधः ॥
अत्रानुक्तं तु यत्सर्वं युक्त्यालंकारमाचरेत् । मकुटस्य विधिः प्रोक्तः"

cf. *Kāraṇāgama* I 18, 333-336a:

मकुटस्य विधिं शृणु ॥
कपर्दमकुटं चैव किरीटमकुटं तथा । करण्डमकुटं चैव..... ॥
नानारत्नसमायुक्तं सर्वं हैमेन कारयेत् ॥

cf. *Kāmikāgama* II 43, 20b-25a:

उष्णीषभूषणं कुर्यात्त्रिमात्रेण विशेषतः । पार्श्वयोः पुरतः पृष्ठे चतुष्पूरिसमन्वितम् ॥
मध्ये मकरकूटं स्यात्सप्तकोटरसंयुतम् । पार्श्वयोः पत्रकूटं स्यात्पृष्ठे स्याद्रत्नकूटकम् ॥
अग्रे दशाङ्गुलं तस्य मूले तु मुखविस्तरम् । तत्तत्त्रिगुणनाहं तु वामेऽवामेऽर्धचन्द्रकम् ॥
वामे महाफणिं तस्य सर्वालंकारभूषितम् । जटाभिः पञ्चभिर्ग्रन्थि त्रिमात्रेण विशेषतः ॥
एकधा तु त्रिधावृत्या शेषाभिः पार्श्वलम्बनम् । जटामकुटमेतद्धि सर्वालंकारमीरितम् ॥

voir aussi *Ajitāgama* 22, 68b-69.

[3] C, F, G : मकुटस्य तु लक्षणम्

[4] Les manuscrits C et F omettent les demi-*śloka* 1b et 2a.

[5] B : रजतं pour राजतं

[6] C, G : मानुषाणां तथैव च

सौवर्णं वा प्रकर्तव्यमन्यद्वै[1] मानुषस्य [2]तु । [3]पूजांशोच्चे त्वथाष्टांशे ह्येकांशं[4] मकुटोदयम् ॥ ३ ॥
[5]द्वियंशं वा त्रियंशं वा चतुरंशमथापि वा । [6]अथवा मानमात्राभ्यां देहमात्रमथापि वा ॥ ४ ॥
चतुरङ्गुलमारभ्य [7]त्रियङ्गुलविवर्धनात् । अष्टाविंशाङ्गुलं यावन्नवभेदमिति स्मृतम् ॥ ५ ॥
शिरोनाहपरीणाहं सर्वलिङ्गेषु योग्यकम् । उष्णीषांशं[8] प्रकर्तव्यमेकद्वित्रिचतुर्ष्वपि ॥ ६ ॥
पञ्चषट्[9]सप्तमात्रं वा योजयेत्तु सुखावहम् । [10]तदूर्ध्वं मकुटोत्सेधं मुकुलान्तं विचक्षणः ॥ ७ ॥
अथवा तत्समोपेतमायादिशुभसंयुतम् । [11]चतुष्पूरसमायुक्तं[12] पत्रचित्राद्यलंकृतम् [13] ॥ ८ ॥
शम्भोर्जटाभिषेकं [14]तु जटाबन्धनमण्डितम् । गङ्गाचन्द्रसमायुक्तं कर्ण[15]पुष्पसमन्वितम् ॥ ९ ॥
[16]मूलादष्टांशहीनं वा षोडशांशमथापि वा । तन्मध्यमांशे वा कुर्यान्नवभेदमुदीरितम् [17]॥ १० ॥
अग्रात्कलांशहीनं तु पद्मतारमिति स्मृतम् । [18]पद्मतारत्रिभागैकचतुष्पञ्चषडंशकैः ॥ ११ ॥
उत्सेधं [19]मुकुले तद्वत्सर्वरत्नविचित्रितम् । नृपाणामेवं[20] कर्तव्यं जटाबन्धं विनाचरेत् ॥ १२ ॥

[स्वर्णपुष्पम्[21]]

अथवा मूर्ध्नि पुष्पं वा दलाष्टकसमन्वितम् । कर्णिकाकेसरैर्युक्तं दलैर्वा षोडशैर्युतम् ॥ १३ ॥
[22]सर्वरत्नविचित्रैस्तु लिङ्गमूर्ध्नि[23] सुयोजयेत् ।

---

[1] B : अन्ये द्वे pour अन्यद्वै

[2] B : च pour तु [3] A : पूजांशोच्चमथाष्टांशमेकांशं

[4] Les mots tels que अंश, उदय, उत्सेध etc se trouvent au neutre au lieu du masculin ; voir *Rauravāgama* vol. I, p. 69 note 6.

[5] A: : द्वियंशं वा त्रयांशं वा [6] Les manuscrits A et B omettent le demi-*śloka* 4b.

[7] B : द्विव्यङ्गुल pour त्रियङ्गुल [8] B : अन्तं pour अंशं [9] G : हस्त pour सप्त

[10] A : तन्मूर्ध pour तदूर्ध्वं ; B : तन्मूर्ध्नि

[11] B : चतुष्पुरी pour चतुष्पूर ; C : चतुष्पूरि ; F, G : चतुष्पुरिम [12] F, G : संयुक्तं pour समायुक्तं

[13] C : पवित्राद्यैरलंकृतम् [14] B : च pour तु [15] F : पूर pour पुष्प

[16] Les manuscrits C, E, F et G omettent les *śloka* 10a à 13a

[17] B : उदाहृतम् pour उदीरितम् [18] B : पद्मतारं त्रिभागैकं [19] A, B : मुकुलं pour मुकुले

[20] A : एव pour एवं

[21] cf. *Kāraṇāgama* I 18, 331b-333a:

पुष्पलक्षणमुच्यते ॥
अरन्यङ्गुलं तु विस्तारं मध्यमे कर्णिकायुतम् । दलाष्टकसमायुक्तं सरलं काञ्चनेन तु ॥
सुवर्णकुसुमं ह्येवम् ”

cf. *Suprabhedāgama*, I 22, 203-204:

“ सुवर्णकुसुमं शृणु ॥
द्वादशाङ्गुलविस्तारं वसुभागार्धमेव वा । मध्यमे कर्णिकायुक्तं दलाष्टकसमन्वितम् ॥
पुष्पमेवं समाख्यातम् ”

voir aussi *Ajitāgama* 22, 65-67.

[22] B : कार्यं सर्वविचित्रैस्त [23] E, G : मूर्ध्ना pour मूर्ध्नि

[गोलका[1]]

[[2]स्वर्णपुष्पविधिः प्रोक्तो गोलकालक्षणं शृणु ॥ १४ ॥
यावल्लिङ्गस्य विस्तारं पूजाभागोच्छ्रयं तथा ।] [3]अर्धाङ्गुलप्रवृद्ध्या तु ह्युत्सेधं सप्तधा भवेत् ॥१५॥
[4]ऊर्ध्वं सुषिरसंयुक्तमङ्गुलस्य [5]प्रमाणतः । [6]मानुषस्यैव लिङ्गस्य सूत्राग्रे सुषिरत्रयम् ॥ १६ ॥
अर्धगोलकया वाथ त्रिध्वेकं चतुरंशकम् । पञ्चांशं वाथ कर्तव्यं सुषिरत्रयसंयुतम् ॥ १७ ॥
लिङ्गोत्सेधसमं कृत्वा [7]शेषं सूत्रेण योजयेत् । पिण्डिकागोलकां कुर्याच्चतुर्भागेव सा त्रिधा ॥ १८ ॥
[8]त्रिभागा वैकभागा वा यथा पीठाकृतिर्भवेत् । [9]वृत्ता वा चतुरश्रा वा यथापीठं समावृता ॥ १९ ॥
अधस्तात्पादुकां कृत्वा द्विध्यङ्गुलप्रमाणतः । गोलकालक्षणं प्रोक्तं पट्टलक्षणमुच्यते ॥ २० ॥

[पट्टम्[10]]

[11]एकाङ्गुलात्तु[12] विस्तारं यावदेकादशान्तकम् । लिङ्गनाहं तु दैर्घ्यं स्याच्चतुष्पञ्चांश[13]मेव वा ॥२१॥
[14]षटसप्ताष्टांशकं वाथ शेषं सूत्रेण योजयेत् ।

[कर्णवृत्तम्[15]]

कर्णवृत्तं तथा कुर्याद्विध्यङ्गुलस्य प्रमाणतः ॥ २२ ॥
अङ्गुलाङ्गुलवृद्ध्या तु [16]विंशत्यङ्गुलकान्तकम् । [17]भेद एकोनविंशः स्यात्तन्मध्ये [18]रत्नबन्धनम् ॥ २३ ॥

---

[1] cf. *Kāraṇāgama* I 18, 327b-330a:

गोलकालक्षणं शृणु ॥
अर्धाङ्गुलसमायामं पूजाभागसमायुतम् । नाहं चैव परिग्राह्यं कुर्याद्धैमेन गोलकम् ॥
प्राग्वल्लक्षणमुद्धृत्य सूत्राग्रे सुषिरत्रयम् । नानारत्नसमायुक्तं लिङ्गवत्कारयेत्ततः ॥
गोलकालक्षणं प्रोक्तम् ”

voir aussi *Ajitāgama* 22, 88b-93.

[2] Dans tous les manuscrits utilisés pour cette édition il semble qu'il y a une lacune après *śloka* 14a. Le *śloka* proposé entre crochets à titre de reconstruction hypothétique, est pour seul objet de suggérer le contenu de cette lacune, et s'appuyer pour cela sur l'autorité du *Diptāgama* 98, 371.

[3] Les manuscrits **C, E, F et G** omettent les *śloka* 15b à 16.

[4] Le manuscrit **B** omet le demi-*śloka* 16a

[5] **A** : प्रमाणकम् [6] **A** : मानुष्य pour मानुष

[7] **A** : शेषसूत्रेण [8] **A** : त्रिभागमेकभागं वा [9] **A** : वृत्तं वा चतुरश्रं वा

[10] cf. *Kāraṇāgama* I 18, 330-331:

“पट्टलक्षणमुच्यते ॥
रुद्राक्षाङ्गुलमानेन पट्टारं प्रकीर्तितम् । लिङ्गनाहं तु नाहं स्यात्पट्टं हैमेन कारयेत् ॥
पट्टलक्षणमेवं स्यात् ”

रत्नैर्मुक्ताफलैश्चापि भूषयेत्तु[1] मनोहरम् । कर्णकुण्डलमाख्यातं चन्द्रखण्डविधिं शृणु ॥ २४ ॥

[चन्द्रखण्डः]

चतुरङ्गुलदैर्घ्यं [2]तु विस्तारश्चाङ्गुली भवेत् । [3]विस्तारादङ्गुलीवृद्ध्या दैर्घ्यात्र्यङ्गुलवर्द्धितः[4] ॥ २५ ॥

मध्यविस्तार एवं तु मध्यादग्रं क्रमात्कृशम् ।

[जाह्नवी[5]]

अर्धं तु जाह्नवीपीठं तदर्धं योषिदाकृतिः ॥ २६ ॥

ऊर्ध्वकाया प्रकर्तव्या हस्ताभ्यां [6]वन्दिनी यथा । सर्वाभरणसंयुक्ता करण्डमकुटान्विता ॥ २७ ॥

एवं तु जाह्नवीं कल्प्य यथास्थानं तु योजयेत् ।

[उत्तरीयम्[7], हारो[8] यज्ञोपवीतं च[9]]

अर्धाङ्गुलप्रविस्तारमुत्तरीयं विशेषतः ॥ २८ ॥

---

cf. *Diptāgama* 98, 375a: पट्टे पञ्चाङ्गुलं तारं लिङ्गनाहं च दैर्घ्यकम् ॥

cf. *Suprabhedāgama* I 22, 205a: पट्टं च भागविस्तारं लिङ्गनाहं च दैर्घ्यकम् ।

voir aussi *Ajitāgama* 22, 73-77a.

[11] à la place des *śloka* 21 et 22a, on a en **A** et B:

एकाङ्गुलात्तु विस्तारो यावदेकोनविंशतिः । अष्टाङ्गुलविवृद्ध्या तु लिङ्गनाहस्तु दैर्घ्यकम् ॥

तदर्धं वा तदर्धं वा पञ्चांशं वा षडंशकम् । सप्ताष्टनन्दभागं वा शेषं सूत्रेण योजयेत् ॥

[12] C : एकाङ्गुलं तु [13] C : अङ्ग pour अंश [14] C : षट्सप्तांशकं नाथ

[15] cf. *Aṃśumatkāśyapa* 64, 26-28:

कुण्डलव्यासतुङ्गं तु त्रिचतुष्पञ्चमात्रकम् । युक्तं वै कुण्डलं कृत्वा कर्णे स्कन्धोपरि न्यसेत् ॥

अथवा कर्णयोर्विप्र वृत्तकुण्डलकं न्यसेत् । वृत्तकुण्डलविस्तारमष्टादशयवं भवेत् ॥

वेदाङ्गुलं तु तत्तुङ्गं कुम्भाब्जमुकुलोत्पलम् । अन्यं वा सुन्दरोपेतं कल्पयेद्वृत्तकुण्डलम् ॥

[16] A, B : विंशत्यङ्गुलमन्तकम् [17] A : भेद एकोनलिङ्गः स्यात् ; C : भेद एकोनविंशत्या

[18] A : रक्तबन्धकम्

[1] C : तत् pour तु [2] B : स्यात् pour तु [3] A : विस्तारादि pour विस्तार

[4] B : वृद्धिदः pour वृद्धितः

[5] cf. *Kāmikāgama* II 46, 45-46:

देवस्य वक्त्रमानेन जाह्नव्यायाम उच्यते । द्विभुजा च त्रिणेत्रा च करण्डमकुटान्विता ॥

सर्वाभरणसंयुक्ता कृताञ्जलिपुटान्विता । ऊर्ध्वभागादधोभागं तोयाकारेण कारयेत् ॥

[6] B : वन्दनीयया ; E, F, G : वन्दनीयकम्

[7] cf. *Kāraṇāgama* I 18, 209b-211a:

"उत्तरीयविधिं शृणु ॥

बाणहस्तायतं वापि वेदहस्तायतं तु वा । तालमात्रप्रविस्तारं बन्धयेत्तु द्विपुच्छकौ ॥

यज्ञोपवीतवद्धार्यमुत्तरीयं विशेषतः ॥

voir aussi *Ajitāgama* 22, 70-72,

अङ्गुलाङ्गुलवृद्ध्या तु नवधाष्टाङ्गुलान्तकम्[1] । हारं यज्ञोपवीतं च लिङ्गायामसमन्वितम् ॥ २९ ॥
रत्नैर्मुक्ताफलैश्चापि बन्धयेत्तु मनोहरम् । एवमाभरणं प्रोक्तं प्रभालक्षणमुच्यते ॥ ३० ॥

[प्रभा[2]]

प्रभां वा तोरणैर्वापि योजयेत्तु [3]मनोहरम् । स्वर्णराजततामैर्वा यथावित्तानुसारतः ॥ ३१ ॥
[4]त्रियङ्गुलं समारभ्य षट्षडङ्गुलवर्धनात् । सप्तविंशतिमात्रान्तं विस्तारं पञ्चधा भवेत् ॥ ३२ ॥
एवं लिङ्गोर्ध्वविस्तारं पार्श्वविस्तारमुच्यते । [5]त्रियङ्गुलं समारभ्य द्वियङ्गुलविवर्धनात् ॥ ३३ ॥

---

[4] cf. *Aṃśumatkāśyapa* 64, 57-61a:

ग्रीवे हारं विजानीयाद्धिक्काधस्तात्षडङ्गुलम् । लम्ब्यं वेदाङ्गुलं तारं यवत्रयघनान्वितम् ॥
नानारत्नैर्हिरण्यैश्च हारं कृत्वातिसुन्दरम् । हिक्कासूत्रोपरिष्टात्तु उपग्रीवं तु बन्धयेत् ॥
स्फाटिकं वाथ रत्नं वा हेमवृत्तमणिं तु वा । उपग्रीवमिदं ख्यातं हृन्माला त्वधुनोच्यते ॥
कण्ठादुदरबन्धान्तमक्षमालां तु बन्धयेत् । एतद्धृदयमाला स्यात्स्कन्धमाला तथोच्यते ॥
स्कन्धे तु स्कन्धमाला स्यान्नानापुष्पैर्विराजिता ॥

[5] cf. *Aṃśumatkāśyapa* 64, 52-55:

यज्ञोपवीतं संयुक्तं यवाष्टांशघनान्वितम् । उपवीतं त्रित्रिसूत्रमुदरसूत्रसमन्वितम् ॥
एवमेवोरुसूत्रं स्यादुपवीतघनं समम् । वामस्कन्धोपरि न्यस्त्वा नाभ्यधस्त्वङ्गुलान्तरम् ॥
यज्ञोपवीतदीर्घं स्यान्नाभेर्दक्षिणपार्श्वके । अपरे वंशमाश्रित्य यज्ञसूत्रं निधापयेत् ॥
उरःसूत्रं समालम्ब्य स्तनादष्टाङ्गुलान्तरम् । यज्ञोपवीतमेवं स्यात् ”

[1] B : अन्ततः pour अन्तकम्

[2] cf. *Vimalāgama* 40, 2-9;

ईश्वर उवाच—पुरा ताण्डवकाले तु मया वीर विजृम्भितम् । ऊर्ध्वलोकान्तरे देशे महातिमिरसंकुले ॥
तस्मिन्काले महावीर सूर्यकोटिसमप्रभः । मूलाग्निरुदितो ज्वालामालाजालसमन्वितः ॥
मदीये मौलिदेशे तु प्रभारूपमधारयत् । किं तु प्रणव एवाद्ये षट्त्रिंशत्तत्त्वदीप्तिभिः ॥
प्रभाकारेण संप्राप्तो मां मुदा सेवते सदा । आकर्णय महावीर देव दारुवने पुरा ॥
संक्रीडितं मया तत्र येन केनापि हेतुना । एते महर्षयः सर्वे मत्कृतौ क्रोधनिर्भराः ॥
आभिचारकहोमाग्निमनल्पं मय्यवाकिरन् । तदग्निर्दीप्तिजालैश्च प्रभाकारेण सेवते ॥
इत्येतेन प्रकारेण प्रभायाः कथ्यते विधिः । वीर तस्मादलंकारः सदा मे मौलिभागतः ॥
स्वर्णेन रजतेनापि ताम्रेणापि च दारुणा । दीप्तिभिश्च प्रभां कुर्यादथवा मकरतोरणम् ॥

cf. *Sūkṣmāgama* 55, 1-22:

वक्ष्यामि सकलादीनां प्रभामण्डललक्षणम् । स्वर्णरजतलोहेन कारयेत्तु प्रभञ्जन ॥
बिम्बस्य शोभनार्थाय मण्डलं त्रिविधं कुरु । वह्निमण्डलमादौ तु द्वितीयं भानुमण्डलम् ॥
तृतीयं चन्द्रवृत्तं च त्रिविधं मण्डलं भवेत् । एकं वापि द्वयं वापि त्रयं वापि प्रकल्पयेत् ॥
बिम्बोदरार्धं संगृह्य भ्रामयेच्चन्द्रबिम्बवत् । जानुभ्यामावसानं च जङ्घामध्यावसानकम् ॥
सिंहांश्च मकरांश्चैव अधोभागे प्रकल्पयेत् । मण्डलस्य तु विस्तारमग्निबाणाद्रिनन्दतः ॥

[1]नवत्रिंशच्चैव यावत्तावदेकोनविंशतिः । पार्श्वविस्तारमेवं हि चोर्ध्वविस्तार उच्यते ॥ ३४ ॥
चतुरङ्गुलमारभ्य द्विद्व्यङ्गुलविवर्धनात् । [2]चत्वारिंशतिमात्रान्तं भेद एकोनविंशतिः ॥ ३५ ॥
[3]द्वियङ्गुलं समारभ्य ह्येकैकाङ्गुलवर्धनात् । षडङ्गुलावसानं तु विवरं पञ्चधा भवेत् ॥३६॥
नाना[4]वल्लिसमायुक्तं सर्वरत्नविचित्रितम् । चित्र[5]पत्रसमायुक्तं मकरार्द्यैर्विभूषितम् ॥ ३७ ॥
लिङ्गायामं त्रिधा कृत्वा व्योमांशं [6]चरणोदयम् । प्रमादीर्घो द्विभागः स्यादथवा पञ्चभागतः ॥३८॥
द्विभागं[7] पाददैर्घ्यं तु त्रिभागं प्रभया कुरु । [8]लिङ्गोदयार्धं पादः स्यात्तत्समं प्रभया कुरु[9] ॥ ३९ ॥

मध्यविस्तारमेवोक्तं पञ्चभागांशहीनकम् । मूलग्रन्थिविशालं तु क्रमेण परिकल्पयेत् ॥
मकरास्ये तु संयोज्यं मकारं वृत्तमेव वा । त्रयोदशाङ्गुलं ख्यातं मकरास्ये तु वीक्षितम् ॥
विस्तारं रुद्रधा भज्य मुक्तादामं द्वयांशकम् । वेत्रमर्धांशकं प्रोक्तमिन्दूत्सेधं द्वयांशकम् ॥
अर्धांशं वेत्रतुङ्गं तु महावेत्रं त्रियंशकम् । तद्वेत्रतुङ्गमर्धांशमिन्दूत्सेधं द्वयांशकम् ॥
वेत्रमर्धांशमित्युक्तं तस्योर्ध्वेऽग्निं प्रकल्पयेत् । पञ्चाङ्गुलसमुत्सेधं विस्तारं च त्रियङ्गुलम् ॥
सप्तजिह्वासमायुक्तमथवा पञ्चजिह्वकम् । पार्श्वेष्वग्निं त्रिजिह्वं तु क्रमात्क्षीणं प्रकल्पयेत् ॥
सर्वाङ्गानां प्रकर्तव्यं शोभाबलसमन्वितम् । वह्निमण्डलमेवोक्तं भानुमण्डलकं शृणु ॥
वह्निमण्डलबाह्ये तु कल्पयेद्भानुमण्डलम् । विस्तारायाममानं तु पूर्वोक्तविधिना कुरु ॥
विस्तारं सप्तधा भज्य वेत्रमंशेन कल्पयेत् । पुष्पोच्चं पञ्चभागं च वेत्रं भागेन कल्पयेत् ॥
पुष्पमष्टदलोपेतं पञ्चभागं सकर्णिकम् । रत्नानि विन्यसेन्मध्ये वृत्ताकारं प्रकल्पयेत् ॥
नक्षत्रसंख्यया पुष्पे तत्संख्यं पद्मकुड्मलम् । पद्मस्य मुकुलाकारं तस्योर्ध्वे तु प्रकल्पयेत् ॥
भानुमण्डलमेवोक्तं चन्द्रमण्डलकं शृणु । भानुमण्डलबाह्ये तु कल्पयेच्चन्द्रमण्डलम् ॥
तस्य विस्तारतुङ्गं च पूर्वोक्तविधिना कुरु । वेत्रद्वयसमायुक्तं मध्येष्वब्जं प्रकल्पयेत् ॥
दलैः षोडशभिर्युक्तं कल्पयेत्पूर्ववत्सुधीः । कुमुदं कुड्मलाकारं तस्योर्ध्वे तु प्रकल्पयेत ॥
नक्षत्रसंख्यया पुष्पे कुर्यात्कुमुदकुड्मलम् । पुष्पस्याभ्यन्तरे चैव रज्जुबन्धं प्रकल्पयेत्र ॥
चन्द्रमण्डलमेवोक्तं कल्पयेदतिसुन्दरम् । अत्र किंचिद्वदेशोऽस्ति वह्निमण्डलकस्य च ॥
महावेत्रस्य मध्ये तु कल्पयेद्रत्नपुष्पकम् । प्रभामण्डलमेवोक्तम् ''

voir aussi *Ajitāgama* 22, 84b-88a.

[3] B : मनोहरः [4] Les manuscrits A et B omettent les *śloka* 32 et 33a.
[5] A : त्रयाङ्गुलं

[1] A : त्रिंशार्पि चैव तत्तावद् ; B : त्रिंशोर्विंशचैव तत्तावद्वैदेनैकोनविंशतिः
[2] La forme grammaticale correcte est चत्वारिंशद्
[3] Les manuscrits A et B omettent les *śloka* 36 et 37
[4] C : पल्लव pour वल्लि [5] F : वस्त्र pour पत्र [6] A : शरण pour चरण
[7] A : पादं pour भागं [8] A : लिङ्गोदयार्धपादोनतत्समं [9] B : तद्द pour कुरु

लिङ्गोदयप्रभा वापि [1]यन्त्रनाराचसंयुता । सप्ताष्टनवभागे[2] तु लिङ्गायामे[3] विभाजिते ॥ ४० ॥
द्व्यंशेन तोरणं कल्प्य शेषं पादोच्चमेव हि । प्रासादचरणाकारं पट्टाकारमथापि वा ॥ ४१ ॥
सर्वालंकारसंयुक्तं शेषं [4]तु सकलोक्तवत् । स्थलोर्ध्वे यन्त्रिकोर्ध्वे तु योजयेत्तु दृढीकृतम्[5] ॥ ४२ ॥

[यन्त्रिका[6]]

यन्त्रिका पीठिकोत्सेधा यन्त्रनाराचसंयुता ।

[भूषणयोजनविधिः[7]]

एवमेवं समापाद्य शुद्धिं कृत्वा विचक्षणः ॥ ४३ ॥
[8]पुण्याहप्रोक्षणं कृत्वा मृत्तोयैः [9]पत्रतोयकैः । पञ्चगव्यामृतैश्चैव क्षालयेच्छुद्धवारिणा ॥ ४४ ॥
तत्तद्देवान्समभ्यर्च्य कुम्भे वा करकेऽपि वा । शान्तिहोमं [10]ततः कृत्वा कुम्भोदैः [11]स्नापयेत्पुनः ॥ ४५ ॥
नैवेद्यान्तं [12]समभ्यर्च्य सुमुहूर्ते तु योजयेत् । आचार्यं पूजयेत्पश्चाद्यथावित्तानुसारतः ॥ ४६ ॥

इति [13]श्रीमद्रौरवतन्त्रे [क्रियापादे] [14]मकुटादिविभूषणविधिर्नाम त्रिचत्वारिंशः पटलः

---

[1] B : यत्र pour यन्त्र [2] : A : भागं pour भागे
[3] A : आयाम pour आयामे [4] B : तां pour तु [5] A : कृलिम् pour कृतम्
[6] cf. *Diptāgama* 98, 379-381a:

यन्त्रिकालक्षणं शृणु ॥
आयसीं कल्पयेद्यन्त्रीं द्विवक्त्रां वलयान्विताम् । मध्याङ्गुलपरीणाहमर्गलस्यार्हकं तथा ॥
यन्त्रिकालक्षणं प्रोक्तम्"

cf. *Suprabhedāgama* I 22, 66-68:

"यन्त्रिकां च ततः शृणु ॥
आयसेन प्रकर्तव्यं नालं वै मध्यमाङ्गुलम् । कवाटार्गलसंबन्धं यथायुक्तं भवेदिह ॥
द्विवक्त्रं च ततः कृत्वा पूर्वपश्चिमसंयुतम् । मूले वलयसंयुक्तं सुस्निग्धं च भवेदिह ॥
यन्त्रिका च तथा प्रोक्ता"

[7] cf. *Vimalāgama* 40, 10-18:

कृत्वा स्थिरे मुहूर्ते च प्रतिष्ठातन्त्रमार्गतः । अङ्कुराण्यर्पयित्वाथ पुण्याहं वाचयेत्सुधीः ॥
सिंहस्य मकरस्यापि नेत्रोन्मीलनमक्षिषु । कृत्वा शास्त्रविधानेन शिल्पिनं च विसर्जयेत् ॥
पुण्याहं वाचयेत्तत्र मध्वाज्यं प्रोक्षयेद्शोः । ग्रामप्रदक्षिणं कृत्वा सर्वालंकारसंयुतम् ॥
जलाधिवासनं कृत्वा वेदिमध्ये विनिक्षिपेत् । पूर्वोक्तमण्टपं कृत्वा प्रच्छादनपटेन च ॥
बिम्बमावेष्टय सर्वाङ्गं गन्धपुष्पैः समर्चयेत् । तेजोरूपमथावाह्य प्रधानकुम्भमर्चयेत् ॥
वर्धन्यामादिशक्तिं च कुम्भेऽष्टदिशि दिक्पतीन् । समिदाज्यचरूँल्लाजतिलसर्षपतण्डुलान्॥
प्राणप्रतिष्ठां कुर्याच्च प्रभाज्वालासु तन्त्रवित् । परमान्नं च नैवेद्यं ताम्बूलं च समर्पयेत् ॥
नीराजनविधिं कृत्वा सर्वालंकारसंयुतम् । आचार्यमर्चयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
भूषणानां च सर्वेषामेवं कुर्याद्विशेषतः । यः करोत्येवमीशस्य ज्योतिर्लोकमवाप्नुयात् ॥

[8] A : पुण्याहं प्रोक्षणं [9] A : पितृ pour पत्र [10] A : तथा pour ततः
[11] A : स्थापयेत् pour स्नापयेत् [12] B : समुद्धृत्य [13] B omet श्रीमद्रौरवतन्त्रे
[14] A : मकुटादिविभूषाविधिश्चतुश्चत्वारिंशः पटलः ; B : मकुटादिविधिर्नाम चतुश्चत्वारिंशः पटलः ; C : मकुटादिभूषणविधिर्नाम पञ्चचत्वारिंशः पटलः ; E : मकुटादिभूषणविधिः पञ्चत्रिंशत्पटलः ; F : मकुटादिभूषणविधिपटलः पञ्चचत्वारिंशत्

[चतुश्चत्वारिंशः पटलः]

[प्रायश्चित्तविधिः[1]]

[प्रासादपतने[2]]

अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिक्रमम् । प्रासादे पतिते चैव द्वितीयं तरुणालयम् ॥ १॥
कल्पयित्वा तु [3]पूजांशमानेनैव तु लिङ्गकम् । कृत्वा संस्थाप्य विधिना [4]नित्यार्चनादि कारयेत् ॥ २
प्रासादं पूर्ववत्कृत्वा पुनः स्थापनमाचरेत् । जलसंप्रोक्षणं कृत्वा शान्तिहोमं समाचरेत् ॥ ३ ॥

[सुधाकर्महीने[5]]

सुधाकर्मविहीने तु सुधां कृत्वा तु पूर्ववत् । स्नपनं कारयेत्पश्चाद्दिशाहोमं समाचरेत् ॥ ४ ॥

[प्रासादाङ्गविच्छेदे[6]]

[7]प्रासादाङ्गे तु कूटादौ विच्छिन्ने [8]संभवे सति । तदङ्गानि पुनः कृत्वा दिशाहोमं समाचरेत् ॥ ५ ॥

---

[1] Pour प्रायश्चित्तविधि voir *Aṃśumadāgama* 37, *Acintyaviśvasādākhya* 72, *Kāmika* II 30 et 31, *Kāraṇa* I 144, *Kālottara* 38, *Makuṭa* 6, *Vira* 52 et 87, *Santānasaṃhitā* 56 et 66, *Sahasra* 7, *Suprabheda* I 55 et *Sūkṣma* 60 et 62.

[2] cf. *Aṃśumadāgama* 37,332b-333:
प्रासादे पतिते चैव राजराष्ट्रस्य दोषकृत् । बालस्थानं तु संकल्प्य स्थापयेद्विधिपूर्वकम् ॥
सदनं पूर्ववत्कृत्वा संप्रोक्षणमथाचरेत् ॥
cf. *Kāraṇāgama* I 144, 20-21a:
मन्दिरे पतिते यत्र राजराष्ट्रक्षयो भवेत् । बालस्थानं ततः कृत्वा स्थापयेद्विधिपूर्वकम् ॥
पूर्ववद्भवनं कृत्वा संप्रोक्षणमथाचरेत् ॥
cf. *Virāgama* 52, 5:
प्रासादे पतिते भिन्ने बालस्थानं तु कारयेत् । प्रासादं पूर्ववत्कृत्वा जलसंप्रोक्षणं कुरु ॥
cf. *Santānasaṃhitā* 56, 18b-19:
प्रासादे पतिते चैव पूर्वोक्तलक्षणैर्युतम् । प्रासादं कारयेद्देवि स्थापनं पूर्ववत्क्रमात् ॥
जलसंप्रोक्षणं कुर्याल्लिङ्गस्य तु विशेषतः ॥
cf. *Suprabhedāgama* I 55, 43b-44:
प्रासादे पतिते भिन्ने छिन्ने नष्टे तथैव च । बालालये शिवं नीत्वा विमाने पूर्ववत्कृते ॥
विधिवत्प्रोक्षणं कृत्वा पश्चादुत्सवमाचरेत् ॥

[3] B : पूजांशमनेनैव [4] B : नित्यार्चनादिकं चरेत्

[5] cf. *Virāgama* 52, 19:
गर्भगेहे सुधाहीने सुधाकर्म समाचरेत् । शान्तिहोमं ततः कुर्यात्स्नपनं तत्र कारयेत् ॥

[6] cf. *Aṃśumadāgama* 37, 334-340a:
हर्म्ये तु स्फोटने भिन्ने कूटे वाथ विहीनके । अनावृष्टिर्भवेत्पश्चात्पुनः संधानमाचरेत् ॥
शान्तिहोमं ततः कृत्वा संप्रोक्षणमथाचरेत् । महानास्यल्पनास्योश्च उपानादेर्विहीनके ॥
विमानस्थानदेवानामङ्गोपाङ्गविहीनके । तद्राष्ट्रे वर्षवर्ज्यं वा महामारी प्रवर्तते ॥

[प्रासाददाहे दिङ्मूर्तिवृषभादिछेदादौ च]

[1]प्रासादे त्वग्निदग्धे [2]चेद्दिङ्मूर्ति[2]वृषभादिके। [3]भिन्ने छिन्ने च चलिते पुनः कृत्वा तु पूर्ववत् ॥ ६ ॥
क्षीराभिषेचनं चैव दिशाहोमं तु कारयेत् । शान्तिहोमं [4]प्रकुर्वीत पुण्याहप्रोक्षणं ततः ॥ ७ ॥
व्योमव्यापि समुच्चार्य प्रोक्षयेत्पञ्चगव्यकैः ।

[लिङ्गप्रतिमादीनां चलनादौ[5]]

लिङ्गं वा प्रतिमा वापि पिण्डिका वा विशेषतः ॥ ८ ॥
चलिते स्फुटिते भिन्ने [6]दग्धे वा त्वनलेन तु । [7]प्राग्द्रव्यैः [8]प्रागिव कुर्यात्प्रतिष्ठां सम्यगाचरेत् ॥ ९ ॥
स्नपनं शान्तिहोमं च कर्तव्यं हि गुरो विदुः ।

[आवरणपीठादिहीने[9]]

आलयावृतपीठादिहीने [10]तु कल्पयेद्बुधः ॥ १० ॥
[11]स्नपनं चोक्तवत्कुर्यात्क्षेमार्थं [12]स्थाप्य देशिकः ।

सद्यः संधानकं कृत्वा संप्रोक्षणमथाचरेत् । स्थूपिदण्डस्य विच्छिन्ने पतिते त्वेकभिन्नके ॥
तद्राष्ट्रे रोगसंभूतिर्भूपतिस्त्वन्यथा भवेत् । तद्दोषशमनार्थाय स्थापयेत्तु विचक्षणः ॥
स्थूपिवर्गविहीने च महामारी प्रवर्तते । पूर्वप्रमाणं कर्तव्यं योजयेत्तु विचक्षणः ॥
तद्दोषशमनार्थाय सम्यक्संप्रोक्षणं कुरु ॥

cf. *Kāraṇāgama* I 144, 21b-23:
भवने स्फुटिते भिन्ने कूटशालाविहीनके । सिंहकूटमहानासीकपोते च विहीनके ॥
ग्रीवाप्रस्तरहीने चाप्यनुनासीविहीनके । अनावृष्टिर्भवेत्पश्चात्पुनः संधानमाचरेत् ॥
स्नपनं कारयेच्छम्भोः शान्तिहोमं समाचरेत् ॥

[7] **A** : प्रासादाङ्गं तु कूटानि विच्छिन्नम् [8] **B** : संभवेद्यदि

[1] **A** : प्रासादान्यग्निदग्धं [2] B : इन्दुमूर्ति pour दिङ्मूर्ति [3] **B** : छिन्ने भिन्ने

[4] **A, B** : तु पुण्याहं pour प्रकुर्वीत

[5] cf. *Aṃśumadāgama* 37, 340b-343a et 471-472a:
पिण्डिकाचलिते भिन्ने विश्लिष्टे बन्धनादिके । स्त्रीनाशः स्याद्गवां नाशः सुस्थितं कारयेद्बुधः ॥
विधिना बन्धनं कृत्वा संप्रोक्षणमथाचरेत् । लिङ्गे बेरे च चलिते भिन्ने च स्फुटिते तथा ॥
नृपस्य मरणं शीघ्रं दुर्भिक्षं जायते भुवि । अनुकर्मविधानोक्तमार्गेण स्थापयेन्नवम् ॥
लिङ्गे वा प्रतिमायां वा अग्निना दूषिते सति । तद्ग्रामेऽग्निभयं चैव राजा दुर्जयमाप्नुयात् ॥
गव्येन स्नापयेच्छम्भुं स्नपनं पञ्चविंशतिः ॥

cf. *Kāraṇāgama* 144, 24-26:
पिण्डिकाचलिते चैव[विश्लिष्टे ब]न्धनादिभिः । जायानां नाशनं प्रोक्तं सुस्थितां पिण्डिकां कुरु ॥
विधिना कारयेदष्टबन्धनं देशिकोत्तमः । लिङ्गे च चलिते बेरे स्फुटिते च प्रजापते ॥
नृपस्य मरणं शीघ्रं दुर्भिक्षं जायते भुवि । जीर्णोद्धारणमार्गेणाप्युद्धृत्य स्थापयेन्नवम् ॥

cf. *Makuṭāgama* 6, 95b-97a:
लिङ्गं तु स्फुटितं भिन्नं भग्नं छिन्नं तथैव हि । दग्धं जीर्णं परित्यज्य स्थापयेत्तु नवीकृतम् ॥
स्नपनं तत्र कुर्वीत यथाविभवविस्तृतम् । सर्वदोषप्रशान्त्यर्थं नाममन्त्रं शतं जपेत् ॥

cf. *Vīrāgama* 53, 12b-13:
लिङ्गं वा पीठमेवं वा स्फुटितं दग्धमेव वा । बालस्थानं प्रकर्तव्यं पूजां कुर्वीत देशिकः ॥
व्यपोह्यैव तु तल्लिङ्गं स्थापयेन्नवलिङ्गकम् ॥

[चण्डालार्तवादिस्पर्शे[1]]

[2]चण्डालैर्वार्तवैर्वापि [3]स्पृष्टं लिङ्गादि सद्म वा ॥ ११ ॥

[4]विसृज्याशेष[5]मृत्पात्रं शकृदालेपनं[6] कुरु । [7]कुशाद्भिश्चैव गव्यैश्च प्रोक्ष्य पुण्याहमाचरेत् ॥ १२ ॥

---

[6] A : दहित्वे न तु लेपि तु [7] A : प्रारद्रवैः ; B : प्रारद्रव्यं

[8] A : प्रागिवै pour प्रागिव : C, F : प्रागिवत्

[9] cf. *Kāmikāgama* II 30, 392b-397a:

परिवारविहीने तु भृत्यवर्गस्य नाशनम् । परिवारं समापाद्य प्रतिष्ठां कारयेत्ततः ॥
बलिपीठविहीने तु सर्वदोषावहो भवेत् । संकल्प्य पूर्ववत्पीठं ततस्तत्स्थापनं नयेत् ॥
तज्जीर्णे स्फोटिते दाहे पतनादौ सति द्विजाः । शान्तिहोमं तदा कृत्वा संप्रोक्षणमथाचरेत् ॥
प्राकारे गोपुरे जीर्णे पतिते स्फोटनादिके । राज्ञो भयंकरं प्रोक्तं शान्तिहोमं तदा नयेत् ॥
ततः संप्रोक्षणं कुर्यात्संधानं स्फोटनादिषु । कृत्वा गव्येन संप्रोक्ष्य शान्तिमेकाहमाचरेत् ॥

cf. *Kāraṇāgama* I 144, 54b-55:

बलिपीठविहीने च गोनाशो भवति ध्रुवम् । पूर्ववत्कल्पयेत्पीठं स्थापयेद्विधिना ततः ॥
स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः ॥

cf. *Virāgama* 52, 66:

बाह्यपीठविहीने तु स्नपनं तत्र कारयेत् । शिल्पिना कारयेत्पीठं स्थापयेल्लक्षणैर्युतम् ॥

cf. *Santānasaṃhitā* 56, 72:

बाह्यपीठविहीने तु शिल्पिना कारयेत्ततः । स्नपनं च तथा कार्यं पूर्वोक्तविधिना सह ॥

[10] B : सं pour तु [11] A : स्नापनं [12] C : स्नाप्य pour स्थाप्य

[1] cf. *Kāmikāgama* II 30, 401-411a:

शिल्पिभिः पाणचण्डालरजकाद्यैरथापि वा । स्पृष्टे पीठेऽथ लिङ्गे वा बेरादौ तत्र वासिनः ।
राष्टे शत्रुजनैर्मर्त्याः पीड्यन्ते सर्व एव ते । मृद्भाण्डांस्तु त्यजेदेतैः स्पृष्टानासन्नकानपि ॥
गोमयालेपनं कृत्वा पुण्याहं च गुरूत्तमः । गव्येन स्नपनं कृत्वा संप्रोक्षणमथाचरेत् ॥
ऋतुस्त्रीपातकाशौचकारुकैः स्पर्शिते सति । शान्तिहोमादिकं कार्यं प्रागुक्तं रजकैरपि ॥
चण्डालपाणकाद्यैश्चेच्छान्तिकर्माधिकं नयेत् । गर्भगेहे प्रविष्टे तु स्नपनं शान्तिहोमयुक् ॥
संप्रोक्षणं विना कुर्यात्किपिकुक्कुटकादिभिः । ऋतुस्त्रीपातकाद्यैश्चेत्प्रविष्टं गर्भगेहकम् ॥
तदा संप्रोक्षणं कुर्यात्केवलं प्राक् प्रचोदितम् । चण्डालरजकाद्यैश्चेच्छान्तिहोमसमायुतम् ॥
संप्रोक्षणं विधातव्यं क्रमादेवं त्रिधा मतम् । शान्तिकर्म दिशाहोमं क्रमात्संप्रोक्षणं नयेत् ॥
त्रिःप्रकारैः क्रमादर्धमण्टपस्य प्रवेशने । प्रथमेन द्वितीये च चण्डालविहितं तु यत् ॥
प्रायश्चित्तमृतुस्त्रीणां स्पर्शनादौ विधीयताम् । प्रतिमामण्टपावेशे त्रिप्रकारैः क्रमेण वै ॥
शान्तिहोमं च मूर्त्यर्थं दिशाहोमं क्रमान्नयेत् ॥

cf. *Kāraṇāgama* I 144, 59-62 et 80-83a:

लिङ्गे वा प्रतिमे स्पृष्टे ऋतुस्त्रीभेकतस्करैः । गर्भगेहप्रविष्टे वा जनानां नाशनं भवेत् ॥
मृद्भाण्डानि विसृज्याथ गोमयेनोपलेपयेत् । पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः ॥
स्नपनं कारयेत्पश्चाल्लिङ्गपत्रेण घर्षयेत् । मूर्तिहोमं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ॥

मूर्तिहोमं ततः कृत्वा ततः स्नपनमाचरेत ।

[अर्चनादिहीने[1]]

एकमासार्चने हीने नैवेद्याङ्गविहीनके ॥ १३ ॥

अन्तर्मण्डलशालादिरभिस्पृष्टो विशेषतः । संप्रोक्ष्य पञ्चगव्येन पुण्याहं वाचयेत्ततः ॥
विलोमैः संकरैरन्यैः स्पृष्टे लिङ्गे च पीठके । प्रविष्टे गर्भगेहे वा महामारीप्रकोपनम् ॥
धावत्येव नृपोऽन्यत्र राष्ट्रं चापि विनश्यति । मृद्भाण्डानि विसृज्याथ पञ्चशुद्धिकमाचजेत् ॥
गोमयेनोपलिप्याथ पुण्याहं वाचयेत्क्रमात् । स्नपनं कारयेत्तत्र मूर्तिहोमं ततः कुरु ॥
प्रागुदीरितमार्गेण संप्रोक्षणमथाचरेत् ॥

cf. *Makuṭāgama* 6, 16-17a:
स्त्रीशूद्रस्पर्शने चैव चण्डालस्पर्शनेऽपि च । स्नपनं पञ्चविंशत्तु शिवमन्त्रं शतं हुनेत् ॥
पुण्याहं वाचयेत्तत्र भक्त्या चैव प्रपूजयेत् ॥

cf. *Virāgama* 52, 81-83a:
लिङ्गे वा कौतुके वापि समीपे ऋतुसंभवे । प्राकारे गोपुरे चैव पञ्चगव्येन शुध्यति ॥
पुण्याहं वाचयेत्तत्र शान्तिहोमं तु कारयेत् । स्नपनं तत्र कर्तव्यं तद्दोषशमनाय च ॥
स्पृशेद्वापि तु विपेन्द्र जलसंप्रोक्षणं कुरु ॥

cf. *Santānasaṃhitā* 56, 32a: चण्डालस्पर्शने लिङ्गे जलसंप्रोक्षणं भवेत् ।

[2] A : चण्डालैर्वाक्तिपैर्वापि ; B : चण्डालैर्वार्तिपैर्वापि
[3] A : स्पृष्टे pour स्पृष्टं ; B : स्पृष्ट C : स्पृशेत्
[4] A : प्र pour वि [5] B : शेष pour अशेष [6] B : आप्लावनं pour आलेपनं
[7] E : कुशमृद्भिश्च

[1] pour अर्चनाहीने voir *Kāmika* II 30, 203b-205a:
दिनानि यानि हीनानि पूजया नित्यसंज्ञया । तदहःसंख्यया कुर्यात्प्रायश्चित्तं पुरोदितम् ॥
एकमासावधिर्यावत्ततः संप्रोक्षणं नयेत् । नान्यथा देवदेवस्य संनिधिं द्विजसत्तमाः ॥

cf. *Kāraṇāgama* I 144, 93a et 96:
स्थानभ्रंशो भवेद्राज्ञो नित्यपूजाविहीनके ।.....अहोरात्रविहीने तु स्नपनं शान्तिहोमयुक् ॥
मासादूर्ध्वविहीने तु जलसंप्रोक्षणं कुरु ॥

cf. *Makuṭāgama* 5, 9b-10a:
पूजाहानौ तु मासान्तं कलशानां शतत्रयम् । हृन्मन्त्रेण शतं हुत्वा क्षीरान्नं च निवेदयेत् ॥

cf *Virāgama* 52, 35b et 38b-39a:
नित्यार्चनाविहीने तु शान्तिहोमं तु कारयेत् । .....दिशाहोमं चार्धमासे स्नपनं चैव कारयेत् ॥
इत ऊर्ध्वं तु मासे स्याज्जलसंप्रोक्षणं कुरु ॥

cf. *Santānasaṃhitā* 56, 47b-49:
नित्यार्चनविहीने तु प्रायश्चित्तं शृणु प्रिये । स्थिरलिङ्गार्चनाहीने स्नपनं तत्र कारयेत् ॥
सप्तरात्रात्परं देवि जलसंप्रोक्षणं भवेत् । चललिङ्गेऽर्चनाहीने द्विगुणं पूजयेत्ततः ॥
मासादुपरि हीने तु स्नपनं तत्र कारयेत् ॥

गन्धद्रव्यादिहीने च द्विगुण प्रतिसन्धिकम् । सन्धिदीपविहीने तु द्विगुणं दीपमाचरेत् ॥ १४

---

cf. *Suprabhedāgama* I 55, 6a: पूजाहीने तु मासान्तं त्रिशतैः कलशैः पुनः ।

pour नैवेद्याङ्गहीने vior *Kāraṇa* I 144, 160b- 163a:
नैवेद्ये च विहीने तु मूकत्वं च प्रवर्तते । वर्षहीनं भवेल्लोके पञ्चाशत्कलशैर्यजेत् ॥
मूलेन शट्शतं जप्त्वा प्रभूतहविषं ददेत् । उपदंशघृतापूपसूपहीनं निवेदिते ॥
तद्ग्रासस्य क्षयः प्रोक्तः षोडशैः कलशैर्यजेत् । अघोरं द्विशतं जप्त्वा सोपदंशं निवेदयेत् ॥

cf. *Makuṭāgama* 6, 38:
नैवेद्यादिविहीने च दुर्भिक्षं जायते ध्रुवम् । मूर्तिहोमं ततः कृत्वा मूलमन्त्रं शतं हुनेत् ॥

cf. *Virāgama* 52, 42a et 84b-85a:
नैवेद्ये च विहीने तु द्विगुणं च निवेदयेत् ।.....उपदंशादिविच्छिन्ने पुण्याहं वाचयेत्ततः ।
उपदंशं पुनर्दद्याद्''

cf. *Santānasaṃhitā* 56, 5 b: नैवेद्ये च विहीने तु द्विगुणं दापयेच्छिवे ॥

cf. *Suprabhedāgama* I 55, 16b-17a:
नैवेद्ये च विहीने तु द्विगुणं तु निवेदयेत् । हविर्द्रव्यविहीने तु द्विगुणेन तु बुद्धिमान् ॥

cf. *Sūkṣmagama* 62, 27-28a:
नैवेद्ये चोपदंशे च हीने दुर्भिक्षसंभवः । तद्दोषशमनार्थाय स्नापयेत्पञ्चगव्यकैः ॥
ईशमन्त्रं शतं जप्त्वा तद्द्रव्यं द्विगुणं ददेत् ॥

pour गन्धादिद्रव्यहीने voir *Aṃśumadāgama* 37, 185b-186a:
गन्धपुष्पविहीने च अनावृष्टिर्न संशयः । मूललिङ्गे विशेषेण नवकैरभिषेचयेत् ॥

cf. *Kāraṇāgama* I 144, 128b-130a et 138b-139a:
गन्धद्रव्यविहीने च द्रोणं क्षीराभिषेचनम् । संधित्रयविहीने च शान्तिहोमं च कारयेत् ॥
अहोरात्रविहीने च शान्तिहोमं समाचरेत् । स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः ॥.....
पुष्पार्घ्यधूपहीने चाप्यनावृष्टिर्भविष्यति । मूलमन्त्रं शतं जप्त्वा तद्द्रव्यं द्विगुणं ददेत् ॥ ॥

cf. *Virāgama* 52, 62b-63a:
गन्धपुष्पविहीने तु धूपहीने तथैव च । पुण्याहं कारयेत्तत्र द्विगुणं दापयेत्ततः ॥

cf. *Suprabhedāgama* I 55, 17b: नित्यद्रव्यविहीने तु तदान्ये द्विगुणं चरेत् ॥

Pour सन्धिदीपहीने voir *Kāraṇa* I 144, 148-149a:
संध्यादीपविहीने तु द्विगुणं रोपयेत्ततः । फलं प्रोक्तं तु मन्त्राणां तत्सर्वं निष्फलं भवेत् ॥
शान्तिहोमं ततः कृत्वा मूलमन्त्रं शतं जपेत ॥

Pour नित्यादिदीपहीने voir *Aṃśumadāgama* 37, 319-321:
निर्वाणदीपहीने तु धामश्रीस्त्वन्यथा भवेत् । तद्दोषशमनार्थाय पुनः स्नानं समाचरेत् ॥
एकाहस्य विहीने तु महामारी प्रवर्तते । पुनर्दीपं समारोप्य नवकैरभिषेचयेत् ॥
क्रियादीपविहीने तु तत्क्रिया निष्फला भवेत् । तद्दोषशमनार्थाय बहुरूपं शतं जपेत् ॥

नित्यादिदीपहीने तु त्रिगुणं दीपमाचरेत् । गव्याभिषेचनं कुर्याच्छान्तिहोमं समाचरेत् ॥ १५ ॥

---

cf. *Kāmikāgama* II 30, 243-244a et 298b:

दीपानामथ वैकल्ये जपेदघोरशतत्रयम् । दीपानि द्विगुणं पश्चाद्देवदेवे प्रदापयेत् ॥
रक्षादीपस्य विच्छेदेऽप्येवं द्विगुणजापयुक् ।...सौख्यदीपस्य विच्छेदे घोरेणैकशतं जपेत् ॥

cf. *Kāraṇāgama* I 144, 130b-131a:

सौख्यदीपविहीने च क्षुद्भयं ग्रामवासिनाम् । आरोप्य द्विगुणं दीपमघोरेण शतं जपेत् ॥

ibid. 143b-147:

हीने निर्वाणदीपे तु लोकोन्मत्तं समाचरेत् । एकाहे तु विहीनं स्याद्द्विगुणं रोपयेत्ततः ॥
पञ्चाहे शान्तिहोमं च दशाहे स्नपनं कुरु । अर्धमासे विहीने च स्नपनं शान्तिहोमयुक् ॥
एकमासे विहीने च दुर्भिक्षं जायते ध्रुवम् । स्नपनं मूर्तिहोमं च कारयेत्तु विशेषतः ॥
मासादूर्ध्वविहीने च शान्तिहोमं तु कारयेत् । पवमानं जपित्वाथ मूलेन त्रिशतं जपेत् ॥
स्नपनं कारयित्वाथ वि धना पूजयेच्छिवम् ।

ibid. 149b–154a:

नैवेद्ये दीपहीने च दुर्भिक्षं जायते ध्रुवम् । एकसंध्याविहीने च तद्दीपं द्विगुणं भवेत् ॥
सन्धिद्वयविहीने च कुर्याद्द्रव्याभिषेचनम् । सन्धित्रयविहीने च शान्तिहोम च कारयेत् ॥
अहोरात्रविहीने च स्नपनं कारयेत्ततः । पञ्चाहे स्नपनं कुर्यात्कारयेच्छान्तिहोमकम् ॥
दशाहे स्नपनं गव्यं मूर्तिहोमं तु कारयेत् । एकमासविहीने तु दिशाहोमं तु कारयेत् ॥
स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः । मासादूर्ध्वविहीने तु जलसंप्रोक्षणं कुरु ॥

ibid. 76-77a:

बलिदीपविहीने च लक्ष्मीर्ग्रामाद्गता भवेत् । क्षुरिकाबीजमुख्यैश्च प्रत्येकं तु शतं जपेत् ॥
द्विगुणं दीपमारोप्य बलिशेषं समाचरेत् ॥

cf. *Makuṭāgama* 6, 39:

यागप्रदीपहीने च उन्मादो जायते ध्रुवम् । घोरमन्त्रं शतं जप्त्वा दीपमारोपयेद्ध्रुवम् ॥

ibid. 58-59:

बलिदीपविहीने च लक्ष्मीनाशो भवेद्ध्रुवम् । पञ्चब्रह्मषडङ्गानि प्रत्येकं तु शतं जपेत् ॥
द्विगुणं दीपमारोप्य बलिशेषं समाचरेत् ॥

cf. *Virāgama* 52, 43b 45a:

गर्भगेहे दीपहीने पुण्याहं तत्र कारयेत् । दीपं संयोजयेत्तत्र प्रासादेन तु मन्त्रतः ॥
नित्योत्सवे दीपहीने पुण्याहं तत्र कारयेत् । पुनर्दीपं समायोज्य पुनर्नित्योसवं कुरु ॥

cf. *Santānasaṃhitā* 56, 58b-59a:

नित्योत्सवे दीपहीने पुण्याहं वाचयेत्ततः । पुनर्दीपं समाधोज्यमेवं भूतबलौ प्रिये ॥

[मङ्गलास्त्रादिहीने[1]]

मङ्गलास्त्रादिहीने तु कृत्वा तान्स्थापयेद्बुधः[2] । शान्तिहोमं ततः कृत्वा [3]स्नापयेद्दोषशान्तये ॥ १६ ॥

[मङ्गलास्त्रादिपतने[4]]

पतिते मङ्गलास्त्रादौ[5] क्षालयेत्पञ्चगव्यकैः । तन्मन्त्रेण शतं हुत्वा प्रोक्षयेद्धृदयेन तु ॥ १७ ॥

---

[1] cf. *Kāraṇāgama* I 144, 48b-51a:

आयुधानां विहीने च तस्करात्तु भयं भवेत् । दशाक्षरेण मन्त्रेण होमयेच्छतसंख्यया ॥
कृत्वा च लक्षणेनैव प्रोक्षयेत्तु शिवाम्भसा । अष्टमङ्गलहीने च जायानां चैव नाशनम् ॥
शान्तिहोमं ततः कृत्वा कारयेल्लक्षणान्वितम् । पञ्चगव्येन संप्रोक्ष्य स्नापयेद्विधिपूर्वकम् ॥

cf. *Virāgama* 52, 56b-57:

अष्टमङ्गलरूपे वा आयुधे वा विहीनके । तत्तन्मन्त्रेण होतव्यमष्टोत्तरशतं पृथक् ॥
तत्स्वरूपं पुनः कृत्वा प्रोक्षयेत्पूर्ववत्क्रमात् ॥

cf. *Santānasaṃhitā* 56, 62b-63a:

आयुधे च विहीने तु शान्तिहोमं तु कारयेत् । आयुधं शिल्पिना कृत्वा पुण्याहं वाचयेत्ततः ॥

[2] B : ततः pour बुधः [3] A, B : स्थापयेद् pour स्नापयेद्

[4] cf. *Kāmikāgama* II 30, 806:

दशायुधानि वा भूमौ संभूतानि पतन्ति चेत् । निर्वाणानि तदा कुर्याच्छान्तिहोमं जरापहम् ॥

ibid., 809:

शूलास्त्रे पतिते राज्ञो भयं भवति तत्र च । धामादौ वा दिशाशे दस्त्रार्चनान्वितम् ॥

ibid., 825b-826a:

आयुधास्त्रान्वलिङ्गेशवाहने पतिते भुवि । गुरुः शतं जपेद्घोरं द्विगुणं शंकरास्त्रयोः ॥

cf. *Kāraṇāgama* I 144, 67-69 :

शूलास्त्रे पतिते चैव भिन्ने नष्टे तथैव च । तद्ग्रामस्य च राष्ट्रस्य शत्रुभिर्भयमादिशेत् ॥
पतितेऽभिषेचनं कुर्याच्छान्तिहोमं तु कारयेत् । अस्त्रमन्त्रेण मतिमाञ्जुहुयाच्छतसंख्यया ॥
शेषस्थाने बलिं दद्यात्प्रविशेद्यागमण्टपम् ।

ibid., 72b 74a:

आयुधेषु प्रणष्टेषु भिन्नेषु पतितेषु वा । प्रवर्तते महामारी गावो नश्यन्त्यसंशयः ॥
बिन्दूष्णेन तु मन्त्रेण जपेदष्टशतं सुधीः । नष्टे भिन्ने च कर्तव्यं पूर्ववल्लक्षणान्वितम् ॥

cf. *Makuṭāgama* 6, 48-50a:

शूलास्त्रे पतिते चैव छिन्ने नष्टे तथैव च । तद्ग्रामस्य च राष्ट्रस्य शत्रुभिः पीडनं भवेत् ॥
कृत्वाभिषेकं पतिते शान्तिहोमं तु कारयेत् । अस्त्रमन्त्रेण जुहुयाज्जपेत्तु शिवमन्त्रतः ॥
शेषस्थानबलिं दत्त्वा प्रविशेद्यागमण्टपम् ॥

cf. *Santānasaṃhitā* 56, 63b-64a:

प्रमादात्पतितेऽप्यस्त्रे शान्तिहोमं समाचरेत् । स्नपनं तत्र कुर्वीत पूर्वोक्तविधिना सह ॥

cf. *Suprabhedāgama* I 55, 23:

शूलास्त्रं पतितं वापि आयुधं चाष्टमङ्गलम् । शूलस्य स्नपनं तत्र अन्येषां च शताहुतिः ॥

[5] A : आदि pour आदौ

[नित्यकर्मविहीने नित्योत्सवविहीने च[1]]

नित्यकर्मविहीने तु चान्याहे द्विगुणं चरेत् । नित्योत्सवविहीने तु[2] स्नपनं शान्तिहोमकम् ॥ १८ ॥

कृत्वा नित्योत्सवं कुर्यात्सर्वदोषोपशान्तये ।

[स्थलकर्म सुधाकर्म-अष्टबन्धहीने[3]]

स्थलकर्मविहीने तु सुधाकर्मविहीनके[4] ॥ १९ ॥

---

[1] cf. *Kāmikāgama* II 30, 272–277
नित्योत्सवो विहीनश्चेत्सर्वदोषकरो नृणाम् । तदा देवं समभ्यर्च्यार्घोरेणैव शतं हुनेत् ॥
संधित्रयेऽपि हीने तु शान्तिहोमं समाचरेत् । अहोरात्रे विहीने तु स्नपनं कारयेच्छिवे ॥
पश्चाहात्तु तदेव स्यादघोरशतहोमयुक् । दशाहे स्नपनं शान्तिहोमसंयुक्तमाचरेत् ॥
तस्य पक्षकविच्छेदे शान्तिः स्यात्स्नपनेन तु । एकमासान्तरे हीने स्नपनं च दशाहुतिः ॥
शान्तिस्तदूर्ध्वं स्यात्किं तु त्रिदिनं ब्राह्मणोत्तमाः । पक्षान्तरे ततोऽप्यूर्ध्वं यदि निष्कृतिर्ऋक्षकम् ॥
वर्धयेद्युग्मसंख्यातपक्षपक्षावसानकम् । नित्योत्सवश्च कर्तव्यो निष्कृतेरनु देशिकैः ॥
cf. *Kāraṇāgama* I 144, 13-122a:
नित्योत्सवविहीने तु धान्यनाशो भवेद्ध्रुवम् । संध्यैकेन विहीने तु स्नापयेत्पञ्चगव्यकैः ॥
मूलमन्त्रं शतं जप्त्वा चोत्सवं पूर्ववत्कुरु । संधिद्वयविहीने तु शान्तिद्वयं जपेद्गुरुः ॥
एकाहोत्सवहीने च स्नपनं कारयेत्प्रभोः । पञ्चाहे चोत्सवे हीने मूलेनैव शतं हुनेत् ॥
स्नपनं कारयेच्छम्भोः पूजयेद्विधिपूर्वकम् । दशाहे स्नपनं कुर्याच्छान्तिहोमं तु कारयेत् ।
पक्षाहे चोत्सवे हीने मूर्तिहोमं तु कारयेत् । स्नपनं कारयेच्छम्भोः पूजयित्वा विधानतः ॥
मासे नित्योत्सवे हीने विद्याङ्गैर्ब्रह्मपञ्चकैः । मासादूर्ध्वविहीने तु दिशाहोमं तु कारयेत् ।
कृत्वा संपूज्य देवेशं मूलेनैव शतं जपेत् । षण्मासाद्वत्सरान्तं वा नित्योत्सवविहीनकम् ॥
चोरबाधा भवेल्लोके दुर्भिक्षं स्यात्प्रजापते । षडङ्गैर्बीजमुख्यैश्च शिवार्णैश्च दशाक्षरैः ॥
प्रत्येकं त्रिशतं हुत्वा मूलेनैव शतं हुनेत् । तत्संख्यातैर्जपं कुर्यात्स्नपनं कारयेद्विभोः ॥
अष्टोत्तरशतैः कुम्भैः सहस्रकलशैर्यजेत् ॥
cf. *Santānasaṃhitā* 56, 55
नित्योत्सवे विहीने तु स्नपनं तत्र कारयेत् । पुनर्नित्योत्सवं कुर्यात् ''
cf. *Sūkṣmāgama* 62, 33-34:
नित्योत्सवविहीने च परचक्राद्भयं भवेत् । शान्तिहोमं ततः कृत्वा स्नपनैरभिषेचयेत् ॥
त्रियम्बकमनुं जप्त्वा पश्चान्मन्त्रं शतं जपेत् । नित्योत्सवं ततः कृत्वा''

[2] B : च pour तु

[3] cf. *Kāraṇāgama* I 144, 39b-40:
सुधाकर्मविहीने च स्थलकर्मविहीनके । प्रवर्तते महामारी पुनः संधानमाचरेत् ॥
पुण्याहं वाचयेत्पश्चाद्द्रव्यैरेवाभिषेचयेत् ॥
cf. *Kāmikāgama* II 30, 359b 361a:
अष्टबन्धे तु विश्लिष्टे राष्ट्रे शैथिल्यमादिशेत् । अष्टबन्धं त्रिबन्धं वा कृत्वान्ते स्नपनं नयेत् ॥
पुरातनं परित्यज्य शास्त्रेणास्त्रं समुच्चरन् । अघोरेण शतं होमं समिदाज्यतिलौदनैः ॥
cf. *Santānasaṃhitā* 56, 28b et 30:
बन्धहीने तु देवेशि कारयेदष्टबन्धनम् ।.....अष्टबन्धं प्रकर्तव्यं जलसंप्रोक्षणं ततः ॥
शिवेन लिङ्गं स्पृष्ट्वा च जलसंप्रोक्षणं कुरु ॥

[4] A : विहीनकम् pour विहीनके

[1]अष्टबन्धविहीने च [2]विश्लिष्टे [3]बन्धनादिके । [4]सुश्लिष्टं शीघ्रतः कुर्यात्संप्रोक्षणमथाचरेत् ॥ २० ॥

[संवत्सरोत्सवहीने[5]]

संवत्सरोत्सवे[6] हीने मूर्तिहोमं समाचरेत् । [7]ततस्त्वपरमासे [8]तु प्राग्दिने चोत्सवं कुरु ॥ २१ ॥

[9]अपरपक्षं च वर्ज्येत्तु पूर्ववत्सर्वमाचरेत् ।

[ध्वजदण्डस्य पीठस्य वा छेदादौ[10]]

ध्वजदण्डे तु पीठे वा छिन्ने भिन्नादिसंभवे ॥ २२ ॥

शीघ्रं पूर्ववदापाद्य [11]स्थापनं तु समाचरेत् । [12]पुण्याहप्रोक्षणं कृत्वा स्नपनं शान्तिहोमकम् ॥ २३ ॥

[बलिदान-परिवेष-नीराजन-तीर्थसंग्रह-तीर्थकार्य-हीनेषु[13]]

[14]बलिदानविहीने तु परिवेषविहीनके । [15]नीराजनविहीने तु तीर्थसंग्रहहीनके ॥ २४ ॥

स्नपनं शान्तिहोमं च कृत्वा सर्वं समाचरेत् । तीर्थर्क्षे तीर्थकार्ये[16] तु हीने निष्फलमादिशेत् [17]॥ २५ ॥

[18]ततस्त्वपरमासे तु [19]पुनरुत्सवमाचरेत् । [20]अत्रानुक्तं तु यत्सर्वं शान्तिहोमेन शाम्यति ॥ २६ ॥

[अद्भुतशान्तिः[21]]

[22]लिङ्गे वा प्रतिमायां वा स्वेदे वा रोदने सति । [23]वल्मीकमृदि सत्यां चेद्रक्तकन्याप्रदर्शने ॥ २७ ॥

[24]प्रासादे च मरुद्भिन्ने [25]पीठे सरीसृपोद्भवे । [26]उलूकपिङ्गलकापोतगर्भगेहप्रवेशने ॥ २८ ॥

---

[1] A : अष्टबन्धनहीने च [2] C : विस्पष्टे [3] A, C : बन्धनादयः [4] A : सुश्लिष्टा pour सुश्लिष्टं

[5] cf. *Aṃśumadāgama* 37, 352-353a:
अब्दोत्सवविहीने च राष्ट्रे कल्याणनाशनम् । तद्दोषशमनार्थाय स्नपनं कारयेद्बुधः॥
तत्संख्यातदिनान्तं तु लब्धमासे तु कारयेत् ॥

[6] B : उत्सव pour उत्सवे [7] A : ततः स्वपर pour ततस्त्वपर ; C, F : ततः संभव

[8] B : च pour तु [9] A : अपरपक्षात् पश्चात् ; B : अपरे पश्चात् पक्षात् ; C : अपरपक्षं च वर्ज्येष्ट

[10] cf. *Kāraṇāgama* I 144, 26b-29a:
ध्वजदण्डादिके हीने ध्वजवेदिविहीनके । परचक्राद्भयं भूमौ शिल्पिनं हन्ति देशिकम् ॥
पुनः सलक्षणं दण्डं स्थाप्य शान्तिद्वयं जपेत् । सर्वलक्षणसंयुक्तां वेदिं संकल्प्य पूजयेत् ॥
ध्वजदण्डे तु विच्छिन्ने परचक्राद्भयं भवेत् । शान्तिहोमं ततः कृत्वा पुनः संधानमाचरेत् ॥

cf. *Suprabhedāgama* I 55, 19-20:
ध्वजस्य ध्वजदण्डस्य घण्टायास्तु विशेषतः । भिन्ने छिन्ने च पतिते चोरग्रस्तादिसंभवे ॥
कृत्वा तत्पूर्ववत्सर्वं पुनरुत्थापनं कुरु । हृदयेन शतं हुत्वा स्नापयेत्पञ्चगव्यकैः ॥

[11] A : स्नापनं pour स्थापनं [12] A : पुण्याहं प्रोक्षणं

[13] Pour बलिदानविहीने voir *Kāmika* II 30, 798-800:
बलिदाने विहीने च क्षुद्बाधा जायते नृणाम् । मूर्तिहोमं ततः कृत्वा यानान्ते वा बलिं नयेत् ॥
देवालये बलिहीनो यदाघोरशतं जपेत् । यस्यां दिशि बलिर्हीनो ग्रामादौ संहिताहुतिम् ॥

तत्तद्दिशापतेर्मन्त्रशतैर्जपसमन्वितम् । विधाय यागकाले वा तदन्ते वा बलिं नयेत् ॥

cf. *Kāraṇāgama* I 144, 63b-64:
बलिदानविहीने च क्षुद्बाधा जायते नृणाम् । मूर्तिहोमं ततः कृत्वा प्रभूतहविषा हुनेत् ॥
बलिद्रव्यं समापाद्य बलिदानं समाचरेत् ॥

cf. *Makuṭāgama* 6, 11b-15:
बलिहानौ तु संध्यायामन्यत्र द्विगुणं चरेत् । द्विसंध्यं बलिहानौ तु द्विगुणं चान्यसंधिषु ॥
त्रिसंध्यं बलिहानौ तु कर्ता स्नपनमाचरेत् । द्व्यहादारभ्य मासान्तं बलिविच्छेदनं यदि ॥
शिवाग्निं पूर्ववत्कृत्वा स्नपनं तु शताष्टकम् । मासोर्ध्वं बलिहानौ तु शिवाग्निं पूजयेत्क्रमात् ॥
सहस्राज्याहुतिं हुत्वा शिवमन्त्रेण देशिकः । अष्टोत्तरशतैरेव कलशैः स्नपनं चरेत् ॥
भारद्वयं तु नैवेद्यमेकाहोत्सवमाचरेत् ॥

cf. *Virāgama* 52, 52-53:
बलिकर्मविहीने तु स्नपनं दिवसे तथा । पक्षाहे बलिहीने तु दिशाहोमं तु कारयेत् ॥
पुनर्बलिक्रमं कुर्यात्पूर्वोक्तविधिना सह । बलिद्रव्यविहीने तु द्विगुणं च प्रयोजयेत् ॥

cf. *Santānasaṃhitā* 56 , 60b-61:
बलिहीने तु देविशि शान्तिहोमं तु कारयेत् । पुनर्बलिभ्रमं कुर्यात्पूर्वोक्तविधिना सह ॥
बलिद्रव्यविहीने तु द्विगुणं योजयेत्ततः ॥

cf. *Suprabhedāgama* I 55, 7b-11:
संध्यायां बलिहीने तु रुद्रमन्त्रं शतं जपेत् । द्विसंध्यं बलिहीने तु शताध्यर्धं जपेद्गुरुः ॥
त्रिसंध्यं बलिहीने च स्नपनं कारयेत्ततः । द्वियहादि च मासान्तं बलिविच्छेदकर्मणि ॥
शिवाग्निं पूर्ववद्धत्वा स्नपनं तु शताष्टकम् । बलौ मासोर्ध्वहीने तु शिवाग्नौ तत्र बुद्धिमान् ॥
सहस्राज्याहुतिं चाङ्गैः शिवेनैव तु देशिकः । अष्टोत्तरशतैः कुम्भैः स्नपनं कारयेद्गुरुः ॥
नित्योत्सवं पुनः कुर्यात्पूर्ववच्च विशेषतः ॥

Pour परिवेषविहीने voir *Kāraṇa* I 144, 92:
परिवेषविहीने च लोकोन्मत्तं समादिशेत् । शिवमन्त्रं शतं जप्त्वा व्योमव्यापि तथैव च ॥

cf *Makuṭāgama* 6, 73:
परिवेषक्रमे हीने लोकस्याज्ञानमादिशेत् । शिवमन्त्रं शतं हुत्वा व्योमव्यापिशतं जपेत् ॥

Pour नीराजनविहीने voir *Kāmikāgama* II 30, 301-302:
नीराजने तदङ्गे वा हीनेऽग्निभयमादिशेत् । देवं संस्नाप्य गव्येन समभ्यर्च्यादराद्गुरुः ॥
द्विगुणं तु नयेत्पश्चाद्यानि हीनानि तानि च । शान्तिहोमस्तु वा कार्यो मूर्तिहोमोऽथवा मतः ॥

cf. *Kāraṇāgama* I 144, 93-94a:
नीराजनविहीने तु वह्निना तु भयं भवेत् । महेश्वरस्य बीजेन शतं जप्त्वा विशेषतः ॥
नीराजनं ततः कुर्यात्पूर्वोक्तविधिना सह ॥

cf. *Makuṭāgama* 6, 74-75a:
नीराजनविहीने तु पावकेन भयं भवेत् । मूलप्रकृतिबीजं तु शतं जप्त्वा विशेषतः ॥
नीराजनं ततः कुर्यात्पूर्वोक्तविधिना सह ॥

Pour तीर्थहीने voir *Sakalāgamaprāyaścitta* ,p. 85:

तीर्थाङ्कुरविहीने च तीर्थसंग्रहहीनके । अनावृष्टिर्भवेल्लोके मूर्तिहोमं समाचरेत् ॥
महातीर्थदिने गौरि सद्यः सर्वं समाचरेत् ॥

ibid., p. 134:

प्रतिसंवत्सरं मासं तिथिं निश्चित्य ऋक्षकम् । प्रारब्धेऽप्युत्सवे हीने तदन्यत्र कृते सति ॥
तद्ग्रामस्य क्षयः प्रोक्तस्तद्दोषशमनाय च । मूर्तिहोमं ततः कृत्वा स्नपनं कारयेत्प्रभोः ॥
पुनरुत्सवमारभ्य पूर्ववत्सर्वमाचरेत् । यथेष्टमासेऽप्यथ वा प्रारभेदुत्सवं ततः ॥.....
अनुक्तं यद्भवेत्किंचिच्छान्तिहोमेन शाम्यति ॥

cf. *Kāmikāgama* II 30 347:

महातीर्थे विलुप्ते स्यात्स यागो निष्फलो द्विजाः । शान्तिं कृत्वा तदर्थं तु तीर्थकार्यं ततो नयेत् ॥

14 A : चलितेऽथ विहीने तु ; C : बलिधानविहीने तु ; E : चलिधानविहीने तु ; F : बलिनैवेद्यहीने तु

15 C : नीराञ्जन pour नीराजन 16 A : कार्यं pour कार्ये 17 C, F : आविशेत् pour आदिशेत्

18 C : ततः स्वपर pour ततस्त्वपर 19 C : पूर्ववत्सर्वमाचरेत्

20 A : कर्त्तानुकं pour अत्रानुक्तं ; B : कर्त्रनुगं ; C, F : कर्त्तानुक्तं

21 cf. *Suprabhedāgama* I 55, 48b.63a:

अथाद्भुतानां शान्तिं तु वक्ष्ये दोषविनाशिनीम् । सर्वं विवर्णं संप्राप्ते प्रतिमारोदनेऽपि च ॥
ज्वरमारिसमुत्पन्ने रोगस्फोटादिसंभवे । नवप्रासादपतने चैत्यवृक्षस्य पातने ॥
एवमादिसमुत्पन्ने ग्रामादीनां च दोषकम् । तद्दोषशमनार्थं तु त्रिसप्ताहं तु शान्तिकम् ॥
भूमिकम्पे दिशां दाहे प्रतिसूर्यप्रदर्शने । दिवा नक्षत्र उत्पन्ने रात्राविन्द्रधनुस्थिते ॥
दुर्भिक्षं शत्रुवर्धनं राजराष्ट्रभयंकरः । मासपूर्णं तथा शान्तिं कुर्याद्दोषनिवृत्तये ॥
प्रासादमण्टपाद्येषु वल्मीकं यत्र दृश्यते । रक्तकन्यासमुत्पन्ने प्रासादे मधुसंश्रिते ॥
प्रविष्टे पिपीलिकोलूके प्रासादाभ्यन्तरे तथा । तत्प्रदेशं खनित्वा तु पूरयेच्छुद्धपांसुभिः ॥
पञ्चगव्येन संप्रोक्ष्य पुनः शान्तिं तु कारयेत् । शान्तिं संक्षेपतो वक्ष्ये शृणु तत्त्वं गजानन ।
हविषं द्विगुणं कृत्वा दीपैः पुष्पैर्विशेषतः । शीतकुम्भं तु विधिना शिवस्योर्ध्वं निधापयेत् ॥
दिशाहोमं ततः कृत्वा मूर्तिहोमं विशेषतः । चतुर्दिक्षु चतुर्वेदैः पूर्वमध्यापनं तथा ॥
यथावत्स्नपनं नित्यं तथा वित्तानुसारतः । घृतं क्षीरं यथाशक्ति अभिषिञ्चेत्तु नित्यशः ॥
नालिकेरस्य सलिलैरभिषेकं समाचरेत् । तदन्ते रात्रिचूर्णं तु लिङ्गमुद्वर्त्य शोधयेत् ॥
प्रभूतहविषं नित्यं तदन्ते द्विगुणं घृतम् । एवं शान्तिस्तु तत्प्रोक्तं सर्वारिष्टविनाशनम् ॥
शान्तिरेवं कृतं यत्र धनधान्याभिवर्धनम् । अनुक्तानां तु सर्वेषां विदित्वा गुरुलाघवम् ॥
उक्तैरेवं प्रकारैस्तु प्रायश्चित्तानि कारयेत् । शान्तिहोमं गुरुः कुर्याच्छेषाणां तु यथोक्तः ॥

Pour प्रतिमारोदने स्वेदे voir *Kāmika* II 31, 9b-11:

प्रतिमारोदने स्वेदे नृपस्य मृतिमादिशेत् । सर्वेषां प्राणिनां नाशं सद्यः कुर्यात्प्रतिक्रियाम् ॥
कृत्वा तु प्रतिमाशुद्धिं श्रेष्ठां शान्तिं समाचरेत् । शान्तिहोमं च विप्राणां भोजनं नित्यमाचरेत् ॥
तदन्ते चोत्सवं कुर्याद्यथावित्तं मुनीश्वराः ॥

cf. *Sūkṣmāgama* 60, 38b-41a:

प्रतिमारोदने चैव गोनाशः सस्यनाशनम् । तन्मण्डलाधिपो राजा ग्रामराष्ट्रं विनश्यति ॥

कृत्वा तु प्रतिमाशुद्धिं संप्रेक्षणमथाचरेत् । पक्षं पक्षद्वयं वापि समिद्भिः शान्तिहोमकम् ॥
स्नपनं कारयेन्नित्यं दिशाहोमसमन्वितम् । ब्राह्मणान्भोजयेन्नित्यं प्रदीनांश्चैव भोजयेत् ॥

Pour वल्मीकसंभवे voir *Aṃśumadāgama* 37, 442b-446:

अन्तर्मण्डलसालादौ मालिकामण्टपे ततः । परिवारालये चैव केवलं गोपुरालये ॥
आस्थानमण्टपे चास्मिन्गृहे वा नृपवेश्मनि । पचनालयेऽथ चुल्ल्यां वा वल्मीके समुपस्थिते ॥
परचक्राद्भयं राज्ये तद्ग्रामश्च विनश्यति । मूर्तिहोमं ततः कृत्वा नवकैरभिषेचयेत् ॥
गर्भार्धमण्टपे चैव महामण्टप एव च । वल्मीकं यदि संदृष्टं तद्राष्ट्रे कलहो भवेत् ॥

तद्दोषशमनार्थाय स्नपनं पञ्चविंशतिः ॥

cf. *Virāgama* 87, 45:

वल्मीके तु समुत्पन्ने प्रासादे मधुकृद्भवे । व्यपोह्य सकलं तत्र दिशाहोमं तु कारयेत् ॥

Pour उलूकादिप्रवेशे voir *Aṃśumad* 37, 602b-605a:

उलूकगृध्रकाकादिगर्भगेहप्रवेशने । तद्ग्रामवासिनां चैव भूपतीनां तु नाशनम् ॥
लिङ्गशुद्धिक्रमेणैव कुर्याद्द्रव्याभिषेचनम् । स्नपनं कारयित्वा तु शान्तिहोमं तु कारयेत् ।
कपोतैः पिङ्गलैश्चैव गर्भगेहप्रवेशने । तद्राष्ट्रनाशनं चैव भूपतीनां तु नाशनम् ॥
लिङ्गशुद्धिक्रमेणैव कुर्याद्द्रव्याभिषेचनम् । स्नपनं कारयित्वा तु मूर्तिहोमं तु कारयेत् ॥

cf. *Sūkṣmāgama* 60, 147-149a:

गोमायुः पिङ्गलो गृध्र उलूकश्चैव वायसः । आलयान्तः प्रविष्टश्चेन्नृपवेश्मान्तरेऽपि वा ॥
बालानां स्त्रीगणानां च नाशमेव समादिशेत् । शीतकुम्भं ततः कृत्वा शान्तिहोमं समाचरेत् ॥
ब्राह्मणान्भोजयित्वा तु तदन्ते स्नपनं कुरु ॥

Pour दिवा तारकदृष्टौ voir *Virāgama* 87, 46:

दिवा नक्षत्रदर्शे तु सहस्रकलशं ततः । स्नापयेद्देवदेवेशं महाहविर्निवेदयेत् ॥

Pour प्रतिसूर्यप्रदर्शने voir *Kāmika* II 31, 74b-75:

प्रतिसूर्योदये वापि प्रतिचन्द्रप्रदर्शने । जायते भूपतस्त्वन्यो यत्र राष्ट्रे भवेदिदम् ॥
नवाहाद्येकरात्रान्तं शान्तिमिष्टां समाचरेत् ॥

cf. *Sūkṣmāgama* 60, 101b.103:

आदित्योदयकाले तु प्रतिसूर्यस्य दर्शने । परचक्राद्भयं भूमौ ज्वरग्रस्ता नरास्तथा ॥
अश्वत्थसमिधा चैव शान्तिहोमं तु कारयेत् । तदन्ते स्नपनं कुर्यात्पूजयेत्तु विशेषतः ॥
प्रभूतहविषं दत्त्वा एवं सप्ताहमाचरेत् ॥

Pour अनावृष्टौ voir *Sūkṣma* 60, 128-129:

अनावृष्टिसमुत्पन्ने गोनाशः सस्यनाशनम् । समिधा खादिरेणैव शान्तिहोमं तु कारयेत् ॥
क्षीराभिषेचनं कृत्वा तदन्ते स्नपनं कुरु । कुर्यादेवं तु सप्ताहं शीतकुम्भं ततः कुरु ॥

Pour रात्राविन्द्रधनुर्दृष्टौ voir *Kāmika* II 31, 76-78a;

रात्राविन्द्रधनुर्दृष्टे परचक्राद्भयं भवेत् । शुक्रादिकग्रहं त्यक्त्वा दिवा तारकदर्शने ॥
अनावृष्टिर्ध्रुवं लोके ग्रहनक्षत्रपातने । वाहनानां भयं विद्यात्तदर्थं शान्तिमाचरेत् ॥
नवाहाद्येकरात्रान्तं विभवस्यानुरूपतः ॥

दिवा तारकदृष्टौ च प्रतिसूर्यप्रदर्शने । ज्वरे जनपदव्याधौ [1]त्वनावृष्टौ स्वकालके ॥२९॥
रात्राविन्द्रधनुर्दृष्टौ [2]पाषाणपांसुवर्षके । घृतासृगादिवर्षे च वृक्षादन्यफलोद्भवे ॥ ३०॥
वृक्षाज्जलादिस्रावे [3]च प्रासादेऽशनिपातने । [4]पुण्याहप्रोक्षणं कृत्वा [5]विशेषात्तु हरं यजेत् ॥ ३१ ॥
पञ्चब्रह्मशिवाङ्गैश्च गव्यैः कृत्वाभिषेचनम् । दिशाहोमस्तु कर्तव्य एकमासमतन्द्रितः ॥ ३२ ॥
मूर्तिहोमं ततः कृत्वा शान्तिहोममनन्तरम्[6] । [7]अत्रानुक्ताद्भुतानां तु शान्त्यर्थं मूर्तिहोमकः ॥ ३३ ॥
अनुक्ते [8]नित्यकार्ये तु स्नपनं शान्तिहोमकः ।

---

cf. *Virāgama* 87, 30:
पुच्छनक्षत्रसंदर्शे रात्राविन्द्रधनुर्युते । महामारीप्रवृत्ते तु स्नपनं तु सहस्रकम् ॥

cf. *Sūkṣmāgama* **63, 104-106:**
रात्राविन्द्रधनुर्दृष्टावह्नि नक्षत्रदर्शने । ग्रहनक्षत्रपाते च अनावृष्टिर्न संशयः ॥
ज्वरग्रस्ता नराः सर्वे वाहनानां क्षयो भवेत् । पूजयित्वा शिवं तत्र महास्नपनमाचरेत् ॥
शान्तिहोमं ततः कुर्यादश्वत्थसमिधा ततः । एवं कृत्वा तु सप्ताहं तदन्ते चोत्सवं कुरु ॥

Pour घृतासृगादिवर्षे voir *Kāmika* II 31, 15-17a:
मधुक्षीराज्यवृष्ट्यादौ राष्ट्रक्षोभं समादिशेत् । मृत्तैलाश्मासृगाद्यैर्वा वर्षा चेत्तु तदेव हि ॥
तद्द्रव्यैः स्नपनं कुर्याद्भूमिकम्पोक्तमार्गतः । विशेषाच्छिवमभ्यर्च्य भूरिनैवेद्यसंयुतम् ॥
शैवान्संभोजयेत्पश्चादेवं सप्ताहमाचरेत् ॥

Pour वृक्षादन्यफलोद्भवे voir *Sūkṣmāgama* 60. 55b-59:
वृक्षे स्थानान्तरं प्राप्ते वृक्षे वान्यफलोद्भवे । तदन्यकुसुमोत्पन्ने रसगन्धान्यसंभवे ॥
मर्त्यानां चैव सर्वेषां दुःखं तद्राष्ट्रवासिनाम् । तज्जातिवृक्षं संस्थाप्य पूर्वस्थाने विशेषतः ॥
शान्तिहोमं ततः कुर्यान्मयूरसमिधा सह । शिवं संपूज्य विधिवत्सप्ताहं स्नपनं कुरु ॥
क्षीराभिषेचनं कृत्वा वास्तुदेवं प्रपूजयेत् । तत्तत्फलानि सर्वाणि पुष्पैः सर्वैर्यजेच्छिवम् ॥
सर्वगन्धसमायुक्तं पूजयेत्तु विशेषतः ॥

Pour प्रासादेऽशनिपातने[E] voir *Kāmika* II 31, 52b-59:
लिङ्गे वेरे विमाने वा मण्टपे गोपुरादिषु । परिवारालये साले देवेशास्थानमण्टपे ॥
सभास्वशनिपाते च राज्ञो व्याधिं समादिशेत् । नवप्रकारे मार्गेण क्रमाच्छान्तिं समाचरेत् ॥
तत्र लिङ्गे च पीठे च बेरे वायं विधिर्भवेत् । दिशाहोमं ततः कृत्वा महास्नपनसंयुतम् ॥
अष्टोत्तरशतस्नानयुतं पञ्चामृतान्वितम् । पञ्चगव्यसमोपेतं मधुक्षीरघृतैरपि ॥
सहस्रादिचतुष्प्रान्तैः प्रस्थमानैर्महेश्वरम् । स्नापयित्वार्चयेद्विद्वान्भोजयेच्छान्तिहोमयुक् ॥
एवं कृते तु सप्ताहमन्ते चोत्सवमाचरेत् । प्रासादे सर्वथा भिन्ने प्राग्वदेव मुनीश्वराः ॥
अकस्मात्पतिते वह्नि यदुक्तं तद्दाचरेत् । प्रायश्चित्तं तथैव स्यान्मण्टपादौ शिवाप्रजाः ॥
शैवान्संभोजयेन्नित्यं शिवशास्त्रविशारदान् ॥

[22] A : लिङ्गं वा प्रतिमां वापि स्वेदं वा [23] A : वल्मीकसदसति ; C : वल्मीकं सदसद्
[24] A et B omettent les *śloka* 28 et 29a [25] F : रथे pour पीठे [26] E, F : pour उलूक

[1] A : स्वनावृष्टौ [2] B : पाषाणे pour पाषाण [3] B : तु pour च [4] A : पुण्याहं प्रोक्षणं
[5] C, F : विशेषं तु [6] A : अनन्तरे pour अनन्तरम् [7] A : मन्त्रानुक्तं हितानां तु
[8] A : नित्यकार्येषु

[मूर्तिहोमः[1]]

शिवालये चतुर्दिक्षु [2]चान्यतस्त्वविशेषतः ॥ ३४ ॥
कुण्डं वेदाश्रकं कृत्वा शोधनादींश्च कारयेत् । अग्न्याधानादिकं [3]कुर्यादग्निकार्योक्तमार्गतः ॥ ३५ ॥
[4]समिदाज्यचरुक्षीरं दधिमधुतिलं तथा । सर्षपं लाजसक्तू[5] च यवश्चैकादश स्मृताः ॥ ३६ ॥
हृदादीशानमन्त्रैस्तु प्रत्येकं तु शताहुतिः । स्विष्टमग्नेतिमन्त्रेण [6]पूर्णाहुतिमथाचरेत् ॥ ३७ ॥
[7]मूर्तिहोम इति ख्यातः सर्वदोषनिवारकः[8] ।

[शान्तिहोमः[9]]

आज्यापूपपयो[10]धानाश्चरुश्चैव तु पञ्च च ॥ ३८ ॥

---

[1] cf. *Yogajāgama* 17, 3-7:

"मूर्तिहोममथ शृणु ॥
प्रासादस्य चतुर्दिक्षु अन्तर्मण्टपके बुधः । चतुरश्रं स्थण्डिलं कृत्वा ईशाने वृत्तस्थण्डिलम् ॥
अग्निकार्यक्रमेणैव अग्निमुखं च कल्पयेत् । ईशाने सदाशिवं मन्त्रं पूर्वे तु ईशमन्त्रकम् ॥
दक्षिणे रुद्रमन्त्रं तु पश्चिमे विष्णुमन्त्रकम् । उत्तरे ब्रह्ममन्त्रं तु यथाशक्त्या तु होमयेत् ॥
हविर्निवेदयेत्पश्चात्स्नपनं कारयेच्छिवम् । द्विगुणं पूजयेत्तत्र महाहविर्निवेदयेत् ॥
मूर्तिहोममिति प्रोक्तम् "

cf. *Virāgama* 56, 9-16a:

"मूर्तिहोमं ततः शृणु ॥
शिवाग्रे मण्टपं कृत्वा स्थण्डिलं शालिभिः कुरु । मध्यमे स्थापयेत्कुम्भं ससूत्रं सापिधानकम् ॥
सवस्त्रं सहिरण्यं च सकूर्चं वारिपूरितम् । अभितः कलशानष्टौ अष्टमूर्तिं च विन्यसेत् ॥
आदित्यश्च तथा चाग्निः सोमो धरणिरेव च । आकाशश्चैव वायुश्च वरुणो यजमानकः ॥
पूर्वादीशानपर्यन्तं पूजयेद्गन्धपुष्पकैः । पञ्चब्रह्मेण संपूज्य गन्धपुष्पादिना ततः ॥
कलशाद्वाह्यतो विप्र अष्टदिक्ष्वष्ट होमयेत् । समिदाज्यचरुक्षीरं यवेन सह देशिकः ॥
एकैकाष्टशतं चैव ईशानादीनि होमयेत् । पश्चात्तु स्नापयेत्तत्र मूलबेरे विशेषतः ॥
हविर्निवेदयेत्पश्चाच्छिवस्य परमेष्ठिनः । मूर्तिहोममिति ख्यातम् "

[2] **A** : चैतन्यं च विशेषतः ; **B** : चैतन्यं तु विशेषतः [3] **C**, E, F : कुर्यात् pour कृत्वा
[4] **A**, F : समिदाज्यचरुं क्षीरं ; **C** : समिदाज्यं चरुक्षीरं [5] A : सक्थुं pour सक्तू
[6] **C** : पूर्णाहुतिं समाचरेत् [7] A : मूर्तिहोममिति ख्यातं [8] **A** : निराकरम् pour निवारकः
[9] cf. *Kāraṇāgama* I 144, 1-9:
अथातः संप्रवक्ष्यामि शान्तिहोमविधिक्रमम् । सर्वदोषविनाशार्थं सर्वसंपत्सुखावहम् ॥
भवनस्याग्रतः कुर्वान्मण्टपं चतुरश्रकम् । भूमिशुद्धिं पुरा कृत्वा गोमयेनोपलेपयेत् ॥
प्रोक्षयेच्छिवमन्त्रेण शालिपिष्टैर्विचित्रयेत् । तन्मध्ये स्थण्डिलं कुर्याच्छुद्धतोयेन पांसुना ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् । पलाशसमिधं सद्योजातमन्त्रेण होमयेत् ॥
आज्यं हुत्वा तु वामेन चरुं वै घोरमन्त्रतः । पुरुषेण हुनेल्लाजं श्रीपत्रं शिखया हुनेत् ॥
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा । अष्टोत्तरशतं वापि प्रत्येकं जुहुयात्क्रमात् ॥

क्षरिकाबीजमुख्येन [1]व्योमव्याप्याख्यमन्त्रतः । [2]रुरो मूलेन मन्त्रेण प्रत्येकाष्टशताहुतिः ॥ ३९ ॥
बीजमुख्येन मन्त्रेण पूर्णाहुतिमथाचरेत् । [3]शान्तिहोम इति ख्यातः सर्वदोषप्रशान्तये ॥ ४० ॥

[दिशाहोमः[4]]

आलयस्य चतुर्दिक्षु पद्मं वा वृत्तकुण्डकम् । कृत्वा शिवाग्निं संकल्प्य समिदाज्यौदनैस्तथा ॥ ४१ ॥

लाज[5]सक्तुतिलैर्दभैः सर्षपैर्यववेणुभिः । गुलकन्दफलैश्चैव मधुक्षीरैस्त्रिपञ्चकैः ॥ ४२ ॥

द्रव्यान्ते व्याहृतिं हुत्वा यदस्येति ततो हुनेत् । जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
पूर्णाहुतिं ततो दत्त्वा शिवमन्त्रेण देशिकः । सद्योजातेन मन्त्रेण पावकं तु विसर्जयेत् ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः । शान्तिहोम इति ख्यातः सर्वदोषनिकृन्तनः ॥

cf. *Virāgama* 55, 2-10:

शान्तिहोममहं वक्ष्ये शृणुष्व कमलासन । पूर्वोक्तमण्टपं वापि अग्निशालामथापि वा ॥
अग्निकुण्डेषु होतव्यं स्थण्डिले वापि कारयेत् । चतुरश्रं वाथ वृत्तं वा अग्निकुण्डं तु कारयेत् ॥
त्रिमेखलासमायुक्तमथवा एकमेखलम् । एवं तत्रैव संकल्प्य दर्पणोदरवत्कृतम् ॥
शोधनं क्षालनं चैव शोषणं पाचनं तथा । मथित्वा तु गृहीत्वा तु हृदयेन प्रतिष्ठितम् ॥
काष्ठं तु शिरसा दद्याज्ज्वालयेदस्त्रमन्त्रतः । उपस्थानं शिरसा कृत्वा परिस्तरणमेव च ॥
दशदर्भैः समायुक्तं पूर्वे चैव परिस्तरेत् । दक्षिणे पश्चिमे चैव उत्तरे च परिस्तरेत् ॥
परिधीन्दक्षिणे न्यस्य पश्चिमे चोत्तरे न्यसेत् । पात्राणां साधनं चैव होमयेत्क्रमशस्ततः ॥
समिधा पञ्चब्रह्मेण आज्यं चैव षडङ्गकैः । अघोरेण चरुं हुत्वा जुहुयात्तु शताहुतीः ॥
द्रव्यं प्रति विशेषेण व्याहृतिं जुहुयात्ततः । शान्तिहोममिति ख्यातम्"

[10] A : दध्ना pour धाना:

[1] A : व्योमव्याप्यान्यमन्यकम् ; C, F : पूर्णाहुतिं समाचरेत्

[2] C et F omettent les demi-*śloka* 39b et 40a [3] A : शान्तिहोममिति ख्यातं

[4] cf. *Kāraṇāgama* I 144. 1-13a:

अथ वक्ष्ये विशेषेण दिशाहोमविधिक्रमम् । सर्वदोषहरं पुण्यं सर्वोपद्रवनाशनम् ॥
मन्दिरस्य चतुर्दिक्षु मण्टपं कारयेत्ततः । प्रोक्षयेत्पुरुषेणैव गोमयेनोपलेपयेत् ॥
पुण्याहं वाचयेत्तत्र पिष्टचूर्णैर्विचित्रयेत् । प्रोक्षयेच्छिवतोयेन स्थण्डिलं वालुकैः कुरु ॥
आदावन्ते च कर्तव्यमग्निकार्योक्तमार्गतः । अश्वत्थं पूर्वदिग्भागे याम्ये चोदुम्बरं हुनेत् ॥
वटहोमं तु वारुण्यां ब्रह्मशाखां तु चोत्तरे । समिदाज्यचरूँल्लाजान्सर्षपं च यवं तिलम् ॥
वैणवं माषमुद्गं च श्रीपत्रं कदलीफलम् । समिधं सद्यमन्त्रेण वामेनाज्यं च होमयेत् ॥
अघोरेण चरुं हुत्वा लाजं हुत्वा नरेण तु । सर्षपं बहुरूपेण हृदयेन यवं हुनेत् ॥
तिलं हुत्वा तु शिरसा वैणवं शिखया हुनेत् । माषं कवचमन्त्रेण मुद्गं नेत्रेण होमयेत् ॥
श्रीपत्रमस्त्रमन्त्रेण मूलेन कदलीफलम् । शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥
द्रव्यान्ते व्याहृतिं हुत्वा यदस्येति ततो हुनेत् । जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
पूर्णाहुतिं ततो दद्यात्सद्योजातेन देशिकः । प्रायश्चित्तादिकं सर्वं जुहुयाद्घोरमन्त्रतः ॥
तत्पुरुषेण मन्त्रेण पावकं तु विसर्जयेत् । आचार्यं पूजयेत्तत्रहेमाङ्गुलीयकैः ॥
दिशाहोम इति ख्यातः सर्वकृत्रिमनाशनः ।

पञ्चब्रह्मशिवाङ्गैश्च क्षुरिकामूलमन्त्रतः । त्रियम्बकेति मन्त्रेण गौरीगायत्रिमन्त्रतः ॥ ४३ ॥
द्रव्यं प्रतिशतं होमः पञ्चाशद्वा तदर्धकम् । कृत्वा मूलेन मन्त्रेण पूर्णाहुतिं समाचरेत् ॥ ४४ ॥
[1]दिशाहोम इति ख्यातो ह्यस्पृश्य[2]स्पृश्यदोषहा ॥ ४५ ॥

इति [3]श्रीमद्रौरवतन्त्रे [क्रियापादे]प्रायश्चित्तविधिर्नाम[4] चतुश्चत्वारिंशः पटलः[5]

---

cf. *Vīrāgama* 56, 1b-9a:

दिशाहोमं प्रवक्ष्यामि शृणुष्व चतुरानन । प्रासादस्य चतुर्दिक्षु दिशाहोमं तु कारयेत् ॥
अग्निमुखं च संकल्प्य पूर्वोक्तेन विधानतः । हस्तमात्रेण विप्रेन्द्र स्थण्डिलं कारयेत्ततः ॥
प्रासादस्य चतुर्दिक्षु पूर्वे तु चतुरश्रकम् । दक्षिणे चार्धचन्द्राभं वृत्तं चैव तु वारुणे ॥
पद्मं चैव तु सौम्यायां कुण्डं वा स्थण्डिलं तु वा । प्लक्षं चैव तु पूर्वायामुदुम्बरं च दक्षिणे ॥
अश्वत्थं वारुणे चैव वटं चैवोत्तरे दिशि । एवंविधैः समिद्भिश्च होमयेद्देशिकस्तथा ॥
सहस्रं वा तदर्धं वा अष्टोत्तरशतं तु वा । सद्यादीशानपर्यन्तं जुहुयात्तु शताहुतीः ॥
आज्येन चरुणा चैव जुहुयात्तु शताहुतीः । तण्डुलैस्तिलमिश्रैश्च ईशानेन शताहुतीः ॥
द्रव्यान्ते चैव द्रव्यान्ते व्याहृतिं जुहुयात्ततः । दिशाहोममिदं प्रोक्तम् ''

[5] A : सक्थु pour सक्तु

[1] A : दिशाहोममिति ख्यातम् [2] B : अस्पृश्य pour स्पृश्य
[3] A : श्री pour श्रीमद् ; B omet श्रीमद्रौरवतन्त्रे [4] A, E et F omettent नाम
[5] A, B : पञ्चचत्वारिंशः पटलः ; C, E : पञ्चविंशतिः पटलः; F : पटलः पञ्चविंशतिः

[पञ्चचत्वारिंशः पटलः]

[पवित्रारोपणविधिः][1]

[पवित्रारोपणकालः][2]

अतः परं प्रवक्ष्यामि पवित्रस्य तु लक्षणम् । [3]ज्येष्ठमध्यकनिष्ठेन पवित्रस्य वरं दिनम् ॥ १ ॥
आषाढे श्रावणे मासि शुक्लपक्षे विधीयते । [4]प्रोष्ठमासेऽश्विने मासे [5]कृष्णपक्षे त्वथाचरेत् ॥ २ ॥
[6]अधिवासानन्तरं चैव पवित्रं तु समाचरेत् ।

[यागमण्डपः][7]

[8]पूर्ववन्मण्डपं कृत्वा कुण्डवेदीः[9] प्रकल्पयेत् ॥ ३ ॥

---

[1] Pour पवित्रारोपणविधि voir *Rauravāgama* vol I, p. 147 note 1 ; voir aussi *Acintyaviśvasādākhya paṭala* 61 et *Santānasaṃhitā, paṭala* 70.

[2] cf. *Aṃśumadāgama* I4, 4b-12:

आषाढे श्रावणे मासे प्रोष्ठमासे तथैव च । अश्विनीकृत्तिकामासे पवित्रारोपणं कुरु ॥
पूर्वपक्षे चतुर्दश्यामाषाढे च पवित्रकम् । अन्येषु सर्वमासेषु पक्षयोः सितकृष्णयोः ॥
चतुर्दश्यामथाष्टम्यां पवित्रं विधिवत्कुरु । कृत्तिकादीपतः पश्चान्नाचरेत्तु पवित्रकम् ॥
मेषादिमिथुनार्केषु यदा दर्शद्वयं भवेत् । अब्दान्तरे यावदावश्यं मिथुनार्के हरिः स्वपेत् ॥
कर्कटाख्यादिके वापि यदा दर्शद्वयं भवेत् । शेते विष्णुः सदाषाढे भाद्रे च परिवर्तते ॥
कार्तिके स प्रबुध्येत शुक्लपक्षे हरेर्दिने । ते मैत्रश्रवणोपेते पावने परिकीर्तिते ॥.....
आषाढपक्षे द्वादश्यां पौर्णमास्यामथापि वा । सुप्ते तदा तु कर्तव्यं पवित्रारोहणं शिवे ॥

cf. *Kāraṇāgama* I 122, 4b-5:

आषाढादिचतुर्मासाः शस्ता अन्यांस्तु वर्जयेत् । कर्तव्यं पक्षयोः शुक्लकृष्णयोरुभयोरपि ॥
चतुर्दश्यामथाष्टम्यामारोहेत्तु पवित्रकम् ॥

voir aussi *Rauravāgama* vol I, *kriyāpāda, paṭala* 25, *śloka* 4b-6a

[3] A : ज्येष्ठमासेन दत्तेन [4] A : प्रोष्ठमासे च मासे च [5] A : कृष्णपक्षमथाचरेत्

[6] A : अभिषेकानन्तरं चैव

[7] cf. *Kāraṇāgama* I 122, 22-28a:

निर्दिष्टदिवसात्पूर्वरात्रे कुर्वधिवासनम् । हर्म्याग्रे मण्टपं कुर्याद्दशहस्ताष्टहस्तकम् ॥
विकारस्तम्भसंयुक्तं चतुर्द्वारसमायुतम् । तन्मध्ये वेदिकां कुर्यात्तत्त्रिभागैकभागतः ॥
विस्तारस्य चतुर्भागमुत्सेधं तु विधीयते । वेद्या मूले तु परितश्चोपवेदिं प्रकल्पयेत् ॥
युगाङ्गुलप्रविस्तारं तदर्धं चोच्छ्रयं भवेत् । चतुर्दिक्षु च कुण्डानि तुर्याश्रं पद्ममेव वा ॥
वृत्तकुण्डं तथैशान्ये कारयेद्विधिपूर्वकम् । तोरणैश्च ध्वजैश्चैव दर्भमालाङ्कुरैस्तथा ॥
मङ्गलाष्टकसंयुक्तं स्तम्भवेष्टनसंयुतम् । गोमयालेपनं कृत्वा शालिपिष्टेन चित्रयेत् ॥
प्रोक्षयेत्पञ्चगव्येन मण्टपं कुशवारिणा ॥

गोमयेन तु [1]शुद्धिं च [2]द्वारतोरणमङ्गलम् । [3]दर्भमाल्यैश्च पुष्पेण [4]तलस्यान्तरलंकृतम् ॥ ४ ॥
पुण्याहं वाचयित्वा तु [5]पञ्चगव्येन प्रोक्षयेत् । [6]वास्तुदेवांस्तु संपूज्य [7]दर्पणादि ततः परम् ॥ ५ ॥
अष्टमङ्गलद्वाराणां[8] [9]तत्तद्देवांस्तु पूजयेत् ।

[अङ्कुरार्पणम्[10]]

[11]प्रासादे मण्डपे चैव बलिपीठे स्नानमाचरेत् ॥ ६ ॥
स्नपनादिविशेषेण [12]देवदेवं च पूजयेत् । सन्तोष्य च नमस्कृत्य विज्ञाप्य च ततः परम् ॥ ७ ॥
यागगृहमुपागम्य चाङ्कुरानर्पयेद्बुधः ।

[पवित्रसूत्राणि[13]]

ब्रह्मक्षत्रियविट्[14]शूद्रसूत्रितैस्तन्तुकैर्युतम् ॥ ८ ।

---

cf. *Sūkṣmāgama* 11, 23-26:

प्रासादस्याग्रदेशे वा उत्तरे दक्षिणेऽपि वा । रुद्रहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ॥
त्रयोविंशत्करान्तं च समं च चतुरश्रकम् । तत्त्रिभागैकभागेन वेदिकां संप्रकल्पयेत् ॥
हस्तमात्रं तदुत्सेधं दर्पणोदरसंनिभम् । वेदिकायां पुरो भागे कुण्डं कुर्यात्सलक्षणम् ॥
सर्वालंकारसंयुक्तं मण्टपं भूषयेत्सुधीः । गोमयालेपनं कृत्वा पुण्याहप्रोक्षणं कुरु ॥

voir aussi *Rauravāgama* vol. I, *kriyāpāda, paṭala* 25, *śloka* 32-35.

[8] B : पूर्वं तु pour पूर्ववत् [9] A : वेदीं pour वेदीः

[1] A : शुद्धेन pour शुद्धिं च [2] B : द्विद्वि pour द्वार [3] A : दर्भमाला च
[4] A : न इत्येन्तरलंकृतम् ; B : नलत्यन्तरलंकृतम् [5] B : पञ्चगव्यमथाचरेत् [6] B : वास्तुदेवांश्च
[7] A : तर्पणानान्ततः परम् [8] A : द्वारं च pour द्वाराणां [9] A : तत्र देवांस्तु pour तत्तद्देवांस्तु

[10] cf. *Yogajāgama* 13, 11-12:

अङ्कुरानर्पयेत्तत्र पूर्वोक्तविधिना सह । द्वादशं षोडशं चैव पञ्चविंशतिमेव वा ॥
पञ्चदशाधिकं चैव अष्टोत्तरशतं तु वा । स्नपनं द्रव्यसहितं स्नापयेद्विधिपूर्वकम् ॥

cf. *Suprabhedāgama* II 7, 8-10:

कृत्वाङ्कुरार्पणं पूर्वं कर्तव्यमधिवासनम् । स्नपनं तु यथाशक्ति शिवाग्निं तु विशेषतः ॥
विशेषपूजनं कृत्वा नमस्कृत्वा विशेषतः । मया कृतानि दानानि द्रव्याणीह व्रतानि च ॥
अनया पूजया सर्वाः संपूर्णास्तु प्रसीदत । एवं विज्ञाप्य तं शम्भुं नमस्कृत्वा तु भक्तितः ॥

cf. *Sūkṣmāgama* 11, 29b-30:

पञ्चगव्यामृतेनैव स्नपनैरभिषेचयेत् । नैवेद्यं दापयेच्छम्भोर्धूपदीपादिकं ददेत् ।
देवदेवं नमस्कृत्वा ज्ञापयेत्तु पवित्रकम् ।

[11] A : प्रासादं मण्टपं चैव बलिपीठं [12] A : देवदेवेन

[13] cf. *Aṃśumad* 43, 9b-10a:

दर्भजं वल्कलोत्थं वा क्षौमं कार्पासजं तु वा । यथासंस्कारमार्गेण संग्रहेद्देशिकोत्तमः ॥

[1]श्रेष्ठमध्याधमं चैव मूलागैः सर्वतन्तुकम् । [2]विकयं तु च वा क्षौमं वृक्षोत्थं चैव तद्विधः ॥ ९ ॥
[3]तत्पूर्वोक्तैस्तु कृत्वा च यथाविभवसंग्रहम् । पश्चाद् धूमं च कृष्णं च स्पर्शनेन [4]प्रवेशितम् ॥ १० ॥
[5]संकुलं सूक्ष्मदोषं च प्रथमं [6]वल्मीकशुद्धितम् [7]। अस्त्रमन्त्रेण प्रक्षाल्य पुनर्भस्मनि[8] निक्षिपेत् ॥११॥
कुङ्कुमं चन्दनं चैव कर्पूरं चागरुं तथा । [9]सद्योजातेन प्रक्षाल्य वलयं हस्तमात्रकम् ॥ १२ ॥

[गन्धपवित्रम् [10]]

[11]त्रिगुणं त्रिगुणीकृत्य [12]क्लृप्तं कुर्याद्विधिक्रमम् । साष्टोत्तरशतं वापि ह्येकग्रन्थि तु रक्तकम् ॥ १३ ॥

---

cf. *Acintyaviśvasādākhya* 61, 9-11 et 17-18:
हैमजं राजतं ताम्रं कृतादिषु यथाक्रमम् । कलौ युगे च कार्पासतन्तुना च पवित्रकम् ॥
त्रिगुणं त्रिगुणीकुर्या द्विजकन्यादिकैः कृतम् । सूत्रं शुभं च धौतं च शोषितं तन्तु कल्पयेत् ॥
क्षौमपद्मजवल्कोत्थपट्टदर्भशणोद्भवम् । सूत्रं मौञ्ज्यादिसंभूतं योग्यं तत्र पवित्रके ॥
सूत्रशुद्धिरजातेन गुह्यकेन सुरञ्जितम् । अघोरेण तु शुद्धिर्वै वक्त्रमन्त्रेण पूजयेत् ॥
हरिचन्दनकर्पूरकस्तूरीकुङ्कुमैस्तथा । निशागैरिकराजैश्च रञ्जयेत्तु पवित्रकम् ॥

cf. *Suprabheda* II 7, 15-16a:
सूत्रं प्रागेव संग्राह्यं निर्मितं द्विजकन्यया । यथासंभवसूत्रं वा शोधयेत्तोयभस्मना ॥

voir aussi *Rauravāgama* vol I, *kriyāpāda, paṭala* 25, 6b-11a:

[14] A : शूद्रा कृत्वा तु pour शूद्रसूत्रितैः; ce demi-*śloka* est cité dans le *Pavitrotsavavidhi* p. 123.

[1] B : श्रेष्ठमध्यापर्यंश्चैव [2] B : विक्रये तु [3] B : तत्पूर्वार्धकं [4] A : प्रवेशकम्
[5] B : सकलं [6] B : बल्याङ्क pour वल्मीक [7] A : शुद्धिदम् pour शुद्धितम्
[8] A : भस्मेन pour भस्मनि [9] Ce demi-*śloka* est cité dans le *Pavitrotsavavidhi*, p. 124.

[10] cf. *Suprabheda* II 7, 16b-24a:
तत्सूत्रं द्विगुणं प्रोक्तं तदेव द्विगुणं भवेत् । नवसंख्यं तु यत्सूत्रं पवित्रं कनकसिद्धिदम् ॥
वामाद्याः शक्तयस्तत्र नवसूत्राधिदेवताः । लिङ्गोत्सेधसमायामं प्रासादे तु पवित्रकम् ॥
हस्तमात्रसमायामं पवित्रमिह शोभनम् । सूत्रैर्विवर्धयेद्विद्वान्नवधा तु पवित्रकम् ॥
नवषोडशविंशद्भिरधमत्रयमेव च । पञ्चविंशच्च द्वात्रिंशत् षट्त्रिंशन्मध्यमत्रयम् ॥
पञ्चाशत्सप्ततिश्चैव नवतिश्चोत्तमत्रयम् । एतेषां तु यथाशक्त्या पवित्रं लक्षणान्वितम् ॥
प्रशान्तायेति मन्त्रेण ग्रन्थयित्वा पवित्रकम् । तस्य मध्ये दशग्रन्थि बध्वा सूत्रेण देशिकः ॥
नवसप्ताष्टसूत्रैर्वा ग्रन्थिं कृत्वा विचक्षणः । इन्द्रादिलोकपालाश्च ग्रन्थीनामधिदेवताः ॥
आत्मार्थेऽप्येवमाख्यातं सूत्रसंग्रहणं क्रमात् । सकलानां तु बिम्बानां तदुत्सेधं प्रकीर्तितम् ॥

cf. *Sūkṣma* 11, 10-22a:
तन्तुना त्रिगुणीकृत्य दशवृद्ध्या ततः क्रमात् । शतमष्टोत्तरं चैव तन्तूनामुत्तमं भवेत् ॥
तन्तूनां द्वादशेनैव द्वादशादित्यदैवतम् । पञ्चाशत्तन्तुसंख्याता तन्तूनां मध्यमा मता ॥
तन्तूनां तिथिसंख्याता तु त्रिमूर्त्यधिदेवता । पञ्चविंशतिसंख्याता तन्तूनां कन्यसा स्मृता॥
अथवान्यप्रकारेण तन्तुसंख्यां शृणु त्वथ । एकाद्येकैकवृद्ध्या तु तन्तूनां त्रिष्टसंख्यया ॥
ग्रन्थयस्तन्तुसंख्याता यथेष्टग्रन्थिसंयुताः । एकद्वित्र्यङ्गुलं वापि ग्रन्थिमानं प्रकल्पयेत् ॥
ग्रन्थयस्त्रिगुणदेशे वा कल्पयेत्कल्पवित्तमः । एभिर्लक्षणसंयुक्तं कुर्याद्गन्धपवित्रकम् ॥

पञ्चदशचतुर्ग्रन्थि श्वेतं रक्तं तु कृष्णकम् । सप्तविंशतिश्वेतं च ह्यष्टग्रन्थि तु [1]कृष्णकम् ॥ १४ ॥
[2]पञ्चाशत्तु संख्यया च कुङ्कुममिति कल्पयेत् । [3]इत्येतद्ग्रन्थिसूत्रेण कृत्वा [4]तु देशिकोत्तमः १५॥
उत्तमं हस्तमात्रेण नवसूत्रेण कल्पयेत् । [5]गन्धपवित्रकं कृत्वा लिङ्गपीठप्रमाणकम् ॥ १६ ॥
दशग्रन्थि नवग्रन्थि बन्धयित्वा तु तद्गुरुः[6] । लिङ्गनाहप्रमाणेन [7]तत्त्वत्रयं समुच्चरन् ॥ १७ ॥
एकाङ्गुलप्रमाणेन कृत्वा पवित्रं देशिकः । गौरीगणेशस्कन्दे च माहेश्वरे च चान्यके ॥ १८ ॥
अन्येषां परिवाराणां [8]सौरे नाहप्रमाणकम् ।

[पवित्राधिवासः[9]]

मण्डलस्थं [10]शिवं चैवाभ्यर्च्य हृन्मन्त्रमुच्चरन् ॥ १९ ॥

महापवित्रं वक्ष्यामि गङ्गागौर्यवतारकम् । पञ्चग्रन्थिसमायुक्तमामन्त्रणपवित्रकम् ॥
दूर्वाक्षतैः समभ्यर्च्य तस्मान्नित्यपवित्रकम् । गैरिकागरुकाश्मीरचन्दनै रक्तचन्दनैः ॥
हरिद्राकृष्णकतरै रञ्जयेद्ग्रन्थिमध्यमे । आत्मविद्याशिवेनैव त्रितयं लिङ्गमूर्धनि ॥
पवित्रं पिण्डिके त्वेवं परिवारामरादिषु । पवित्रमेकं कर्तव्यं महेशे तद्विशेषतः ॥
शिरोमाला उरोमाला बाहुमालोपवीतकम् । मणिबन्धाक्षमाला च सकलेऽप्येवमाचरेत् ॥
पवित्रमेकं सर्वेषामल्पतन्तु विधीयते । प्रासादं यागशालां च प्राकारं पचनालयम् ॥

त्रिगुणं त्रिगुणीकृत्य तन्तुना वेष्टय देशिकः ।

voir aussi *Rauravāgama*, vol I 25, 20b-23.

[11] ce demi-*śloka* est cité dans le ***Pavitrotsavavidhi***, p. 124.

[12] A : कम्बलं pour क्लृप्तं ; *Pavitrotsavavidhi*: कलं

[1] B : रक्तकम् [2] A : पञ्चादशं तु संख्या च [3] A : इत्येते pour इत्येतद् [4] B : वै pour तु
[5] B : गन्धपवित्रं कृत्वा तु [6] A : तद्गुरुम्
[7] A : तत्त्वत्रयं समुच्चरेत् ; B : तत्त्वत्रयमुच्चरन् [8] A : सौरनाद pour सौरे नाह
[9] cf. *Aṃśumad* 43, 51-58:

मण्डलेशं समभ्यर्च्य उपदेशस्य मार्गतः । कर्तरिं दन्तकाष्ठं च जिह्वाशोधनमेव वा ॥
सूचिकां श्रोत्रशोधं वा नखशोधनमेव वा । पूर्वभागे तु संस्थाप्य पुरुषमन्त्रमनुस्मरन् ॥
रजनीं पञ्चगव्यं च कौपीनं खण्डवस्त्रकम् । तैलमामलकं चैव पञ्चामृतं च दक्षिणे ॥
अघोरमन्त्रमुच्चार्य पूजयेत्तु विचक्षणः । ईक्षाहरं यूकहरं केशशोधनमञ्जनम् ॥
पुष्पमाभरणं चैव वस्त्रयज्ञोपवीतकम् । चन्दनं वारुणे चैव त्र्यक्षरं मन्त्रमुच्चरन् ॥
कमण्डलुं योगपट्टमोडयाणं भैक्षपात्रकम् । व्याघ्राजिनं वेदण्डं चामरं छत्रदर्पणम् ॥
पादुके भसितं चैव मात्रादण्डं च खड्गकम् । वामदेवमनुस्मृत्य सौम्ये तु स्थापयेद्बुधः ॥
एवं क्रमेण संस्थाप्य प्रोक्षयेच्छान्तिमन्त्रकैः । पश्चाद्धोमं प्रकर्तव्यमग्निकार्योक्तमार्गतः ॥

cf. *Kāraṇa* I 122, 28b-40:

स्थण्डिलं कारयेद्विद्वान्दशद्रोणैश्च शालिभिः । तण्डुलैः समलंकृत्य तिलदर्भैः सुपुष्पकैः ॥
तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् । शिवकुम्भं न्यसेन्मध्ये अस्त्रेशमस्त्रवर्धनीः ॥

दण्डं [1]तदक्षमाल्यं च कौपीनं [2]भैक्षपात्रकम् । दक्षपार्श्वे [3]तु संस्थाप्य तत्पात्रेण [4]तिरोहितम् ॥ २० ॥
[5]अन्येषु चापि पात्रेषु [6]गोरोचनकुशोदकम् । पाटीरकुङ्कुमं चैव नागवल्लीं च दर्पणम् ॥ २१ ॥
[7]शुद्धपात्रे तु निक्षिप्य ह्युत्तरेण तु संस्थिते । पादुकां योगवेष्ट[8] च [9]शुद्धपात्रे तु निक्षिपेत् ॥ २२ ॥
ईशकोणे स्थिते चैव तत्पात्रेण [10]तिरोहितम् । पवित्रं [11]दन्तशोधं च कर्णिकां [12]नखशोधनम् ॥ २३ ॥
शुद्धपात्रे तु[13] निक्षिप्य पूर्वदेशे [14]स्थिते बुधः । [15]पवित्रे गन्धमालिप्य शुद्धपात्रे तु[16] निक्षिपेत् ॥ २४ ॥
अस्त्रमन्त्रेण संप्रोक्ष्य संहितामभिमन्त्रयेत्[17] । कुण्डस्य[18] पश्चिमे भागे [19]मण्डलेषु तु निक्षिपेत् ॥ २५ ॥
दर्भासनोपरि न्यस्य पवित्रं देशिको बुधः । [20]पवित्ररक्षां विज्ञाप्य [21]यागेश्वरं तु दैवकम् ॥ २६ ॥
[22]मृगीचर्मणश्छादेन तन्तुनाभेन वेष्टयेत् ।

[होमः[23]]

कुण्डसंस्कारपूर्वेण [24]त्वग्निसंधानपूर्वकम् ॥ २७ ॥

कुम्भाग्रे मण्डलं चैव विधिवत्पूजयेद्गुरुः । गन्धादिकं समभ्यर्च्य पात्रं वेद्युपरि न्यसेत् ॥
शातकुम्भमयं वाथ ताम्रं वा कांस्यमेव वा । तन्मध्ये विन्यसेत्सूत्रं नववस्त्रेण वेष्टयेत् ॥
अभ्यर्च्य गन्धपुष्पाद्यैर्हृदयेनैव देशिकः । दर्शयेत्सुरभीमुद्रां तालमुद्रां तथैव च ॥
ईशाने तु पवित्रं च तैलामलकं पूर्वके । दण्डाक्षमालाशय्यादिभिक्षापात्राणि दक्षिणे ॥
शलाकां केशशोधं च कर्त्रिकां नखशोधनीम् । उत्तरे विन्यसेद्धीमान्पश्चिमे तु विशेषतः ॥
ताम्बूलं योगपट्टं च चामरं गजमालिकाम् । ईशानादीनि सद्यान्तं तत्तन्मन्त्रेण मन्त्रयेत् ॥
पादुकां दर्पणं वस्त्रं पञ्चमृत्पञ्चगव्यकैः । छत्रं मृगाजिनं चैव दन्तकाष्ठं तथैव च ॥
इन्द्रादीशानपर्यन्तं वेद्यां क्रमेण विन्यसेत् । नैर्ऋते त्वञ्जनं न्यस्त्वा भस्म चैशानगोचरे ॥
न्यसेद्विकिरालबीजैश्च प्रत्येकं वस्त्रवेष्टितम् ॥ गन्धपुष्पादिभिः पूज्य हृदयेनैव देशिकः ॥
न्यस्त्वा शुद्धाख्यमेवं तु मूलेनैव शतं हुनेत् ॥

voir aussi *Rauravāgama* vol I, 25, 36-42 et 59-63.

10 A : शिवे चैव वलयं

1 B : तु यक्षमालां च 2 A : भिक्ष pour भैक्ष 3 A : न pour तु 4 A : तिरोधकम्
5 A : अन्येषाणां च पात्राणां 6 A : गोरोचके शोधनम् 7 A : शुद्धपात्रेण
8 A : वेष्ठी pour वेष्टं 9 B : शुद्धि pour शुद्ध 10 A : तिरोधकम् 11 A : दन्तशोधेन
12 A : घन pour नख 13 A : पात्रेण pour पात्रे तु 14 A : स्थितं pour स्थिते
15 A : पवित्रं गन्धमाश्रित्य 16 A : पात्रेण pour पात्रे तु 17 A : मन्त्रकम् pour मन्त्रयेत्
18 A : कुण्डेन 19 A : मण्डलेन 20 A : पवित्रं रक्षविज्ञापे 21 A : यागेश्वरेण
22 A : मृगीचर्ममनश्चादेन तन्तुनासेन वेष्टयते
23 cf. *Kāmika* II 18, 39-44:

कुण्डसंस्कारमारभ्य पूर्णान्तं होममाचरेत् । समिदाज्यचरूल्लाजांस्तिलसस्येन्द्रसंयुतान् ॥
पलाशोदुम्बराश्वत्थवटाः प्रागादिदिक्षु च । शमीखदिरश्रीवृक्षप्लक्षाः स्युर्वह्निकोणतः ॥
प्रधाने तु पलाशः स्याच्छतं सार्धं शिवस्य तु । शिवाद्दशांशतोऽङ्गानां कुण्डे प्राधानिके भवेत् ॥
तदर्धमन्यकुण्डेषु नरादिषु हृदादिषु । स्थालीपाकं हविः कृत्वा तद्धृदा विभजेत्त्रिधा ॥

अग्निहृदयमध्ये तु [1]नित्येन पूजयेच्छिवम् । [2]पूजावैकल्यतार्थं च [3]पवित्रं तु निवेदयेत् ॥ २८ ॥
पवित्रेण निवेदार्थं मूलमन्त्रशताहुतिः । सर्वसाक्षिशिवं चात्र [4]पवित्रोपरि पूजयेत् ॥ २९ ॥
पञ्चब्रह्मषडङ्गानां[5] प्रत्येकमेकविंशति । [6]अतिरक्ताख्यजिह्वायां हुत्वा तु तिलसर्षपम् ॥ ३० ॥
लाजमाज्यं च माषं च कनकायां तु [7]होमयेत् ।

[गन्धपवित्रारोपणम्[8]]

पश्चात्तु पञ्चब्रह्मेण[9] षडङ्गेनाभिमन्त्रयेत् ॥ ३१ ॥

शिवांशमग्निभागं च मध्वाज्याभ्यां तु मिश्रितम् । कुर्यादात्मीयभागं तु केवलेन घृतेन च ॥
हृदा देवांशमभ्यर्च्य तमादाय शिवाग्निकम् । गत्वा संपूज्य देवेशम्''

ibid., 55b-57a:

संवत्सरात्मकं सर्वकृत्यसाक्षिणमव्ययम् । गोप्तारं संश्रयं कर्मफलप्राप्तिनिबन्धनम् ॥
अनुस्मरञ्शिवं ब्रह्मषडङ्गशिवमन्त्रतः । त्रिःसप्तकृत्वः संपातं तथैव जुहुयात्ततः ॥

voir aussi *Rauravāgama* vol I, 25, 43-45.

[24] A : अग्निजातेन पूर्वकम्

[1] B : नित्यं वै pour नित्येन [2] A : प्रजा pour पूजा [3] A : पवित्रेण तु वेदयेत्
[4] B : पवित्रं परिपूजयेत् [5] A : षडङ्गानि pour षडङ्गानां [6] A : अतिरिक्तेन जिह्वेन कृत्वा
[7] A : होमकम्
[8] cf. *Acintyaviśvasādākhya* 61, 10b-103a:

यागधामवृषस्थानप्रासादानलसंश्रयम् । कारकौघं च सूत्रेण वर्मणा परिवेष्टयेत् ॥
पूजिताय सूर्याय दत्त्वा गन्धपवित्रकम । समाचम्य कृतन्यासः प्रणिपत्य कृताञ्जलिः ॥
दद्याद्गन्धपवित्रं तु नन्द्यादिद्वारपालके । प्रविश्य वास्तुनाथाय ब्रह्मणेऽपि ददेत्ततः ॥
साङ्गेभ्यो लोकपालेभ्यः पवित्राणि स्वनामभिः । शिवकुम्भादिवर्धन्यां दद्याल्लम्बोदराय च ॥
अभ्यर्च्य विघ्नराजं च देशिकाङ्घ्रिपदाम्बुजम् । पूजयेद्गन्धपुष्पेण दत्त्वान्नं च पवित्रके ॥
पञ्चाशदोषधौलिप्तं मानोन्मानविवर्जितम् । पुष्पदूर्वादिसंयुक्तं धूपितं च विशेषतः ॥
एकग्रन्थ्यल्पसूत्राढ्यं चतुर्वर्गफलोदयम् । मन्त्राभिमन्त्रितं तन्तु विधायाञ्जलिमध्यतः ॥
आमन्त्रणपदं ह्येतद्देशिकोऽपि यजेद्यथा । ओं समस्तविधिविच्छिद्रपूरणेश मखं प्रति ॥
प्रभो वामन्त्रयामि त्वां त्वदिच्छा व्याप्तिकारिका । तत्सिद्धिमनुजानीहि जातं च चिदचित्पदे ॥
सर्वथा सर्वदा शम्भो नमस्तेऽस्तु प्रसीद मे । आमन्त्रितोऽसि देवेश सह देव्या गणेश्वरैः ॥
मन्त्रैस्त्रैलोक्यपालैश्च सहितः परिवारकैः । निवेदयाम्यहं तुभ्यं प्रभाते तु पवित्रकम् ॥
नियमं च करिष्यामि परमेश तवाज्ञया । आमन्त्र्य देवमित्येवं रेचकेनामृतीकृतम् ॥
मूलं शिवान्तमुच्चार्य तच्छिवाय निवेदयेत् । जपैः स्तोत्रैः प्रणामैश्च तोषयेत्परमेश्वरम् ॥

cf. *Kāmika* II 18, 57b-67:

दत्त्वा गन्धपवित्रं च भानोराचम्य देशिकः । यागधामवृषस्थानप्रासादानलसंश्रयान् ॥
कारकान्पद्मसूत्रेण वर्मणा परिवेष्टयेत् । दद्याद्गन्धपवित्रं तु नन्द्यादिभ्यः प्रदक्षिणम् ॥
प्रविश्य पूर्ववच्चान्तर्ब्रह्मणे च पवित्रकम् । तदेतानि पवित्राणि भगवन्संस्कृतानि हि ॥
अर्पयामि घटस्थाय शिवायाध्येषयेदिति । समर्प्य रक्षणायास्मै तेभ्यो गन्धपवित्रकम् ॥
आदौ वा कुम्भवर्धन्योर्दत्त्वा यायाच्छिवान्तिकम् । स्वमूर्तौ गुरुपङ्क्तौ च दद्याद्गन्धपवित्रकम् ॥

[1]दिग्बन्धं चास्त्रमन्त्रेण कवचेनावकुण्ठनम् [2] । मूलेन चामृतीकृत्याप्यर्घ्येणैव च योजयेत् ॥३२॥
शिवकुम्भं दक्षपार्श्वे [3]दर्भासने तु विन्यसेत् । पश्चाद्गन्धपवित्रं तु गृहीत्वा देशिको बुधः ॥ ३३ ॥
प्रथमं [4]मण्डपं पूज्य यथामार्गेण पूर्ववत् । [5]ऊर्ध्वकायस्तु पूजेत तन्मन्त्राणि समुच्चरन् ॥ ३४ ॥
[6]पवित्राणि तु दत्त्वा चाप्यर्घ्येणैव च योजयेत् । बालमग्निं तु संचिन्त्य पवित्रेण तु योजयेत् ॥ ३५ ॥
[7]कुण्डे देवं च संपूज्य दत्त्वैव तु पवित्रकम् । कुण्डे त्वन्यांश्च देवांश्च [8]पवित्रेण च योजयेत् ॥ ३६ ॥
पश्चाद्रूपं तु संपूज्य धातारमधिदैवतम् । पवित्रेण तु संयोज्याप्यर्घ्यं मूर्ध्नि [9]सुयोजयेत् ॥ ३७ ॥
[10]दीपं चैव तु संपूज्य [11]ह्यर्कं चैवाधिदैवतम् । [12]दीपदेवे तु संयोज्य [13]पञ्चब्रह्मेण पूजयेत् ॥ ३८ ॥

[घण्टायां गन्धपवित्रारोपणम् [14]]

दिग्बन्धनावकुण्ठेन पश्चाद्घण्टां [15]समुच्चरन् । मणिर्वासुकिदैवत्यः सुषिरं सोमदैवतम् ॥ ३९ ॥

एकग्रन्थिसमायुक्तमल्पतन्तुविनिर्मितम् । धूपितं पुष्पसंयुक्तं समादायाञ्जलौ गुरुः ॥
आमन्त्रणपवित्रं तत्सुधामुद्राप्ररोचितम् । शिवायारोप्य तन्मूर्ध्नि रेचकेन शिवाणुना ॥
आमन्त्रणात्मकं मन्त्रं पठेद्देवेशसन्निधौ । समस्तविधिविच्छिद्रपूरणेश मखं प्रति ॥
प्रभो वामन्त्रयामि त्वां त्वदिच्छा व्याप्तिकारिका । तत्सिद्धिमनुजानीहि यजतश्चिदचित्पदे ॥
सर्वथा सर्वदा शम्भो नमस्तेऽस्तु प्रसीद मे । जप्त्वा निवेद्य देवाय स्तुत्वा नत्वा क्षमापयेत् ॥
दद्यादाज्ञाधिपानां तु तदस्त्राणां पवित्रकम् ॥

voir aussi *Rauravāgama* vol I, 25, 46-58.

[9] La forme grammaticale correcte est पञ्चब्रह्मणा ; mais le mètre ne serait pas respecté.

[1] A : दिग्बन्धनास्त्रमन्त्रेण [2] A : गुण्ठनम् pour कुण्ठनम् [3] A : दर्भासनं तु [4] A : मण्डपे
[5] A : ऊर्ध्वकायेन [6] A : पवित्रेण तु दत्तेन [7] A : कुण्डदेवेन pour कुण्डे देवं च
[8] A : पवित्रेणाक्रमेण च [9] A : सुयोजकम् [10] A : दीपेन तु च [11] A : अर्केण चाधिदैवतम्
[12] A : दीपदीपेन [13] voir p. 190 note 9
[14] cf. *Sakalāgamasaṃgraha* 768b-769:

घण्टायां वासु [वास्तु?] देवत्यं जिह्वायां तु सरस्वती । अनन्तो वलये प्रोक्तो नाराचो मन्त्रनादकः ॥
शूलं त्रिमूर्तिदैवत्यं वृत्ताकारं नभो भवेत् ॥.....

ibid., 771b-772a:

घण्टाशब्देन गच्छन्ति दानवाश्च भयंकराः । आगच्छन्ति च सुप्रीताः शिवेन सह देवताः ॥

cf. *Āgamavacanagranṭha*, p. 56:

मणीनां वासु[वास्तु?] दैवत्यं जिह्वायां तु सरस्वती । दण्डं चैवाग्निदैवत्यं नाद ईश्वर एव च ॥
सुषिरं सोमदैवत्यं वलये वासुकिस्तथा । नालाग्रमिन्दुदैवत्यं दण्डे चैव तु भास्करः ॥
ब्रह्मा विष्णुश्च रुद्रश्च त्रिशूलस्याधिदेवताः । राक्षसाश्चासुराश्चापि पिशाचा ब्रह्मराक्षसाः ॥
गच्छन्ति घण्टाघोषेण देवसान्निध्यमेव च ॥

cf. *Kāraṇa* I 30, 188-189a:

पूजाकाले तु घण्टास्ताडनार्किं प्रयोजनम् । यक्षराक्षसपैशाचदानवा ब्रह्मराक्षसाः ॥
देवसान्निध्यपूजार्थं गच्छन्ति मणिशब्दतः ॥

[15] A : समुच्चयेत्

जिह्वा सरस्वती चैव [1]नालमिन्द्राधिदैवतम्। [2]शूलं त्रिमूर्तिदैवत्यं [3]तत्तन्मत्रेण पूजयेत् ॥ ४० ॥
महाघण्टानिनादेन [4]राक्षसा असुरास्तथा। ब्रह्मराक्षसपैशाचपूर्वाश्च [5]तेन चिन्तिताः ॥ ४१ ॥
दूरं गच्छन्ति नादेन यान्ति देवाः सुसन्निधिम्। पवित्रेण तु निक्षिप्य चार्घ्येण तु सुयोजयेत् ॥ ४२ ॥

[भस्मपात्रे स्रुक्स्रुवयोश्च गन्धपवित्रारोपणम्]

भस्मालयं तु संपूज्य शक्तिमन्त्रं समुच्चरन्। भस्मालये तु शक्तीनां तन्तु ब्रह्माधिदैवतम् [6] ॥ ४३ ॥
बन्धेन रज्जुहस्तेन भस्म तत्तच्छिवेन तु। गन्धपवित्रं संपूज्य [7]पश्चात्स्रुक्स्रुवपूजनम् ॥ ४४ ॥
[8]अधः कुम्भे तु रुद्रेण चेश्वरेण तु मध्यमम्। अग्रे सदाशिवं [9]चैव तत्त्वत्रयं तु पूजयेत् ॥ ४५ ॥
पवित्रेण तु संयोज्य चार्घ्यं मूर्ध्नि [10]सुयोजयेत्।

[सौरादिगुर्वन्तं गन्धपवित्रयोजनम्]

पश्चात्सौरादिदेवानां[11] पवित्राणि निवेदयेत् ॥ ४६ ॥
[12][19]पादौ प्रक्षाल्य चाचम्य भस्म [13]निक्षिप्य तद्गुरुः। सकलीकरणं कृत्वा समादायार्घ्यपात्रकम् ॥ ४७ ॥
द्वारतोरणदेवांस्तु[14] पवित्रेण तु योजयेत्। अष्टमङ्गलदेवांस्तु[15] पूर्वादीशान्तमर्चयेत् ॥ ४८ ॥
पवित्रेण तु युक्तेन [16]लोकपालांस्तु योजयेत्। [17]पवित्रेण तु योगस्तु वास्तुदेवे तथा भवेत् ॥ ४९ ॥
अङ्गलत्रयमुच्छित्य पवित्रे बलं योजयेत्। पश्चिमेन तु लक्ष्मीं च सरस्वतीं तु चोत्तरे ॥ ५० ॥
[18]पवित्राणां तु बन्धेन चार्घ्यं मूर्ध्नि तु योजयेत्। ब्रह्मविष्णू च संपूज्य पवित्रं तत्प्रकीर्तितम् ॥ ५१ ॥
[19]दशायुधानि संपूज्य पवित्रेण तु योजयेत्। कुम्भवर्धनीं संपूज्य पवित्रं गन्धयुक्तकम् ॥ ५२ ॥
[20]मण्डलस्थं तु देवं तु सद्यादिना तु पूजयेत्। पवित्रेण तु संयोज्य [21]चार्च्यं लिङ्गं तु पूजयेत ॥ ५३ ॥
अग्निकोणादि चेशान्तं [22]पवित्रमर्च्यं लिङ्गके। [23]पाद्याचमनार्घ्याणि दत्त्वा तु देशिको बुधः ॥ ५४ ॥
[24]देशिकान् सप्त संपूज्य पवित्रेण तु योजयेत्।

[देवदेवे गन्धपवित्रारोपणम्]

[25]देवदेवं नमस्कृत्य पाद्यमाचमनार्घ्यकम् ॥ ५५ ॥

[1] A : नालमिन्द्रस्य दैवतम् [2] A : त्रिशूलं pour शूलं [3] A : तन्मन्त्रेण तु
[4] A : राक्षसानसुरं तथा [5] A : तन्तु pour तेन [6] A : ब्रह्म तु दैवतम्
[7] A : पश्चात्स्रुक्स्रुवौ पूजयेत् [8] A : अधोकुम्भेन [9] A : पूज्य pour चैव
[10] A : सुयोजकम् [11] A : देवेन pour देवानां
[12] Les *śloka* 47a, 48b, 49a, 50, 51, 52a est 54b sont cités dans le ***Pavitrotsavavidhi***, pp. 157-158. [13] A : निक्षिप्यते गुरुः
[14] A : देवेन pour देवांस्तु [15] A : देवेन pour देवांस्तु [16] B : लोकपालान् सुयोजयेत्
[17] A : पवित्रेणार्हं तु योगेन वास्तुदेवान् तथा भवेत् [18] A : पवित्रेण
[19] A : दशायुधेन [20] A : मण्डलस्थेन देवेन सद्यादीनां तु [21] A : अर्धलिङ्गे तु pour चार्च्यं लिङ्गं तु
[22] A : पवित्रमर्धलिङ्गकम् [23] A : पाद्याचमनमर्घ्येण [24] A : सप्तदेशिकं संपूज्य [25] A : देवं देवीं

[1]दद्यादर्घ्यं तथा मूर्ध्नि चास्ये त्वाचमनं तथा । [2]पादयोः पाद्यमित्युक्तं तत्तन्मन्त्रं समुच्चरन् ॥ ५६ ॥
अष्टत्रिंशत्कलान्यासमष्टपुष्पेण योजयेत् । गन्धपवित्रं संगृह्य शिवमन्त्रं समुच्चरन् ॥ ५७ ॥
देवेशं सहदेव्यर्कगणेशलोकपालकम् । सहितं परिवारेण [3]निवेदयामि तुभ्यकम् ॥ ५८ ॥
प्रभाते तु पवित्रं च तत्त्वमन्त्रं समुच्चरन् । नियमं च करिष्यामि परमेश तवाज्ञया ॥ ५९ ॥
गन्धपवित्रं बिल्वं च दूर्वाक्षतैस्तु युक्तकम् । देवदेवे तु दत्त्वा तु तत्त्वत्रयेण चिन्तितम् ॥ ६० ॥
[4]आत्मतत्त्वाच्छिवान्तं च गृहस्थानां विधीयते । शिवतत्त्वादि ह्यात्मान्तं मुक्तिकामः प्रकल्पयेत् ॥६१॥
[5]तत्तत्सर्वाणि त्वर्घ्येण दत्त्वा तु देशिको बुधः । धूपं दीपं च दत्त्वा तु पायसान्नं निवेदयेत् ॥ ६२ ॥
पाद्यमाचमनं दत्त्वा चोपचारं निवेदयेत् ।

[अग्निस्थशिवं प्रति क्रिया[6]]

कुण्डदेशे प्रदेशे चाग्नौ पवित्रं निवेदयेत् ॥ ६३ ॥

---

[1] A : दद्यादर्घ्यं तु मूर्धेन [2] A : पाद्यं पादयमित्युक्तं [3] A : निवेदमात्मतुभ्यकम्

[4] Le *Rauravāgama* suit l'ordre des mantra d'*ātmatattva* à *Śivatattva* pour les *bhuktikāma* et de *Śivatattva* à *ātmatattva* pour les *muktikāma* Les autres āgama et les manuels suivent l'ordre inverse, de *Śivatattva* à *ātmatattva* pour les *bhuktikāma* et d'*ātmatattva* à *Śivatattva* pour les *muktikāma* ; cf. *Kāmikāgama* II 18, 91b-94:

पूरयेति द्विरुच्चार्य मखव्रतपदं ततः । नियमेश्वरायेति पदं स्वाहेत्यन्तं समुच्चरन् ॥
आत्मतत्त्वाधिपतये शिवाय नम इत्यपि । तत्त्वविद्याशिवाख्यं च मुक्तिकामः पदं पठेत् ॥
पवित्रकत्रयं मूर्ध्नि दद्याद्भोगी शिवादिकम् । शिवाणुमादावुच्चार्य शिवविद्यात्मकं पुनः ॥
सर्वतत्त्वेश्वरायेति दद्याद्वज्ञावतारकम् ॥

cf. *Acintyaviśvasādākhya* 61, 128b-137a:

आत्मतत्त्वे प्रकृत्यन्ते पालिते पद्मयोनिना । उच्चार्य मूलमाद्यन्तं पवित्रेणार्चयेच्छिवम् ॥
विद्यातत्त्वे च विद्यान्ते पालिते विष्णुकारणे । ईश्वरान्तं समुच्चार्य पवित्रमधिरोपयेत् ॥
शिवान्ते शिवतत्त्वेऽथ रुद्रकारणपालिते । शिवान्तं मूलमुच्चार्य पवित्रमधिरोपयेत् ॥
सर्वकारणपाल्येषु सर्वतत्त्वेषु सुव्रत । मूलं लया[न्तमुच्चार्य]दद्याद्वज्ञावतारकम् ॥
मुमुक्षूणां पवित्रं तु चात्मविद्याशिवैः क्रमात् । बुभुक्षूणां च संप्रोक्तं शिवविद्यात्मभिः क्रमात् ॥
स्वाहान्तं वा नमोऽन्तं वा मन्त्रैरेवमुदीरयेत् । देशिकः सर्वदेवानां पवित्रं कुर्यात्[कारयेत्?] पुनः ॥
ओं हां आत्मतत्त्वाधिपतये शिवाय स्वाहा । ओं हां विद्यातत्त्वाधिपतये शिवाय स्वाहा ॥
ओं हां शिवतत्त्वाधिपतये शिवाय स्वाहा । एवं क्रमेण देवाय पवित्रं कारयेत्पुनः ॥
ओं हां सर्वतत्त्वाधिपतये शिवाय स्वाहा । अनेनैव तु मन्त्रेण कुर्याद्वज्ञावतारकम् ॥

[5] Le ms. A omet les *śloka* 62 et 63.

[6] cf. *Kāmikāgama* II 18, 68-73a:

दत्त्वा बह्निस्थदेवाय तृतीयांशं चरोर्गुरुः । आमन्त्रणपवित्रं च दद्यात्तस्यैव पूर्ववत् ॥
इन्द्राय प्रतिगृह्णेति नत्यन्तं प्रणवादिकम् । अन्येषां चैव मूर्तानां क्रमाद्दद्याद्बहिर्बलिम् ॥
वायव्यां क्षेत्रपालाय दत्त्वाचम्य बलिं पुनः । प्रायश्चित्तं ततो हुत्वा पूर्णां दत्त्वा ततो गुरुः ॥

पश्चान्मूलं तु संचिन्त्य शतं चार्धं तु होमयेत्[1] । अन्तर्बलिं च कृत्वा च बहिर्बलिं निवेदयेत् ॥ ६४ ॥
[2]तत्तन्मन्त्रेण संचिन्त्य चरुं पवित्रमिश्रकम् । पूर्णाहुतिं ततो हुत्वा[3] [4]त्वग्नौ पूर्वं तु मिश्रकम् ॥ ६५ ॥
पादौ प्रक्षाल्य चाचम्य पश्चाद्धस्मं तु निक्षिपेत् । [5]मण्डलस्थे तु देवे तु नाडीसन्धानयोजनम्[6] ॥ ६६ ॥

[पवित्ररक्षा[7]]

पश्चाच्छुद्धे तु पात्रे चाप्यादाय मन्त्रशुद्धितम् । सूत्रेणाहतबन्धेन तत्तत्तन्तुमितं बुधः ॥ ६७ ॥
षडङ्गेन तु संपूज्य तन्मन्त्रेणाभिमन्त्रयेत्[8] । कुम्भदक्षिणभागे तु[9] [10]पवित्राणां तु संस्थितिः ॥ ६८ ॥

भूर्भुवःस्वःपदैर्व्यस्तैः समस्तैरपि होमयेत् । अग्नये त्वथ सोमाय ताभ्यां स्विष्टकृदाहुतिम् ।।
स्वाहान्तैर्दीर्घपूर्वैस्तु हुत्वा मन्त्रैर्यथोदितैः । मण्डलस्थशिवेनैव पावकस्थं शिवं ततः ।।
नाडीसंधानमार्गेण योजयेद्भावयेच्छिवम् ॥

cf. *Acintyaviśvasādākhya* 61, 103b-109:

तृतीयांशं चरोर्हुत्वा विददीत शिवाग्नये । पूर्वादिदिग्वासिभ्यो दिगीशमातृगणरुद्रक्षेत्रपालेभ्यः स्वाहेति ।।
आसां नाम्ना विभेदेन सर्वदिक्षु बहिर्बलिम् ॥
अथ दद्यात्तु वायव्यां क्षेत्रपालबलिं गुरुः । आचम्य विधिवच्छिद्रपूरकं होममाचरेत् ॥
पूर्णाहुतिं व्याहृतिं च हुत्वा रुन्धीत पावकम् ।
तत्र ओं हां अग्नये स्वाहा । ओं हां सोमाय स्वाहा ॥ ओं हां अग्नीषोमाभ्यां स्वाहा । ओं हां अग्नये स्विष्टकृते स्वाहा ॥
कुर्यादाहुतिभिश्चैवं चतुर्भिर्नन्दिकेश्वर । देवं तत्स्थण्डिलेऽभ्यर्च्य वह्नौ तु तदनन्तरम् ॥
नाडीसंधानविधिना योजयेन्नन्दिकेश्वर ॥

[1] A : होमकम् pour होमयेत् [2] B : तन्मन्त्रेण तु चिन्त्येन [3] A : च कृत्वा च pour ततो हुत्वा
[4] A : अग्निपूर्वं pour त्वग्नौ पूर्वं
[5] A : मण्डलस्थेन देवेन [6] A : योजकम् pour योजनम्
[7] cf. *Acintyaviśvasādākhya* 61, 110-113:

अस्त्रमन्त्रेण संशुद्धिं शुद्धपात्रेण कङ्कणम् । हृदयाख्येन मन्त्रेण पवित्राण्यधिरोपयेत् ॥
षडङ्गेन कलामन्त्रैर्ब्रह्माङ्गैर्वा यथाविधि । अङ्गमन्त्रैर्विशेषेण जपं कुर्यात्समाहितः ॥
भक्तियुक्तः शिवं नत्वा रक्षणार्थं समर्चयेत् । पुष्पधूपादिभिश्चैव संपूज्य विधिना तदा ॥
सिद्धान्तपुस्तकं चार्च्य विधिना नन्दिकेश्वर । भक्त्या पदान्तिकं गत्वा गुरोर्दद्यात्पवित्रकम् ॥

cf. *Kriyākramadyotikā*, p. 81:

पूते वंशादिसंभवे पात्रे अस्त्रकवचहृदयानि विन्यस्य, तस्मिन्मूलेन पवित्राण्यारोप्य, पुनः हृदयकवचास्त्राणि विन्यस्य, अन्येन पिधाय, सूत्रैरावेष्ट्य, संपूज्य, संहितामन्त्रैः संपूज्य, कलशायतनस्थे रक्षायै समर्प्य, विज्ञाप्य, लोकपालांश्च यागरक्षणे सावधानांश्च संभाव्य, लिङ्गस्थमपि शिवं संपूज्यानुज्ञाप्य, सिद्धान्तपुस्तके गुरौ च पवित्रं दत्त्वा,

cf. *Iśānaśivagurudevapaddhati*, p 213:

सिद्धान्तपुस्तकाधिष्ठिते विद्यापीठे शिववद् विद्यानामभिरभ्यर्चिते दशाक्षरीवागीश्वर्या प्रणवहृदयमूलविद्यातत्त्वात्मने नमोऽन्तं गन्धपवित्रमारोप्यारात्रिकमुत्तार्यास्त्रवर्मसंपुटे पात्रे महापवित्राणि संस्थाप्य, मन्त्रसंहितयाभिमन्त्र्यास्त्रवर्मभ्यां संरक्ष्याभिपूज्य, कुम्भस्थाय रक्षां विज्ञाप्य,

[8] A : मन्त्रकम् pour मन्त्रयेत् [9] A : भागेन pour भागे तु [10] A : पवित्रेण pour पवित्राणां

पवित्राणां तु रक्षायै विज्ञाप्य कुम्भदेवकम्[1] । [2]सकुशौ धूपदीपौ च [3]पवित्रं पुष्पगन्धकौ ॥ ६९ ॥
अन्यद्द्रव्याणि चादाय पश्चिमेन तु [4]संस्थितिः । पश्चाद्गुरुं नमस्कृत्य तत्पत्न्यै तु नमस्कृतिः ॥ ७० ॥

[पञ्चगव्यचर्वाद्यासेवनम्[5]]

यागालयाद्बहिर्गत्वा चाचम्य भस्म निक्षिपेत् । सकलीकरणं कृत्वा त्रिःकृत्वा [6]मण्डलं गुरुः ॥ ७१ ॥
[7]दर्भासनं तु संकल्प्य दक्षिणेन तु मण्डले । [8]तदुपरि स्थितो वापि [9]पूर्वं चाभिमुखो गुरुः ॥ ७२ ॥
उत्तरे मण्डले शिष्यं पूर्वमुखं स्थितं परम् । पञ्चगव्यं तु [10]पीत्वा चाप्याचामयेत्तु शिष्यकम् ॥ ७३ ॥
[11]स्थितोत्तरमुखं शिष्यं पूर्वमेव तु कल्पयेत । चरुभागाष्टकबलं कृत्वा [12]पिण्डं तु भुक्तिवत् ॥ ७४ ॥
पश्चादास्यस्य शुद्धिं तु ह्याचाम्यं च ततः परम् । दन्तशुद्धिं च कृत्वा चाप्यास्य [13]शुद्धिमतः परम् ॥ ७५
भस्मपात्रं तु निक्षिप्य सकलीकरणं ततः । घोरमन्त्रं शतं जप्त्वा [14]नमस्कृत्य तु देशिकः ॥ ७६ ॥
प्रायश्चित्तास्त्रमन्त्रेण [15]शतमाज्येन होमयेत् । नृत्तगीतेन संतोष्य कृत्वा पूर्णाहुतिं बुधः ॥ ७७ ॥

---

[1] B : देशिक pour देवकम् [2] Le demi-*śloka* 69b est cité dans le *Pavitrotsavavidhi* p. 163.
[3] A : पवित्रे पुष्पेण गन्धकम् [4] A : संस्थितम्
[5] cf. *Kāmikāgama* II 18, 44-45a:
निःसृत्य यागधाम्नस्तु समाचम्य गुरुः शुचिः । पञ्चगव्यं चरुं दन्तधावनं च क्रमाद्भजेत् ॥
आचम्य पुनरप्यन्ते स्वपेच्छिवमनुस्मरन् ॥
cf. *Acintyaviśvasādākhya* 61, 114-117a:
बहिर्निर्गत्य चाचम्य गोमये मण्डलत्रये । पञ्चगव्यं चरुं दन्तधावनं च विनिक्षिपेत् ॥
विधिनाचम्य सान्निध्यकृतसंगीतको गुरुः । स्वपेदनुस्मरन्नीशं बुभुक्षुर्दर्भसंस्तरे ॥
मुमुक्षुरप्यनेनैव प्रकारेणाभिसंविशेत् । केवलं भस्मशय्यायां सोपवासः समाहितः ॥
पवित्रस्याधिवासोऽयं विधिरत्र समाहितः ॥
cf. *Kriyādipikā* p. 125:
बहिर्निःसृत्याचम्य गृहस्थो गोमयानुलिप्तपश्चिमपूर्वकृतमण्डलत्रयेषु पूर्वास्यः पञ्चगव्यं चरुं दन्तधावनं च क्रमादासेव्याचामेत् । "गव्यमात्रं यतेरुक्तं न प्राश्यं चरुभोजनम् ।" इति वचनाद्विरक्तो मण्डलत्रयेषूत्तरास्यश्चरुं विना क्रमात्पञ्चगव्यप्राशनं दन्तधावनं शुद्धाचमनं च कुर्यात् । गृहस्थः शुचिः शय्यां दर्भैरास्तीर्य प्राकारत्रयेण तिलादिना रक्षां कृत्वा शिवमनुस्मरन्सुप्यात् । विरक्तस्तु एवं भस्मशय्यायां सुप्यात् ॥
[6] A : मण्डले कुरु [7] Les *śloka* 72 et 74a sont cités dans le *Pavitrotsavavidhi* pp. 166-167.
[8] A : ततोपरि pour तदुपरि [9] A : पूर्वे चापि मुखो गुरुः [10] A : पीत्वा च आचम्येत तु शिष्यकम्
[11] A : स्थितोत्तरमुखे शिष्ये [12] A : पिण्डेन भुक्तवत् [13] A : शुद्धिरतः pour शुद्धिमतः
[14] A : नमस्कारं तु [15] A : आज्यशतं तु होमकम्

पश्चात्तु मूलमन्त्रेण शतं जप्त्वा तु [1]तद्बुधः । पश्चात्तु भुक्तिकामे तु दर्भासनं तु मिश्रकम् ॥ ७८ ॥
दर्भासनं तु संकल्प्य [2]मुक्तिकामे त्वमिश्रकम् । मिश्रकेण तु तत्काले [3]शिवपादे तु दण्डवत् ॥ ७९ ॥

[अधिवासानन्तरेतिकर्तव्यता[4]]

इत्येतमधिवासं च कृत्वा तु देशिको बुधः । [5]प्रातः स्नात्वा शुचिर्भूत्वा प्रासादं तु [6]प्रविश्य च ॥ ८० ॥
पादौ प्रक्षाल्य चाचम्य सकलीकरणं ततः[7] । पूर्ववद्भूतशुद्धिं च स्थानशुद्धिं च पूर्ववत् ॥ ८१ ॥
अन्तर्यागं च कृत्वाथ[8] विशेषार्घ्यं [9]तु कल्पयेत् । द्वारदेवांश्च संपूज्य गर्भगेहं [10]प्रविश्य च ॥ ८२ ॥
वास्तुदेवांश्च संपूज्य देशिकान्सप्त पूजयेत् । [11]गन्धपवित्रं संगृह्य शुद्धपात्रे तु निक्षिपेत् ॥ ८३ ॥
विधाय मण्डलं मध्ये पवित्रं स्थापयेत्ततः । देवदेवेशपूजार्थं लोकपालांस्त[12] पूजयेत् ॥ ८४ ॥
दशायुधानि संपूज्य [13]चार्घ्येणैव तु योजयेत् । [14]धूपदीपं तु दत्त्वा च यागरक्षां समुच्चरन् ॥ ८५ ।

---

[1] B : देशिकः pour तद्बुधः [2] B : भुक्तिकाम्यं तु मिश्रकम् [3] A : शिवो पादेन दण्डवत्

[4] cf. *Aṃśumadāgama* 14, 65b-84a:

"प्रभाते स्नानमाचरेत् ॥
सकलीकरणं कृत्वा सामान्यार्घ्यंकरो गुरुः । संप्रोक्ष्य बहुरूपेण पवित्राण्यवरोपयेत् ॥
तानीशमण्डले पात्रे चण्डेशार्थं प्रगृह्य च । अष्टपुष्पिकया देवं समभ्यर्च्य हृदाणुभिः ॥
यागशालां प्रविश्याथ सकलीकरणं कुरु[चरेत्?] । सामान्यार्घ्यं च संकल्प्य प्रोक्षयेदस्त्रमन्त्रतः ॥
भान्वादिगुरुपर्यन्तमर्चयेद्देशिकोत्तमः । कुण्डमस्त्रेण संप्रोक्ष्य हृदयेन समर्चयेत् ॥
प्रज्वाल्य वक्त्रमन्त्रेण अघोरेण शतं हुनेत् । अस्त्रेणैव शतं हुत्वा स्पृष्ट्वा गौर्यवतारकम् ॥
मूलेनाज्येन जुहुयात्संपातं पञ्चविंशतिम् । सर्वद्रव्यं समाहृत्य स्विष्टकृद्धोममाचरेत् ॥
नैवेद्यं दापयेच्छम्भोर्धूपदीपादिकं ददेत् । भान्वादिगुरुपर्यन्तं दद्याद्गौर्यवतारकम् ॥
ब्रह्मकुम्भे च वर्धन्यां दद्याद्गौर्यवतारकम् । पञ्चगव्यामृतं कल्प्य स्नपनं कल्प्य देशिकः ॥
विघ्नेश्वरं समभ्यर्च्य द्वारदेवान्समर्चयेत् । गर्भगेहं प्रविश्याथ लिङ्गं पीठस्थलेन च ॥
क्षालनं चास्त्रमन्त्रेण शिवमन्त्रैः समर्चयेत् । पूर्वभागे न्यसेद्द्रव्यमानीयान्तः प्रविश्य च ॥
कर्त्रिकां हृदयेनैव दद्यात्तेनैव देशिकः । शिरसा दन्तकाष्ठं च शिखया दन्तशोधनम् ॥
सूचिकां कवचेनैव नेत्रेण श्रोत्रशोधनम् । नखशोधनमस्त्रेण दद्यात्तेनैव देशिकः ॥
दक्षिणे स्थापितं द्रव्यमानीयान्तः प्रविश्य च । कौपीनादिरजन्यन्तं सद्यादीशान्तकं ददेत् ॥
व्योमव्यापि समुच्चार्य पञ्चगव्यामृतेन च । संस्नाप्य देवदेवेशं स्नपनैरभिषेचयेत् ॥
वस्त्रखण्डेन संमृज्य लिङ्गं पीठं विशेषतः । पश्चिमे स्थापितं द्रव्यं संगृह्यान्त प्रविश्य च ।
ईक्षाहरं हृदा चैव यूकाहरमस्त्रमन्त्रतः । दद्यादघोरमन्त्रेण केशशोधनमञ्जनम् ॥
युवं वस्त्रेति मन्त्रेण वस्त्रेणाच्छादयेत्प्रभुम् । यज्ञोपवीतं हृदयात्पुष्पमाभरणं तथा ॥
चन्दनेन समालिप्य गन्धद्वारेतिमन्त्रतः । नैवेद्यं दापयेच्छम्भोर्धूपदीपादिकं ददेत् ॥
पश्चान्मण्टपमाविश्य हृदयात्षोडशं हुनेत् ॥

[5] Les *śloka* 80b à 83b sont cités dans le *Pavitrotsavavidhi* p. 171.

[6] A : प्रवेशयेत् [7] A : अतः परम् pour ततः [8] A : च pour अथ

[9] A : च pour तु [10] B : प्रवेशयेत् pour प्रविश्य च [11] A : गन्धं पवित्रं संग्राह्य

[12] B : च pour तु [13] B : चार्घ्येण तु सुयोजयेत् [14] B : धूपं दीपं तु

[1]स्नानवेदीं तु संकल्प्य पश्चात्स्नपनं कल्पयेत् । मण्डले पूर्वदेशे तु[2] धान्यासनं त कल्पयेत् ॥ ८६ ॥
पञ्चविंशत्पदं कल्प्य धान्यासने तु मध्यमे । [3]कोष्ठकानि च संकल्प्य मध्यकोष्ठे तु कुम्भकम् ॥ ८७ ॥
कुम्भपूर्वे तु तत्कोष्ठे वर्धनीं तु सुपूजयेत् । लोकपालांस्तु[4] संपूज्य पूर्वादीशान्तकोष्ठके ॥ ८८ ॥
[5]ब्रह्मविष्णू विपूज्याथ पूजयेत दशायुधम् । कलामन्त्रैस्तु संपूज्य तत्तन्मन्त्रेण पूजयेत् ॥ ८९ ॥
[6]शक्त्यादिशक्तिपर्यन्तं कुम्भमध्ये तु तं शिवम्[7] । धूपदीपं च दत्त्वा चाप्यर्घ्यं मूर्ध्नि सुयोजयेत् ॥९०
वर्धनीं पाशुपतास्त्रेण [8]पूर्वतस्तु सुपूजयेत् । [9]तत्तस्थाने तु पूर्वं तु[10] पञ्चगव्यं तु कल्पयेत् ॥ ९१ ॥
पञ्चामृतं च कल्पेन पूर्वमेव सुदेशिकः । [11]तत्स्थ नात्तु विवर्ज्याथ समादायार्घ्यपात्रकम् ॥ ९२ ॥
शिवस्थानं[12] समाश्रित्य पञ्चगव्येन स्नापयेत् । [13]त्रिफलं पञ्चामृतं चैव स्नापयेन्नालिकेरकम् ॥ ९३ ॥
[14]स्नानं तु गन्धतोयेन स्नानं सहस्रधारया । [15]स्नानवेदीं विसर्ज्याथ पद्मासने तु संस्थितम् ॥ ९४ ॥
शक्त्यादिशक्तिपर्यन्तं नित्यं सपूजयेच्छिवम् । [16]आसनं मूर्तिमूलं च कृत्वा त्रयं तथा बुधः ॥ ९५ ॥
विद्यादेहं तु [17]संकल्प्य [18]नेत्रमुद्रां तु दर्शयेत् । मूलेनावाहनं चैव [19]शिवयोगस्य चिन्तनम् ॥ ९६ ॥
स्थापनं संनिधानं च संनिरोधनयोजनम् । दिग्बन्धनावकुण्ठने धेनुमुद्रां तु दर्शयेत् ॥ ९७ ॥
पाद्याचमार्घ्यं दत्त्वा तु पञ्चवक्त्राय तद्विधः । पुष्पदूर्वाक्षतैः पूज्य मूलमन्त्रं तु [20]चिन्तयन् ॥ ९८ ॥
पवित्रं [21]परिमृज्याथ [22]पञ्चस्नानं तु कल्पयेत [23]। [24]तोयं वस्त्रेण संवर्ज्य नववस्त्रेण योजयेत् ॥ ९९ ॥
उपवीतं च [25]लेपनं पट्टं [26]मकुटकुण्डलम् । हारकेयूरमालाश्च त्वर्घ्यं मूर्ध्नि [27]सुयोजयेत् ॥ १०० ॥
[28]गन्धपवित्रमादाय त्वस्त्रमन्त्रेण योजयेत । यागेश्वरे तु देवेशे कुम्भवर्धनिमण्डले[29] ॥ १०१ ॥

---

1 Le demi-*śloka* est cité dans le *Pavitrotsavavidhi* p. 172.

2 A : पूर्वदेशेन 3 A : कोष्ठे केन तु 4 B : च pour तु

5 A : ब्रह्मा विष्णुश्च पूज्येन दशायुधानां पूजयेत्

6 B : शक्रादि pour शक्त्यादि 7 B : योजयेत् pour तं शिवम् 8 A : पूर्वेण तु

9 Les *ślokas* 91b, 92a, 94, 95, 96, 98b, 99, 100 101, et 102a sont cités dans le *Pavitrotsavavidhi* pp. 172 à 178.

10 A : ततः स्थाने तु पूर्वेण 11 A : तत्स्थानं तु 12 A : स्नानं pour स्थानं

13 B : पञ्चामृतं च त्रिफलं 14 A : स्नानं गन्धं तु तोयेन सहस्रधारेण स्नानकम्

15 B : स्नानवेदीविसर्ज्येन 16 A : आसनं मूर्तिकल्पेन

17 A : कल्पेन pour संकल्प्य 18 B : नेत्रमन्त्रं च विन्यसेत् 19 A : शिवभोगं तु pour शिवयोगस्य

20 B : चिन्तयेत् 21 A : परिमार्जेत 22 A : पञ्चस्थानं

23 cf. *Diptāgama* 58, 76:
संध्यापूजनकाले तु सूत्रमादाय बुद्धिमान् । पवित्रं पञ्चगव्येन प्रोक्षयेत्पञ्चमन्त्रकैः ॥

24 B : पवित्रं तोयवर्ज्येन 25 B : लेपेन 26 B : मकुटमण्डलम् 27 A : सुयोजकम्

28 A : गन्धं पवित्रमादाय 29 La forme grammaticale correcte est वर्धनीमण्डले.

इत्येतत्सर्वदेवानामष्टपुष्पं तु [1]विन्यसेत् । पञ्चब्रह्म षडङ्गं च मूलमन्त्रं समुच्चरन् ॥ १०२ ॥
सप्तसंख्याहुतिं हुत्वा चाज्यं [2]वै तण्डुलं तिलम् । प्रायश्चित्तास्त्रमन्त्रेण [3]चाष्टशतं तु [4]होमयेत् ॥ १०३
मूलेन वौषडन्तेन पूर्णाहुतिं तु [5]होमयेत् । पश्चात्पवित्रं पूर्वं तु वृषप्रासादवह्निके ॥ १०४ ॥
धूपदीपेन दत्त्वा च [6]पश्चाद्बलौ सपुष्पकम् । धूपदीपं तु दत्त्वा च सन्निद्धृतं च सर्षपम् ॥ १०५ ॥
तिलं चरुं च माषाढ्यं लाजमाषतिलं तथा । अष्टाविंशतिसंख्याकं स्वाहान्तं शिवमन्त्रकम् ॥ १०६ ॥
[7]अग्नौ होमं तु कृत्वा च पूर्णाहुतिं तु योजयेत् । अन्तर्बहिर्बलिं दत्त्वा तन्मन्त्रेण तु देशिकः ॥ १०७ ॥
पायसान्नं यथाशक्ति मूलेनाज्याहुतिं बुधः । ब्रह्ममन्त्रं समुच्चार्य [8]वक्त्रैकीकरणार्थकम्[9] ॥ १०८ ॥
द्वादशान्ते तु होमं च [10]पश्चाद्व्याहृतिहोमकम् । ब्रह्मादिकारणत्यागे [11]पञ्चग्रन्थि तु [12]चिन्तयन् ॥१०९

[पूर्णाहुतिः]

हृदयं चैव जिह्वां च भ्रूमध्यं ब्रह्मरन्ध्रकम् । सुषुम्नायास्तु मार्गेण बिन्दुस्थानं तु योजयेत् ॥ ११० ॥
अमृतं तु विचिन्त्याथ मूलेन वौषडन्तकम । पञ्चविंशतिमात्रेण कुम्भकेन चतुष्पथम्[13] ॥ १११ ॥
तत्तत्स्थानं तु संगृह्य शङ्खसन्निभमुद्रया । आज्येन चामृतीकृत्य पूर्णाहुतिं तु देशिकः ॥ ११२ ॥
[14]पश्चादाचमनं दत्त्वा काम्यं विज्ञापयेद्गुरुः । पुष्पाञ्जलिं नमस्कृत्य [15]स्तोत्रेणैव तु योजयेत् ॥ ११३ ॥
[16]होमरक्षां च निक्षिप्य कुण्डदेशात्तु वर्जयेत् ।

---

[1] B : वर्जयेत् [2] A : तु pour वै [3] B : अष्टादशं तु [4] A : होमकम्
[5] A : होमकम [6] A : पश्चाद्बलौष्टपुष्पकम्
[7] A : अमोहेन तु [8] A : वक्त्रेण करणार्थकम् ; B : वक्त्रेण कारणार्थकम्
[9] cf. *Kriyākramadyotikāvyākhyā prabhā*, p. 166 :
"कथ्यते च मुखैकता ।
सद्यादिपञ्चवक्त्रेभ्यो घृतधारां क्षिपेत्क्रथा । अग्निकोणमथारभ्य वायुकोणान्तनीतया ॥
निर्ऋतेः कोणमारभ्य रुद्रकोणान्तनीतया । कुर्वीत वदनैकत्वमविच्छिन्नाज्यधारया ॥
[10] B : पश्चाद्वै व्याहृतिं हुनेत्
[11] cf. *Kāraṇāgama* I 30 218b-220a:
पञ्चग्रन्थि तथाच्छेद्य प्रारभेदात्मयोजनम् । जानुग्रन्थिस्तु प्रथमं नाभिग्रन्थिर्द्वितीयकम् ॥
गलग्रन्थिस्तृतीयं तु ललाटे तु चतुर्थकम् । पञ्चमं तु शिरोग्रन्थि च्छेदयेत्तु हृदा पुरा ॥
[12] A : चिन्तितम्
[13] cf. *Jñānaratnāvali* (citée dans le *Kriyākramadyotikāvyākhyā prabhā*, p. 157) :
हृदा चतुष्पथं कार्यं सोमेऽग्राग्रकुशद्वयात् ।
[14] Le *śloka* 113 est cité dans le *Pavitrotsavavidhi*, p. 174
[15] A : स्तोत्राणां तु [16] A : होमरक्षणे

[पवित्रारोपणम्[1]]

[2]परिचारं च स्नानेन शुद्धवस्त्रेण योजयेत् ॥ ११४ ॥
यज्ञोपवीतं पवित्रं चोष्णीषं चोत्तरीयकम् । इत्येतैरप्यलंकृत्य [3]तन्मूर्ध्नि चास्त्रशुद्धितः ॥ ११५ ॥
मूर्ध्नि पवित्रपात्रेण विन्यसेदर्घ्यपात्रकम् । परिचारकोऽस्त्रमुच्चार्य सर्वमङ्गलं घोषयेत् ॥ ११६ ॥
[4]प्रासादं प्रदक्षिणं कृत्वा पञ्चपञ्चप्रदक्षिणम् । द्वारादिवास्तुनाथान्तं[5] पवित्रेण तु योजयेत् ॥ ११७ ॥
पश्चाद्गर्भगृहं विश्य [6]त्वाचार्यः स्वात्मपूजनम् । [7]आत्मपवित्रं दत्त्वा चाप्युपचारं निवेदयेत् ॥ ११८ ॥
[8]पश्चाच्छिवाय चार्घ्येण दत्त्वा वै चाष्टपुष्पकम् । [9]पवित्राणि तु संगृह्य गन्धपुष्पेण पूजयेत् ॥ ११९ ॥
[10]दूर्वाक्षतैस्तु युक्तेन धूपदीपं निवेदयेत् । पवित्रं [11]शिवाय दद्यात्तु तत्त्वत्रयं समुच्चरन् ॥ १२० ॥
[12]शिवतत्त्वात्मतत्त्वान्तमुच्चरेन्मुक्तिकामकः । आत्मतत्त्वाच्छिवान्तं च भुक्तिकामे विधीयते ॥ १२१ ॥
[13]सर्वकार्ये तु शुध्यर्थं गङ्गावतारं योजयेत् । [14]इत्थं पवित्रं दत्त्वा च कालव्याप्ते तु बुद्धिमान् ॥१२२॥
आत्मतत्त्वादि मायान्तं सर्वतत्त्वं तु चिन्तयन् । [15]शिवात्मने निवेद्यैव गङ्गावतारं बुद्धिमान् ॥१२३॥

---

[1] cf. *Aṃśumadāgama* 14, 84b-95a:

परिचारकमाहूय सोष्णीषं सोत्तरीयकम् । पवित्रं वाहयित्वा तु सर्वालंकारसंयुतम् ॥
हर्म्यप्रदक्षिणं कृत्वा द्वारदेशं प्रविश्य च । द्वारदेवान्समभ्यर्च्य दद्याद्गौर्यवतारकम् ॥
गर्भगेहं प्रविश्याथ पूजयेत्परमेश्वरम् । आत्मविद्यादिभिस्तत्त्वैर्दद्याद्गौर्यवतारकम् ॥
शङ्खघोषसमायुक्तं सर्वालंकारसंयुतम् । महेशप्रतिमादीनां परिवारामरादिषु ॥
प्राकारे बलिपीठे च दद्याद्गङ्गावतारकम् । प्रभूतहविषं दत्त्वा धूपदीपादिकं ददेत् ॥
ओड्याणमीशमन्त्रेण पुरुषाद्योगवेष्टनम् । भिक्षापात्रमघोरेण वामेनैव कमण्डलुम् ॥
व्याघ्राजिनं तु सद्येन हृदा च वेत्रदण्डकम् । चामरं शिरसा चैव छत्रं वै शिखयाणुना ॥
भसितं कवचेनैव पादुके नेत्रमन्त्रतः । मात्रादण्डमथास्त्रेण खड्गं तेनैव दापयेत् ॥
दद्यान्नित्यपवित्रं तु अस्त्रमन्त्रेण देशिकः । पश्चान्नित्याग्निकार्यादिसंध्याशेषं समाचरेत् ॥
महेश्वरं समभ्यर्च्य गन्धपुष्पस्रगादिभिः । सर्वालंकारसंयुक्तं बल्यन्तं चोत्सवं कुरु ॥
एकाहं त्रियहं वापि पञ्चसप्ताहमेव वा । नवाहं वा प्रकर्तव्यं यानमेवं समाचरेत् ॥

[2] Le demi-*śloka* 114b est cité dans le *Pavitrotsavavidhi* p. 179

[3] A : तन्मूर्ध्ने चास्त्रशुद्धिदम् [4] A : प्रासादप्रदक्षिणं [5] A : नाथं च pour नाथान्तं

[6] A : आचार्यात्म पूजयेत् [7] A : आत्मे पवित्रं [8] A : पश्चाच्छिवमर्घ्येण

[9] A : पवित्रेण तु संग्राह्य [10] A : दूर्वामक्षतयुक्तेन [11] A : शिवदत्तेन

[12] voir p. 193, note 4.

[13] A : सर्वकार्यं तु

[14] cf. *Acintyaviśvasādākhya* 61, 125b-126a:

स्मरन्कालात्मकं देवं प्रब्रूयादिति शङ्करम् । कालात्मना त्वया देव यद्दृष्टं मामके विधौ ॥

ibid, 131b-132a:

सर्वकारणपाल्येषु सर्वतत्त्वेषु सर्वदा । मूलं लयान्तमुच्चार्य दद्याद्गङ्गावतारकम् ॥

[15] A : शिष्यात्मानं निवेदेन

पादुकं भस्मपात्रं च दण्डकौपीनभैक्षकम् । योगपट्टं केशशोधं शलाकाञ्जनपात्रकम् ॥ १२४ ॥
[1]इत्थं पवित्रं दत्त्वा च परिवारे पवित्रकम् । [2]निवेद्यार्घ्येण दत्त्वा च [3]पवित्राणि निवेदयेत् १२५ ॥
[4]क्षेत्रपालं विशेषेण पूजयेत्त्वमितं गुरुः । याग[5]गेहमुपागम्य प्रायश्चित्तार्थहोमकम् ॥ १२६ ॥
अस्त्रमन्त्रं समुच्चार्य शतं वार्धं तु होमयेत् । पूर्णाहुतिं तु कृत्वा च मूलमन्त्रं समुच्चरन् ॥ १२७ ॥
पश्चादेवं तु संपूज्य चाष्टपुष्पेण योजयेत् । [6]मन्त्रेणैव तु सर्वेषां शिवहस्तं प्रदापयेत् ॥ १२८ ॥
विशेषेण तु संपूज्याप्युपचारं निवेदयेत् । [7]पाद्यमाचमनं चार्घ्यं दत्त्वा जपं निवेदयेत् ॥ १२९ ॥
तत्त्वमन्त्रं समुच्चार्य दत्त्वा शुद्धपवित्रकम् । धूपदीपं च दत्त्वा तु स्तोत्रनृत्तं च योजयेत् ॥ १३० ॥

[चण्डेशे निर्माल्यपवित्रारोपणम्[8]]

निर्माल्यं तु पवित्रेण पुष्पेण [9]तु सुयोजयेत् । [10]उद्वाहयेत्तु चण्डेशे पश्चाद्धोमं समाश्रयेत् ॥ १३१ ॥
[11]तन्मन्त्रं तु समुच्चार्य शतं वार्धं तु होमयेत् । चण्डे पवित्रं [12]दत्त्वा तु चास्त्रमन्त्रं समुच्चरन् ॥ १३२
तद्भस्म शुद्धपात्रेण चादायालिप्य[13] हस्तकम् । तटाके भस्म निक्षिप्य पश्चात्स्नानं समाचरेत् ॥ १३३ ॥

---

[1] B : इत्येवं pour इत्थं

[2] Le demi-*śloka* 125a est cité dans le *Pavitrotsavavidhi*, p. 185.

[3] A : पवित्रेण

[4] A : क्षेत्रपालाद् pour क्षेत्रपालं [5] B : गृह pour गेह [6] B : मन्त्रं सर्वेण सर्वेषां

[7] A : पाद्याचमनार्घ्यं दत्त्वा जपं तु विनिवेदयेत्

[8] cf. *Aṃśumadāgama* 14, 95-104:

लिङ्गात्पवित्रमुद्वास्य क्षालयेदस्त्रमन्त्रतः । तेन मन्त्रेण जुहुयात्समिदाज्यान्नकैः सह ॥
शतमर्धं तदर्धं वां प्रत्येकं जुहुयात्क्रमात् । एवं दिने दिने कुर्यात्क्रियामेनां समाचरेत् ॥
अवरोहदिने प्राप्ते नित्यपूजां समाचरेत् । जयादिरभ्याधानं च राष्ट्रभृद्धोममाचरेत् ॥
कुण्डेष्वग्निं विसृज्याथ कुम्भमध्ये तु योजयेत् । पश्चात्कुम्भं समुद्धृत्य गर्भगेहं प्रविश्य च ॥
संस्नाप्य देवदेवेशं प्रभूतहविषं ददेत् । नित्यहोमं समारभ्य वृत्तान्तं पूर्ववन्नयेत् ॥
अर्धयामावसानान्ते चण्डयागं समारभेत् । चण्डेश्वरं समभ्यर्च्य स्नपनाद्यैर्विशेषतः ॥
वस्त्रमाल्यैरलंकृत्य श्वेतचन्दनं लेपयेत् । आमन्त्रादिपवित्रं च चण्डनाथस्य रोपयेत् ॥
पायसं च निवेद्याथ धूपदीपादिकं ददेत् । ततो होमं प्रकर्तव्यं स्थण्डिले तु विशेषतः ॥
लीलावत्यग्निमार्गेण होमं कुर्याद्यथाविधि । अग्निमध्ये यजेच्चण्डं तन्मन्त्रेण हुनेत्क्रमात् ॥
मनसा पूज्य चण्डेशं दिवापूजावसानके । पवित्राणि हुनेत्तत्र चण्डनाथं विसर्जयेत् ॥

[9] B : च pour तु [10] A : उद्वाहनं तु [11] A : तन्मन्त्रेण तमुच्चार्य [12] A : दत्तेन

[13] A : निघ्य pour लिघ्य

[आचार्यपूजा[1]]

आचार्यं पूजयेत्सम्यग्वस्त्रहेमाङ्गुलीयकैः । जङ्गमेन तु संपूज्य नैवेद्यं तु निवेदयेत् ॥ १३४ ॥
[2]दत्त्वा द्रव्यं यथाशक्ति पश्चाच्छिष्यं तु भक्तवत् । इत्थं पवित्रं संपूज्य पश्चादुत्सवमाचरेत्[3]॥ १३५ ॥

इति 'श्रीमद्रौरवतन्त्रे [क्रियापादे] पवित्रारोपणविधिर्नाम[5] [6]पञ्चचत्वारिंशः पटलः ॥

---

[1] cf. *Aṃśumadāgama* 14, 105:
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः । एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥
cf. *Sahasrāgama* 26,56:
आचार्यदक्षिणां दद्याद्वस्त्रहेमाङ्गुलीयकैः । धातुपञ्चवसुनिष्कमाचार्याय प्रदापयेत् ॥

[2] A : यथाशक्ति द्रव्यं दत्त्वा च [3] A : आश्रयेत् pour आचरेत् [4] A : श्री pour श्रीमद्

[5] A omet नाम [6] A : षट् pour पञ्च ; B : सप्त

[षट्चत्वारिंशः पटलः]

[अन्त्येष्टिविधिः[1]]

[अन्त्येष्टिशब्दविवरणम्[2]]

अतः परं प्रवक्ष्यामि ह्यन्त्येष्ट्याश्च विधिक्रमम् । अन्त्यत्वं[3] परतत्त्वं [4]चापीष्टिस्तत्त्वप्रवेशनम् ॥ १ ॥
विधिना योगमार्गेण ह्यन्त्येष्टिरभिधीयते ।

[विपन्नस्य स्नानालंकारादि[5]]

[6]सायुज्ययोगात्तत्काले शिवदर्शेन पूजयेत् ॥ २ ॥
देशिको ह्यात्मयोगे च तत्काले सव्यकर्णके । शिवमन्त्रं समुच्चार्य [7]भस्म सर्वाङ्गके क्षिपेत् ॥ ३ ॥

---

[1] Pour अन्त्येष्टिविधि voir *Acintyaviśvasādākhya* 67, *Kāmika* II 27, *Kālottara* 26, *Cintya* 28 à 30, *Makuṭa* 17 et *Svāyambhuva* 31.

[2] cf. *Cintya* 28, 16:
अन्त्यं च परमं तत्त्वमिष्टिश्च प्रविवेशनम् । विधिना योगमार्गेण संचिन्त्य परमं शिवम् ॥

[3] A : अन्त्यत्वं [4] A : च इष्टितत्त्वं प्रवेशकम्

[5]. cf. *Kāmika* II 27, 7b-20:
यस्य प्राणवियोगाख्यः कालो जन्तोः समागतः । विधाय स्नानमाग्नेयं मन्त्रसंनद्धविग्रहम् ।
मुमुक्षोश्च तथाग्नेयं मन्त्रकार्यं विधाय च । अष्टपुष्पिकया देवं पूजयित्वा मुमुक्षवे ॥
स्वकरेण परेषां वा कराभ्यां चन्दनादिभिः । संस्थाप्य तस्य हृदये लिङ्गरूपं महेश्वरम् ॥
स्पर्शयित्वाञ्जलिं तस्य मस्तके संनिधाप्य च । तदर्थमेतद्वाक्यं च देवदेवेशसंनिधौ ॥
दीक्षितोऽयं त्वया देव शिवाज्ञापरिपालकः । नेयः शिवत्वमचिरात्सपिण्डीकरणोत्तरम् ॥
एवं विज्ञाप्य देवेशं स्वस्थाने विनिवेशयेत् । एकधा बहुधा वापि क्रियामेनां समाचरेत् ॥
पठेदुत्क्रान्तिसमये कर्णोपान्तेऽणुसंहिताम् । विशेषाच्छिवमन्त्रं च मन्त्रं पञ्चाक्षरं तु वा ॥
एतत्सर्वं विधेयं तु देशिकेनेतरेण वा । तद्गोत्रजेन वान्येन वक्ष्यमाणं च कर्म यत् ॥
गतप्राणे नरे तस्य स्नानार्थं तीर्थसंभवम् । जलशतघटाद्यैस्तु सुस्नातैः परिगृह्य वा ॥
तैः स्नापयेद्गृहस्थश्चेल्लौकिकस्नानसंयुतम् । विधायैवं घटान्वापि कलशान्स्नपनोक्तितः ॥
संस्थाप्य वर्धनीहीनं केवलोदकसंयुतम् । स्थण्डिलाढ्यं सवस्त्रं च सहिरण्यं सकूर्चकम् ॥
पिधानाक्षतसंयुक्तं विद्याङ्गहृदयार्चितम् । स्नापयेद्वा गृहे त्वेतच्छमशाने वा समाचरेत् ॥
अथवा स्नपनोपेतं संस्नाप्याग्नेयमाचरेत् । कृत्वा संहारमार्गेण कौपीनं वसनं तथा ॥
परिवर्त्याक्षमालाद्यैर्भूषणैर्भूषणार्हकैः ।

cf. *Cintya* 28, 7-9a:
निर्देशं तु समासाद्य गोमयेनानुलेपयेत् । कृत्वा शरीरशुद्धिं तु रजन्यामलकादिभिः ॥
नववस्त्रैरलंकृत्य गन्धमाल्यैरलंकृतम् । सर्वगन्धानुलिप्ताङ्गं भस्मोद्धूलितविग्रहम् ॥
वस्त्रसूत्रोत्तरीयं च दर्भाणामुपरि न्यसेत् ।

[6] B : सायुज्ययोगी तत्काले [7] A : भस्म सर्वाङ्ग निक्षिपेत्

रुद्राक्षं [1]धारयेच्चैव पश्चात्स्नानं समाचरेत् । [2]रुचिरासनं संकल्प्य त्वात्मासनं तु पूजयेत् ॥ ४ ॥
[3]तदासनसमायुक्तो नववस्त्रं तु बन्धयत् । गोमूत्रं गोमयं भस्म [4]वल्मीकमृत्तिकायुतम् ॥ ५ ॥
प्रक्षाल्य त्वस्त्रमन्त्रेण कलामन्त्रेण शुद्धितम् । ब्रह्मषडङ्गमुच्चार्य त्वभिमन्त्र्य तु देशिकः ॥ ६ ॥
[5]प्रेतस्नाने तु कृत्वा च तद्द्रव्येण तु मिश्रकम् । पादादिब्रह्मरन्ध्रान्तमस्त्रमन्त्रेण [6]चिन्तयन् ॥ ७ ॥
[7]स्नानतोयस्य शुद्धिं तु कलामन्त्रं समुच्चरन् । आत्ममन्त्रेण चास्त्रेण कृत्वा स्नानं समाचरेत् ॥ ८ ॥
[8]देहं तोयेन शुद्धं च कृत्वा कौपीनधारितम् । [9]नववस्त्रं च बध्वा तु भस्मरुद्राक्षधारणम् [10]॥ ९ ॥
[11]सर्वाभरणैरलंकृत्य [12]प्रेतोद्वासनमाचरेत् । गृहमध्ये तु [13]शुद्धे तु दर्भासने तु मिश्रयेत् ॥ १० ॥
गन्धमाल्यैश्च युक्तं च पवित्रं [14]सव्यनामिके । यज्ञोपवीतधरणं[15] दर्भसूत्रकयोजनम् ॥ ११ ॥
हस्ताङ्गुष्ठकबन्धं च पादाङ्गुष्ठकबम् । शुद्धवस्त्रातिरोधानं दिग्बन्धनावकुण्ठनम् ॥ १२ ॥

[चूर्णोत्सवः[16]]

चूर्णोत्सवार्थं कोष्ठे तु मध्ये गोमयशोधिते । कुम्भवर्धनी संपूज्य स्थापयेदीशकोणके ॥ १३ ॥

---

[1] A : धारितं चैव

[2] Pour रुचिरासन voir *Kāraṇa* I 30, 69b-70:

ऊरुजानुद्वयं चैव पादाग्रं चैव संपुटम् । ईषन्नासाग्रदृष्टिस्तु देहदीर्घं तु तद्भजु ॥
रुचिरासनमाख्यातं सर्वकार्येषु पूजितम् ।

[3] A : तत्तदासनमिश्रेण नववस्त्रेण बन्धकम्

[4] A : वल्मीकं मृत्तु उत्तमम्

[5] A : प्रातस्नानेन कृत्वा च

[6] A : चिन्तितम्

[7] A : स्नानतोयेन शुद्धेन

[8] A : देहतोयेन

[9] A : नववस्त्रेण बद्धेन

[10] A : धारयेत् pour धारणम्

[11] B : सर्वभूषैरलंकृत्य

[12] A : तत्तत्स्नानं तु वर्जयेत्

[13] A : शुद्धेन दर्भासनं तु

[14] A : सव्यनामिकाम् ; la forme grammaticale correcte est सव्यानामिकायाम्

[15] A : धारेण pour धरणं

[16] cf. *Cintyāgama* 28, 9b-23a:

वितानध्वजसंयुक्तं दर्भमालाभिरावृतम् । तदग्रे मण्टपं कृत्वा पिष्टचूर्णैरलंकृतम्॥
स्थण्डिलं तत्र कर्तव्यं शालितण्डुलकादिभिः । पञ्चकुम्भं तु संग्राह्यं वर्धनीसंयुतं भवेत् ॥
ससूत्रान्सापिधानांश्च सवस्त्रान्वारिपूरितान् । शिवकुम्भं च मध्ये तु वर्धनीं तस्य वामके ॥
चतुर्दिक्षु चतुष्कुम्भान्स्थापयेत्तु विशेषतः । देवमन्त्रमनुस्मृत्य कुम्भमध्ये तु विन्यसेत् ॥
देवीमन्त्रमनुस्मृत्य वर्धनीमध्यमे न्यसेत् । चतुरश्रार्धचन्द्रं च त्रिकोणं च षडश्रकम् ॥
सुवृत्तं च पृथिव्यादिमण्डलाकृतयः क्रमात् । पीतं शुक्लं च रक्तं च कृष्णाभं धूम्रवर्णकम् ॥
पृथिव्यादीनि बीजानि लवरयहकारकाः । पृथिव्यादीनि भूतानि सद्यादीशान्तं योजयेत् ॥
तत्तत्कुम्भे न्यसेद्देवं संहारक्रममेव हि । गृहद्वाराग्रतः स्थाने चूर्णोत्सवं समाचरेत् ॥
अथवा तु चितास्थाने चूर्णोत्सवं समारभेत् । भस्मशुभ्रतनुं कृत्वा त्रिपुण्ड्रं विधिना बुधः ॥
संहारन्यासमेवोक्तं स्थाने प्रोक्षणसंयुते । अर्थं तु गोमयैर्लिप्य सुस्थलं कारयेत्सुधीः ॥
पूर्वे तु स्थाप्य भेरीं तु गन्धादिभिरथार्चयेत् । ताडयेद्देशिकादिस्तु पश्चाल्लूखलमर्चयेत् ॥

[1]लोकपालकपूजा च गन्धपुष्पाणि योजयेत् । धूपदीपेन संपूज्य चार्घ्यं वै मूर्तियोजनम् ॥ १४ ॥
ताम्बूलं तण्डुलं चैव [2]हरिद्रां मन्त्रशुद्धिताम् । [3]लूखलं मुसलं चैव दर्भवस्त्रं तु योजयेत् ॥१५॥
त्रिमूर्तिदेवाः संपूज्याः कूर्चबन्धे तु तद्भवेत् । धूपदीपं तु देवानामर्घ्ये दत्ते यजेद्बुधः॥ १६ ॥
शाल्यासने च पूर्वे तु भेर्यां चैव सुपूजयेत् । वामे तु भद्रकालीं च सव्ये रुद्रं प्रपूजयेत् ॥ १७ ॥
यमतालं तु ताडेत [5]पश्चाद्भेरीं च ताडयेत् । [6]पञ्चघोषं तु कृत्वा च स्तोत्रनृत्तं तु योजयेत् ॥ १८ ॥
तैलं हरिद्रां निक्षिप्य प्रेतमूर्ध्नि च दापयेत् । [7]माहेश्वराणां दत्तं तु [8]तैलं ताम्बूलकं भवेत् ' ॥ १९ ॥

[आसन्दिकामारोप्य प्रेतस्य श्मशाननयनम्[10]]

पश्चाद्विमानं कृत्वा चाश्वत्थजम्बुकचूतकैः । उदुम्बरेण पूगैश्च वह्निवृक्षेण युक्तकम् ॥ २० ॥

लूखलं मुसलं भेरीं वेष्टयेद्वस्त्रमेव च । शिवभक्तैर्विशेषेण शिववाचकघोषणम् ॥
शिवदासीं समभ्यर्च्य वस्त्रगन्धादिभिस्तथा । मुसलं पाणिसंयुक्तं लूखले च प्रवेशयेत् ॥
हरिद्रां चूर्णितां तैलं कल्पयेच्छिवशासने । भक्तेषु कल्पयेत्पश्चात्पारशैवेषु श्रेष्ठकम् ॥

[1] A : लोकपालकपूज्येन [2] A : हरिद्रं मन्त्रशुद्धिदम् [3] cf. *Rauravāgama* vol. I, p. 86, note 17

[4] A : त्रिमूर्तिदेवेन संपूज्य [5] A : पश्चाद्भरिं ताडयेत्

[6] Pour पञ्चघोष voir *Kāraṇa* I 31, 34b-37a:

कुर्यात्पञ्चमहाशब्दं तथाशुभनिवृत्तये । दारुजं पृथिवीजातं शङ्खजं चाब्जमुच्यते ॥
आग्नेयं लोहजं प्रोक्तं वाद्यव्यं वंशजं भवेत् । गेयं गगनजातं स्यात्पञ्चैते शब्दमुच्यते ॥
सुषिरं गानकं चैव चर्मबन्धं तथैव च । तन्त्रीवाद्यसमायुक्तं शब्दं पञ्चमहान्तकम् ॥

[7] A : माहेश्वरेण दत्तेन [8] B : तैलं ताम्बूलवद्भवेत्

[9] cf. *Kāmikāgama* II 27, 21-22a:

दीक्षितानामथान्येषां शिवशासनधारिणाम् । अन्येषां च यथायोग्यं रात्रिचूर्णं च तैलयुक् ॥
ताम्बूलसहितं सर्वं जनेभ्यो दापयेत्तदा ॥

[10] cf. *Kāmikāgama* II 27, 22b-32:

आसन्दिकां नयेद्यज्ञवृक्षैरन्यैरनिन्दितैः । पुरुषायतमानं च षडङ्गुलविवर्धनात् ॥
त्रिहस्तान्तसमायामां त्रिचतुष्पञ्चमांशतः । सुविस्तारसमायुक्तामोजःसंख्यान्तविष्टराम् ॥
आसन्दिकां समारोप्य कूटान्तोर्ध्वकृतक्रियाम् । रक्तमालाम्बरक्लृप्तवितानालम्बनान्विताम् ॥
इतरं चेदथोत्कान्त्या संस्थितं शिवयोगिनम् । निःसारयेदलंकृत्य शुभैस्तं सर्वभूषणैः ॥
शिबिकां वैदृशीं शुद्धामानीयारोपयेच्छिवम् । स्वनता मुखरेणोच्चैरातोद्येनाग्रगामिना ॥
सङ्केन समयस्थानां पृष्ठतश्चाभिनन्दितम् । शङ्खध्वनिसमायुक्तं गानध्वनिसमायुतम् ॥
तज्ज्ञातयोऽनुगच्छेयुरनुदघाटितमस्तकाः । निगृह्याक्षिजलं चाक्ष्णोः संसारासारभाविताः ॥
दक्षिणस्थशिरोयुक्तं बद्धाङ्गुष्ठद्वयान्वितम् । दर्भरज्ज्वा तमावेष्ट्य तदेशानीं दिशं नयेत् ॥
दीक्षितैस्तुल्यजातीयैरपसव्योपवीतकैः । जपद्भिरस्त्रमन्यैर्वा वाहयित्वोदकान्वितम् ॥
वह्निं च तत्पुरोऽन्येन सधूमं त्रिकटिस्थितम् । वाह्येदर्धविश्रामदक्षिणावनते मनाक् ॥
सुविशुद्धे भुवः पृष्ठे मृतं दक्षिणमस्तकम् ॥

अष्टहस्तप्रमाणेन चायाममिति कल्पयेत् । चतुर्हस्तप्रमाणेन विस्तारं तु तथा भवेत् ॥ २१ ॥
इति लक्षणकासन्दीं कृत्वा रक्तैस्तु वस्त्रकैः । [1]पुष्पदर्भैरलंकृत्यारोप्य प्रेतं च तद्बुधः ॥ २२ ॥
[2]चतुर्भिः पुरुषैस्तुल्यैर्दीक्षोपेतैस्तु निक्षिपेत् । [3]ग्रामप्रदक्षिणं [4]कुर्याच्छमशानासन्नसंस्थितौ ॥ २३ ॥
अन्तर्बलिं तु निक्षिप्य बहिर्बलिस्तथा भवेत् । प्रच्छन्नपटमादाय प्राङ्मुखं [5]यातु धावतु ॥ २४ ॥

[मण्टपः[6]]

शुद्धभूमौ श्मशाने तु शवं संस्थाप्य तद्बुधः । पश्चान्मण्डपं संकल्प्य षट्त्रिंशद्धस्तमानकम् ॥ २५ ॥
आयामविस्तरं प्रोक्तं चतुर्द्वारसमन्वितम् । मण्डपस्य तु मध्ये तु चायामं हस्तमात्रकम् ॥ २६ ॥
कुण्डं कृत्वाथ विस्तीर्णमष्टाङ्गुलसमन्वितम् । एकमेखलां कृत्वा तु चोर्ध्वे च चतुरङ्गुलम् ॥ २७ ॥
हस्तमात्रप्रमाणेन वेदिकां वायुकोणके । अष्टाङ्गुलप्रमाणेन कृत्वा विस्तीर्णमुच्यते ॥ २८ ॥
करमानविधानेन चैशान्यां दिशि कोणके । सप्ताङ्गुलं तु विस्तीर्णं कृत्वा तद्वेदिकां बुधः ॥ २९ ॥

[चिताकल्पनम्[7]]

कुण्डाग्निदिशि कल्पेत चतुर्हस्तं तु दीर्घकम् । विस्तीर्णं तु द्विहस्तेन चाष्टाङ्गुलं तु कल्पयेत् ॥ ३० ॥

---

[1] cf. *Acintyaviśvasādākhya* 67, 3b-4:
स्वर्गसोपानयुक्ते च शवमारोपयेत्ततः । अपसव्योपवीतिभिर्दीक्षितैस्तुल्यजातिभिः ॥
सस्कन्धैः शस्त्रमन्त्रस्य जपयुक्तैश्च धारयेत् ॥

[2] **A** : चतुष्पुरुषेण दीक्षेण उपवीतं तु निक्षिपेत् [3] B omet les *śloka* 23b à 169.

[4] **A** : कुर्यात् स्मशानासनसंस्थितम् [5] A : यास्तु

[6] cf. *Acintyaviśvasādākhya* 67, 6-7:
चतुर्हस्तयुतं कूटं तत्कुर्यात्प्रपयान्वितम् । सर्वालंकारसंयुक्तं सर्वमालासुशोभितम् ॥
कुण्डं कुर्याद्विधानेन चतुरश्रैकमण्डलम् । षडङ्गुलोच्छ्रितं वायौ तन्मृदा स्थण्डिलं भवेत् ॥
cf. *Kāmika* II 27, 37b-39:
अथ स्थानमदूरस्थमुदक्स्थं समं शुचि । प्राप्य कूटं प्रपां वापि विधायैवं तदन्तरे ॥
षडङ्गुलोच्छ्रयोपेतं मेखलैकं युगाश्रकम् । कृत्वा कुण्डं विधानेन हास्तिकं तन्मृदानिले ॥
संकल्प्य स्थण्डिलं तद्वत् ”
cf. *Cintya* 30, 2-5:
श्मशाने मण्टपं चाथ षोडशस्तम्भसंयुतम् । दर्भमालाभिरावेष्ट्य पुष्पमालासमन्वितम् ॥
द्वादशायामसंयुक्तं सक्तुकं तु क्रमेण तु । चतुर्द्वारसमायुक्तं दर्पणोदरसंनिभम् ॥
मण्टपे वायुदिग्भागे वेदिकां च प्रकल्पयेत् । तन्मध्ये त्वग्निकुण्डं च कल्पयेत्तद्विचक्षणः ॥

[7] cf. *Acintyaviśvasādākhya* 67, 8-9a:
चतुष्करं चिताखातं कुण्डदक्षिणतो भवेत् । विस्तीर्णाकारयुक्ताढ्यमष्टाङ्गुलविहीनकम् ॥
कुण्डादित्रयमालिप्य गोमयाम्बुभिरेव च ॥
cf. *Kāmika* II, 27, 39b-41a:
“ चिताखातं चतुष्करम् ॥
हस्तद्वितयविस्तीर्णमष्टाङ्गुलगभीरकम् । कुण्डदक्षिणतः कुर्यान्निष्पाद्यैवं त्रयं गुरुः ॥
गोमयेनोपलिप्याथ ”
cf. *Cintya* 30, 6a: कुण्डस्याग्नेयदिग्भागे चितास्थानं प्रकल्पयेत् ॥

चितास्थानं तु कृत्वा चाप्येतत्त्रयं तु तद्बुधः । चितास्थानं च कुण्डं च वेदीं गोमयशुद्धितम् ॥ ३१ ॥

[मण्डलकल्पनम्[1]]

पश्चाद्वर्णं च निक्षिप्य विजयास्त्रं जपेद्गुरुः । पञ्चविंशत्पदं चापि हरिद्रां मध्यपञ्चके ॥ ३२ ॥
नैर्ऋत्यां च चतुःश्वेतं रक्तमग्निचतुष्पदे । वायुकोणे चतुष्कृष्णमैशान्यां धूमवर्णकम् ॥ ३३ ॥
पूर्वं एकपदं स्वर्णं याम्यैकं कृष्णवर्णकम् । पश्चिमैकपदं श्वेतमुत्तरे रक्तवर्णकम् ॥ ३४ ॥

[द्रव्यसंकल्पनम्[2]]

सर्वद्रव्याणि संकल्प्य दर्भमाल्येन बन्धयेत् । पुष्पमाल्यैरलंकृत्य पश्चात्परिधिं कल्पयेत् ॥ ३५ ॥
द्वादशदर्भान्संगृह्य नवदर्भं तु कूर्चकम् । स्रुक्स्रुवौ चापि संकल्प्य पश्चात्स्नानं समाचरेत् ॥ ३६ ॥
वर्धन्यां तु जलं पूर्यं चास्त्रमन्त्रेण शुद्धितम् । मण्डपानुप्रदक्षिण्य वेदिकायां तु संस्थितः ॥ ३७ ॥
सर्वाङ्गोद्धूलनं कृत्वा त्रिपुण्ड्राणि तु निक्षिपेत् । उष्णीषोत्तरवस्त्राण्युपवीतं विपरीतकम् ॥ ३८ ॥
पवित्रं धारयेत्पश्चाद्रुचिरासनसंस्थितः । उत्तराभिमुखो भूत्वा त्वाचमनार्घ्यपात्रकम् ॥ ३९ ॥
तिलसर्षपगोक्षीरं कुशकूर्चं तु तोयकम् । प्रणवार्घ्येण शुद्धं तु तत्तोयैर्द्रव्यशुद्धितम् ॥ ४० ॥
पञ्चग्रन्थिकशुद्धिं तु भूतशुद्धिमतः परम् । स्थानशुद्धिं च कृत्वा चाप्यन्तर्यागं तु पूर्वकम् ॥ ४१ ॥
[3]विपरीतन्यासं कृत्वा च पश्चाद्वर्धनीं पूजयेत् । वेदिकाग्नेशकोणे तु विकिरशालियुक्तके ॥ ४२ ॥
चलासने मूर्तिमावाह्य मूलेनावाहनं पुनः । गन्धाभरणवस्त्राणि पुष्पमाल्यं निवेदयेत् ॥ ४३ ॥
धूपदीपं तु दत्त्वा चाप्यर्घ्यं मूर्ध्नि च योजयेत् । पाशुपताह्यास्त्रेण ज्ञानखड्गं सुयोजयेत् ॥ ४४ ॥

[चितावास्तुपूजा[4]]

अर्घ्यपात्रं समादाय नतोन्नतविवर्जितम् । चिताख्यासनं संपूज्य चास्त्रदण्डेन ताडयेत् ॥ ४५ ॥

---

[1] cf. *Cintya* 30, 10-12:

मध्यमे श्वेतवर्णं स्यादाग्नेय्यां रक्तवर्णकम् । निर्ऋतौ श्यामवर्णं स्याद्वायव्ये कृष्णवर्णकम् ॥
ऐशान्यां तु सितं प्राप्य एवमेव क्रमेण तु । पूर्वस्यां हेमवर्णं स्याद्दक्षिणे श्यामवर्णकम् ॥
पश्चिमे शुक्लवर्णं स्यादुत्तरे रक्तवर्णकम् । एतेषां मण्डलं प्रोक्तम् ”

[2] cf. *Kāmika* II 27, 41-46a:

“ तत्समीपस्थितां भुवम् । शुचिस्नातो गुरुर्मन्त्रकायश्चास्त्रालुकीकरः ॥
प्रदक्षिणक्रमाद्गत्वा स्थण्डिलान्तमुदङ्मुखः । विपरीतकृतन्यासो हेतिमन्त्रेण रक्षितः ॥
कृतान्तर्यजनोऽस्त्रेण समालभ्यास्त्रवर्धनीम् । तज्जलप्रोक्षितैर्द्रव्यैः पूजां संकल्प्य चात्मनः ॥
आवर्त्य संहितामन्त्रान्कलाः संहारवर्त्मना । ब्रह्मादिकारणोपेताः स्वस्मिन्विन्यस्य देशिकः ॥
संहारहरहस्तं च कृत्वा स्मृत्वा शिवं सकृत् । विकीर्य विकिरांस्तत्र कुशान्भस्मतिलानथ ॥
समाहृत्य विधानेन ”

voir aussi *Kriyākramadyotikā, aparakriyāvidhi*, pp. 12-16 et *Kriyādīpikā* pp. 237-238

[3] Pour अस्त्रवर्धनीपूजा voir *Kriyākramadyotikā* pp. 396-397:

[4] *Kāmika* II 27, 46-51a:

“ चितिवास्तु प्रपूजयेत् । पञ्चभागीकृते क्षेत्रे पञ्चपञ्चककोष्ठके ॥
पृथिव्यादौ यथारूपैः पञ्चवर्णैर्विचित्रिते । वंशरज्ज्वादिसंपन्ने विन्यसेद्वास्तुदेवताः ॥

[1]पञ्चवर्णेन सूत्रेण बन्धेत्पृथ्व्यादिकोणकान् । ईशादिं चाग्निकोणान्तमप्रदक्षिणतः पुरः ॥ ४६ ॥
पृथ्वीं प्रथममभ्यर्च्य ब्रह्माणं तु समर्चयेत् । द्वितीयं जलं संपूज्य विष्णुदेवं तु पूजयेत् ॥ ४७ ॥
अग्निभूतं तु संपूज्य रुद्रदेवं समर्चयेत् । मरुत्तत्त्वं तु संपूज्य चेश्वरं तु समर्चयेत् ॥ ४८ ॥
आकाशं तु समर्चेत सदाशिवं तु पूजयेत् । पूर्वं एकपदे त्विन्द्रं यममेके च दक्षिणे ॥ ४९ ॥
सद्योजातं प्रतीच्यां तु चोत्तरे सोममर्चयेत् । पाद्याचमनार्घ्यं दत्त्वा धूपदीपं निवेदयेत् ॥ ५० ॥
तत्तन्त्रेण बलिं दत्त्वा पञ्चघोषेण घोषयेत् । पश्चाद्द्वारे तु देवांस्तु विपरीतं समर्चयेत् ॥ ५१ ॥

[अस्त्रपूजा[2]]

धूपदीपं तु दत्त्वा च ह्यायुधानि तु पूजयेत् । वज्रादिचक्रपर्यन्तं विपरीतं तु पूजयेत् ॥ ५२ ॥

[मण्डपे शिवपूजा[3]]

द्वारेषु दण्डं संस्थाप्य तत्तु सूत्रेण बन्धयेत् । वेदिकावायुदिग्भागे रुचिरासनसंस्थितः ॥ ५३ ॥
संहारन्यासं कृत्वा च मूर्तिमासनं कल्पयेत् । सद्यादीशान्तं कृत्वा च नेत्रं विद्यां तु कल्पयेत ॥५४॥
अस्त्रादि हृदयान्तं चाप्यस्त्रं कवचकं बुधः । इत्युक्तस्तु करन्यासः[4] पश्चाद्देहे तु न्यासकम् [5]॥ ५५ ॥
मूर्तिहृदयं संकल्प्य चासनं चाभिकल्पयेत् । जान्वादिब्रह्मरन्ध्रान्तं सद्यादीशान्तं कल्पयेत् ॥ ५६ ॥

तत्र मध्ये भुवा सार्धं ब्रह्माणं पञ्चकोष्ठके । नैर्ऋत्यां वारिणा सार्धं विष्णुं कोष्ठचतुष्टये ॥
आग्नेय्यामग्निना सार्धं रुद्रं कोष्ठचतुष्टये । वायुकोणे चतुष्कोष्ठे वायुना सममीश्वरम् ॥
गगनेन सदेशानमैशकोष्ठचतुष्टये । पूर्वादिवेदकोष्ठेषु शक्रादींश्चतुरो यजेत् ॥
निजनाम्नार्चनां नित्यां स्वाहान्तेन बलिं क्षिपेत् ॥

[1] Pour पञ्चवर्ण voir *Kālottara* cité dans la *Kriyākramadyotikā, aparakriyāvidhi* p. 18.
पीतं शुक्लं च रक्तं च कृष्णं च हरितं तथा । श्वेतं स्याच्छालिपिष्टेन रक्तमिष्टिकया तथा ॥
श्यामं पलाशचूर्णेन मूलेनैव हरिद्रकम् । तुषाकारं कृष्णवर्णं पञ्चचूर्णमिति स्मृतम् ॥

[2] cf. *Kāmika* II 27, 51b-52:
ऐशान्यां दिशि वर्धन्यामिष्ट्वा पाशुपतास्त्रकम् । शूलात्कुलिशपर्यन्तान्यस्त्राण्यष्टासु दिक्षु च ॥
निधाय पूजयेदूर्ध्वमधः पञ्चारिकावपि ॥

[3] cf. *Kāmika* II 27, 53-54:
तिलदर्भान्तरे सम्यग्यजेन्मण्डलके भवम् । ऐश्वर्याद्यासनं दत्त्वा सदलाम्भोजमध्यमे ॥
मनोन्मन्यादिवामान्तशक्तिचक्रं प्रपूजयेत् । व्युत्क्रमासनमिष्ट्वैवं साङ्गं संपूज्य शंकरम् ॥

[4] cf. *Kāmika* I 4, 38b-50a:
यथेष्टमासनं बध्वा ऋजुकायोत्तराननः । चन्दनालिप्तहस्तौ द्वौ शोधयेदस्त्रमन्त्रतः ॥
परस्परौ च संस्पृश्य तलकौ हस्तपृष्ठकौ । अमृतीकृत्य मूलेन वौषडन्तेन मन्त्रतः ॥
विद्याशरीरतां ध्यात्वा तयोः शक्त्यन्तमुत्तमम् । मूलेन शिवमावाह्य ब्रह्माण्यङ्गानि विन्यसेत् ॥
गृहस्थः सृष्टिमार्गेण करन्यासं तु कारयेत् । वानप्रस्थयतीनां च संहारन्यासमुच्यते ॥
अङ्गुष्ठादिकनिष्ठान्तमीशात्सद्यावसानकम् । सृष्टिन्यासः समाख्यातः सद्यादीशावसानकम् ॥

नेत्रं नेत्रेण योजेत्त हृदयं हृदा कल्पयेत्। हृदयाद्यस्त्रपर्यन्तं कल्पयेत्तदिदं गुरुः ॥ ५७ ॥
दिक्पालबन्धनं कृत्वा विपरीतं तु तद्बुधः। [1]प्राणायामं तु कृत्वा च रेचकं पूरकुम्भकम् ॥ ५८ ॥
पश्चादर्घ्यादिपात्रं तु प्रक्षाल्य मन्त्रमुच्चरन्। हृदयमनुचिन्त्याथ ह्यमृतेन तु पूरयेत् ॥ ५९ ॥
पञ्चब्रह्मषडङ्गेन दूर्वाक्षतं च पुष्पकम्। एलालवङ्गकर्पूरतिलसर्षपचन्दनम् ॥ ६० ॥
कुशकूर्चेन शाल्यन्नं क्षीरतोयेन युक्तकम्। तोयमध्ये तु संपूज्य तन्मन्त्रेणाभिमन्त्रणम् ॥ ६१ ॥
दिग्बन्धनावकुण्ठने धेनुमुद्रां तु दर्शयेत्। तत्तोयेन तु संप्रोक्ष्य वेदिकोपरि कल्पयेत् ॥ ६२ ॥
भस्मदर्भेण लाजैश्च तिलशाल्यन्नयुक्तकम्। वेदिकोपरि पूर्वं तु विपरीतं द्वारं पूजयेत् ॥ ६३ ॥
लक्ष्म्यादिगणपान्तं च गङ्गादिनन्दिकान्तकम्। यमुनादि महाकालमासनं मूर्तिमूलकम् ॥ ६४ ॥
पाद्याचमनार्घ्यं दत्त्वा धूपदीपं तु योजयेत्। गङ्गां गणपतिं लक्ष्मीं नन्दिनं च सरस्वतीम् ॥ ६५ ॥

कनिष्ठाद्यङ्गुष्ठान्तं च संहारन्यासमुच्यते। जगतः सृष्टिसंहारक्रम एवात्र च क्रमः ॥
नेत्रं हस्ततले न्यस्य पश्चादङ्गानि विन्यसेत्। अङ्गुष्ठादिकनिष्ठान्तकनिष्ठाद्यङ्गुष्ठकावधि ॥
तर्जन्याङ्गुष्ठके न्यासः सर्वास्वङ्गुष्ठतो भवेत्। तर्जन्यन्तं न्यसेद्धीमांस्तर्जन्या मस्तकं न्यसेत् ॥
यद्वास्त्रवर्मचूडाकहृदोऽङ्गुष्ठादितो न्यसेत्। सृष्टौ प्रतीपको न्यासः संहारो मोक्षकाङ्क्षिणाम् ॥
मूर्धादिः सृष्टिरित्युक्ता पादादिः संहृतिर्भवेत्। विद्येश्वराणां बीजानि चाङ्गुष्ठादि पुनर्न्यसेत् ॥
अमृतीकृत्य भावेन कवचेनावकुण्ठयेत्। एवं शिवीकृतौ हस्तौ समर्थौ सर्वकर्मसु ॥
सकलीकरणे संध्याकाले चाचमने तथा। करन्यासो विधातव्यस्तद्विशेषविधावपि ॥

[a] cf. *Kāraṇa* I 30, 132b-136a:

अङ्गन्यासं ततः शृणु। मूर्धादि सृष्टिरत्रोक्तं पादादिः संहृतिर्भवेत् ॥
स्वमूर्ध्नि विन्यसेदीशं वक्त्रे वक्त्रे तु विन्यसेत्। न्यस्त्वाघोरं हृदि स्थाने वामं गुह्ये तु विन्यसेत् ॥
सद्यमन्त्रं न्यसेत्पादे ततस्त्वङ्गानि विन्यसेत्। हृदयं हृदये न्यस्य शिरः शिरसि विन्यसेत् ॥
शिखायां तु शिखां न्यस्य कवचं स्तनमध्यतः। लोचने तु न्यसेन्नेत्रमस्त्रमस्त्रप्रदेशके ॥

[1] Pour प्राणायाम voir *Sivadharmottara* cité dans le *Sakalāgamasārasaṃgraha* pp. 27-28:

प्राणो वायुः शरीरस्थस्तस्य यामो निरोधनम्। रेचकः पूरकश्चैव कुम्भकस्त्रिविधाः स्मृताः ॥
रेचयेदूर्ध्ववायुं च द्वात्रिंशन्मात्रया गुह। पूर्ववत्पूरयेद्धीमान्वामेन तु समाहितः ॥
इतिवत्पूरयेद्धीमाञ्जठरं बाह्यवायुना। पूर्वं षोडशमात्रं तु पूरयेत्कुम्भकं ततः ॥
चतुष्षष्टिकमात्रं वा सम्यक्कुम्भेन पूरयेत्। आपूर्यैव ततो ध्यायेदात्मानममृतेन तु ॥
रेचयेद्दक्षिणे वायुं वामेनापूरितोदरम्। कुम्भकं तु समं कुर्यात्प्राणायामस्य लक्षणम् ॥
रेचनात्सुमुखं पद्मं पूरकात्पुष्पशोभितम्। कुम्भकाच्छिवसायुज्यं प्राणायामफलं स्मृतम् ॥
इडा चन्द्रकला ज्ञेया पिङ्गला भास्करांशिका। द्वयेन पूरयेद्वायुं नासिकामण्डलद्वयम् ॥
प्रणवाद्दशकं मात्रं प्रत्येकं कल्पितं तु वा। संहितामन्त्रसंयुक्तं पूरकादि क्रमात्कुरु ॥
न मुञ्चति न गृह्णाति वायुमन्तर्बहिस्थितम्। संपूर्णकुम्भवत्तिष्ठेदचलः स तु कुम्भकः ॥

महाकालं च यमुनां स्थितांस्तु चिन्तयेद्बुधः । भूमिष्ठादिकशुद्धिं च प्राकारासुरशुद्धिकाम् ॥ ६६ ॥
द्वारपालान्वषमादि विपरीतं तु पूजयेत् । सप्तदेशिकान्संपूज्य विपरीतं तु तान्क्रमात् ॥ ६७ ॥
शक्त्यादिशक्तिपर्यन्तं विपरीतं समर्चयेत् । कुटिलोपरि कल्पेत विमलासनं चिन्तयन् ॥ ६८ ॥

[पञ्चासनानि[1]]

सिंहासनं चतुष्कोणमनन्तासनं त्रिकोणकम् । पद्मं वर्तुलं विज्ञेयं षट्कोणं विमलासनम् ॥ ६९ ॥
योगासनं चाष्टकोणमेवमेवं प्रकल्पयेत् । आवाहनासनं पद्ममनन्तं स्नानकारणम् ॥ ७० ॥
विमलं चार्चने चैव नैवेद्ये योगमासनम् । वस्त्राभरणलेपे तु सिंहासनं तु कल्पयेत् ॥ ७१ ॥
मूर्तेरावाहनं कृत्वा मूलेनावाहयेद्बुधः । अष्टत्रिंशत्कलान्यासं बहिर्मातृकमुच्यते ॥ ७२ ॥
अनन्तमातृकान्यासं विपरीतं न्यसेद्बुधः । पञ्चब्रह्मषडङ्गं च संहारं तु समर्चयेत् ॥ ७३ ॥
धूपदीपेन संयोज्य चास्याचमनयोजनम् । षडङ्गं तु यजेत्पश्चाद्दिग्बन्धनावकुण्ठनम् ॥ ७४ ॥
पाद्याचमनार्घ्यं दत्त्वा पञ्चवक्त्रेषु बुद्धिमान् । विपरीतं च चिन्तेत सद्यादीशान्तमुच्यते ॥ ७५ ॥
पुष्पदूर्वाक्षतं चैव मूलमन्त्रेण पूजयेत् । पञ्चासनानि कृत्वा च विपरीतं तु कल्पयेत् ॥ ७६ ।
गन्धपुष्पदीपधूपवस्त्राभरणसंयुतम् । सर्वोपचारं दत्त्वा च पवित्रं नित्यं योजयेत् ॥ ७७ ॥
[2]जपकालेऽक्षमालां च न गुरोरपि दर्शयेत् । प्रच्छन्नपटमास्थाय विपरीताक्षमाल्यकम् ॥ ७८ ॥
जपनिवेदनं कृत्वा सव्यहस्ते तु मध्यके । पश्चाद्धृदि जपं दत्त्वा चार्चेत्संहार उच्यते ॥ ७९ ॥

[अग्निकार्यम्[3]]

अग्निकार्यार्थं विज्ञाप्य तत्स्थानं तु विवर्जयेत् । अर्घ्यपात्रं समादाय चाप्रदक्षिणं वेदिकाम् ॥ ८० ॥

---

[1] cf. *Kāraṇa* I 30, 252-254:
सिंहासनं चतुष्कोणमनन्तं च त्रिकोणकम् । पद्मं च वर्तुलाकारं षट्कोणं विमलासनम् ॥
योगासनं चाष्टकोणमासनं परिकल्पयेत् । आवाहनासनं योगं स्नाने सिंहासनं भवेत् ॥
अर्चनायां महापद्मं विमलाख्यं तु भोजने । स्तोत्रसंगीतनृत्तेष्वनन्तासनमिहोच्यते ॥
cf. *Kāmika* I 4, 284b-285:
आवाहनासनं पद्ममनन्तं स्नानकर्मणि । विमलं चार्चने विद्यान्नैवेद्ये योगमासनम् ॥
वस्त्रादीन्यन्यकर्माणि सिंहासने प्रकल्पयेत् ॥

[2] cf. *Kālottara* cité dans le *Sakalāgamasārasaṃgraha*, p. 113:
तथा मन्त्रं चाक्षसूत्रं गुरोरपि न दर्शयेत् । जपकाले तु गोप्तव्या जपमाला च षण्मुख ॥
परदृष्टिगता माला यदि स्यान्निष्फला भवेत् ॥

[3] cf. *Kāmika* II 27, 55-57a:
संस्कृत्य पूर्ववत्कुण्डं शक्तिमभ्यर्च्य तत्र च । क्रव्यादांशोज्झितं वह्निं विनिक्षिप्य प्रदक्षिणम् ॥
संस्कारैः पञ्चभिर्जातजातवेदोहृदम्बुजे । भवं जल इवाभ्यर्च्य तर्पयित्वासितैस्तिलैः ॥
साज्यैः पूर्णाविशिष्टैश्च चिनुयात्तु चितिं ततः ॥
cf. *Acintyaviśvasādākhya* 67, 24:
प्रक्षिप्य दक्षिणे कुण्डे जनयेत्प्रागिवानलम् । ईशं संपूज्य हुत्वाग्नौ हुनेत्पूर्णाविसानकम् ॥

पश्चात्कुण्डसमीपे तु रुचिरासनसंयुतः । उत्तराभिमुखो भूत्वा कृत्वा न्यासमतः परम् ॥ ८१ ॥
कुण्डसंस्कारं कृत्वा चाप्यग्नेश्च जननान्तकम् । विपरीतं पूर्ववत्कृत्वा वह्निं तु विचिन्तयेत् ॥ ८२ ॥
अग्नेर्हृदयपद्मे तु नित्यं संपूजयेच्छिवम् ।

[होमः[1]]

मूलैः शताहुतिं हुत्वा शिष्यस्य जननार्थकम् ॥ ८३ ॥
देशिकस्तु सुतं कृत्वा चाध्वशुध्या तु युक्तकम् । [2]अध्वशुद्धिं विवर्जेत समयिनां तु तद्विधः ॥ ८४॥
आत्मजातार्थहोमे तु मूलमन्त्रशताहुतीः । पाशत्रयैः पशुश्चैव मलाद्यैर्व्याप्त उच्यते ॥ ८५ ॥
तत्कालेऽनलं प्रज्वाल्य चात्मभोगं विचिन्तयेत् । नवावस्था तु सा प्रोक्ता चात्ममन्त्रं समुच्चरन् ॥८६
[3]महाजालप्रयोगेण शिवानुग्रहयुक्तके । उदकं क्षीरयुक्तं चाप्यात्मभोगः स उच्यते ॥ ८७ ॥
आवाहनं तु चाद्यस्य व्याप्तिः स शिवभोगकः । आत्मभोगं शिवे भोगं सर्वं मन्त्रेण दर्शयन् ॥ ८८ ॥

---

[1] cf. *Kāmika* II, 27, 65b-70a:

आग्नेय्यां शवमिष्ट्वाग्नेर्दक्षिणस्यां कुशासने । वीक्षणादिविशुद्धस्य धारणाभिश्च पञ्चभिः ॥
ततोऽस्य मन्त्रकायस्य हृत्सरोरुहकोटरे । भोग्यकर्माशया रक्तमप्राप्ताधारदेहकम् ॥
महाजालेन तल्लिङ्गं संहृत्य विनिवेशयेत् । ओं हूं हामथ हं हां हूं महाजालमिदं मतम् ॥
उक्त्वान्ते मृतदीक्षाख्यां नत्यन्तां भाविते गुरुः । विद्यादेहं च तद्देहे संहृत्य पञ्च ताः कलाः ॥
सषडङ्गं शिवं न्यस्त्वा मूलेन जुहुयाच्छतम् । चैतन्यसंनिधानार्थम् ”

ibid. 75b-76a:

अग्नेरुद्धृत्य होमान्ते योजयेदमले पदे । यद्युक्तो न पुनर्जातु पराधीनो भवेदणुः ॥

cf. *Acintaviśvasādākhya* 67, 28b-31:

अथात्र धारणाशुद्धे गन्धपुष्पादिपूजिते । महाजालप्रयोगेण जीवमादाय विन्यसेत् ॥
ओं हूं हां हं हां हूं अमुकात्मने नमः । विद्यादेहं च तद्देहे मस्तके वदने हृदि ॥
नाभावधःशरीरे च शान्त्यतीतादिकाः कलाः । विन्यस्य विद्यातत्त्वं च शक्तिचक्रं तथा शिवम् ॥
चैतन्यसंनिधानाय शतं मूलेन होमयेत् ॥

voir aussi *Kriyādipikā*, p. 241.

[2] cf. *Kāmika* II. 27, 1-3:

अन्त्येष्टिं तु प्रवक्ष्यामि दीक्षितानां द्विजोत्तमाः । ब्राह्मणः क्षत्रियो वाथ वैश्यः शूद्रोऽनुलोमजाः ॥
आचार्याः साधका वा स्युः पुत्रकाः समयस्थिताः । गतासवो यदा तेषां कार्यान्त्येष्टिस्तु दीक्षितैः ॥
आचार्यादित्रयाणां स्यादध्वशुद्धिसमन्विता । अन्त्येष्टिरितराणां स्यादध्वशुद्धिविवर्जिता ॥

[3] Pour महाजालप्रयोग voir *Kriyākramadyotikāvyākhyā prabhā*, p. 409:

एतल्लक्षणमुक्तं मुद्रालक्षणे “ अथ महाजालप्रयोगः—मृतशरीरे जीवन्यासार्थं प्रणवोच्चारसमुत्थितं नादं मुष्ट्या द्वादशान्तं नीत्वा, तेन नादेनैकीभूतहस्तः स्वकर्मानुगुणमितस्ततो गच्छन्तमात्मानमाकलय्य, नादशक्त्या जालमिव सर्वतः प्रसृतया गृहीतं विभाव्य, आत्ममन्त्रं समस्तं सूक्ष्ममुच्चरन्नादरूपां तर्जनीं त्रिधा भ्राम्य, दूरस्थितमात्मानमासन्नं विभाव्य, तमङ्गुष्ठमूलकन्यासाद्यङ्गुलिसंयोजनाद्गृहीत्वा, सृणिमुद्रया हृन्मन्त्रेण स्वहृदये समाकृष्य, स्वनादादात्मानं विभज्य, आत्ममन्त्रेण संहारमुद्रया गृहीत्वा, प्राणप्रवाहेण बहिर्निर्गत्य, बाह्यद्वादशान्ते पुनः संगृह्य, ऊर्ध्वमुद्रया तस्य देहे नियोज्य क्षिपेत्” इति ॥

तदावाहने त्वात्मनो देहं त्वप्रतिमं ज्वलेत् । प्रेतं च ज्ञानचक्षुषा दर्शयेद्देशिको बुधः ॥ ८९ ॥
पश्चाद्धृदयं ताडेत्तु नाराचमुद्रया बुधः । अर्घ्यं दत्त्वा च शिष्ये तु विद्यादेहं तु कल्पयेत् ॥ ९० ॥
आत्मानं तत्र संपूज्य तन्मन्त्रं तु समुच्चरन् । विशेषसंस्कारार्थं तु मूलमन्त्रशताहुतीः ॥ ९१ ॥
सर्वाङ्गोद्भूलनं कुर्यात्त्रिपुण्ड्राणि तु निक्षिपेत् । अष्टत्रिंशत्कलान्यासं विपरीतं तु तद्बुधः ॥ ९२ ॥
नेत्रबन्धनं कृत्वा च मण्डपाप्रदक्षिणं कुरु । शिवहस्तं च संकल्प्य शिष्यमूर्धनि योजयेत् ॥ ९३ ॥
दक्षिणे कर्णे शिष्यस्य शिवमन्त्रं समुच्चरन् । नेत्रबन्धं विसृज्याथ कृत्वा पुष्पाञ्जलिं बुधः ॥ ९४ ॥
नेत्रबन्धनं कृत्वा च मण्डपे तु समाचरेत् । [1]नाडीसंधानं शिष्ये तु देशिको जानु बन्धयन् ॥ ९५ ॥
दर्भेण नाडीं चित्ते तु कल्पयेत्संहारमुद्रया । शिष्यात्मानं समादाय त्वग्निहृदये योजयेत् ॥ ९६ ॥
मूलमन्त्रं समुच्चार्य कृत्वा विंशतिहोमकम् । अग्न्यात्मानं समादाय प्रेतदेहं प्रवेशयेत् ॥ ९७ ॥
पश्चाद्दर्भं च संवर्ज्य प्रायश्चित्तान्तहोमकम् । अघोरमन्त्रं संचिन्त्य शतं वार्धं तु तत्पदे ॥ ९८ ॥

[अध्वशोधनम्]

[2]पश्चान्निर्वाणसद्ये तु मूलमन्त्रशताहुतीः । शतं वार्धं तु होमेत्तु घटिकामूलमन्त्रकैः ॥ ९९ ॥
[3]अष्टाशताहुतीः कृत्वा षट्कोणे चापि कुण्डके । मन्त्राध्वदर्शनार्थं तु वृत्तकुण्डे च शिष्यके ॥ १०० ॥
मूलमन्त्रेण संचिन्त्य [4]विंशदाहुतिं सद्गुरुः । पदाध्वदर्शनार्थं तु पद्मकुण्डे तु होमयेत् ॥ १०१ ॥
मूलमन्त्रेण शतं होमं पश्चाद्वर्णाध्वदर्शनम् । त्रिकोणकुण्डे होमं च मूलमन्त्रं समुच्चरन् ॥ १०२ ॥
भुवनाध्वदर्शनार्थं योनिकुण्डेन चिन्तिते । मूलैः शताहुतीः कृत्वा पश्चात्तत्त्वाध्वदर्शनम् ॥ १०३ ॥
त्रिकोणकुण्डे हुत्वा च त्वात्ममन्त्रं समुच्चरन् । मूलमन्त्रेण युक्तं च शतं वार्धं तु होमयेत् ॥ १०४ ॥
कलाध्वदर्शनार्थं तु चतुष्कोणे च कुण्डके । कलामन्त्रैः शिवमन्त्रमष्टाशतं[5] तु होमयेत् ॥ १०५ ॥
चतुष्कोणेषु कुण्डानि तत्कुण्डानि तु चिन्तयन् । उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः ॥ १०६ ॥
प्रथमं तत्त्वदर्शनं चाध्वनां दर्शनं तथा । द्वितीयमात्मदर्शनं तृतीयं शिवदर्शनम् ॥ १०७ ॥

---

[1] Pour नाडीसन्धान voir *Kriyākramadyotikā* p. 409:
ततो नाडीसंधानं कुर्यात् । तद्यथा—दर्भमूलं मूलमन्त्रेण शिष्यकरतले दत्त्वा, तदग्रं स्वजङ्घासंधौ संनियोज्य, कुशच्छलेन बिसतन्तुनिभां शिष्यनाडीं पिङ्गलया विनिःसृत्य, शिष्यहृदयं तत्पूरकेण प्रविश्य, रेचकेन विनिःसृत्य, स्वहृदयं पूरकेण प्रविश्य, एवं कुम्भवह्नीशाभ्यामपि नाडीं संधाय, तत्संधानार्थं मूलेनाहुतित्रयं जुहुयात् ।

[2] La forme grammaticale correcte est पश्चात्सद्योनिर्वाणे

[3] La forme grammaticale correcte est अष्टाधिकशताहुतीः

[4] La forme grammaticale correcte est विंशत्याहुतिं.

[5] La forme grammaticale correcte est अष्टाधिकशतं

षडध्वमार्गविघ्नार्थं [1]पञ्चास्त्रं तु मनुं स्मरन् । [2]पञ्चब्रह्मेण मूलेन शतं वार्धं तु होमयेत् ॥ १०८ ॥

[कलाशोधनम् [3]]

मूर्धादिपादपर्यन्तं कलासूत्रेण बन्धयेत् । पञ्चभागं च कृत्वा च मूर्धवक्त्रं तु कल्पयेत् ॥ १०९ ॥
हृदयं नाभिगुह्यं च शान्त्यतीतां तु विन्यसेत् । शान्तिविद्याकले चैव प्रतिष्ठदीनि विन्यसेत् ॥ ११० ॥
शिष्ये हृदयपद्मे च पञ्चासनं तु विन्यसेत् । शक्त्यादिशक्तिपर्यन्तं पूजयेच्छाश्वतं शिवम् ॥ १११ ॥
पाद्याचमनार्घ्यं दत्त्वा धूपदीपं सुयोजयेत् । पश्चात्कुम्भं तं संपूज्य तन्मन्त्रेण जपं बुधः ॥ ११२ ॥

[निवृत्तिकलाशोधनम् [4]]

[1]नवृत्त्यादिसन्निधानार्थममन्त्रेणाहुतित्रयम् । ब्रह्म चावाह्य संपूज्य द्वादशाज्यं तु होमयेत् ॥ ११३ ॥
प्रथमं वागीश्वरौ वाह्य[5] द्वितीयं वा तथा भवेत् । तन्मन्त्रेण तु संपूज्य पञ्चपञ्चाहुतिर्भवेत् ॥ ११४ ॥
शिवं हृदये संभाव्य शिवमन्त्रेण वर्धयन् । अङ्कुशमुद्रयाकृष्य चात्ममन्त्रं समुच्चरन् ॥ ११५ ॥
मन्त्रेण शिवे संयोज्य चात्मानं ग्राह्य हस्तके । मन्त्रे पदे च वर्णे च व्यापयेद्भूततत्त्वकम् ॥ ११६ ॥
[6]वागीं वागीश्वरं चैव संयोजयेत्तु जीवके । आत्ममन्त्रेण संपूज्य कृत्वा पञ्चाहुतिं बुधः ॥ ११७ ॥

---

[1] Pour पञ्चास्त्र voir *Vātulaśuddhākya* 8, 103b-106a:

अस्त्रभेदमथ शृणु ।

शिवास्त्रं क्षुरिकास्त्रं च तथा पाशुपतास्त्रकम् । व्योमास्त्रं चैव घोरास्त्रमस्त्रं पञ्चविधं भवेत् ॥
षडक्षरं शिवास्त्रं स्यात्क्षुरिका त्वष्टवर्णकम् । पाशुपतं तु पञ्चार्णं व्योमास्त्रं तु दशार्णकम् ॥
चत्वारिंशदघोरास्त्रमेवं पञ्चास्त्रमुच्यते ॥

[2] La forme grammaticale correcte est पञ्चब्रह्मणा

[3] cf. *Kāmikāgama* II 27, 70-77:

ततस्तत्स्वानि शोधयेत् ।

निवृत्त्यादिकमादाय युगपद्वा क्रमेण वा । कलाः स्वस्वाधिपाः प्राग्वद्ब्रह्मौ संपूजयेत्ततः ॥
ताडनादिविभेदेन लिङ्गादादाय लिङ्गिनम् । योजयेत्पूर्ववत्तत्र जन्मकर्माधिकारिताम् ॥
भोगो लयोऽथ सशुद्धिस्तत्त्वानां स्रोतसामपि । तिरोभावः पशुत्वस्य पाशविश्लेषभेदने ॥
तद्दाहो व्युत्क्रमे कृत्यं कारणाद्वा पशूद्धृतिः । विश्लिष्य तेन पूर्वेण पशुं निर्वाणकर्मणा ॥
एवमेवोपरिष्टाच्च पाशानन्यान्विशोधयेत् । उक्तया कर्मपद्धत्या तानप्येवं शिवावधि ॥
अग्नेरुद्धृत्य होमान्ते योजयेदमले पदे । यद्युक्तो न पुनर्जातु पराधीनो भवेदणुः ॥
कृतनिःशेषपाशान्तमिष्ट्वेशं च विसर्जयेत् । विद्यादेहं च तद्देहे संहृत्य स्वपदे गुरुः ॥
स्थण्डिलेशानमप्येवं संहृत्य स्वपदे गुरुः ॥

[4] Pour निवृत्तिकलाशोधन voir *Kriyākramadyotikā* pp. 417-422.

[5] La forme grammaticale correcte est वागीश्वरावाह्य ; la première lettre du mot आवाह्य a été omise ici pour une raison métrique.

[6] On trouve ici dans ce *paṭala* la mot वागी pour वागीशी ; le lettre शी dans वागीशी a été omise pour une raison métrique.

निश्शेषकरणार्थाय हृदयद्वादशाहुतिम् । पाशविमोचनार्थाय पञ्चपञ्चाहुतित्रयम् ॥ ११८ ॥
गुह्ये तु पाशसूत्रं तु विच्छिन्नमस्त्रमुच्चरन् । स्रुवमध्ये तु तत्सूत्रं वर्तुलं घृतपूर्णकम् ॥ ११९ ॥
शिखायां मुण्डकेशे वा चाहुतीरस्त्रमुच्चरन् । पश्चादर्घ्यं तु दद्यात्तु वागीशे योग उच्यते ॥ १२० ॥
जन्माधिकारभोगार्थं शिखास्त्रमूलमन्त्रकैः । पञ्चपञ्चाहुतिं कुर्यादर्घ्यं दत्त्वा तु नाग्निकम् ॥ १२१ ॥
पश्चाद्ब्रह्म तु पूजेत ब्रह्माणं तु विसर्जयेत् । कुण्डादात्मानमादाय पूर्वसूत्रेण योजयेत् ॥ १२२ ।
वागीं वागीश्वरं पूज्य पश्चाद्विसर्जनं बुधः । वौषडन्तेन मूलेन कृत्वा पूर्णाहुतिं बुधः ॥ १२३ ॥
एवं निवृत्तिकलाशुद्धिः शुद्धाध्वानं तु चिन्तयेत् ।

[प्रतिष्ठाकलाशोधनम् [1]]

प्रतिष्ठाकलां च पूर्वेण मन्त्रादिभुवनान्तकम् ॥ १२४ ॥
योगयुक्तां तु चिन्तेत्तु विष्णुमावाह्य पूजयेत् । वागीवागीश्वरौ चैव तन्मन्त्रेण त पूजयेत् ॥ १२५ ॥
पञ्चपञ्चाहुतिं कृत्वा तन्मन्त्राणि समुच्चरन् । शिवं हृदये पूर्वेणात्मानमाकृष्य हस्तके ॥ १२६ ॥
वागीवागीश्वरयोश्च संयोगमथ चात्मनि । निश्शेषकरणार्थाय शिरोमन्त्रदशाहुतीः ॥ १२७ ॥
पाशविमोचनार्थं तु चास्त्रमन्त्रशताहुतीः । नाभिसूत्रं तु छिन्देत्तु पूर्ववत्स्रुवमध्यगम् ॥ १२८ ॥
आज्यपूर्णं तु स्रुग्बद्धं चास्त्रमन्त्रेण होमयेत् पश्चादर्घ्यं च दत्त्वा तु चात्मानं तु सुपूजयेत् ॥ १२९ ॥
जन्माधिकारभोगार्थं शिखास्त्रमूलमन्त्रकैः । पञ्चपञ्चाहुतिं कृत्वा क्षुरिकास्त्रं समुच्चरन् ॥ १३० ॥
विष्णुं च कुण्डे संपूज्य तन्मन्त्रेणाहुतित्रयम् । पश्चाद्विष्णोर्विसर्गार्थमात्मानं तत्र पूजयेत् ॥ १३१ ॥
कुण्डादात्मानमादाय पूर्वसूत्रेण योजयेत् । आत्मनार्घ्यं च दत्त्वा तु वाग्वागीशौ विसर्जयेत् ॥ १३२ ॥
पूर्वेण चैव संयोज्य कृत्वा पूर्णाहुतिं बुधः । प्रतिष्ठाकलायाः शुद्धिस्तु पृथग्घृद्रं तु पूजयेत् ॥ १३३ ॥

[विद्याकलाशोधनम् [2]]

तन्मन्त्रेणाहुतिं हुत्वा चार्घ्यं दत्त्वा च रुद्रके । वागीवागीश्वरौ [3]वाह्य तन्मन्त्रेणाहुतित्रयम् ॥ १३४ ॥
पूर्वेणात्मानमादाय कुण्डके तं तु पूजयेत् । निःशेषकरणार्थाय शिखामन्त्रशताहुतीः ॥ १३५ ॥
तिरोधपाशमोक्षार्थं पञ्चाहुतिं तु मूलकम् । हृदयसूत्रं बिच्छिन्नं वर्तुलं घृतपर्णकम् ॥ १३६ ॥
स्रुवमध्ये तु निक्षिप्य त्वस्त्रमन्त्राहुतिं बुधः । पाद्याचमनार्घ्यं दत्त्वा चात्मानं तु सुपूजयेत् ॥ १३७ ॥

---

[1] Pour प्रतिष्ठाकलाशोधन voir *Kriyākramadyotikā* pp. 422-426.

[2] Pour विद्याकलाशोधन voir *Kriyākramadyotikā* pp. 426-429.

[3] La forme grammaticale correcte est वागीशौवागीश्वरावावाह्य ; voir p. 212 note 5.

जन्माधिकारभोगार्थं शिखास्त्रमूलमन्त्रकैः । पञ्चपञ्चाहुतिं कृत्वा पूर्णां रुद्रं विवर्जयेत् ॥१३८॥
प्रायश्चित्तं तु होमेत्तु ह्यघोरमन्त्रमुच्चरन् [1] ।

[शान्तिकलाशोधनम् [2]]

निःशेषकरणार्थाय कवचेन शताहुतिः ॥ १३९ ॥
तिरोधपाशमोक्षार्थं त्वस्त्रमन्त्रेण होमयेत् । अष्टाहुतिं तु कृत्वा च कल्पयेत्संहारमुद्रया ॥ १४० ॥
[3]आत्ममादाय हस्ते तु तन्मन्त्रं तु समुच्चरन् । अग्निहृदये संयोज्य चात्मानं तु समर्चयेत् ॥ १४१ ॥
तन्मन्त्रेणाहुतिं हुत्वा द्वादशाहुतिर्लाजकैः । निःशेषार्थं तु होमेत्तु पञ्चपञ्चाहुतिं बुधः ॥ १४२ ॥
वक्त्रसूत्रं तु विच्छिन्नं शिवास्त्रमन्त्रमुच्चरन् । वर्तनात्स्रुवमध्ये तु चाज्यपूर्णं तु होमयेत् ॥ १४३ ॥
वागीं वागीश्वरं वर्जेत्प्रायश्चित्तं तु होमयेत् । अस्त्रमन्त्रं समुच्चार्य चाष्टाशतं[4] तु होमयेत् ॥ १४४ ॥

[शान्त्यतीतकलाशोधनम् [5]]

एवं शान्तिकलाशुद्धिः शान्त्यतीतमतः परम् । सदाशिवं समावाह्य तन्मन्त्रेणाहुतित्रयम् ॥ १४५ ॥
वागीवागीश्वरौ वाह्य पञ्चाहुतिं तु होमयेत् । निःशेषकरणार्थाय मूलमन्त्रशताहुतिम् ॥ १४६ ॥
तिरोधपाशमोक्षार्थं कवचमन्त्रं तु चिन्तयन् । पञ्चपञ्चाहुतिं कृत्वा त्रिविधेन तु होमयेत् ॥ १४७ ॥
[6]आत्ममादाय पूर्वेण त्वग्निहृदये योजयेत् । पाशसूत्रं शिखाच्छेदं गोमयेनाविलं बुधः ॥ १४८ ॥
वर्तुलं तत्तु स्रुङ्मध्ये त्वाज्यपूर्णं च होमयेत् । पञ्चास्त्रैश्चापि मूलेन पूर्णाहुतिं तु देशिकः ॥ १४९ ॥
प्रायश्चित्तार्थमस्त्रेण त्वष्टाहुतीस्तु होमयेत् । सदाशिवं तु संस्पृश्य पूर्णाहुतिं तु होमयेत् ॥ १५० ॥
कुण्डादात्मानमादाय शिवतत्त्वेन योजयेत् । त्रिविधव्याप्तिं चिन्तेत्तु शिवभोगं तथात्मके ॥ १५१ ॥
आत्मभोगं शिवे भोगं चिन्तयेत्तु सुयोजयेत् । पश्चात्कुण्डे शिवं पूज्य पराङ्मुखं च वर्जयेत् ॥ १५२ ॥
पराङ्मुखार्घ्यं दत्त्वा चाप्युद्वासनं तु पूर्ववत् । अग्नेर्देवांस्तु संवर्ज्य वागीं वागीश्वरं तथा ॥ १५३ ॥
पराङ्मुखं च संपूज्य सर्वदेवांस्तु तद्बुधः । अन्तर्बलिं तथा कृत्वा बहिर्बलिस्तथा भवेत् ॥ १५४ ॥

---

[1] Ce *paṭala* se trouve dans les manuscrits A et B seulement ; mais le ms. B omet les *śloka* 23 à 169. Il semble qu'il y a ici une lacune. On peut supposer, d'après le contenu d'autres *paṭala* semblables que la portion manquante consiste en *śloka* sur la dernier portion de प्रतिष्ठाकलाशोधन et la première portion du शान्तिकलाशोधन.

[2] Pour शान्तिकलाशोधन voir *Kriyākramadyotikā* pp. 429-432.

[3] La forme grammaticale correcte est आत्मानमादाय

[4] La forme grammaticale correcte est अष्टाधिकशतं

[5] Pour शान्तिकलाशोधन voir *Kriyākramadyotikā* pp. 442-435.

[6] voir note 3.

[दहनविधिः[1]]

अर्घ्यपात्रं समादाय कुण्डदेशात्तु वर्जयेत् । चितास्थानप्रवेशे तु काष्ठशुद्ध्यै च देशिकः ॥ १५५ ॥
गोमयेनार्घ्यतोयेन त्वस्त्रमन्त्रं समुच्चरन् । उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः ॥१५६ ॥
चक्रादींश्चापि वज्रान्तं विपरीतांस्तु पूजयेत् । ईशानादग्निपर्यन्तं तन्मन्त्रेण बलिं तथा ॥ १५७ ॥
धूपदीपं तथा दत्त्वा तद्देवांस्तु विवर्जयेत् । शिवस्थाने च तन्मध्ये चात्मनैनं तु पूजयेत् ॥ १५८ ॥
इन्धनोपरि मध्ये तु नवधस्त्रेण युक्तके । तथोपरि तिलान्दर्भान्परिस्तीर्यास्त्रमन्त्रकैः ॥ १५९ ॥
तत्स्थाने चापि तन्मध्ये पाशुपतास्त्रमर्चयेत् । धूपदीपं तथा दत्त्वा चास्त्रदेवांस्तु वर्जयेत् ॥ १६० ॥
पश्चाच्छवं समादाय त्वप्रदक्षिणं मिश्रयेत् । कुम्भवर्धनिकं देवं पराङ्मुखं च पूजयेत् ॥ १६१ ॥
अस्त्रदेवांस्तु द्वारेषूद्वासयेत्तु तदा बुधः । शवशिरसि दीप्तेन कुण्डाग्निना च प्रज्वलेत् ॥ १६२ ॥
स्रुक्स्रुवं च समादाय त्वाज्यपर्णं तु देशिकः । शिरःस्थानादिपादान्तं होमयेत्तु तदा गुरुः ॥ १६३ ॥
त्वमग्ने मन्त्रमुच्चार्य स्रुक्स्रुवेणाज्ययुक्तकम् ।

[दहनानन्तरकरणीयविधिः[2]]

वर्धनीं भुजयुक्तां च कृत्वा तद्धारयेज्जलम् ॥१६४॥
प्रेताप्रदक्षिणं कृत्वा कवचमन्त्रं समुच्चरन् । शिरःस्थाने च ताडेत्तु वर्धनीं त्वमितं गुरुः ॥ १६५ ॥
मण्डपादीनि संवर्ज्य पराङ्मुखं च देशिकः । अस्त्रमन्त्रं च संचिन्त्य पश्चात्स्नानं समाचरेत् ॥ १६६ ॥
ईशं सदाशिवं रुद्रं स्कन्दं नन्दीशमेव च । पञ्चास्त्रेण च घोरेण तर्पयेत्त्वमितं बुधः ॥ १६७ ॥
मन्त्रहीनं क्रियाहीनं द्रव्यहीनं च [पूरयेत्] । मूलं च पञ्चब्रह्माणि पञ्चास्त्रं च मनुं स्मरन् ॥ १६८ ॥
एवं समुच्यतेऽन्त्येष्टिः पञ्चपातकनाशनी ॥ १६९ ॥

इति [3]श्रीमद्रौरवतन्त्रे [क्रियापादे] अन्त्येष्टिविधिर्नाम[4] [5]षट्चत्वारिंशः पटलः

---

[1] cf. *Kāmikāgama* II 27, 78-84a:
शवमभ्येत्य शय्यायामारोप्य प्रावृतं कुशैः । याम्यशीर्षमुदक्पादं मुक्तानां स्रुक्स्रुवान्वितम् ॥
आचार्यं साधकं चैव ताभ्यामन्यं तदुज्झितम् । तुरुष्कागरुकर्पूरचन्दनोत्तरदारुभिः ॥
संछाद्यानीय कुण्डाग्निं शिरोदेशे विनिक्षिपेत् । मधुसर्पिस्तिलसर्षपैषि प्रक्षिप्योज्ज्वलितेऽनले ॥
सर्पिर्मधुपयःपूर्णां स्रुचमुत्क्षिप्य पूजिताम् । गुरुः स्थित्वा शिरोदेशे सौम्याशाभिमुखाननः ॥
पावकास्ये क्षिपेद्धारामिति वाक्यमुदीरयन् । " त्वमग्ने दक्षिणः कालः कालेनैवोपपादिताम् ॥
गृहाण मन्त्रसंपूतां शव्यामेनां महाहुतिम् । प्रक्षिप्यावाङ्मुखौ तत्र स्रुक्स्रुवावप्यनन्तरम् ॥
नियुज्य संस्क्रियाकर्मकुशलांश्चतुरो गुरुः ॥

[2] cf *Kāmikāgama* II 27, 84b-87a:
अप्रदक्षिणमादाय गृहीत्वा खड्गवर्धनीम् । उत्क्षिप्यारोप्य वामांसे छन्नमूर्धां पराङ्मुखम् ॥
धारां विमुञ्चय संयुक्तस्वधर्मस्थैः प्रदक्षिणम् । अपसव्यक्रमात्कृत्वा वर्धनीं तामधोमुखीम्॥
क्षिपेत्तत्र यतो देशादुद्धृता सास्त्रवर्धनी । । ततो जलाशयं गत्वा स्नात्वा प्रस्तीर्य सत्कुशान् ॥
तदूर्ध्वमपसव्येन प्रणवं हृदयं पुरा । शुद्धात्मनिति चेशाने शान्तपर्यन्तनामयुक् ॥
स्कन्दपूर्वं गणेशान्तं नमो वा भवपश्चिमम् । उक्त्वा यथार्हं मन्त्री त्रिः स्वधान्तं तर्पयेत्पुनः ॥

[3] A : श्री pour श्रीमद [4] A omet नाम [5] A : सप्त pour षट्

रौरवागमः

क्रियापादः

सप्तचत्वारिंशः पटलः

[1] निर्वाणदीक्षाविधिः

[2] [दीक्षा]

[3] **सपाशत्रयविश्लेषं शिवत्वं व्यज्यते यया।**
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा ॥१॥
तस्माज्ज्ञानं च भक्तिश्च वैराग्यमिति चात्मनः।
दीक्षितस्येह चिह्नानि पशोस्त्वेतानि नाञ्जसा ॥२॥

[4] [पशुलक्षणम्]

किंचिज्ज्ञो मलिनो भिन्नः कर्ता भोक्ता स्वकर्मणाम्।
शरीरस्थो विभुर्नित्यः संस्कार्यः सेश्वरः पशुः ॥३॥

---

[1] निर्वाणदीक्षाविषये **उत्तरकामिके** २३; **किरणे** क्रियापादे १०; **मतङ्गपारमेश्वरे** क्रियापादे ७, ८, ९; **मृगेन्द्रे** क्रियापादे ८; **सार्धत्रिशतिकालोत्तरे** ८, **सुप्रभेदे** चर्यापादे ४ पटलाः; **सूक्ष्मे** (टि. १७, पृ० ३५४, ३५५, ३६४–३६८) षडध्वलक्षणपटलश्च द्रष्टव्याः।

[2] 'दानं नाम परा काष्ठा मन्त्रप्रध्वस्तकर्मणाम्।
पशोर्या व्यक्तिमायाति प्रक्षीणकलुषस्य च ॥
अनयोः शासने सिद्धा दीक्षा क्षपणदानयोः।
(**मतङ्गपारमेश्वरे** क्रियापादे २.१, ३ पू०);
'दीयते नच्छिवत्वं हि क्षीयते पापपञ्जरम्।
क्षयदानविशेषत्वाद् दीक्षा चेत्यभिधीयते ॥'
(**सुप्रभेदे** चर्यापादे ४.१ उ०–२ पू०);
'पाशच्छेदं विधिस्तस्य मन्त्रैश्च विधिचोदितैः।
एवं पाशत्रयस्यापि विश्लेषो दीक्षयोच्यते ॥'
(**स्वच्छन्दे** ४.१३१);
'वक्ष्ये दीक्षां शिवेनोक्तां संक्षेपाद्भोगमोक्षदाम्।
विक्षिप्तपाशसंक्षोभां भक्तिवैराग्यलक्षणाम्।
विशिष्टं दीयते ज्ञानं क्षीयते पाशसंचयः।
मायाकर्ममलोद्भूतो यथा दीक्षेति सा स्मृता।
शिवो विज्ञायते येन तज्ज्ञानं परमं मतम्।'
(**सिद्धान्तशेखरे** २.२.१–३ पू०);
'मलमायादिपाशानां विश्लेषः क्रियते यया।
ज्ञानं च जन्यते शिष्ये सा दीक्षेत्यभिधीयते ॥'
(**सोमशंभुपद्धतौ** समयदीक्षाविधौ २.)

[3] अवन्त्याः १–१० श्लोका उपलब्धासु रौरवमातृकासु शिथिलप्रायाः। अस्मिन्पटलेऽन्तिमभागे विद्यमानानां ९१–१०२ श्लोकानां वरुणपद्धतिस्थदीक्षाविधावन्तिमभागे विद्यमानानां षडध्वसमुद्देशविषयकश्लोकानां चानुपूर्वीसादृश्यात्तत्रत्यानां श्लोकानां साहाय्येनात्र ते समीकृताः।

[4] 'केवलः सकलः शुद्धः त्र्यवस्थः पुरुषः स्मृतः।
मलिनत्वाच्चितेर्मोक्षः प्राप्यते निर्मलाच्छिवात् ॥
पशुरेवविधः प्रोक्तः'
(**किरणे** विद्यापादे १.२३, २४ पू०);
'पशुरात्मा समुद्दिष्टः क्षेत्री क्षेत्रज्ञ एव च।
शरीरी चेति रुद्रात्मा भोक्ता च परिभाष्यते।'
(**मतङ्गपारमेश्वरे** विद्यापादे ६.४ उ०-५ पू०)

[1][पाशाः]

पाशा अपि त्रयो ज्ञेया मलं माया च कर्म च ।
मलं चाशुद्धिरज्ञानं तच्चैतन्यनिरोधकम् ॥४॥
माया कलादिपृथ्व्यन्ता तद्भूवा तत्त्वसंहतिः ।
धर्माधर्मात्मकं कर्मेत्येतैः पाशैर्युतः पशुः ॥५॥
पशोरज्ञतया मायायोगो भोगाय कर्मणाम् ।
समायातीश्वरेच्छातो मुक्तिर्नास्यान्यथा यतः ॥६॥
ततः सुखादिकं कृत्स्नं भोगं भुङ्क्ते स्वकर्मतः ।
संसारी स पशुर्बद्धो मुक्तः पाशत्रयोज्झितः ॥७॥

[2][सकलादित्रयस्वरूपम्]

त्रिधा सोऽयमनुग्राह्यः सकलः प्रलयाकलः ।
विज्ञानाकल इत्येषां स्वरूपमधुनोच्यते ॥८॥
मायाकर्ममलच्छन्नः सकलः सोऽभिधीयते ।
मलकर्मावृतो यस्तु स भवेत्प्रलयाकलः ॥९॥
मलैकबन्धसंबद्धो विज्ञानाकल उच्यते ।

---

[1] 'अथात्मा विमलः शुद्धो मायया बध्यते सदा ।
सहजमलसंबन्धात्पशुरित्युच्यते बुधैः' ॥
'आणवं सहजं प्रोक्तं तुषकम्बुकवत्क्रमात् ।
मोहो मदश्च रागश्च विषादश्चैव शोषितम् ॥
हर्षकोऽपि च वैचित्र्यं सप्तैते सहजा मलाः'
'सहजं मलमित्युक्तमागन्तुकमलं शृणु ।
मायेयं कर्मजं चैव द्विविधं शिवशासने ॥'
'त्रिमलैर्बध्यते चात्मा सकलः परिवारतः ।'
(**सुप्रभेदे** ज्ञानपादे २.३, ५ उ०–६, ७ उ०, ८ पू०, ११ पू०);
'मति मायात्मके पुंसः संनिकृष्टे मलेऽपरे ।
स्थूलः प्राधानिको बन्धः स च कर्मवशात्स्थितः ॥
मोहो मदश्च रागश्च विषादः शोष एव च ।
वैचित्र्यं चैव हर्षाख्यः सप्तैते सहजा मलाः ॥
मत्स्वेतेष्वपि ये पाशा मायातः क्षुरिताः कलाः ।
तदुद्बलितवीर्योऽणुर्भुङ्क्ते प्रकृतिजान्गुणान् ॥'
(**मतङ्गपारमेश्वरे** विद्यापादे ६.१०२ उ०–१०४);
'कलास्थलान्ततत्त्वौघं माता मायेति सा मता ।
धर्माधर्मात्मकं सर्वं यत्तत्कर्मेति कीर्तितम् ॥
संरुद्धं येन चैतन्यं तदज्ञानं मलं मतम् ।
मायाकर्ममलस्तोमैरेतैर्युक्तस्ततः पशुः ॥'
(**सिद्धान्तशेखरे** २.२.३ उ०–५ पू०)

[2] 'पशवस्त्रिविधा ज्ञेयाः सकलः प्रलयाकलः ।
विज्ञानाकल इत्येषां शृणुध्वं लक्षणं क्रमात् ॥
मलोपरुद्धदृक्शक्तिस्तत्प्रसृत्यै कलादिमान् ।
भोगाय कर्मसंबन्धः सकलः परिपठ्यते ॥
प्राग्वन्निरुद्धदृक्शक्तिः कर्मपाकात्कलोज्झितः ।
कर्मणैष्यत्कलायोग्यो यः स च प्रलयाकलः ।
मलोपरुद्धशक्तित्वाच्छून्यकल्पस्वदृक्क्रियः ॥
तृतीयः पठ्यते तन्त्रे नाम्ना विज्ञानकेवलः ।'
(**पौष्करे** ४.२ उ०–६ पू०)

[1]| दीक्षाभेदः |

निराधारोऽथ साधारः शिवस्यानुग्रहो द्विधा ।।१०।।
निराधारो द्वयोस्तेषां साधारः सकलस्य तु ।
आचार्यनिरपेक्षेण क्रियते शम्भुनैव या ।।११।।
तीव्रशक्तिनिपातेन निराधाराथ सा स्मृता ।
शिवोऽनपेक्षिताचार्यो द्विधा शक्तिनिपातनात् ।।१२।।
स्वयमेवानुगृह्णाति विज्ञानप्रलयाकलान् ।
आचार्यमूर्तिमास्थाय चतुर्धा शक्तिपाततः ।।१३।।
भगवाननुगृह्णाति स एव सकलानपि ।
[2]**शिवस्यानुग्रहाद्दीक्षा जायते कृतकर्मणाम् ।।१४।।**
सा चानेकविधा प्रोक्ता तत्प्रपञ्चोऽयमुच्यते ।
चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ।।१५।।
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ।

[3]| चाक्षुषी दीक्षा |

चक्षुरुन्मील्य यत्तत्त्वं ध्यात्वा शिष्यः समीक्ष्यते ।।१६।।
पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी भवेत् ।

---

[1] 'साधारा च निराधारा साधारा सकलस्य तु ।
निराधारा ह्यथान्येषामेवं दीक्षा मयोदिता ।।
आचार्यनिरपेक्षेण तीव्रशक्त्या तु शम्भुना ।
या क्रिया क्रियते सा तु निराधारेति कीर्तिता ।।
गुरुमूर्तिं समास्थाय मन्दतीव्रादिभेदतः ।
कुरुते सकलस्येशः साधारां तामिमां विदुः ।।'
(**अचिन्त्यविश्वसादाख्ये** ८.२०–२२) ;
'अथैतेषां शिवो दीक्षां त्रयाणां देहभेदतः ।
कुरुते शक्तिपातेन मन्दतीव्रादिभेदतः ।।
सेयं दीक्षा द्विधा भिन्ना साधाराधारवर्जिता ।
आचार्यमन्तरेणैव क्रियते शंकरेण या ।।
विज्ञानाकलनाम्नश्च प्रलयाकलकस्य च ।
तीव्रशक्तिनिपातेन दीक्षा साधारवर्जिता ।।
गुरुमूर्तिं समाश्रित्य मन्दशक्तिनिपाततः ।
कुरुते सकलस्येशः साधारां तामिमां विदुः ।।
इत्य चतुर्विधा दीक्षा साधारा शिवशासने ।'
(**सिद्धान्तशेखरे** २.२.१२–१६ पू०)

[2] 'साधारणा तु सा दीक्षा नानाभेदाद्भवेत्पुनः ।
चाक्षुषी स्पर्शदीक्षा च मन्त्रदीक्षा च वाचिकी ।।
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ।
(**सिद्धान्तशेखरे** २.२.३० उ०, ३१) ;
चाक्षुष्यादिदीक्षाणां प्रस्ताव उत्तरकामिके —
'चाक्षुष्याद्यास्तु याः स्मृताः ।
दीक्षास्ताभिः समायुक्ताः परिचारकनामकाः ।
न तु लिङ्गार्चने योग्याः किमु दीक्षादिकर्मणि ।।'
(**उत्तरकामिके** २.४.५४ उ०, ५५)

[3] 'गुरोर्निरीक्षणादेव सर्वपापात्प्रमुच्यते ।'
(**अचिन्त्यविश्वसादाख्ये** ८.५ उ०) ;
'ध्यायञ्छिवात्मा समवेक्ष्य शिष्य
तस्मिन्नियम्याध्वगणं दृशैव ।

[1] [स्पर्शदीक्षा]

निधाय दक्षिणे हस्ते शिवं ब्रह्माङ्गसंयुतम् ।।१७।।
संस्पृशेच्छिष्यमूर्धादि स्पर्शदीक्षा भवेदियम् ।

[2] [वाचिकी दीक्षा]

तत्त्वे चित्तं समाधाय बृंहितान्तरतेजसा ।।१८।।
उच्चरेत्संहितामन्त्रान्वाग्दीक्षेयं प्रकीर्तिता ।

[3] [मानसी दीक्षा]

मानसं विधिमाश्रित्य मानसीत्यभिधीयते ।।१९।।

लिंत्वा तु पाशांश्च शिवत्वमस्मिन्
संपादयेद् या खलु चाक्षुषी स्यात् ।।'
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ॰ १३८);
'चक्षुरुन्मील्य यत्तत्त्वं ध्यात्वा शिष्यं समीक्षते ।
पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी मता ।।'
(**सिद्धान्तशेखरे** २.२.३२);
'उन्मील्य दृष्टी हि गुरुः शिवोऽहं
संचिन्त्य शिष्यं दययेक्षते चेत् ।
मन्त्रीव दष्टं फणिना तथैवं
दीक्षाक्रिया या खलु चाक्षुषी सा ।।'
(**शैवभूषणे** १८०)

[1] 'गुरुः स्पृशति हस्तेन यद्यत्पश्यति चक्षुषा ।
शिवं भवति तत्सर्वं शिवादेव प्रमादतः ।।
न लिप्यते मलैर्नैव पद्मपत्रमिवाम्भसा ।
(**अचिन्त्यविभ्वसादाख्ये** ८.६, ७ पू०);
'रुद्रः स्वयं मन्त्रतनुः स्वहस्ते
पद्मे समुत्पत्त्यङ्गयुते समूले ।
स्मृत्वा शिवं यत् स्पृशतीह तेन
सा स्पर्शदीक्षा च्युतपाशबन्धा ।।'
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० १३८);
'निधाय दक्षिणे हस्ते शम्भुं ब्रह्माङ्गसंयुतम् ।
निदध्याच्छिष्यशिरसि स्पर्शदीक्षा भवेदियम् ।।'
(**सिद्धान्तशेखरे** २.२.३३)

[2] 'विभ्वाध्वसंयुक्तसदाशिवात्मा
मन्त्रान्स्ववक्त्रे विनिधाय सर्वान् ।
लिंत्वास्य पाशान्वचसा क्रमेण
संदीक्षयेद्यत्र तु वाचिकी स्यात् ।।
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० १३८);
'उच्चरेद्वचसा मन्त्रान् सा दीक्षा वाचिकी स्मृता ।
(**सिद्धान्तशेखरे** २.२.३३)

[3] 'मनसा गृह्यते देवि युज्यते मनसा पशुः ।
एकेन्द्रियप्रमाणैस्तु मनःसर्वेषु सुन्दरि ।।
मनसा गृह्यते यस्मात्तस्मादेव मनात्मिका ।
तत्स्थानं मनसा सर्वं तन्मनोबुद्धिसंयुतम् ।।
सर्वैः करणयोगैश्च उपलब्धुं महेश्वरि ।
आत्मविद्याशिवं चैव सृष्टिसंहारकल्पनात् ।।
एवं तत्त्वानि विन्यस्य शिवं ह्युपरि विन्यसेत् ।
एवं तु मनसा ध्यात्वा कर्तव्यानुग्रहेच्छया ।।'
(**निश्वासकारिकायां** ३६.४५–४८);
'स्वयं शिवात्मा निखिलाध्वयुक्तः
स्वहृत्सरोजे सकलं समन्त्रम् ।
स्मरञ्शिवं मानसदीक्षयामुं
नियोजयेज्ज्ञानवशाच्छिवत्वे ।।'
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० १३८)

[1][शास्त्री दीक्षा]

शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता।

[2][योगदीक्षा]

योगेन योगदीक्षा स्याच्छिवत्वे सा व्यवस्थिता ॥२०॥

[3][हौत्री दीक्षा]

रजःकुण्डवती हौत्री सा द्विभेदा किलोदिता।
[4]समासाच्च द्विधा चेयं दीक्षा तज्ज्ञैरिहोच्यते ॥२१॥
ज्ञानवती भवत्येका क्रियावत्यपरा स्मृता।
विनेज्यानलकर्मादि मनोव्यापारमात्रतः ॥२२॥
दीक्षा ज्ञानवती प्रोक्ता सम्यक् तत्त्वावबोधजा।
इज्यानलवती या तु क्रियाकौशलसंभवा ॥२३॥
क्रियावत्यथ सानेका निर्बीजाथ सबीजका।

[5][निर्बीजा सबीजा च]

तत्र निर्बीजिका या सा समयिन्यथ पुत्रके ॥२४॥

---

[1] 'शिवशास्त्रप्रदानेन शास्त्रदीक्षा समाहृता'
(**सिद्धान्तशेखरे** २.२.३५ उ०);
'शास्त्री तु शैवागमपाठशिक्षा'
(**शैवभूषणे** १८२ उ०)

[2] 'तत्त्वद्योतकयोगस्य प्रदानाद्योगजा भवेत्।'
(**सिद्धान्तशेखरे** २.२.३६ पू०);
'योगी षडाधारसुदर्शिनी स्यात्।'
(**शैवभूषणे** १८२ उ०)

[3] 'अग्निकार्यमयी हौत्रीत्येवं दीक्षा निरूपिता।'
(**सिद्धान्तशेखरे** २.२.३६ उ०);
'हौत्री चात्र तु कुण्डमण्डलवती साचार्यहस्तक्रिया
सामान्यादिषडध्वशुद्धिसहिता निर्वाणदीक्षा हि
सा।'
'हौत्री सद्गुरुणा कृता च कलया शुद्धिं च संदर्शिनी
शैवी संचितपापराशिहरिणी सौभाग्यदात्री च
सा।
दीक्षा षड्गुणदायिनी निरुपमा साष्टाङ्गसिद्धि-
प्रदा
पुण्यानामियमेव मूर्ध्नि निहिता दीक्षैव मोक्ष-
प्रदा॥'
(**शैवभूषणे** १८३ पू०; १८४)

[4] 'सा च क्रियावती पूर्वा ज्ञानवत्यपरा स्मृता।
या मण्डपरजःकुण्डपाशच्छेदाध्वशोधनैः॥
द्रव्यहोमादिसंयुक्ता दीक्षा मोक्ता क्रियावती।
विना मण्डपकुण्डाद्यैर्मनोव्यापारमात्रतः॥
सम्यग्ज्ञानावबोधान्ता दीक्षा ज्ञानवती स्मृता।'
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० १३८)
'भेदोपभेदसंयुक्ता सा पुनर्द्विविधा भवेत्।
आद्या क्रियावती तत्र कुण्डमण्डलपूर्विका॥
मनोव्यापारमात्रोत्था या सा ज्ञानवती परा।'
(**सिद्धान्तशेखरे** २.२.२९, ३० पू०)

[5] 'चतुर्विधा क्रियादीक्षा सबीजा बीजवर्जिता।
अधिकारेण संयुक्ताप्यन्या निरधिकारिणी॥

सबीजा तु भवेद्दीक्षा साधकाचार्ययोरपि।
अथ निर्बीजिका दीक्षा प्रोक्ता सा द्विप्रकारिका ॥२५॥
एका निर्वाणदा सद्यो द्वितीया देहपाततः।
चाक्षुषादिविभेदेन या दीक्षा समयी स्मृता ॥२६॥
निराधारेण गुरुणा सद्यो निर्वाणदा कृता।
साधारेण कृता सा चेन्मुक्तिदा देहपाततः ॥२७॥
बालबालिशवृद्धस्त्रीभोगभुग्व्यथितात्मनाम्।
भवेन्निर्बीजिका दीक्षा समयाचारशुद्धिदा ॥२८॥
विदुषां च समर्थानां सबीजा परिकीर्तिता।

[१][शिवधर्मिणी लोकधर्मिणी च]

सबीजा च द्विधा भिन्ना प्रथमा शिवधर्मिणी ॥२९॥
साधकाचार्ययोः सोक्ता देशकालादिभेदतः।
धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकम् ॥३०॥
संचिन्त्य शोध्यते यत्र सैवोक्ता शिवधर्मिणी।
अधर्ममात्रसंशुद्धौ द्वितीया लोकधर्मिणी ॥३१॥

सबीजा समयाचारसंयुक्तानां नृणां भवेत्।
विधिहीना त्वशक्तादिस्त्रीबालेषु विधीयते ॥
साधकाचार्ययोग्या या साधिकारा तु सा भवेत्।
नित्ये नैमित्तिके काम्ये योग्यतास्ति विशेषतः ॥
नित्यमात्राधिकारा वा निर्बीजान्येति'।

(**अचिन्त्यविभ्वसादाख्ये** ८.१२–१५ पू०);

'सबीजा समयोपेता समयाचारसंयुता।
पाशच्छेदादिसंयुक्ता विदुषामेव सा स्मृता।
निर्बीजा तु पुनर्दीक्षा राज्ञां बालाबलास्वपि ॥
अतिवृद्धातिरुग्णानां बालिशानां च शस्यते।
साधकाचार्ययोर्नित्यक्रियानैमित्तिकादिषु ॥
स्वपरार्थाधिकारित्वात्सबीजैव विधीयते।
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० १३८)
'सबीजा प्रथमा दीक्षा द्वितीया बीजवर्जिता।
साधिकारा तृतीया स्यात्तुर्या निरधिकारिका ॥
समयाचारसंयुक्ता सबीजा सुधियां भवेत्।'
'अथ निर्बीजदीक्षायां द्विधा भेदो निगद्यते।
सद्यो निर्वाणदा त्वाद्या चिरान्निर्वाणदापरा ॥
प्रारब्धसंचितागामिकर्मजालं विशोध्यते।
ययात्यन्तविरक्तानां सद्यो निर्वाणदा तु सा ॥
प्रारब्धकर्मणां भोगाद्यया मुक्ति निरन्तराम्।
यान्ति बालादयः मेयं चिरान्निर्वाणदा भवेत् ॥'
(**सिद्धान्तशेखरे** २.२.१६ उ०, १७; २२ उ०–२५ पू०)

[१] 'सबीजा द्विविधा प्रोक्ता प्रथमा शिवधर्मिणी।
धर्माधर्मात्मकं सर्वं संचितागामिचित्रकम् ॥
संमृद्य साध्यते यस्मात्सा दीक्षा शिवधर्मिणी।
अधर्मसंचितं सर्वं कर्माङ्गमिव शोध्यते ॥
धर्मावशेषितो यत्र सा दीक्षा लोकधर्मिणी।
तत्राद्या सशिखाच्छेदा न शिखाच्छेदनापरा ॥
भौतिकी नैष्ठिकी चेति द्विधा सा शिवधर्मिणी।
व्रतमोक्षसमायुक्ता भौतिकीति निगद्यते ॥
शरीरपातपर्यन्ता यदा सा नैष्ठिकी मता।'
(**सिद्धान्तशेखरे** २.२.१८–२२ पू०)

[1][साधिकारा निरधिकारा च]

नित्यमात्राधिकारित्वात्समयिन्यथ पुत्रके।
दीक्षा निरधिकारैव नैमित्तानधिकारिणी ॥३२॥
साधकाचार्ययोर्नित्यनैमित्तकाम्यकर्मसु।
सर्वत्रैवाधिकारित्वात्साधिकारैव सा तयोः ॥३३॥

[2][समयदीक्षादीनां भेदः]

यत्र रुद्रपदे योगो योगो यत्रैश्वरे पदे।
शिखाच्छेदो न यत्रास्ति दीक्षा सा समयी द्विधा ॥३४॥
यत्र पाशशिखाच्छेदो योगः शिवपदे भवेत्।
निर्वाणाख्या तु सा सैव पुत्रके नाभिषेकतः ॥३५॥

---

[1] 'अथातः साधिकारायाः स्वरूपं परिभाष्यते।
नित्ये नैमित्तिके काम्ये कर्मकाण्डे यतो भवेत् ॥
अधिकारः समर्थानां साधिकारेति सा स्मृता।
अधिकारविहीनत्वात्काम्ये नैमित्तिकेऽपि च ॥
नित्याधिकारिणोः पुत्रसमयिन्योर्यतस्तयोः।
ततः मेयं समाख्याता दीक्षा निरधिकारिका ॥'
(**सिद्धान्तशेखरे** २.२.२५ उ०–२८ पू०)

[2] 'गन्धाधिवासितं कृत्वा स्वसव्यकरपल्लवम्।
मासनेन सदेहेन शिवेन समधिष्ठितम् ॥
शिवहस्तमिति ध्यात्वा सापेक्षनिरपेक्षकम्।
हृद्देशाद् भ्रूप्रदेशान्तं नीत्वा वै चूलिकान्तकम् ॥
सह प्रासादोच्चारेण समस्तग्रन्थिभेदिना।
रुद्रेश्वरपदावाप्तिदायकं शिरसि न्यसेत् ॥'
'अयं रुद्रो भवत्वात्मा भगवंस्त्वत्प्रसादतः।
इत्येवं प्रार्थनां कृत्वा कुर्यात्प्रोक्षणताडने' ॥
(**उत्तरकामिके** २०.६६–६८; ८३)

'अध्वशुद्धिः शिखाच्छेदस्त्वत्प्रसादान्मया कृतः।
यात्वयं परमं धाम भगवन्परमेश्वर ॥'
'संभाव्य मन्त्रमुच्चार्य कारणत्यागयोगतः।
शिवे संयोजयेच्छिष्यं पूर्णया कुम्भकेन तु ॥'
(**उत्तरकामिके** २३.२०१, २१२ उ०; २१३ पू०);

'शिखाच्छेदं ततो होमं मूलेनैव तु योजयेत्।
संयोज्य परमे तत्त्वे संस्थानं तत्र कारयेत् ॥
अधिकारार्थमाचार्ये परापरपदे स्थिते।
शिवत्वे साधकानां तु विद्यादीक्षां सदाशिवे ॥
पुत्रके परमे तत्त्वे समयिन्यैश्वरे तथा।
एवमुद्देशतो दीक्षा कथिता विस्तरोऽन्यतः।'
(**नेत्रतन्त्रे** ४.७ उ०–१० पू०);

'परमशिवयोजनानन्तरमाचार्याणामपरशिवयोजना कार्या, साधकानां तु शिवयोजनानन्तरं सदाशिवयोजना कार्या, पुत्रकाणां परतत्त्व एव, समयिनामीश्वरतत्त्वे इति विभागः।'
(क्षेमराजरचित-**नेत्रतन्त्रव्याख्यायाम्** ९);

'क्रियावत्यपि समयदीक्षा निर्वाणदीक्षा साधकदीक्षा चेति बहुविधा। यत्र मलशोधनमात्रेण क्रियया संस्कृत्य शिष्यं समये प्रवेश्य रुद्रात्मतां चापादयेत् सा समयदीक्षा।
षड्यत्र शुध्यन्त्यध्वानः क्रियावाप्तिश्च पुष्कला ॥
तत्तु पाशशिखाच्छेदो योगः शिवपदे तथा।
निर्वाणदीक्षा सा प्रोक्ता विशेषेणाधिकारिणाम् ॥
यस्यां तु पाशविश्लेषान्निवृत्त्यादिषु शोध्यते।
अणिमादिगुणावाप्तिर्योगश्चैवेश्वरे पदे ॥
अधिकारश्च तत्रादौ दीक्षा सा साधकाह्वया।'
(**ईशानशिवगुरुदेवपद्धतौ** तृतीयभागे पृ० १३८, १३९)

साध्यमन्त्राभिषेकाच्च साधके सा प्रकीर्तिता।
सर्वविद्याभिषेकेण भवेत्साचार्यगोचरे ॥३६॥

[अध्वसंशुद्धिः]

शिवसंस्कारयुक्तस्य यच्छिवत्वसमर्पणम्।
क्रियया वाथ शक्त्या वा दीक्षा सा सर्वतो मता ॥३७॥
दीक्षया मुच्यते देही त्रिविधाद्भवबन्धनात्।
सा दीक्षा चाध्वसंशुद्धिः स चाध्वा षड्विधः स्मृतः ॥३८॥

[१][षड्विधोऽध्वा]

मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनात्मकः।
तत्त्वाध्वा च कलाध्वा च विशत्येकं पदं शिवम् ॥३९॥

[२][षडध्वनां व्याप्यव्यापकभावः]

मन्त्राः पदानि वर्णाश्च व्याप्तानीह समन्ततः।
वर्णास्तु भुवनैर्व्याप्तास्तत्त्वैर्व्याप्तानि तानि च ॥४०॥
कलाभिस्तानि तत्त्वानि व्याप्तानीह कलाः क्रमात्।
शोधनीया विभाव्यैवं पञ्च पञ्चाध्वगर्भिताः ॥४१॥
[३]निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च नाभसी।
कला हृत्कण्ठतालुभ्रूब्रह्मरन्ध्रावधि क्रमात् ॥४२॥

---

[१] 'तत्त्वाध्वा च पदाध्वा च वर्णाध्वा भुवनात्मकः।
मन्त्राध्वा च कलाध्वा च विशन्त्येकं परं शिवम् ॥
अप्रमेयमनिर्देश्यम्'
(**स्वायम्भुवे** ३६.२, ३ पू०)

[२] 'शान्त्यतीतां चतुर्थ्यन्तां नमस्कारसमन्विताम्।
उच्चार्य योजयेत्सूत्रे भ्रूमध्यान्तोपलक्षिते ॥
अनेनैव क्रमेणाथ भूतशुद्धचुक्तमार्गतः।
कलाचतुष्टये कुर्यात्ताडनग्रहयोजनम् ॥
गलश्वभ्रान्तनाभ्यन्तजान्वन्ताङ्घ्रिष्ठकान्तिकम्।
व्याप्यव्यापकभावं च कुर्यात्तत्र विचक्षणः ॥
मन्त्राः पदानि वर्णाश्च तत्त्वानि भुवनानि च।
व्याप्यानि व्यापकाः कर्ममलमायेयबन्धनाः ॥
व्याप्या मलादयश्चापि व्यापकास्तु कलाः स्मृताः।
तासां च संग्रहे तस्मात्सर्वे स्युः स्वीकृतास्त्विह ॥
स्थापिताभिश्च शुद्धाभिरिहोपस्थापिता अपि।
शुद्धा भवन्ति सर्वे स्युस्तस्मात्तच्छुद्धिरिष्यते ॥'
(**उत्तरकामिके** २३.३०–३५)

[३] निवृत्तिर्जानुपर्यन्तं प्रतिष्ठा नाभिसीमका।
विद्या कण्ठान्तमेवं हि मुखान्तं शान्तिरेव तु।
शान्त्यतीता तदूर्ध्वे तु परापरशिवान्तका ॥
(**सुप्रभेदे** चर्यापादे ४.४२ उ०; ४३)

[1][निवृत्तिकलायां योजनीयाः]

निवृत्तौ पार्थिवं तत्त्वं चिन्त्यमेकं क्षमक्षरम् ।
कालाग्निप्रभृतीनां च पुरमष्टोत्तरं शतम् ।।४३।।
अन्त्यपदान्महादेवपदावधि विलोमतः ।
व्योमव्यापिपदान्यष्टाविंशतिः परिसंख्यया ।।४४।।
सद्योजातश्च हृदयं द्वौ मन्त्रौ परिकीर्तितौ ।
गुणा गन्धादिशब्दान्ताः पञ्च ब्रह्मा च कारणम् ।।४५।।

[2][प्रतिष्ठाकलायां योजनीयाः]

प्रतिष्ठायामबादीनि त्रयोविंशतिसंख्यया ।
प्रकृत्यन्तानि तत्त्वानि ज्ञातव्यानि स्वभावतः ।।४६।।
त्रयोविंशतिवर्णाश्च हादिटान्ता विलोमतः ।
ज्ञातव्यान्यमरेशादि षट्पञ्चाशत्पुराणि तु ।।४७।।
महेश्वरादरूप्यन्ता पदानामेकविंशतिः ।

---

[1] 'निवृत्ति विन्यमेच्छक्तौ कलातत्त्वादिसंयुताम् ।
पृथ्वीतत्त्वं क्षकारश्च मन्त्रौ हृदयमद्यकौ ।।'
'भुवनानां शतं चाष्टाधिकमेवं तु विन्यसेत् ।
एकाशीतिपदेष्वन्त्यप्रणवादि विलोमतः ।।
नमोद्वयं च प्रणवं षडक्षरमतः परम् ।
सर्वदश्च ततः शर्वशिवसूक्ष्मद्वयं तथा ।।
शब्दद्वयं तथा ज्ञानद्वयं पिङ्गद्वयं तथा ।
पतङ्गं च द्विरभ्यस्तं तुरुयुग्मपदं भवेत् ।।
साक्षियुग्मपदं पश्चात्पूर्वस्थितमतः परम् ।
अस्तुतास्तुत इत्येवं ततश्चानर्चितानर्चित ।।
ब्रह्मविष्णुरुद्रपर सर्वमान्निध्यकारक ।
सर्वभूतसुखप्रद भवोद्भवपदं ततः ।।
भवयुग्मं तथा शर्वयुग्मं च प्रथमद्वयम् ।
मुञ्चमुञ्चपदं योगाधिपते च पदं भवेत् ।।
महातेजःपदं सद्भावेश्वरं चेति कीर्तितम् ।।
महादेवपदं पश्चात्पदान्यष्टौ च विंशतिः ।।
निवृत्त्या व्याप्तमध्वानं तत्त्वाद्यं कलया न्यसेत् ।
'ओं ब्रह्मणे नमश्चेत्यावाह्य संपूज्य तर्पयेत् ।
शब्दस्पर्शौ गृहाणात्र ब्रह्मन्स्वाहेति मन्त्रतः ।।
आहुतीनां त्रयं दत्त्वा शिवाज्ञां श्रावयेत् ततः ।
कारणेश त्वया नास्य यातुः पदमनामयम् ।।
प्रतिबन्धो विधातव्यस्त्वाज्ञैषा पारमेश्वरी ।
ब्रह्माणं संविसर्ज्याथ'
(**उत्तरकामिके** २३.६८; ८३ उ०–९०; १२२–१२४)

[2] 'अथ सूत्रे प्रतिष्ठायां शुद्धचर्थमवलोकयेत् ।
त्रयोविंशतितत्त्वानि चापस्तेजो मरुद्वियत् ।।
गन्धो रसो रूपस्पर्शौ शब्दोपस्थौ च पायु च ।
पादौ पाणी च वाङ् नासा जिह्वाचक्षुस्त्वचः श्रुतिः ।।
मनोऽहंकारबुद्धी च प्रकृतिः स्यात्ततः परम् ।
तत्त्वानि कथितान्येवं ळादि टान्ता द्विजोत्तमाः ।।
चतुर्विंशतिवर्णाः स्युः शिरो वामस्तथैव च ।
अघोर इति मन्त्राः स्युः षट्पञ्चाशत् पुराणि तु ।।'
'महेश्वराद्यरूप्यन्ता पदानामेकविंशतिः ।'
'प्रतिष्ठाकलया चैतत्सर्वं व्याप्तं तु भावयेत् ।
इत्युक्तसंख्यतत्त्वार्णपदमन्त्रैस्त्रिविष्टपैः ।
गर्भितां तामनुस्मृत्य संदधीतोपभुक्तये'
'हरेः शुल्कं रसं दत्त्वा'
(**उत्तरकामिके** २३.१२९–१३२; १४१ पू०; १४८, १४९ पू०; १५३ पू०)

शिरो वामश्च मन्त्रौ द्वौ चत्वारस्तु गुणा मताः ।।४८।।
रसादिशब्दपर्यन्ता विष्णुरत्र च कारणम् ।

[१][विद्याकलायां योजनीयाः]

विद्यायां सप्ततत्त्वानि पुरुषादीन्यनुक्रमात् ।।४९।।
वामादिभुवनानां च विज्ञेया सप्तविंशतिः ।
ध्यानाहारायपर्यन्ता व्यापिन्निति पदादितः ।।५०।।
पदानां विंशतिर्मन्त्रौ शिखाघोरव्यवस्थितौ ।
अकारादिधकारान्ता वर्णाः सप्त विलोमतः ।।५१।।
रूपस्पर्शौ च शब्दश्च गुणा रुद्रस्तु कारणम् ।

[२][शान्तिकलायां योजनीयाः]

शान्तौ तु त्रीणि तत्त्वानि विद्येश्वरसदाशिवाः ।।५२।।
गकाराच्च त्रयो वर्णा मन्त्रौ वक्त्रतनुच्छदौ ।
वामामुख्यपुराण्यष्टादशैव परिसंख्यया ।।५३।।

[१] 'कलया विद्यया व्याप्तः पुरुषश्चादिमो भवेत् ।
रागो नियतिविद्ये च कलाकालौ च मोहिनी ।।
अकारादिधकारान्ता वर्णाः सप्त विलोमतः ।
मन्त्रः शिखा पुराणीह सप्तविंशतिसंख्यया ।।'
'पदानि विंशतिर्व्यापिन् व्यापिन्निति पदं भवेत् ।
व्योमिन् व्योमिन् पदं पश्चाद्वीप्मितं स्यादचेतनम् ।
परमेश्वरपरायेति पदं चैव पुनर्भवेत् ।
ज्योतीरूपायमंज्ञं च सर्वयोगाद्यमेव च ।।
पदं चानिधनायेति पदं गोप्त्रे प्रकीर्तितम् ।
गुह्याय चातिगुह्याय पदं स्यादों नमो नमः ।।
पदं ब्रह्माणि पश्चात्र मद्यादीनि क्रमेण तु ।
शिवायेति पदं सर्वप्रभवेति पदं ततः ।
शिवायेति पदं पश्चादों नमः पदमन्ततः ।।
ध्यानाहारायमंज्ञं च कीर्तितानि पदानि च ।'
'रूपगन्धौ गृहाणेति रुद्रे शुल्कं समर्पयेत् ।'
(**उत्तरकामिके** २३.१५३ उ०–१५५ पू०;
१५९ उ०–१६४ पू०; १६५ उ०)

[२] 'विलोक्य मनसा शान्ति तस्यामन्तर्गतानि च ।
तत्त्वानि त्रीणि विद्येशसादाख्यानि द्विजोत्तमाः ।।
वर्णास्तु गखकाः प्रोक्ता मन्त्रौ वक्त्रतनुच्छदौ ।
वामा ज्येष्ठा च रौद्री च काली कलविकरणी ।।
बलविकरणी चैव बलप्रमथनीत्यपि ।
सर्वभूतदमन्येवं मनोन्मन्यपरा भवेत् ।।
पुराणि नव विद्यायामनन्तः सूक्ष्मसंज्ञकः ।
शिवोत्तमैकनेत्रौ चाप्येकरुद्रस्त्रिमूर्तिकः ।।
श्रीकण्ठश्च शिखण्डी चेत्येवमीशे पुराष्टकम् ।
सादाख्यभुवनं स्वस्मिन्पुराण्यष्टादशैव तु ।।
एकादशपदन्यासो नित्यं योगिन इत्यपि ।
योगपीठाद्यमन्यत्स्याच्छाश्वताय पदं पुनः ।।
ध्रुवायेतिपदं चैवानाश्रिताय पदं ततः ।
अनाथाय पदं प्रोक्तमनन्ताय पदं पुनः ।।
शिवायेति पदं सर्वव्यापिने च पदं ततः ।
व्योमादि व्योमरूपाय पदं व्योमाद्यमेव च ।।
निष्कृतौ शतहोमं तु कवचेन समाचरेत् ।
सर्वं पूर्ववदुद्दिष्टं शुल्कार्थं बुद्ध्यहंकृती ।।
ईश्वरः कारणेशः स्यात् प्राग्वत्सर्वमतः परम्' ।
(**उत्तरकामिके** २३.१६८ उ०–१७७)

नित्यं योगिन इत्यादीन्येकादश पदानि च ।
व्योमव्यापिन इत्यन्तान्युक्तानीह विलोमतः ॥५४॥
गुणौ स्पर्शश्च शब्दश्च द्वावीश्वरस्तत्र कारणम् ।

[१][शान्त्यतीतकलायां योजनीयाः]

शान्त्यतीतकलायां तु शिवतत्त्वं व्यवस्थितम् ॥५५॥
निवृत्त्यादिपुराण्यत्र भवन्ति दश पञ्च च ।
ओमित्येकाक्षरं मन्त्राश्चास्त्रेशानशिवास्त्रयः ॥५६॥
विसर्गाद्या अकारान्ता वर्णाः षोडश कीर्तिताः ।
भवत्येको गुणः शब्दः कारणं तु सदाशिवः ॥५७॥
इत्यध्वानं विचिन्त्याथ षडध्वव्यापिनीं पराम् ।
ध्यात्वा शक्तिं तदूर्ध्वं च भावयेत्परमं पदम् ॥५८॥

[षडध्वसमुद्देशः]

अथ दीक्षोपयुक्तानां क्रमेणैव षडध्वनाम् ।
इयत्तया समुद्देशः कथ्यतेऽत्र विभागशः ॥५९॥

[२][मन्त्राध्वा]

सद्यो वामस्तथाघोरः पुरुषेशानहृच्छिरः ।
शिखावर्मास्त्रमूलं च मन्त्राध्वा समुदाहृतः ॥६०॥

[३][पदाध्वा]

एकाशीतिपदैरेवं पदाध्वा परिकीर्तितः ।

---

[१] 'शान्त्यतीतकलायां तु शिवतत्त्वं व्यवस्थितम् ।
बीजं षोडशकं मन्त्राश्चास्त्रेशानशिवास्त्रयः ॥
ओमित्येकं पदं ज्ञेयं पुराणि दश पञ्च च ।'
ततो निर्बीजदीक्षायां पूर्णान्ते कारयेदिदम् ।
समयं समयाचारं शक्तौ पाशात्मकं न्यसेत् ॥
समयं समयाचारपाशशुद्धिं महेश्वर ।
शिष्यस्य कुरु कुर्वत्रेत्युक्त्वा शुल्कं समर्पयेत् ॥
शिवबीजं समुच्चार्य सदाशिवपदं ततः ।
मनो गृहाण स्वाहेति चाहुतित्रयमाचरेत् ॥
(**उत्तरकामिके** २३.१७८, १७९ पू०; १८६–१८८)

[२] 'सद्योवाममघोरश्च पुरुषेशानकौ तथा ।
हृच्छिरःशिखया वर्मनेत्रास्त्रेण समन्वितम् ॥
मू[लमन्त्र]समायुक्तं मन्त्राध्वा चेति कीर्तितः ।'
(**सूक्ष्मे** टि. ९७. पृ० ३६५, ३६६)

[३] 'एकाशीतिपदान्येतैर्मन्त्रैः संपूज्यते हरः ।
पदाध्वा च समाख्यातः'
(**सूक्ष्मे** टि ९७. पृ० ३६५)

[१][वर्णाध्वा]

अकारादिक्षकारान्तो वर्णाध्वा समुदाहृतः ॥६१॥

[भुवनाध्वा]

[२][तत्र निवृत्तिकलायां संयोज्यानि भुवनानि]

कालाग्निरथ कूश्माण्डं हाटकं ब्राह्मवैष्णवम् ।
रौद्रं च भुवनान्यन्तर्ब्रह्माण्डस्य स्थितानि षट् ॥६२॥
कपालीशस्त्वजो बुद्धो वज्रदेहः प्रमर्दनः ।
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥६३॥
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः ।
ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकौ ॥६४॥
याम्यो मृत्युर्हरो धाता विधाता च तथा परः ।
कर्ता योक्ता वियोक्ता च धर्मो धर्मपतिस्तथा ॥६५॥
निर्ऋतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः ।
ऊर्ध्वशेफो विरूपाक्षो धूम्रलोहितदंष्ट्रिणः ॥६६॥
बलश्चातिबलश्चैव पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च दीर्घबाहुर्जलान्तकः ॥६७॥
मेघनादः सुनादश्च दशमः परिकीर्तितः ।

---

[१] 'अकारादिक्षकारान्तो वर्णाध्वा चेति कीर्तितः ।'
(**सूक्ष्मे** टि. ९७. पृ० ३६६)

[२] 'कालाग्निरथ कूश्माण्डं हाटकं ब्राह्मवैष्णवौ ।
रौद्रं च भुवनान्यन्तर्ब्रह्माण्डस्य स्थितानि षट् ॥
कपालीशो ह्यजो बुद्धो वज्रदेहः प्रमर्दनः ।
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥
अग्निरुद्रो हुताशश्च पिङ्गलः खादको हरः ।
ज्वलनो दहनो बभ्रुर्भस्मान्तकः क्षयान्तकः ॥
याम्यो मृत्युर्हरो धाता विधाता कर्तृसंज्ञकः ।
संयोक्ता च वियोक्ता च धर्मो धर्मपतिस्तथा ॥
निर्ऋतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः ।
ऊर्ध्वकेशो विरूपाक्षो धूम्रलोहितदंष्ट्रिणः ॥
बलो ह्यतिबलश्चैव पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च दीर्घबाहुर्जलान्तकः ॥
मेघनादः सुनादश्च दशमः परिकीर्तितः ।
शीघ्रो लघुर्वायुवेगस्तीक्ष्णः सूक्ष्मः क्षयान्तकः ॥
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः ।
निधीशो रूपवान्धन्यः सौम्यदेहो जटाधरः ॥
लक्ष्मीधृग्रत्नधृक्छ्रीधृक् प्रसादश्च प्रकामदः ।
विद्याधिपेशौ सर्वज्ञो ज्ञानभुग्वेदपारगः ॥
सुरेशः शर्वो ज्येष्ठश्च भूतपालो बलिप्रियः ।
वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः ॥
ग्रसनोदुम्बरेशौ च फणीन्द्रो वज्रदंष्ट्रिणौ ।
शंभुर्विभुर्गणाध्यक्षस्त्रियक्षस्त्रिदशेश्वरः ॥
संवाहश्च विवाहश्च नभो लिप्सुस्त्रिलोचनः ।
वीरभद्रो भद्रकाली सर्वोर्ध्वे भुवनद्वयम् ॥'
(**उत्तरकामिके** २३.६९–८०)

शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः ॥६८॥
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः ।
निधीशो रूपवान्धन्यः सौम्यदेहो जटाधरः ॥६९॥
लक्ष्मीधृग् रत्नधृक् श्रीधृक् प्रसादश्च प्रकामदः ।
विद्याधिपेशौ सर्वज्ञो ज्ञानभुग्वेदपारगः ॥७०॥
सुरेशः शर्वो ज्येष्ठश्च भूतपालो बलिप्रियः ।
वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः ॥७१॥
ग्रसनोदुम्बरेशौ च फणीन्द्रो वज्रदंष्ट्रिणौ ।
शंभुर्विभुर्गणाध्यक्षस्त्र्यक्षश्च त्रिदशेश्वरः ॥७२॥
संवाहश्च विवाहश्च नभो लिप्सुस्त्रिलोचनः ।
वीरभद्रो भद्रकाली सर्वोर्ध्वे भुवनद्वयम् ॥७३॥
[1] कपालीशादयः प्राच्यामग्निरुद्रादयोऽनले ।
याम्याद्या दक्षिणे भागे निर्ऋत्याद्याश्च नैर्ऋते ॥७४॥
बलाद्या वारुणे भागे शीघ्राद्या वायुगोचरे ।
उत्तरे च निधीशाद्या ईशे विद्याधिपादयः ॥७५॥
वृषादयस्त्वधोभागे शंभुमुख्यास्तदूर्ध्वतः ।
ब्रह्माण्डस्य बहिर्देशे दशदिक्षु व्यवस्थिताः ॥७६॥
एवं कालाग्निमुख्यानां पुराणां परिसंख्यया ।
निवृत्त्याख्यकलायां तु ज्ञेयमष्टोत्तरं शतम् ॥७७॥

[2] [प्रतिष्ठाकलायां संयोज्यानि भुवनानि]

अमरेशः प्रभासश्च नैमिशः पुष्करौषधी ।
डिण्डिमुण्डिस्तथा भारभूतिश्च लकुलीश्वरः ॥७८॥

---

[1] 'कपालीशादयः प्राच्यामग्निरुद्रादयोऽनले ।
याम्याद्या दक्षिणे भागे निर्ऋत्याद्याश्च नैर्ऋते ॥
बलाद्या वारुणे भागे शीघ्राद्या वायुगोचरे ।
उत्तरे तु निधीशाद्या ईशे विद्याधिपादयः ॥
वृषादयस्त्वधो भागे शंभुमुख्या नभोगताः ।
भुवनानां शतं चाष्टाधिकमेवं तु विन्यसेत् ॥'
(उत्तरकामिके २३.८१–८३)

[2] 'अमरेशः प्रभासश्च नैमिशः पुष्करौषधी ।
डिण्डिमुण्डिस्तथा भारभूतिश्च लकुलीश्वरः ॥
हरिश्चन्द्रश्च श्रीशैलो जल्पेशाम्रातकेश्वरौ ।
मध्यमेशो महाकालः केदारो भैरवस्तथा ॥
गया चैव कुरुक्षेत्रं नाखलो नखलस्तथा ।
विमलेशोऽट्टहासश्च महेन्द्रो भीमसंज्ञकः ॥
वस्त्रापदो रुद्रकोटिरविमुक्तो महालयः ।
गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरित्यपि ॥
छगलण्डो द्विरण्डश्च माकोटो मण्डलेश्वरः ।
कालञ्जरः शङ्कुकर्णः स्थूलेश्वरः स्थलेश्वरः ॥
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च ।
सौम्यं चैव तथा ज्ञेयं प्राजेशं ब्राह्ममेव च ॥
अकृतश्च कृतश्चैव भैरवो ब्राह्मवैष्णवौ ।
कौमारमौमं श्रैकण्ठमष्टमप्त भवन्ति हि ॥
अमरेशादि चाप्तत्त्वे हरिश्चन्द्रादि तेजसि ।

हरिश्चन्द्रोऽथ श्रीशैलो जल्पेशाम्रातकेश्वरौ ।
मध्यमेशो महाकालः केदारो भैरवस्तथा ॥७९॥
गया चैव कुरुक्षेत्रं नाखलो नखलस्तथा ।
विमलेशोऽट्टहासश्च महेशो भीमकेश्वरः ॥८०॥
वस्त्रापदं रुद्रकोटिरविमुक्तो महालयः ।
गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरित्यपि ॥८१॥
छगलण्डो द्विरण्डश्च माकोटो मण्डलेश्वरः ।
कालञ्जरः शङ्कुकर्णः स्थूलेश्वरस्थलेश्वरौ ॥८२॥
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रमेव च ।
सौम्यं चैव तथा ज्ञेयं प्राजेशं ब्राह्ममष्टमम् ॥८३॥
अकृतं च कृतं चैव भैरवं ब्राह्मवैष्णवौ ।
कौमारं च तथा चौमं श्रीकण्ठं चाष्टमं तथा ॥८४॥
अमरेशादि चाप्तत्त्वे हरिश्चन्द्रादि तेजसि ।
गयादि वायुतत्त्वे च व्योम्नि वस्त्रापदादि च ॥८५॥
छगलण्डाद्यहंकारे पैशाचाद्यं मतौ स्थितम् ।
प्रकृतावकृताद्येवं षट्पञ्चाशत्पुराणि च ॥८६॥
ज्ञातव्यानि प्रतिष्ठायाममरेशादिनामभिः ।

[१][विद्याकलायां संयोज्यानि भुवनानि]

वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः ॥८७॥
प्रचण्डोमापती चाजोऽनन्तैकशिव[२] एव च ।
क्रोधश्चण्डेश्वरो ज्योतिः संवर्तः शूरकस्तथा ॥८८॥
पञ्चान्तकैकवीरौ च शिखेदश्च महाद्युतिः ।
[३]वामदेवोद्भवश्चैव भवश्चाप्येकपिङ्गलः ॥८९॥

गयादिं वायुतत्त्वे च व्योम्नि वस्त्रापदादि च ॥
छगलण्डाद्यहंकारे पैशाचाद्यं मतौ स्थितम् ।
प्रकृतावकृताद्येवं षट्पञ्चाशत्पुराणि तु ॥'
(उत्तरकामिके २३.१३३–१४१)

[१] 'वामो भीमस्तथोग्रश्च भवेशानैकवीरकाः ।
प्रचण्डोमापती चाजोऽनन्तैकशिवसंज्ञकौ ।
क्रोधेशश्चैव संवर्तो ज्योतिः पिङ्गश्च शूरकः ॥
पञ्चान्तकैकवीरौ च शिखेदश्च महाद्युतिः ।
वामदेवो भवश्चैवोद्भवश्चाप्येकपिङ्गलः ॥
एकेक्षणस्तथैशानस्तथैवाङ्गुष्ठमात्रकः ।
षट्कं च पञ्चकं चैवं युग्मं युग्मं द्वयं द्वयम् ॥
अष्टकं पुरुषादौ च मायान्ते तु पुराणि हि ।'
(उत्तरकामिके २३.१५५ उ०–१५९ पू०)

[२] अनन्तः+एकशिवः– अनन्त एकशिवः; ततो वृद्धिरार्षः ।

[३] वामदेवः+उद्भवः–वामदेव उद्भवः; ततो गुण आर्षः ।

एकेक्षणस्तथैशानस्तथैवाङ्गुष्ठमात्रकः ।
वामादि पुरुषे रागे प्रचण्डादि तु पञ्चकम् ॥९०॥
[1]**नियत्यादिषु क्रोधादि** [2]**महाद्युत्यादि मायिके ।**
वामादीनां [3]**पुराणां तु विद्यायां सप्तविंशतिः ॥९१॥**

[4][शान्तिकलायां संयोज्यानि भुवनानि]

[5]**वामा ज्येष्ठा च रौद्री च काली कलविकरणी ।**
तथा बलविकरणी बलप्रमथिनीत्यपि ॥९२॥
सर्वभूतदमन्येव[6] [7]**मनोन्मनीत्यनन्तकः ।**
सूक्ष्मः शिवोत्तम[8]**श्चैकाक्षैकरुद्रत्रिमूर्तयः ॥९३॥**
[9]**श्रीकण्ठश्च** [10]**शिखण्डी च** [11]**तथैवान्यः सदाशिवः ।**
[12]**वामादीनीह** [13]**विद्येशसदेशेष्वाश्रितानि च ॥९४॥**
[14]**शान्तौ वामामुखान्यष्टा**[15]**दशैव भुवनानि तु ।**

[16][शान्त्यतीतकलायां संयोज्यानि भुवनानि]

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ॥९५॥

---

[1] निर्वाणादिषु — अ, आ, इ.
[2] महसीत्याधिमाधिके — अ; महसीत्यादिमधिके — आ, इ.
[3] सुराणां — अ, आ, इ.
[4] 'वामा ज्येष्ठा च रौद्री च काली कलविकरणी ।
बलविकरणी चैव बलप्रमथनीत्यपि ॥
सर्वभूतदमन्येव मनोन्मन्यपरा भवेत् ।
पुराणि नव विद्यायामनन्तः सूक्ष्ममंज्ञकः ॥
शिवोत्तमैकनेत्रौ चाप्येकरुद्रस्त्रिमूर्तिकः ।
श्रीकण्ठश्च शिखण्डी चेत्येवमीशे पुराष्टकम् ॥
सादाख्यभुवनं स्वस्मिन् पुराण्यष्टादशैव तु ।)
(**उत्तरकामिके** २३.१७० – १७३ पू०)
[5] वामे — आ, इ.
[6] दमन्येच — अ.
[7] मनोन्मनीत्यनकं परम् — अ, इ; मनोन्मनी परं परम् — आ.
[8] श्चैव एकरुद्रस्त्रिमूर्तया — अ, इ; श्चैव एकरुद्रस्त्रिमूर्तयः — आ.
[9] श्रीखण्डी च — अ; श्रीखण्डश्च — आ, इ.
[10] शिखण्डयश्च — आ, इ.
[11] तथा वाक्या सदा० — अ; तथा वात्या सदा० — आ, इ.
[12] वामादीनि च — अ; इदमर्धं 'आ' मातृकायां न दृश्यते ।
[13] मद्येन्त — अ; मद्येश मदेशेषु श्रिता० — इ.
[14] यौ बीजौ वा मुखान्येषा – अ, आ; यौ बीजौ वा मुखान्येषु — इ.
[15] दशैव युवराणि तु — अ, आ; दवै भुवराणि तु — इ.
[16] ..... 'पुराणि दश पञ्च च ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च नाभसी ॥
पुराणि बैन्दवानीह पञ्च प्रोक्तान्यतः परम् ।
इन्धिका दीपिका चैव रोचिका मोचिका तथा ॥
तथोर्ध्वगामिनी चेति नादोत्थभुवनानि तु ।

शान्त्यतीतेन्धिका चैव[1] दीपिका रोचिका[2] तथा।
मोचिका [3]चोर्ध्वगा चैव [4]व्यापिनी व्योमरूपिणी ॥९६॥
अनन्ता[5]च ह्यनाथा चानाश्रिता च तथा परा।
[6]निवृत्त्यादीन्यतीतायां [7]पुराणि दश पञ्च च ॥९७॥
एवं पञ्च[8]कलावर्तिभुवनानां शतद्वयम्।
चतुर्विंशोत्तरं यत्तद्भुवनाध्वनि [9]वर्णितम् ॥९८॥

[10][तत्त्वाध्वा]

अथ [11]तत्त्वानि षट्त्रिंशत्पृथ्व्यप्तेजो [12]मरुद्वियत्।
गन्धो [13]रूपं रसः स्पर्शः शब्दोपस्थौ [14]च [15]पायु च ॥९९॥
पादौ [16]पाणी च वाङ् नासा [17]जिह्वाचक्षुस्त्वचः श्रुतिः।
मनोऽहंकार[18]बुद्धी च प्रकृतिः पुरुषस्तथा ॥१००॥
रागो नियतिविद्ये च कला [19]कालश्च मोहिनी।
विद्या चेश्वरसादाख्ये[20] शक्तिः शिव इति स्मृतः ॥१०१॥

व्यापिनी व्योमरूपा चाप्यनन्ता च ततः परम् ॥
अनाथा च तथा प्रोक्ताऽनाश्रिता पञ्चमीरिता।
भुवनानि तु शाक्तानि पञ्चैव कथितानि तु ॥
(**उत्तरकामिके** २३.१७९–१८२)

[1] ०तेण्डिकाश्चैव — अ; ०तेन्धिकाद्यैश्च — आ. इ.
[2] रोपिका — अ; रोपिकं — आ. इ.
[3] योद्धचकाश्चैव — अ, इ; योद्धचका चैव — आ.
[4] व्योमनी — अ, इ; व्यामनी — आ.
[5] ०प्यन्यथाप्यर्थानाश्रिता — अ, इ; ०प्यन्यथाप्यर्थनाश्रिता — आ.
[6] प्रेत्यादीन्यत्वदीयां — अ; प्रेत्यादीन्यत्वतीयां — आ; प्रेत्यादीनि त्वतीतायां — इ.
[7] पुराणी — अ, आ, इ.
[8] ०शिलावृत्तिर्भु० — अ, इ; ०शिलावृत्तिभुव० — आ.
[9] वर्णकम् — अ, आ, इ.
[10] 'अथ तत्त्वानि षट्त्रिंशपृथिव्यप्तेजोमरुद्विधः (यत्?)।
रसो (गन्धो?) रूपरसं स्पर्शः शब्दोपस्थौ च वा (पा?) यु च ॥
पादौ पाणी च वाङ्नासा जिह्वाचक्षुस्त्वचः श्रुतिः।
मनोऽहंकारबुद्धि(द्धी) च प्रकृतिः पुरुषस्तथा ॥
रागो नियतिविद्या(द्ये)च कला कालश्च मोहि(नी)।
(विद्या चेश्वरसा)दाख्यो(ख्ये) शक्तिः शिव इति स्मृतः ॥'
(**सूक्ष्मे** टि ९७. पृ० ३५५)
[11] चत्वारि — अ, आ, इ.
[12] मतिद्वयम् — अ, आ, इ.
[13] रूपीरमस्पर्शश्शब्दौ — अ, आ; रूपरसं चैव स्पर्शश्शब्दौ — इ.
[14] 'इ' मातृकायां चकारो न दृश्यते।
[15] वाय्व च — अ; पार्य च — आ; पायुशब्दो वृत्तार्थं क्लीबे प्रयुक्त इति भाति।
[16] पाणि च पाद्या नासा — आ, इ.
[17] द्विधा च श्रवसो द्वयम् — अ; विधा च श्रुव श्रुतिः — आ, इ.
[18] ०विद्याश्च — अ; विद्या च — आ, इ.
[19] कामा च — अ, इ; काच्च मोहं हिनी — आ.
[20] विद्या चैव परस्यादौ — अ, आ; विद्या चोपरि सादापौ — इ.

[1][कलाध्वा]

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च।
[2]अतीतेति कला विद्धि समुद्देशः षडध्वनाम् ॥१०२॥

इति श्रीमद्रौरवतन्त्रे क्रियापादे निर्वाणदीक्षा[3]विधिर्नाम

[4]सप्तचत्वारिंशः पटलः ॥

अष्टचत्वारिंशः पटलः

[1]आचार्याभिषेकविधिः

[दीक्षाविधिक्रमः]

अथ वक्ष्ये विशेषेण दीक्षायास्तु[2] विधिक्रमम् ।
समयं विशेषनिर्वाण[3]माचार्यं तु तथोच्यते ॥१॥
समयं सर्वजननं[4] साधकस्याभिषेकवत्[5] ।
तस्माद्दीक्षाविधिं [6]कृत्वा पूर्ववत्कर्म एव वा[7] ॥२॥
[8]तेनाचार्याभिषेकेषु शृणु [9]चैवं यथाक्रमम्[10] ।

[11][मण्डपस्तत्र वेदिकादिकल्पनं पूजा च]

[12]देवालये मण्टपं वा[13] प्रपां वापि विशेषतः ॥३॥

[1] आचार्याभिषेकविषये **अचिन्त्यविश्वसादाख्ये** ३८; **उत्तरकामिके** २४; **किरणे** क्रियापादे १५; **मतङ्गपारमेश्वरे** क्रियापादे १०; **मृगेन्द्रे** क्रियापादे ८; **वीरे** १०; **सार्धत्रिशतिकालोत्तरे** ९; **सुप्रभेदे** चर्यापादे ४; **स्वायम्भुवे** २४ पटला द्रष्टव्याः।; **दीक्षादर्शे** आचार्याभिषेकप्रकरणे (टि० ७६. पृ० ३११–३४८) एतत्पटलस्था बहवः श्लोका निर्दिष्टाः। ते च यथासंभवं तत्र-तत्र सूचिताः।

[2] दीक्षयित्वा — अं, इ; दीक्षा . . . . . — आ.

[3] ०माचार्या तु — आ, इ; आचार्यस्येदमाचार्यम् 'अर्श आदिभ्यो अच्' इति अच्प्रत्ययः पा० सू० ५.२.१२७ आचार्यत्वसंपादकं कर्मेत्यर्थः।

[4] समयिसर्वजननं — आ; समयं सर्वजनं कृत्य — आ; 'सर्वजनकम्' इत्यर्थे 'सर्वजननम्' इति प्रयोगः। समयदीक्षाविशेषदीक्षादिसर्वकर्मोत्पादकमित्यर्थः।

[5] ०षेकवान् — आ, इ.

[6] किं वा पूर्ववत्कर्ममेव वा — अ, आ, इ.

[7] 'कर्तव्यम्' इत्यध्याहारः।

[8] ते चार्याभिषेकेण – अ; ते चार्याभिषेकेण – आ; तेन चार्याभिषेकेण — इ.

[9] देवी — अ, इ.

[10] 'त्रिपदार्थां चतुष्पादां भुक्तिमुक्तिफलोदयाम्।
संहितां यो विजानाति शिष्योऽसौ सेकमर्हति ॥'
'यागं कृत्वा तु पूर्वोक्तदीक्षा निर्वर्त्य मन्त्रवित्।
ततोऽभिषेचयेत्तं तु युक्तायुक्तविचारकम् ॥
'ततोऽन्यत्र दीक्षितस्य च शिष्यस्य दीक्षानन्तर-माचारवैकल्ययुक्तस्य च पुनः सद्योऽधिवासेन समयादिनिर्वाणदीक्षान्तं कृत्वा आचार्याभिषेकं कुर्यात्।' (**क्रियादीपिका** पृ० २३०)

[11] 'अभिषेकं ततः कुर्यादङ्कुरार्पणपूर्वकम्।
पूर्वस्यां वाथ वैशान्यां पश्चिमायां च दिश्यथ ॥
मण्डपे सौम्यवक्त्रे तु वितानेनोपशोभिते।
अर्धहस्तोच्छ्रयं तद्वद्युगाश्रं वेदिकाद्वयम् ॥
चतुर्हस्तप्रविस्तारं दक्षिणोत्तरदिग्गतम्।
स्वस्तिकेन चतुर्दिक्षु रञ्जितं दीपराजितम् ॥
भुवः परिग्रहं कृत्वा मण्डपेऽग्नौ शिवं यजेत्।'
(**उत्तरकामिके** २४.२८ उ०–३१);
'सुमुहूर्ते सुलग्ने च योगे च करणान्विते।
देवाग्रे मण्डपं कुर्यात्पूर्वोक्तविधिना सह ॥'
(**वीरे** १०.२ उ०, ३ पू०);

मध्यमे [1]वेदिकां कुण्डं पूर्वोक्तं तु यथाक्रमम् ।
[2]नवाग्निं [3]सप्तपञ्चाग्निमेकाग्निं वा विशेषतः ॥४॥

[4][अष्टमङ्गलम्]

वारणं [5]पूर्णकुम्भं च पद्मयुग्मं तु चामरम् ।
शङ्खं दर्पणदीपं च [6]श्रीदेवी चाष्टमङ्गलम् ॥५॥
[7]चतुस्तोरणसंयुक्तं चतुर्द्वारकपूर्वकम् ।
पञ्चलिङ्गादिवर्णाश्च[8] पूर्वोक्तविधिनाचरेत्[9] ॥६॥
[10]तत्तद्वर्णाधिदेवादीन्[11]सर्वदेवांस्तथा बुधः ।[12]
दिक्षु वै तत्तद्देवेभ्यः [13]स्वस्वमन्त्रैस्तु दापयेत् ॥७॥
चन्दनं कुङ्कुमं पुष्पमर्घ्यपाद्याचमं ददेत् ।[14]
धूपदीपं तथारभ्य नैवेद्यं दापयेत्क्रमात् ॥८॥
ताम्बूलं मुखवासं च पुष्पाञ्जलिनमस्कृती ।[15]

'सर्वालंकारसंयुक्तं मण्डपे समलंकृते ॥
शिवाग्निं पूर्ववत्कृत्वा अभिषेकं समाचरेत् ।
हस्तादि पञ्चहस्तान्तं यथावित्तानुसारतः ॥'
(**सुप्रभेदे** चर्यापादे ४.४८ उ०, ४९)

[12] '३ उ०, ४ पू०' इदमर्धद्वयं दीक्षादर्शे 'रौरवे' इति निर्दिश्योद्धृतम् ।

[13] मण्टपं चैव — आ, इ.

[1] वेदिकं — अ, आ, इ.

[2] निर्वाग्नि — अ, आ, इ.

[3] प्रायेणागमेषु नवपञ्चैककुण्डानामेव प्रसिद्धत्वात् सप्तकुण्डपक्षोऽत्रागमे विशेष इव भाति।

[4] 'पताकाः स्वस्तिकाः शङ्खाः पूर्णकुम्भं सपद्मकम् ।
छत्रलक्ष्मीप्रदीपाश्च द्विजानामष्टमङ्गलम् ॥
पताका पूर्णकुम्भं च शङ्खं चक्रं च शूचङ्कुशौ ।
छत्रं चैव प्रदीपश्च भूभुजामष्टमङ्गलम् ॥
पूर्णकुम्भं प्रदीपश्च पादुकं छत्रभेरिके ।
श्रीनन्दिकौ महाशङ्खौ वैश्यानामष्टमङ्गलम् ॥
दर्पणं पूर्णकुम्भं च हलं शफरयुग्मकम् ।
श्रीदीपछत्रभेर्यश्च शूद्राणामष्टमङ्गलम् ॥
(**पूर्वकामिके** ५५.८९–९२);
अत्र विषये पुनः **रौरवे** क्रियापादे १८.७८ उ०, ७९ पू० श्लोकस्तदीयटिप्पणी, **रौरवोत्तरे** ५.८ पू०, ८.५ पू० टिप्पण्यौ, १६.६१ श्लोकस्तदीयटिप्पणी च द्रष्टव्याः ।

[5] पूरणं कुम्भं च — आ.

[6] श्रीदेव्या अष्टमङ्गलम् — अ, इ; श्रीदेव्याष्टमङ्गलम् — आ.

[7] 'चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
दर्भमालाभिरावेष्टय मुक्तास्रग्दामभूषितम् ॥
'द्वारपार्श्वद्वये चैव लिङ्गं चैव चतुर्दिशि ।
मध्ये श्वेतमयं पद्मं श्यामवर्णं विधिक्रमात् ॥
द्वारे द्वारे तु विन्यस्य नानावर्णविचित्रकम् ।
हेमकृष्णसुरक्तं च सितवर्णमयं तथा ॥
लिङ्गवर्णं प्रकुर्वीत विचित्रेण समालिखेत् ।'
(**पूर्वकारणे** १४५.१२, १६ उ०–१८)

[8] ०लिङ्गादवर्णाय — अ, आ, इ.

[9] ०विधिमाचरेत् — अ, आ, इ.

[10] तत्तद्वर्णादिदेवानां — अ, आ, इ.

[11] सर्वदेवं तथा — अ, आ.

[12] 'इ' मातृकायां '७' श्लोकस्य द्वितीयतृतीयपादौ न स्तः ।

[13] समन्त्रांस्तु — अ; सममन्त्रां तु — आ; सर्वमानं तु — इ.

[14] ०पाद्याचमो भवेत् — अ, आ, इ.

[15] नमस्कृतम् — अ, आ, इ.

[1][अङ्कुरार्पणम्]

[2]पूर्वे दिनेऽङ्कुरं चैवमैशान्ये [3]चोत्तरेऽपि वा ॥९॥
[4]प्रोक्षयेदस्त्रमन्त्रेण स्थण्डिलं शालिभिः क्रमात् ।
दशद्रोणमुत्तमं विद्यादष्टद्रोणैश्च मध्यमम् ॥१०॥
अधमं पञ्चभिः [5]प्रोक्तमथ शालिं यथाविधि ।[6]
मध्यमे [7]पालीं विन्यस्य[8] अष्टपालिकमष्टदिक्[9] ॥११॥
शिवं तु[10] मध्यमे न्यस्य [11]तथैवाष्टाधिदैवतम्[12] ।

[13][शिष्यस्वापविधिः]

[14]शिवस्य मूलमन्त्रेण शतं हुत्वा[15] गुरुर्भुवम्[16] ॥१२॥

---

[1] 'अथाङ्कुरार्पणं कुर्याल्लक्षणेन समन्वितम् ।
पालिका घटिका चैव शरावं च त्रिधा भवेत् ॥
नीवारं यवशाली च तिलं वैणवमेव च ।
श्वेतशाली महाशाली मुद्गमाषकुलुत्थकम् ॥'
'निष्पावं च प्रियङ्गुं च ग्राहयेल्लक्षणान्वितम् ।
पयसा क्षालयेद्विप्र प्राच्यादिषु तु वापयेत् ॥
सोमकुम्भं तु विप्रेन्द्र स्थापयेन्मध्यमे तु च ।
सवस्त्र सहिरण्यं च सकूर्चं सापिधानकम् ॥
आचार्यश्च शुचिर्भूत्वा सोष्णीषः सोत्तरीयकः ।
बीजानि वापयेत्तत्र ताम्बूलं दापयेत्ततः ॥)
(**वीरे** १०.३ उ०–५ पू०, ६–८)

[2] इदमर्धं दीक्षादर्शे 'रौरवे' इति निर्दिश्योद्धृतम् ।; पूर्वादीनांकुरञ्चैवम् — अ, आ, इ.

[3] चोत्तरापि वा — आ.

[4] 'इ' मातृकायां १० श्लोकः ११ पूर्वार्धं च न दृश्यते ।

[5] प्रोक्तस्त्वथ शालि — अ, आ.

[6] अत्र निक्षिपेदिति शेषः ।

[7] पादं — अ, इ; पाद — आ.

[8] विन्यस्यम् — आ.

[9] अत्र 'मध्ये पाली तु विन्यस्य चाष्टदिक्ष्वष्टपालिकाः' इति पाठः सुष्ठु ।

[10] शिवानां — अ, आ, इ.

[11] तथो वाष्टस्य देवतम् — आ.

[12] १२ पूर्वार्धानन्तरम् ग्रन्थानुस्यूतेरभावाद् ग्रन्थपातः स्यादिति भाति ।

[13] 'स्वप्नाधिगमनेनैव सरक्षान्स्वापयेन्निशि ।
मद्यो गोमयसंस्पृष्टभूतलस्पर्शनीषु च ॥
पूर्वयाम्योत्तमाङ्गासु शय्यासु कुशभस्मना ।
परस्परमलग्नासु सोपधानासु पार्श्वतः ॥
चतुर्दण्डिकयास्त्रेण गुप्तासु वितमस्सु च ।
अस्त्राभिरक्षितास्वस्त्रजप्तासु शतसंख्यया ॥
हृदारोप्य शिखाबद्धशिखान्वर्माभिमन्त्रितैः ।
वस्त्रैराच्छादिताञ्शिष्यांस्तिलसर्षपभूतिभिः ॥
अस्त्राभिमन्त्रितैस्तिस्रो रेखाः संकल्प्य बाह्यतः ।
स्वप्नमाणवकं मन्त्रमनुज्ञाय च तानथ ॥
दत्त्वा बाह्यबलिं दिक्षु दिक्पतिभ्यो यथाक्रमात् ।
चरुं दन्तधवादिष्टप्रतिकूलोपशान्तये ॥
विषमार्चिषमादीप्य हुत्वा चैकैकतः शतम् ।
प्रायश्चित्तं ततो हुत्वा मूलेनाष्टोत्तरं शतम् ॥
प्रक्षालिताङ्घ्रिहस्तस्तु स्वाचान्तः स्नानमम्भसा ।
निर्वर्त्य भस्मना वापि परिवर्त्य सितांशुके ।
शिवीकृततनुर्ध्यात्वा समस्ताध्वतनुं शिवम् ॥
चरुकं पञ्चगव्यं च प्राशयेद्दन्तधावनम् ।
पूर्ववत्प्रयतो भूत्वा शुद्धः स्वयमपि स्वपेत् ॥
अथ प्रातर्द्वितीयेऽह्नि कृतनित्यक्रियो गुरुः ।
शिष्यान्पृष्ट्वा निशास्वप्नान्दुःस्वप्ने शान्तिमाचरेत् ॥

पूर्वादीशानपर्यन्तं [1]लेपयेत्तु विचक्षणः।
शिष्याणां [2]स्थानमेकं तु कुर्याच्छुद्धोपवीतिनाम् ॥१३॥
[3] शिवस्य मूलमन्त्रेण प्रतिशिष्यं तु [4]बन्धयेत्।
[5] दर्भाग्रैः शयनं चैव [6]नववस्त्रेण वेष्टयेत् ॥१४॥
शिवमन्त्रं शतं जप्त्वा [7]निद्रां चैवात्र कारयेत्।

[दुःस्वप्नशान्तिः]

दुःस्वप्नं च तथा चैव [8]सुस्वप्नं च [9]परीक्षयेत् ॥१५॥
तद्दोषशमनार्थाय होममष्टशतं कुरु।

[शिष्याणां चौलादिकरणम्]

उषःकाले दिने चैव नित्यकर्म समाचरेत्[10] ॥१६॥
सुमुहूर्ते सुलग्ने तु चौलोक्तविधिमाचरेत्।
स्नानशुद्धिं च वस्त्रेण [11]चोपवीतं यथाक्रमम् ॥१७॥

[12][कुम्भस्थापनम्]

सौम्ये वा दक्षिणे चैव कुम्भस्थापनपूर्वकम्।
नवतीर्थं [13]नवकुम्भे विन्यसेत्तु विचक्षणः ॥१८॥

घृतदूर्वामधुक्षीरैः शतहोमं च कापिलैः।
शुभे तु पूर्ववच्छिष्यप्रवेशादिकमाचरेत् ॥
(**उत्तरकामिके** २३.५४ उ०–६५);
एतस्मिन्विषये पुनः **मृगेन्द्रे** क्रियापादे ७.९२–१०३; ८.९, १० पू० श्लोकास्तदीयवृत्तिः, **मतङ्गपारमेश्वरे** क्रियापादे ५.१२८ पू०—१३८ श्लोकास्तदीयवृत्तिः, ६.६५ उ०, ६६ श्लोकाश्च द्रष्टव्याः।

[14] शिवानां — अ, आ, इ.
[15] शतन्तु त्वा — आ.
[16] गुरुर्भवेत् — अ, आ, इ.
[1] वेपयेत्तु — आ.
[2] स्नानमेकं — अ, आ, इ.
[3] १४, १५, १६ श्लोकाः दीक्षादर्शे 'रौरवे इति निर्दिश्योद्धृताः।; शिवानां — अ, आ, इ; 'शिवेन' इति पाठः दीक्षादर्शे दृश्यते।
[4] 'बन्धयेत्' इत्यस्य प्रतिसरबन्धनं कुर्यात् इति दीक्षादर्शे ३२९ पृष्ठे व्याख्यानं दृश्यते।
[5] दर्भाग्रे — अ, आ, इ.
[6] नववस्त्रं ततो भवेत् — अ, आ, इ; दीक्षादर्शोद्धृतः पाठोऽत्र साधितः।
[7] निद्रांश्चैव विशेषतः — अ, आ, इ; अत्र पाठो दीक्षादर्शपाठमनुसृत्य साधितः।
[8] दुःखप्नं तु — अ, आ, इ.
[9] परिक्षयेत् — अ.
[10] समारभेत् — आ, इ.
[11] उपवीतं — अ, आ, इ.
[12] 'नवधा पञ्चधा वापि सर्वधान्योपरि स्थितान्।

[होमः]

[1]अग्निं प्रतिष्ठयेत्कृत्वा त्वग्निमुखादि होमयेत् ।
इन्द्राग्नियम[2]निर्ऋतिवरुणवायुसोमदिक्[3] ॥१९॥
[4]इन्द्रादीशान्तमन्त्रैश्च[5] होमयेत्तु विचक्षणः ।
ईशानादीनि सद्यान्तं हृदयाद्यस्त्रकान्तकम्[6] ॥२०॥
शिवमन्त्रं शतं जप्त्वा हुत्वा [7]व्याहृतिभिः क्रमात् ।
यवैस्तण्डुल[8]लाजैश्चापूपनिष्पावसर्षपैः ॥२१॥
अन्येषामाहुतिः [9]प्रोक्ता [10]पूर्ववदाहुतिक्रमात् ।

घटान्वा कलशान्वाथ सकूर्चान्सापिधानकान् ॥
ससूत्रान्सोदकान्रान्धरत्नस्वर्णवरान्वितान् ।
चूताश्वत्थपलाशास्यान् बीजपूरफलावहान् ॥
सदेशानेन विद्येशैर्नव पञ्च पवित्रकैः ।
पञ्चपक्षे निवृत्त्यादिकलाभिस्त्वभिमन्त्रयेत् ॥
शिवेन शतधालब्धान्पूजितान्स्नपनोचितान् ।
अथवा कलशानेकघटं वा शिवसंयुतम् ॥
दक्षवेद्यां तु संस्थाप्य' ..... ।
(**उत्तरकामिके** २४.३४–३८ पू०);
'घटाष्टकेन मेकः स्यात्कुम्भेनैकेन वा भवेत्'
(**किरणे** क्रियापादे १५.४ उ०);
'स्नपनस्य विधानेन स्थापयेत्कलशानि वै ।'
(**सुप्रभेदे**, चर्यापादे ४.५० पू०);
एतद्विषये पुनः **मृगेन्द्रे** क्रियापादे ८.१८८ उ० श्लोकस्तदीयवृत्तिः; **मतङ्गपारमेश्वरे** क्रियापादे १०.१२ उ०–१५ पू० श्लोकास्तदीयवृत्तिः; **सार्धत्रिशतिकालोत्तरे** ९.२, ३ पू० श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः ।

[3] नवकुम्भेषु नवसमुद्रतीर्थन्यासः—
'शुद्धतोयेन संपूर्णाश्चूतपल्लवशोभितान् ।
तेषु क्षारोदधिक्षीरदध्योदघृतसागरान् ।
इक्षुसौराम्बुशुद्धाम्बुगर्भोदानष्टसागरान् ।
'मध्ये च शिवकुम्भं च शिवाम्भोधिं तथैव च ।'
(**अचिन्त्यविभ्वसादाख्ये** टि ७. पृ० ७३१–७३४);
'अथ भुक्त्यै मध्ये पूर्वदक्षिणोत्तरपश्चिमकुम्भेषु शान्त्यतीतकलादिना मुक्त्यै पश्चिमोत्तरदक्षिणपूर्वमध्यकुम्भेषु निवृत्त्यादिकलादिनाभिमन्त्र्य, भुक्त्यै सृष्टचा शिवसागरादिसागरानन्तादिविद्येशानप्यावाह्याभ्यर्च्य, मुक्त्यै क्षारसागराद्यष्टसागरान् कुम्भेष्वावाह्य संपूज्य मध्यकुम्भे शिवसागरमावाह्य संपूज्य विद्येशानपि कुम्भेष्वावाह्य संपूज्य मध्यकुम्भे साङ्गं सावरणं शिवं नित्यवत्पूजयेत् ।' (**क्रियादीपिका** पृ० २३२)

[1] अग्निमुखादि कृत्वा तु अग्निं प्रतिष्ठयेत् । ततो होमयेत्' इत्यन्वयः । 'प्रतिष्ठयेत्' इति नामधातुः ।

[2] निर्ऋतिश्च वरुणं — आ; नैर्ऋतिश्च वरुणं — इ.

[3] ०सोमदिक् — अ, आ, इ; 'दिक्षु' इत्यर्थे दिक्शब्दप्रयोगः आर्षः छन्दोभङ्गपरिहाराय ।

[4] २०, २१ श्लोकौ **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतौ ।

[5] कंमादीनि पर्यन्तं — अ, इ; ईशानां दि नि पर्यन्तं — आ; दीक्षादर्शोद्धृतः पाठोऽत्र साधितः ।

[6] हृदयादिमन्त्रकम् — अ, आ; हृदयादिमस्तकान्तकम् — इ.

[7] व्याहृतिमाहुतिः — अ, आ.

[8] लाजांश्च पावं न्ति सर्षपम् — अ, आ, इ.

[9] प्रोक्तं — आ, इ.

[10] पूर्ववदाहुतिं — अ; पूर्वं वदाहुतिं — आ; पूर्ववदाहुतिः — इ.

[1][अभिषेकार्थं वेदिकाकल्पनम्, तत्र शिष्ययोजनम्]

प्रभाते पूर्वदिग्भागे [2]वेदिकां तु सलक्षणाम्[3] ॥२२॥
[4]उत्सेधं चतुरङ्गुल्यं[5] [6]द्विहस्तायामकं भवेत् ।
गोमयालेपनं कृत्वा पिष्टचूर्णैः सलक्षणम् ॥२३॥
ततः सिंहासनं चैवमूर्ध्वपद्मासनं तथा ।
आसनं पूजयेत्तत्र योजयेच्छिष्यमेव च ॥२४॥

[शिष्यदेहशुद्धिः]

[7]पूर्वाशाभिमुखं स्थाप्य [8]संप्रोक्ष्य चाभिमन्त्रितम् ।
अर्घ्यं शिरसि विन्यस्य पुष्पं शिरसि [9]चैव हि ॥२५॥
[10]पञ्चमृत्पञ्चगव्यं तु[11] पूर्वादि स्थापयेत्क्रमात् ।
[12]ईशानादि तु सद्यान्तं [मन्त्रं तत्र च विन्यसेत्] ॥२६॥

---

[1] 'सौम्यायां तु शिशुं न्यसेत् ।
भद्रपीठे शिवेनैव साङ्गेनाधिष्ठितं यथा ॥
स्वासनेन तथा सम्यगर्चितं विभवेन वा ।
वर्णभक्तशरावैस्तु निर्मृज्य वा जलेऽथवा ॥
शुद्धोदकेन संस्नाप्य तस्माद्देशान्तरे पुनः ।
परिवर्तितसूत्राद्यं सोत्तरीयं समालकम् ॥
सितचन्दनदिग्धाङ्गं भस्मोद्धूलितमेव च ।
आनीय दक्षवेदिस्थे भद्रपीठे निवेशयेत् ॥
पूर्वास्यं गन्धपुष्पाद्यैः पूजयित्वा प्रवर्तयेत् ।
आरात्रिकं ज्वलद्दीपैः सद्वर्त्या प्रतिबोधितैः ॥'
(**उत्तरकामिके** २४.३८–४२);
'पश्चात्तद्दक्षिणे स्थाप्य मन्त्रपीठासने पुनः ।
मालङ्कारं च सोष्णीषं सच्छत्रं चामरान्वितम् ॥
स्रगन्धैस्तस्य भूषा स्यात्कुशैर्वा सर्वतो भवेत् ।'
(**किरणे** क्रियापादे १५.८, ९);
एतद्विषये पुनः **मतङ्गपारमेश्वरे** क्रियापादे १०. १५–२२ श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः ।

[2] वेदिकानां तु लक्षणम् — अ, आ, इ.

[3] अत्र कल्पयेदिति शेषः ।

[4] २३ पूर्वार्धं २४ श्लोकः २५ पूर्वार्धं च **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतानि ।

[5] ०रङ्गुल्य — इ.

[6] द्विहस्तं तद्विशेषतः — अ, आ; द्विहस्ता तद्विशेषतः — इ; दीक्षादर्शोद्धृतः पाठोऽत्र साधितः ।

[7] पूर्वस्याभिमुखं — अ; पूर्वास्याभिमुख — आ. पूर्वामाभिमुख — इ.

[8] प्रोक्षणमभिमन्त्रवत् — अ; प्रोक्षणाभिमन्त्रवत् — आ; प्रोक्षणाभिमन्त्रवित् — इ; संप्रोक्ष्य स्थाप्य मन्त्रितम् — दीक्षादर्शपाठः ।

[9] मेवहि — अ; मेव च — आ, इ.

[10] पञ्चमृदः —
'वृषशृङ्गे हस्तिदन्ते दर्भमूले जलान्तरे ।
नद्यास्तीरे च पञ्चैता मध्ये दिक्षु मृदो न्यसेत् ॥'
(**पूर्वकामिके** ३१.३६ उ०, ३७ पू०);
'मृदश्च पञ्चात्र भवन्ति शैले सिन्धौ तटाके वृषभस्य शृङ्गे ।
क्षेत्रे तु शैवे कुशमूलतो वाप्याचार्यसेकार्थमिमे पदार्थाः ॥'
(**शैवभूषणे** श्लो० २३५)

[11] ०गव्यैस्तु — अ, आ, इ;
पञ्चगव्यम् — **अजिते** २२.६–१४ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।;

[12] 'आ' मातृकायां २६ श्लोकस्य तृतीयपादो न दृश्यते ।

[1]**पञ्चामृतं तथा चैव** [2]**पञ्चलेपनं स्थापयेत्।**
पूर्वतस्तन्तुवेष्टादौ[3] **पूर्वमन्त्रं तु दापयेत् ॥२७॥**

[अङ्गशुद्धयै लेपनम्]

[4]**ईशानाद्यैस्तु सद्यान्तैः** [5]**पञ्चमृल्लेपनं तथा।**
[6]**पिष्टचूर्णैस्तथा लेपं तिन्त्रिणीलेपनं तथा ॥२८॥**
आम्ल[7]**पिण्डैस्तथारिष्टैरङ्गशुद्धिविलेपनम्।**
पञ्चगव्याभिषेकं तु[8] **पञ्चामृतं तु धारयेत् ॥२९॥**
[9]**पञ्चौषधं तथा चैव** [10]**पञ्चाक्षरेण**[11] **धारयेत्।**
पुष्पमर्घ्यं तु विन्यस्य धूपदीपं तु दापयेत् ॥३०॥
नवकुम्भं तु विन्यस्य धारयेत्तु पुरोक्तवत्।

[12][समयदीक्षया जन्मशुद्धिः]

कृत्वा दीक्षां विशेषेण ब्रह्म[13]**क्षत्रविशां तथा ॥३१॥**

---

[1] पञ्चामृतम् — एतद्विषये **अजिते** २२.१५—१८ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः।
'पञ्चामृतं क्षीरदधिप्रसर्पिमध्विक्षुसाराश्च ततः सितं वा।
(**शैवभूषणे** श्लो० ९८ उ०)

[2] गन्धाश्च पञ्चागरुचन्दने द्वे
काश्मीरबिल्वं हरिचन्दनं च।
लेपाश्च गन्धा बहवो भवन्ति
कर्पूरमुख्या मृगनाभिना च ॥'
(**शैवभूषणे** १०७);
'चन्दनागरुकर्पूरकुष्ठकुङ्कममुत्तमम्।
विलेपनार्थमुद्दिष्टम्'
(**अजिते** २२.२९ उ०, ३० पू०)

[3] ०वे...नां — अ; इ; पूर्वतन्त.... — आ

[4] ईशानादीनि सद्यान्तं — अ, आ, इ.

[5] २६ पू० टिप्पणी पश्यत।

[6] पिष्टचूर्ण तथा — अ, आ, इ.

[7] ०पिण्डं तथारिष्टमङ्ग० — अ, आ, इ.

[8] ०भिषेके तु — अ, आ, इ.

[9] पञ्चौषधम् —
'सहदेव्येकपत्रं तु भद्रं वैकङ्कतं तथा।
विष्णुक्रान्तिश्च पञ्चैते पञ्चौषधमथापि वा ॥'
(**अचिन्त्यविभ्वसादाख्ये** ३८.११)

[10] पञ्चाक्षरं तु — अ, आ, इ.

[11] पञ्चाक्षरम् —
'नमः शिवाय पञ्चार्णमेतत्पञ्चाक्षरं स्मृतम्।'
'प्रणवेन समायुक्तं जपकाले तथोच्यते।
तदा षडक्षरं प्रोक्तं स्त्रीशूद्राद्यैस्तु वर्जितम् ॥'
(**सुप्रभेदे** योगपादे ३. २४ उ०, ३०)

[12] '''एवं समाप्यते दीक्षा जननादिविवर्जिता।' इति। तथा एष संस्कारः उक्तः इति प्रथम इत्यर्थः। यदुक्तं श्रीमन्त्रयोदशशतिके —
'एषा तु प्रथमा दीक्षा भूताख्या परिकीर्तिता।' इति।
अनया भूतसंबन्धिनोऽस्य शरीरस्य शुक्लशोणितादिरूपत्वेनाशुद्धात्मनां शुद्धमन्त्रसंस्काराच्चात्राज्ञत्वलक्षणं बन्धत्वं सद्योजाताद्यभिव्यक्तिस्थानशुद्धविद्याकलाधिष्ठानेन निवर्त्यते।''
(**सार्धत्रिशतिकालोत्तरे** ८. १ पू० वृत्तिः)

[13] ०क्षत्रियविट् तथा — अ; ०क्षत्रियषट् तथा — आ, इ.

[1]**शूद्राणां च विशेषेण समयाद्द्विगुणावधिम्**[2] ।
समयाज्जन्मशुद्धिस्तु देहशुद्धिरतः[3] **परम्** ॥३२॥
[4]**अश्वत्थवटबिल्वं च कुशमूल**[5]**मृदां गृहेत्** ।
[6]**गोमूत्रेण तु संमिश्रं लेपयेत्सद्यमन्त्रतः**[7] ॥३३॥
[8]**संस्काराणां तु सर्वेषां शेषं कुर्याद् यथाविधि** ।
देहशुद्धि[9]**रिति प्रोक्ता;** [10]**मन्त्रशुद्धिमतः परम्** ॥३४॥
दीक्षात्रयं तु कर्तव्यं मन्त्रशुद्धेरनन्तरम्[11] ।
[12]**आचार्याय** [13]**कलाशुद्धिः** [14]**प्रासादपञ्चदर्शनम्** ॥३५॥

---

[1] शूद्राणां — अ, आ, इ.

[2] ०गुणावतम् — आ; ०गुणावतः — इ.

[3] ०शुद्धिमतः — अ, आ, इ.

[4] अयं श्लोकः **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतः।; अश्वत्थं — आ.

[5] ०मिमान् गृहेत् — अ, इ; ०मिमा ग्रहेत् — आ; दीक्षादर्शोद्धृतः पाठोऽत्र साधितः। 'मृदा' इति 'वाचा, निशा' इतिवदाकारान्तशब्दवदत्र प्रयोगः।

[6] गोमूत्रं तु समं मिश्रं — अ, आ, इ; दीक्षादर्शोद्धृतः पाठोऽत्र साधितः।

[7] ०मन्त्रकम् — अ, आ, इ.

[8] संस्काराणि तु सर्वाणि विशेषं कृत्वा यथाविधि — अ, आ, इ.

[9] ०कृतं प्रोक्तं — अ, इ; ०कदं प्रोक्तं — आ.

[10] अत्र 'कुर्यात्' इत्यध्याहारः। ;

''मन्त्रशुद्धिरतः परम्।
'ओंकारादियुता मन्त्रा नमस्कारान्तयोजिताः।
पूर्वं शिवं समुच्चार्य ततो ब्रह्माङ्गकाद्यभौ॥
विद्याङ्गं बीजमुख्यं च क्षुरिकां च समुच्चरन्।
तत्तद्रूपान्वितान्ध्यात्वा पूर्ववन्मन्त्रशुद्धये॥
क्रियाकाले प्रयोक्तव्याः स्वाहान्तं हवने स्मृताः।'

(**सुप्रभेदे** क्रियापादे ८. ७१ उ०—७३); एतद्विषये पुनः **अजिते** २०.११८ श्लोकस्तदीयटिप्पणी; **रौरवे** क्रियापादे १०.११, १२ पू० श्लोकाश्च द्रष्टव्याः।

[11] ०शुद्धिरनन्तरम् — अ, आ, इ.

[12] 'आचार्याय' आचार्यत्वसंपादनायेत्यर्थः। अत्र '१ उ०' टिप्पणी द्रष्टव्या।

[13] कला शुद्धिप्रासादं — आ, इ;

'ततः कुण्डसन्निधिं प्राप्य देशिकः।
निवृत्त्यादिकलानां तु पृथगेवाहुतिं नयेत्॥
स्वस्वमन्त्रैस्ततः पूर्णां कृत्वा तद्दक्षिणे करे।
दर्भोल्मुकेन पञ्चाङ्गैः कनिष्ठादिषु लाञ्छयेत्॥
हरहस्तं च संकल्प्य'

(**उत्तरकामिके** २४.४७ उ० — ४९)

[14] प्रासादं पञ्च० — अ, आ, इ; अत्र 'प्रासादपञ्चकदर्शनम्' इति भवितव्यम्। वृत्तार्थं 'प्रासादपञ्चदर्शनम्' इति प्रयुक्तमिति भाति।; पञ्चप्रासादमन्त्राः —

'प्रासादः पञ्चधा ज्ञेयस्तद्भेदो वक्ष्यतेऽधुना।
शुद्धो मूलं तथा तत्त्वमादिरान्मेति पञ्चधा॥
प्रासादा उदितास्तेषां शुद्धप्रासाद उच्यते।
शुद्धः शिव इति प्रोक्तस्तस्माच्छुद्धः प्रकीर्तितः॥
नादाख्यं यत्परं बीजमादिस्वरसमन्वितम्।
तच्छुद्धमिति विज्ञेयं सर्वभूतव्यवस्थितम्॥

(**वातुलशुद्धे** ५.१६–१९ पू०);

[नादाख्यं नादाभिधानं हकारमेव तदुक्तमत्रैव —
''नादं गुह्यं परं जीवं देहीभूतं च पञ्चमम्।
सान्तं भूतान्ततत्त्वान्तं शिवार्णं शून्यमव्ययम्।
एव पर्यायनामयुक्त सर्वभूते व्यवस्थितं यत्परं बीजं शुद्धप्रासादमिति ज्ञायते।]

(**वातुलशुद्धव्याख्याने** पृ० ६६);

मुक्तिदं परमं गुह्यं सर्वसिद्धिप्रदायकम्।
तद्विदित्वा महासेन देशिकः पाशभिद्भवेत्।
शुद्धप्रासाद इत्युक्तो मूलप्रासाद उच्यते।
सर्वेषामेव तत्त्वानां मूलं शिव इति स्मृतः॥
तस्मान्मूलमिति ज्ञेयं मूलमन्त्रस्तदुच्यते।

पञ्चगव्याख्यपञ्चानां [1]लेपनं ब्रह्मपञ्चकैः ।
गव्यपञ्चकमित्युक्तं [2]सिञ्चेदापो विशेषतः ॥३६॥

[पूर्ववद्धोमादिकरणम्; मण्डपाद्बहिः स्थण्डिलकल्पनं च]

[3]पूर्वहोमादि [4]मध्याह्ने शोषयेद्रविसंनिधौ ।

षष्ठं त्रयोदशान्तं च पञ्चमे विनियोजयेत् ।
शिवशक्तिसमायुक्तं शिवमन्त्रमिति स्मृतम् ॥'

(**वातुलशुद्धे** ५.१९ उ०–२२);

[शिवशक्तिसमायुक्तं तद् ह्रौकारं बिन्दुवृत्तेन युक्तं चेद् ह्रौमिति मन्त्रो भवेत्। एतद् ह्रौमिति कथितमूलप्रासादमन्त्रोऽस्मिंस्तन्त्रे शिवमन्त्रमुच्यते।]

(**वातुलशुद्धव्याख्याने** पृ० ६७);

'मूलप्रासाद इत्युक्तस्तत्त्वप्रासाद उच्यते ।
तत्त्वं हि शिवभावत्वाच्छिवमन्त्रमिति स्मृतम् ॥
तत्त्वं चैवादिबीजं च तत्त्वान्ते विनियोजयेत् ।
कार्यकारणसंयुक्तं सर्वतत्त्वात्मकं विदुः ॥'

(**वातुलशुद्धे** ५.३८–३९);

[तत्त्वं चेति — तत्त्वान्ते तत्त्वाभिधानव्यञ्जनरूपभूतहकारे आदिबीजं च विनियोजयेद् आदिबीजमिति प्रशस्तमकाराख्यं योजयेत्। तदानीं प्रातिपदिकरूपव्यञ्जनेन प्रत्ययरूपस्याकारस्य संयोगाद् हकारो भवति। कार्यकारणसंयुक्तं हकारे बिन्दुसंयुतं चेद् हमित्युद्धृतं स्यात्। एतद्धमित्यक्षरमेव तत्त्वप्रासादं भवेत्।]

(**वातुलशुद्धव्याख्याने** पृ० ७१);

'तत्त्वप्रासाद इत्युक्त आदिप्रासाद उच्यते ।
आदिस्तु पूर्वभावित्वादादिरित्यभिधीयते ॥
प्रथमं चतुर्दशं चैव जीवान्ते विनियोजयेत् ।
आधाराधेयसंयुक्तमादिबीजमिहोच्यते ॥'

(**वातुलशुद्धे** ५.४०, ४१);

[अकारयुक्तहकारेण औकारयोजना कृता चेद् हौ इत्युद्धृतं स्यात्। आधाराधेयसंयुक्तं तदुद्धृतवर्णो बिन्दुनादसंयुक्तश्चेद् हौम् इति स्यात्। इहास्मिञ्शुद्धाख्यतन्त्रे हौमिति तान्त्रिकप्रासादमिति बीजमुच्यते आदिप्रासादबीजमित्युच्यते।]

(**वातुलशुद्धव्याख्याने** पृ० ७२);

'आदिप्रासाद इत्युक्त आत्मप्रासाद उच्यते।'
'भूतान्तं तु समुद्धृत्य आदिप्रकृतिसंयुतम् ।
प्रथमं तु समुद्धृत्य षोडशस्वरसंयुतम् ॥
तयोर्मध्यगता शक्तिरात्मबीजमिति स्मृतम् ।

(**वातुलशुद्धे** ५. ४४ पू०, ४५ उ०, ४६);

[**'भूतान्तमिति** — भूतान्ताभिधानप्रातिपदिकरूपहकारेणादिप्रकृतिसंयुतः प्रकृत्यक्षराणां सप्ताक्षराणाम् आदिभूताकाराक्षराभिधानप्रत्ययो योजितश्चेद्हकाराख्यो भवति। प्रथमं तु समुद्धृत्य सात्त्विकवर्गस्य पूर्वदिग्दलगतप्रातिपदिकरूपसकारोद्धारणं कृत्वा आदिप्रकृतिसंयुक्तं प्रत्ययरूपभूताकारेण 'योजितं चेत्सकारो भवति। तयोर्मध्यगता शक्तिस्तयोरकारसकारयोर्मध्ये अन्तराले बिन्दुवृत्तयोजनेन हंस इति मन्त्रो जायते। आत्मबीजमिति स्मृतमेतद्धंस इति द्व्याक्षरमात्मप्रासादमिति चिन्त्यते।]'

(**वातुलशुद्धव्याख्याने** पृ० ७२);

'हृत्सरोरुहमध्ये च संस्थितं सर्वकारणम् ।
आत्मप्रासादमेवोक्तं जीवप्रासाद उच्यते ॥
एते वै शिवबीजत्वाच्छिवमन्त्रा इति स्मृताः ।
शुद्धादि चात्मपर्यन्तं स्थितिमार्गेण चोद्धृताः ॥
शिवमन्त्रमयं प्रोक्तम्'

(**वातुलशुद्धे** ५.४७–४९ पू०)

[1] लेपयेद् ब्रह्मपञ्चकः — अ; लेपयेद्ब्रह्मपञ्चकम् — आ, इ.

[2] बिम्बेदापो — अ, आ, इ.

[3] पूर्वा होमादि — आ, इ; अत्र 'कृत्वा' इत्यध्याहृत्य पूर्ववद् होमादि कृत्वा इति व्याख्येयमिति भाति।

[4] मध्याह्नं — अ, आ, इ.

[1]क्षेत्रादिसन्मृदं ग्राह्य नदीमृत्सिकतं तु वा ।।३७।।
स्थण्डिलं कारयेद्विद्वान्मण्टपस्य [2]बहिस्तु ताः ।
द्विहस्तस्थण्डिलं कृत्वा हस्तविस्तारवत्क्रमात्[3] ।।३८।।
[4]प्रादेशार्धं तदुत्सेधं दर्पणोदरसंनिभम् ।

[स्थण्डिले लिङ्गस्य दशायुधानां च विन्यासः]

गोधूलिं विन्यसेत्पश्चाल्लिङ्गं[5] वज्रं च दण्डकम् ।।३९।।
[6]शङ्खं चक्रं च पद्मं च [7]गदां त्रिशूलखड्गकम् ।
पाशं शक्तिं लिखेत्कार्या[8] [9]बाह्य ऊर्ध्वं च विन्यसेत् ।।४०।।
अधस्तात्पद्मयोगः स्यात्;[10] शय्यां कृत्वा यथाविधि ।
[11]सूर्यध्यानं ततः कृत्वा दर्भासनमथापि वा ।।४१।।

---

[1] क्षत्रारिमंपदं — अ; क्षेत्रारि संप्रदं — आ, इ.
[2] बहिः कृतम् — अ, आ, इ.
[3] ०विस्तार च क्रमम् — अ, आ; ०विस्तार-वत्क्रमम् — इ.
[4] प्रादेशार्धन्तमुत्सेधं — अ, आ, इ.
[5] ०लिङ्गे — अ, आ, इ.
[6] शंखचक्रं च पद्मं च — आ, इ; दशायुधानां मध्ये शङ्खस्य प्रस्तावो शैवागमान्तरेषु न दृश्यते।
[7] गदात्रिशूल — आ, इ.
[8] ०त्कार्यं — अ, आ, इ; अत्र दशायुधानां मूर्तिः कार्या–शिल्पिना, लेखनं कार्येदित्यर्थः।;
'अस्त्राणि चित्ररूपाणि कर्तव्यानि यथार्थतः' ।।
'न्यस्त्वा वज्रं न्यसेच्छक्तिं दण्डं खड्गं च बन्धनम् ।
ध्वजं गदां त्रिशूलं च पद्मं चक्रं च विन्यसेत् ।।
विचित्ररूपाः कार्या ये लोकेशा नियता यथा ।
लक्षणोक्तेन यत्नेन विलिख्यास्त्राणि पूजयेत् ।।
(**किरणे** क्रियापादे ८.२३ उ०, ३६, ३७);
'वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम् ।
ध्वजं वाथ गदां शूलं पद्मं चक्रं च कारयेत् ।।
ध्वजाङ्कुशौ वा कर्तव्यौ दण्डं हित्वा द्विजोत्तमाः ।
लोहैर्वा याजिकैर्वृक्षैर्लोहश्चेद् बेरमानतः ।।
देवान् कृत्वा तु हस्ताभ्यां कृताञ्जलिपुटान्वितान् ।
जाये शक्तिगदे ज्ञेये शेषाः पुरुषलक्षणाः ।।
नवतालप्रमाणेन तेषां लक्षणमुच्यते ।
तन्मूर्ध्नि मकुटोर्ध्वं वा हस्ते वज्रादिकान्न्यसेत् ।।
देहलब्धेन तेषां तु प्रमाणं प्रविधीयते ।
षट्त्रिंशदङ्गुलायाममष्टाङ्गुलमुविस्तरम् ।।
तिथ्यङ्गुल ममारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
मात्रैरेकोनपञ्चाशत्पर्यन्तैर्दीर्घमुच्यते ।।
लोहजं यदि दारूत्थं नयेन्मात्राङ्गुलेन तु ।
इष्टमानेन चैतेषां विस्तार इह कथ्यते ।।'
(**उत्तरकामिके** ७२.४०–४६)

[9] बाह्यमूर्ध्वं — अ, आ, इ.
[10] ०योगि स्यात् — अ, आ, इ; ४१ श्लोकस्य प्रथम-पादानन्तरं परस्परं विषयाणामनन्वितत्वान्मध्ये मध्ये ग्रन्थपातः स्यादिति भाति।
[11] सूर्यध्वानं — आ, इ;
"अधस्तात्पद्मयोगः स्यादेनं कृत्वा यथाविधि ।
सिंहासनं ततः कृत्वा दर्भासनमथापि वा ।।"
इति पूर्वकारणे दृश्यते। तथात्रैव पटले २४ तमश्लोकेऽप्येवमेव दृश्यते। अतोऽत्र श्लोकेऽपि 'सूर्यध्यानं' इत्यस्य स्थाने 'सिंहासनं' इति पाठः सुष्ठु स्यादिति भाति।

[शङ्खाभिषेकः]

[१]**वैश्यक्षत्रियशूद्राश्च** [२]**संस्कार्यास्तु** [३]**द्विपञ्चकाः ।**
अथवा [४]**गुहसंख्यानां वर्णानां तु विशेषतः ॥४२॥**
[५]**समयं द्विगुणीकृत्य विशेषं च यथाविधि ।**
[६]**निर्वाणं द्विगुणं कृत्वा वर्णानां तु यथाक्रमम् ॥४३॥**
ऋग्यजुःसामाथर्वाश्च [७] [८]**भगसूक्तं जपेत्पुनः ।**
[९] **अलाभे** [१०]**आत्रेयसूक्तं** [११]**वामाद्यास्तु विशेषतः ॥४४॥**
इन्द्रादीशानपर्यन्तं स्थाने स्थाने तु कल्पयेत् ।

[शिष्याणां वस्त्रभूषणधारणम्]

नववस्त्राणि चार्हाणि[१२] [१३]**सोत्तरीयं यथाविधि ॥४५॥**
[१४]**स्वर्णसूत्रं तु दातव्यं** [१५]**कटिसूत्रं यथाक्रमम् ।**

---

[१] वैश्यशब्दस्य प्रथमतया निर्देशो वृत्तार्थ इति भाति ।

[२] संस्काराणि — अ, आ, इ.

[३] द्विपञ्चकम् — अ, आ, इ;
द्विपञ्चकाः — विप्रादिचतुर्वर्णाः षडनुलोमाश्च, आहत्य दशजात्युत्पन्ना इत्यर्थः ।

[४] गुहः — षण्मुखः । 'गुह' इत्यनेन लक्षितलक्षणया 'षट्' इत्यर्थो बोध्यते इति भाति । 'गुह-संख्यानां' इत्यनेन षडनुलोमा निर्दिश्यन्ते ।;
'ब्राह्मणादिचतुर्वर्णा वर्णानां स्वस्वजातयः ।
चतुर्वर्णा इमे प्रोक्तास्त्वनुलोमानिमाञ्शृणु ॥
सवर्णं प्रथमं विद्यादम्बष्ठं च द्वितीयकम् ।
पारशवं तृतीयं तु; जायन्ते ब्राह्मणोद्भवैः [वाः] ॥
मद्गुरित्युग्रनामा च जायेते तौ नृपस्य तु ।
वैश्यस्य चुञ्चुको ज्ञेयस्त्वनुलोमाः षडैव तु ॥
(**सुप्रभेदे** चर्यापादे २.१७ उ०–२० पू०)

[५] समया — अ, आ, इ.

[६] निर्वाणाद्वि — अ, आ, इ.

[७] ०थर्वाश्च — अ, आ, इ; अत्र अथर्वशब्दस्य अकारान्ते प्रयोगः ।

[८] भर्गसूत्रं – अ, इ; गर्भसूत्रं – आ. भगसूक्तं :— ऋग्वेदे ७.४१.

[९] अलाभेदात्रयस्सूक्तं — अ, आ; अलाभेदात्रयसूक्तं — इ.

[१०] ऋग्वेदे पञ्चमं मण्डलम् ।

[११] वामाद्यां तु — अ, आ, इ.

[१२] ०वस्त्राश्च गर्भाणां — अ, आ, इ;
वस्त्रम् —
'देवाङ्गं क्षौमकं वापि नेत्रं कार्पासमंभवम् ।
उत्तमं नवहस्तं स्यान्मध्यमं रसहस्तकम् ।
अधमं बाणहस्तं स्याच्चतुर्भागैकविस्तृतम् ।
सामान्यवस्त्रमेवं तु सर्वकार्येषु संग्रहेत् ।'
(**पूर्वकारणे** १८.२१३, २१४);
एतद्विषये पुनः **अजिते** २२.६२, ६३ पू० श्लोकास्तदीयटिप्पणी; **मतङ्गपारमेश्वरे** चर्यापादे २.३० श्लोकस्तदीयटिप्पणी च द्रष्टव्याः ।

[१३] उत्तरीयम् — अस्मिन्विषये **अजिते** २२.७०–७२ श्लोकास्तदीयटिप्पणी; **रौरवे** क्रियापादे ४३.२८, २९ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[१४] स्वर्णसूत्रम्—हेमयज्ञोपवीतम्;
'उपवीतविधिं शृणु ।
पञ्चनिष्कं समारभ्य दशनिष्कावधि क्रमात् ।
सूत्रसंख्या त्रिवृत्प्रोक्ता द्विगुणीकृत्य बुद्धिमान् ॥
उत्सेधयुगमाधिक्यं द्वादशाङ्गुलमुच्यते ।

[1]अङ्गुलीकटकौ बाह्वोर्निष्कं निष्कार्धमेव वा[2] ॥४६॥
त्रिनिष्कात्कटिसूत्रं तु प्रत्येकं तु यथाक्रमम् ।
दद्यात्सर्वप्रयत्नेन ब्राह्मणानां विशेषतः ॥४७॥

[दर्भादिभिः संस्पर्शः शङ्खजलप्रोक्षणं च]

[3]शैवं दर्भैश्च [4]दूर्वैश्च [5]स्पृशेज्जपन्द्विजोत्तमः ।
[6]आचार्यः [7]शङ्खमादाय प्रोक्षयेत्पुरुषेण तु ॥४८॥

[8][अङ्गहोमः]

अङ्गहोमं ततः पश्चाज्जुहुयादष्टदिक्क्रमात् ।

अग्रमग्रे समायोज्य ग्रन्थिः पादाङ्गुलं भवेत् ॥
उपवीतमिदं प्रोक्तम् ।'
[उत्तरस्वायम्भुवे (टि० ५३४, टि० १०१५) पञ्चाङ्गभूषणविधिपटले]

[9] कटिसूत्रम् —
'काटिसूत्रं त्रिसंख्यादि सूत्रं प्रति यवं घनम् ।
कटिमध्युपरिष्टात्तु कटिसूत्रं तु बन्धयेत् ।
पञ्चषट्सप्तमात्रं वा कीर्तिमाननविस्तृतम् ।
तद्विस्तारसमोत्तुङ्गं मेढ्रोर्ध्वं परिकल्पयेत् ।
कटिसूत्रादूरुदाममूरुच्यंशावसानकम् ।
मुक्तादामोरुदाम स्यादन्तरे रत्नसंयुतम् ।
कटिसूत्रं समाख्यातम्'
(काश्यपशिल्पशास्त्रे ६४.३३ उ०–३६)

[1] अङ्गुलीकर्णबाहुभ्यां — अ, आ, इ;
'अङ्गुली' अनेन पदेन अङ्गुलीयकं लक्ष्यते ।
अङ्गुली —
'कुञ्जनिष्कं समारभ्य कुञ्जकुञ्जविवर्धनात् ।
त्रिनिष्कान्तं विधेयं स्याद्ग्रन्थिरेकाङ्गुलं भवेत् ।
अनामिकामूलनाहं त्ववकाशस्य विस्तरम् ।
अङ्गुलीलक्षणं प्रोक्तम्'
कटकम् —
'कटकं त्वधुनोच्यते ।
अर्धनिष्कं समारभ्य पादनिष्कविवर्धनात् ।
त्रिगुणान्तं विधेयं स्यात्प्रकोष्ठनाहसंमितम् ।
मध्ये पद्मसमायुक्तं रुद्राक्षं मध्यमे न्यसेत् ।
कौशिकाद्यधिदैवत्यं कनिष्ठाङ्गुलिनाहकम् ।
एवं कटकमाख्यातम्'
(उत्तरस्वायम्भुवे [टि. ५३४, टि. १०१५] पञ्चाङ्गभूषणविधिपटले)

[2] च–अ, आ, इ.
[3] शैवं शिवमन्त्रमित्यर्थः । अस्य पदस्य जपन्नित्यत्रान्वयः ।; कुशैर्दर्भैश्च — इ.
[4] अत्र दूर्वाशब्दः पुँल्लिङ्गे प्रयुक्तः । 'दूर्वाभिः' इति पाठश्चेत्सुष्ठु ।
[5] स्पृशेज्जपं द्वि० – अ; स्पृशेज्जपद्वि० – आ, इ.
[6] आचार्य — आ.
[7] पूर्वं शङ्खस्थापनमावश्यकमित्यनेनाभ्यूह्यते शङ्खाभिषेकः —
'यथालाभं चितान्भद्रानष्टावित्यधिवासयेत् ।
कलशान्यागभूमौ तु तदभावात्सुशोभनम् ।
एकं वाप्यथवा शङ्खं निर्व्रणं शुभलक्षणम् ।'
'यथालाभं चितान् इति लाभानुसारेण संचितानित्यर्थः ।'
'तदभावात् इति तेषामभावात् शोभनं एकं वा इति । अभावविकल्पोऽयमेकस्य कलशस्य शङ्खेन सह ।'
(मतङ्गपारमेश्वरे क्रियापादे १०.१४, १५ पू० श्लोका वृत्तिश्च);
एतद्विषये पुनः मृगेन्द्रे क्रियापादे ८.२०१–२०४ श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः ।
[8] अङ्गानां शुद्धचर्थं विधेयो होमोऽङ्गहोमः ।

चक्षुः श्रोत्रं तु [१]नासाभ्यां [२]जिह्वा ह्योष्ठौ च [३]दन्तकैः ॥४९॥
[४]वाक् च पादश्च पाणिश्च पायुगुह्यं तथैव च।
[५]शिखा चाज्ञा गलं चास्यं पादमूलं तथैव च ॥५०॥
[६]उष्णीषं बाहुमूलं च हस्तमध्यं तथैव च।
[७]पृथिव्यग्निश्च वायुश्च वरुणो गगनं तथा[८] ॥५१॥
शब्दः स्पर्शश्च[९] रूपं च [१०]रसो गन्धस्तथैव च।
[११]त्वक्चर्ममांसरुधिरमस्थि मज्जाथ शुक्लकम् ॥५२॥
तान्यङ्गानि [१२]प्रसङ्गाच्च [१३]प्राणोऽपानो यथाविधि।

अत्र विषये अङ्गानि परं निर्दिष्टानि। निर्दिष्टान्यङ्गान्यपि न समग्राणि।

अङ्गशुध्यर्थमन्त्रविषये **तैत्तिरीयारण्यके** दशमप्रपाठकपरिशिष्टे ६५, ६६ अनुवाकौ द्रष्टव्यौ;

'अतः परं प्रजुहुयाद्विरजाहोममात्मनः।
षड्विंशतत्त्वरूपेऽस्मिन्देहे लीनस्य शुद्धये ॥
तत्त्वान्येतानि मद्देहे शुद्धयन्तामित्यनुस्मरन्।
तत्रात्मतत्त्वशुद्ध्यर्थं मन्त्रैरारुणकेतुकैः ॥
पठ्यमानैः पृथिव्यादिपुरुषान्तं क्रमान्मुने।
माज्येन चरुणा मौनी शिवपादाम्बुजं स्मरन् ॥
पृथिव्यादि च शब्दादि वागाद्यं पञ्चकं पुनः।
श्रोत्राद्यं च शिरःपार्श्वपृष्ठोदरचतुष्टयम् ॥
जङ्घां च योजयेत्पश्चात्त्वगाद्यं धातुसप्तकम्।
प्राणाद्यं पञ्चकं पश्चादन्नाद्यं कोशपञ्चकम् ॥
मनश्चित्तं च बुद्धिश्चाहंकृतिः ख्यातिरेव च।
संकल्पं तु गुणाः पश्चात्प्रकृतिः पुरुषस्ततः ॥
पुरुषस्य तु भोक्तृत्वं प्रतिपन्नस्य भोजने।
अन्तरङ्गतया तत्त्वपञ्चकं परिकीर्तितम् ॥
नियतिः कालरागौ च विद्या च तदनन्तरम्।
कला च पञ्चकमिदं मायोत्पन्नं मुनीश्वर ॥
मायां तु प्रकृतिं विद्यादिति माया श्रुतीरिता।
तज्जान्येतानि तत्त्वानि श्रुत्युक्तानि न संशयः ॥
कालस्वभावा नियतिरिति च श्रुतिरब्रवीत्।
एतत्पञ्चकमेवास्य पञ्चकञ्चुकमुच्यते ॥
अजानन्पञ्चतत्त्वानि विद्वानपि च मूढधीः।
नियत्यधस्तात्प्रकृतेरुपरिष्टात्पुमानयम् ॥
काकाक्षिन्यायमाश्रित्य वर्तते पार्श्वतोऽन्वहम्।
विद्यातत्त्वमिदं प्रोक्तं शुद्धविद्यामहेश्वरौ ॥
सदाशिवश्च शक्तिश्च शिवश्चेदं तु पञ्चकम्।
शिवतत्त्वमिदं ब्रह्मन्प्रज्ञानब्रह्मवाग्यतः ॥
पृथिव्यादिशिवान्तं यत्तत्त्वजातं मुनीश्वर।
स्वकारणलयद्वारा शुद्धिरस्य विधीयताम् ॥
(**शिवमहापुराणे** कैलाससं० १३.२१–३४)

[१] नाभिभ्यां — आ, इ.
[२] जिह्वादोष्ठौ — आ, इ.
[३] दन्तकः — अ, आ, इ.
[४] पात्पादं च पाणिं च पायो गुह्यान्तमेव च — आ, इ.
[५] शिवं ज्ञायं गुदं यस्य — अ; शिवज्ञाय गुदं यस्य — आ; शिवज्ञायं गुदं यस्य — इ; शिरसोऽङ्गानि निर्दिष्टानि स्युरिति पाठोऽत्र कथंचित्साधितः।; 'आज्ञा' इत्यनेन लक्षणया भ्रूमध्यदेशो बोध्यत इति व्याख्येयम्।
[६] उष्णीषमित्यनेन तद्धारणयोग्यं स्थानं शिरो लक्ष्यते।
[७] पृथिव्याग्निश्च — अ, आ, इ.
[८] वरुणाग्निखगाय च — अ, आ, इ.
[९] स्पर्श च — आ.
[१०] रसगन्ध — आ.
[११] 'त्वक्चर्ममांसरुधिर' इत्यस्य तैत्तिरीयारण्यकदशमप्रपाठकस्थमन्त्रस्य सायणभाष्ये 'एकस्यैव धातोर्बाह्यान्तरभागविवक्षया त्वक्चर्मशब्दौ प्रयुक्तौ' इत्यर्थो वर्णितो दृश्यते।
[१२] प्रसङ्गैश्च — अ, आ, इ.
[१३] प्राणोऽपान — अ, इ; प्राणोऽपाना — आ.

[1] समानश्चाप्युदानश्च व्यानो [2]नागस्तथा भवेत्[3] ॥५३॥
कूर्मश्च कृकरो[4] ज्ञेयो देवदत्तो[5] धनंजयः।
इडा च पिङ्गला चैव [6]सुषुम्ना च तथैव च ॥५४॥

[ऋत्विक्पूजा]

द्विजपूजां ततः [7]कुर्यात् प्रत्येकं च पुनः पुनः।
पाद्यादिकं[8] [9]विधातव्यं गन्धपुष्पाक्षतैर्युतम् ॥५५॥

[दक्षिणा]

सर्वाभरणसंयुक्तं [10]कर्णकुण्डलमेव च।
[11]अङ्गुलीयसमायुक्तं [12]स्वर्णयज्ञोपवीतकम् ॥५६॥
[13]छत्रदण्डसमायुक्तमेकनिष्कं तु दापयेत्।
[14]अनुज्ञात्वा [15]यथावत्तां [16]दक्षिणां प्रणतिपूर्वकम् ॥५७॥

---

[1] समनाश्चाद्युदानश्च — अ, इ; समानाश्चाद्युदानाश्च — आ.
[2] दानस्तथा — अ, इ.
[3] व्यानगान..... — आ.
[4] कूर्मश्च तु ततो — अ, आ, इ.
[5] देवदत्तं — आ, इ.
[6] रुष्काय च — अ; रुष्कायश्च — आ; रुष्णायश्च — इ.
[7] कृत्वा — अ, आ, इ.
[8] पाद्यादीनि — अ, आ, इ.
[9] यथा गव्यं — अ; यथातव्यं — आ, इ.
[10] कर्णकुण्डलम् —
'कुण्डलं त्वधुनोच्यते।
कुञ्जत्रिनिष्कमारभ्य पञ्चनिष्कान्तकं क्रमात्।
पञ्चवक्त्रसमायुक्तं रुद्राक्षं मध्यमे न्यसेत्।
पञ्चमूर्त्यधिदैवत्यं कर्णकुण्डलमेव च।'
(**उत्तरस्वायम्भुवे** पञ्चाङ्गभूषणविधिपटले (टि – ५३४,टि – १०१५); एतद्विषये पुनः **रौरवे** क्रियापादे ४३.२२ उ० –२४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।
[11] अङ्गुलीयकम् — '४६' श्लोकोत्तरार्धटिप्पणीं पश्यत।; अङ्गुलाभिर्दिशैर्युक्तं — आ; अङ्गुलीयदशैर्युक्तं — इ.
[12] स्वर्णयज्ञोपवीतम् — '४६' श्लोकपूर्वार्धटिप्पणीं पश्यत।
[13] चित्रदण्ड — अ;
छत्रम् —
'पूर्णचन्द्रसमाकारं मुकुलेन समन्वितम्।
मनालदण्डसंयुक्तं मुक्तादामविराजितम् ॥
अग्रं विचित्रवर्णाढ्यं श्वेतच्छत्रमिदं परम्।'
(**अचिन्त्यविध्वसादाख्ये** ६.१४३, १४४ पू०);
दण्डम् —
अस्मिन्विषये **मतङ्गपारमेश्वरे** चर्यापादे २.३५ श्लोकस्तदीयटिप्पणी च द्रष्टव्ये।
[14] अनुज्ञात्वा अनुज्ञाप्येत्यर्थः; अन्तर्भावितणिजर्थः।
[15] यथाव्यक्तं — अ, आ; यथाव्यक्तं — इ.
[16] दक्षिणं प्रणवपूर्वकम् — अ; प्रदक्षिणं प्रणवपूर्वकम् — आ, इ.

[1][अभिषेकः]

गुरु[:] शिष्यस्य भावेन तत्स्वरूपं विचिन्तयेत्।
प्रासादं दर्शयेत्पश्चान्महादीपं[2] च दीपवत् ॥५८॥
पञ्चप्रासादकं[3] दृश्य [4]ह्याभिषेकं यथा [5]पुरा।
सुमुहूर्ते सुलग्ने च स्निग्धसिंहासनोपरि ॥५९॥
पूर्वाशाभिमुखान्[6] स्थित्वा चोत्तरे च यथाक्रमम्[7]।

[8][नामकरणम्]

[9]**जन्मनामादिकं चैव वर्जयेत्तु विशेषतः ॥६०॥**

---

[1] 'प्रागेव कल्पिते गन्धधूपपुष्पादिभिः क्रमात्।
एकैकं कलशं मन्त्रैः पूर्वमेवाभिमन्त्रितम् ॥
विद्येश्वराणां क्रमशस्ततः शक्तिमुदीरयन्।
सौम्यानलो गुरुः प्राच्यां तं शिष्यमभिषेचयेत् ॥
सेचितं भूषयेत्सम्यक् श्वेतवस्त्रादिभिः क्रमात्।
रत्नैश्च विविधैश्चित्रैर्यथासंभवतोऽपि वा।
'ध्वजतोरणपताकाद्युपशोभितेऽष्टाभिर्विद्येश्वरजप्तैः कलशैः क्रमेण पूर्वाभिमुखमुत्तराभिमुखो गुरुः व्योमव्यापिनमुच्चारयन् अभिषेचयेत्। ततः प्रावृतानार्द्रशुक्लवासोऽन्तरं भूषणैः भूषयेत्'
(**मतङ्गपारमेश्वरे** क्रियापादे १०.२३–२५ श्लोकास्तदीया वृत्तिः);
'शतमष्टोत्तरं जप्त्वा प्रासादं सर्वतोमुखम् ॥
यागं कृत्वा तु पूर्वोक्तमभिषेकं तु कारयेत्।
शुभनक्षत्रदिवसे मुहूर्ते करणान्विते ॥
बहुमङ्गलनिर्घोषैः शङ्खवादित्रनिःस्वनैः।
ब्रह्मघोषैश्च विविधैर्नृत्तगीतसमन्वितैः ॥'
(**सार्धत्रिशतिकालोत्तरे** ९.३ उ०–५);
एतस्मिन्विषये पुनः **मृगेन्द्रे** क्रियापादे ८.१८८ उ० —२०४ श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः।

[2] 'महादीपं प्रासादं दीपवद्दर्शयेत्' इति व्याख्येयमिति भाति।

[3] प्रासादका — अ, आ, इ;
पञ्चप्रासादमन्त्राः — '३५ उ०' टिप्पणीं पश्यत।

[4] महाभिषेकं — अ, आ, इ: अत्र कुर्यादित्यध्याहारः।

[5] पुनः — अ, आ, इ;ः '३६' तमश्लोकेऽभिषेकः सूचितः।; '४८' तमश्लोके शङ्खाभिषेकः सूचितः।

[6] पूर्वाशाभिमुखा — अ, इ; पूर्वाशाभिमुख — आ; अत्र शिष्यान् संस्थाप्येति शेषः। '२५' तमश्लोके शिष्यस्य पूर्वाशाभिमुखत्वेन स्थापनमुक्तम्।

[7] 'सुमुहूर्ते सुलग्ने च स्निग्धसिंहासनोपरि यथाक्रमं पूर्वाशाभिमुखान्[शिष्यान्]संस्थाप्य [आचार्यः] उत्तरे च स्थित्वा पञ्चप्रासादकं प्रदर्श्य पुरा यथा अभिषेकं कुर्यात्।' इति व्याख्येयमिति भाति।

[8] 'ईशानवक्त्रविद्येशा अघोरब्रह्मसद्यकम्।
रुद्रो वामश्च हुंकारो नवधा नाम उच्यते ॥
ब्राह्मणादिचतुर्णां तु गणान्तान्तं शिवादिकम्।
स्त्रीणां तु शक्तिनामान्तं दीक्षानाम विधीयते ॥'
(**सुप्रभेदे** चर्यापादे ४.१८, १९);
'स्रजं विमोचयेन्नाम दीक्षितानां तदादिकम्।
शिवान्तकं द्विजेन्द्राणामितरेषां गणान्तकम् ॥
स्थितानां समयेष्वेवं तत्स्रक्पातनिबन्धनम्।'
'यत्र च सा स्रक् ब्रह्मणामङ्गानां वा स्थाने पतति तदा तदादि शिवान्तकं द्विजेन्द्राणां द्विजेषु मध्ये प्रधानानामेवंविधानुग्रहयोगात्स्वजातिमण्डनभूतानां ब्राह्मणक्षत्रियविशां नाम कार्यम्। इतरेषां शूद्राणां तु तदादि गणान्तकं

[1]**अत्र** [2]**गोचरसूत्राणां गोत्राणां तु बहुश्रुतम्।**[3]
[4]**नक्षत्राणां नदीनां च** [5]**ग्रहदेवाद्रिवृक्षकाः ॥६१॥**
अन्यदेवाश्च सर्वेषां[6] **वर्जयेत्तु प्रयत्नतः।**
[7]**पारंपर्याय** [8]**नामादि** [9]**कीर्तनीयं यथाक्रमम् ॥६२॥**
स्त्रीलिङ्गं [10]**नपुंसकं च वर्जयेत्तु विशेषतः।**
[11]**पुँल्लिङ्गेनैव सर्वेषां घोषयेद्बुधवाचकैः ॥६३॥**

गणान्तं कुर्यात्। एवम् इत्थं सापेक्षदीक्षायोगाद् दीक्षितानां समयेषु स्थितानां समयस्थानां स्रक्पातनिबन्धनं स्रक्पातननिमित्तं नाम कार्यम्।'
(**मृगेन्द्रे** क्रियापादे ६० उ०; ६१ श्लोकस्तदीयवृत्तिश्च);
एतद्विषये पुनः **मतङ्गपारमेश्वरे** क्रियापादे ७. ११ उ०–१४ श्लोका द्रष्टव्याः।

[1] पूजान्मनादिना चैव — अ, इ; पूजान्मरदिना चैव — आ;

[1] अग्निगोचर० — अ, आ, इ.

[2] 'गोचरं गोत्रसूत्रे च संक्षेपेण वदाम्यहम्।
गोचरं शिवचिह्नं हि गोत्रं स्वमुनिवर्गकम् ॥
सूत्रमाचार एवं हि शैवानामुच्यते क्रमात्।
शिवः शिखा तथा ज्योतिः सावित्री व्योमगोचराः ॥
एतानि पञ्च नामानि शैवानां शिवशासने।
गोचरं कुलमित्युक्तं तच्चिह्नं चातुर्वर्णिनाम् ॥
काश्यपः कौशिकश्चैव भारद्वाजोऽथ गौतमः।
आत्रेयः पञ्चधा ज्ञेयाः संप्रोक्ता मुनयस्त्विह ॥
काश्यपादिमुनीनां तु शिवगोचरमुच्यते।'
'कौशिकादिमुनीनां तु शिखागोचरमुच्यते।'
'मुनीनां भारद्वाजादेर्ज्योतिर्गोचरमुच्यते।'
'गौतमादिऋषीणां तु प्रोक्तं सावित्रगोचरम्।'
'अत्र्यादिऋषीणा तु व्योमगोचरमुच्यते ॥'
(**सूप्रभेदे** चर्यापादे १.३०–३४ पू०; ३७ पू०; ४० पू०, ४२ पू०, ४४ उ०);
'शिवः शिखा तथा ज्योतिः सावित्रं चेति गोचरम्।
गोचरं कुलमित्युक्तं तच्छिह्नं शिवशासने ॥
चिह्नितास्तेन चिह्नेन शैवा ज्ञेया यथा नव।
पूर्वमुत्पन्नमेतत्तु चतुष्कं शिवभेदतः ॥
शिवाग्रे यः शिवः सूक्ष्मं ततो जातं शिवं कुलम्।
तदधो या शिखा शक्तिस्ततो जातं शिखाकुलम् ॥
व्यक्तं ज्योतिः कुलं बिन्दोर्नादात्सावित्रसंज्ञकम्।
उत्तरोत्तरमुत्पत्तेः कल्प्यं न्यूनाधिकं बहिः' ॥
(**किरणे** चर्यापादे ९.२–५);

[3] बहुश्रुतम् इत्यत्र भावार्थे क्तप्रत्ययः; बहुश्रुतिरित्यर्थः।

[4] 'अथ नामतो वर्ज्याः। यथाह मनुः —
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ॥
ऋक्षं नक्षत्रम्। अन्त्या म्लेच्छा। भीषणं भयानकम्।
आपस्तम्बोऽपि —
नक्षत्रनामा नदीनामा वृक्षनामाश्च गर्हिताः।
सर्वाश्च रेफलकारोष्मान्ता वरणे परिवर्जयेत् ॥
यमोऽपि —
देवनाम्नीं नदीनाम्नीं शैलगन्धर्वनामिकाम्।
ऋक्षवृक्षलतानाम्नीं दारार्थे परिवर्जयेत् ॥'
(**स्मृतिचन्द्रिकायां** संस्कारखण्डे १. पृ० २०१, २०२);
नक्षत्रादि — अ, आ, इ.

[5] ग्रहदेवादिवृक्षकैः — अ, इ; गृहदेवादिवृक्षकैः — आ.

[6] अत्र नामानीत्यध्याहृत्य ये ग्रहदेवाद्रिवृक्षका अन्यदेवाश्च तेषां सर्वेषां नामानि वर्जयेदिति व्याख्येयमिति भाति।

[7] '६२' उत्तरार्धं '६३' श्लोकश्च **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतौ।; इदमर्धं 'आ' मातृकायां न दृश्यते।; पारम्पर्या च — अ, इ.

[8] नामानि — अ; नामाश्च — इ.

[9] कीर्तनीया — इ.

[10] च नपुंसश्च — अ, आ; च नपुंसश्च — इ.

[11] पुल्लिङ्गादिषु — अ, आ, इ.

ब्रह्मादि[१]चातुर्वर्ण्ये च [२]नाम दत्त्वा तु [३]तत्क्रमात् ।
[४]शिवकुम्भं समादाय हस्तमुद्धृत्य [५]तत्क्रमात् ॥६४॥
बुधाय शिवभक्ताय [६]महाशब्दं तु घोषयेत् ।
गीतं नृत्तं च गेयं च भेरीताडनपूर्वकम् ॥६५॥
[७]शङ्खघोषं च शृङ्गं च वीणावेणुसमाकुलम् ।
[८]काहलध्वनिसंयुक्तं [९]स्तोत्रमङ्गलवाचकैः ॥६६॥
[१०]मर्दलं पटहं झल्लीं [११]घण्टां ढक्कां च घोषयेत् ।
सुमङ्गली[१२]वाक्यसंयुक्तं गोत्रनामाभिषेचनम्[१३]॥६७॥
अन्यैश्च [१४]विविधैर्युक्तं कुम्भैश्चैवाभिषेचयेत्[१५] ।
[१६]वेदवाक्यैश्च'

[१७][अभिषेकानन्तरकरणीयविधिः]

'तत्काले[१८]वस्त्रालंकारशोभितम्[१९] ॥६८॥

---

[१] चातुर्वर्ण्यश्च — अ, आ, इ.

[२] नामं — अ, आ, इ.

[३] तत्क्रमम् — अ, आ, इ.

[४] शिवकुम्भान् — अ, आ, इ; पूर्वं '१८' तमे श्लोके नवकुम्भस्थापनं निर्दिष्टम् । तत्र प्रधानभूतं 'शिवकुम्भं समादाय' इति व्याख्येयमिति भाति ।

[५] तत्क्रमम् — अ, आ, इ.

[६] भारशब्दं — अ, आ, इ;
पञ्चमहाशब्दः —
'कुर्यात्पञ्चमहाशब्दं तथाशुभनिवृत्तये ।
दारुजं पृथिवीजातं शङ्खजं चाब्जमुच्यते ।
आग्नेयं लोहजं प्रोक्तं वायव्यं वंशजं भवेत् ।
गेयं गगनजातं स्यात्पञ्चैते शब्द उच्यते ।
सुषिरं गायनं चैव चर्मबन्धं तथैव च ।
तन्त्रीवाद्यसमायुक्तः शब्दः पञ्चमहाख्यकः ।'
(**पूर्वकारणे** ३१.३४ उ० – ३७ पू०);
'ततं च विततं चैव घनं सुषिरमेव च ।
ततं वीणादिकं प्रोक्तं विततं मुरजादिकम् ।
घनं च कांस्यतालाद्यं वंशादि सुषिरं स्मृतम् ।
एतैश्चतुर्भिः संयुक्तैर्गीतैः शब्दैस्तु तच्छ्रुतः ।
स हि पञ्चमहाशब्दः शिवप्रियकरः सदा ।'
(**अजिते** २७.१२९–१३१ पू०)

[७] ६६–६८ पू० श्लोका **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृताः ।

[८] कालध्वनिसमायुक्तं — अ, आ, इ.

[९] स्तोत्रं — अ.

[१०] मद्दलीपटहझल्लिश्च — अ, आ, इ.

[११] डक्का डुक्कं च पूर्ववत् — अ, आ, इ.

[१२] वाक् च संयुक्तं — अ; ०वाचसंयुक्तं — आ, इ.

[१३] ०षेचकान् — अ, आ; ०षेचकाम् — इ; अत्र कुर्यादिति शेषः ।

[१४] विधिभक्तैश्च अन्यकुम्भाभि — अ, आ, इ.

[१५] ०षेचकान् — इ अत्र दीक्षादर्शोद्धृतः पाठः 'अन्यैश्च विविधैः स्थाप्य कुम्भैश्चैवाभिषेचयेत्' इति दृश्यते ।

[१६] देहाद्वाक्यं च — अ, आ, इ.

[१७] "ततो नवे विधायास्मै वाससी सोपवीतके ।
सकलीकृत्य संपूज्य शिवहस्तं विधाय च ॥
पुस्तकं घटिकासूत्रे कर्तरी योगपट्टकम् ।
स्रुक्स्रुवावक्षसूत्रं च सोष्णीषं छत्रपादुके ॥
राजोपकरणं यच्च चामराद्युपपद्यते ।
मनसा यदसंपन्नं प्रतिपाद्याभिवादयेत्' ॥
(**मृगेन्द्रे** क्रियापादे ८, २०५–२०७);
'स्नापयित्वा ततो मन्त्री शुक्लवस्त्रैर्विभूषितम् ।

[1] [शिवसूत्रधारणम्]

[2] कार्पासानां कन्यकाभिः[3] षण्णवत्या[4] यथाक्रमम् ।
[5] त्रिगुणं कृत्य[6] तन्तूनां[7] [8] पुनस्त्रिगुणमन्त्रवित् ॥६९॥
सप्तविंशति [9] तन्तूनां योजयेच्छिवमन्त्रतः[10] ।

गन्धपुष्पैः समभ्यर्च्य योगपीठोपरि स्थितम् ॥
उष्णीषं बन्धयेत्सूक्ष्मं मितशुद्धेन वाससा ।
ललाटपट्टं दातव्यं यथा राज्ञः प्रकीर्तितम् ॥
मकुटं कुण्डलाद्यैस्तु सर्वैराभरणैरपि ।
छत्रं ह्युपरि संधार्य चामरं च विधानवित् ॥
द्रव्याणामप्यलाभे तु दर्भैरेतानि कल्पयेत् ॥
अथवा मनसा सर्वं शिवमन्त्रेण चिन्तयेत् ॥
रुद्राक्षमुपवीतं च उष्णीषं चोत्तरीयकम् ।
पुस्तकं स्रुक्स्रुवं चैव करणीं कर्तरीं तथा ।
शिवार्चनाग्निकार्यं च जपध्यानं च शक्तितः ॥
व्याख्यामनुग्रहं कार्यमेवं भवतु सर्वदा ।
सर्वाधिकारभावं च दत्त्वा शिष्यस्य देशिकः ॥'

(**सुप्रभेदे** चर्यापादे ४. ५३ उ०–५९) ;

'मन्त्रपीठत्वमापन्ने कुशपुष्पाक्षतोत्तरे ।
अधिकारपदेऽस्मिंस्तु उपविश्य तमर्चयेत् ।
सकलीकृत्य विधिना शिवहस्तं प्रकल्पयेत् ॥
गन्धपुष्पपवित्राद्यैर्यथा संभवतो गुरुः ।
योगपट्टाक्षसूत्रं च संहितापुस्तकं तथा ॥
कर्तरीं करणीं सूत्रमाचार्यायोपपादयेत् ।
एवं संपूज्य विधिवदधिकारपदे स्थितः ॥
ततोऽभिवादयेच्छिष्यमाचार्यस्तु ततो गुरुः ।'

(**स्वायम्भुवे** २४.१२–१५) ;

'ततः शिवतनुं कृत्वा प्रणम्य च सदाशिवम् ।
पीठोष्णीषातपत्रादि ज्ञानं चैव शिवात्मकम् ॥
देयमुत्थापयेत्पश्चात्पाणिना दक्षिणेन तु ।
प्रभोः प्रपातयेत्पादे शिष्यमाचार्यसत्तमः ॥'

(**मतङ्गपारमेश्वरे** क्रियापादे १०.२६, २७)

[10] तत्काले — अ, ॐ

[11] अत्र कृत्वेति शेषः

[1] 'ब्राह्मणी राजपुत्री वा वैश्यकन्याथवा पुनः ।
तिसृभिर्निर्मितं सूत्रमथवा शूद्रकन्यया ॥
अन्यस्त्रीनिर्मितं सूत्रं वर्जितव्यं प्रयत्नतः ।
अथवा तन्तुकार्येषु संग्राह्यं साधकोत्तमैः ॥
सूत्रसंग्रहणे काले शोधयेत्तोयभस्मना ।
प्राज्ञः प्रारभ्य पूर्वाह्णे सद्यमन्त्रेण तन्तुकम् ॥
चतुरङ्गुलमात्रेण षण्णवतिश्च सूत्रकम् ।
तेनैव त्रिगुणं यत्तत्सूत्रदघ्नमिहोच्यते ॥
पूर्वपश्चिमतः स्थित्वा दक्षिणोत्तरमेव हि ।
हस्तदक्षिणमूर्ध्वे तु स्पृष्ट्वा वै प्रथमं तथा ॥
पश्चाद्वामकरं चोर्ध्वे त्रिगुणान्ते विशेषतः ।
भूमावन्यत्र वा क्षिप्य पूर्वाग्रं चोत्तराग्रकम् ॥
पत्रं पुष्पं तृणं दत्त्वा कृतलोलवशं कृतम् ।
संप्रोक्ष्य वामदेवेन रज्जुं गृह्णीत साधितम् ॥
ग्रीवाया हस्तयोस्तिर्यक् चाङ्गुष्ठाद्वाहुकान्तकम् ।
तत्समं चैकसूत्रं तु त्रिगुणं चोपवीतकम् ।
रज्जुतद्ग्रन्थिके तस्मिन्वाग्देवी सुप्रतिष्ठिता ॥
सावित्री चैव गायत्री वसेतामग्रमूलयोः ।
ब्रह्मा विष्णुश्च रुद्रश्च त्रिसूत्राणां तु देवताः ॥
अघोरास्त्रेण तद्बद्ध्वा बहुरूपेण धारयेत् ।
नाभिप्रदक्षिणं कार्यं नाभेरूर्ध्वं विधानतः ॥
तत्सूत्रं ब्रह्मचारीणां गृहस्थानां षडेव हि ।
नवकं वानप्रस्थानां यतीनां द्वादशं स्मृतम् ॥
उपवीतविधिः प्रोक्तः'

(**सुप्रभेदे** चर्यापादे ५.१०२ उ०–११४ पू०)

[2] कार्पासकन्यकानां तु — अ, आ, इ.

[3] अत्र कृतानां इत्यध्याहृत्य 'कन्यकाभिः कृतानां तन्तूनां' इत्यन्वयः कार्यः ।

[4] षण्णवत्य — आ.

[5] द्विगुणीकृत्य — अ, इ; द्विगुणं कृत्य — आ.

[6] 'कृत्य' इत्यस्य 'कृत्वा' इति व्याख्या कार्या ।

[7] तन्त्राणां — अ, आ, इ.

[8] पुनस्त्रिगुणं मन्त्रवित् इत्यर्थे समस्तपदं छन्दोभङ्गनिवृत्त्यर्थमिति भाति ।

[9] तन्त्राणां — अ, इ.

[10] ०न्नवमन्त्रकम् — अ; ०मन्त्रकम् — आ, इ.

ऋषिच्छन्दोऽधिदेवांश्च[1] [2]ग्रन्थिमध्ये स्थितः शिवः[3]॥७०॥
[4]ब्रह्मा विष्णुश्च रुद्रश्च [5]तन्तुभेदे प्रकीर्तिताः[6] ।
वाम[7]हस्तादधो न्यस्त्वा [कृतं [8]सूत्रं]हृदा बुधः ॥७१॥
सव्यहस्तोपरि स्थाप्य जप्त्वा [9]घोरं तथा बुधः ।
पश्चाद्गायत्रिमुच्चार्य[10] दत्त्वा [11]सद्येन मन्त्रतः ॥७२॥
[12]धारयेच्छिवसूत्रं तु [13]वर्णे वर्णे तु मन्त्रतः ।
[14]शिवगायत्रिमुच्चार्य ब्रह्मवर्णं तु वर्जयेत् ॥७३॥
मध्ये प्रणवसंयुक्तं वैश्य[15]शूद्रकयोः क्रमात् ।
आद्यन्तं क्षत्रियस्योक्तं जप्त्वा प्रणवसंपुटम् ॥७४॥
जप्त्वोपवीत[16]मन्त्रं तु धारयेद्ब्रह्मवर्णकम् ।
क्षत्रिया[17]दिकवर्णांश्च शिवसूत्रं तु धारयेत् ॥७५॥
पश्चाच्छैवं समुच्चार्य पुनराचम्य पूर्ववत् ।
[18]स्वर्णयज्ञोपवीतं चाथवा रजतमेव वा ॥७६॥
अलाभे कार्पास[19]तन्तूनां द्विगुणं त्रिगुणीकृतम् ।

---

[1] ऋषिच्छन्दादिदेवस्य — अ, आ, इ.
[2] गन्धमध्ये — अ, आ.
[3] स्थितं शिवम् — अ, आ, इ.
[4] इदमर्धं 'आ' मातृकायां न दृश्यते ।
[5] तन्त्रभेदं — अ, आ; तन्तुभेदं — इ.
[6] प्रकीर्तितम् — अ, आ, इ.
[7] ०हस्तकरो न्यस्त्वा —अ, आ; हस्तकरेणैव न्यस्त्वा — इ.
[8] सूर्य हृदि बुधः — अ, आ, इ.
[9] चोरं हृदि बुधः — अ, आ, इ.
[10] गायत्रीं — 'तत्सवितुः' इति मन्त्रं; ऋग्वेदे ३.६.१.१०; तै० संहिता १.५.६.१२; वृत्तार्थमत्र गायत्रीशब्दस्य ह्रस्वान्ततया प्रयोगः ।
[11] सद्यं तु — अ, आ, इ.
[12] साधयेच्छिव० — इ.
[13] वर्णाद्वर्णं तु — अ, आ, इ.
[14] शिवगायत्री —
'ओं तन्महेशाय विद्महे महादेवाय धीमहि ।
तन्नः शिवः प्रचोदयात् ।'
(**पूर्वकामिके** मन्त्रोद्धारपटले पृ० १६); "गायत्रीमन्त्रोद्धारः प्रदर्शितः श्रीमद्वालज्ञानरत्नावल्याम् ।
'ओं तन्महेशाय पदं विद्महे च ततः पदम् ।
वाग्विशुद्धाय तत्रान्ते धीमहीति समन्वितम् ॥
तन्नः शिवपदं तस्मान्नियोज्य च प्रचोदयात् ।
गायत्री कथिता वत्स इति कालोत्तरीयके ॥' इति"
(**क्रियाक्रमद्योतिकाव्याख्या प्रभा** पृ० ३८); वृत्तार्थं गायत्रीशब्दो ह्रस्वान्ततया प्रयुक्तः ।; ७२ उ० पश्यत ।
[15] सूत्रस्य तत्क्रमम् — अ, आ; शूद्रस्य तत्क्रमम् — इ.
[16] ०मन्त्रेण — अ, आ, इ; उपवीतमन्त्रः — 'यज्ञोपवीतं परमं पवित्रं, इति मन्त्रः (**ब्रह्मोपनिषत्** ५)
[17] ०दिभिर्वर्णैश्च — अ, आ, इ.
[18] '४६' तमश्लोकपूर्वार्धटिप्पणीं पश्यत ।; ७६ उ०, ७७ पू० इत्यर्धद्वयं **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतम् ।
[19] ०तन्तुर्द्विगुणास्त्रिगुणान्धारयेत् — अ, इ; ०स्तन्त्राद्विगुणान्तिगुणं धारयेत् — आ.

[पाद्याद्युपचारदानम्]

[1]**पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम् ॥७७॥**
कर्पूरवर्तिसंयुक्तं धूपदीपं द्विधा भवेत् ।
दत्त्वा देवं हृदि [2]ध्यात्वा सर्वाङ्गं [3]भावयेत्पुनः ॥७८॥
दुष्टनिग्रहकारं च शिष्टपालं तथोपरि ।
[4]मन्त्राधारं तु कर्तारं [5]शैवाचारस्य रक्षकम् ॥७९॥
[6]दर्शनान्तरसंहारं परवादिभयंकरम् ।
गोब्राह्म[7]णान्प्राणिनश्च रक्षयेत्सर्वदेवताः[8] ॥८०॥
सर्वदैवतमाश्रित्य लोकानुग्रहकारणम् ।

[1][शिवहस्तसमर्पणम्]

शिवांशोत्पन्नभस्मानं[10] हस्तमादाय मन्त्रवित् ॥८१॥
[11]ललाटे मूर्ध्नि हृदये दापयेद्विधिवत्पुनः ।

---

[1] पाद्याचमनाचा० — अ; पाद्याचमनं चा० — आ. इ.

[2] ध्यानं — अ, आ, इ.

[3] मण्डले देवदेवेशमिष्ट्वाग्नौ तर्पयेन्मनून् ।
भगवन् देहमाविश्य मदीयमनुकम्पया ॥
अनुग्रहस्त्वया कार्यः शिष्याणां भावितात्मनाम् ।
इति विज्ञाप्य लब्धाज्ञश्चोष्णीषं शिरसि न्यसेत् ॥
सर्वेषां कर्मणां साक्षी मण्डलस्थः सदाशिवः ।
यज्ञस्य रक्षकः कुम्भे पावके होमकारणम् ॥
शिष्ये तु पाशनाशाय मद्देहे पाशमोचकः ।
पञ्चाधिकरणो देवस्त्वहमेव सदाशिवः ॥
मन्त्राः करणभूता ये शिवस्य हृदयादयः । ;
ममापि ते तथैवेह स्वातन्त्र्यं स्वस्य चात्मनि ॥
सभाव्याध्येषयेद्देवं प्राणैरन्तर्बहिःस्थितैः ।'
(**उत्तरकामिके** २३.७उ०–१२);

एतस्मिन्विषये पुनः **मतङ्गपारमेश्वरे** क्रियापादे ५.१६ श्लोकस्तदीयवृत्तिः, **सार्धत्रिशतिकालोत्तरे** ८.८, ९ पू० श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः ।

[4] मन्त्रधारं — अ.

[5] शैवाचानन्तरक्षितम् — अ, आ; शैवाचारं तु रक्षितम् — इ.

[6] दर्शनान्यं च संहारं — अ, आ, इ.

[7] ०णाश्च प्राणाश्च — अ, इ; ०णाच्च प्राणाच्च — आ.

[8] ०देवताम् — अ, आ, इ.

[9] 'गन्धाधिवासितं कृत्वा स्वसव्यकरपल्लवम् ।
सामनेन मदेहेन शिवेन समधिष्ठितम् ॥
शिवहस्तमिति ध्यात्वा सापेक्षनिरपेक्षकम् ।
हृद्देशाद्भ्रूप्रदेशान्तं नीत्वा वै चूलिकान्तकम् ॥
सह प्रासादोच्चारेण समस्तग्रन्थिभेदिना ।
रुद्रेश्वरपदावाप्तिदायकं शिरसि न्यसेत् ॥'
(**उत्तरकामिके** २०.६६–६८);

एतद्विषये पुनः **मृगेन्द्रे** क्रियापादे ७.६३ श्लोकस्तदीयवृत्तिः; **मतङ्गपारमेश्वरे** क्रियापादे ५.१७, १८, १९ श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः ।

[10] शिवांशोत्पत्तिभस्मारं — अ; शिवांशत् . . . पत्यभस्मारं — आ; शिवाशरत्पत्यभस्मानं — इ; शिवांशोत्पन्नं भस्म यस्मिन् सः तम् ।

[11] ललाटमूर्ध्नि हृदयं — अ, आ, इ.

[१] [अधिकारसमर्पणम्]

दत्त्वा [२]भुक्त्यधिकारं च [३]सर्वसिद्धिकरं शुभम् ॥८२॥
[४] आचार्यं दापयेत्पश्चाद्रुद्रस्मरुद्राक्षपूर्वकम् ।
देवतानां च देवीनां[५] गाणपत्यादि[६] सर्वशः[७] ॥८३॥
[८] मकुटं कुण्डलं चैव पुस्तकं पादुकां तथा ।

---

[१] 'आमन्त्र्य परमेशानं भगवन्गुरुसन्ततौ ।
नियुक्तोऽयं मया नाथ तवाज्ञानुविधायिना ॥
वक्तव्यः सोऽप्यथैवं स्याद्वत्स त्वयि तु संस्थितः ।
पाल्यो नु संततावाप्तः सोऽधिकार शिवाज्ञया ॥'
(**मतङ्गपारमेश्वरे** क्रियापादे १०.२८, २९) ;
'आज्ञां च श्रद्धया यावदद्यप्रभृति देशिक ।
दीक्षाव्याख्यादिकं ज्ञात्वा परीक्ष्य विधिना कुरु ॥
तथैव देवदेवाय देशिकाय मया कृतम् ।
त्वत्प्रसादादविघ्नेन चाधिकारं करोत्विति ॥
विज्ञापयेत्'
(**उत्तरकामिके** २४.४५ उ०–४७) ;
एतद्विषये पुनः **मृगेन्द्रे** क्रियापादे ८.२०८–२१० पू० श्लोकास्तदीयवृत्तिश्च द्रष्टव्याः ।

[२] भोक्ताचकारश्च—अ; भोक्ताचकारा च—आ, इ.

[३] सर्ववृद्धि — इ.

[४] आचार्यस्येदमाचार्यम् । 'आचार्यत्वसंपादकम्' इत्यर्थः । 'अर्श आदिभ्यो अच्' (पा० सू० ५.२.१२७) इत्यच्प्रत्ययः । 'आचार्यम्' इत्येतत् 'भुक्त्यधिकारम्' इत्यस्य विशेषणम् ।

[५] 'आधिपत्यम्' इत्यध्याहृत्य देवतानां देवीनां च आधिपत्यमिति व्याख्येयमिति भाति ।

[६] गाणापत्यादि — अ, आ.

[७] सर्वतः — अ.

[८] इदमर्धं **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतम् ।;
'ततोऽस्य दद्यादाचार्यः शिष्यस्योष्णीषकादिभिः ।
करणीं कर्तरीं तद्वद्घटिकां स्रुक्स्रुवौ पुनः ॥
दर्भं च पुस्तकान्यक्षसूत्रमामकुटं गुरुः ।
पादुकं चामरं छत्रं हस्तिनं शिबिकादिकम् ॥
राजाङ्गमन्यत्तत्काले दद्याच्छ्रद्धासमन्वितः ।
(**उत्तरकामिके** २४.४३–४५ पू०) ;
'करणीं कर्तरीं सूत्रं योगपट्टाक्षसूत्रकम् ।
संहितापुस्तकं न्यस्य सर्वं तस्योपपादयेत् ॥
(**किरणे** क्रियापादे १५.९ उ०, १० पू०) ;
मकुटलक्षणम् — अस्मिन्विषये **रौरवे** क्रियापादे '४३' तमपटले १–१२ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।;
कुण्डललक्षणम् — '५६' पूर्वार्धटिप्पणीं पश्यत ।
पुस्तकम् —
'अङ्गुलत्रयमारभ्य व्योमाङ्गुलविवृद्धितः ।
पञ्चविंशतिमात्रान्तं भवेत्पुस्तकदैर्घ्यकम् ॥
व्योमाङ्गुलात्पादवृद्ध्या रविमात्रावसानकम् ।
प्रमाणं तु विशाले स्यात्पक्षपट्टीयुतं तु वा ॥
भूर्जत्वक्कुलसंभूतं श्रीतालीदलमेव वा ।
तालसंभूतपत्रं वा सुवर्णादिविनिर्मितम् ॥
शैलदारुकृतं वापि लेखयेदक्षरैः शुभैः ।'
(**उत्तरकामिके** ६७.३ – ६ पू०) ;
पादुका —
'तत्र तु द्वादशाङ्गुल्यं पादुकं स्वप्रमाणतः ।
आयामार्धं तु विस्तारं विस्तारार्धं समुच्छ्रितम् ॥
लोहेनैव तु कर्तव्यं पादुकाद्वयमुत्तमम् ।
(**सुप्रभेदे** क्रियापादे २२.१५४ उ०, १५५) ;
छत्रचामरपिञ्छानि —
'चामरव्यजनादीनां लक्षणं वक्ष्यतेऽधुना ।
मयूरव्यजनं कुर्याच्चमर्याश्चामरं तथा ॥
हेमरत्नमयं दण्डं रौप्यं ताम्रमयं तु वा ।
दन्तैर्वा दारुसारैर्वा दण्डं कुर्याद्विशेषतः ॥
श्वेतच्छत्रस्य पिञ्छस्य वक्ष्येऽहं लक्षणं शृणु ।
सप्तषट्तालतारं वा ह्यथवा पञ्चतालकम् ॥
वस्त्रैरावेष्टच सर्वत्र मौक्तिकैश्च विभूषयेत् ।
मयूरपिञ्छकैः पिञ्छमधोमुखसमन्वितम् ॥
सौवर्णं रजतं वापि ताम्रं वा मकुटं भवेत् ।
नवाष्टसप्तषड्हस्तैः पञ्चहस्तैश्चतुष्ककैः ॥

छत्रचामरपिञ्छैश्च[1] दत्त्वा मन्त्रं तु पूर्ववत् ॥८४॥
[2]दर्पणदर्शनं चापि गीतनृत्तं च पूर्ववत् ।
[3]नमस्कारं ततः कृत्वा [4]शिष्टे शिष्ये यथाविधि ॥८५॥
[5]स्वर्णपुष्पं च दातव्यं [6]स्तोत्रवाचनपूर्वकम् ।
[7]मातापित्रोर्गुरोश्चैव [8]ज्येष्ठानां लिङ्गिनामपि ॥८६॥
मधु[9]शर्करासंयुक्तं सघृतं क्षीरमुच्यते ।
होमशेषं सकृद्ग्राह्य मिश्रं पीत्वा तु मन्त्रवित् ॥८७॥
पुनराचम्य विधिना साङ्गुलेन तु [10]वक्त्रकम् ।
भस्मचन्दनपुष्पैस्तु[11] शिरोऽङ्गुष्ठादिलेपनम् ॥८८॥
वेदिका[12] पश्चिमे चैव कल्पयेदासनं तथा ।
अङ्गन्यासकरन्यासमक्षरन्यासमेव च ॥८९॥
बद्धाञ्जलिपुटं न्यस्त्वा [13]कनिष्ठं च तदूर्ध्वतः ।
पुण्याहं स्वस्तिवचनं[14] मङ्गलं शोभनं तथा ॥९०॥
[15]आचार्यसर्वकं दत्त्वा सर्वमन्त्रं तु दापयेत् ।
सर्वज्ञानमिदं प्रोक्तं [16]सर्वतन्त्रं तु दापयेत् ॥९१॥

त्रिहस्तैर्वा यथालाभं तेषां दण्डस्य दैर्घ्यकम् ।
तालच्छत्रं तु कर्तव्यं तत्प्रमाणं तु बुद्धिमान् ॥
छत्रं पिञ्छं तथा प्रोक्तम्'
(**सुप्रभेदे** क्रियापादे २२.१५६–१६२ पू०)

[1] ०पिच्छैव — आ.

[2] दर्पणादर्शनं — अ; दर्पणं दर्शनं — आ, इ;

दर्पणम् — 'दर्पणस्य विधिं शृणु ।
स्मृत्यङ्गुलं तु विस्तारं पूर्णचन्द्राकृतिर्यथा ॥
नालं वस्वङ्गुलं ज्ञेयं पादं वेदाङ्गुलं भवेत् ।
नानापट्टिकया युक्तं शुद्धकांस्येन कारयेत् ॥
विस्तारमुदितं पूर्वमेषामर्धेन वर्तयेत् ।
तन्नाहं चैव सर्वेषां नाहमित्यभिधीयते ॥'
(**पूर्वकारणे** १८.२९६–२९८);

[3] 'वन्दनं कारयित्वाथ नीत्वा पुरहरान्तिकम् ।
(**किरणे** क्रियापादे १५.१०उ०)

[4] शेषे शिष्या यथाविधि — अ, आ, इ; अधिकारसमर्पणे शिष्ट इत्यनेन निरपेक्षो शिष्यो नमस्कार्यत्वेन विवक्षित इति भाति।

[5] 'निरधिकारसमर्पणे शिष्यमभिवाद्य,
अद्यप्रभृति संक्रान्तो योऽधिकारो मया त्वयि ।
स कर्तव्यस्त्वया तावद्यावत्संक्रमितोऽन्यतः ॥
इति संश्रावयेत् सोऽपि तथेति शिरसा आज्ञां गृह्णीयात् । सापेक्षसमर्पणे तु नमस्कारो न विधेयः ।' 'अथ अधिकारसमर्पणं निरपेक्षसापेक्षभेदेन द्विधा विभिद्य तत्र करणीयमाह' "।
(**क्रियाक्रमद्योतिका**, प्रभाव्याख्या च. पृ० ३७७);

[5] स्वर्णपुष्पम् — **रौरवे** क्रियापादे ४३.१३, १४ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[6] स्तोत्रं वाचन० — अ.

[7] मातापित्रो गुरो — अ; मात्रापित्रा गुरो० — आ; मात्रा पित्रो — इ.

[8] ज्येष्ठादि लिङ्गमेव च — अ, आ, इ.

[9] ०पर्कर — आ, इ.

[10] पित्रकम् — अ, आ, इ; अत्र 'उपस्पृश्य' इति शेषः ।

[11] ०पुष्पेण — अ, आ, इ.

[12] ०पश्चिमं चैव लेपये० — अ, आ, इ.

[13] कनिष्ठो पादमूर्ध्वतः — अ, आ, इ.

[14] ०वाचेन — अ, आ इ.

[15] आचार्य सर्वदत्तं च — अ, आ, इ.

[16] सर्वमन्त्रं — अ, आ, इ.

सहज [1]सर्वपूज्यं तु सृष्टिस्थितिसमं भवेत् ।
[2]कर्षणादि प्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तकम् ॥९२॥
उत्सवादि तु[3] शान्त्यन्तं[4] [5]कर्तव्यं तु निवेदयेत् ।
[6]पवित्रं [7]स्रुक्स्रुवं चैव [8]पद्मासनं तु दापयेत् ॥९३॥
[9]अक्षमालां च [10]दण्डं च कमण्डलुं च धारयेत् ।

---

[1] पूर्वपूज्यं — अ, इ.

[2] '९२ उ०; ९३ पू०' एतदर्धद्वयं **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृतम् ।

[3] उत्सवादीनि — अ, इ; मत्सवादीनि — आ.

[4] शान्त्यर्थ — आ; शान्त्यर्थ — इ.

[5] **सद्यजादि निवे०** — अ, इ; सद्यवादी निवे० — आ; दीक्षादर्शोद्धृतपाठमनुसृत्यात्र 'कर्तव्यं तु' इति पाठः साधितः ।

[6] **पवित्रम्** —

'पवित्राणां ततः शृणु ।
कुशा दर्भाश्च गोवालाः पवित्रे कनकास्तथा ॥
सप्तपञ्चत्रियुक्तं वा ह्यग्रं तु द्व्यङ्गुलं भवेत् ।
द्व्यङ्गुलं तस्य नालं तु ग्रन्थिरेकाङ्गुलं भवेत् ॥
दक्षिणावर्तग्रथितं पवित्रमिह शोभनम् ।
अनाम्यङ्गुलिविस्तारं तारष्टैकांशहीनकम् ॥
तप्तचामीकरेणैव पवित्रं कनकाख्यकम् ।'

(**सुप्रभेदे** क्रियापादे २२.१४–१७ पू०); एतद्विषये पुनः **मृगेन्द्रे** क्रियापादे ६. ५२ उ०, ५३ पू० वृत्तिश्च द्रष्टव्याः ।

[7] **स्रुक्स्रुवौ** —

'स्रुक्स्रुवौ खदिरेणैव शम्या वैकङ्कतेन वा ।
अथवा याज्ञिकैर्वृक्षैः कर्तव्यौ लक्षणान्वितौ ॥
संगृह्य मध्यसारं तु द्विधा कृत्वा तरुं पुनः ।
तत्पार्श्वे बिलमाख्यातमवक्रं निर्व्रणं दृढम् ॥
द्वात्रिंशदङ्गुलायामं सप्ताङ्गुलसुविस्तृतम् ।
तद्घनं तु चतुर्मात्रमेवं पादं च तत्र वै ॥
मध्ये सूत्रं प्रसार्यादौ मुखायामं षडङ्गुलम् ।
अग्रभागं त्रिभागैकं मुखविस्तारमुच्यते ॥
यवत्रयप्रमाणेन पट्टिका मुखपार्श्वयोः ।
यवमानेन निम्नं स्यान्मुखं सर्वमशेषकम् ॥
पक्षाङ्गुलं गलायामं विस्तारं तु शराङ्गुलम् ।
सप्ताङ्गुलायता वेदी विस्तारं तत्सम भवेत् ॥
बिलं सुवृत्तं मध्ये तु चाङ्गुलद्वयमानतः ।
तद्विस्तारसमं गर्तं सुवृत्तं बिलमुच्यते ॥
पट्टिका बिलबाह्ये तु यवमानघनान्वितम् ।
तद्बाह्येऽष्टदलं पद्मं यवनिम्नं विचित्रितम् ॥
वेदिकायास्तु परितः पट्टिका त्रियवा घना ।
बिलादूर्ध्वमुखात्खात्वा कनिष्ठाङ्गुलमानतः ।
तारेण वाथ ताम्रेण नालं कृत्वा तु योजयेत् ।
पक्षाङ्गुलप्रमाणेन पद्माकारं तु गण्डिका ॥
गण्डिकैकाङ्गुला वृत्ता तन्नाहं चाब्धिमात्रकम् ।
रव्यङ्गुलं तु दण्डोच्चं तस्यार्धं नाहमुच्यते ॥
तन्मूले कलशाकारमङ्गुलद्वयमानतः ।
धर्माङ्गुलं तु नाहं स्यात्तस्याधस्ताच्च पादयुक् ।
वेदिकायास्त्वधः पद्मं पृष्ठाकारं सकर्णिकम् ॥
गजोष्ठपृष्ठसदृशमास्यं पृष्ठाकृतिर्भवेत् ॥
एवं संग्राह्य तच्छेषं परित्यज्य दृढं यथा ।
एवं स्रुग्लक्षणं प्रोक्तं स्रुवलक्षणमुच्यते ॥
द्वाविंशदङ्गुलायामं दण्डनाहं रसाङ्गुलम् ।
मूलाद्ग्रीवान्तरं यावत्त्र्यङ्गुलं ग्रीवनाहकम् ॥
मूलवच्चाग्रनाहं स्याद्द्विबिलं नासिकाकृतिः ।
पूरितं कर्षकार्धेन बिलमानं प्रकीर्तितम् ॥
पुष्कराधः प्रकर्तव्या गण्डिका द्वियवोन्नता ।'

(**पूर्वकारणे** १८, २८–४४ पू०); एतद्विषयं पुनः **अजिते** २१.१२५–१३२ श्लोकाः, **मृगेन्द्रे** क्रियापादे ६.३५–४१ पू० तदीयवृत्तिः, **मतङ्गपारमेश्वरे** क्रियापादे ४.६८–७८ श्लोकाश्च द्रष्टव्याः;

[8] **पद्मासनम्** —

'ततः पद्मासनं शृणु ।
ऊर्ध्वाधोदलसंयुक्तं वृत्तमब्जासनं स्मृतम् ॥

(**सुप्रभेदे** क्रियापादे २२.१२४)

[9] **अक्षमाला** —

'जपमाला शिरोमाला हृन्माला बाहुमालिका ।

[1]कुलिशं [2]चामरं [3]छत्रं [4]दर्पणं [5]पुस्तकं तथा ।।९४।।
[6]गुणत्रयं [7]धारयेत्तु [8]कूर्मासनं तु दापयेत् ।

कर्णपृष्ठात्तु नाभ्यन्ता उरोमाला इति स्मृताः ।
शिरोमाला तु तन्नाहा भुजमाला भुजासमा ।
जपमालां समानेन संख्यामात्रं शृणुष्व हि ।।
पञ्चविंशतिरुदाक्षैर्मोक्षार्थिनां जपं स्मृतम् ।
षड्विंशतिः शिवार्थं च ज्ञानार्थं शत्रुनाशने ।।
सप्तविंशतिरित्युक्तं पुष्टचर्थमष्टविंशतिः ।
त्रिंशज्जयार्थिनां कार्या दशपञ्चाभिचारके ।।
जपमाला समाख्याता'
(**सुप्रभेदे** योगपादे ३.१० उ०–१४);
एतद्विषये पुनः **मतङ्गपारमेश्वरे** क्रियापादे ११.८–१२ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[10] दण्डकमण्डलम् — इ;
दण्डकमण्डलू —
'वेणुदण्डविधिं शृणु ।
विप्राणां तु शिरोत्सेधं क्षत्रियाणां ललाटकम् ।।
वैश्यानां नासिकोत्सेधं शूद्रादीनां तु वर्जयेत् ।
वेणुदण्डमृजुं स्निग्धं वक्रकोटरवर्जितम् ।
दण्डस्यैवं विधिः प्रोक्तः कमण्डलुविधिं शृणु ।
पूरितं चाढकं श्रेष्ठं मध्यं त्रिप्रस्थपूरितम् ।।
द्विप्रस्थपूर्णमधमं मानमेवं कमण्डलोः ।
सौवर्णं राजतं वापि ताम्रं वा मृण्मयं तु वा ।।
यदुक्तं शिल्पशास्त्रेषु तत्तदुक्तं तु कारयेत् ।'
(**सुप्रभेदे** योगपादे ३.४८ उ०–५२);
एतद्विषये पुनः **मतङ्गपारमेश्वरे** चर्यापादे २.३५; ८.४उ०–७पू० श्लोका द्रष्टव्याः ।

[1] कुळिरं – इ;
कुलिशम् —
'तालमात्रसमायामं विस्तारोऽष्टाङ्गुलं मतम् ।
तन्मध्ये गण्डिकां कुर्याच्चतुरङ्गुलमानतः ।।
शेषैरष्टाङ्गुलैरेव अधश्चोर्ध्वं त्रिशूलवत् ।
पार्श्वपत्रद्वयं चक्रं मध्यमत्र ऋजु स्थितम् ।।
एवं वज्रं समाख्यातम्'
(**सुप्रभेदे** क्रियापादे २२.१७५–१७७पू०)

[2] चामरम् —
'चामरस्य विधिं शृणु ।
दर्भेण दारुजेनैव शुल्बेन रजतेन वा ।।
सौवर्णेनैव रत्नेन दण्डं कुर्याद्विचक्षणः ।
चतुर्विंशाङ्गुलायामं दण्डनाहं शराङ्गुलम् ।।
नानागण्डिकया युक्तं नानाकुम्भलतान्वितम् ।
नानाकर्णसमायुक्तं नानामण्डलसंयुतम् ।।
संयुक्तं चमरीवालैर्यथाशोभं तु कारयेत् ।'
(**पूर्वकारणे** १८.२३५ उ०–२३८)

[3] छत्रम् —
'छत्रलक्षणमुच्यते ।।
चतुर्मुखप्रविस्तारं समवृत्तमधोमुखम् ।।
आधारं वैणवेनैव तन्तुना बन्धयेत्क्रमात् ।
वस्त्रेण वेष्टयेत्सर्वं मुक्तादामैश्च रत्नकैः ।।
मकुटं हेमपट्टैश्च भूषयेद्भूषणार्हकैः ।
वस्त्रेण मध्यमं कुर्यात्तालपत्रैश्च कन्यसम् ।।
बाणाग्निरसतालैर्वा नालायामं प्रकीर्तितम् ।
(**पूर्वकारणे** १८.२२९ उ०–२३२);
एतद्विषये पुनः ५७ पू० टिप्पणीं पश्यत ।

[4] दर्पणम् —
८५ श्लोकस्य टिप्पणीं पश्यत ।

[5] पुस्तकम् —
'पुस्तकस्य प्रमाणं च शृणुष्व कमलासन ।
चतुर्दशाङ्गुलं वापि पञ्चदशाङ्गुलं तु वा ।
षोडशाङ्गुलमेवं वा सप्तदशाङ्गुलं तु वा ।
अष्टादशाङ्गुलं वापि नवदशाङ्गुलं तु वा ।
अथवा विंशतिर्वापि एकविंशतिरेव वा ।
द्वाविंशतिर्वा विप्रेन्द्र कारयेद्देशिकोत्तमः ।
एवं तु पुस्तकं चैव मानाङ्गुलेन कारयेत् ।
उत्सेधं चाष्टधा कृत्वा एकांशं चैव विस्तरम् ।
विस्तारार्धं घनं प्रोक्तं पार्श्वकम्पद्वये न्यसेत् ।
त्रिभागं तु चतुर्भागं मध्ये सुषिरमुच्यते ।
एवं पुस्तकमानं तु'
(**वीरे** २.२४–२९ पू०);
एतद्विषये पुनः '८४ पू०' टिप्पणीं पश्यत ।

[6] गुणत्रयम्–यज्ञोपवीतम् '६९' श्लोकस्य टिप्पणीं पश्यत ।

[1]रङ्गे वा [2]शिबिकायां वा [3]अश्वे गजे [4]नरेषु वा ।।९५।।
ग्रामप्रदक्षिणं चैव गृहप्रवेशमेव हि ।

[5][पूर्णाहुतिः प्रायश्चित्तहोमश्च]

पूर्णाहुतिं तथारभ्य प्रायश्चित्तं तु होमयेत् ।।९६।।

---

[1] रुगे वा — अ; ९५ उ०, ९६, ९७ पू० श्लोकाः **दीक्षादर्शे** 'रौरवे' इति निर्दिश्योद्धृताः।;
रङ्गम् — 'रङ्गं चैव ततः शृणु।
रथाधिष्ठानवत्कृत्वा ब्रह्माणं मुकुलं त्यजेत् ।।
रङ्गमण्टपवत्कृत्वा ह्यथ प्रासादवत्कृतम्।
दारुणा द्वितलं कृत्वा तदूर्ध्वे तु तुरङ्गमाः ।।
चतुर्वापि गजा मध्ये वृषसिंहा द्रुमोऽथवा।
तलोर्ध्वे यन्त्रिडोलां च अन्यदुक्तं तु कारयेत् ।।
एवं तु रङ्गमाख्यातम्'
(**सुप्रभेदे** क्रियापादे २२.१३१–१३४ पू०)

[2] शिबिकोयं वा — अ; शिविको वापि – आ; शिविके वापि – इ;. शिविका —
'सारदारुमयेनैव मानाङ्गुलेन कारयेत्।
षट्त्रिंशदङ्गुलं तारं कन्यसस्य प्रकीर्तितम् ।।
मध्यमं चाष्टचत्वारि षष्टचङ्गुलमथोत्तमम्।
विस्तारं द्विगुणायामं पादोनद्विगुणं तु वा ।।
ईलिकायास्तु विस्तारं श्रेष्ठस्याब्ध्यङ्गुलं भवेत्।
अङ्गुलाङ्गुलहीनं तु मध्यमस्याधमस्य च ।।
तस्यार्धं तु घनं प्रोक्तमीलिकायाः प्रजापते।
ईलितारं त्रिधा कृत्वा मध्यभागेन पट्टिका ।।
भागेनैकेन तद्वाह्ये कारयेत्तु कपोतकम्।
आयाममष्टधा कृत्वा भागेन भित्तिपादकम् ।।
कुम्भं च वलयं चैव वृत्तकं चारुहीनकम्।
ईलिकामध्ययोर्मध्ये चतुरश्रीकृतं तथा ।।
एकैकांशेन चोर्ध्वाधः पट्टिकाद्वयमेव हि।
मध्यमे तु विभागेन फलका च क्रमेण तु ।।
ईलिकैर्जालकैश्चैव फलकैर्गलकैरपि।
नानावल्लीसमायुक्तां नानाक्रीडासमायुताम् ।।
तत्पूर्वभित्तेरुत्सेधमष्टाङ्गुलमिति स्मृतम्।
सिंहद्वयसमायुक्तं तदूर्ध्वे मकरास्यकम् ।।
एालिकासदृशं पादं तत्र सप्ताङ्गुलोन्नतम्।
अयःपट्टैश्च नाराचैर्दृढं कुर्याद्विशेषतः ।।
वेणिकावेष्टनं वापि फलकाबन्धनं कुरु।
शिबिकालक्षणं प्रोक्तम्'।
(**पूर्वकारणे** १८.१०३–११३)

[3] अश्वं — अ, आ, इ.

[4] ०नरोऽपि वा — आ, इ.

[5] 'नदर्थं विधिनानेन प्रायश्चित्तं समाचरेत्।
शिवासनाङ्गमन्त्रैश्च पूज्य देवस्य नामभिः ।।
अङ्गैर्दशाहुतीर्हुत्वा शिवेनान्ते दशाहुतीः।
तेनैव पूर्णा दत्त्वान्ते भगवन्तं क्षमापयेत् ।।'
(**उत्तरकामिके** २४.५०, ५१);
'ततः पूर्णाहुतिं दद्यात्कृतहोमस्य देशिकः।
शिवादिभिः करस्याग्रमुल्मुकाग्रेण संस्पृशेत्।
खड्गवन्मन्त्रसंदीप्त्यै पाशच्छेदादिहेतुतः।'
(**मृगेन्द्रे** क्रियापादे ८.२१३, २१४ पू०);
'ततोऽग्नौ तर्पयेत्सम्यङ्मन्त्रग्राममनिन्दितम्।
नुसुगन्धेन हविषा यथाशक्त्या समाहितः ।।'
(**मतङ्गपारमेश्वरे** क्रियापादे १०.३०)

अग्निप्रदक्षिणं कृत्वा आचार्यं [1]तं विसर्जयेत् ।
[2]पूर्ववत्कृत एवोत्त[3]माचार्यत्वेन गण्यते ।।९७।।
[4]संवत्सरान्ते चैवोक्तमाचार्यं तु प्रवेशयेत् ।
[5]नित्यार्चने तु देवानां नित्यहोमे[6] तथैव च ।।
[7]समयविशेषनिर्वाणेष्वभिषेके[8] यथाक्रमम् ।।९८।।

इति श्रीमद्रौरवतन्त्रे क्रियापादे
आचार्याभिषेकविधिर्ना[9]माष्ट[10]चत्वारिंशः पटलः ।

---

[1] तं च वर्जयेत् — अ; तु वर्जयेत् — आ; तु विवर्जिताः — इ.
[2] पूर्ववत्तत्रमेवोक्त० — अ, आ, इ.
[3] ०माचार्यं तु निगण्यके — अ, इ; ०माचार्यं तु निगण्यते — आ.
[4] संवत्सरान्तमेवोक्त० — अ, आ, इ.
[5] नित्यार्चनं तु — अ, आ, इ.
[6] ०होमं — अ, आ, इ.
[7] समयं — अ, आ, इ.
[8] निर्वाणमभिषेकं — अ, आ; इ.
[9] 'आ, इ' मातृकयोः 'नाम' इति न दृश्यते।
[10] सप्तचत्वारिंशत्पटलः — अ, आ, इ.

एकोनपञ्चाशः पटलः

ग्रामदेवोत्सवविधिः

अतः परं प्रवक्ष्यामि ग्रामदेवोत्सवक्रमम्।

[1][ग्रामदेवताः, तासां स्थानानि च]

विघ्न[2]राजो गुहो विष्णुर्दुर्गा शास्तेति [3]पञ्चकम् ॥१॥
पञ्च [4]गोचरमूर्त्यादि शिववद्ग्रामदैवतम्[5]।

---

[1] ग्रामादौ देवतास्थानं वक्ष्ये सर्वं मनातनम्।
ब्रह्मस्थानस्य वायव्यां विष्णुस्थानं प्रकीर्तितम् ॥
वारुण्यां वास्तुनो ब्रह्मा सूत्रस्योत्तरदेशके।
ग्राममध्ये तदीशान्यामष्टदिक्षु शिवो मतः ॥
हरिहरयुतं वास्तु केवलेन हरेण वा।
अन्यत्सर्वं यथेष्टं स्यात्तेषां स्थानमिहोच्यते ॥
वारुण्यामिन्द्रकाष्ठायामिन्द्रेशानान्तरेऽथवा।
रविस्थानं भवेत्तत्र स्थानं वापि शचीपतेः ॥
वायव्यामिन्द्रकाष्ठायां याम्यकाग्नेयनैर्ऋते।
सुग्रीवे वारुणे वापि षण्मुखस्थानमीरितम् ॥
वारुण्यां नैर्ऋतावेन्द्रे शास्तुः स्थानं प्रकीर्तितम्।
वारुण्यां वाथ नैर्ऋत्यां वायुसोमान्तरेऽथवा ॥
अन्यत्र च गणेशस्य स्थानमुक्तमिहागमे।
यमे वा नैर्ऋते भागे वायव्यामिन्द्रमध्यमे ॥
नैर्ऋत्यन्तकयोर्वापि दुर्गास्थानं प्रकीर्तितम्।
वारुण्यां श्रीमरस्वत्योः स्थानमुक्तं शिवाश्रिताः ॥
ऐशान्यां सोमभागे वा तयोर्मध्ये तु मातरः।
आग्नेय्यां मोटिकास्थानं कामदेवस्य तत्र वै ॥
ज्येष्ठा पुष्करणीतीरे स्थाप्यान्यत्र बहिस्तु वा।
कामभास्करयोर्वास्तु षण्मुखस्थानमुच्यते ॥
षण्मुखस्य तु मातॄणां स्थानमन्यद्यथेप्सितम्।
सहस्रादधिके विप्रे मध्ये विष्णुगृहं तु वा ॥'
'ग्राममध्ये हरेः स्थानमुत्तमं परिकीर्तितम्।
पश्चिमे मध्यमं विद्यादधमं चान्यदेशके ॥'
(**पूर्वकामिके** २६.१–११; २१);
विघ्नराजस्थानविषये **अजिते** ४९.१५, १६ श्लोकौ तदीया टिप्पणी; **रौरवोत्तरे** ९.१उ० तदीया टिप्पणी च द्रष्टव्याः।
गुहस्थानविषये **अजिते** ५०.१४ श्लोकस्तदीय-टिप्पणी च द्रष्टव्यौ।
विष्णुस्थानविषये **रौरवे** क्रियापादे ३६.१–३ पू० श्लोकास्तदीयटिप्पणी; **रौरवोत्तरे** १३.१ उ० तदीयटिप्पणी च द्रष्टव्याः।
दुर्गास्थानविषये **अजिते** ५३.१६–१८ पू० श्लोकास्तदीयटिप्पणी; **रौरवोत्तरे** १३.१उ०, २ पू० श्लोकस्तदीयटिप्पणी च द्रष्टव्याः।;
'शास्तुश्च लक्षणं प्रोक्तं स्थापनं शृणु तत्त्वतः।
प्रासादे नैर्ऋते भागे ग्रामादीनां च नैर्ऋते ॥
अष्टदिक्षु च पूर्वादि तद्ग्रामस्य पराङ्मुखम्'।
प्रासादं कारयेद्धीमान्याजपृष्ठं विशेषतः ॥
अथवा मण्डलं[पं]वापि कर्तव्यम्'
(**सुप्रभेदे** क्रियापादे ५३.९–११ पू०);
'प्रासादे नैर्ऋते भागे ग्रामादीनां च **नैर्ऋते**।
अष्टदिक्षु च पूर्वादि तद्ग्रामस्य पराङ्मुखम्।
प्रासादं कारयेद्धीमान्'
(**पद्मसंहिता** टि.३४० पृ० १, २)

[2] ०राजं गुहं विष्कं दुर्गा — आ, इ.
[3] पञ्चसु — अ, आ, इ.
[4] ०गोपुर — आ, इ.
[5] ०देवताः — अ, आ, इ.

एकग्रामे भवेत्तस्मात्[1]स्थाने स्थाने विशेषतः ॥२॥

[दुर्गाविष्णवोर्हर्म्यम्]

शिवहर्म्याग्रके हर्म्ये [2]दुर्गायै विष्णवे च वै[3]।
[4]द्वारं शिवाग्रके [5]युक्तमन्तर्मण्डलमध्यके[6] ॥३॥
[7] तयोर्हर्म्यकयोर्मध्ये महामण्टपमाचरेत्।
[8] द्वारमेकं हि धाम्नो वा [9]द्वयं वा याम्यसौम्ययोः ॥४॥

[ध्वजस्थानं महोत्सवस्थानं च]

स्वस्वाग्रे [10]च ध्वजस्थानं [11]कलकेतुकभासुरम्।
वास्तुमङ्गलवीथ्यां च[12][13]तयोर्यानं महोत्सवे[14] ॥५॥
कृत्वा पीठं विशेषेण बाह्याभ्यन्तरयोस्तयोः।

[पञ्चगोचरमूर्तीनां धाम]

शिवस्थानस्य बाह्येषु पञ्चगोचरधाम तत् ॥६॥
भवेत्तत्स्थानं सर्वेषां [15]बाह्यभित्त्येकमाचरेत्।

[नित्योत्सवः]

स्वस्वहर्म्येषु बाह्येषु स्वस्वनित्योत्सवं चरेत् ॥७॥

---

[1] स्थानात्स्थान — अ, आ, इ.
[2] दुर्गा गां विष्णुमेव वा — अ, आ, इ.
[3] अत्र 'कल्पयेत्' इत्यध्याहृत्य व्याख्येयम्।
[4] यथा द्वारं शिवाग्रके युक्तं संबद्धं भवेत् तथा कर्तव्यमिति व्याख्येयम्। अत्र 'शिवाग्रद्वार-संयुक्तम्' इति पाठश्चेत्सुष्ठु।
[5] युक्ते अन्तर्मण्डलमध्ययोः — अ, आ, इ.
[6] अत्र 'कल्पितयोः' इति पदमध्याहृत्यान्वयः कार्यः।
[7] तयोर्मध्ये तयोर्मध्ये — अ, आ; तयोर्हर्म्ययोर्मध्ये — इ.
[8] द्वारमेकस्य धामे वा — अ, आ, इ.
[9] द्वयै वा — आ; द्वयो वा — इ.
[10] वा ध्वजस्थाने — अ, आ, इ.
[11] कलकेयूरभासुरे — अ; कलकेयूरभाररे — आ, कलकेयूरभारके — इ; कलो वृक्षविशेषो मत्स्यविशेषो वा। 'कलः सालवृक्षः इति राजनिघण्टुः'; 'शकुलमत्स्यः' इति हेमचन्द्रः' इति शब्दकल्पद्रुमे कलशब्दविवरणे।
[12] ०वीथ्येव — अ, आ, इ;
'राजवीथीति विख्याता ग्रामादेर्बहिरावृता।
सैव मङ्गलवीथीति रथवीथीति चोच्यते॥'
(पूर्वकामिके २५.२)
[13] तयोः दुर्गाविष्णवोः।
[14] तयोर्ध्यानं महोत्सवम् — अ; तयोर्यानमहोत्सवम् — आ, इ.
[15] बाह्ये भित्त्येक० — आ, इ; बाह्ये भित्तिरेका यस्मिन् इति व्यधिकरणबहुव्रीहिः।

[1]लङ्घयेत्स्थानयुग्मं वा त्रयं वापि चतुर्थकम् ।
[2]आहरेच्च बलिं बाह्ये तत्तद्देवबलिं क्षिपेत् ।।८।।

[महोत्सवस्थानम्]

वास्तुमङ्गल[3]वीथ्यां तु सर्वेषां वा महोत्सवम्[4] ।
[5]तद्बाह्ये केशवस्यापि तद्बाह्ये [6]दौर्गकं तथा ।।९।।
तद्बाह्ये विघ्नराजस्य तद्बाह्ये स्कन्दपीठकम्[7] ।
पञ्चगोचरमूर्तीनां [8]स्थानं तु बाह्यदेशके ।।१०।।
महामङ्गल[9]वीथ्यां च भवेत्तद्वास्तुवीथिका[10] ।
तस्माच्च सर्वदेवानां[11] [12]तस्यां चोत्सवमाचरेत् ।।११।।

[अन्यग्रामदेवानां स्वग्रामे महोत्सवकरणे दोषः]

अन्य[13]ग्रामस्थदेवानां [14]स्वग्रामे [15]चोत्सवं भवेत्[16] ।
तत्काले [17]चान्यकाले च [18]देवबुद्धिर्भवेत्तयोः[19] ।।१२।।
[20]तद्ग्रामयोर्भवेन्नाशः[21] स्थान[22]नाशो धनक्षयः ।
एकग्रामे [23]द्वयो राजा अर्धग्रामपतिर्भवेत् ।।१३।।
[24]ग्रामदेवद्वये चैव [25]ग्रामाणां तु [26]पतिर्भवेत् ।

---

[1] लङ्घने स्थान० — अ, आ, इ.
[2] आहारं च — अ, इ; अर्हारं च — आ.
[3] ०वीथ्येके — अ; वीथ्यां च — आ, इ.
[4] कुर्यादिति शेषः ।
[5] तद्बाह्ये च शिवस्यापि — अ; तद्बाह्ये च शिवस्या च — आ, इ.
[6] दुर्गायास्तथा — अ; दुर्गयान्तथा — आ, इ.
[7] अत्र शास्तृपीठप्रस्तावो भवितव्य इति भाति ।
[8] स्थानानां बाह्य० — अ, आ, इ.
[9] ०वीथ्या च — अ.
[10] ०वीथिके — आ, इ.
[11] तत्सर्वं देवतानां च — अ, आ; तत्र सर्वदेवतानां — इ.
[12] तस्मिन् — अ, आ, इ.
[13] ०ग्रामस्य — अ, आ, इ.
[14] तद्ग्रामे — अ, आ, इ.
[15] वोत्सवं — अ, आ.
[16] अत्र 'यदि' इति पदमध्याहृत्य व्याख्येयम्.
[17] चान्यकाले — अ, आ, इ.
[18] स्वग्रामदेवबुद्धिरित्यर्थः ।
[19] तयोः स्वग्रामान्यग्रामदेवयोः ।; ०बुद्धं भवेत्तयोः — आ, इ.
[20] तत् — तस्मात्कारणात् इत्यर्थः ।, ग्रामयोः – स्वग्रामान्यग्रामयोः; तयो ग्रामे — अ, आ, इ.
[21] नाशं — अ, आ, इ.
[22] ०नाशं धनक्षयम् — अ, आ, इ.
[23] द्वयोः – स्वग्रामान्यग्रामदेवयोः इत्यर्थः । अत्र 'उत्सवे सति' इत्यध्याहृत्य व्याख्येयम् ।
[24] स्वग्रामदेवद्वये इत्यर्थः । अत्रापि 'उत्सवे सति' इत्यध्याहृत्य व्याख्येयम् ।; ग्रामदेवो द्वयोश्चैव — अ, आ, इ.
[25] ग्रामा सन्तु — आ.
[26] प्रति प्रति — अ, आ, इ.

[१]सर्वैरन्यैः समायुक्तमतस्तत्र महीपतिः ॥१४॥
एकवीथ्यां [२]न वीथ्यां वा सर्वेषां चोत्सवं चरेत् ।
[३]न कर्तव्यो ममाप्यस्यां समाश्रित्य सदैवतम्[४] ॥१५॥
प्रियावहं ग्रामदेवे[५] [६]चरेदुत्सवमुत्तमम् ।
तस्मात् [७]प्राकार एके [८]वा स्वस्वप्रकारकेऽपि वा ॥१६॥

इति श्रीमद्रौरवतन्त्रे[९] क्रियापादे ग्रामदेवोत्सवविधि[१०]र्नाम
[११]एकोनपञ्चाशः पटलः ।

---

[१] सर्वमन्यत्समायुक्तमेतत्तत्र — अ, आ, इ.
[२] तु वीथ्येव — अ, इ; न वीथ्ये वा — आ.
[३] नृपं कर्तुममाप्यस्य — अ, इ; नृप कर्तु ममोप्य स्वा — आ.
[४] सदेवतः — अ, आ, इ; अन्यदेवताभिः सहितम् इत्यर्थः ।
[५] ०देवां — अ, आ, इ.
[६] चरेवोत्सव० — आ.
[७] प्राकारमेके — अ, आ, इ.
[८] च — इ.
[९] 'इ' मातृकायां 'तन्त्रे' इत्यस्यानन्तरं 'महोत्सव-तन्त्रे' इत्यधिकं दृश्यते ।
[१०] 'इ' मातृकायां 'नाम' इति न दृश्यते ।
[११] अष्टचत्वारिंशत्पटलः — अ, आ, इ.

पञ्चाशः पटलः

[1] नवरात्रपूजाविधिः

अथातः संप्रवक्ष्यामि [2]नवरात्रप्रपूजनम् ।

[3][नवरात्रपूजाकालः]

आर्द्रायां मासि कन्यायां[4] कृष्णपक्षे तु पूजयेत् ॥१॥

[5][नवरात्रपूजनम्]

[6]आरभ्य प्रथमायास्तु नवरात्रं[7] प्रपूजयेत् ।
तद्दिने यजमानस्य[8] उपवासं तु कारयेत् ॥२॥
रक्षाबन्धनकं कर्म[9] [10]देशिकः कारयेद्बुधः[11] ।

---

[1] अयं पटलः (टि. ३४८) ३६९–३७२ पृष्ठेषु दृश्यते ।; एतद्विषये **उत्तरकामिके** ७७; **पूर्वकारणे** १२७ पटलौ द्रष्टव्यौ ।

[2] नवरात्रि प्रपूजयेत् — ई.

[3] 'कन्यां गते सवितरि शुक्लपक्षेऽष्टमीयुता ।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता ॥
आश्वयुक्शुक्लपक्षे वा अष्टमी मूलसंयुता ।
सा महानवमी नाम्ना त्रैलोक्येऽतिसुदुर्लभा ॥
अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ।
पूजयित्वाश्वयुङ्मासि विशोको जयति द्विषः ॥'
(**उत्तरकामिके** ७७.२–४);
'**अथातः संप्रवक्ष्यामि नवरात्रिविधिक्रमम् ।**
आश्वयुक्शुक्लपक्षे तु प्रतिपन्नवम्यन्तके ॥
प्रतिपद्दिनमारभ्य व्रतोत्सवमथाचरेत् ।'
(**पूर्वकारणे** १२७.१, २ पू०);
'कृत्यतत्त्वार्णवे लैङ्गे —
कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेऽपि वा ।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः ॥'
(**निर्णयसिन्धौ** पृ० १२६)

[4] आर्द्राया मासकर्म तु — ई.

[5] 'देव्यग्रे दक्षिणे वापि मण्टपे समलंकृते ।
ऐशान्ये चोत्तरे वापि लक्ष्मीं दुर्गां च भारतीम् ॥
गौरीमिमायमन्त्रेण बद्ध्वा प्रतिसरं बुधः ।
नानाशक्त्यादिसंयुक्तं नानायुधादिसंयुतम् ॥
प्रथमादि नवम्यन्तं दिनं प्रति प्रपूजयेत् ।
तथा तद्दिनमारभ्य नानाशक्तिजपं बुधः ॥
मूलदेव्यग्रके वापि अन्ये च मण्डपादिके ।
अलंकृत्य च देव्याश्च विनोदालोकनं नयेत् ॥
यथावित्तानुसारेण **नवनैवेद्यमेव च ।**
धूपदीपोपचारैश्च मन्त्रपुष्पाणि दापयेत् ॥
इष्टकाम्यार्थसिद्ध्यर्थं जनान्सर्वान्प्रदर्शयेत् ।
होमकार्यं द्विकालं च रात्र्यां **चोत्सवमाचरेत् ।**'
(**पूर्वकारणे** १२७.२ उ०–८ पू०)

[6] आरम्भं प्रथमायां तु — ई.

[7] नवरात्रि — ई.

[8] यजमानं तु — ई.

[9] ०बन्धनकर्म तु — ई.

[10] देशिकं — ई.

[11] ०येद्बुधा — ई.

दुर्गां च[1] मध्यमे स्थाप्य वामपार्श्वे सरस्वतीम्[2] ॥३॥
महालक्ष्मीं तु संस्थाप्य[3] दक्षिणे तु प्रपूजयेत्।
नवरात्रं[4] प्रपूज्याथ [5]पायसान्नं निवेदयेत् ॥४॥

[6][उत्सवः]

[7]यानं [8]चेदं समाख्यातं [9]दुर्गायास्तु प्रपूजनं।
नवरात्रे[10] च यानं च[11] तद्वैवं दौर्गयानकम्[12] ॥५॥
आलयात्तु[13] समाश्रित्य यानं [14]वाद्यैः क्रमेण च।

[रक्षासूत्रबन्धनम्]

नदीतटाक[15]कूले च समुद्रे [16]पूर्वदेशके ॥६॥
देवस्याग्रे विशेषेण किंचिदैशान्यकोणके।
वह्निवृक्षसमासन्ने[17] रक्षासूत्रं तु कारयेत् ॥७॥

[मण्टपपूजा]

षोडशस्तम्भसंयुक्तं मण्डपं कारयेद्बुधः[18]।

---

[1] दुर्गायां — ई.
[2] सरस्वती — ई.
[3] संपूज्य — ई.
[4] ०रात्रि — ई.
[5] **रौरवोत्तरे** ९.३७ पू० टिप्पणी द्रष्टव्या।
[6] नवरात्र्युत्सवः —
'यागकर्मावसाने तु यानं सम्यक्समाचरेत्।
वीथीसंमार्जनं पूर्वं प्रोक्षणं च द्वितीयकम् ॥
पताकाद्यैस्तृतीयं तु यन्त्राद्यैश्च चतुर्थकम्।
उत्सवेशीमलंकृत्य वीरशक्ति स्वतन्त्रिणीम्।
सर्वालंकारसंयुक्तं वाद्यघोषसमन्वितम्।
शनैः प्रदक्षिणं कृत्वा नानालीलासमन्वितम् ॥
सर्वत्रोज्ज्वलदीपाश्च नानाजातिसमाकुलम् ॥
यानान्ते परिवेषं च सुरवृन्दैश्च सेवितम् ॥'
घटदीपादि —
'शिवधामबहिस्थाने कुम्भादिं दीपमावृतौ।
रुद्रकन्यासमायुक्तं त्रिःप्रदक्षिणमाचरेत् ॥
आलये तु प्रदक्षिण्यां धर्मप्रदक्षिणं कुरु।
कल्याणमण्टपे स्थित्वा नैवेद्यं दापयेद्गुरुः ॥
धूपदीपं च आरात्रिं ताम्बूलं गिरिजां कुरु।
वीणावेणुस्वनाद्यैश्च नृत्तगीतसमाकुलैः ॥
पिञ्छचामरसंयुक्तैर्व्यजनैस्तालवृन्तकैः।
अनेकैरुपचारैश्च तोषयेत्परमेश्वरीम् ॥
एवं क्रमेण कर्तव्यं नवम्यन्तं दिनं प्रति।'
अघोरशिवाचार्यपद्धतौ महानवमीपूजाविधौ ॥
(पृ० ७६, ७७)
[7] यानप्रतिपादकग्रन्थः पूर्वं न निर्दिष्टः।
[8] वेदसमा० — ई.
[9] दुर्गायां तु प्रपूजयेत् — ई.
[10] ०रात्रौ — ई.
[11] वा तद्वेवं — ई.
[12] दुर्गयानकम् — ई.
[13] आलयानां — ई.
[14] वा चक्रमेव च — ई.
[15] ०कुम्भे च — ई.
[16] पर्व० — ई.
[17] ०समासाने — ई.
[18] ०द्रुधा — ई.

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥८॥
वास्तुहोमं [१]समाप्याथ पर्यग्निकरणं कुरु।
शान्तिहोमं समाकुर्यात्पूर्वोक्तं प्रोक्षयेद्बुधः ॥९॥
चतुर्द्वारं प्रपूज्याथ अर्चनं पूर्ववद्बुधः[२] ।
[३] मण्डपं समलंकृत्य नानापुष्पोपशोभितम् ॥१०॥
लिकुचैर्नालिकेरैश्च नागवल्लीदलैरपि।
[४] क्रमुकैः पूगपुष्पैश्च केतकीशतपत्रकैः ॥११॥

[५] [दशमदिनोत्सवः]

दशरात्रे[६] तु यानं वा; प्रातःकालमथाचरेत्।
उमासहितमूर्तीनां यानकर्म विशेषतः ॥१२॥
[७]नानावाद्यसमायुक्तं नानालीलासमन्वितम्।
नानाच्छत्रसमायुक्तं नानापिञ्छसमन्वितम् ॥१३॥
नानाभक्तसमायुक्तं नानाजात्यैस्तु[८] संयुतम्।
भूपतीनां विशेषेण गजवाहनमाचरेत्[९] ॥१४॥
देवानां शिबिकोर्ध्वे तु अथवा अश्ववाहनम्।
[१०] देवेन सह देवीं तु [११]आसीनां वामभागके[१२] ॥१५॥

---

[१] समभ्यर्च्य — ई.
[२] ०द्बुधाः — ई.
[३] मण्डपानामलंकृत्य — ई.
[४] कमुखैः — ई.
[५] 'राजराष्ट्राभिवृद्ध्यर्थं दशम्यां पूजयेच्छमीम्।
तद्दिने च प्रभाते वा सायाह्ने वार्चयेच्छमीम् ॥
उत्तरे चैव पूर्वे वा शमीमण्टपसंस्थिते।
शमीधाम ह्यलंकृत्य चतुर्द्वारसमन्वितम् ॥
वितानैस्तोरणैर्भूष्य नानालंकारसंयुतम्।
इन्दुशेखरमूर्तिं च तुरगारूढयेद्बुधः ॥
नानालंकारसंयुक्तं नानाभक्तजनैः सह।
शमीस्थानं प्रविश्याथ पुण्याहं वाचयेत्ततः ॥
खड्गखेटौ च चापं च स्थापयेत्तु शमीं सह।
शमीपूजाप्रकारेण आसनादीन्प्रपूजयेत् ॥
तत्पश्चाच्छमिमूले तु कालरात्रिं च काल्यकैः।
यमं च यमदूतैश्च ब्राह्म्याद्यैः सप्तमातृकैः ॥
महालक्ष्मीं समभ्यर्च्य शमीमूलेन पूजयेत्।
अस्त्रमन्त्रेण संपूज्य नैवेद्यं धूपदीपकैः ॥
शमी शत्रुविनाशाय शमी पापप्रणाशिनी।
शमी संपत्करी चैव शमी चैव नमो नमः ॥
शक्त्या दानादिकं दद्याद्ब्राह्मणे वेदपारगे।
ग्रामकर्तृनृपैश्चैव सोष्णीषः सुप्रसन्नवान् ॥
चतुर्दिक्षु चतुर्वर्णान्नामयेच्चैव बुद्धिमान्।
शम्भोर्नीराजनं दद्यात्तथा दुष्टमृगं हरेत् ॥
ततो देवालयं गच्छेत्स पुण्यां गतिमाप्नुयात्।'
(**पूर्वकारणे**, १२७.१५ उ०–२५)
[६] दशरात्रि — ई.
[७] नानाविद्या० — ई.
[८] ०जाति तु — ई.
[९] ०मारभेत् — ई.
[१०] देविकं हस्तदेवं तु — ई.
[११] आसीनं — ई.
[१२] ०भागकम् — ई.

नानालंकारसंयुक्त[१]माचार्यः पञ्चभूषणः।
याने देवौ[२] समारोप्य [३]मण्टपे तु विशेषतः ॥१६॥
[४]वेदिकायां तु संस्थाप्य [५]देवदेव्यौ विशेषतः।
[६]नवकैरभिषिच्याथ [७]पायसं च निवेदयेत् ॥१७॥
[८]अन्नपञ्चकसंयुक्त[९]मपूपपञ्चविंशति।
[१०]व्यञ्जनैः पञ्चविंशैश्च देवदेव्यौ[११] प्रपूजयेत् ॥१८॥
देवाग्रे तु विशेषेण नानावाद्यसमन्वितम्।
नानालीलासमायुक्तं भरतोक्तक्रमेण तु ॥१९॥

[यज्ञवृक्षपूजनम्]

[१२]देवदेव्यौ तु संग्राह्य यज्ञवृक्षमथापि च।
पश्चिमे स्थानकं कृत्वा पूर्वद्वारे [१३]समारभेत् ॥२०॥
[१४]देशिको वाथ [१५]शिष्यो वा यज्ञवृक्षं प्रपूजयेत्।
अभिषिच्य ततो मन्त्री यज्ञ[१६]मन्त्रसमन्वितः ॥२१॥
गन्धपुष्पं समभ्यर्च्य अर्चनं तु विशेषतः।
अर्चनोक्तक्रमेणैव [१७]दशायुधान्समर्चयेत् ॥२२॥
मूलमन्त्रं तु संयोज्य[१८] नाममन्त्रं समाचरेत्।

[युद्धयात्रा]

[१९]देशिकस्त्वथ दैवज्ञो ह्यायुधानि[२०] तु संग्रहेत् ॥२३॥
वह्नि[२१]वृक्षे तु युद्धं च[२२] चतुर्द्वारे तु युद्धके[२३]।

---

[१] ०माचर्यं पञ्चभूषितम् — ई.
[२] यानदेवं — ई.
[३] मण्टपं तु — ई.
[४] देविकाले तु — ई.
[५] देवाग्रं — ई.
[६] नवकालेरभि — ई.
[७] **रौरवोत्तरे** ९.३७ पू० टिप्पणीं पश्यत।
[८] अन्नानं पञ्चसंयुक्तं — ई; 'अन्नपञ्चकम्' **अजिते** २२.१०४ उ०–११० पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।
[९] ०मपूपं पञ्च — ई.
[१०] व्यञ्जनं — ई.
[११] देवदेवीं — ई.
[१२] देवदेवीं — ई.
[१३] तु मारभेत् — ई.
[१४] देशिकं — ई.
[१५] शिष्यं — ई.
[१६] मन्त्रं समानताः — ई.
[१७] दशायुधसमा बुधाः — ई.
[१८] संयोज्याथ — ई.
[१९] देशिकं त्वथ — ई.
[२०] दैवज्ञमायुधानां — ई.
[२१] ०वृक्षं — ई.
[२२] वा — ई.
[२३] ०द्वारं तु युद्धिकम् — ई.

[1]धनुःसूत्रं तु संग्राह्य देवहस्ते[2] तु योजयेत् ॥२४॥
आचार्यो[3] यज्ञवृक्षं [4]च देवदेव्यौ च संग्रहेत् ।
दिग्विदिक्षु च विन्यस्य चतु[5]र्द्वारे तु चास्त्रकम् ॥२५॥
नानाभक्तांस्तु[6] संग्राह्य भूपतींस्तु[7] विशेषतः ।
नानाजात्यांस्तु[8] संग्राह्य महापापं विसर्जयेत् ॥२६॥
[9]देवदेव्यौ समे याने आलयं तु प्रवेशयेत् ।
नानावाद्यसमायुक्तं गणिका नृत्तमाचरेत् ॥२७॥
[10] देवदेव्यौ तु [11]तत्स्थाने तिथ्यन्तं तु समर्चयेत् ।

[सरस्वतीपूजा]

सरस्वतीं प्रपूज्याथ धूप[12]दीपैर्विशेषतः ॥२८॥
नानायुधांस्तु[13] संग्राह्य धारयेत्तु विशेषतः ।
नानादोष[14]शमं कुर्यान्नानादोषो न विद्यते ॥२९॥
क्रियाः संपूर्णतः[15] कुर्यात् क्रियादोषो[16] न विद्यते ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥३०॥

इति रौरवाख्ये महातन्त्रे क्रियापादे नव[17]रात्रपूजाविधिः
पञ्चाशः पटलः ।

---

[1] धनुसूनां — ई.
[2] ०हस्तं — ई.
[3] आचार्य — ई.
[4] तु देवदेवीं तु संग्रहे — ई.
[5] ०द्वारं तु अस्त्रकम् — ई.
[6] ०भक्तं तु — ई.
[7] भूपतीनां — ई.
[8] नानाजाति — ई.
[9] देवदेवीं समायानं — ई.
[10] देवं देवीं तु — ई.
[11] तस्था तिथ्यन्ते तु समा बुधाः — ई.
[12] ०दीपं विशेषतः — ई.
[13] ०युधां तु — ई.
[14] ०समं कृत्वा नानादोषं — ई.
[15] क्रिया संपूज्य तत् — ई.
[16] ०दोषं — ई.
[17] ०रात्रिपूजा — ई.

एकपञ्चाशः पटलः

[1] क्षेत्रपालस्थापनविधिः

[2]अतः परं प्रवक्ष्यामि क्षेत्रपालविधिक्रमम्।

[रुरुरुवाच —]

क्षेत्रपालस्य[3] मन्त्रं च मुद्राः स्थापनमेव च ॥१॥
पूजनं चोत्सवं स्नानं [4]वदात्र भुवनेश्वर[5]।

ईश्वर उवाच —

[6][क्षेत्रपालमन्त्रः]

ळान्तं [7]तु क्षेत्रपालस्य[8] [9]बीजं षष्ठस्वरान्वितम् ॥२॥

---

[1] अयं पटलः आर्.इ. १९०२९.८९–९१ पत्रेषु; आर्. इ. २६३१३.१८४–१८६ पत्रेषु; आर्. इ.२९३९९.२६३–२६५ पत्रेषु; टि.१०२४. ३८१–३८६ पत्रेषु; टि. १३५.१–८ पत्रेषु च दृश्यते।; एतद्विषये **पूर्वकारणे** १०३; **उत्तरकारणे** ७०; **दीप्ते** ७३; **मकुटे** (टि. १८) ७; **सुप्रभेदे** क्रियापादे ५०; **सूक्ष्मे** ९१ पटला द्रष्टव्याः।

[2] ततः — उ.

[3] पालं च — उ, ऊ, ऋ, ॠ

[4] वदस्व — उ; विधातृ — ऊ, ऋ.

[5] भुवनेश्वरम् – ॠ.

[6] 'क्षवर्णः क्षेत्रपालानामूर्ध्वबिन्दुविभूषितः।
क्षेत्रपालानां क्षवर्णः क्षकारः ऊर्ध्वबिन्दुभूषितः सानुस्वारः।
(**मृगेन्द्रे** क्रियापादे ८ पू० तदीयवृत्तिश्च);
क्षेत्रपालमन्त्रः —
ओं हां क्षं क्षौ क्षेत्रपालाय नमः।'
(**कालागमप्रायश्चित्ते** (टि. १४४) पृ० ३९९);
'ब्रह्माणि ह्रस्वाः प्रोक्तानि दीर्घा ह्यङ्गानि षण्मुख।
अनुस्वारो भवेन्नेत्रं सर्वेषां चोपरि स्थितः॥
सविसर्गं भवेदस्त्रमनुस्वारविवर्जितम्।'
(**सार्धत्रिंशतिकालोत्तरे** १.९ उ०, १०);
'अस्त्रं विसर्गसंयुक्तमन्ये बिन्दुसमायुताः।'
'दीर्घाणि ह्यङ्गमेवं स्यात्षडङ्गाश्चैव कीर्तिताः।
अस्त्रं विसर्गसंयुक्तं ह्रस्वा वै ब्रह्मपञ्चकम्॥'
(**सुप्रभेदे** क्रियापादे ३.२६ उ०; १९३);
'हृदय च शिरश्चैव शिखा कवचमेव च।
नेत्रमस्त्रं षडङ्गानि कीर्तितानि क्रमेण तु॥
हृदादिनेत्रपर्यन्तं बिन्दुयुक्ताः प्रकीर्तिताः।
अस्त्रं विसर्गसंयुक्तं जातिषट्कसमन्वितम्॥
नमः स्वाहा वषड् वौषड् हुं फट्कारः क्रमेण तु।
एते वै जातिषट्काश्च हृदाद्यस्त्रान्तकैर्युताः।'
(**पूर्वकारणे** (टि. ३१३) २.२४ उ०–२७ पू०);
'दीर्घमङ्गचतुष्टयम्।
सविसर्गं भवेदस्त्रं नेत्रं बिन्दुयुतं भवेत्॥'
(**किरणे** क्रियापादे १३.८.)

[7] च — ऊ, ॠ, ॡ.

[8] ०पालं स्यात् — ऊ, ॠ, ॡ.

[9] बीजषष्ठ — ॠ, ॡ.

[1] त्रयोदशान्तसंयुक्तं बिन्दुनादसमन्वितम् ।
[2] मूलमन्त्रमिदं प्रोक्तं तस्मिन्नङ्गानि कल्पयेत् ॥३॥
पञ्चाङ्गं ह्रस्वसंयुक्तं [3] दीर्घाङ्गानि प्रकल्पयेत् ।
नमःस्वाहावषड्वौषड्हुंफट्कारसमन्वितम् ॥४॥
बिन्दुनादसमायुक्तं [4] विसर्गान्तास्त्रविन्यसेत्[5] ।
सर्वेषां [6] च क्रमात्तत्र [7] अस्त्रे विसर्ग उच्यते ॥५॥
दिवाकरे तु पूर्वे तु [8] सर्वमन्त्रान्प्रयोजयेत् ।
[9] एवं मन्त्रं समाख्यातम्'

[10] [मुद्राः]

[11] मुद्रायामधुनोच्यते ॥६॥
पद्मं शूलं च मुकुलं निष्ठुरं शङ्ख्योनिके[12] ।
[13] मन्त्रान्ते मुद्रया [14] कार्यं विनियोगं प्रयोजयेत् ॥७॥

[15] [क्षेत्रपालरूपम्]

त्र्यक्षमष्टभुजं रौद्रमूर्ध्वकेशं सुदंष्ट्रकम् ।

---

[1] त्रयोदशं च सं — ऊ, ऋ, ॠ.
[2] 'ऊ, ऋ, ॠ' कोशेषु '३' उत्तरार्धं '४' पूर्वार्धं च न स्तः ।
[3] दीपान्यङ्गं — उ.
[4] विन्दुयुग्मं भवेन्नेत्रं — उ.
[5] विसर्गान्तमसं न्यसेत् — ऊ, ऋ, ॠ.
[6] चैवानुस्वारमन्त्रं विसर्गमुच्यते — उ.
[7] अस्त्रं विसर्गमुच्यते — ऊ, ऋ, ॠ.
[8] सर्वमन्त्राः प्र० — उ; सर्वमन्त्रं प्र० — ऊ, ऋ, ॠ.
[9] महामन्त्रमिति ख्यातं — ऊ, ऋ, ॠ.
[10] 'पद्मं शूलं च मुकुलं निष्ठुरं योनिशङ्खजम् [कम्] ।
मन्त्रान्ते मुद्राकार्यं वा विनियोगं प्रपूजयेत् ॥'
(**पूर्वकारणे** १०३.२७)
[11] मुद्रालक्षणमुच्यते — ऊ, ऋ, ॠ.
[12] शङ्ख्योजयेत् — उ, ऊ, ऋ, ॠ.
[13] मन्त्रान्तं — उ.
[14] कार्यविनि० — उ.
[15] 'क्षेत्रपालाकृतिं शृणु ।
रक्त उग्रेक्षणः कालो मेघवर्णो महाबलः ॥
द्विबाहुर्वा चतुर्बाहुरष्टबाहुरथापि वा ।
कपालशूलो द्विभुजो घण्टापाशसमायुतः ॥
चतुर्बाहुः क्रमात्क्षेत्रपालो वामे च दक्षिणे ।
अग्निटङ्कौ च खट्वाङ्गाभयमष्टभुजे क्रमात् ॥
रक्तपद्मासनारूढः श्यामवर्णोग्ररूपकः ।
विसृतोर्ध्वारक्तकेशः कुञ्चितभ्रूसविभ्रमः ॥
नग्नरूपः शिरोमालाभूषितस्तीक्ष्णदंष्ट्रकः ।'
(**पूर्वकारणे** १३.९७–१०१ पू०);
'त्र्यक्षमष्टभुजं रौद्रमूर्ध्वकेशं [सुदंष्ट्र] कम् ।
रौद्रदृष्टिं च कृष्णाङ्गं बालेन्दुकृतशेखरम् ॥
नागं चैव तु धुत्तूरं नागयज्ञोपवीतकम् ।
संयुक्तं कर्णयोः पत्रं वृत्तमकरसंयुतम् ॥
शूलं डमरुकं खड्गं पिनाकं दक्षिणे करे ।

रौद्रदृष्टिं च[1] [2]कृष्णाभं [3]बालेन्दुकृतशेखरम् ॥८॥
[4]नरशिरं च [5]धुत्तूरं [6]नागास्यैश्च सुसंयुतम् ।
कर्णयोः पत्रपिण्डं तु ततो मकरकुण्डलम् ॥९॥
खट्वाङ्गं च भुजङ्गं च [7]पाशं शूलं च दक्षिणे ।
[8]कपालं डमरुं [9]खड्गमग्निं वामे च हस्तके ॥१०॥
सर्वाभरणसंयुक्तं [10]शिरोमालासमन्वितम् ।
[11]नग्नमह्याम्बरैर्युक्तं किङ्किणी[12]वरसंयुतम् ॥११॥
[13]नूपुरं यज्ञसूत्रं च [14]पादे किङ्किणिसंयुतम् ।
प्रभामण्डलसंयुक्तं [15]मृण्मयं [16]परिकल्पयेत् ॥१२॥

[17][क्षेत्रपालस्थापनयोग्यस्थानम्]

[18]ग्रामे पूर्वे तथैशान्यां वने [19]खेटकपत्तने ।

कपालं पाशखेटं च बाणं वामकरे ततः ॥
सर्वाभरणसंयुक्तं शिरं वै शिरमालया ।
नग्नं नागाम्बरैर्युक्तं किङ्किणीमालया सह ॥
नूपुरं यज्ञसूत्रं च पादे किङ्किणिशोभितम् ।
प्रभामण्डलसंयुक्तं भद्रपीठोपरि स्थितम् ॥
श्वानयुक्तमयुक्तं वा श्यामरक्तान्धकारभाक्
एवं वै क्षेत्रपालं तु'
(सूक्ष्मे ९१.१९ उ०–२५ पू०);
एतद्विषये पुनः **अजिते** ३६.३१४ उ०–३१८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[1] तु — उ, ऋ.
[2] कृष्णाङ्गं — ऊ, ऋ, ॠ.
[3] फालान्तकृत० — ऊ; फालं तु कृत० — ऋ; फालान्तु कृत० — ॠ.
[4] नराशिरं — ऊ, ऋ, ॠ; 'शिरः'शब्दस्याकारान्ते प्रयोगः ।
[5] धुर्धूरं — उ, ऊ, ऋ; धुद्धूरं — ॠ.
[6] नागास्मिश्च — उ, ऊ; नागस्मिश्च — ऋ, ॠ.
[7] पाशशूलं — ऊ, ऋ, ॠ.
[8] कपालडमरुं — उ; कपालडमरुकं — ॠ.
[9] खड्गमसीनां वामहस्तके — उ; खड्गं वामे च हस्तके — ऊ, ऋ; खड्गं दक्षिणे वामे च — ॠ.
[10] शिरं वैरे तु मालया — उ.
[11] नग्नाभमपरै० — उ; नग्नाभमम्बरै० — ऊ, ऋ, ॠ.
[12] ०रवसंयुतम् — ऊ, ऋ, ॠ.
[13] नपुरं — ऊ.
[14] पदे — उ.
[15] मृण्मयीं — ऊ, ऋ, ॠ; उत्तरत्र बिम्बस्य जलाधिवासग्रामप्रदक्षिणयोर्वर्णितत्वाद् मृण्मयबिम्बस्यागमान्तरेषु जलाधिवासग्रामप्रदक्षिणयोर्निषिद्धत्वादत्र मृण्मयमिति न युज्यते। अतो यदि मृण्मयं बिम्बं तदा प्रभामण्डलसंयुक्तमिति व्याख्येयमिति भाति ।
[16] रूपकल्पयेत् — ऋ.
[17] 'ग्रामादावैशदिग्भागे लोकरक्षार्थकारणम् ।
प्रासादं प्रतिमां तत्र पूर्वोक्तविधिना तथा ॥
द्वारं तु पश्चिमे मुख्यं दक्षिणे मध्यमं स्मृतम् ।
कन्यसं चेन्द्रदिग्द्वारम्'
(सुप्रभेदे क्रियापादे ५०.१ उ०–३ पू०);
'द्वारं तु पश्चिमे मुख्यं दक्षिणे मध्यमं स्मृतम् ।
कन्यसं चेन्द्रके द्वारमैशान्यां स्थानमुत्तमम् ॥'
'ग्रामेषु नगरे चैव पत्तने राजधानिके ।
चत्वरेषु श्मशानेषु समुद्रे गजपादिनम् (जनपदे तथा ?) ॥

नदीतीरे तथा क्षेत्रे [1]आलयैशान[2]भागके ॥१३॥
[3]पञ्चहस्तं त्रिहस्तं वा आलयं सममण्डलम् ।

[4][मण्डपस्तत्र कुण्डकल्पनं च]

आलयस्याग्रतः कुर्यात्सप्तहस्तं तु मण्टपम् ॥१४॥
षोडशस्तम्भसंयुक्तं द्वारतोरण[5]भूषितम् ।
चतुस्तोरणसंयुक्तं चतुर्द्वारसमायुतम्[6] ॥१५॥
वितानध्वजसंयुक्तं मुक्तादामैरलंकृतम् ।
मण्टपं तु त्रिधा भज्य मध्ये [7]वेदीं प्रकल्पयेत् ॥१६॥
तालमात्रोदयां[8] कृत्वा गोमयेनोपलिप्य च[9] ।
पूर्वे तु चतुरश्रं [10]तु दक्षिणे वृत्तकुण्डकम् ॥१७॥
पश्चिमे पञ्चकोणं [11]चाप्युत्तरे तु त्रिकोणकम् ।
[12]त्रिमेखलासमायुक्तमेकमेखलमेव वा[13] ॥१८॥

देवालये गुरुगृहे विमाने पुण्यदेशके ।
आरण्ये पर्वताकारे नद्यादिषु तटाकके ॥
एतेषां स्थानमेवोक्तमन्येषु स्थापनं नयेत् ।
देवस्याभिमुखं पूर्वमैशान्यां क्षेत्रपालकम् ॥
दक्षिणाभिमुखे देवे क्षेत्रेशं वायुदेशके ।
देवस्य पश्चिमद्वारे चाग्नेय्यां क्षेत्रपालकम् ॥
उत्तराभिमुखे देवे क्षेत्रेशानं तु नैर्ऋते ।
एतत्स्थानं प्रकर्तव्यमन्येषु स्थाननाशनम् ॥
प्रमादाद्दिक्षु संस्थाप्य यजमानराष्ट्रनाशनम् ।'
(**पूर्वकारणे** १०३.१३ उ०, १४ पू०; ५९–६४ पू०)

[14] 'ऋ' मातृकायां १३–१६ श्लोका न दृश्यन्ते ।; ग्रामपूर्वे — उ.

[15] कटकरूपयोः — उ.

[1] आलयेशान० — उ.

[2] ०गोचरे — ऋ.

[3] इदमर्धं 'ऊ, ऋ' कोशयोर्न दृश्यते ।

[4] 'हर्म्याग्रे मण्डपं कुर्यादष्टहस्तप्रमाणतः ।
कलास्तम्भसमायुक्तं ध्वजतोरणसंयुतम् ॥
तन्मध्ये वेदिकां कुर्यात्तत्त्रिभागैकभागतः ।
रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभाम् ॥
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात् ।
इन्द्रादिषु चतुर्दिक्षु वेदाश्रं कारयेद्बुधः ॥
वृत्तकुण्डमथैशान्यां प्रधानं कल्पयेद्बुधः ॥
मण्डपस्योत्तरे पार्श्वे स्नानश्चभ्रं प्रकल्पयेत् ।
उद्वास्य शिल्पिनं पश्चाद्गोमयेन तु लेपयेत् ॥
[मण्टपे मार्जनं] कृत्वा भूसुरान्भोजयेत्ततः ।
गोमयालेपनं कृत्वा पुण्याहं वाचयेत्ततः ॥'
(टि० २८९.८१, ८२ पृष्ठयोः 'कारणे' इति निर्दिश्यैते श्लोकाः दृश्यन्ते ।);
'षोडशस्तम्भसंयुक्तं यागशालां प्रकल्पयेत् ।
मध्ये वेदिं प्रकल्प्याथ दर्पणोदरसंनिभाम् ॥
पूर्वाद्यष्टदिशास्वेव पूर्ववत्कुण्डमुच्यते ।
इन्द्रईशानयोर्मध्ये वृत्तकुण्डं प्रकीर्तितम् ॥'
(**उत्तरकारणे** ७०.२ उ० – ४ पू०)

[5] ०र्भषितम् — ऊ.

[6] ०समन्वितम् — ऊ, ऋ.

[7] वेदिं — ऊ.

[8] ०मात्रोदयं — उ, ऊ, ऋ, ॠ.

[9] गोमयेनैव लिप्यते — उ, ऋ; ०लिप्यते — ऊ, ॠ.

[10] वा — उ.

[11] तु उत्तरे — उ, ऊ, ऋ, ॠ.

[12] त्रिमेखलसमा — उ, ऊ, ऋ.

[13] च — ऊ.

नाभियोनिसमायुक्तं [1]मध्ये [2]पद्मसमायुतम् ।

[मण्डपसंस्कारः]

पुण्याहं वाचयेत्तत्र ब्राह्मणान्भोजयेत्ततः ॥१९॥
शोषणं [3]प्लावनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
[4]प्रोक्षयेद्धृदयेनैव सर्वत्र सकुशोदकैः ॥२०॥

[5][रत्नन्यासः]

रत्नन्यासं ततः [6]कुर्याद्धृदयेन तु मन्त्रतः ।

[7][नयनोन्मीलनम्]

[8] नयनोन्मीलनं कुर्यान्नेत्रमन्त्रं तु[9] विन्यसेत् ॥२१॥
सवत्सां [10]गां [11]हृदा चैव [12]घृतं मधु पयो हृदा ।
ब्राह्मणान्पञ्चमेनाथ [13]सर्वाश्चैव हृदा [14]बुधः ॥२२॥
दर्शयेद्बीजमुख्येन शुद्धिं कृत्वा [15]सकृत्पुनः ।
[16] सक्तुतोयमृदा भस्मबिल्व[17]पत्रैस्तु क्षालयेत् ॥२३॥

[18][ग्रामप्रदक्षिणं जलाधिवासश्च]

ग्रामप्रदक्षिणं कृत्वा पञ्चब्रह्म समुच्चरन् ।

---

[1] मध्यपद्म० — ऋ.
[2] पद्मं समा० — ऋ.
[3] पचनं — उ.
[4] प्रोक्षयेदस्त्रमन्त्रेण हृदयेन कुशो — ऊ, ऋ.
[5] 'चलस्थापनवत्कृत्वा रत्नन्यासादिपूर्वकम् ।
क्षेत्रपालं स्वमन्त्रेण प्रतिष्ठां सम्यगाचरेत् ॥'
(**सुप्रभेदे** क्रियापादे ५०.९उ०, १०पू०)
[6] कृत्वा हृदयेनैव — ऊ, ऋ, ॠ.
[7] 'नयनोन्मीलनं कुरु ॥
हेमसूच्या लिखेत्पक्ष्मरेखां वै कृष्णमण्डलम् ।
मधुना तर्पयित्वा तु कुर्याद्गव्याभिषेचनम् ॥'
(टि. २८९. ८१ पृष्ठे 'कारणे' इति निर्दिश्योद्धृतः)
[8] नयनं मोक्षणं — ऊ, ऋ, ॠ.
[9] नेत्रमन्त्रेण — ऋ.
[10] 'ऊ, ऋ, ॠ' मातृकासु 'गां' इति न दृश्यते ।
[11] हृदेनैव — उ; हृदयेनैव — ऊ, ऋ, ॠ.
[12] युतं मधुपयं — ऊ; घृत . . . ऋ; घृतं मधुपयं — ॠ.
[13] सर्वेषां हृदया — उ; सर्वेषां च हृदा — ऊ, ऋ, ॠ.
[14] पुनः — उ.
[15] सकृत्सकृत् — ऊ, ऋ, ॠ.
[16] सकृन्नोयं मृदा — उ; तोयमृदा — ऊ, ऋ, ॠ.
[17] पत्रेषु क्षालयेत् — उ; तोयेन क्षालयेत्क्रमात् — ऊ, ऋ, ॠ.
[18] 'ग्रामप्रदक्षिणं कुर्याज्जलाधिवासनं भवेत् ।
वस्त्रेण प्रतिमां वेष्टच लम्बकूर्चं शिरे न्यसेत् ॥

पञ्च[1]गव्येन संक्षाल्य गन्धतोयेन[2]सेचयेत् ।।२४।।
[3]गन्धं पुष्पं च [4]धूपं च [5]दीपं चैव स्वमन्त्रतः ।
[6]वस्त्रकूर्चसमायुक्तं जले चैवाधिवासयेत् ।।२५।।
त्रिरात्रमेकरात्रं वा याममेकं जलोषितम् ।

[7][शयनाधिवासः]

जलादुत्तीर्य देवेशं वस्त्रकूर्चं व्यपोह्य च ।।२६।।
स्नानमण्टपमानीय शुद्धिं कृत्वा यथाक्रमम् ।
पञ्च[8]ब्रह्मणा [9]संस्थाप्य अर्घ्यमाचमनं ददेत् ।।२७।।
गन्धपुष्पादिनाभ्यर्च्य [10]पिण्डिकां सह शाययेत् ।।

[11][कुम्भस्थापनं तत्पूजा च]

[12]वेद्यां च कुम्भं संस्थाप्य सवस्त्रं सहिरण्यकम् ।।२८।।

जलमध्ये तु निक्षिप्य कण्ठदेशसमन्वितम् ।
एकरात्रं द्विरात्रं वा त्रिरात्रं याममेव च ।।'
(टि. २८९. ८१ पृष्ठे 'कारणे' इति निर्दिश्योद्धृतौ)

[1] ब्रह्मेण — उ, ऊ, ऋ; ०ब्रह्मेन — ऋृ.
[2] पूजयेत् — उ.
[3] गन्धपुष्पं — ऊ, ऋ, ऋृ.
[4] दीपं — ऊ, ऋ, ऋृ.
[5] दीपमर्घ्यं हृदा न्यसेत् — उ; धूपं चैव — ऊ, ऋ, ऋृ.
[6] 'उ' मातृकायां २५ उ० — २८ पू० श्लोका न दृश्यन्ते ।
[7] 'अष्टद्रोणैश्च शालिभिस्तदर्धैस्तण्डुलैस्तिलैः ।
[स्थण्डिले नलिनं लिख्य] दर्भैश्चैव परिस्तरेत् ।।
कर्णिकामध्यमे चोक्तं शयनं कल्पयेत्ततः ।
अण्डजा मुण्डजाश्चैव रोमजाश्चर्मजास्तथा ।।
वामजाश्चैव पञ्चैतैर्भूततत्त्वानि विन्यसेत् ।
जलतीरं समागम्य स्वस्तिसूक्तसमन्वितम् ।
सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् ।।
जलादुत्तीर्य बिम्बं तु स्नानश्चभ्रे तु विन्यसेत् ।
वस्त्रादीनि व्यपोह्याथ गव्यैरेवाभिषेचयेत् ।।
गन्धतोयेन संलिप्य पवमानमुदीरयन् ।
क्षेत्रबीजेन चाभ्यर्च्य रक्तवस्त्रेण वेष्टयेत् ।।
कौतुकं बन्धयेद्धीमान्पूर्वोक्तविधिना सह ।
धूपदीपं ततो दत्त्वा शाययेच्छयनोपरि ।।
गन्धपुष्पादिभिश्चैव पूजयेद्विधिना कुरु ।
तत्त्वतत्त्वेश्वरान्न्यस्य मूर्तिमूर्तीश्वरान्न्यसेत् ।।
आत्मविद्याशिवाख्यं जानुकण्ठशिरोऽवधि ।
पूर्ववद्विन्यसेत्तत्रानलादिमूर्तयः स्मृताः ।
अनलश्चाग्निकेशश्च करालश्च तृतीयकः ।।
घण्टारवो महाक्रोधः षष्ठो वै पिशिताशनः ।
सप्तमः पिङ्गलाक्षश्च ऊर्ध्वकेशस्तथा भवेत् ।।
एते च मूर्तिपाश्चैव विन्यसेत्क्रमशो बुधः ।।'
(टि. २८९. ८२, ८३ पृष्ठयोः 'कारणे' इति निर्दिश्योद्धृताः ।);
शयनारोपणं चैव पूर्ववत्परिकल्पयेत् ।
(**उत्तरकारणे** ७०.६ पू०)

[8] ०ब्रह्मेण — ऊ, ऋ, ऋृ.
[9] संस्थाप्यार्घ्य० — ऋृ.
[10] पिण्डिका — ऊ, ऋ, ऋृ.
[11] 'तस्योर्ध्वे तु शिरोभागे क्षेत्रकुम्भं तु विन्यसेत् ।
सकूर्चं सापिधानं च सवस्त्रं वारिपूरितम् ।।

शिवाख्यं पद्म[1]योनी च मुकुलीं चैव दर्शयेत् ।
पाद्यमाचमनं चार्घ्यं गन्धपुष्पादिकं [2]बुधः ॥२९॥
[3]कुम्भान्संस्थापयेत्तत्र सवस्त्रान्सहिरण्यकान् ।
[4]इन्द्रादीशानपर्यन्तं पूजयेत्स्वस्वमन्त्रकैः[5] ॥३०॥

[6][होमः]

[7]अग्निकार्योक्तमार्गेण शिवाग्निं परिकल्पयेत् ।
समिदाज्य[8]चरू लाजाः [9]सक्त्वपूपयवास्तिलाः ॥३१॥

हैमं वा पद्मं रत्नं वा कुम्भमध्ये तु निक्षिपेत् ।
तन्मध्ये तु स्वनामानं प्रणवादिनमोऽन्तकम् ॥
ध्यात्वा क्षेत्रेशरूपं तु पूजयेत्पूर्णमानसः ।
अभितः कलशानष्टौ सूत्रादिभिः समन्वितान् ॥
पूर्वादीशानपर्यन्त हेतुघ्नाद्यान् प्रपूजयेत् ।
हेतुघ्नस्त्रिपुरघ्नश्च वेतालश्चाग्निजिह्वकः ॥
कालाग्निः करालकश्चैव एकाङ्घ्रिर्भीम इत्यपि ।
पूजयेद्गन्धपुष्पाद्यैः स्वस्वनाम प्रपूजयेत् ॥'
(टि० २८९.८३ पृष्ठे 'कारणे' इति निर्दिश्योद्धृताः);

'वेदिकामध्यमे चैव दशकुम्भं न्यसेत्ततः ।
ससूत्रं सापिधानं च सरत्नस्वर्णपङ्कजम् ॥
सकूर्चनालिकेरं च चूतपल्लवसंयुतम् ।
सप्तधान्यस्थितं कुम्भं पश्चिमाभिमुखं भवेत् ॥
दक्षिणाभिमुखं वापि बिम्बमावाहयेद्घटे ।
आसनं मूर्तिमभ्यर्च्य विद्यादेहं प्रकल्पयेत् ॥
प्रणवं पूर्वमुच्चार्य श्रीबीजं च द्वितीयकम् ॥
कुरु वाटिकायेति आपदुद्धारणाय च ॥
क्षं क्षेत्रपाल इत्येते चतुर्थ्यन्तं समुच्चरन् ।
नमोऽन्तमुच्चरेत्पश्चाद्भाष्योच्चारं तु पूर्ववत् ॥
पश्चान्मन्त्रेण चावाह्य घटे संपूजयेत्ततः ।
पश्चिमाभिमुखं पूज्य दक्षिणाभिमुखं तु वा ॥
पुष्पाञ्जलित्रयं पूज्य प्रथमावरणं यजेत् ॥
पश्चिमाद्दक्षिणान्तं वा दक्षिणात्पूर्वमेव वा ॥
विश्वरूपादिमभ्यर्च्य द्वितीयावरणं तथा ।
पञ्चमावरणं चैव पूर्ववत्परिकल्पयेत् ॥
नन्द्यादीश्चैव इन्द्रादीन्वज्रादीन्हेतुकादि च ।
पूर्वादिषु चाष्टदिक्षु तत्तत्स्थानेषु पूजयेत् ॥'
(उत्तरकारणे ७०.६उ०–१५पू०)

[10]'ऊ, ऋ, ॠ' मातृकासु २८ उ०, २९ श्लोकश्च न स्तः।; दद्याद्घृतं च कुम्भस्थं सवस्त्रं – उ.
[1] ०योनिं च — उ.
[2] पयः — उ; अत्र 'कुर्यात्' इति पदमध्याहृत्य व्याख्येयम् ।
[3] इदमर्धं 'उ' मातृकायां न दृश्यते ।
[4] इन्द्राद्यैशान० — उ.
[5] ०मन्त्रतः — उ.
[6] 'आचार्यो मूर्तिपाश्चैव होमकर्म समारभेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥
शमीखादिरमायूरप्लक्षाश्चैव दिशासु च ।
प्रधानस्य पलाशं तु समिधः संप्रकीर्तिताः ॥
हृदयेन समिद्धुत्वा आज्यं मूलेन होमयेत् ।
अस्त्रेणैव चरुं हुत्वा लाजमीशेन होमयेत् ॥
सर्षपं कवचेनैव द्रव्यान्ते व्याहृतिं हुनेत् ।
प्रत्येकं शतमर्धं वा तदर्धं वापि होमयेत् ॥
द्रव्यान्ते व्याहृतिं हुत्वा स्पृशेद्विम्बस्य मस्तकम् ।
एवमेव क्रमाद्रात्रौ'
(टि० २८९.८३, ८४ पृष्ठयोः 'कारणे' इति निर्दिश्योद्धृताः।);

'अग्निसंस्कारपूर्वं तु पूर्ववद्विधिना हुनेत् ।
समिदाज्यचरूँल्लाजं नवधान्यं गुलं तथा ॥
अपूपान्कन्दकुसुमं होमयेत्तु विशेषतः ।'
(उत्तरकारणे ७०.१५ उ०, १६)

[7] इदमर्धं 'उ' मातृकायां न दृश्यते ।
[8] ०चरून् लाजान् — उ, ऊ, ऋ, ॠ.
[9] सकृत्पूपयवस्तिलान् — उ; सक्त्वपूपयवास्तिलान् — ऊ, ऋ, ॠ.

[2]सर्षपाश्च व्रीहिभिश्च [3]माषा एकादश स्मृताः।
पञ्चब्रह्मषडङ्गैश्च [3]मूलमन्त्रैः शताहुतिः ॥३२॥
क्षुरिकास्त्रादिमन्त्रैश्च[4] प्रत्येकं विंशतिस्तथा।

[5][कुम्भाभिषेकः]

प्रभाते विमले चैव [6]स्नानवेद्युपरि न्यसेत् ॥३३॥
[7]भस्मधारणशुद्धाङ्गः[8] [9]आत्मशुद्ध्यादिपूर्वकम्।
[10]गन्धं पुष्पं च धूपं च दीपमर्घ्यं च पूजयेत् ॥३४॥
[11]ध्यात्वा तु प्रतिमारूपं मन्त्रसंस्कारपूर्वकम्।
दीक्षितः शिवधर्मज्ञः शिवशास्त्रविशारदः ॥३५॥
[12]प्राणप्रकृतिमार्गेण सबीजं हृदये न्यसेत्।
[13]घटसंस्थापितान्देवान्स्वस्वनाम्नैव[14] स्थापयेत् ॥३६॥
[15]ब्रह्मपञ्चकमन्त्रेण तदन्ते अभिषेचयेत्।
गन्धपुष्पं च धूपं च [16]दीपं मुद्रां निवेदयेत् ॥३७॥

---

[2] इदमर्धं 'ऊ, ऋ, ॠ' मातृकासु न दृश्यते।

[3] माषकैश्च दशा — उ.

[3] सद्योजातैश्च वाहुतिः — उ; मूलमन्त्रशता० — ऊ, ऋ, ॠ.

[4] पूर्वाहुतिस्तु क्षुरिका — उ.

[5] 'प्रभाते स्नपनं कुरु।
देशिको मूर्तिपैः सार्धं स्नानं पूर्ववदाचरेत् ॥
आचार्यो मूर्तिपैः सार्धं पूजयेत्पूर्ववत्ततः।
शयनाद्बिम्बमुद्धृत्य वस्त्रादीनि व्यपोह्य च ॥
गन्धपुष्पादिभिश्चैव पूजयेत्पुरुषेण तु।
जयादिरभ्यातानं च राष्ट्रभृच्च हुनेत्क्रमात् ॥
पूर्णाहुतिं च शिरसा हुत्वाग्निं तु विसर्जयेत्।
शयनाद्बिम्बमुद्धृत्य स्वस्वस्थानेषु स्थापयेत् ॥
प्रागुक्तविधिना धीमान्घृतस्यैव शिरोऽर्पणम्।
कुम्भमुद्धृत्य बिम्बाग्रे स्थापयेत्स्थण्डिलोपरि ॥
कुम्भाद्बीजं समादाय प्रतिमाहृदि विन्यसेत्।
तत्तत्कुम्भोदकैः स्नाप्य पूर्वादिषु क्रमाद्यथा ॥
नैवेद्यं दापयित्वा तु ताम्बूलं तु निवेदयेत्।
भक्तानां परिचाराणां यथाशक्ति तु पूजयेत् ॥
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्'
(टि. २८९. ८४, ८५ पृष्ठयोः 'कारणे' इति निर्दिश्योद्धृताः।);
'प्रायश्चित्ताहुतिं चैव अग्निमुत्थापयेत्ततः।
घटे संयोजयेत्पश्चात्सुमुहूर्ते सुलग्नके ॥
अभिषेकं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः।
आचार्यं पूजयेच्चैव दक्षिणां दापयेत्ततः ॥
एवं यः कुरुते चैव स राजा विजयी भवेत्।'
(**उत्तरकारणे** ७०.१७–१९ पू०)

[6] स्नात्वाचम्य विधिर्बुधः — ऊ, ऋ, ॠ.

[7] गन्धमेचनशुभ्राभं — उ.

[8] ०शुद्धाङ्गं — ऊ, ऋ, ॠ.

[9] आत्मेनैव निशुद्धयति — उ.

[10] गन्धपुष्पं — उ, ऋ, ॠ.

[11] 'उ' कोशे ३५–४० पू० श्लोका न दृश्यन्ते।

[12] 'प्राणप्रकृतियोगं तु ज्ञात्वा स्थापनमाचरेत्।
प्राणो मन्त्र इति प्रोक्तः प्रकृतिःस्थाप्य उच्यते ॥'
(**पूर्वकारणे** ५९.२२१)

[13] पट० — ऊ.

[14] देवान्स्वनामेनैव — ऊ, ऋ, ॠ.

[15] ब्रह्मोपक्रममन्त्रेण — ऊ, ब्रह्मपकमन्त्रेण — ऋ.

[16] दीपमुद्रां — ऊ, ऋ, ॠ.

नमस्कारान्तसंयुक्तं मुद्रां चैव निवेदयेत् ।

[१][परिवारविधिः]

इन्द्रादीशानपर्यन्तं परितः कल्पयेत्ततः ॥३८॥
असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः ।
[२]कपाली भीषणश्चैव संहारश्चाष्टभैरवाः[३] ॥३९॥

[द्वारपालौ]

क्रोधकं कुम्भकं चैव द्वाररक्षं तु पूजयेत् ।

[आचार्यादिपूजा]

[४]आचार्यपूजनं कुर्यान्मूर्तिपानथ पूजयेत् ॥४०॥

[५][नित्यपूजा]

पाद्यं [६]वै सद्यमन्त्रेण [७]वामेनाचमनीयकम् ।

---

[१] 'असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः ।
कपाली भीषणश्चैव संहारश्चाष्टभैरवाः ॥
पूर्वाद्यैशानपर्यन्तं पूजयेत्तु विशेषतः ।
कपालशूलसहितमभयं वरदान्वितम् ॥
नीलमेघनिभाकारं त्रियक्षं चन्द्रशेखरम् ।
प्रणवादिनमोऽन्तं च पूजयेत्त्वष्टभैरवम् ॥'
'भैरवं दक्षिणेऽभ्यर्च्य द्विभुजं चैकवक्त्रकम् ।
खड्गखेटधरं चैव रक्तवर्णसमायुतम् ॥
महाभैरवं वामे तु कृष्णवर्णसमायुतम् ।
द्विभुजं विस्मयं हस्तं शूलं वा दण्डधारिणम् ॥
उग्रभैरवपीठं स्याद्बलिपीठे बलिं तथा ।
तस्याग्रे श्वानसंयुक्तं द्वारपार्श्वद्वयं तथा ॥
वाहनं चैव संयोज्य चतुर्वेदं प्रकल्पयेत् ।'
(**पूर्वकारणे** १०३.५६–५८; ६६उ०–६९)

[२] कपालि — ऊ.

[३] ०भैरवः — ऊ, ऋ, ॠ.

[४] इदमर्धं 'ऊ, ऋ, ॠ' मातृकासु न दृश्यते ।

[५] 'पाद्यैराचमनीयार्घ्यैर्गन्धैः पुष्पैश्च धूपकैः ।
दीपैर्निवेदनैः सर्वं कूटबीजेन दापयेत् ॥
श्वानमारूढदेवं च स्वनामाद्येन पूजयेत् ।'
(**पूर्वकारणे** १०३.७उ०, ८);
'पाद्यादीनि समारभ्य नैवेद्यान्तं यजेद्बुधः ।
कूटबीजेन दातव्यं बिन्दुनादेन संयुतम् ॥
श्वानमारूढदेवं च स्वम्वनाम्नैव पूजयेत् ।'
(**सूक्ष्मे** ९१.७ उ०, ८);
'पाद्यैराचमनैरर्घ्यैर्गन्धैः पुष्पैश्च धूपकैः ।
दीपैर्निवेदनैः सर्वं कूटबीजेन दापयेत् ॥
श्वानमारूढदेवं च स्वनामाद्येन पूजयेत् ।
क्षेत्रध्यानक्रमं वक्ष्ये शृणुष्वैवं महेश्वर ॥
ऊर्ध्वकेशं त्रिणेत्रं च सर्पकुण्डलशोभितम् ।
दंष्ट्रम्पृष्टाधरोष्ठं च अञ्जनद्रुमसन्निभम् ॥
चतुर्बाहुं शूलहस्तं डमरुं दक्षिणे करे ।

[६] कपालि — ऊ.

[७] ०भैरवः — ऊ, ऋ, ॠ.

अर्घ्यं शिरसि विन्यस्य हृदयेनाभिषेचयेत् ॥४१॥
पुष्पमीशानमन्त्रेण[1] गन्धं तत्पुरुषेण तु ।
[2]अघोरेणैव धूपं तु दीपं नेत्रेण मन्त्रतः ॥४२॥
नैवेद्यं हृदयेनैव ताम्बूलं कवचेन तु ।
पानीयमस्त्रमन्त्रेण क्षेत्रपालं तु पूजयेत् ॥४३॥
एवं नित्यं ततः [3]पूजा [4]कर्तव्या [5]सिद्धिसंप्रदा ।

[6][परिवारबलिः]

[7]परितः [8]पूर्वके चैव बलिभिश्च यजेत्ततः ॥४४॥
[9]प्राकारेषु कृते चैव स्वस्वमन्त्रेण पूजयेत् ।
[10]महापीठपिशाचेभ्यो बलिं दद्याद्विशेषतः ॥४५॥
महाहविर्निवेद्यान्ते[11] [12]ताम्बूलं च निवेदयेत् ।
गुलखण्डाज्यपूपं च[13] [14]सक्तुलाजसमन्वितम् ॥४६॥
तदग्रे स्थण्डिलं कृत्वा मध्यरात्रौ बलिं क्षिपेत् ।

कपालं दण्डहस्तं च सव्यभागे तु धारयेत् ॥
नग्नवेषधरं भीमं नागयज्ञोपवीतिनम् ।
अष्टबाहुं चतुर्बाहुमुत्तमं च द्विबाहुकम् ॥
इत्थं वै क्षेत्रदेवं तु ध्यात्वा मृत्युविनाशनम् ।
आवाहयेत्ततो देवं सिंहासनं ततोपरि ॥
स्नाने पद्मासनं कृत्वा वस्त्रैर्गन्धैः सपुष्पकैः ।
धूपदीपैः समभ्यर्च्य योगासनं प्रकल्पयेत् ॥
निवेद्यकाले संपूज्य अनन्तासनसंस्थिते ।
नृत्तं कृत्वा विशेषेण सिंहासने सुसंस्थितम् ॥
पद्मासनं तु सर्वेषां सकलाराधनक्रमम् ।
शिवार्चनसमं पुण्यं न भूतं न भविष्यति ॥'
(**मकुटे** ७.४–१२)

[6] चैव सद्य० — उ.
[7] वामे चाच० — उ, ऋ.
[1] पुष्पं शिरसि विन्यस्य — उ.
[2] दीपं वै नेत्रमन्त्रेण वामेनाचमनीयकम् — ऊ, ऋ, ॠ.
[3] पूजां — ऋ; पूज्य — ॠ.
[4] कर्तव्यं — उ, ऊ, ऋ, ॠ.
[5] सिद्धिदप्रदम् — उ; सिद्धिदं प्रदम् — ऊ; सिद्धिदः प्रदम् — ॠ.

[6] 'सर्वोपचारपूजायां भोगाङ्गं पूजयेत्तदा ।
लयाङ्गं लिङ्गपूजायां भोगाङ्गं क्षेत्रपालकम् ॥
सर्वभैरवं संपूज्य बलिपीठे विशेषतः ।
रक्तपानबलिं कृत्वा सर्वशान्तिकरं शुभम् ॥
मधुमांसफलैर्युक्तं नैवेद्यं तु प्रदापयेत् ।
गन्धद्रव्यसमायुक्तं गन्धपुष्पेण पूजयेत् ॥
धूपदीपसमायुक्तं सर्वातोद्यसमायुतम् ।
अर्धरात्रौ विशेषेण भोगाङ्गबलिं पूजयेत् ।
पूजान्ते तु बलिं कृत्वा स पुण्यां गतिमाप्नुयात् ।'
(**पूर्वकारणे** १०३, ७०–७४ पू०)

[7] पुरतो — उ.
[8] पूर्वकं चैव — उ; पूर्वकश्चैव — ऊ, ऋ, ॠ.
[9] प्राकारेष्वाकृतं चैव — उ, ऋ, ॠ; प्राकारेष्वकृतं चैव — ऊ.
[10] महापीडा० — ऊ; महापीठा — ॠ.
[11] निवेद्यान्तं — उ, ऊ, ऋ, ॠ.
[12] ताम्बूलान्तं नि० — उ.
[13] ०ज्यापूपं च — ॠ.
[14] सदध्याज्यसमायुतम् — उ.

[उत्सवः]

[1]प्रतिष्ठान्तोत्सवं कुर्यात्सप्ताहं तत्र कारयेत् ॥४७॥
एकाहं वा[2] प्रकर्तव्यमुत्सवं चैव कारयेत् ।
सप्ताहे [3]रात्रिमारभ्य प्रभाते तीर्थमाचरेत्[4] ॥४८॥

[दिनदेवताः]

प्रथमं भूतदैवत्यं द्वितीयं गणदैवतम् ।
[5]तृतीयं पिशाचदैवत्यं चतुर्थमिन्द्रदैवतम् ॥४९॥
पञ्चमं [6]मुनिदैवत्यं [7]षष्ठं राक्षसदैवतम् ।
[8]सप्तमे क्षेत्रपालस्तु [9]दिवसानां च देवताः[10] ॥५०॥
[11]मुद्गान्नं चैव सक्तुं च लाजमाषयुतं तथा ।
गन्धपुष्पं च धूपं च दीपमर्घ्यं समर्चयेत् ॥५१॥

[होमः]

समिदाज्यचरुक्षीरं [12]दध्यपूपतिलं तथा ।
[13]होमद्रव्याणि [14]सप्तैभिः सायं[15]प्रातस्तु होमयेत् ॥५२॥
हृदयाद्यस्त्रपर्यन्तं प्रत्येकं तु शतं हुनेत् ।
पूर्णाहुतिं तथा [16]द्रव्यैः [17]पुरुषेण तु मन्त्रतः ॥५३॥

---

[1] प्रतिष्ठा चोत्सवं — उ, ऊ, ऋ, ॠ.
[2] च — उ.
[3] तत्रमारभ्य — उ; तन्त्रमारभ्य — ऊ, ऋ, ॠ.
[4] 'रात्रावेवोत्सवारम्भो दिवावभृथ उच्यते ।'
(**अजिते** २७.३९ पू०);
'निर्दिष्टदिवसाद्रात्रिमारभ्योत्सवमाचरेत् ।'
(**पूर्वकारणे** १४१.२० पू०);
'शैवादि चोत्सवादीनां यावत्संख्या विधीयते ।
तत्पूर्वरात्रिमारभ्य कारयेदुत्सवं बुधः ॥
प्रतिष्ठां चोत्सवं यागं मायादिदिनमारभेत् ।
प्रातःकाले ह्यवभृथं सायंकाले समारभेत् ॥
रात्रिः सायं दिवा प्रातरिति शास्त्रस्य निश्चयः ।'
(**दीप्ते** ८३.२७ पू०–२९)
[5] द्वितीयं — ॠ.
[6] रतिदैवत्यं — ऊ, ऋ, ॠ.
[7] षट् षट् राक्षस० — ॠ.
[8] सप्तमं क्षेत्रपालं तु — उ, ऊ, ऋ, ॠ.
[9] दिवसान्तं च — ऊ, ऋ, ॠ.
[10] दैवतम् — ऊ, ऋ, ॠ.
[11] 'ऊ, ऋ, ॠ' मातृकासु ५१ श्लोकः ५२ पूर्वार्धं च न स्तः ।
[12] दध्यपूपस्तिलं — उ.
[13] '५२' तृतीयपादस्य स्थाने 'अन्नं मुद्गं च लाजं च' इति 'ऊ, ऋ, ॠ' मातृकासु दृश्यते ।
[14] सप्तेभ्यो — उ.
[15] प्रातस्य — उ.
[16] द्रव्यं — उ, ऊ, ऋ, ॠ.
[17] पुरुषेणैव — ऊ, ऋ, ॠ.

[1]सायं [2]प्रातर्बलिं दद्याद्धोमान्ते चोत्सवं [3]भवेत् ।
सप्ताहे [4]सति तीर्थं तु [5]पूर्णान्तं कारयेत्ततः ॥५४॥
महाहविश्च[6] कर्तव्यमुत्सवान्ते[7] विशेषतः ।

[स्नपनम्]

शालिभिः [8]स्थण्डिलं कृत्वा [9]नवकुम्भं तु विन्यसेत् ॥५५॥
[10]पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ।
[11]पूर्ववत्कल्पयेत्तत्र स्थापयेत्पञ्चगव्यकम् ॥५६॥
क्षीरं दधि घृतं चैव [12]इन्द्रादीशान्तमन्त्रतः ।
[13]मध्ये वै क्षेत्रपालं तु [14]ध्यात्वा [15]कुम्भं तु विन्यसेत् ॥५७॥
तत्तत्स्वनाममन्त्रेण कलशानभिषेचयेत् ।
[16]पूर्वे ध्वजं तु संस्थाप्य [17]श्वानलेखं तु पूजयेत् ॥५८॥
[18]क्षेत्रेशमुत्सवान्ते च महाहविर्निवेदयेत् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥५९॥

इति रौरवतन्त्रे क्रियापादे क्षेत्रपाल[19]स्थापनविधिः
एकपञ्चाशः पटलः ।

---

[1] 'होमान्ते तु बलिं दत्त्वा बल्यन्ते चोत्सवं क्रमात् ।'
'सायं प्रातर्बलिं दद्याद्धोमान्ते विधिना पुरा ॥'
(**पूर्वकारणे** १४१.६१ उ०, १२४ उ०);
'होमान्ते तु बलिं दद्याद्बल्यन्ते चोत्सवं बुधः ।'
'सायं प्रातर्बलिं दद्याद्धोमान्ते तु विशेषतः ॥
उत्सवं प्रारभेदन्ते सर्वालंकारसंयुतम् ।'
(**सुप्रभेदे** क्रियापादे १४.८२ पू०, १०६);
एतद्विषये पुनः **रौरवे** क्रियापादे १८.८४ उ०–८९ पू० श्लोका द्रष्टव्याः ।

[2] प्रातर्भवेद् दद्यात् — उ.

[3] ततः — ऊ, ऋ, ॠ.

[4] म तु — उ; तु चतुर्थं तु — ऊ, ऋ, ॠ.

[5] पुण्याहं — ऊ, ऋ, ॠ;
'पर्वान्तं सर्वमासके'
(**उत्तरकामिके** ६.४ उ०)

[6] ०हवि तु — उ.

[7] स्नपनान्ते — उ.

[8] स्तण्डिलं — उ.

[9] कुम्भस्थापनमाचरेत् — ऊ, ॠ; कुम्भस्थापनमारभेत् — ऋ.

[10] पाद्यं चाचमनं — उ, ऊ;
'पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ।
क्षीरं दधि घृतं चैव प्रथमावरणं विदुः ॥'
(**सुप्रभेदे** क्रियापादे — १५.४०.).

[11] इदमर्धं 'उ' मातृकायां न दृश्यते ।

[12] इन्द्रादीशान० — उ, ऊ, ऋ, ॠ.

[13] शैवेन — ऊ, ऋ, ॠ.

[14] ध्यात्वात्मा कल्पविन्यसेत् — ऊ, ऋ, ॠ.

[15] कल्पं तु — उ.

[16] महाध्वजं पूर्वतः स्थाप्य — ऊ, ऋ, ॠ.

[17] श्वानं लेख्यं — ऊ, ऋ, ॠ.

[18] उत्सवादि विसृज्याथ — उ; क्षेत्रेशमुद्दिश्य इति व्याख्येयम् ।

[19] ०प्रतिष्ठाविधिः पटलश्चतुश्चत्वारिंशतिः — ऊ;
०प्रतिष्ठाविधिपटलश्चत्वारिंशतितमः — ऋ;
०प्रतिष्ठाविधिपटलश्चतुश्चत्वारिंशतितमः — ॠ.

द्विपञ्चाशः पटलः

[1]सर्पशान्तिविधिः

सर्पशार्न्ति प्रवक्ष्यामि संतानस्याभिवृद्धये ।

[2][सर्पशिशूनां तदण्डानां च हनने संभाव्यमानो दोषः]

सर्पसंहारदोषस्तु[3] कुलक्षयकरो[4] भवेत् ॥१॥
जन्मान्तरसहस्रेषु[5] गूढपाद्धननं[6] यदि ।
पुनः पुनश्च दोषाय [7]कल्पते कर्मबन्धनात्[8] ॥२॥
[9]एकमासशिशौ नष्टे[10] [11]एकाब्दशिशुनाशनम् ।
मासयुग्मशिशौ नष्टे[12] [13]युग्माब्दशिशुनाशनम् ॥३॥
त्रिमासशिशुसंहारे अब्दत्रयशिशोर्मृतिः ।
एकमासस्य [14]एकाब्दमष्टाब्दान्तं यथाक्रमम् ॥४॥
[15] द्विशतोर्ध्वचत्वारिंशत्सर्पाण्डेषु[16] यथाक्रमम् ।
एकाण्डनाशनेनैव एकगर्भविनाशनम्[17] ॥५॥

---

[1] अयं पटलः आर्. इ. १९९८८ इत्यङ्किते तालपत्रकोशे ११०–११३ पत्रेषु 'रौरवागमे' इति निर्दिश्य लिखितः । आर्. इ. २००२६ इत्यङ्किते तालपत्रकोशे विनागमनामनिर्देशमेतत्पटलस्थश्लोकाः प्रायेण दृश्यन्ते । तौ कोशौ क्रमेण 'लृ, ए' इति संकेतेन निर्दिश्येते ।

[2] 'सर्पशान्ति प्रवक्ष्यामि सन्तानस्याभिवृद्धये ।
सर्पमारणदोषस्तु कुलक्षयकरो भवेत् ॥
जन्मान्तरसहस्रेषु सर्पाणां हननं यदि ।
पुनः पुनश्च दोषाय कल्पते कर्मबन्धनात् ॥
एकमासः शिशुर्नश्येदेकाब्दश्च तथा शिशुः ।
मासयुग्मशिशोर्नाशो युग्माब्दशिशुनाशनम् ॥
त्रिमासशिशुनाशे च अब्दत्रयशिशोर्मृतिः ।
एकमासैकवर्षादि वर्षाष्टकमिति क्रमात् ॥
एकाण्डनाशने चैव एकगर्भविनाशनम् ।
तथा च गणयेद्विद्वाञ्श्रेयसे बुद्धिविस्तरात् ॥'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १२.)

[3] ०दोषेण — लृ, ए.
[4] ०करं — लृ, ए.
[5] ०सहस्रे तु — ए.
[6] ०पादनने — लृ.
[7] कल्प्यतं — लृ; कल्पितं — ए.
[8] ०बन्धनम् — ए.
[9] एकमासे — लृ.
[10] ०शिशोर्नष्टे — ए.
[11] एकाब्दं — लृ; एकाब्दे — ए.
[12] शिशोर्नाशे — ए.
[13] युग्माब्दे सुतनाशनम् — ए.
[14] एकाब्दं मासाब्दान्तं — लृ.
[15] द्विशगोर्धचतुर्विंशत् — लृ.
[16] सर्पस्यांशं — लृ; सर्पस्याण्डं — ए.
[17] ०गर्भस्थपातनम् — लृ.

तथा च गणयेद्विद्वाञ्श्रेयसे बुद्धिविस्तरात् ।

[1] [दोषपरिहाराय शान्तिपूर्वकं सर्पाणां प्रतिष्ठा]

तद्दोषपरिहारार्थं [2]शान्तिः स्थापनमेव च ॥६॥
शान्तिहीनप्रतिष्ठायां निष्फलं द्रव्यनाशनम् ।
तस्मात्सर्वप्रयत्नेन शान्तिपूर्वं यथाविधि[3] ॥७॥

[4] [आचार्यवरणम्]

शुभे दिने[5] सुनक्षत्रे सुलग्ने सुमुहूर्तके[6] ।
वेदशास्त्रार्थतत्त्वज्ञमाचार्यं कल्पयेत्ततः ॥८॥
तादृशान्ब्राह्मणानष्टौ [7]ऋत्विक्स्थाने नियोजयेत् ।
कर्ता पत्नीसमेतः सन्ब्राह्मणांस्त्रिःप्रदक्षिणम् ॥९॥
नमस्कारं [8]ततः कृत्वा [9]विज्ञाप्य परिषन्मुखम् ।
[10]पुण्याहं विधिवत्कृत्वा पञ्चगव्यं यथाविधि ॥१०॥

[11] [पिष्टादिभिः सर्पादिकरणं तत्पूजनं च]

शिष्टकर्माणि सर्वाणि [12]आचार्यप्रमुखैस्तदा ।

---

[1] 'तद्दोषपरिहारार्थं शान्तिकर्म समाचरेत् ।
शान्तिहीनप्रतिष्ठा तु निष्फला द्रव्यनाशनम् ॥
तस्मात्सर्वप्रयत्नेन शान्तिपूर्वं यथाविधि ।
शुभे दिने सुनक्षत्रे सुलग्ने सुमुहूर्तके ॥
शान्तिकर्म तथा कृत्वा प्रतिष्ठां कारयेद्बुधः ।'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १२)

[2] शान्तिस्थापन० — ल्, ए.

[3] प्रतिष्ठां कारयेदिति शेषः ।

[4] 'अथ विघ्नेश्वरं संपूज्य पूर्वोक्तप्रकारेण संकल्पं कुर्यात् ।
'विघ्नेश्वरमथोद्वास्य तं संप्रार्थ्य पुनः पुनः ।
वेदशास्त्रार्थतत्त्वज्ञमाचार्यं वरयेत्ततः ॥
तादृशब्राह्मणानष्टौ ऋत्विक्स्थाने नियोजयेत् ।'
अथ आचार्यः सकल्प्य, पुण्याहवाचनं कृत्वा, तेन जलेन यजमान संप्रोक्ष्य पञ्चगव्यं पुण्याहजलं च पाययेत् । अथ यजमानो ब्राह्मणान्प्रदक्षिणीकृत्य, आचार्यमृत्विजश्च सर्पशान्तिकर्म कुरुध्वमिति प्रार्थयेत् ।'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ. १५)

[5] शुभवारे — ए.

[6] सुमूत्तके — ल्.

[7] जपस्थाने — ए.

[8] तथा — ए.

[9] विज्ञाप्यं च ततो वदेत् — ए.

[10] संकल्प्य स्वस्य पुण्याहं — ल्.

[11] 'अथ आचार्यो यवतण्डुलचूर्णं प्रस्थत्रयपरिमित-मेलालवङ्गकर्पूरचन्दनगोघृतैः संयोज्य, तेन पिष्टेन फणियुग्ममशीतिं फणिशिशून्, षष्टयुत्तरशत-सर्पाण्डानि, बृहत्कालकूटं, वृश्चिकं, नक्रं, स्थूल-कूटम् एतानि कृत्वा, रजतशूर्पे निधाय, पुष्पा-क्षतान्गृहीत्वा ब्रह्मलोकादिषु संस्थितान् सर्पान्, सर्पशिशूंश्च आवाह्य षोडशोपचारपूजां कुर्यात् ।
अथ चतुरश्रं मण्डलं गोमयेनोपलिप्य, तदु-परि भारपरिमितान् व्रीहीन्, तदुपरि तदर्ध-

ततः परं प्रकर्तव्यं [1]संकल्पादि च पूर्ववत् ॥११॥
यवतण्डुलचूर्णं तु त्रिप्रस्थं गुलसंयुतम् ।
एलालवङ्ग[2]कर्पूरचन्दनैर्गोघृतैर्युतम् ॥१२॥
[3]संपेष्य तेन कर्तव्यं फणियुग्मं यथाविधि ।
अशीति[4]शिशवश्चैव षष्टयुत्तरशताण्डकम् ॥१३॥
कालकूटं तथैकं स्याद्वृश्चिकं [5]विषनक्रकम् ।
[6] स्थूलकूटं च विप्रेन्द्र [7]चत्वारिंशच्छतद्वयम् ॥१४॥
गोमयेनैव संलिप्य रङ्गवल्लीसमायुतम्[8] ।
अष्ट[9]द्रोणं तथा [10]व्रीहिं तण्डुलं च तदर्धकम् ॥१५॥
तदर्धं तिलमर्धार्धं[11] माषं चैव यथाविधि ।
एवं स्थण्डिलयुग्मे तु[12] धान्यराशिं निधाय च ॥१६॥
[13]तदूर्ध्वे कमलं लिख्य[14] कर्णिकालक्षणैर्युतम् ।
तन्तुना [15]वेष्टितौ कुम्भौ स्थण्डिलोपरि विन्यसेत् ॥१७॥
शुद्धोदकेन संपूर्य[16] [17]नवरत्नं निधाय च ।
आम्रशाखानालिकेरमूर्ध्वकूर्चं [18]सवस्त्रकम् ॥१८॥
प्रतिमायाश्च युग्मं तु सुवर्णेनैव कारयेत्[19] ।
[20]एकं रौद्रं तथा चान्यं वासुदेवं सनातनम् ॥१९॥
आवाह्य विधिवत्पूज्य उपचारैर्यथाक्रमम् ।

परिमितांस्तण्डुलान्, तदुपरि तदर्धपरिमितांस्तिलान्, माषांश्च निक्षिप्य, तत्र स्थानद्वयं कल्पयित्वा, तन्तुवेष्टितौ गङ्गादिजलपूर्णौ द्वौ कुम्भौ निधाय, आम्रपल्लवनालिकेरकूर्चवस्त्रहरिद्राकुङ्कुमाक्षतपुष्पैरलंकृत्य, वरुणमावाह्य, एकस्मिन् कुम्भे पलत्रयपरिमितस्वर्णनिर्मितां त्र्यम्बकरुद्रप्रतिमाम् अन्यस्मिन्कुम्भे तादृशीं लक्ष्मीनारायणप्रतिमां च निधाय 'त्र्यम्बकं' 'तद्विष्णो' रिति द्वाभ्यामावाह्य, षोडशोपचारपूजां कुर्यात् ।

(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १५, १६)

[12] आचार्यस्य मुखात्ततः — ल्ट; आचार्यः कुरुते.. — ए.

[1] संकल्प्यादि पूर्ववत् — ल्ट; संकल्पं नान्दिपूर्वकम् — ए.

[2] ०कर्पूरं — ल्ट.

[3] संपेष्टच — ल्ट.

[4] ०शिवपञ्चैव — ल्ट.

[5] विळनं क्रमात् — ए.

[6] स्थूलकूटः — उभयतोमुखः सर्पविशेषः ।
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १५ टिप्पणी)

[7] द्विशतोर्ध्वं चतुर्विंशत् — ल्ट; द्विशतोर्ध्वं चत्वारिंशत् — ए; 'चत्वारिंशदधिकशतद्वयम्' इति व्याख्येयम् ।

[8] ०वल्लीरलंकृतम् — ए.

[9] ०द्रोणस्तथा — ल्ट, ए.

[10] व्रीहिः — ल्ट, ए.

[11] तिलमर्धं च — ए.

[12] ०युक्तेषु — ल्ट; ०युग्मेषु — ए.

[13] तदूर्ध्वं — ए.

[14] लिखित् — ल्ट; लिख्या — ए.

[15] वेष्टितं कुम्भं — ल्ट, ए.

[16] पूर्यात्ति — ल्ट; संपूर्या — ए.

[17] विष्णुकूर्चं च निक्षिपेत् — ल्ट.

[18–19] कृत्वा तत्तत्कुम्भोपरि न्यसेत् — ल्ट.

[20] एके रुद्रं तथा चान्ये — ल्ट.

[1][रुद्रकुम्भे वेदादिमन्त्रजपः]

रुद्रकुम्भे च [2]वेदादीञ्शतरुद्रीयमेव[3] च ॥२०॥
[4]पवमानं च [5]भूसूक्तमाशुःशिशानमेव[6] च।
[7]महासौरं [8]बृहत्साम [9]राथन्तर्यं यथाक्रमम् ॥२१॥

[विष्णुकुम्भे वेदादिमन्त्रजपः]

विष्णुकुम्भे [10]च [11]वेदादीन्विष्णुसूक्तं[12] तथैव च।
[13]श्रीसूक्तं [14]पुरुषसूक्तं च [15]महानारायणं तथा ॥२२॥
[16]वरुणसूक्तं [17]वालखिल्यम[18]ब्लिङ्गं च तथैव च।
एतानि सूक्तमन्त्राणि [19]रुद्रविष्ण्वोस्तथा जपेत् ॥२३॥

---

[1] [रुद्रकुम्भे विष्णुकुम्भे च वेदादिमन्त्रजपः होमश्च]

'अथ आचार्यः ऋत्विजश्च रुद्रकुम्भसमीपे स्थित्वा, कुम्भं स्पृशन्तो वक्ष्यमाणान्मन्त्राञ्जपेयुः। ते मन्त्राः वेदादयः, शतरुद्रीयम्, चमकम्, पवमानानुवाकः, आशुश्शिशानः, रुद्रसूक्तम्, दुर्गासूक्तम्, ऐन्द्राग्नम्, वायव्यम्, महासौरम्, बृहत्, रथन्तरम्, बृहद्रथन्तरम्, रथन्तरबृहत्, एतानि सामानि च।'

'विष्णुकुम्भसमीपे तु विष्णुसूक्तं, श्रीसूक्तं, भूसूक्तं, पुरुषसूक्तम्, उत्तरनारायणं, वसुसूक्तं, वालखिल्यम्, आदित्यसूक्तं, घृतसूक्तं, ब्रह्मसूक्तं, सोमसूक्तं, वरुणसूक्तं पञ्चशान्तीश्च जपेयुः।'

'अथ कुम्भयोः पश्चिमभागे स्वगृह्योक्तविधिना अग्निं प्रतिष्ठाप्य, मुखान्तं कृत्वा, पालाशसमिद्भिरन्नेनाज्येन च बृहत्तदित्यादिभिः षड्भिर्मन्त्रैः पृथक् पृथग् अष्टोत्तरशतं जुहुयात्।'

(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १६)

[2] वेदादिः — ल्.

[3] **तै० संहिता** ४.५.

[4] पावमानं — ए; **ऋक्संहिता** मण्डलम् — ९.

[5] **तै० संहिता** १.५.३.१.

[6] **तै० संहिता** ४.६.४.१; ०माशुरीशानमेव च — ल्.

[7] महासौरं सूर्यसूक्तम्। **तै० संहिता** ३.४.११.

[8] बृहत्सामं — ल्; **सामवेदे** ८०९.

[9] वामदेव्यं रथन्तरम् — ए; **सामवेदे** ६८०.

[10] तु — ए.

[11] वेदादिर्विष्णु — ल्.

[12] **तै० संहिता** १.२.१३.

[13] श्रीरुद्रं — ल्; पुरुषसूक्तं च श्रीसूक्तं — ए; **ऋग्वेदे** पञ्चममण्डलस्यान्ते विद्यमानः खिलभागः।

[14] **तै० आरण्यके** ३.१२.

[15] **तै० आरण्यके** १०.१३.

[16] वसुसूक्तं — ए; **तै० आरण्यकम्** १०.१.

[17] तथाब्लिङ्गं — ए; **ऋक्संहिता** ८.४९–५९.

[18] लिङ्गं च वारुणम् — ल्; वारुणं सूक्तमेव च — ए;
अब्लिङ्ग – 'आपो हिष्ठा' इत्यादिसूक्तम् (**तै० संहिता** ५.६.१.)

[19] विष्णुकुम्भे तथा जपेत् — ल्.

[होमः]

[१]कुम्भयोः पश्चिमे भागे [२]अग्निकार्यं समारभेत्।
[३]स्वसूत्रोक्तविधानेन मुखान्तं होममाचरेत् ॥२४॥
[४]बृहत्तदादिषड्ऋग्भिः पालाश[५]समिधापि च।
अन्नेन च घृतेनापि[६] अष्टोत्तरशतं हुनेत् ॥२५॥

[७]तत्र होममन्त्राः —

[८]बृहत्तदादि[९] वसुधा प्राप्यया पुरुषाधमात्[१०]।
[११]निवार्य [१२]पूर्वजं दोषं [१३]जीवपुत्रं [१४]च दापय स्वाहा।
[१५]वसुधाया इदं [न मम] ॥१॥
[१६]बृहद्बुभि महत्तरं शुचिरिन्द्रोऽपि सत्वरम्।
पूर्वस्मिन्संचितं दोषं विध्वंसय विभञ्जय स्वाहा।
इन्द्रायेदं [न मम] ॥२॥
बृहन्नादो बृह[१७]त्तेजो विश्वरूपो विराट्प्रभुः।

---

[१] कुम्भश्च — ए.
[२] प्रतिष्ठाप्य हुताशनम् — ए.
[३] स्वसूक्तोक्त० — ल्, ए.
[४] बृहत्वादादि — ए.
[५] समिधो हुनेत् — ए.
[६] घृतेन च — ल्; घृतेनैव — ए.
[७] 'ल्' मातृकायां 'तत्र होममन्त्राः' इति न दृश्यते।; ततः — ए.
[८] 'बृहत्तदादि वसुधा प्राप्यया पुरुषाधमात्।
निवार्य पूर्वजं दोषं जीवपुत्रं च दापय स्वाहा।
वसुधाया इदं न मम।
बृहद्बुभि महत्तरं शुचिरिन्द्रोऽपि सत्वरम्।
पूर्वस्मिन्संचितं दोषं विध्वंसय विभञ्जय स्वाहा।
इन्द्रायेदं न मम।
बृहन्नादो बृहत्तेजो विश्वरूपो विराट् प्रभुः।
पुरा संचितदोषस्य लयं कुरु महेश्वर स्वाहा॥
विराड्रूपिणे रुद्रायेदं न मम।
हिरण्मयो वेदमयश्चतुर्वक्त्रः प्रजापतिः।
आदिशेषादिसर्पाणां विषं शमयतु स्वाहा॥
प्रजापतय इदं न मम।
शीर्षण्वती लोकमयी दंष्ट्राम्या पिशिताशना।
महिषध्वंसिनी दुर्गा मम पापं व्यपोहतु स्वाहा।
दुर्गाया इदं न मम।
तमोध्वंसी जगच्चक्षुः कालाशी कमलप्रियः।
कालान्तरार्जितं दोषं कालरूपी व्यपोहतु स्वाहा।
सूर्यायेदं न मम।'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १६)
[९] बृहत्तदा — ल्; बृहत्वादो — ए.
[१०] वसुदो यो निवार्य पुरुषोत्तमः — ए.
[११] अनिवार्यं त्विदं दोषं — ए.
[१२] पूर्वभद्दोषं — ल्.
[१३] नवपुत्रं च — ल्.
[१४] ददातु मे — ए.
[१५] वसुधायेदु — ल्; वसुदेवायेदं — ए.
[१६] बृद्रं हि महत्तरं — ल्; सहस्राक्षो महानिन्द्र अहिहा च शचीपतिः। अहिसंहारदोषं मे विध्वंसय — ए.
[१७] ०त्तेज स्वपीस विराट् — ल्; त्तेजस्सुरूपी वसुदः प्रभुः — ए.

[1]पुरा संचितदोषस्य [2]लयं कुरु महेश्वर स्वाहा।
विराड्रूपिणे[3] रुद्रायेदं [न मम] ॥३॥
हिरण्मयो[4] वेदमयश्चतुर्वक्त्रः प्रजापतिः[5] ।
आदिशेषादिसर्पाणां[6] दोषं शमयतु प्रभुः स्वाहा॥
प्रजा[7]पतय इदं [न मम] ॥४॥
[8]शीर्षण्वती लोकमयी दंष्ट्रास्या पिशिताशना[9] ।
महिषध्वंसिनी दुर्गा मम पापं व्यपोहतु स्वाहा।
[10]दुर्गाया इदं [न मम] ॥५॥
[11]तमोध्वंसी जगच्चक्षुः [12]कालाशी कमलप्रियः।
[13]कालान्तरार्जितं दोषं कालरूपी व्यपोहतु स्वाहा।
[14]सूर्यायेदं [न मम] ॥६॥

[15][होमशेषः पिष्टसर्पादीनां प्राणप्रतिष्ठादिसंस्कारः]

[16]एवमन्नेन चाज्येन हुत्वा [शेषं समापयेत्।]
ऊर्ध्वकर्माथ निर्वृत्य[17] शान्तिस्तोत्रं तथा पठेत् ॥२६॥
पिष्ट[18]सर्पाञ्शिशूंश्चैव [19]पिष्टाण्डान्पुरतो न्यसेत्।

---

[1] पूर्व — ए.
[2] लं कुर्यान्म० — ए.
[3] विराड्रूपि — ल्; 'विराड्रूपिणे' इति 'ए' मातृकायां न दृश्यते।
[4] शीर्षण्वतो — ल्; सहस्रशीर्षो — ए.
[5] प्रजासृजः — ल्.
[6] आदिभार्जतसर्पस्य — ल्; अहिसंहारसंभूतं — ए.
[7] ०पत इदं — ल्.
[8] वज्र षडत्र तिलोमथामत् पिशिता० — ल्; वज्रधारी लोकमाता पिशिता० — ए.
[9] पिशिताशिनी — ल्; पिशिताशननाशिनी — ए.
[10] 'ल्' मातृकायां 'दुर्गाया इदं' इति नास्ति।
[11] 'तमोध्वंसी, इत्यारभ्य 'स्वाहा' इत्यन्तं 'ल्' मातृकायां न दृश्यते।; तम ध्वंसी — ए.
[12] कालात्मा — ए.
[13] मया चिरार्जितं — ए.
[14] 'ए' मातृकायां 'सूर्यायेदं' इति नास्ति।
[15] अथ आचार्यः स्विष्टकृज्जयादिहोमशेषं समापयेत्। अथ शूर्पमग्नेः पुरतो विन्यस्य यजमानः, "एतु पूर्वमृतः सर्पः अस्मिन्पिष्टे समाविशेत्।
संस्कारार्थं महाभक्त्या प्रार्थयामि समाहितः॥
ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया।
संस्कारं कुर्वतो भक्त्या मम दोषो विनश्यतु॥"
इति प्रार्थयेत्।
'कुशेनैवाथ संस्पृश्य असुन्वन्तं ततो जपेत्।
प्राणान्क्रमेण संस्थाप्य बलिं कृत्वा विधानतः॥
अध्वर्युस्तानथोद्वास्य नदीतीरं ततो व्रजेत्।
शुद्धभूमौ गन्धकाष्ठैश्चितिं कृत्वा विधानतः।
रुद्रकुम्भोदकेनैव प्रोक्षयेत्तां चितां ततः॥
होमाग्निना दहेत्पश्चाद्रुद्रकुम्भेन सेचयेत्।
तद्भस्म सर्वमादाय महानद्यां विनिक्षिपेत्॥'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १७)
[16] एवमन्नेनाज्येन — ल्; 'ए' मातृकायां २६ श्लोकस्य स्थाने 'होमशेषं समाप्याथ पञ्चशान्तिं जपेन्नरः।' इत्येकमेवार्धं दृश्यते।
[17] ऊर्ध्वतन्तुं निवृत्त्याथ — ल्.
[18] ०सर्पशिशुं चैव — ल्.
[19] पिण्डाण्डं — ए.

कुशेनैवाथ संस्पृश्य [1]असुन्वन्तं तथा जपेत् ।।२७।।
[2]मानस्तोके ततो जप्त्वा [3]नमो अस्तु [4]त्रिभिर्जपेत् ।
प्राणान्क्रमेण संस्थाप्य चितिं कृत्वा विधानतः ।।२८।।
[5]चितोपरि विनिक्षिप्य [6]अब्लिङ्गैर्मार्जयेत्ततः ।
होमाग्निना दहेत्पश्चाद्रुद्र[7]कुम्भेन सेचयेत् ।।२९।।
[8]तद्भस्म सद्य आदाय महानद्यां विनिक्षिपेत् ।

[9][सपत्नीकस्य यजमानस्य विष्णुकुम्भाभिषेकः]

तत्र स्नात्वा शुचिर्भूत्वा [10]स्वपत्न्या सहितस्तदा ।।३०।।
ब्राह्मणान्भोजयेद्भक्त्या आचार्यं च यथाविधि ।
विष्णुकुम्भोदकेनैव मार्जयेद्वारुणादिभिः ।।३१।।
[11]तत्पश्चादभिषेकः[12] स्यात्सर्पशाप[13]निवृत्तये ।

[14][आचार्यादिपूजा]

प्रतिमाभ्यां सवस्त्राभ्यामाचार्यं पूजयेत्सुधीः ।।३२।।
पयस्विनीं च गां दद्यात्सर्पशापविमुक्तये ।

---

[1] सुनुन्वन्तं — लृ; असुन्वन्तस्तथा — ए; **तै० संहिता** ४.२.५.१०.

[2] पुनर्मनस्ततो — लृ; **तै० संहिता** ३.४.११.८.

[3] **तै० संहिता** ४.२.८.७;

[4] त्रियं जपेत् — ए.

[5] चित्योपरि — लृ.

[6] मर्जयेदत लिङ्गकैः — लृ; अब्लिङ्गानि 'आपो हि ष्ठा' इत्यादिसूक्तानि (**तै संहिता** ५.६.१).

[7] ०कुम्भाभिषेचयेत् — लृ.

[8] तद्भस्मास्थि समादाय — ए.

[9] 'ततः स्नात्वा, शुचिर्भूत्वा, आमेन हिरण्येन वा गुलिकश्राद्धं कृत्वा, पत्न्या सह गृहं व्रजेत्।

"विष्णुकुम्भोदकेनाथ मार्जयेद्वारुणादिभिः।"

प्रोक्षणमन्त्राः "आपोहिष्ठ, हिरण्यवर्णाः, पवमानः, हिरण्यशृङ्गम्, उदुत्तमम्, तरणिः, आप्यायस्व, आप उन्दन्तु, आपो वै, आशुश्शानः, जातवेदसे, इन्द्रस्तरस्वान्, पीवोन्नाम्, शुचिन्नु स्तोमम्, इत्यनुवाकाः, प्रातरग्निम्, पञ्च शान्तयः, घोषशान्तिः, महासौरम्, आपो वा इदमग्रे सलिलमित्यनुवाकः, देवस्य त्वा" इति।

ततो विष्णुकुम्भोदकेन सपत्नीकं यजमानमाचार्यः स्नापयेत्।'

(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १७, १८)

[10] म पत्न्या — लृ.

[11] तत्पादभिकं स्यात् — लृ.

[12] भिषेकं — ए.

[13] ०विमुक्तये। — ए.

[14] 'अथ यजमान आचार्यं पूजयित्वा, कलशवस्त्रप्रतिमादीनि दत्त्वा, ऋत्विग्भ्यो दक्षिणां दत्त्वा, अभ्युदयं कृत्वा, पुण्याहं वाचयित्वा ब्राह्मणान्भोजयेत्।'

(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १८)

दीपदानं प्रकर्तव्यमाचार्याय विशेषतः ।।३३।।
दशदानं प्रकुर्वीत ब्राह्मणेभ्यः प्रदापयेत् ।
ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभ्युदयपूर्वकम्[१] ।।
सर्पशान्तिमहत्त्वाच्च जीवत्पुत्रं लभेद्ध्रुवम् ।।३४।।

इति रौरवागमे क्रियापादे सर्पशान्तिविधिः द्विपञ्चाशः पटलः ।

---

[१] ०दक्षिणाभ्याभिपूर्वकम् — ल्.

त्रिपञ्चाशः पटलः

[1] दिनशान्तिकल्पे वास्तुशान्तिशान्तिहोमदिशाहोममूर्तिहोम-जपशान्तिविधिः

[वास्तुशान्तिः]

[अतः] परं प्रवक्ष्यामि वास्तु[2]शान्ति क्रमेण तु।
जलसंप्रोक्षणे चैव वास्तुहोमं तु कल्पयेत् ॥१॥
वर्तमाने तु काले[3] चाप्युदयाद्युदयान्तके[4]।
जलसंप्रोक्षणं कृत्वा वास्तुदेवांस्तु[5] पूजयेत् ॥२॥
आलयादिषु सर्वेषु [6]मार्जनं प्रोक्षणं ततः।
गोमयेनोपलिप्याथ पञ्चगव्यं तु सेचयेत् ॥३॥
नित्यं संपूज्य विधिवत्तत्काले दोषसंभवे[7] ॥
शीघ्रं [8]शान्तिः प्रकर्तव्या [9]न्यायेनानेन कारयेत् ॥४॥
जपशान्ति होमशान्ति वास्तुशान्ति पृथक् पृथक्।
[10]तुरदोषे तु [11]हर्म्येऽथ वास्तुशान्ति प्रकल्पयेत् ॥५॥
अन्यथा [12]दोष उद्भूते जपशान्ति च कारयेत्।
[13]मृद्भाण्डानि विसृज्याथ तैलाज्यादिकपात्रकम्[14] ॥६॥
जलभाण्डं विसृज्याथ [15]दारुपात्रं तु शोधयेत्।

---

[1] अयं पटलः आर. इ. २५१९८ तालपत्रकोशे १५९-१६१ पत्रेषु दृश्यते। वास्तुशान्तिविषये **अंशुमत्काश्यपे** ३; **अंशुमदागमे** ७; **अचिन्त्यविभ्वसादाख्ये** ५०; **अजिते** ८; **पूर्वकामिके** १७, १९, ३४; **पूर्वकारणे** ३, ५६; **उत्तरकारणे** १०; **दीप्ते** १९; **सुप्रभेदे** क्रियापादे २७ पटला द्रष्टव्याः। शान्तिहोमादिविषये **उत्तरकामिके** ३०; **पूर्वकारणे** १४४; **उत्तरकारणे** ४५, ४६, ४८; **योगजे** २२; **वीरे** ५५, ५६ पटला द्रष्टव्याः।

[2] दिनशान्तिक्रमेण – ऐ.

[3] कालं — ऐ.

[4] व्यान्तकम् — ऐ.

[5] देवं तु — ऐ.

[6] मार्जनप्रोक्षणं — ऐ.

[7] दोषमुद्भवम् — ऐ.

[8] शान्तिप्रकर्तव्यं — ऐ.

[9] न्याये न्यायेन — ऐ.

[10] तुरदोषेण — ऐ.

[11] हर्म्याथ — ऐ.

[12] दोषमुद्भूतं — ऐ.

[13] 'मृत्पात्रमग्निना दग्धं शङ्खातः शुध्यतेऽत्र हि।
तक्षणाद्दारवं पात्रं लौहं क्षाल्याश्मताडनात् ॥'
(**मतङ्गपारमेश्वरे** चर्यापादे ६.१९ उ०, २० पू०)

[14] ०ज्यादीनि पात्रकम् — ऐ.

[15] दारुपात्रेण शो० — ऐ.

पाषाणपात्रसंयुक्तं भूमिस्थाने तु योजयेत् ॥७॥
गन्धकाष्ठादिसंयुक्तं सेचयेत्पञ्चगव्यकैः ।
[1]**तण्डुलादिषु सर्वेषु पुण्याहप्रोक्षणं कुरु ॥८॥**
दिन[2]**शान्तिः प्रकर्तव्या तत्काले शान्तिमाचरेत् ।**
अथवा द्रव्यहीने तु[3] **पञ्चगव्येन होमयेत् ॥९॥**
पलाशसमिधा हुत्वा चाज्येन चरुणाहुतिम्[4] **।**
द्रव्यं प्रति विशेषेण षोडशाहुतिमाचरेत्[5] **॥१०॥**
शुद्धान्नं सर्वदेवानां बलिं दद्याद्विशेषतः ।

[6][वास्तुबलिविधिः]

अथ वास्तुबलिं देवानाहुतीश्च[7] **शृणु क्रमात्**[8] **॥११॥**
ब्रह्माणं मध्यमे पूज्य दशाहुतिमथाचरेत् ।
[9]**समर्यादींश्चतुर्दिक्षु**[10] [11]**भवेत् पूर्ववदाहुतिः ॥१२॥**
[12]**आपाद्यष्टकमूर्तीनामष्ट अष्टाहुतीर्हुनेत् ।**
[13]**ईशाद्द्वात्रिंशदेवानां**[14] **पञ्च पञ्चाहुतीर्हुनेत्**[15] **॥१३॥**
[16]**चरक्याद्यष्टमूर्तीनामेकाहुतिमथाचरेत् ।**

---


[1] तण्डुलादीनि सर्वाणि — ऐ.
[2] ०शान्तिप्रकर्तव्यं — ऐ.
[3] ०हीनं तु — ऐ.
[4] चरुणाहुति — ऐ; अत्र कुर्यादिति शेषः ।
[5] एतदनन्तरं ११ श्लोकस्योत्तरार्धात् प्रभृति वास्तुशान्तिप्रस्तावस्य दर्शनात् लेखकेन केनचित् वास्तुमण्डलसंबन्धिश्लोकद्वयं मातृकायां लिखितमिव भाति। श्लोकद्वयमिदं मयमते सप्तमाध्याये दृश्यमानश्लोकद्वयस्य (५७-५८) अर्थतः सदृशं न शब्दतः। तदिदं श्लोकद्वयं प्रकृतेऽप्रसक्तमितीह टिप्पण्यां दीयते।

अष्टांशांशे कस्य घस्तन्मुखाना-
मिष्टं गांशं व्यञ्जनं षोडशानाम् ।
अष्टानां कः षोडशानां स्वभागं
मण्डूकाख्ये स्थण्डिले तैतिलेषु ॥
परमशायिपदे नव मध्यमे
नलिनं लिख्यं विधि तु समर्चयेत् ।
रसपदाश्च सदिक्षु विदिक्षु वै
परिवृता पदमेकमुवास्तुना ॥

[6] एतस्मिन्विषये अजिते ८.२२-३१ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[7] ०नाहुति च — ऐ.
[8] हुने क्रमात् — ऐ.
[9] सूर्यादी चतुर्दिक्षु — ऐ.
[10] अत्र 'पूज्य' इत्यध्याहार्यम् ।
[11] पूर्वमेवाहुतिर्भवेत् — ऐ
[12] आपाद्य अष्टमूर्तीनामष्टा अष्टाहुति — ऐ.
[13] ईशाद्वात्रिंश — ऐ; ईशात् — ईशादारभ्य इत्यर्थः ।
[14] द्वात्रिंशद्देवानाम् इत्यत्र द्वात्रिंशदेवानाम् इति प्रयोगो वृत्तार्थः ।
[15] ०हुति हुनेत् — ऐ.
[16] चरक्यामष्ट — ऐ.

वास्तुमण्डलम्

मण्डूकपदम्



श्लो १४ उ०–२०

[1][वास्तुदेवपूजा होमश्च]

मण्डूकस्य पदं लिख्य तिलैर्लाजैश्च शोभितम् ।।१४।।
कोष्ठं प्रति न्यसेद्भर्भत्रयं[2] तस्य प्रमाणतः ।
प्रमाणं चैव कोष्ठानां प्रत्येकं चतुरङ्गुलम् ।।१५।।
ब्रह्माणं मध्यमे पूर्वं पूजयेद्देशिकोत्तमः ।
पाद्यमाचमनं चार्घ्यं गन्धपुष्पसुधूपकैः ।।१६।।
दीपैश्च परमान्नं तु चरुं तस्य निवेदयेत् ।
[3]समर्यापेशचरकीस्कन्दादींश्च तथैव च ।।१७।।
ब्रह्मपञ्चा[4]वृतान्येवमर्चयेत्तु यथाक्रमम् ।
वास्तुकुम्भं तथैशान्ये विधिवत्स्थापयेत्सुधीः ।।१८।।
वास्तुब्रह्मादिदेवादीन्[5] कुम्भमध्ये समर्चयेत् ।
[6]द्रव्यं प्रति विशेषेण वास्तुमन्त्रेण होमयेत् ।।१९।।
अथवा द्रव्यहीने तु गव्यदूर्वाचरून्हुनेत्[7] ।
तत्काले शान्तिशुद्ध्यर्थं मण्डूकपदमुत्तमम् ।।२०।।

---

[1] अस्मिन्विषये **अजिते** ८.३५-४३ श्लोकास्तदीय-टिप्पणी च द्रष्टव्याः ।

[2] ०द्भर्भैस्त्रयं — ऐ.

[3] सूर्यादापात्स्वमीशानं शरक्या स्कन्दमादिषु — ऐ.; अत्र 'द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसंबध्यते' इति न्यायेनादिशब्दस्य प्रत्येकमन्वयः ।

[4] ०वृतान्तेव अर्चये० — ऐ.

[5] ०देवाभ्यां — ऐ.

[6] 'पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम् ।
बलिनैवेद्यताम्बूलं पुष्पमर्घ्यं प्रणम्य च ।।
स्वनाममन्त्रैरभ्यर्च्य दद्यादध्योदनं बलिम् ।
कुक्कुटाण्डप्रमाणेन बलिमेकं प्रदापयेत् ।।
नमोऽन्तं बलिर्निर्दिष्टः स्वाहान्तेनैव होमयेत् ।
बलिमण्डलमैशान्यां स्थण्डिलं शालिना कुरु ।।
लाजै पुष्पैस्तिलैर्दर्भैः पञ्चचूर्णैरलंकृतम् ।
सकर्चमुदकोपेतं सवस्त्रं सहिरण्यकम् ।।
पलाशपल्लवोपेतं नारिकेलफलैर्युतम् ।
सम्स्थाप्य वास्तुकुम्भं तु परिवारघटं विना ।
अर्चयेद्गन्धपुष्पाद्यैः कलशस्थापनोक्तवत् ।
ब्रह्मादिवास्तुदेवानां समभ्यर्च्य स्वनामतः ।।
नैवेद्यं दापयेत्तत्र धूपदीपादिकं ददेत् ।
बलिमण्डलपूर्वे तु अग्निकार्यं समाचरेत् ।।
आधानादिविवाहान्तमग्निकार्योक्तमार्गतः ।
वह्निमध्ये विशेषेण कल्पयेदासनं क्रमात् ।।
ब्रह्मादिवास्तुदेवानां समभ्यर्च्य विशेषतः ।
दशाहुतिं प्रधानस्य अन्येष्वेकैकमाहुतिम् ।।
पलाशसमिधा चैव हुत्वा ब्रह्मादिमन्त्रतः ।।
त्रयाधिकं च पञ्चाशद्देवताभ्यः स्वनामतः ।
घृतं तत्संख्यया हुत्वा चरुं तत्संख्यया तथा ।।
तण्डुलं तिलमिश्रेण हुत्वा तत्संख्यया बुधः ।
द्रव्यान्ते व्याहृतिं हुत्वा महास्त्रेण शतं हुनेत् ।।
सर्वद्रव्यं तु संगृह्य स्विष्टकृद्धोममाचरेत् ।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।।
समिदाहुतिं च जुहुयाद्व्याहृतीभिस्तदा हुनेत् ।
यदस्य कर्मणश्चेति हुनेत्पूर्णाहुतिं पुनः ।।'

अंशुमदागमे — ७.१७ उ० — ३०.

[7] ०चरुंहुनेत् — ऐ.

[1] [पर्यग्निकरणम्]

अश्वत्थपत्रसंयुक्तं शुष्कदर्भेण संयुतम्।
[2]तिलं सिक्तं तु [3]बद्ध्वाज्ये बाहुमात्रप्रमाणकम् ॥२१॥
पर्यग्निकरणं कृत्वा गर्भगेहादिमण्डपे।
सर्वत्र सेचयेद्गव्यं [4]घण्टाघोषसमन्वितम् ॥२२॥
व्यपोह्य निर्ऋतिदेशे तु स्नानं कृत्वा विधानतः।
सकलीकरणं कृत्वा शान्तिहोमेन शाम्यति ॥२३॥
जलसंप्रोक्षणं चैव शान्तिहोमेन शाम्यति।

[5] [शान्तिहोमः]

शान्तिहोमं प्रवक्ष्यामि नित्यशान्तौ विशेषतः[6] ॥२४॥

---

[1] 'दर्भैः पलाशपत्रैश्च शोषितैर्बन्धयेद्बुधः।
तदग्नौ दीपयित्वा तु प्रासादं मण्टपं तथा।
प्राकारं गोपुरस्थानं पर्यग्निकरणं कुरु।
बाह्ये तदग्निमुद्वास्य स्थापितैस्तु जलैर्बुधः ॥
सर्वत्र प्रोक्षयेद्विद्वाञ्शुची वो हव्यमन्त्रतः।
(**अंशुमत्काश्यपे** ३.१५ उ०–१७);
'अश्वत्थोदुम्बरान्ब्रह्मपत्राञ्शुष्कान् सदर्भकैः।
तद्वास्तुशोधनं बध्वा सिद्धार्थं तिलसंयुतम् ॥
वह्निस्थं च पदस्थं च कुम्भस्थं हृदये यजेत्।
तद्वास्तुशोधनं ग्राह्य संप्रोक्ष्य हृदयेन तु।
तदग्रे वह्निमारोप्य संप्रज्वाल्याग्निबीजतः ॥
प्राकाराभ्यन्तरादीनि भवनं यागमण्टपम्।
जयघण्टारवोपेतं पर्यग्निकरणं कुरु ॥
पञ्चगव्येन संप्रोक्ष्य हृदयेन तु मन्त्रतः।
वास्तुकुम्भस्थतोयेन शुद्धैरुत्थेति मन्त्रतः ॥
प्रोक्षयेत्तु विशेषेण उल्कां त्यक्त्वाथ तद्बहिः।
स्नानं कुर्याद्विधानेन मार्जनं प्रोक्षणं कुरु ॥
(**अंशुमदागमे** ७.३१–३६ पू०);
पलाशोदुम्बराश्वत्थपत्रशुष्कान्सदर्भकैः।
बध्वाज्येन सदा सिक्त्वा तिलसिद्धार्थदर्भयुक् ॥
संप्रोक्ष्य हृदयेनैव संप्रज्वाल्य तदग्निना ॥
प्राकाराभ्यन्तरं सर्वं भवनं यागमण्टपम् ॥
पर्यग्निकरणं कृत्वा वर्धन्यास्रावतोययुक्।
उल्कां त्यक्त्वा तु तद्बाह्ये स्नानं कुर्याद्विशेषतः।
जलभाण्डस्थतोयेन सर्वत्र प्रोक्षयेद्बुदा।
(**पूर्वकारणे** ५६.३० उ०–३३);
'पर्यग्निकरणं वक्ष्ये याज्ञिकवृक्षसंभवम्।
पलाशपर्णशाखां च आबध्य घृतसेचनम् ॥
वस्त्रमाच्छादनं कृत्वा पापदेवं समर्चयेत्।
पञ्चवक्त्रं चतुर्बाहुं दशश्रोत्रं सुनासिकम् ॥
कृष्णवर्णं महाभीमं रक्तदृष्टिभयंकरम्।
दंष्ट्राकरालवदनं भ्रुकुटीमुखभीषणम् ॥
महापापकरूपं तु ध्यायेन्मन्त्रैश्च पूजयेत्।
कुण्डाग्निज्वलनं शीर्षे स्पर्शाहुति समाचरेत् ॥
पञ्चब्रह्मषडङ्गैश्च विमुखार्घ्यं समाचरेत्।
परिचारकमाहूय गन्धवस्त्रैरलंकृतम् ॥
पाददेशात्समादाय यत्र स्नानं समाचरेत्।
तावत्संशोधयेत्पश्चादैशान्ये विसृजेच्छुचिः ॥
गव्येन प्रोक्षयेत्पश्चाच्छान्तिहोमं समाचरेत्।'
(**उत्तरकारणे**, ४५.१६–२२ पू०)

[2] सितसित्तं तु — ऐ.
[3] बध्वाज्यं — ऐ.
[4] खण्डघोष० — ऐ.
[5] 'शान्तिहोममहं वक्ष्ये शृणुष्वैकाग्रमानसः।
सदाशिवादिदेवानां परिवाराणां तथैव च ॥
प्राकाराभ्यन्तरे देवस्वनामाद्यैश्च होमयेत्।

नित्यपूजाप्रकारेण नित्यपूजां समर्चयेत् ।
तत्काले दोष उद्भूते[1] तत्र शान्तिं समाचरेत् ॥२५॥
मार्जनप्रोक्षणं कृत्वा शिवाग्रे च विशेषतः ।
गोमयालेपनं कृत्वा चतुःसंस्कारसंयुतम् ॥२६॥
शालि[2]स्थण्डिलं संकल्प्य तदूर्ध्वे लाजयुक्तकम् ।
तन्मध्ये [3]कुम्भं संस्थाप्य वर्धनीं तस्य वामके ॥२७॥
इन्द्रादीशानपर्यन्तं परिवारं तु[4] पूजयेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥२८॥
अश्वत्थसमिधा चैव पञ्चगव्यं तु होमयेत् ।
द्रव्यं प्रति विशेषेण षोडशाहुतिमाचरेत् ॥२९॥
जयाद्यादि विशेषेण नित्यशान्तौ[5] समाचरेत् ।
तुर[6]कार्ये तु संयुक्तं युक्तायुक्तं विशेषतः ॥३०॥
शान्ति[7]होम इति प्रोक्तो दिशा[8]होमस्ततोच्यते[9] ।

[10][दिशाहोमः]

दिशाहोममतो वक्ष्ये सद्यः प्रोक्षणमाचरेत् ॥३१॥
शिवाग्रे लेपनं कृत्वा दक्षिणे पश्चिमेऽपि वा ।
उत्तरे तु विशेषेण लेपयेत्तु क्रमेण तु ॥३२॥
पूर्वे शालिं[तु]संस्थाप्य पद्ममष्टदलं लिखेत् ।
शिखरे [11]पूर्वदेवो यस्तद्देवकुम्भमाचरेत् ॥३३॥
दक्षिणे दक्षिणामूर्ति[12] लिङ्गोद्भवं तु पश्चिमे ।
[13]दुर्गां चाप्युत्तरे स्थाप्य चतुष्कुम्भं तु स्थापयेत् ॥३४॥

द्विगुणं पूजयेत्तत्र अर्चनोक्तक्रमेण तु ॥
शान्तिहोममिति प्रोक्तं सर्वदेवांश्च होमयेत् ।'
(योगजे २२.१–३ पू०)

[1] ०शान्तिविशेषतः — ऐ.
[2] दोषमुद्भूतं — ऐ.
[3] ०स्थण्डिलसंकल्प्य — ऐ.
[4] कुम्भसं० — ऐ.
[5] परिवारेषु — ऐ.
[6] ०शान्ति — ऐ.
[7] ०कार्येण — ऐ.
[8] ०होममिति प्रोक्तं — ऐ.
[9] ०होमं ततो — ऐ.
[10] ततः–उच्यते–तत उच्यते। ततः संधिरार्षः।
'दिशाहोमं ततः शृणु ।
इन्द्राद्यैशानपर्यन्तमष्टदिक्षु च देवताः ॥
स्थण्डिलं सैकतं कृत्वा चतुरश्रं समन्ततः ।
शेषाण्यन्यानि कार्याणि अग्निकार्योक्तमाचरेत् ॥
दिग्देवान्पूजयेत्तत्र दिशाहोमं तु पूजयेत् ॥
(योगजे – २२.८-१० पू०)
[11] पूर्वतन्देवं यद्देवं — ऐ.
[12] ०मूर्त — ऐ.
[13] दुर्गायामुत्तरे — ऐ.

राजोपचारवत्पूज्य प्रत्येकमग्निकार्यकम् ।
अश्वत्थं पूर्वदिग्भागे [1]वञ्चुलां दक्षिणे तथा ।।३५।।
अपामार्गं तु पश्चिम्यां[2] मायूरमुत्तरे तथा ।
गोधूमं पूर्वदिग्भागे दक्षिणे पञ्चगव्यकम् ।।३६।।
पश्चिमे दधिसंयुक्तमुत्तरे घृतसंयुतम् ।
अभावे [3]सर्वतो द्रव्यमश्वत्थं पञ्चगव्यकम् ।।३७।।
प्रत्येकं षोडशं हुत्वा तत्संख्याहुतिमाचरेत् ।
एकयामे[4] प्रकर्तव्यं [5]द्वियामे द्विगुणं हुनेत् ।।३८।।
अष्टोत्तरशतं हुत्वा दिनान्ते चैव होमयेत् ।
अर्धयामे विशेषेण [6]द्विगुणं चैव होमयेत् ।।३९।।
तत्तद्देवं तु संपूज्य तत्तत्कुम्भाभिषेचनम् ।
[7]दिशाशान्तिक्रमः प्रोक्तो मूर्तिहोमं ततः शृणु ।।४०।।

[8][मूर्तिहोमः]

दिनशान्तावथो[9] वक्ष्ये [10]मूर्तिं सद्यः समाचरेत् ।
शिवाग्रे स्थण्डिलं कल्प्य नवकोष्ठं प्रकल्पयेत् ।।४१।।
तन्मध्ये [11]कुम्भान्संस्थाप्य [12]सूत्रवस्त्रादिसंयुतम् ।
देवताभिमुखं कृत्वा नालिकेरं तु विन्यसेत् ।।४२।।

---

[1] वञ्चला — ऐ.
[2] पश्चिमायामित्यत्र 'पश्चिम्यां' इति प्रयोगः ।; रौरवोत्तरे १४.७ पू० टिप्पणी द्रष्टव्या ।
[3] सर्वत द्रव्यं — ऐ.
[4] ०यामं — ऐ.
[5] द्वियामं — ऐ.
[6] द्विगुणम्यैव — ऐ.
[7] ····नशान्तिक्रमं प्रोक्तं — ऐ.
[8] 'अथातः संप्रवक्ष्यामि मूर्तिहोमविधिक्रमम् ।
पूर्ववद्यागमध्ये च वेदिकां चतुरश्रकाम् ।।
तत्पूर्वे कुण्डमेवोक्तं स्थण्डिलं वा प्रकल्पयेत् ।
धान्यपुञ्जैरलंकृत्य पद्ममष्टदलं लिखेत् ।।
शिवकुम्भं न्यसेन्मध्ये वर्धनीं वामपार्श्वके ।
वज्रादि दिशि कुम्भांश्च स्थापयेत्पूजयेत्क्रमात् ।।
अघोरास्त्रं समभ्यर्च्य रथाङ्गांश्च दशायुधान् ।
आवाह्य गन्धपुष्पैश्च नैवेद्यं धूपदीपकम् ।।
अग्निं पूर्ववदाराध्य अघोरास्त्रं समर्चयेत् ।
आज्येन होमयेत्पश्चात्पलाशाद्यैर्हुनेत्ततः ।।
क्षीरेण सहितं चैव तथैव तिलहोमकम् ।
दूर्वायुक्तं हुनेच्चैव पयसा मिश्रितं हुनेत् ।।
मधुयुक्तं घृतं क्षीरमिश्रितं चरुं होमयेत् ।
सहस्रादि शतान्तं च यथाशक्त्या हुनेत्ततः ।।
दशांशं होमयेच्चैव पूर्णाहुतिं समाचरेत् ।
घटे संयोजयेत्पश्चादग्निमुद्वासयेत्ततः ।।
प्रधानघटमादाय अम्भसा प्रोक्षयेदिति ।
सर्वशान्तिकरं पुण्यं सर्वाभीष्टफलप्रदम् ।।
सर्वव्याधिप्रशमनं सर्वदोषनिवारणम् ।'
(उत्तरकारणे ४८.१–१० पू०)
[9] ०शान्तिमथो — ऐ.
[10] अत्र मूर्तिरित्यनेन मूर्तिहोमो लक्ष्यते ।
[11] कुम्भसं० — ऐ.
[12] सूत्रादिवस्त्र० — ऐ.

ईशानमन्त्रं संपूज्य [1]भवादींस्तु विशेषतः।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥४३॥
पलाशसमिधा [2]युक्तं सद्येनैव तु [3]होमयेत्।
आज्येनैव तु [4]संयुक्तं वामदेवेन [5]होमयेत् ॥४४॥
पञ्चगव्येन संयुक्तं शिवास्त्रेणैव होमयेत्।
प्रत्येकं षोडशं हुत्वा यामान्ते द्विगुणं चरेत् ॥४५॥
ततः परं विशेषेण अष्टोत्तरशताहुतिः।
[6]शिवसंकल्पसंयुक्तमावश्यं तु जपेद्बुधः ॥४६॥
उषःप्रातश्च मध्याह्ने सायाह्ने [7]चार्धयामके।
जलसंप्रोक्षणे[8] चैव वास्तुहोमं तु कारयेत् ॥४७॥
दिशाशान्तिं च मूर्तिं च जपशान्तिं च कल्पयेत्।

[9][जपशान्तिः]

जपशान्तिमथो[10] वक्ष्ये [11]दैवज्ञगुरुसंयुतम् ॥४८॥
आगमोक्तप्रकारेण तत्काले जपमाचरेत्।
वेदमन्त्रेण संयुक्तं जपं कृत्वा विशेषतः ॥४९॥
जपान्ते चैव पुण्याहं लिङ्गं तु प्रोक्षयेत्ततः।
तत्काले शान्तिराचर्या[12] दिनवारं विना सुधीः[13] ॥५०॥
तत्काले त्याज्यसंयुक्तं विना शान्तिं समाचरेत्।
शीघ्रं [14]शान्तिः प्रकर्तव्या घटिकात्रयसंयुतम् ॥५१॥

इति रौरवागमे क्रियापादे[15] दिनशान्तिकल्पे वास्तुशान्तिशान्तिहोम-दिशाहोममूर्तिहोम[जपशान्ति]विधिः त्रिपञ्चाशः पटलः।

---

[1] भवादीनां विशेषतः — ऐ.
[2] हुत्वा — ऐ.
[3] हूयते — ऐ.
[4] हुत्वा तु — ऐ.
[5] हूयते — ऐ.
[6] **शुक्लयजुर्वेदे** ३४.५; **शिवसंकल्पोपनिषत्** — ५.
[7] चार्थयामके — ऐ.
[8] ०प्रोक्षणं — ऐ.
[9] 'अथ मन्त्रजपं कुर्यात्स्नानं चोदितभस्मना।
मन्त्रकाय उदग्वक्त्रः पूर्वास्यो वाक्षमालिकः ॥
शिवाणुमथवाघोरं यद्वा पाशुपतं वरम्।
अघोरास्त्रं शिवास्त्रं वा ब्रह्माण्यङ्गानि वा पुनः ॥
मेलामन्त्रं तु यद्वा स्यात्परार्धान्तं शतादितः।
जपेत्तदनुरूपेण मितग्रासो हविष्यभुक् ॥
अनाहारोऽथ भिक्षाशी चरुभुक् क्षीरपोऽपि वा।
शाकयवकपिण्याककन्दमूलफलाशनः ॥
स्मरंस्तद्देवतारूपं जपं तस्मै निवेदयेत्।
जप एवं समाख्यातः'।
(**उत्तरकामिके** ३०.२७–३१)
[10] ०शान्तिमहो — ऐ.
[11] देवज्ञ — ऐ.
[12] शान्तिमाश्रित्य — ऐ.
[13] ०वार विना सिधीः — ऐ.
[14] शान्तिप्रकर्तव्यं — ऐ.
[15] इति रौरवोक्तप्रकारेण उपागमयुक्ते क्रियापादे — ऐ.

चतुःपञ्चाशः पटलः

[1]सर्वशान्तिः

[2]गर्भार्धमण्डपे चैव द्वारे च बलिपीठके।

---

[1] अयं पटलः आर. इ. २५१९८ मातृकायां २२८ पत्रे दृश्यते। एतस्मिन्विषये **उत्तरकामिके** ३०. ३१; **पूर्वकारणे** १४४; **वीरे** ८७; **संतानसंहितायां** ५६. ६६; **सुप्रभेदे** क्रियापादे ५५; **सूक्ष्मे** ४६ पटला द्रष्टव्याः।

[2] 'प्रासादे च सभास्थाने गोपुरे मण्डपे तथा।
परिवारालये चैव मधुनीडसमुद्भवे॥
ग्रामस्य नाशनं चैव नृपतेर्मरणं ध्रुवम्।
व्यपोह्य मधुनीडं तत्प्रोक्षयेच्छुद्धवारिणा॥
शिवं संपूज्य विधिवद्दिशाहोमं तु कारयेत्।
मध्वाज्यपयसा धीमान्स्नापयेत्परमेश्वरम्॥
समिद्भिर्निम्बसंभूतैः शान्तिहोमं तु कारयेत्।
तदन्ते स्नपनं कुर्यादेवं सप्ताहमाचरेत्॥
उत्सवं कारयेदन्ते सप्ताहं त्रियहं तु वा।

(**सूक्ष्मे** ४६. १२८ उ०–१३२);

प्रासादमण्टपाद्येषु वल्मीकं यत्र दृश्यते।
रक्तकन्यासमुत्पन्ने प्रासादे मधुसंश्रिते॥
प्रविष्टे पिपीलिकोलूके प्रासादाभ्यन्तरे तथा।
तत्प्रदेशं खनित्वा तु पूरयेच्छुद्धपांसुभिः॥
पञ्चगव्येन संप्रोक्ष्य पुनः शान्ति तु कारयेत्।

(**सुप्रभेदे** क्रियापादे ५५. ५३उ०–५५);

'देवालयोपरिष्टात्तु नृपस्य भवनोपरि।
श्वारोहे तत्र रुदिते राजा मरणमाप्नुयात्॥
तं हत्वात्र विसृज्याथ पुण्याहं वाचयेद्बुधः।
अश्वत्थसमिधा चैव शान्तिहोमं च कारयेत्॥
ब्राह्मणान्भोजयेत्तत्र कुर्यात्तु स्नपनं महत्।
तदन्ते चोत्सवं कुर्याद्वास्तुदेवान्प्रपूजयेत्॥'

(**पूर्वकारणे** १४४. १४२–१४४);

'देवानामालये वाथ नृपस्यैव गृहे तथा।
विद्याभियोगशालायां सभास्थाने च चत्वरे॥
मठे तटाकतीरे च रथ्यायां कूपतीरके।
प्रतिक्रिया च कर्तव्या रक्तकन्यासमुद्भवे॥
देवानामालये जाते राजा मरणमाप्नुयात्।
संजाते राजभवने तद्राष्ट्रस्यैव नाशनम्॥
विद्याभियोगशालायां रक्तकन्यासमुद्भवे।
तदा मुञ्चति तद्ग्रामं वाग्देवता प्रजापते॥
सभास्थाने समुत्पन्ने ग्रामनाशो न संशयः।
चत्वरे च समुत्पन्ने प्राणिनां नाशनं भवेत्॥
मठे चैव समुत्पन्ने ग्रामदूषणमादिशेत्।
तटाकतीरे संजाते तदा मुञ्चति पद्मजा॥
रथ्यासमुद्भवे स्त्रीणां बालानां नाशनं भवेत्।
कूपतीरे तु संजाते दुःखार्ता ग्रामवासिनः॥
तत्प्रदेशं खनित्वा तु पूरयेच्छुद्धवालुकैः।
पुण्याहं वाचयित्वा तु ब्राह्मणांस्तत्र भोजयेत्॥
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयन्।
शान्तिहोमं ततः कृत्वा पलाशसमिधा पुनः॥
तदन्ते स्नपनं कुर्यादेवं सप्ताहमाचरेत्।'

(**पूर्वकारणे** – १४४.१३०–१३९ पू०);

'कुक्कुरैः कुक्कुटैश्चैव खरसूकरवानरैः।
स्पर्शिते लिङ्गबिम्बे च प्रविष्टे गर्भगेहके॥
प्रवर्तते महामारी तद्ग्रामं च विनश्यति।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु॥
गोमयालेपनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः।
स्नपनं कारयित्वा तु शान्तिहोमं ततः कुरु॥
लिङ्गं वा प्रतिमा स्पृष्टमृतुस्त्रीभेकतस्करैः।
गर्भगेहप्रविष्टे वा जनानां नाशनं भवेत्॥
मृद्भाण्डानि विसृज्याथ गोमयेनोपलेपयेत्।
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः॥
स्नपनं कारयेत्पश्चाद्विल्वपत्रेण घर्षयेत्।
मूर्तिहोमं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः॥
अन्तर्मण्डलशालादिरभिस्पृष्टो विशेषतः।
संप्रोक्ष्य पञ्चगव्येन पुण्याहं वाचयेत्ततः॥'

(**पूर्वकारणे** १४४.५६–६२);

परिवारालये चैव [1]ध्वजस्तम्भस्य देशके ॥१॥
पचनालयदेशे तु सभास्थाने तु गोपुरे।
शिखरे मण्डपे चैव कूपतीरे तटाकके ॥२॥
[2]धामवृक्षे तु शालायां द्रव्यकोशे वृषेऽथवा।
प्रासादे भित्तिदेशे तु उपगोपुर एव[3] च ॥३॥
[4]उत्सवमण्डपे चैव तीर्थमण्डप [5]अङ्गणे।
सोपाने दीपदेशे तु अन्यदेवालयेऽपि वा ॥४॥
गोमायु[6]शिथिले चैव वल्मीके मधुपञ्जरे।
श्वारोहे रुदिते तत्र कृकलासे तु [7]कच्छपे ॥५॥
रक्तकन्याश्वेत[8]कन्यामण्डूकश्वेतवायसैः[9] ।
गर्दभैः कुक्कुटैश्चैव सूकरैर्वनचारिभिः ॥६॥
[10]अन्यैस्तु दुष्टे[11] जन्तूनां शान्तिं तत्रैव कारयेत्।
पूर्वे तु द्रव्यनाशः[12] स्यादाग्नेय्यामग्निदग्धकम्[13] ॥७॥
दक्षिणे कलहं विद्यान्नैर्ऋते राक्षसाद्भयम्[14]।
वारुणे वर्षे[15]नाशः स्याद्वायव्ये चण्डमारुतः[16] ॥८॥
सौम्ये तु धननाशः[17] स्यादैशान्ये गेहनाशनम्।
मध्ये तु राजदोषः[18] स्यादन्तराले महद्भयम्[19] ॥९॥
[20]कच्छपे जलसंजाते तत्र दोषो[21] न विद्यते।
तद्दोषशमनार्थाय पुण्याहं पञ्चगव्यकैः ॥१०॥
स्नपनं शान्तिहोमं च वञ्जुलासमिधा हुनेत्।
[22]गुडूचीसमिधा चैव [23]दग्धे तु [24]लवणं हुनेत् ॥११॥

'मितकाकसमुद्भूते राष्ट्रक्षोभो भवेत्सदा।
स्नपनं तत्र कुर्वीत ब्राह्मणान्भोजयेत्ततः' ॥
(पूर्वकारणे १४४. ६७)

[1] ध्वजकम्बस्य — ऐ.
[2] धर्मवृक्षे — ऐ.
[3] ०गोपुरमेव — ऐ.
[4] उत्सवे — ऐ.
[5] अङ्कणे — ऐ.
[6] ०शिथिली — ऐ.
[7] कृश्चपे — ऐ.
[8] ०कन्यमण्डूक — ऐ.
[9] ०वायसे — ऐ.
[10] अन्ये तु दुष्टजन्तूनां — ऐ.
[11] दुष्टे-दूषिते अन्तर्भावितणिजर्थः।
[12] ०नाशं — ऐ.
[13] दग्धकम् — दाहः भावे क्तप्रत्ययः।
[14] राक्षसा भयम् — ऐ.
[15] ०नाशं स्याद् — ऐ.
[16] ०मारुतम् — ऐ.
[17] ०नाशं — ऐ.
[18] ०दोषं — ऐ.
[19] 'महद्भयम्' इति न समस्तम् 'महद् भयम्' इति व्यस्तं पदम्।
[20] कश्चपे — ऐ.
[21] दोषं — ऐ.
[22] गलूचि — ऐ.
[23] दग्धे - दाहे भावे क्तप्रत्ययः।
[24] लवणे — ऐ.

कार्पासबीजसंयुक्तं सर्षपं मधुसंयुतम् ।
सहस्रमुपचारेण स्नपनं च विशेषतः ॥१२॥
तत्स्थाने [1]मार्जनं प्रोक्ष्य पञ्चगव्यं प्रपूरयेत् ।
[2]शिवसंकल्पसंयुक्तं स्वस्तिवाचकसंयुतम् ॥१३॥
तत्तत्स्थाने तु संयुक्तं शान्तिहोमं तु कारयेत् ।
शिवं संपूज्य विधिवद्ब्राह्मणान्मिष्टभोजनम्[3] ॥१४॥
गन्धमाल्यैरलंकृत्य श्वेतताम्बूलसंयुतम् ।
नववस्त्रेण संयुक्तं शक्त्या वित्तानुसारतः ॥१५॥

इति रौरवे क्रियापादे[4] सर्व[5]शान्ति [विधिः]चतुःपञ्चाशः पटलः ।

---

[1] मार्जन० — ऐ; 'मार्जनं' मार्जनोदकमित्यर्थः ।;
'गोक्षुरं महदेवी च विष्णुक्रान्तिः कृताञ्जलिः ।
शिरीषेन्दीवरं रात्रिरेभिर्मार्जनमुच्यते ॥'
(**उत्तरकामिके** ४.११० उ०, १११ पू०)

[2] **शुक्लयजुःसंहिता** ३४.५; **शिवसंकल्पोपनिषत्** — ५.

[3] ब्राह्मणान् विधिवत्संपूज्य तेभ्यो मिष्टभोजनं देयमिति व्याख्येयम् ।

[4] इति रौरवोक्तप्रकरणे — ऐ.

[5] ०शान्त्यर्थपटलः — ऐ.

पञ्चपञ्चाशः पटलः

[1] जीर्णोद्धारविधिः

[2] **भ्रूरेखा पक्ष्मरेखा च आस्यरेखा च नासिका।**
सर्वाङ्गानां क्षयं दृष्ट्वा प्रतिमां च विसर्जयेत् ॥१॥
लोहजानां तु सर्वेषामङ्गहीने तु संभवे।
तद्वदङ्गं पुनः कार्यं मुखहीने[3] न कारयेत् ॥२॥
[4] **नाभिमध्यमहीने तु संधानं न समाचरेत्।**
मृण्मये [5]वर्णहीने चेत्पुनः कृत्वा समारभेत् ॥३॥
छिन्नं भिन्नं पुनर्ग्राह्यं जीर्णं चेत्तु नवीकृतम्।
[6]प्रतिमे शूलहीने[7] तु जीर्णोद्धारं तु कारयेत् ॥४॥

---

[1] अयं पटलः आर्. इ. २००५२ इत्यङ्किते तालपत्रकोशे १३ पत्रे; आर्. इ. २००५८ इत्यङ्किते तालपत्रकोशे (टि. ७६६) ४३, ४४ पृष्ठयोर्दृश्यते। एतस्मिन्विषये **अंशुमत्काश्यपे** ९६; **अंशुमदागमे** ५६; **पूर्वकारणे** १३४; **सुप्रभेदे** क्रियापादे ५४; **सूक्ष्मे** ४८ पटला द्रष्टव्याः।

[2] 'लोहजानां तु बिम्बानामङ्गहीने तु संभवे।
तदङ्गं पूर्ववत्कृत्वा स्थापनं सम्यगाचरेत् ॥
हिक्काद्यूर्ध्वे तु विच्छिन्ने त्यक्त्वान्यं परिपठ्यते।
नलकादिषु विच्छिन्ने पादयोर्हस्तयोस्तु वा ॥
तेनैव जीर्णलोहेन पूर्ववद्बिम्बमाचरेत्।
अब्दत्रयं तु तल्लोहं खात्वा भूमौ विशेषतः ॥
पञ्चादग्नौ द्रुतं कृत्वा पुनर्बिम्बं समाचरेत्।
मृण्मये वर्णहीने तु पुनः कृत्वा तु पूर्ववत् ॥
कल्करज्जुमृदो वापि भिन्नछिन्नादिसंभवे।
तत्तदङ्गं पुनः कार्यं शूलं चैव तथैव हि ॥
दारुशूलेष्टका वापि शूलदोषविहीनकम्
तदेव संग्रहेद्धीमान्दोषाढ्यं परिवर्जयेत्।'
(**अंशुमत्काश्यपे** ९६.१४–१९);
'जीर्णितस्यैव बिम्बस्य उद्धारं चाधुना शृणु।
शिरोबाहू तथा पादौ हीनौ चेत्परिवर्जयेत् ॥
जीर्णे लोहे तु तत्कार्यं तत्प्रमाणेन पूर्ववत्।
कृत्वा तु स्थापयित्वा तु पूर्ववत्सम्यगर्चयेत् ॥
भ्रूरेखा पक्ष्मरेखा च आस्यरेखा च नासिका।
एतासां च क्षयं दृष्ट्वा प्रतिमां परिवर्जयेत् ॥
तद्वेरं तु परिग्राह्य समुद्रे तु विनिक्षिपेत्।'
(**पूर्वकारणे** १३४.२९–३२ पू०);
'प्रतिमानां ततः शृणु।
भ्रूरेखा पक्ष्मरेखा च चक्षूरेखा च नासिका ॥
सर्वाङ्गानां क्षयं दृष्ट्वा प्रतिमां च विसर्जयेत्।
लोहजानां तु सर्वेषामङ्गहीने तु संभवे ॥
तद्वदङ्गं पुनः कार्यं मुखहीनं न कारयेत्।
नाभिमध्यमहीने तु संधानं न समाचरेत् ॥
मृण्मये वर्णहीने चेत्पुनः कृत्वा समारभेत्।
छिन्नं भिन्नं पुनर्ग्राह्यं जीर्णं चेत्तु नवीकृतम् ॥
प्रतिमं शूलहीनं चेज्जीर्णोद्धारं तु कारयेत्।'
सुप्रभेदे (आर्. इ. २००५२) १९ पत्रे

[3] ०हीनं — ओ, औ.

[4] नाभी० — ओ.

[5] वज्रहीने — औ.

[6] प्रतिमं — ओ; प्रतिमा — औ; प्रतिमा-शब्दस्यात्र क्लीबे प्रयोगः।

[7] ०हीनं — ओ, औ.

[१]शैलजं ध्रुवबेरं यदङ्गहीनं भवेद्यदि ।
तद्बेरं च समादाय समुद्रे प्रक्षिपेत्तथा ॥५॥
शिलामन्यां[२] गृहीत्वाथ[३] शिलाग्रहणमार्गतः ।
स्थापयित्वा विशेषेण पूर्ववत्कारयेद्बुधः ॥६॥
मृण्मयं दारुजं वापि लोहजं तु शिलामयम् ।
स्थापितं पूजितं बेरं जीर्णं वा हीनमेव वा ॥७॥
छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत् ।
पूजयेद्यदि मोहेन राजराष्ट्रं विनश्यति ॥८॥
तस्माद्बेरं समुद्धृत्य जले वापि स्थलेऽपि वा ।
प्रक्षिप्यात्र समाच्छाद्य [४]प्रतिमां स्थापयेन्नवाम्[५] ॥९॥
मृण्मयं चेन्मृदा[६]कुर्याद्दारुभ्रेद्दारुणा[७] कुरु ।
लोहजं यदि लोहेन [८]शिलया शैलजं कुरु[९] ॥१०॥

इति रौरवे क्रियापादे जीर्णोद्धारविधिः पञ्चपञ्चाशः पटलः ।

---

[१] 'शैलं च ध्रुवबेरं यदङ्गहीनं भवेद्यदि ।
तद्बेरं च समादाय समुद्रे प्रक्षिपेत्ततः ॥
शिलामन्यां गृहीत्वा तु शिलासंस्थापनं यदि ।
स्थापयित्वा उपाङ्गं तु पूर्ववत्कारयेद्बुधः ॥'
(**ललितागमे** आर्. इ. २००५२) १८ पत्रे);
'मृण्मयं दारुजं वापि लोहजं वा शिलामयम् ।
स्थापितं पूजितं बेरं जीर्णं वा हीनमेव वा ॥
छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत् ।
पूजयेद्यदि मोहेन राजा राज्यं विनश्यति ॥
तस्माद्बेरं समुद्धृत्य जले वापि स्थलेऽपि वा ।
प्रक्षिप्य मृद्भिराच्छाद्य प्रतिमां कारयेन्नवाम् ॥
मृण्मयं चेन्मृदा कुर्याद्दारु चेद्दारुणा कुरु ।
लोहजं यदि लोहेन शिलायां शैलजं यदि ॥'
(**बिम्बागमे** (आर्. इ. २००५२) ७ पत्रे);
मृण्मयं दारुजं वापि लोहजं वा शिलामयम् ।
स्थापितं पूजितं बेरं जीर्णं वा भिन्नमेव वा ॥
छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत् ।
पूजयेद्यदि मोहेन राजराष्ट्रं विनश्यति ॥
तस्माद्बेरं समुद्धृत्य जले वापि स्थलेऽपि वा ।
प्रक्षिप्य मृद्भिराच्छाद्य प्रतिमां कारयेन्नवाम् ॥
मृण्मयं च मृदा कुर्याद्दारु चेद्दारुणा कुरु ।
लोहजं यदि लोहेन शिला चेच्छैलजं स्वयम् ॥
(**सूक्ष्मे** ४८.११–१४)

[२] शिलामान्यां — ओ; शिलामन्यं — औ.
[३] गृहीत्वर्थं — ओ, औ.
[४] प्रतिमं — ओ; प्रतिमा — औ
[५] ०न्नवम् — ओ, औ.
[६] कार्या — ओ.
[७] दारुजेद्दारुणा — औ.
[८] शिलायां — ओ; शिलाया — औ.
[९] 'ओ' मातृकायां '५–१०' श्लोकाः 'रौरवे' इति निर्दिश्य मयमते उद्धृता इति लिखिताः ।

षट्पञ्चाशः पटलः

[1] प्रायश्चित्तविधिः

[2] **अथातः संप्रवक्ष्यामि प्रायश्चित्तविधिक्रमम् ।**

[3] [प्रायश्चित्तशब्दार्थः]

प्रायो [4] विनाश इत्युक्तश्चित्तं [5] संधानमुच्यते ॥१॥
अन्तःकरणजादत्र[6] प्रायश्चित्तमिति स्मृतम् ।
अकृत्यो[7]द्भव एवं च [8] विधिनैव समाचरेत् ॥२॥

---

[1] अयं पटलः टि० १८१ इत्यङ्किते हस्तलिखित-कोशे १६४, १७०–१७२ पत्रेषु दृश्यते। एतद्विषये **अंशुमदागमे** ३७; **उत्तरकामिके** ३०; **पूर्वकारणे** १४४ **संतानसंहितायां** ५६; **रौरवे** क्रियापादे ४४; **सुप्रभेदे** क्रियापादे ५५ पटला द्रष्टव्याः ।

[2] **अथ वक्ष्ये विशेषेण** प्रा० — 'क' पाठान्तरम् ।

[3] 'प्रायो **विनाश** इत्युक्तश्चित्तं संधानमुच्यते ।
विनाशस्य च संधानं प्रायश्चित्तमिति स्मृतम् ॥'
(**अंशुमदागमे**, ३७, १ उ०, २ पू०);
'प्रायो विनाश इत्युक्तश्चित्तं संधार्यते तु यत् ।
तद्विना न समाधानात्प्रायश्चित्तमिति स्मृतम् ॥'
(**अचिन्त्यविध्वसादाख्ये** ७२.१);
'प्रायश्चित्तविधिं वक्ष्ये श्रूयतां द्विजसत्तमाः ।
विधिर्निषेध इत्येवं चोदना स्याद्दिधा मता ॥
अनुष्ठितायां तस्यां स्याद्यथावद्धर्मसंग्रहः ।
वैपरीत्ये त्वधर्मः स्यात्तेन पापं महद्भवेत् ॥
तेनाधोगमने प्राप्ते कर्तुरूर्ध्वं परं पदम् ।
यत्कर्म नयतीत्युक्तं प्रायश्चित्तमिहागमे ॥
प्रकृष्टायाः समानत्वाद्दोषः प्रायः प्रकीर्तितः ।
चिदात्मा कथितः शास्त्रे तरणं तु तकारतः ॥
मदोषस्यात्मनो यस्मात्तरणं पततो ह्यधः ।
तस्मात्प्रकीर्तितं विप्राः प्रायश्चित्तं शिवाश्रिताः ॥
विधिर्निषेधो वा नास्ति यस्मिन्कर्मण्यनुष्ठिते ।
तस्मिन्पुण्यं च पापं वा नेति शास्त्रार्थनिश्चयः ॥
आवश्यके कृते पूर्वमुखेनैव प्रतिक्रिया ।
कर्तव्या पश्चिमास्येन कोणेशास्येन वेति च ॥'
(**उत्तरकामिके** ३०.१–७);
'प्रायो विलय इत्युक्तश्चित्तं राहित्यकृत्ततः ।
लयराहित्यहेतुत्वात्प्रायश्चित्तमिति स्मृतम् ॥'
(**पूर्वकारणे** १४४, १उ०, २पू०)

[4] विनाशमित्युक्तं — क;
विनाशमिति प्रोक्तं — 'क' पाठान्तरम् ।

[5] संतानमुच्यते — क;
तस्यैव नाशनम् — 'क' पाठान्तरम् ।

[6] ०करणजत्रैव — क;
०करणाद्यत्रैव — 'क' पाठान्तरम् ।

[7] ०द्भवमेवं च — क.

[8] तुण्डेनैव — क.

[1][प्राकारादिषु चण्डालप्रवेशे]

[2]वेशयेद्यदि चण्डालो [3]मर्यादादौ च यत्र हि।
मृद्भाण्डानि विसृज्याथ पर्यग्निकरणं कुरु[4]॥३॥
स्नपनं मूर्तिहोमं च कारयेद्देशिकोत्तमः।
आगतो यदि चण्डालो [5]मध्यहारे ततो यदि॥४॥
[6]स्थानशुद्धिं ततः कृत्वा मृद्भाण्डानि विसर्जयेत्।
पुनः पुण्याहकं कार्यं स्नपनं मूर्तिहोमकम्॥५॥

---

[1] 'प्रविशेद्यदि चण्डालो मर्यादादौ तु पञ्चमे।
मृद्भाण्डानि विसृज्याथ पर्यग्निकरणं कुरु॥
स्नपनं मूर्तिहोमं च कारयेद्देशिकोत्तमः।
आगतो यदि चण्डालो मध्यहारे ततो बुधः॥
स्थानशुद्धिं ततः कृत्वा मृद्भाण्डानि विसर्जयेत्।
पुनः पुण्याहकं कार्यं स्नपनं मूर्तिहोमकम्॥
अन्तर्हारं विशेद्यस्तु गोपुराभ्यन्तरेऽपि वा।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु॥
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत्।
धामशुद्धिं ततः कृत्वा प्रोक्षयेच्छङ्खतोयकैः॥
[धेनुवैरं ततः कृत्वा] द्विजभोजनमाचरेत्।
स्नपनं मूर्तिहोमं च कारयेद्देशिकोत्तमः॥
चण्डालश्चागतश्चेद्धि चान्तर्मण्डलके ततः।
[गोभि]राक्रमणं कृत्वा सप्त[शुद्धि]मथाचरेत्
मृद्भाण्डानि विसृज्याथ पर्यग्निकरण कुरु।
धामशुद्धिं ततः कृत्वा प्रोक्षयेच्छङ्खतोयकैः॥'
(**चिन्त्ये** (टि. ३४१) १४०, १४१ पृष्ठयोः);
'प्रविशेद्यदि चण्डालो मर्यादादौ तु पञ्चमे।
मृद्भाण्डानि विसृज्याथ पर्यग्निकरणं कुरु॥
स्नपनं मूर्तिहोमं च कारयेद्देशिकोत्तमः।
आगतो यदि चण्डालो मध्यहारे ततोऽपि यः॥
स्थानशुद्धिं ततः कृत्वा मृद्भाण्डानि विसर्जयेत्।
पुनः पुण्याहकं कार्यं स्नपनं मूर्तिहोमकम्॥
अन्तर्हारं विशेद्यस्तु गोपुराभ्यन्तरेऽपि वा।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु॥
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत्।
धामशुद्धिं ततः कृत्वा प्रोक्षयेत्पञ्चगव्यकैः॥
धेनुवैरं ततः कृत्वा द्विजभोजनमाचरेत्।
स्नपनं मूर्तिहोमं च कारयेद्देशिकोत्तमः॥
चण्डालश्चागतश्चेद्धि चान्तर्मण्डलके ततः।
गोभिराक्रमणं कृत्वा सप्तशुद्धिमथाचरेत्॥
मृद्भाण्डानि विसृज्याथ पर्यग्निकरणं कुरु।..
धामशुद्धिं ततः कृत्वा प्रोक्षयेच्छङ्खतोयकैः॥
पञ्चगव्यावगाहं च कृत्वा संप्रोक्षणं कुरु।
व्यञ्जने मण्टपे गर्भे चण्डालः संविशेद्यदि॥
गोभिराक्रमण कृत्वा धेनुवैरं समाचरेत्।
मृद्भाण्डानि विसृज्याथ सप्तशुद्धिं समाचरेत्॥
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत्।
द्विजभोजनकं कृत्वा पश्चात्पुण्याहमाचरेत्॥
धामशुद्धिं ततः कृत्वा प्रोक्षयेच्छङ्खतोयकैः।
बेरशुद्धिं ततः कृत्वा घृतधूपैश्च धूपयेत्॥
पञ्चगव्यावगाहं च कारयेत्पूर्ववत्सुधीः।
संप्रोक्षणं ततः कृत्वा शुद्धस्नपनपाचरेत्॥
(**स्वायंभुवे** (टि० २०३) १७६–१७८ पृष्ठेषु)

[2] वेशयन्ति यदि — क; अत्र वेशयेदिति स्वार्थे णिच्।

[3] मर्यादौ च — क.

[4] कृतम् — क.

[5] मध्यरात्रे — क.

[6] 'स्थानशुद्धिमथाचरेत्।
तालमुद्रात्रयं कृत्वा प्राकारं हेतिना स्मरेत्॥
तद्बहिः परिघां ध्यात्वा कवचेनैव मन्त्रतः।
अस्त्रजालं तु तद्बाह्ये न्यसेद्विघ्नापनुत्तये॥
दिव्यं धाम विचिन्त्याथ'
(**पूर्वकामिके** ४.१९९उ०–२०१);
एतद्विषये पुनः **अजिते** २०.१०८उ०–११० पू०; **रौरवे** क्रियापादे १०.६उ०, ७पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः।

[१]अन्तर्हारे विशेत्तत्र [२]गोभिराक्रमणं कुरु ।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु ॥६॥
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत् ।
[३]धेनुवैरं ततः कृत्वा [४]द्विजभोजनमाचरेत् ॥७॥
स्नपनं मूर्तिहोमं च कारयेद्देशिकोत्तमः ।
चण्डालश्चागतश्चेद्धि[५] ह्यन्तर्मण्डलके[६] ततः ॥८॥
[७]गोभिराक्रमणं कृत्वा [८]सप्तशुद्धिमथाचरेत् ।
मृद्भाण्डानि विसृज्याथ पर्यग्निकरणं [९]कुरु ॥९॥
धेनुवैरं ततः कृत्वा पुनः पुण्याहमाचरेत् ।
[१०]द्विजभुक्तिं ततः कृत्वा पश्चात्पुण्याहमाचरेत् ॥१०॥
बेरशुद्धिं ततः [११]कृत्वा ह्यष्टगन्धं समाचरेत् ।
[१२]अन्तरितक्रमं कृत्वा शुद्धस्नपनमाचरेत् ॥११॥
[१३]चण्डालश्चैव यत्रैव ह्यागतो मण्डपद्वयोः ।
गोभिराक्रमणं कृत्वा सप्तशुद्धिमथाचरेत् ॥१२॥
पञ्चगव्यावगाहं च कृत्वा संप्रोक्षणं कुरु ।
धेनुवैरं ततः कृत्वा मृद्भाण्डानि विसर्जयेत् ॥१३॥
पर्यग्निकरणं कृत्वा पुनःपुण्याहमाचरेत् ।
पञ्चगव्यावगाहं च कृत्वा संप्रोक्षणं कुरु ॥१४॥
[१४]व्यञ्जने मण्डपे गर्भे चण्डालो [१५]वेशयेद्यदि ।
गोभिराक्रमणं कृत्वा धेनुवैरं समाचरेत् ॥१५॥

---

[१] अन्तर्हते — क.

[२] गोहिनाक्रमणं कृतम् — क.

[३] धेनुवैरं—धेनूनां परस्परं विरोधः ।; धेनूनां परस्परं वैरेण युद्धं कारयित्वा तत्स्थले धूल्युत्थापनेन शुद्धिः कार्येत्यर्थ इति भाति ।

[४] द्विभोजनमथाचरेत् — क.

[५] ०श्चागतो वेद्धि — क.

[६] स्यर्धमण्डलके — क.

[७] गोहिणाक्रमणं त्वा — क.

[८] 'खननात्पूरणाद्दाहाद्दर्भघर्षणलेपनात् ।
गोभिराक्रमणात्कालाद्भूमिः शुद्धयति सप्तभिः ॥'
(**प्रायश्चित्तसमुच्चये** (टि.१०६०) ८२ पृष्ठे)

[९] कृतम् — क.

[१०] द्विभोजनं ततः — क.

[११] कृत्वाष्टगन्धं — क.

[१२] 'आवर्तं चेत्यनावर्तं पुनरावर्तनं तथा ।
ततोऽन्तरितकं चेति प्रोक्षणं तु चतुर्विधम् ॥'
'ततोऽन्तरितकं विप्राः संक्षेपेण वदाम्यहम् ।
रत्नन्यासाक्षिमोक्षौ च जले चैवाधिवासनम् ॥
शय्याधिवासनं विप्रा विना वै बेरकर्मणि ।
नववस्त्रेण संवेष्टय बेरस्य सकलाङ्गकम् ॥
प्रागुक्तविधिना कुम्भन्यासहोमं च कारयेत् ।
स्नपनं कारयेदन्ते चान्यत्सर्वं समानकम्' ॥
(**उत्तरकामिके** ३४.१ उ०, २ पू०; १३–१५)

[१३] चण्डालाश्चैव यत्रैवागते — क.

[१४] 'व्यञ्जने' इत्यस्य लक्षणया व्यञ्जनस्थापनयोग्ये इति व्याख्येयम् ।

[१५] 'वेशयेत्' इति स्वार्थे णिजन्तः ।; वेशयेद्यथा — क.

गृद्भाण्डानि विसृज्याथ पर्यग्निकरणं[1] कुरु ।
सप्तशुद्धिं ततः कृत्वा द्विजभोजनमाचरेत् ॥१६॥
अङ्कुरं पूर्ववत्कृत्वा बेरशुद्धिमथाचरेत् ।
अष्टगन्धं समालिप्य [2]धूलनेनाभिवर्धयेत् ॥१७॥
पञ्चगव्यावगाहं च कारयेत्पूर्ववत्सुधीः ।
संप्रोक्षणं ततः कृत्वा शुद्धस्नपनमाचरेत् ॥१८॥

[गर्भगेहादौ सुरामांसरुधिरप्रवेशे,
श्वानादितिर्यग्जातीनां प्रवेशे तेषां मृतौ प्रसूतौ च]

[4]सुरा मांसं च रुधिरं श्वानकुक्कुटवानराः[5] ।
खरश्च सूकरश्चैव तिर्यग्जातीयकास्ततः[6] ॥१९॥

---

[1] कृतम् — क.
[2] धूलेनामपि वर्ध० — क.
[3] 'सुरामांसास्थिविष्ठाद्यैः श्वानगर्दभकुक्कुटैः ।
गर्भगेहे प्रविष्टे च स्पृष्टे लिङ्गे च कौतुके ॥
नृपवाहविनाशः स्यात्तद्राष्ट्रे शोकमाविशेत् ।
संप्रोक्षणं ततः कृत्वा शताष्टकलशान्वितम् ॥
वक्त्रमण्टपके वापि प्रतिमामण्टपेऽपि वा ।
ग्रामश्रीस्त्वन्यथा भूयाद्धामश्रीस्त्वन्यथा भवेत् ॥
स्थानशुद्धिं ततः कृत्वा तन्त्रादीश्च समाचरेत् ।
स्नपनं शान्तिहोमं च जपेत्पाशुपतं शतम् ॥
कौतुकस्यान्यदेवानां स्नपनं कारयेद्बुधः ।
स्नानमण्टपसंवेशे पुण्याहैर्गव्यमेचनैः ॥
शान्तिहोमैश्च शुद्धिः स्यात्स्नपनं कारयेच्छिवे ।
अन्तर्मण्टपमालादेरभ्यन्तरनिवेशने ॥
संमार्जनविलेपाद्यैः पुण्याहैः पञ्चगव्यकैः ।
अन्नपूर्णेश्वरीं तत्र स्नापयेत्प्रोक्ष्येद्बुधः ॥
अग्निं निकेतनात्त्यक्त्वा पुनः संधानमाचरेत् ।
पञ्चसंस्कारमार्गेण हुनेत्पाशुपतं शतम् ॥'
'वक्त्रादिसर्वशालासु रुधिरस्रावके सति ।
राक्षसानां भयं चैव शीघ्रं रक्तं निघट्टयेत् ॥
व्यपोह्य वास्तुशुद्धिं च देवस्य स्नपनं कुरु ।'
(**स्वायम्भुवे** (टि. २०३) १७३–१७५ पृष्ठेषु)
'श्वानसूकरचण्डालमार्जारकपिकुक्कुटैः ।
उलूकगृध्रकाकैश्च गर्दभैश्चैव चोरकैः ॥'
'गर्भगेहे संप्रविष्टे स्पृष्टे लिङ्गे च कौतुके ।
पञ्चशुद्धिक्रमात्कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ॥
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः ।
लिङ्गं पीठं स्थलं सर्वं बिल्वपत्रेण घर्षयेत् ॥
शान्तिहोमं ततः कृत्वा जपेत्पाशुपतं पदम् ।
पश्चात्संप्रोक्षणं कुर्यात्प्रागुक्तविधिना सह ॥
प्राकारे मण्टपे चैव परिवाराल्ये तथा ।
पचनालयदेशे वा तेषां पृष्टे [स्पर्शे ?] तथैव च ॥
वर्जयेदत्र मृत्पात्रं पुण्याहं वाचयेत्ततः ।
शान्तिहोमं ततः कृत्वा प्रोक्षयेत्तु शिवाम्भसा ॥
ब्राह्मणान्भोजयेत्तत्र पुनः पुण्याहमाचरेत् ।
अन्तर्मण्डलमालादौ प्रविष्टे त्वविचारतः ॥
पुण्याहं वाचयित्वा तु शान्तिहोमं तु कारयेत् ।'
'प्राकारेऽभ्यन्तरे चैव प्रासादे मण्डपेऽपि च ॥
तिर्यग्जातेर्मृतौ सूतौ वाहनानां क्षयो भवेत् ।
पूर्ववत्खानयेद्वीं पुण्याहं वाचयेत्ततः ॥
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयन् ।
स्नपनं कारयेच्छम्भोः शान्तिहोमं तु कारयेत् ॥'
(**योगजे** (टि. २०३) १७२, १७३, १७८ पृष्ठेषु)

[4] १९ श्लोकात्पूर्वं प्रथमश्लोको द्वितीयश्लोकस्य पूर्वार्धं च मातृकायां पुनर्लिखितम्। तस्य पाठान्तराणि पूर्वमेव निर्दिष्टानि।
[5] ०वानरैः — क.
[6] तिर्यग्जातयकस्ततः — क.

मृगपक्षि[१]मृतौ जातौ [२]गर्भगेहप्रवेशने ।
[३]रथाद्यश्च विनश्यन्ति प्रायश्चित्तं तु कारयेत् ॥२०॥
[४]अन्तरितक्रमं कुर्याच्छताष्टकलशं [५]कुरु ।
[६]व्यञ्जने मण्डपे चेद्धि महामण्डपके ततः ॥२१॥
[७]अन्तरितक्रमः [८]कार्यः कलशाः पञ्चविंशतिः ।
पचनालयके चेद्धि योषितां नाशनं [९]द्रुतम् ॥२२॥
पुनरालेपनं कार्यं प्रोक्षयेच्छुद्धतोयकैः ।
[१०]प्रधानाग्निं विसृज्याथ पुनः संधानमाचरेत् ॥२३॥
पुण्याहं पञ्चगव्यं च स्नपनं च ततः कुरु ।
अन्नपूर्णेश्वरीं ध्यात्वा ईशस्तम्भे सुयोजयेत् ॥२४॥

इति रौरवे क्रियापादे प्रायश्चित्तविधिः
षट्पञ्चाशः पटलः

---

[१] मृगे जाति — क.
[२] गर्भगृह प्रवेशयेत् — क.
[३] रथाद्यश्च — क.
[४] अन्तरीत० — क.
[५] कृतम् — क.
[६] 'व्यञ्जने' इत्यस्य लक्षणया व्यञ्जनस्थापन-योग्ये इति व्याख्येयम् ।
[७] अन्तरीतक्रमं — क.
[८] कार्यं कलशं — क.
[९] कृतम् — क.
[१०] प्रधामाग्नि — क.

सप्तपञ्चाशः पटलः

[1]नागप्रतिष्ठाविधिः

[2][नागप्रतिष्ठायोग्यस्थानम्]

महानागप्रतिष्ठां तु कुर्याद्देवालये बुधः।
देवालयं स्वयं कुर्याच्छिवविष्ण्वालयेऽपि वा ॥१॥
नदीतीरे तटाके वा तीर्थे वा शुद्धभूमिषु।
अश्वत्थसंनिधौ वापि कुर्यान्नागप्रतिष्ठितम्[3] ॥२॥

[4][प्रतिष्ठाकालः]

उत्तरायणकाले तु पुष्यफाल्गुनचैत्रके।

---

[1] अयं पटलः टि. १२०.१३–३६ पृष्ठेषु दृश्यते। तथा टि.१२०.३७–७९ पृष्ठेषु रौरवागमपद्धतौ; आर्. इ. ३०८४१ इत्यङ्किते तालपत्रकोशे च दृश्यते। एतस्मिन्विषये **उत्तरकारणे** ४०३, ४०४ पृष्ठे; **कारणे** (टि. १२०) ८२–९० पृष्ठानि; **रौरवे** क्रियापादे ३८ पटलः; **वीरागमे** ९१ पटलः; **सूक्ष्मे** ८३, ८४ पटलौ; **सिद्धान्तदीपिकायां** (टि. १२०) ९८–१२८ पृष्ठानि च द्रष्टव्यानि।

[2] 'देवालये मठे वापि पर्वते तीर्थतीरके।
नन्दने शुक्ल[वृक्ष]मूले तु चैत्यवृक्षसमीपके ॥
एतेषु कारयेद्धीमानिष्टसिद्धिकरं भवेत्।
अष्टदिक्षु प्रकर्तव्यमालये तु विशेषतः ॥
आरोग्यं वारुणे चैव सोमे वित्तप्रदं भवेत्।
वह्निदेशे सुखं दद्याद्विजयं निर्ऋतौ तथा ॥
वायव्ये भयनाशार्थमैशान्यां पुत्रवर्धनम्।
एवं शिवस्य परितः प्राकारे स्थापयेत्क्रमात् ॥'
(**सूक्ष्मे** ८४.५–८);
'शिवालये नदीतीरे पिप्पलस्य च संनिधौ।
शिवालये विशेषेण काम्याद्यर्थस्य सिद्धये ॥
नद्यादौ दोषशान्त्यर्थं स्थानमेवं विधीयते।
आलये मण्डपादौ तु प्राकारे वा विशेषतः ॥
दिव्यवृक्षस्य मूले तु परिवारालयेषु च।
स्थानमेवं समाख्यातम्'
(**सिद्धान्तदीपिकायां** (टि. १२० पृ० १०३, १०४)

[3] प्रतिष्ठितमित्यत्र भावे क्तप्रत्ययः।

[4] 'अयने दक्षिणे नेष्टं प्रशस्तं चोत्तरायणम्।
शुक्लपक्षे च तत्रापि चैत्रवैशाखमुत्तमम् ॥
पुष्यफाल्गुनज्येष्ठं च मध्यमं समुदाहृतम्।
कार्तिकाश्वयुजे मासे श्रावणे चाधमं भवेत् ॥
मार्गशीर्षमथाषाढं माघप्रोष्ठं विवर्जयेत्।
शुक्लपक्षे शुभर्क्षे च सुतिथौ सुमुहूर्तके ॥
अयनं पक्षनक्षत्रं तिथिर्वारश्च राशयः।
मुहूर्तं तत्र संवीक्ष्य स्थापनं च समारभेत् ॥
पुष्यमासादि षाण्मासं देवानां तु दिवा स्मृतम्।
तत्राषाढादि षाण्मासं देवानां तु[निशा]स्मृता ॥
दिवाकाले प्रकर्तव्यं देवस्थापनमुत्तमम्।'
(**वीरे** ९२.३–८ पू०);
'उत्तरायणकाले तु शुक्लपक्षे शुभे दिने।
शुभवारादिभिर्युक्ते स्थापनं तु समारभेत् ॥'
(**कारणे** (टि १२०) ८३ पृष्ठे);
'उत्तरायणकाले च दक्षिणायनगे रवौ।
चैत्रे वैशाखमासे च फाल्गुने वा विशेषतः ॥

वैशाखे विधिवत्प्रोक्ता दक्षिणे [1]चाश्विमासके ।।३।।
[2]रोहिण्यश्विपुनर्वसू [3]तिष्यः श्रवणरेवती ।
स्वाति[4]चित्रे भगश्चैव मूला[5]श्लेषाश्च उत्तमाः ।।४।।
सोमे [6]सौम्ये भृगोर्वारे गुरोरादित्यहस्तके ।
भद्रादितिथयः प्रोक्ता नन्दा [7]रिक्ताश्च वर्जयेत् ।।५।।
[8]प्रतिष्ठा स्थिर[9]लग्ने तु [10]मध्यमा चोभयात्मके[11] ।
[12]चतुर्थ्यां कार्तिके मासे शुक्लपक्षे शुभे दिने ।।६।।
नागप्रतिष्ठा कर्तव्या [13]चान्यकालेषु वर्जयेत् ।

[14][नागप्रमाणं नागभेदस्तत्फलं च]

अरत्निद्वयमात्रं वा बाहुमात्रमथापि वा ।।७।।

मूढदोषादिरहिते मासि भाद्रभदे तथा ।
श्रावणे वा चाश्वयुजि कार्तिक्यां वा विशेषतः ।।
शुक्लपक्षे विशेषेण कृष्णेऽप्यापञ्चमीदिनात् ।
पञ्चमी नागराजस्य नागाना शान्तिवर्धनी ।।
पञ्चम्यां किल नागानां भवति ह्युत्सवो महान् ।
पञ्चम्यामेव कर्तव्या प्रतिष्ठा फलदायिनी ।।'

(**सिद्धान्तदीपिकायां** (टि. १२०) ९९ पृष्ठे)

[1] अत्र 'चाश्विनमासके' इति भवितव्यम्। वृत्तार्थं लुप्तनकारपदप्रयोग इति भाति।
[2] रोहिण्यश्वपुनर्वस्सु — ख.
[3] तिष्यश्रवण० — ख.
[4] ०चैत्रभगश्चैव — ख.
[5] ०श्लेषां च उत्तमाः — ख.
[6] सौम्यभृगो० — ख.
[7] रिक्तं च — ख.
[8] प्रतिष्ठां — ख.
[9] ०लग्नं तु — ख.
[10] मध्यमं — ख.
[11] ०त्मकम् — ख.
[12] चतुर्थ्यं — ख.
[13] अन्येषां तु विवर्ज० — ख.
[14] 'नागरूपाकृतिं चैव शृणुष्व कमलासन ।
करमानसमं दीर्घं षोडशाङ्गुलविस्तरम् ।।
त्रियङ्गुलघनं प्रोक्तं मध्ये लिङ्गाकृतिर्भवेत् ।
एकाङ्गुलसुविस्तारं त्रियङ्गुलघनं तथा ।।
पुंस्त्रीरूपसमं चैव पार्श्वे वक्त्राकृतिर्भवेत् ।
द्विफणिं बन्धसंयुक्तं पञ्चसप्तफणीन्द्रकम् ।।
एतेषां लक्षणं प्रोक्तम्'

(**कारणे** (टि १२०) ८२ पृष्ठे);

'फणामण्डलशोभाढ्यं कारयेत्सर्पनायकम् ।
ब्राह्मणक्षत्रविट्शूद्राः स्त्रियो वाप्यन्यजातयः ।।
अभीष्टफलसिद्धयर्थं शेषस्थापनमाचरेत् ।
श्वेता रक्ता तथा पीता कृष्णा शैला चतुर्विधा ।।
ब्राह्मणादिक्रमेणैव संग्राह्या तु शिला शुभा ।
अभावे सर्ववर्णानां कृष्णशैला प्रशस्यते ।।
दशतालप्रमाणेन ब्राह्मणानां विधीयते ।
नवतालं क्षत्रियाणां वैश्यानामष्टतालकम् ।।
षट्तालं चैव शूद्राणां तत्तटस्थप्रमाणतः ।
हस्तमात्रशिला श्रेष्ठा तस्यां नागो विधीयते ।।
तदर्धा मध्यमा प्रोक्ता त्वधमा तु न विद्यते ।
सर्वलक्षणशोभाढ्या तत्तत्तालप्रमाणतः ।।
एकवक्त्रं पञ्चवक्त्रं द्विवक्त्रं वापि कल्पयेत् ।
एकवक्त्रं पञ्चवक्त्रं नागं वै मण्डलाकृतिम् ।।
कुर्यात्फणान्तरे लिङ्गं केवलं वा फणान्वितम् ।
अन्योन्यमुखसंयुक्तं द्विवक्त्रमिति कीर्तितम् ।।
द्वाभ्यां चैव तु नागाभ्यां वेष्टनं च द्विवक्त्रकम् ।
पञ्चवृत्तं त्रिवृत्तं वा फणामण्डलया सह ।।
ब्राह्मणानां पञ्चवृत्तमितरेषां त्रिवृत्तकम् ।

नागस्य भोगो विज्ञेयो बाहुवत्स्थूल उच्यते[1]।
एकवक्त्रं द्विवक्त्रं वा त्रिवक्त्रं पञ्चवक्त्रकम् ॥८॥
[2]एकवक्त्राद्राजवश्यं [3]द्विवक्त्राद्भोग एव च ॥
[4]त्रिवक्त्रात्पुत्रसिद्धिस्तु पञ्चवक्त्राद्यशो भवेत् ॥९॥
दम्पत्योः पुत्रसौभाग्यवश्यभोगयशो [5]भवेत्।
एकवक्त्रादिनागं तु [6]कृत्वा शिल्पिवरेण तु ॥१०॥
प्रतिष्ठाप्य शुभे देशे सर्वसिद्धिमवाप्नुयात्।

[7][आचार्यऋत्विजां वरणं वेदपारायणाय विप्रवरणं च]

प्रतिष्ठादिवसात्पूर्वं कृत्वा ब्राह्मणभोजनम् ॥११॥
आशिषो वाचयित्वा तु आचार्यं वरयेत्ततः।
आदिशैवकुलोद्भूत[8]मागमार्थविशारदम् ॥१२॥
शान्तं दान्तं जितक्रोधं [9]कुटुम्बिनमरोगिणम्।
वेदशास्त्रार्थकुशलं लौकिकेषु [10]विचक्षणम् ॥१३॥
आचार्यं वरयेत्पश्चाद्दीक्षायुक्तांस्तथेतरान्[11]।
अष्ट विप्रांश्च वरयेदृत्विजः शास्त्रवित्तमान् ॥१४॥
वेदपारायणार्थं च वरयेदष्टसंख्यकान्।

अन्योन्यमुखसंयुक्तो नागराजः शिलामये ॥
वृत्तं प्रति च पद्मं स्याच्छिवलिङ्गं फणान्तरे।
पद्मं वापि प्रकर्तव्यं केवलं वापि सर्वशः ॥
दोषपापक्षयार्थी तु पद्मं वा केवलं तु वा।
पुत्रार्थी चैव मोक्षार्थी लिङ्गं पद्मं च कल्पयेत् ॥'
(**सिद्धान्तदीपिकायां** (टि. १२०) पृ० १००, १०१);
एतस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.३–१४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[1] ०न्स्थूलमुच्यते — ख.
[2] एकवक्त्रं राज० — ख.
[3] द्विवक्त्रं भोगमेव — ख.
[4] त्रिवक्त्रं पुत्र० — ख.
[5] भवत् — ख.
[6] 'घ' मातृकायां दशमश्लोकचतुर्थपादप्रभृत्येव ग्रन्थो दृश्यते। एतत्पूर्वतनग्रन्था लुप्ताः। किं चात्र मातृकायामेतत्पटलस्थाः सर्वे श्लोका नोपलक्ष्यन्ते। उपलभ्यमानानां श्लोकानां विषय एव पाठभेदोऽत्र प्रदर्श्यते।
[7] 'आचार्यं वरयेत्पूर्वमृत्विजस्तदनन्तरम्।
आदिशैवकुलोद्भूतं दीक्षितं वेदपारगम् ॥
सर्वशास्त्रविचारज्ञं ज्ञानयोगविशारदम्।
क्रियापादेषु कुशलं सर्वावयवसुन्दरम् ॥
ऋत्विजस्तत्कुलोद्भूतानष्टौ शैवान्विचक्षणान्।
जापकाञ्शैवसंभूतान्वैदिकान्वेदपारगान् ॥
अष्टावष्टौ तु वरयेद्यथेष्टं वा स्वशक्तितः।
एवं वै वरयेत्कर्ता उपोष्य व्रतमाचरेत् ॥'
(**सिद्धान्तदीपिकायां** (टि १२०) पृ० १०५, १०६)
[8] ०मागमार्थिविशारदम् — ख; ०मागमार्थं विशारदम् — घ.
[9] कुटिम्बिन० — ख; कुडुम्बिन० — घ.
[10] विचक्षणः — घ.
[11] ०दीक्षायुक्त तथेतरम् — ख.

[1][पुष्याहवाचनादि]

[2]**पुण्याहं वाचयित्वा तु [3]द्रव्यशुद्धिं विधाय च ॥१५॥**
कृत्वा तु सर्वकर्माणि देशिको ब्राह्मणैः सह।
आगमोक्तविधानेन मृत्संग्रहणपूर्वकम् ॥१६॥
वास्तुहोमं ततः कृत्वा अङ्कुरार्पणमेव च।
विष्णुक्रान्तिदलैः शुभ्रैर्बेरशुद्धिं च कारयेत्[4] ॥१७॥

[5][नेत्रोन्मीलनम्]

[6]**प्रक्षाल्य सर्पबेरं च पूजाकार्यार्थसिद्धये।**

---

[1] 'ततः शिल्पिनमुद्वास्य पुण्याहं वाचयेत्ततः।
अङ्कुरानर्पयेत्पूर्वं पूर्वोक्तविधिमार्गतः ॥
वास्तुशान्तिं ततः कृत्वा मण्डपं तेन वह्निना।
शुद्धिं कृत्वा ततः सम्यक् पुण्याहं वाचयेद्गुरुः।'
(**सिद्धान्तदीपिकायां** (टि. १२०) पृ० १०७, १०८)

[2] इदमर्धं 'घ' मातृकायासेव दृश्यते।

[3] एतद्विषये **अजिते** २०.११२–११५ श्लोकास्तदीयटिप्पणी, **रौरवे** क्रियापादे १०.७,८पू० श्लोकश्च द्रष्टव्याः।

[4] ०बेंरशुद्धिर्विधीयते — घ.

[5] 'नयनोन्मीलनार्थाय त्वन्यदेवेशमण्डपे।
स्थण्डिलद्वितयं कार्यमेकत्रैवाधिदेवताम् ॥
आवाह्य गन्धपुष्पाद्यैरभ्यर्च्य च यथाविधि।
तन्मध्ये नागराजं तु श्वेतवस्त्रोपरि न्यसेत् ॥
स्वर्णसूच्यादिना शिल्पिनयनोन्मीलने तदा।
आचार्य उच्चरेन्मन्त्रं शिल्पी नेत्रस्य मोक्षणम् ॥
कुर्यात्पटावृतं बिम्बमन्यो न च निरीक्षयेत्।
ज्योतिर्मण्डलमालिख्य कृष्णमण्डलमालिखेत् ॥
शिल्पिनं पूजयेत्तत्र वस्त्राद्यैश्च स्वशक्तितः।
इतरस्थण्डिले बिम्बं संस्थाप्य च गुरूत्तमः ॥
सौवर्णदूर्वया नेत्रं लिखेत्पूर्वाननस्तदा।
नेत्रमन्त्रं समुच्चार्य स्पृशेन्नेत्रं जपेन्मनुम् ॥
दुग्धाज्यमधुधान्यानि पञ्चब्रह्ममनुस्मरन्।
दुग्धमाप्येति मन्त्रेण घृतं वै घृतमन्त्रतः ॥
मधुवातेति मधु च त्विदं विष्णविति धान्यकम्।
ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान्दर्शयेत्सुधीः ॥
गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत्।
सुमङ्गलीति मन्त्रेण कन्यकां दर्शयेत्ततः ॥
संशोध्य मृज्जलाभ्यां तं प्रक्षाल्य पयसा ततः।
शुद्धजलैस्तु संशोध्य तद्गायत्र्याभिषेचयेत् ॥
हृदा संपूज्य नागेन्द्रं पञ्चब्रह्ममनुस्मरन्।
वस्त्रकूर्चेन संवेष्टच गन्धपुष्पादिभिर्यजेत् ॥'
(**सिद्धान्तदीपिकायां**(टि १२०)पृ० १०८–११०);
एतस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.१५उ०–१७पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[6] 'ग' मातृकायामेतत्पटलस्थाः केचन श्लोका एवोपलभ्यन्ते। अत उपलभ्यमानश्लोकानामेवात्र पाठभेदः प्रदर्श्यते। नेत्रोन्मीलनविषयेऽस्यां मातृकायां १८–२० श्लोकानां स्थानेऽधोलिखितरीत्या सार्धश्लोकद्वयं दृश्यते–
'बिम्बशुद्धिं ततः कृत्वा रक्षाबन्धनमाचरेत्।
विश्वतश्चक्षुर्मन्त्रेण नेत्रोन्मीलनमाचरेत् ॥
स्वर्णसूच्या तु मधुनोन्मीलनं तु घृतेन वा।
दर्पणं दर्शयेत्पश्चाद्गोविप्रादीन्यथाक्रमम् ॥
नीराजनमथो कृत्वा बिम्बशुद्धिमथाचरेत्।'
इति।; 'घ' मातृकायामप्येतद्विषयेऽधोलिखितरीत्या श्लोकद्वयं दृश्यते —
'अर्घ्यजलैरभिषिच्य गन्धपुष्पं प्रकल्पयेत्।
बिम्बशुद्धिं ततःकृत्वा नेत्रोन्मीलनमाचरेत् ॥
विश्वतश्चक्षुर्मन्त्रेण नेत्रोन्मीलनमाचरेत्।
स्वर्णसूच्या तु मधुनोन्मीलनं तु घृतेन वा।
इति।

अभिषिच्यार्घ्यतोयेन गन्धपुष्पाद्यलंकृतम्[1] ॥१८॥
नेत्रोन्मीलनमन्त्रेण नेत्रयुग्मं लिखेत्क्रमात् ।
[2]विश्वतश्चक्षुर्मन्त्रेण स्वर्णसूचिकया सह ॥१९॥
[3]मधु संतर्प्य मन्त्रेण मधुना स्वर्णदूर्वया ।
शिल्पिनं विसृजेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ॥२०॥

[4][जलाधिवासनादि]

जलाधिवासनं पश्चाद्धान्यवस्त्राधिवासनम् ।
त्रिरात्रमेकरात्रं वा यामं [5]यामार्धमेव वा ॥२१॥
अधिवासनवेलायां [6]गङ्गादीश्च प्रपूजयेत् ।
[7]आचार्यजापकान् ऋत्विग्[8]वेदपारायणान्बहून् ॥२२॥
[9]उदकशान्ति [10]रुद्रसूक्तं [11]श्रीसूक्तं [12]रात्रिसूक्तकम् ।
[13]घृतसूक्तं [14]पुरुषसूक्तं [15]पञ्चशान्ति जपेत्क्रमात् ॥२३॥

---

[1] अत्र कुर्यादित्यध्याहृत्य व्याख्येयम् ।

[2] **तै. आरण्यके** १०.१.

[3] मधु सर्वेभ्यामिति मन्त्रेण–ख; मन्त्रेण – मधुमन्त्रेण; 'मधुवाता ऋतायेति मधुना तर्पयेद्बुधः' **रौरवे** क्रियापादे ३१.१४ पू०; **ऋग्वेदे** १.९०.६; **तै. संहिता** ४.२.९.७.

[4] जलाधिवासः —
'ग्रामप्रदक्षिणं कृत्वा स्वस्तिसूक्तसमन्वितम् ।
जलाशयं ततः प्राप्य जलमध्ये प्रपां कुरु ॥
तन्मध्ये शाययेद्बिम्बं जानुदघ्नजले ततः ।
तीरे च स्थण्डिलं कृत्वा इन्द्रादीन्पूर्ववद्यजेत् ॥
आचार्यः सह ऋत्विग्भिर्नागं स्पृष्ट्वा जपेत्तथा ।
मूलब्रह्माङ्गमन्त्रैश्च दिक्पालानां च मन्त्रतः ॥
अनन्तादिमहानागमन्त्रान्गायत्रिया सह ।
अष्टोत्तरशतं जप्त्वा ऋत्विग्भिर्ब्राह्मणैः सह ॥
भाष्योच्चारेण मन्त्रेण त्वेकवारं गुरुर्जपेत् ।
इदं सर्पेभ्यो मन्त्रेण नमो अस्त्विति मन्त्रतः ॥
आयुःश्रीभूमिसूक्तं च सौरं मृत्युजयं तथा ।
वेदादिमन्त्रं स्कन्दस्य सूक्तं वै पुरुषसूक्तकम् ॥
जपं समाप्य पश्चात्तु याममात्रावसानके ।
जलादुत्तीर्य बिम्बं तु वस्त्रकूर्चं व्यपोह्य च ॥
कुम्भाद्भिः प्रोक्षयेत्पश्चादन्यवस्त्रेण वेष्टयेत् ।
अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यं तु निवेदयेत् ॥
प्रदक्षिणक्रमेणैव यागशालां प्रवेशयेत्' ।
(**सिद्धान्तदीपिकायां** (टि. १२०) पृ० ११०, १११);
एतस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.१७उ०, १८ पू० श्लोकस्तदीयटिप्पणी च द्रष्टव्यौ ।

[5] यामार्धमेव — ख.

[6] गङ्गादीनां च — ख.

[7] आचार्यो जापकान् — ख.

[8] 'वेदपारायणान्' इत्यस्य पदस्य लक्षणया 'वेदपारायणकर्तॄन्' इत्यर्थो बोध्यः ।

[9] उदकशान्तिमन्त्राः; एतस्मिन्विषये **याजुषमन्त्ररत्नाकरे** २५–८० पृष्ठानि द्रष्टव्यानि ।

[10] रुद्रसूक्तम्; एतस्मिन्विषये **याजुषमन्त्ररत्नाकरे** ९० तमं पृष्ठं द्रष्टव्यम् ।

[11] **ऋग्वेदे** खिलभागे पञ्चममण्डलस्यान्ते विद्यमानः खिलभागः ।

[12] **ऋग्वेदे** १०.१२७

[13] **तै. आरण्यके** १०.१.

[14] **तै. आरण्यके** ३.१२.

[15] पञ्चशान्तिः; एतस्मिन्विषये **याजुषमन्त्ररत्नाकरे** १७५–१७७ पृष्ठानि द्रष्टव्यानि ।

[1]**जलादुत्थाप्य बेरं च कृत्वा ग्रामप्रदक्षिणम्।**
[2]**क्षीराधिवासनं कुर्यात्पयःसूक्तेन**[3] **मन्त्रतः ॥२४॥**
[4]**धान्यसूक्तेन मन्त्रेण** [5]**शालिधान्याधिवासनम्।**
[6]**युवा सुवासाः परिवीतेति वस्त्राधिवासनम् ॥२५॥**

[7][रक्षाबन्धनम्]

[8]**त्रियम्बकेति मन्त्रेण रक्षासूत्रं तु** [9]**बन्धयेत्।**
[10]**बृहत्सामेति मन्त्रेण**[11] **भस्मरक्षां च कारयेत् ॥२६॥**

[12][मण्डपस्तत्र वेदिकुण्डकल्पनं च]

षोडशस्तम्भसंयुक्तं वितानध्वजभूषितम्।

---

[1] जलादुद्धाप्य — ख.

[2] 'घ' मातृकास्थं (२४ उ०, २५) सार्धश्लोकस्य-स्थाने 'क्षीराभिषेकं कुर्याद्धान्यवस्त्राधिवासनम्।' इत्येकमेवार्धं दृश्यते।

[3] पयःसूक्तम्; **तै. संहिता** ४.२.७.

[4] धान्यसूक्तम्; **तै. संहिता** ४.२.६.

[5] शाल्या धान्याधिवासयेत् — ख;

धान्याधिवासः — 'अथ मम समस्तपापक्षयार्थं नागप्रतिष्ठाङ्गं नागबिम्बस्य धान्याधिवासं करिष्य इति संकल्प्य, पञ्चद्रोणपरिमितधान्यपरिपूरिते पात्रे नागबिम्बं धान्यमध्ये तिरोधाप्य पूर्ववन्मुहूर्तकालं नागराजगायत्रीं जपेत्।'

(**शान्तिकुसुमाकरे** पूर्वभागे पृ० २१);

'पश्चाज्जलाधिवासस्य धान्यवासं तु कारयेत्।
धान्यं संशोध्य विधिवत्प्रोक्ष्य पुण्याहवारिभिः॥
धान्येऽस्मिन्कण्ठदघ्ने तु स्त्रीबेरं निक्षिपेत्सुधीः।
पुंबेरं निक्षिपेत्तत्र स्तनान्तं देशिकोत्तमः॥
अष्टपुष्पं समभ्यर्च्य ताम्बूलादि निवेदयेत्।
एवं मुहूर्तं निक्षिप्य पश्चाद्ग्रामप्रदक्षिणम्॥'

(आर्. इ. १५५४० इत्यङ्किते तालपत्रकोशे २१ तमे पत्रे **प्रतिष्ठानुक्रमण्याम्**।)

[6] **तै. ब्राह्मणे** ३.६.१; इदं वस्त्राणि युग्मासु परिवित वस्त्राधि० — ख

[7] रक्षाबन्धं ततः कृत्वा पूर्वोक्तविधिना गुरुः।
(**सिद्धान्तदीपिकायां** (टि.१२०) १११पृ०)

[8] **तै. आरण्यके** १०.७४.

[9] बद्धायात् — घ.

[10] **सामवेदे** ८०९.

[11] मन्त्रतः — घ.

[12] 'देवाग्रे चोत्तरे वापि त्वैशान्यां वा विशेषतः;
नवहस्तप्रमाणेन मण्डपं चतुरश्रकम्॥
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥
वितानध्वजसंयुक्तं दर्भमालासमन्वितम्।
कूटं वापि प्रपाकारं मण्डपं कारयेत्सुधीः॥
मण्डपं नवधा भज्य मध्यभागे तु वेदिकाम्।
अरत्निमात्रसंयुक्तां दर्पणोदरसंनिभाम्॥
उपवेदिसमायुक्तां प्रकुर्यात्तु यथाविधि।
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा॥
एकाग्न्यायतनं वापि कुर्यात्पूर्वोक्तवर्त्मना।
नवाग्न्यायतने सर्वं पद्माकारं तु कुण्डकम्॥
पुरन्दरेशयोर्मध्ये वृत्तकुण्डं प्रधानकम्।
अथवा तु चतुर्दिक्षु चतुरश्रं विदिक्षु च॥
पद्मकुण्डं प्रधाने तु वृत्तं वा चतुरश्रकम्।
पञ्चाग्न्यातने दिक्षु पद्मं वृत्तं प्रधानकम्॥
एकाग्न्यायतने पूर्वे वृत्तं वा चतुरश्रकम्।

तन्मध्ये वेदिकां [1]कुर्याद्धस्तद्वयसमानकाम्[2] ॥२७॥
अष्टाङ्गु[3]लोच्छ्रितां कुर्यादुपवेदिसमन्वितां[4]।
दर्पणोदर[5]संकाशां शालिपिष्टेन रञ्जयेत् ॥२८॥
[6]तत्पूर्वे हस्तमानेन वृत्तकुण्डं प्रकल्पयेत्।
नाभियोनिसमायुक्तं मेखलात्रयसंयुतम् ॥२९॥

[7][शयनाधिवासः]

[8]वेद्युपरि [9]विनिक्षिप्य चतुर्द्रोणप्रमाणतः।
[10]धान्यार्धतण्डुलैश्चैव [11]तदर्धैश्च तिलैरपि ॥३०॥
[12]नागगायत्रिमन्त्रेण [13]शयनानि प्रकल्पयेत्।
[14]अण्डजं मुण्डजं चैव रोमजं [15]दारुजं तथा ॥३१॥
[16]वामजं [17]शयनं पञ्च वेद्यूर्ध्वे विन्यसेद्बुधः।
[18]नागगायत्रिमन्त्रेण शयने शाययेद्बुधः ॥३२॥

कुण्डं कृत्वा विधानेन गोमयेनानुलेपयेत् ॥
ततः शिल्पिनमुद्वास्य पुण्याहं वाचयेत्ततः।'
(**सिद्धान्तदीपिकायां** (टि.१२०) पृ०१०६,१०७);
एतद्विषये पुनः **रौरवे** क्रियापादे ३८.१८ उ०–२० पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[1] कृत्वा हस्त० — ख.
[2] ०समानकम् — ख.
[3] ०लोच्छ्रतं कृत्वा उप० — ख.
[4] ०समन्वितम् — ख.
[5] ०संकाशं — ख.
[6] एतदर्धस्थाने 'घ' मातृकायां 'कुम्भस्य पश्चिमे भागे होमकुण्डं तु कारयेत्' इति दृश्यते।
[7] 'वेद्यूर्ध्वे स्थण्डिलं कृत्वा चाष्टद्रोणैश्च शालिभिः।
तदर्धतण्डुलैश्चैव तदर्धैश्च तिलैरपि ॥
सप्तधान्यैश्च लाजैश्च दर्भैश्चैव परिस्तरेत्।
पञ्चवर्णसमायुक्तं वस्त्रं तस्योपरि न्यसेत् ॥
तन्मध्ये शाययेद्बिम्बं प्राक्शिरश्चोर्ध्ववक्त्रकम्।'
(**सिद्धान्तदीपिकायां** (टि.१२०) पृ०१११);
एतस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.२०उ०–२३ श्लोका द्रष्टव्याः।
[8] वेद्योपरि — ख, घ.
[9] विनिक्षिप्या — घ.
[10] धान्यार्धं तण्डुलं चैव — ख; धान्यर्थतण्डुलं चैवा — घ.
[11] तदर्धैश्च — ख; तदर्धं तिललाजकैः — घ.
[12] अस्मिन्पटले 'नागगायत्रिमन्त्रेण' इति ह्रस्वान्त-गायत्रिपदसहितप्रयोगो बहुशो दृश्यते। स च प्रयोगो वृत्तार्थं कृत इति भाति। नागगायत्री-मन्त्रश्च ११२ पूर्वर्धानन्तरं प्रोच्यते।
[13] शयनादीन् प्र० — ख; शयनादि प्रगन्तु — घ.
[14] अण्डजादिशयनविषये **रौरवे** क्रियापादे २८.३९ उ०; ४०पू० श्लोकः; **रौरवोत्तरे** १६.२८उ०, २९ पू० श्लोकस्तदीयटिप्पण्यश्च द्रष्टव्याः।
[15] धातुजं — ख;
"दारुजं चर्मजं चैव रोमजं पक्षजं तथा।
उपर्यास्तरणोपेतं शयनं पञ्चधा भवेत् ॥
दारुजं फलकं ज्ञेयं क्षीरवृक्षसमुद्भवम्।'
(**अजिते** ४०.५१ उ०; ५२)
[16] वर्मजं — ख; 'कौशेयं वामजं प्रोक्तम्' **सुप्रभेदे** क्रियापादे ३६.४४ पू०।
[17] शयने — ख.
[18] एतस्मिन्विषये ३१ श्लोकपूर्वार्धटिप्पणी द्रष्टव्या।

[1][कुम्भस्थापनम्]

[2]**पद्ममष्टदलं लिख्य** [3]**तन्मध्ये स्थापयेद्घटान् ।**
[4]**साम्रपत्रनालिकेरान्सरत्नान्सूत्रवेष्टितान्**[5] ॥३३॥
[6]**सकूर्चान्रक्तवस्त्रांश्च** [7]**सुगन्धवारिपूरितान्**[8]

[9][स्वर्णनागप्रतिमा]

दशनिष्कसुवर्णेन तदर्धार्धेन वा पुनः ॥३४॥
स्वर्णेन नागप्रतिमां कुर्यात्तद्वेररूपिणीम् ।
प्रधानप्रतिमाद्वचंशे [10]**एकांशे पञ्चधा कृताम् ॥३५॥**

[मण्डपपूजा]

आचार्य [11]**ऋत्विजैः सार्धं** [12]**स्नातैर्वस्त्रोत्तरीयकैः ।**
[13]**पञ्चमुद्रासमायुक्तः कर्णाङ्गुलिविभूषणः ॥३६॥**
[14]**नित्यां नैमितिकीं संध्यां संध्यायां तु विशेषतः ।**

---

[1] 'नागस्यैव शिरोदेशे प्रधानं द्रोणपूरितम् ।
नवरत्नसमायुक्तं चूतपत्रैरलंकृतम् ॥
वस्त्रयुग्मेन संवेष्टच वेदिमध्ये तु विन्यसेत् ।
तस्याग्रे शिवलिङ्गस्य फणामध्यस्थितस्य च ॥
विन्यसेत्कुम्भमेकं तु पूर्वोक्तेनैव वर्त्मना ।
तस्याग्रे नागराजस्य बिम्बं निष्कसुवर्णकम् ॥
कृत्वा कुम्भस्य चाग्रे च वस्त्रोपरि च विन्यसेत् ।
परितः कलशानष्टौ ससूत्रान्सापिधानकान् ॥
सवस्त्रान्हेमसंयुक्तान्कूर्चपल्लवसंयुतान् ।
सरत्नान्प्रतिमायुक्तान्सर्वलक्षणसंयुतान् ॥
इन्द्रादीशानपर्यन्तं दलाग्रे विन्यसेत्क्रमात् ।'
(**सिद्धान्तदीपिकायां** (टि १२०) पृ० ११२, ११३);
एतस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.२४, २५ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[2] पदमष्टदलं विलिख्य — घ.

[3] कुम्भानां स्थापनोपरि — घ.

[4] साम्रपत्रान्नालि – ख; आम्रतपत्रं नालिकेरं – घ.

[5] सरक्तं सूत्रवेष्टितम् — घ.

[6] सकूर्चं रक्तवस्त्रं च — घ.

[7] सुगन्धान्वारि० — ख; सुगन्धं वारि० — घ.

[8] ०पूरितम् — घ.

[9] 'निष्कादिदशनिष्कान्तहेम्ना वापि सलक्षणा ।
दशादिशतनिष्कान्तरौप्येणापि विनिर्मिता ॥
पलादितिथिसंख्यान्तताम्रेणापि विनिर्मिता ।
प्रतिमा स्वार्थकृत्येषु दानेषु च विधीयते ॥'
(**सिद्धान्तदीपिकायां** (टि. १२०) पृ० १०३)

[10] येकांशे — ख.

[11] ऋत्विक्शब्दस्याकारान्ततया प्रयोग इति भाति ।

[12] स्नातवस्त्रो० — ख.

[13] पञ्चमुद्राः —
'रुद्राक्षमुपवीतं च उष्णीषं चोत्तरीयकम् ।
भस्म चैवादिशैवानां पञ्चमुद्राः प्रकीर्तिताः ॥'
(**'शैवागमपरिभाषामञ्जर्याम्** ५.१७५ उ०, १७६ पू०)

[14] नित्यनैमिकं संध्या — ख;

विशेषेण च संकल्प्य पुण्याहं वाचयेत्क्रमात् ॥३७॥

[1][सूर्यपूजादि]

सूर्यपूजां ततः कृत्वा गणेशं पूजयेत्ततः ।
प्राणसंयमनं कृत्वा सकलीकरणं चरेत् ॥३८॥

[द्वारदेवतापूजा]

सामान्यार्घ्यं च संसाध्य प्रोक्षयेद्द्वार[तो]रणान् ।
[2]**शान्तिभूतिबलारोग्यं न्यसेत्पूर्वादितोरणे**[3] **॥३९॥**
[4]**दुर्गासरस्वतीलक्ष्मीर्द्वारस्योर्ध्वे समर्चयेत् ।**
द्वारस्य उत्तरे पार्श्वे सहस्रशिरसे नमः ॥४०॥
तद्द्वारदक्षिणे पार्श्वे आदिशेषं समर्चयेत् ।
दक्षिणे द्वारपूर्वे तु [5]**भूमिधारणं पश्चिमे ॥४१॥**
[6]**फणामणिमण्डितं च** [7]**पश्चिमद्वारदक्षिणे ।**
[8]**तक्षकं पूजयेत्पश्चादुत्तरे** [9]**मणिगर्भितम् ॥४२॥**
उत्तरद्वार[10]**पश्चिम्यां महानागं तु पूर्वके ।**
[11]**महानालं च संपूज्य द्वाराणामुभयपार्श्वयोः**[12] **॥४३॥**

'आचार्यो मूर्तिपैः सह सायं संध्यां विशेष-संध्यां च निर्वृत्य, परिजनैः स्वस्तिमङ्गलवाचकैः सहितं यागशालां प्रदक्षिणक्रमेण पूर्वद्वारेणान्तः प्रविश्य, कूर्मासनोपरि सौम्यास्य उपविश्य, संकल्प्य, सकलीकृत्य, सामान्यार्घ्यं संस्थाप्य, तिरःपवित्रे विघ्नेश्वरपूजां विधाय, पुण्याहवाचनं कृत्वा तदम्भसा मण्डपं संप्रोक्ष्य' (**शिवागमशेखरे** द्वितीयभागे पृ० ६९)

[1] 'भान्वादिगुरुपर्यन्तमर्चनोक्तं समाचरेत् ।
अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यान्तं समाप्य च ॥'
(**सिद्धान्तदीपिकायां** (टि. १२०) पृ० ११२)

[2] शान्तिभूतबलारोग्यान् — ख;
'शान्तिभूतिबलारोग्यं तोरणेषु प्रकल्पयेत्'
(**पूर्वकारणे** २५.५० उ०);
'प्लक्षोदुम्बराश्वत्थवटजास्तोरणाः क्रमात् ।
पूर्वादितो विधातव्या यद्वाद्यन्तविपर्ययः ॥
शान्तिभूतिबलारोग्यनामान्येषां यथाक्रमम् ।
(**'सोमशम्भुपद्धतौ** ३.२.३६, ३७ पू०)

[3] 'घ' मातृकायां ३९ श्लोकस्योत्तरार्धानन्तरं —
'मण्डपे लोकपालानां तत्तत्स्थाने तु पूजयेत्' इत्यर्धमेकमधिकतया दृश्यते। लोकपालार्चनस्य ५२ पूर्वार्धे वक्ष्यमाणत्वादत्रेदमर्धं पाठतया न संघटितम् ।

[4] दुर्गासरस्वतीपूजा द्वारपार्श्वे तु पूजयेत् — घ.

[5] भूमिधारणपश्चिमे — ख.

[6] भणामणिमण्डितश्च — ख.

[7] पश्चिमे द्वार — ख.

[8] तक्षं पूज — ख.

[9] माणि — ख.

[10] ०पश्चम्य महा० — ख; 'पश्चिमायाम्' इत्यत्र 'पश्चिम्याम्' इति प्रयोगः। एतद्विषये **रौरवोत्तरे** १४.७ पूर्वार्धटिप्पणी द्रष्टव्या ।

[11] अत्र 'महापालं' इति पाठो युक्त इति भाति।

[12] ०मुभपार्श्वयोः — घ.

[१] **नित्यवत्पश्चिमद्वारे दृष्ट्वा दिव्यान्तरिक्षकान्**[२] ।
[३] **नैर्ऋते वास्तुनाथं च पूजयेदुपचारकैः ॥४४॥**
[४] **पूर्वादिदिग्ध्वजे** [५] **पूज्या वज्रादिक्रमदेवताः**[६] ।
[७] **कुमुदादीन्पताकासु** [८] **हेतुघ्नाद्यष्टकं यजेत् ॥४५॥**

---

[१] 'नित्यवत्' इत्यस्यानन्तरं 'संपूज्य' इत्यध्याहृत्य व्याख्येयम् ।;
'पश्चिमद्वारमाश्रित्य पुष्पक्षेपं विधाय च ।
अस्त्रेण पार्ष्णिघातस्य त्रयं कृत्वाथ भूगतान् ॥
कृत्वा तालत्रयं मन्त्री विघ्नानाकाशवर्तिनः ।
छोटिकात्रयतो विघ्नान्धाम्नः प्रोत्सारयेद्बहिः ॥
दक्षजङ्घां समुत्क्षिप्य वामशाखाश्रयी विशेत् ।
अस्त्रेणोदुम्बरे पुष्पं क्षिप्त्वा धाम्नश्च मध्यमे ।'
(**उत्तरकामिके** २०.७–९);
'पश्चिमद्वारमारुह्य नित्यद्वारादिकं यजेत् ।
दिव्यान्तरिक्षभूमिष्ठान्विघ्नानुत्सार्य बुद्धिमान् ॥
दक्षजङ्घां समुत्क्षिप्य वामशाखां विशेषतः ।
अस्त्रेणोदुम्बरे पुष्पं द्वारं प्रति विचक्षणः ॥'
(**पूर्वकारणे** ५८.३९ उ०–४१ पू०);
'तत्त्वदृष्टचावलोक्य शेषद्वाराणि घट्टयन् नित्यवद् द्वारपालान् पश्चिमद्वारे संपूज्य'।
'न्यस्तमूलेन चक्षुषोर्ध्वं विलोक्य दिव्यान् ओं हः अस्त्राय फड् इति, ज्वलन्नाराचमुद्रया पुष्पं क्षिप्त्वान्तरिक्षगान्, 'ओं हुं फड्' इति पाशुपतास्त्रेण दक्षिणपार्ष्णिघातत्रयेण भूमिष्ठांस्त्रिविधान्विघ्नानुद्वास्य'।
(**अघोरशिवकृतशिवप्रतिष्ठाविधौ** पृ० ११५)

[२] अत्र 'भूमिष्ठांश्च विघ्नान्प्रोत्सार्य' इति पदत्रयमध्याहृत्य व्याख्येयम् ।; अत्र **अजिते** २०.१२८ उ०, १२९ पू० श्लोको द्रष्टव्यः ।; दिव्यन्तरिक्षके — ख.

[३] 'वास्तोष्पतये चेति ब्रह्मणे नम इत्यपि ।
संपूज्य गन्धपुष्पाद्यैर्ब्रह्माणं निर्ऋतिगोचरे ॥'
(**पूर्वकारणे** ५८.४१ उ०, ४२ पू०);
'प्रादक्षिण्येन गत्वा नैर्ऋते —
हंसस्थं तुन्दिलं गौरं सश्मश्रुचतुराननम् ।
दधानं दक्षिणे वामे दण्डाक्षस्रुक्कमण्डलुम् ॥
ओं हां वास्त्वधिपतये ब्रह्मणे नम इत्यभ्यर्च्य'
(**अघोरशिवकृतशिवप्रतिष्ठाविधौ** ११७);

[४] 'वज्रं शक्तिं च दण्डं च खड्गं पाशं तथा गुरुः ।'
'गदां त्रिशूलं चक्रं च पद्मं चेति दशायुधम् ॥
पूर्वादिदिक्पताकादौ पूजयेत्तु दशायुधम् ।'
(**पूर्वकारणे** ५८.३३ उ०, ३४);
दशायुधपूजाविषये **अघोरशिवाचार्यविरचित शिवप्रतिष्ठाविधौ** १९५–१९८ पृष्ठानि द्रष्टव्यानि ।

[५] पूज्य वज्रा० — ख.

[६] ०देवतान् – ख.

[७] 'कुमुदः कुमुदाक्षश्च पुण्डरीकश्च वामनः ।
शङ्कुकर्णस्तथा शर्वस्त्रिशेत्रः सुप्रतिष्ठितः ॥
पूर्वाद्ध्वजाष्टवामानां [पालांस्तु ?] समभ्यर्च्य यथाक्रमम् ।'
(**पूर्वकारणे** ५८.३५, ३६ पू०);
'द्वारोपरिस्थितध्वजे ओं हां कुमुदासनाय नमः । ओं हां कुमुदमूर्तये नमः —
कुमुदं पूर्वदिग्भागे सितवर्णं विभावयेत् ।
द्विलोचनं द्विबाहुं च दण्डाभयकरान्वितम् ॥
ओं हां कुमुदाय नमः, अग्निकोणध्वजे ओं हां कुमुदाक्षासनाय नमः । ओं हां कुमुदाक्षमूर्तये नमः —
आग्नेय्यां कुमुदाक्षं च दशभानुसमप्रभम् ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ॥
ओं हां कुमुदाक्षाय नम इत्येवं पूर्वद्वारदेवानाराध्य सर्वोपचारैः संपूज्य'
'द्वारोपरिस्थितध्वजे ओं हां पुण्डरीकासनाय नमः । ओं हा पुण्डरीकमूर्तये नमः —
भृङ्गाभं पुण्डरीकाख्यं दक्षिणस्यां दिशि ध्वजे ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ॥
ओं हां पुण्डरीकाय नमः ।

[१] **मण्डपोर्ध्वे स्थिते [२] कम्पे पृथ्व्यादिब्रह्मपञ्चकम् ।**
[३] वेदिदक्षिणपार्श्वे तु [४] व्याघ्रचर्मासनोपरि ॥४६॥
स्थित्वा देवस्य [५] दक्षिण्यां [६] करन्यासं समाचरेत् ।

निर्ऋतिकोणध्वजे ओं हां वामनासनाय नमः ।
ओं हां वामनमूर्तये नमः —
वामनं नैर्ऋते देशे भिन्नाञ्जनसमद्युतिम् ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ॥
ओं हां वामनाय नम इत्येवं दक्षिणद्वारदेवानाराध्य सर्वोपचारैः संपूज्य'
'द्वारोपरिस्थितध्वजे ओं हां शङ्कुकर्णासनाय नमः । ओं हां शङ्कुकर्णमूर्तये नमः —
वारुण्यां दिशि नक्षत्रसंनिभं शङ्कुकर्णकम् ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ।
ओं हां शङ्कुकर्णाय नमः ।
वायुकोणध्वजे ओं हां शर्वनेत्रासनाय नमः ।
ओं हां शर्वनेत्रमूर्तये नमः —
वायव्यां शर्वनेत्रं वै रक्तवर्णं-महाबलम् ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ।
ओं हां शर्वनेत्राय नम इत्येवं पश्चिमद्वारदेवानाराध्य सर्वोपचारैः संपूज्य'
'द्वारोपरिस्थितध्वजे ओं हां सुमुखासनाय नमः ।
ओं हां सुमुखमूर्तये नमः —
सुमुखं षट्पदप्रख्यं कौबेरदिशि संस्थितम् ।
द्विलोचनमहं वन्दे दण्डाभयकरान्वितम् ॥
ओं हां सुमुखाय नमः ।
ईशानकोणध्वजे ओं हां सुप्रतिष्ठितासनाय नमः ।
ओं हां सुप्रिष्ठितमूर्तये नमः —
शशाङ्कधवलं ध्यायेदीशाने सुप्रतिष्ठितम् ।
द्विलोचनं द्विबाहुं च सरत्नमकुटान्वितम् ॥
ओं हां सुप्रतिष्ठिताय नम इत्येवमुत्तरद्वारदेवानाराध्य सर्वोपचारैः संपूज्य भवद्भिर्यज्ञरक्षकत्वेन स्थातव्यमाहितादरैरिति विज्ञाप्य'।
(**अघोरशिवविरचितशिवप्रतिष्ठाविधौ** पृ० १०३, १०७, ११०, १११, ११४)

[१] 'यागमण्डपकम्पेषु पृथिवीतत्त्वकं यजेत् ।
तृणेषु जलतत्त्वं च बन्धेषु चाग्नितत्त्वकम् ।
वंशेषु वायुतत्त्वं च स्थूणासु गगनं यजेत् ॥'
(**पूर्वकारणे** ५८.४२ उ०; ४३);
'सदाशिवतत्त्वान्तव्याप्तिकं मण्डपं विभाव्य'
(**अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** पृ० ११७)

[२] कप्यां — ख.

[३] 'उपविष्ट उदग्वक्त्रो भूतशुद्धिं समाचरेत् ।
सकलीकरणं कृत्वा कृतान्तर्यजनो गुरुः ॥
(**उत्तरकामिके** २०.११ उ०, १२ पू०);
'पश्चाद्वेदीदक्षिणतः कूर्मासने व्याघ्राजिनादौ रुचिरासनः सन्नुदङ्मुखः समुपविश्य, भूतशुद्धचन्तर्यजनहवनध्यानस्थानशुद्धिविशेषार्घ्यकरणद्रव्यमन्त्रशोधनपञ्चगव्यसाधनानि कुर्यात् ।'
(**अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** पृ० ११७)

[४] व्याघ्रस्यादासनोपरि — ख.

[५] 'दक्षिणायाम्' इत्यत्र 'दक्षिण्याम्' इति प्रयोगः।; एतद्विषये **रौरवोत्तरे** १४.६ पू० टिप्पणी द्रष्टव्या ।

[६] एतद्विषये **अजिते** २०.७३पू०—८०पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[१] हेतुकाद्यष्टकं-ख;
'हेतुघ्नस्त्रिपुरघ्नश्च वेतालश्चाग्निजिह्वकः ।
कालः करालो भीमश्च एकपादस्तथैव च ॥
पूर्वादीशानपर्यन्तं पूजयेत्तु यथाक्रमम् ।'
(**पूर्वकारणे** ५८.३६ उ०; ३७);
'पूर्वादिदिक्षु ओं हां हेतुघ्नाय नमः । ओं हां त्रिपुरघ्नाय नमः । ओं हां वह्न्यास्याय नमः । ओं हां यमजिह्वाय नमः । ओं हां कालाय नमः । ओं हां करालिने नमः । ओं हां एकाङ्घ्रये नमः । ओं हां भीमाय नम इति क्षेत्रपालान् संपूज्य संतुष्टान्परिभाव्य'
(**अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** पृ० ११४)

[1]भूतशुद्धिं ततः कृत्वान्तर्यजनमाचरेत्[2] ॥४७॥
[3]स्थानशुद्धिं ततः कृत्वा [4]मन्त्रशुद्धिं समाचरेत् ।
[5]दण्डभङ्गच्या मुण्डभङ्गच्या कलाभङ्गच्या च विन्यसेत् ॥४८॥
[6]विशेषार्घ्यं च संसाध्य [7]पञ्चमुद्राश्च धारयेत् ।
[8]पञ्चगव्यं च संसाध्य शालादीन्प्रोक्षयेत्कुशैः ॥४९॥
[9]विकिरान्विक्षिपेदस्त्रैः सर्वविघ्नापनुत्तये ।

---

[1] एतद्विषये **अजिते** २०.५१ – ७३ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[2] एतद्विषये **अजिते** २०.११० उ०; १११ पू० श्लोकस्तदीयटिप्पणी च द्रष्टव्यौ ।; 'ग, घ' मातृकयोः ४७ तमश्लोकोत्तरार्धस्य स्थाने —
'द्वारपूजां समारभ्य भूतशुद्धयन्तमेव च ।
अन्तर्यजनमार्गेण अन्तर्यागं समाचरेत् ॥'
इत्यर्धद्वयं दृश्यते । यद्यप्युभयोरपि मातृकयोर्द्वारपूजाविषयकग्रन्थः प्रायेण नोपलभ्यते । तथापि 'द्वारपूजां समारभ्य' इत्यनेन विषयोऽयं सूचित इति भाति ।

[3] एतद्विषये **अजिते** २०.१०८ उ० – ११० पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[4] एतद्विषये **अजिते** २०.११८ श्लोकस्तदीयटिपणी च द्रष्टव्ये ।

[5] दण्डभङ्गचादिन्यासविषये **अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ.** १७५–१७८ पृष्ठानि द्रष्टव्यानि ।

[6] 'विशेषार्घ्यं ततः कुर्याद्यवसिद्धार्थकाक्षतैः ।
अद्भिस्तिलकुशाग्रैश्च क्षीरपुष्पैः समन्वितम् ॥
(**उत्तरकामिके** २०.१२ उ०; १३ पू०)

[7] पञ्चमुद्रां च — ख; पञ्चमुद्राविषयेऽस्मिन्पटले ३६ तमश्लोकोत्तरार्धटिप्पणी द्रष्टव्या ।

[8] 'कल्पयेत् पञ्चगव्यं तु तद्विधानमिहोच्यते ।
मण्डपस्य शुभे भागे क्षेत्रे नवपदीकृते ॥
पञ्चतत्त्वकृतन्यासे पञ्चपात्राणि विन्यसेत् ।
शिवे सदाख्ये विद्यायां काले पुंसि च देशिकः ॥
सुप्रतिष्ठं सुशान्तं च तेजोवदमृतात्मकम् ।
रत्नोदकं च संकल्प्य क्षीरं दधि घृतं न्यसेत् ॥
गोमयं चैव गोमूत्रमीशानाद्यैस्तु मन्त्रितम् ॥
एकद्वित्रिचतुष्पञ्चवारैः षड्भिः कुशोदकम् ॥
अमृतीकृत्य संपूज्य शिवेनैकत्वमाचरेत् ।'
मण्डपं तेन संप्रोक्ष्य'
(**उत्तरकामिके** २०.१६ उ० – २१ पू०);
एतद्विषये पुनः **अजिते** २२.६ – १४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।; पञ्चगव्यमथः कृत्वा — ग, घ.

[9] 'विकिरानभिमन्त्रयेत् ।
लाजचन्दनसिद्धार्थभस्मपुष्पकुशाक्षताः ॥
हेतयोऽस्त्रेण सप्तैते विधातव्या विमिश्रिताः ।
नैर्ऋत्यां मण्डपे स्थित्वा संस्कृतीर्मण्टपस्य तु ॥
कुर्यादीशानवक्त्रस्तु संस्कारैर्वीक्षणादिभिः ।
कुण्डस्येव पुरास्यापि गुरुरष्टादशात्र तु ॥
विकीर्य विकिरानीशे कुशकूर्च्या समाहरेत् ।
वेद्यां वा मण्टपे वापि ईशाने वापि पश्चिमे ॥
हेमाद्येकतमं कुम्भमानीय गलिताम्भसा ।
पूरितं पल्लवोपेतं स्वर्णवस्त्रादिसंयुतम् ॥
संहृतौ विकिरास्त्राणामासनं तु चलाचलम् ।
संकल्प्य मूर्तिमन्त्रेण मूर्तीभूतं घटं न्यसेत् ॥
वर्धनीं सोदकां वस्त्रसूत्रवर्णादिसंयुताम् ।
विन्यसेदस्त्रभूतां तां प्रत्यङ्नालसमन्विताम् ॥
संपूज्य गन्धपुष्पाद्यैर्घटास्त्रालू गुरूत्तमाः ।
(**उत्तरकामिके** २०.२१ – २८ पू०);
'लाजचन्दनसिद्धार्थभस्मदूर्वाक्षतान् कुशान् ।
विकिराञ्शुद्धलाजान्वा सप्तधास्त्राभिमन्त्रितान्॥
अस्त्राम्बुप्रोक्षितानेतान्कवचेनावकुण्ठितान् ।
नानाप्रहरणाकारान्विघ्नौघविनिवारकान् ॥'
'अर्घ्याम्बुपञ्चगव्याभ्यां संप्रोक्ष्य मखमण्टपम् ।
चतुष्पथान्तसंस्कारैः संस्कुर्याद्वीक्षणादिभिः ॥

कुश[1]कूर्च्योपसंहृत्य [2]वर्धन्या आसने[3] बुधः ॥५०॥
[4]नैर्ऋते वास्तु संपूज्य [5]पश्चिमे नागकन्यकाम् ।
[6]ऐशान्यां चैव [7]यागेशीं यागेश्वरं च पूजयेत् ॥५१॥

विक्षिप्य विकिरांस्तत्र कुशकूर्च्योपसंहरेत् ।
तानीशदिशि वर्धन्या आसनायोपकल्पयेत् ॥'
(**सोमशम्भुपद्धतौ** २.१.२०, २१; २९ उ०–३१ पू०);

'पञ्चगव्येन संप्रोक्ष्य मण्टपं चार्घ्यवारिणा ।
वीक्षणाद्यैश्च संस्कारैः कुण्डोक्तैः सचतुष्पथैः ॥
संस्कृते मण्डपे तत्र विकिरानस्त्रतः क्षिपेत् ।
विकिरांस्तान्समाहृत्य कुशकूर्चेन देशिकः ॥
वर्धन्याद्यासनं कुर्याद्विद्यूर्ध्वे चेशकोणके ।
शिवकुम्भं न्यसेत्तत्र सप्तधान्यकृतासने ॥
त्रिसूत्रवेष्टितं रक्तं पञ्चरत्नोदकान्वितम् ।
पल्लवोत्तमकूर्चाढ्यं वस्त्रयुग्मविभूषितम् ॥
गन्धपुष्पाक्षतोपेतं सापिधानं सलक्षणम् ।
कुम्भदक्षिणदिग्भागे वर्धनीं विकिरासनाम् ॥
वस्त्रसूत्रयुगच्छन्नां सापिधानां सलक्षणाम् ।
स्वर्णमध्यमकूर्चाम्बुगन्धपुष्पस्रगन्विताम् ॥
प्रत्यङ्नालां न्यसेद्रक्तां चूतपल्लवशोभिताम् ।
नैर्ऋत्यामर्चयेद्देवांस्तोरणाधिपतींस्तथा ॥
(**सिद्धान्तशेखरे** ३.८.४३–४९);

'अर्घ्यपञ्चगव्याभ्यां यागमन्दिरं संप्रोक्ष्य, निरीक्षणादिभिर्यागमन्दिरं संस्कृत्य, हुंफडन्तास्त्रेण नानास्त्ररूपान् पूर्वाभिमन्त्रितलाजादीनन्तरायध्वंसकान्विकीर्य, हृदयेन कुशकूर्चिकया विकीर्णाल्लाँजादीन् समूह्य वर्धन्यासनार्थमीशाने विन्यसेत् ।'
(**क्रियादीपिकायाम्** पृ० १४६)

[1] कूर्चोपसंहृत्य — ख.
[2] वर्धन्यासनया बुधः — ख.
[3] अत्र 'उपकल्पयेत्' इत्यध्याहृत्य आसनविषये उपकल्पयेदिति व्याख्येयमिति भाति ।
[4] 'नैर्ऋते निर्ऋतिपूर्वकुम्भे ओं हां ब्रह्मासनाय नमः । ओं हां ब्रह्ममूर्तये नमः —
हंसस्थं तुन्दिलं गौरं सश्मश्रुचतुराननम् ।
दधानं दक्षिणे वामे दण्डाक्षस्रक्कमण्डलून् ॥
ओं हां वास्त्वधिपतये ब्रह्मणे नमः ।'
अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ पृ० १४६);

'तदनु नैर्ऋते अक्षतैर्वास्तुमण्डलमालिख्य तत्र वास्त्वधिपतिं सावरणं पूजयेत् 'अथ वास्त्वधिपतये ब्रह्मणे सावरणाय नमः' इति ।
(**क्रियादीपिकायाम्** पृ० १४६)

'वार्योर्दक्षिणकुम्भे ओं हां महालक्ष्म्यासनाय नमः । ओं हां महालक्ष्मीमूर्तये नमः —
द्वारस्य संमुखीं श्यामां पुष्परत्नौघवर्षिणीम् ।
ध्यात्वावाह्य यजेद्विद्वान्स्मरेन्मण्डपरूपिणीम् ॥
ओं हां महालक्ष्म्यै नम इति संपूज्य, तां शक्तिमण्टपरूपिणीमनुसंधाय'
(**अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** पृ० १४६);

'कलशे स्थण्डिले वा संपूज्य सिंहस्थां मण्टपाकारां सर्वरत्नैर्मखालयं पूरयन्तीं महालक्ष्मीं पूजयेत् ।'
(**क्रियादीपिकायाम्** पृ० १४६);

[6] ऐशान्याः पद — ख.
[7] वागीशी वागीश्वरं — ख; मण्डपार्चनविषये आगमान्तरेषु पद्धतिषु च वागीशीवागीश्वरपूजनविषयस्यादृष्टत्वात्, चिन्त्यागमे मण्टपार्चनविधौ — 'यागेश्वरस्य कुम्भस्य वर्धन्याश्च यथाविधि । वसुप्रस्थकशाली च' (१७.६४),
'यागेश्वरस्य कुम्भस्य वर्धनीमुत्तरे न्यसेत् ।
नालं चोत्तरदिग्भागे' (१७.७६) इति यागेश्वरकुम्भवर्धन्योःपूजाविषयकग्रन्थस्योपलभ्यमानत्वात्, 'घ' मातृकायां प्रकृतविषये 'यागेश्वरान् प्रपूजयेत्' इति पाठस्योपलभ्यमानत्वाच्चात्र पाठः 'यागेशीं यागेश्वरं' इति साधितः । यागेश्वरार्चनं च **अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** १५४–१६५ पृष्ठेषु दृश्यते ।

[1]**इन्द्रादिलोकपालांश्च यथाविधि समर्चयेत् ।**
[2]**वायव्यां तु गणेशं च [3]ऐशान्यां तु गुरून्यजेत् ॥५२॥**

[4][कुम्भार्चना]

प्रधान[5]कलशे स्तुत्वा महानागस्वरूपकम् ।

---

[1] 'इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा ।
वायुं सोमं तथैशानं पूजयेत्प्राग्दिगादितः ॥
विरिञ्चिमीशदक्षस्थं विष्णुं निर्ऋतिवामगम् ।
घटस्थं कलशस्थं वा कुण्डस्थं वा यजेद् गुरुः ॥
तथैव वज्रशक्त्यादिदशास्त्राण्यपि पूजयेत् ।'
(**उत्तरकामिके** २०.२८ उ०–३०);
अस्मिन्विषये **अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** १४७–१५४ पृष्ठानि द्रष्टव्यानि ।; लोकपालान् ततः पूज्या यथाविधी सम० — घ.

[2] 'वायुदिक्पूर्वपदकुम्भे षडुत्थासनपूर्वं ओं हां विघ्नविनायकासनाय नमः। ओं हां विघ्नविनायकमूर्तये नमः —
लम्बोदरं श्यामतनुं गणेशं
कुठारमक्षस्रजमूर्ध्वगाभ्याम् ।
मलड्डुकं दन्तमधःकराभ्यां
वामेतराभ्यां च दधानमीडे ॥
ओं हां विघ्नविनायकाय नम इत्यावाह्य सर्वोपचारैः संपूज्य
यत्सुरेशाध्वरोऽस्माभिः प्रतिष्ठाविधिहेतवे ।
प्रवर्तितः प्रयात्वन्तमविघ्नं तव संनिधौ ॥
इति विज्ञाप्य'
अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ पृ० १६४.

[3] 'ऐशान्यां तत्पश्चिमपदकुम्भे —
सदाशिवस्तु श्वेताभः अनन्तः श्यामलाकृतिः ।
श्रीकण्ठः शुक्लवर्णः स्यादम्बिका नीलवर्णिनी ॥
गुहः पीतनिभो विष्णुः कृष्णो रक्तस्तथा विधिः ।
ओं हां सदाशिवादिसप्तगुर्वासनाय नमः ।
ओं हां सदाशिवादिसप्तगुरुमूर्तिभ्यो नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**अघोरशिवविरचितशिवप्रतिष्ठाविधौ** पृ० १६४, १६५.)

[4] 'मध्यकुम्भे शेषराजमिन्द्रादिषु यथाक्रमम् ।
अनन्तं वासुकिं तक्षं कार्कोटं पद्ममेव च ॥
महापद्मं च शङ्खं च गुलिकं च यजेद्गुरुः ।
मध्ये शक्त्यादिपद्मान्तमासनं मूर्तिमूलकम् ॥
शेषराजं महाकायं सर्वाभीष्टप्रदायकम् ।
पञ्चवक्त्रसमायुक्तं फणामण्डलमण्डितम् ॥
ध्यायामि कुम्भमध्ये तु सर्वाभीष्टप्रसिद्धये ।
इति तन्मूलमन्त्रेण तद्गायत्र्या तु योजयेत् ॥
प्रणवं पूर्वमुच्चार्य त्वष्टवर्गस्य चादिकम् ।
आदिवर्गद्वितीयेन तच्चतुर्दशसंयुतम् ॥
बिन्दुनादसमायुक्तं शेषराजस्य मन्त्रकम् ।
पञ्चभूतं च पञ्चास्यं वेदशास्त्रं वपुस्तथा ॥
कला दन्ताश्च जिह्वाश्च मारुताग्नी सुनासिके ।
कर्णौ कुबेरनैर्ऋत्यौ चरणा इति चन्द्रमाः ॥
पुच्छं समस्तदेवाश्च शेषरूपं शुभात्मकम् ।
एवं ध्यात्वा विशेषेण कुम्भमध्ये प्रपूजयेत् ॥
आवाहयेत्ततो धीमांस्तत्सद्यादिक्रमेण तु ।
स्थापनं संनिधानं च संनिरोधनमेव च ॥
अवकुण्ठनं धेनोश्च मुद्रां चैव प्रदर्शयेत् ।
पाद्यं च पादयोर्दद्यान्मुखेष्वाचमनं तथा ॥
अर्घ्यं च शिरसि दद्यान्नमःस्वाहास्वधान्तकैः ।
मूलेन गन्धपुष्पं च नैवेद्यं धूपदीपकम् ॥
कृत्वा सर्वोपचारैश्च पूजयेच्छेषनायकम् ।
पञ्चब्रह्मषडङ्गैश्च तत्तत्स्थाने न्यसेद्गुरुः ॥
अक्षराणि न्यसेन्मूलं मन्त्रेणैवाञ्जलित्रयम् ।
दत्त्वा तु धूपदीपं तु अभीष्टं प्रार्थयेद्गुरुः ॥
शक्त्यादिशक्तिपर्यन्तं साङ्गं संपूजयेच्छिवम् ।
धूपदीपादिनैवेद्यैरुपचारैर्यजेच्छिवम् ॥
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ. ११३–११५)

[5] ०कलशेष्वत्र — ख.

ध्यात्वा नागेश[1] बीजं तु विन्यसेद्घटमध्यमे ।।५३।।
शक्त्यादिशक्तिपर्यन्त[2] मर्चयेदष्टकन्यकाः[3] ।
कमला उत्पला [4]पद्मा नागकन्या [5]च श्यामला ।।५४।।
[6]देहिनी पादसर्पा च शेषबालाष्टशक्तयः ।
सूर्यसोमाग्नि[7]शक्तीनां मण्डलानां चतुष्टये ।।५५।।
ब्रह्म[8] विष्णू च [9]रुद्रं च महानागं यजेत्क्रमात् ।
[10] एकत्रिंशत्कलान्यासं न्यसेन्नागेश्वरे[11] क्रमात् ।।५६।।
आवाहनादि[12] संस्कारांस्तत्तन्मन्त्रैः प्रपूजयेत् ।
हेमवर्णं महानागं [13]कुण्डलाभरणोज्ज्वलम् ।।५७।।
कृताञ्जलिपुटोपेतं ध्यात्वा [14]नागेश्वरं यजेत् ।
[15] श्रीदेवीं भूमिदेवीं च [16]यजेत्तद्दक्षवामयोः ।।५८।।
श्यामवर्णनिभां भास्वद्राजीवसमलोचनाम् ।
हेमयज्ञोप[17]वीतां च द्विभुजां च द्विलोचनाम् ।।५९।।
सर्वावयवसंयुक्तामेवं ध्यात्वा सुयोजयेत् ।
धूप[18] दीपं च नैवेद्यं ताम्बूलाद्युपचारकैः[19] ।।६०।।

---

[1] ०बिम्बं तु — ख.
[2] ०मासनाद्युपचारतः — ग, घ.
[3] ०कन्यकाम् — ख.
[4] पत्नि — ख.
[5] श शामलाम् — ख.
[6] देहिनि — ख.
[7] ०शक्ति च मण्डलां च चतुष्टयेत् — ख.
[8] ०विष्णुश्च — ख.
[9] रुद्रश्च — ख.
[10] मैकत्रिंश० — ख;
एकत्रिंशत्कलान्यासः —
'अष्टत्रिंशत्कलान्यासं प्रागेव प्रतिपादितम्' ।
एकत्रिंशत्कलान्यासे विशेषः कश्चिदिष्यते ।।
एकमेव शिरो वक्त्रं महेशे रुद्रविग्रहे ।
तत्रेशानेन वक्त्रेण मनुना मकलेन च ।।
मालात्मना विशिष्टं तु पूर्ववत्परिकल्पयेत् ।'
(**उत्तरकामिके** २.२३–२५ पू०)
[11] ०न्नागेश्वरं — ख.
[12] ०संस्कारं तत्तन्मन्त्रैः — ख, घ; संस्कारं तत्तन्मन्त्रेण — ग.
[13] कुण्डलाभरणं तथा — ग, घ.
[14] 'नागदेवस्तथोच्यते ।
त्रिणेत्रश्चतुर्भुजः सौम्यो रक्ताभश्च सिताम्बरः ।।
अभयवरदोपेतः परहस्ते तु नागधृक् ।
करण्डमकुटोपेतः नागः पञ्चफणान्वितः ।।
सर्वाभरणसंयुक्तः पद्मपीठोपरि स्थितः ।
(**काश्यपशिल्पशास्त्रे** ४८.१३६–१३८ पू०)
[15] श्रीदेविभूमिदेवि — ख; श्रीदेवि भूमिदेवि — ग; श्रीदेवीलक्षणविषये **अजिते** ३६.३५०, ३५१ पू० श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।; भूदेवीलक्षणविषये
'श्यामवर्णनिभा भास्वद्राजीवसमलोचना ।
हेमयज्ञोपवीता च द्विभुजा च द्विनेत्रका ।।
सर्वाभरणसंयुक्ता करण्डमकुटान्विता ।
रक्ताम्बरधरा चैव दक्षहस्तोत्पलान्विता ।।
धरण्याकृतिरेवं स्यात्'
(**पूर्वकारणे** १२.११२–११४ पू०); श्लोका द्रष्टव्याः ।
[16] यजेद्दक्षिणवामयोः — ग, घ.
[17] ०बीतं च — ख.
[18] ०दीपादि नैवेद्यं — घ.
[19] ०द्युपचारतः — घ.

[१] ऐशान्यां [२] वर्धनीं स्थाप्य ध्यात्वा [३] नागेश्वरीं यजेत्। [४]
संपूज्य गन्धपुष्पाद्यैरासनाद्युपचारतः[५] ॥६१॥
[६] आवाहनादिभिर्मन्त्रैः प्रत्येकं तु विशेषतः।
एवं संपूज्य सर्वेषां षडङ्गन्यासपूर्वकम् ॥६२॥
मातृकान्यासमन्त्रेण पादादि [७] च शिरोऽन्तकम्।
[८] नागगायत्रिमन्त्रेण जपमष्टोत्तरं शतम् ॥६३॥

[स्वर्णनागप्रतिमापूजनम्]

[९] स्वर्णेन नाग[१०]प्रतिमां [११]कृतां तद्वेर[१२]रूपिणीम्।
[१३] संपूज्य [१४]सर्पसूक्तेन [१५]मूलमन्त्रेण वा पुनः ॥६४॥
[१६] प्रधानकुम्भे निक्षिप्य पूजां [१७]कुर्याद्यथोक्तवत्।

[अष्टनागपूजा]

[१८] परिवारघटेष्वेताननन्तादीन्यजेत्क्रमात् ॥६५॥
[१९] अनन्तं पूर्वकुम्भे तु आसनाद्युपचारकैः।

---

[१] ऐशानां — घ.
[२] वर्धनि — ख, ग, घ.
[३] नागेश्वरं — ख, ग.
[४] ६१ पूर्वार्धानन्तरं 'ख, ग, घ' मातृकात्रयेऽपि यद्यपि 'अनन्तादीन्घटेष्वेतांस्तत्तन्नाम्ना प्रपूजयेत्' इत्यर्धमेकमधिकतया दृश्यते। तथापि ६५ श्लोकोत्तरार्धेऽयं विषयो वक्ष्यत इति नात्र पाठतया संघटितम्।
[५] ०द्युपचारकैः — ग.
[६] आवाहनादि प्रत्येकं पूजां कृत्वाधिशेषतः — ग.
[७] शिरशान्तकम् — ख.
[८] नागगायत्रीमन्त्रः; अस्मिन्विषये ३१ श्लोकपूर्वार्धटिप्पणी द्रष्टव्या.
[९] स्वर्णनागप्रतिमाकरणं ३४ उ०, ३५ श्लोकयोरुक्तम्।
[१०] ०प्रतिमं — घ.
[११] कृत्वा — ख, घ.
[१२] ०रूपिणम् — घ.
[१३] संपूज्या — घ.
[१४] **याजुषमन्त्रप्रश्ने** २.१७.
[१५] 'प्रणवं पूर्वमुच्चार्य त्वष्टवर्गस्य चादिकम्।
आदिवर्गद्वितीयेन तच्चतुर्दशसंयुतम् ॥
बिन्दुनादसमायुक्तं शेषराजस्य मन्त्रकम्।
(**सिद्धान्तदीपिकायाम्** पृ० ११४)
[१६] वेद्योपरि विनिक्षिप्य — ख.
[१७] कुर्यात् स देशिक. — घ.
[१८] 'पूर्वादारभ्य चैशान्तमष्टनागान् प्रपूजयेत्।
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० ११५)
[१९] पूर्वे ओं हां अनन्तासनाय नमः। ओं हां अनन्तमूर्तये नमः —
रत्नकुण्डलकेयूरकिरीटमकुटान्वितम्।
स्वर्णच्छायं द्विहस्तं च ह्यनन्तेशं नमाम्यहम् ॥
ओं हां अनन्ताय नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० ११५);
'घ' मातृकायां ६६ — ७८ पूर्वार्धान्तश्लो-

अनन्तस्य स्वरूपं तु [1]द्विवक्त्रं च चतुष्करम् ।।६६।।
अभयं वरदं चैव [2]अक्षमालां च पद्मकम्[3]।
[4][वासुकिमाग्नेयकुम्भे[5] पूजयेदुपचारकैः ।।]६७।।
[6]वासुकिं रक्तवर्णं [7]तु त्रिवक्त्रं च चतुष्करम् ।
अभयं वरदं चैव अक्षमालां च [8]कुण्डिकाम् ।।६८।।
तक्षकं [9]दक्षिणे कुम्भे [10]पूजयेदुपचारकैः ।
तक्षकं नीलवर्णं च एकवक्त्रं द्विहस्तकम् ।।६९।।
जटामकुट[11] संयुक्तं विचित्रफणसंयुतम् ।
[12] कार्कोटो [13]नैर्ऋते पूज्यः सर्वद्रव्योपचारकैः ।।७०।।
[14] कार्कोटको धूम्रवर्णः [15]पञ्चवक्त्रो द्विहस्तकः ।
[16] भूम्याधार[17]स्वरूपश्च [18]कृताञ्जलिपुटो भवेत् ।।७१।।
[19] पश्चिमे [20] पद्मकुम्भं तु [21]ध्यायेदेवं मनोहरम् ।

कानां स्थाने —
'अनन्तं पूर्वकुम्भे तु अनले वासुकिं यजेत् ।
तक्षकं दक्षिणे कुम्भे कार्कोटकं तु नैर्ऋते ।।
पश्चिमे पद्मकुम्भं तु महापद्मं तु वायवे ।
उत्तरे शङ्खकुम्भं तु ऐशान्यां गुलिकं यजेत् ।।'
इति श्लोकद्वयमेव दृश्यते ।

[1] द्विकं च चतुष्करम् — ख.
[2] अक्षमालास्वरूपकः — ख.
[3] अत्र 'दधत्' इति पदमध्याहृत्य व्याख्येयम् ।
[4] पूर्वोत्तरग्रन्थानुसारेणेदमर्धमधिकतया योजितम् ।
[5] 'आग्नेये ओं हां वासुक्यासनाय नमः । ओं हां वासुकिमूर्तये नमः —
प्रसन्नवदनप्रख्यं सकुमारं सुयौवनम् ।
फणामणिसुशोभाढ्यं वासुकिं तं नमाम्यहम् ।।
ओं हां वासुकये नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० ११५–११६)
[6] वासुकी — ग.
[7] च — ग.
[8] पद्मकम् — ग; अत्र 'वहन्तम्' इति पदमध्याहृत्य व्याख्येयम् ।
[9] 'याम्ये ओं हां तक्षकासनाय नमः । ओं हां तक्षकमूर्तये नमः —
इन्द्रादित्यसखं शुभ्रं नीलग्रीवाङ्गभूषणम् ।
माणिक्यमौक्तिकनिभं तक्षकं तमहं यजे ।।
ओं हां तक्षकाय नम इत्यावाहनादिसर्वोचारैः संपूज्य'
(**सिद्धान्तदीपिकायाम्** (टि० १२०) पृ० ११६)
[10] पूजयेद्युप० — ख.
[11] ०संयुक्तमेवं ध्यात्वा सुयोजयेत् — ग.
[12] कार्कोटकं नैर्ऋते पूज्य सर्व० — ख.
[13] 'नैर्ऋते ओं हां कार्कोटकासनाय नमः । ओं हां कार्कोटकमूर्तये नमः —
तेजोराशिसमाकीर्णं विषज्वालामुखोद्गतम् ।
कृष्णवर्णं द्विबाहुं च कार्कोटकमनुस्मरन् ।।
ओं हां कार्कोटकाय नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**सिद्धान्तदीपिकायाम्** पृ० ११६, ११७)
[14] कार्कोटकं धूम्रवर्णं च — ख; कार्कोटं धूम्रवर्णं च — ग.
[15] पञ्चवक्त्रं द्विहस्तकम् — ख, ग.
[16] भूमिधारणरूपं तु — ग.
[17] ०स्वरूपं च — ख.
[18] ध्यात्वा देवं सुयोजयेत् — ग.
[19] पश्चिमवायूत्तरदिक्षु कुम्भाधिपविषये 'घ' मातृकां तथा सिद्धान्तदीपिकां चानुसृत्य पाठः साधितः ।; 'वारुणे ओं हां पद्मासनाय नमः । ओं हां पद्ममूर्तये नमः —

[१]पद्मं तु श्वेतवर्णं तु एकवक्त्रं द्विहस्तकम् ।।७२।।
सर्वाभरणसंयुक्त[२]मभयवरदान्वितम् ।
[३]महापद्मं तु [४]वायव्ये पूज्य संस्कारकैर्यजेत् ।।७३।।
[५]महापद्मं श्वेतवर्णं दशवक्त्रं महाभुजम् ।
सर्वाभरण[६]संयुक्तं [७]ध्यायेच्छेषं महाबलम् ।।७४।।
[८]शङ्खपालं चोत्तरे[९] तु पूजयेद्गन्धपुष्पकैः ।
[१०]शङ्खपालस्वरूपं[११] तु एकवक्त्रं द्विहस्तकम् ।।७५।।
[१२]मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतकम् ।
[१३]ऐशान्यां [१४]गुलिकः पूज्यः सर्वद्रव्योपचारकैः ।।७६।।
गुलिकं पञ्चवक्त्रं तु [१५]द्विभुजं रक्तवर्णकम् ।
[१६]ऊर्ध्वदंष्ट्रासमायुक्तं [१७]क्रूरवक्त्रसमन्वितम्[१८] ।।७७।।
एवं ध्यात्वा महानागानष्टदिक्षु यजेत्क्रमात् ।
संपूज्य गन्धपुष्पाद्यैरासना[१९]द्युपचारतः ।।७८।।

विशालाक्षं गदाहस्तमम्बुदाकारवर्चसम् ।
पीनोरुचारुवक्षाढ्यं पद्मं वन्द्यमहं भजे ।।
ओं ह्रां पद्माय नम इत्यावाहनादिमर्वोपचारैः संपूज्य' (**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० १२७)

[२०] शङ्खकुम्भं — ख.
[२१] ध्यायेदेव — ख.
[१] शङ्खस्य स्वेत० — ख, शङ्खस्य श्वेत० — ग.
[२] ०मभयं वरान्वितम् — ख; ०मभयं वर — ग.
[३] पद्मं तु वायव्ये पूज्य संस्कारो रक्षकं यजेत् — ख.
[४] 'वायव्ये ओं ह्रां महापद्मासनाय नमः। ओं ह्रां महापद्ममूर्तये नमः —
गदाहस्तं विशालाक्षं कर्णोद्गतविषाकुलम् ।
सौम्यं द्विहस्तं सुशुभं महापद्मं यजेत्सुधीः ।।
ओं ह्रां महापद्माय नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**सिद्धान्तदीपिकायां** (टि. १२०) पृ० ११७)
[५] पद्मस्य श्वेतवर्णं तु दश० — ख; पद्मस्य श्वेतवर्णं तु सप्तवक्त्रं — ग.
[६] संयुक्तमेवं ध्यात्वा सुयोजयेत् — ग.
[७] ध्याये शेषं — ख.
[८] बालं तु उत्तरे पूज्य पूज० — ख.
[९] 'कौबेरे ओं ह्रां शङ्खपालासनाय नमः। ओं ह्रां शङ्खपालमूर्तये नमः —
त्रिशूलाभयपाणिं च स्वर्णवर्णं किरीटिनम् ।
सर्वालंकारशोभाढ्यं शङ्खपालं तमाश्रये ।।
ओं ह्रां शङ्खपालाय नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० ११७,११८)
[१०] एकवक्त्रं बाल्यरूपं द्विहस्तं हेमवर्णकम् — ग.
[११] महाबालस्वरूपं — ख.
[१२] मौञ्ज० — ग.
[१३] 'ईशाने ओं ह्रां गुलिकासनाय नमः। ओं ह्रां गुलिकमूर्तये नमः —
कुब्जं कुमुदकुन्दाभं मुखोद्गीर्णविषानलम् ।
बाणाकारद्विरसनं गुलिकं तं नमाम्यहम् ।।
ओं ह्रां गुलिकाय नम इत्यावाहनादिसर्वोपचारैः संपूज्य'
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० ११८)
[१४] गुलिकं पूज्य सर्व० — ख.
[१५] भास्वरं रक्त० — ग.
[१६] ऊर्ध्वदंष्ट्रसमा० — ख, ग.
[१७] भूम्यामावाहनधारिणम् — ग.
[१८] ०वक्त्रं समन्वितम् — ख.
[१९] ०द्युपचारतम् — ख.

[1]आवाहनादिभिः सर्वैः पूजां कृत्वा विशेषतः ।
[2]एवं संपूज्य [3]देवांस्तान् [4]षडङ्गन्यासपूर्वकम् ॥७९॥
[5]पादादिशिर[6]पर्यन्तं [7]पूजयित्वा यथाविधि ।
[8]नागगायत्रिमन्त्रेण जपमष्टोत्तरं [9]शतम् ॥८०॥
कल्पोक्तेन च संपूज्य सर्वद्रव्योपचारकैः ।

[10][होमः]

अग्निकार्योक्तमार्गेण शिवाग्निं च प्रकल्पयेत् ॥८१॥

---

[1] आवाहनादि प्रत्येकं पूजां — घ.
[2] एं संपूज्य — ख; एवं संपूज्या — घ.
[3] ते देवान् — ख; देवान्स्वान् — ग; देवांस्थान् — घ.
[4] षडङ्गं न्यास० — ख.
[5] पादादि शिरसि पर्यन्तं — घ.
[6] ०पर्यन्तमधाङ्गो न्यासमाचरेत् — ख.
[7] पूजां कृत्वा — घ.
[8] अस्मिन्विषये ३१ तमश्लोकपूर्वार्धटिप्पणी द्रष्टव्या ।
[9] कृतम् — घ.
[10] ततः कुण्डान्तिकं गत्वा सामान्यार्घ्यकरो गुरुः ।
आधानादि विवाहान्तमग्निकार्योक्तमाचरेत् ॥
अग्नौ सावरणं शेषं समभ्यर्च्य गुरूत्तमः ।
नाडीसंधानमार्गेण त्वैक्यभावं प्रगृह्य च ॥
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा ।
पलाशोदुम्बराश्वत्थवटाः प्रागादिषु क्रमात् ॥
शमीखदिरबिल्वार्का विदिक्षु च यथाक्रमम् ।
प्रधाने तु पलाशं तु पञ्चाग्न्यायतने तथा ॥
पलाशं च शमीं पूर्वे यज्ञाङ्गं खादिरं यमे ।
पश्चिमेऽश्वत्थबिल्वौ च वटार्कौ चोत्तरे तथा ॥
पलाशं तु प्रधाने तु होमकुण्डं तु सर्वशः ।
शतत्रयं तदर्धं वा कुण्डं प्रति तदर्धकम् ॥
शेषादीनां तु सद्येन तत्तत्कुण्डेषु होमयेत् ।
शेषादीनां तु मूलेन आज्यं तु जुहुयात्क्रमात् ॥
तत्तन्मूलेन लाजं तु तद्वामेन प्रियङ्गुकम् ।
तद्वामेन तिलं हुत्वा सिद्धार्थं सर्षपं क्रमात् ॥
पाशुपतेन चास्त्रेण प्रतिकुण्डं हुनेत्तथा ।
माषं च शिरसा हुत्वा मुद्गं वै हृदयेन तु ॥
कुलुत्थं मूलमन्त्रेण शिम्बं नेत्रेण होमयेत् ॥
व्रीहिमीशानमन्त्रेण यवं वै चास्त्रमन्त्रतः ॥
शिखामन्त्रेण शालिं च नीवारं चास्त्रमंन्त्रतः ।
गोधूममाढकं शिम्बं व्रीहिं वै चणकं तथा ॥
श्यामाकं चैव निष्पावं वेणुं दधि च मूलतः ।
पयश्चैव तु कस्तूरीं चन्दनं चन्द्रकान्तकम् ॥
गोरोचनं कुङ्कुमं च कृष्णगन्धं हिमाम्बु च ।
ह्रीबेरं च मदद्वन्द्वं गुग्गुलुं चैव मूलतः ॥
इक्षुखण्डं स्वादुकन्दं फलानि हृदयेन तु ।
सक्त्वपूपस्य निचयाञ्जुहुयात्कवचेन तु ॥
पृथुकं नालिकेरं च शिखामन्त्रेण होमयेत् ।
गुलान्नं चैव शुद्धान्नं माषान्नं कवचेन तु ॥
मुखवासमायुक्तं ताम्बूलं मूलमन्त्रतः ।
एतानि होमद्रव्याणि जुहुयात्तु शतत्रयम् ॥
शतमर्धं तदर्धं वा तदर्धं वा विशेषतः ।
भाष्योच्चारेण मन्त्रेण समिदादीन्प्रधानके ॥
यदन्तरिक्षं पृथिवीत्याज्येनैव च होमयेत् ।
सतिलाज्यैश्च सर्पेभ्यः स्वाहेति तदनन्तरम् ॥
पालाशं दन्दशूकेभ्यः स्वाहेति च ततः परम् ।
पक्वमन्नं तदाश्लेषाभ्यः स्वाहेति ततो गुरुः ॥
गुडूच्यपूपलाजांश्च सर्पसूक्तेन होमयेत् ।
अष्टोत्तरसहस्रं वा त्वष्टोत्तरशतं तु वा ॥
समिद्भिश्चरुणाज्येन प्रत्येकं जुहुयात्पुनः ।
नमो अस्त्विति मन्त्रेण त्वाज्येनैव शताहुतिम् ॥
हुत्वा पूर्णाहुतिं कुर्यात्परिषिच्य बलिं ददेत् ।

वक्त्रैकी[1]करणादिष्टदीपनान्तं तु होमयेत् ।
नागस्य [2]मूलमन्त्रेण पलाशैर्होमयेच्छतम् ॥८२॥
[3]नागगायत्रिमन्त्रेण [4]गुडूचीं वैतसीमपि ।
दूर्वाहोमं तु मूलेन प्रत्येकं तु शतं शतम् ॥८३॥
पञ्चब्रह्मषडङ्गैश्च लाजसर्षपमाषकान्[5] ।
[6]निष्पावं मुद्गबीजं च तिलगोधूमव्रीह्यवान् ॥८४॥
चरूंश्च [7]सक्तून् द्रव्याणि प्रत्येकं तु शतं शतम् ।
पलाशमीशमन्त्रेण वटं पुरुषमन्त्रतः ॥८५॥
अघोरेण [8]शमीं हुत्वा खादिरं वामेन होमयेत् ।
औदुम्बरं तु सद्येन दूर्वां हृदयमन्त्रतः ॥८६॥
अर्कं तु शिरसा[हुत्वा][9]शिखयाश्वत्थमेव च ।
कवचेन कुशं हुत्वा अपामार्गं तु नेत्रतः ॥८७॥
[हुत्वा चैवं देशिकस्तु] बिल्वमस्त्रेण होमयेत् ।
मूलेनाज्येन हुत्वा तु प्रत्येकं तु शतं शतम् ॥८८॥
नमोऽस्तु सर्पेभ्य इति हुत्वाज्येन सहस्रकम् ।
मूलेनैव सहस्रेण [10]तदर्धं वा [11]तदर्धकम् ॥८९॥
स्पृष्ट्वा स्पृष्ट्वा तु जुहुयाद्द्रव्यं प्रति विशेषतः ।
व्याहृतिभिश्च हुत्वा तु हव्य[12]वाहेन मन्त्रतः ॥९०॥
पञ्चगव्यं [13]चरुं प्राश्य दन्त[14]धावनमाचरेत् ।
आचार्यो यजमानश्च रात्रौ जागरणं चरेत् ॥९१॥

[15][अपरेद्युः करणीयविधिः]

प्रभाते विमले स्नात्वा नित्यकर्मादिकं चरेत्[16] ।

मूर्तिपाः स्वस्वकुण्डेषु पूर्णाहुत्यादिमाचरेत् ॥
आचार्यो मूर्तिपैः सार्धं पञ्चगव्यादिकं पिबेत् ।
रात्रिशेषं व्यपोह्याथ'
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० १२०–१२३);
अस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.२६–२८ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[1] ०करणादिष्ट दीपनां तन्तु — ख.
[2] मूलमन्त्रविषये ६४ श्लोकस्योत्तरार्धटिप्पणी द्रष्टव्या ॥
[3] अस्मिन्विषये ३१ श्लोकपूर्वार्धटिप्पणी द्रष्टव्या ।
[4] गलुचि वैतसिमपि — ख.
[5] ०माषक — ख.
[6] निष्पावमुद्विम्बं च — ख.
[7] सक्तुद्रव्याणि — ख.
[8] शमि — ख.
[9] शिखायाश्वत्थ — ख.
[10] तदर्थं — ख.
[11] तदर्थकम् — ख.
[12] तै० ब्राह्मणम् २.४.४
[13] चरू — ख.
[14] ०दावनमाचरेत् — ख.
[15] 'प्रभाते मूर्तिपैः सह ।

आचार्य ऋत्विजैः [१]सार्धं यागमण्डपमाविशेत् ।।९२।।
पूर्वोक्तद्वारपूजादिदीपनान्तं [२]यथाक्रमम् ।
बिम्बशुद्धिं ततः [३]कुर्यात्स्नानवेद्युपरि न्यसेत् ।।९३।।
पञ्चत्वग्मृत्तिकाम्भोभिः [४]पल्लवैः पञ्चगव्यकैः ।
[५]सस्यौषध्युदकैर्गन्धबिल्वपुष्प[६]हिरण्यकैः ।।९४।।
[७]धान्योदैश्चैव रत्नोदैरेतद्द्रव्यैस्तु घर्षयेत् ।
स्नापयेन्मन्त्रतोयेन [८]पञ्चशान्तीर्जपेत्ततः ।।९५।।
शयने शाययेद्बिम्बमण्डजाद्यासनोपरि ।
गृहोपकरणादीनि पाददेशेषु निक्षिपेत् ।।९६।।

स्नानादिनित्यकर्मान्तकर्म निर्वर्त्य पूर्ववत् ।
यागपूजां च होमं च सर्वं पूर्ववदाचरेत् ।।
मूलब्रह्माङ्गमन्त्रैश्च जुहुयात्तदनन्तरम् ।
शिवास्त्रेण शतं हुत्वा पूर्वादिषु यथाक्रमम् ।।
पाशुपतेन चास्त्रेण त्वघोरास्त्रेण वा गुरुः ।
प्रत्यङ्गिरेण चास्त्रेण क्षुरिकास्त्रेण होमयेत् ।।
शेषगायत्रिमन्त्रेण प्रत्येकं शतसंख्यया ।
हुत्वा पूर्णाहुतिं पश्चाज्जयादि परिषेचनम् ।।
कृत्वा त्वग्निस्थशेषं च कुम्भस्थे योजयेद्गुरुः ।
शयनाद्बिम्बमुत्थाप्य अभिषेकं समाचरेत् ।।
ग्रामप्रदक्षिणं कृत्वा आलयादौ निवेशयेत् ।
भिन्नपीठे तु रत्नानां न्यासं कृत्वाष्टबन्धनम् ।।
पञ्चगव्येन संस्नाप्य पवमानमुदीरयन् ।
अक्षराणि न्यसेत्पश्चात्पञ्चावरणमार्गतः ।।
अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यान्तं समाप्य च
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० १२३–१२५)

[१६] 'ग' मातृकायां ८१ श्लोकोत्तरार्धात्प्रभृति ९२ पूर्वार्धपर्यन्तभागेऽधोलिखितरीत्या सार्धपञ्चकश्लोका एव दृश्यन्ते —
'अग्निकार्योक्तमार्गेण दीपनान्तं यथाविधि ।
पलाशसमिधो हुत्वा गुडूचीं वैतसीमपि ।।
दूर्वाहोमं ततः कृत्वा लाजसर्षपमाषकम् ।
निष्पावं मुद्गबीजं च तिलगोधूमव्रीह्यवम् ।।
होमद्रव्याणि संप्रोक्ष्य मूलमन्त्रैर्हुनेत्क्रमात् ।
नागाधिराजमन्त्रेण हुत्वा शतसहस्रकम् ।।
शतमर्धं तदर्धं वा हुत्वा तत्षोडशावधि ।
स्पृष्ट्वा तु जुहुयाद्द्रव्यं यामान्प्रति विशेषतः ।।
एवं यामचतुष्केऽपि पूजां कृत्वा यथाविधि ।
व्याहृतिभिर्घृतं हुत्वा हव्यवाहं समाहरेत् ।।
रात्रौ जागरणं कृत्वा प्रभाते स्नानमाचरेत् ।'
इति ।; पूर्वोक्तस्थले 'घ' मातृकायामधोलिखितरीत्या सार्धपञ्चकश्लोका एव दृश्यन्ते —
'अग्निकार्योक्तमार्गेण दीपनान्तं यथाक्रमम् ।
पालाशसमिधो हुत्वा गुडूचीं वेतसीमपि ।।
दूर्वाहोमं ततः कृत्वा लाजसर्षपमाषकम् ।
निष्पावं मुद्गबीजं च तिलगोधूमव्रीह्यवम् ।।
होमद्रव्याणि संप्रोक्ष्य मूलमन्त्रैर्हुनेत्क्रमात् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं हुनेत् ।।
नागाधिराजमन्त्रेण हुत्वा शतसहस्रकम् ।
शतमर्धं तदर्धं वा हुत्वा तत्षोडशाहुतीः ।
स्पृष्ट्वा स्पृष्ट्वा तु जुहुयाद्द्रव्यं प्रति विशेषतः ।
व्याहृतिभिः शतं हुत्वा हव्यवाहं समाहरेत् ।।
रात्रौ जागरणं कृत्वा प्रभाते स्नानमाचरेत् ।'
इति ।

[१] सार्धं — ख; सन्धं — घ.
[२] तथा क्रमम् — ग.
[३] कृत्वा स्नान — ख.
[४] पल्लवः पञ्चगव्यकम् — ख.
[५] सस्योषध्योदकं गन्ध — ख.
[६] ०हिरण्यकम् — ख.
[७] धान्योश्चैव रत्नोदं एतद्द्रव्येण खर्षयेत् — ख.
[८] शान्तिपञ्चकम् — (**याजुषमन्त्ररत्नाकरे** पृ० १७६–१७७); पञ्चशान्तिं जपेत् — ख.

तत्त्वन्यास[१]क्रमार्थं च त्रिखण्डं परिकल्पयेत् ।
न्यस्त्वा [२]तत्त्वत्रयं [३]शेषजानुकण्ठ[४]शिरोवधि ॥९७॥
पुष्पमालां ततः कृत्वा त्रिखण्डं परिकल्पयेत् ।
पुनश्चाग्निं ततो गत्वा तत्त्वतत्त्वेश्वरान्हुनेत् ॥९८॥
शान्तिकुम्भे शतं जप्त्वा संपाताहुतिमाचरेत् ।
बिम्बान्तिकं ततो गत्वा आत्मतत्त्वाधिपं यजेत् ॥९९॥
[५]शान्त्यम्भसा च संप्रोक्ष्य कुशमूलेन संस्पृशेत् ।
आत्म[६]तत्त्वाधिपानन्त यावद्दोषसमुत्थितम्[७] ॥१००॥
[८]बिम्बे तावत्त्वयात्रैव स्थातव्यं संनिधानतः ।
[९]इति विज्ञाप्य संस्पृश्य मूर्तिमूर्तीश्वरान्यजेत् ॥१०१॥
क्ष्मावह्नियजमानार्कजल[१०]वाय्विन्दुखानि च ।
[११]अनन्तं वासुकिं तक्षं [१२]कार्कोटकं च पद्मकम् ॥१०२॥
[१३]महापद्मं[१४]तथा शङ्खपालं गुलिकसंज्ञकम् ।
[१५]एतान्मूर्तीश्वरान्पूज्य [१६]प्रकृत्यन्तं च तत्त्वकम् ॥१०३॥
पुनश्च वह्निमासाद्य तत्त्वतत्त्वेश्वरान्हुनेत् ।
मूलेनाज्येन जुहुयादष्टोत्तरशतं हुनेत् ॥१०४॥
शान्तिकुम्भेऽभिमन्त्र्याथ बिम्बं संपूज्य यत्नतः ।
[१७]कण्ठदेशे तु संपूज्य [१८]विद्यातत्त्वे त्वनन्तरम् ॥१०५॥
कुशमध्येन संस्पृश्य प्रोक्षयेदस्त्रमन्त्रतः ।
[१९]विद्यातत्त्वाधिप तक्ष यावद्दोष[२०]समुत्थितम् ॥१०६॥
[२१]बिम्बे तावत्त्वयात्रैव स्थातव्यं संनिधानतः ।

---

[१] ०क्रमादैश्च — ख.
[२] तत्त्वत्रियं — ख, ग; तत्त्रयं — घ.
[३] शेषं जानुखण्ड० — ख; शेषं जानुकर्ण — घ.
[४] ०शिख न्यसेत् — ग; शिघा न्यसेत् — घ.
[५] शान्ति भसा — ख.
[६] ०तत्त्वाधिपः प्रोक्तः अनन्त — ख; ०तत्त्वाधिप ब्रह्मन् — ग.
[७] 'समुत्थितम्' इत्यत्र भावे क्तप्रत्ययः; समुत्थितिरित्यर्थः ।; ०दोषैः समुत्थितम् — ग.
[८] बिम्बं — ख; नागं — ग.
[९] स्पृशेदिति विज्ञाप्य — ख, ग; त्रिखण्डन्यासं विन्यस्य मूर्तिमूर्तीश्वरं न्यसेत् — घ.
[१०] ०वातेन्दुखानि — ग, घ.
[११] अनन्तवासुकितक्षा — ख; अनन्तवासुकितक्ष० — ग, घ.
[१२] ०कार्कोटकमुखांस्तथा — ग; ०कार्कोटक यथा तथा — घ.
[१३] पद्ममहापद्मं च शङ्खबालं च गुलिका — घ.
[१४] च शङ्खं च पालं गुलिक — ख; च पद्मं च शङ्खं च कुलिकं तथा — ग.
[१५] एते मूर्ती — ख; एवं मूर्त्यधिपान् — ग, घ.
[१६] प्रत्येकमाहुतिः क्रमात् — ग, घ.
[१७] कर्णदेशे — ख.
[१८] विद्यातत्त्वेष्वनन्तकम् — ख.
[१९] विद्यातत्त्वपदे विष्णु यावद्दोषैः समु० — ग.
[२०] ०समुद्धितम् — ख; 'समुत्थितम्' इत्यत्र भावे क्तप्रत्यय; 'समुत्थितिः' इत्यर्थः ।
[२१] बिम्बं — ख; नागं — ग.

क्ष्मादिमूर्तितदीशांश्च क्रमाद्विद्येश्वरान्यजेत् ॥१०७॥
अग्नौ हुत्वा तु मूलेन तत्त्वतत्त्वेश्वरान्हुनेत् ॥
शान्तिकुम्भेऽभिमन्त्र्याथ संपाताहुतिमाचरेत् ॥१०८॥
बिम्बे संपूज्य तत्त्वेशं तत्त्वतत्त्वेश्वरान्यजेत् ।
शिवतत्त्वाधिप नाग यावद्दोष [1]समुत्थितम् ॥१०९॥
[2]बिम्बे तावत्त्वयात्रैव स्थातव्यं संनिधानतः ।
क्ष्मादिमूर्तितदीशांश्च क्रमाद्विद्येश्वरान्यजेत् ॥११०॥
[3]स्पृष्ट्वा स्पृष्ट्वा [4]तु जुहुयात्प्रत्येकमाहुतित्रयम्[5] ।
नागस्य [6]मूलमन्त्रेण सहस्रं वा [7]तदर्धकम् ॥१११॥
पूर्णाहुतिं ततः [8]कुर्यान्नागगायत्रिमन्त्रतः[9] ।

[गायत्री]

[10]महानन्ताय विद्महे [11]महानागाय धीमहि ।
[12]तन्नः शेषः प्रचोदयात् ।
[13]ओं महानागाय स्वाहा । [14]ओं अनन्ताय स्वाहा । [15]इत्यादिनाष्टोत्तरशतं हुनेत् ।
देशिकस्य [16]नियोगेन [17]मूर्तिपास्तदनन्तरम् ॥११२॥
[18]नागगायत्रिमन्त्रेण [19]प्रत्येकाष्टोत्तरं शतम् ।
दर्भाग्रेण तु [20]संस्पृश्य [21]जपित्वा [22]ऋत्विजैः सह ॥११३॥

---

[1] 'समुत्थितम्' इत्यत्र भावे क्तप्रत्ययः, समुत्थितिरित्यर्थः ।
[2] बिम्बं — ख.
[3] हुत्वा जप्त्वा तु संधाया क्रमाद्विद्येश्वरान्यजेत् — ख.
[4] च — घ.
[5] ०माहुतिक्रमात् — घ.
[6] एतद्विषये ६४ श्लोकोत्तरार्धटिप्पणी द्रष्टव्या ।
[7] तदर्थकम् — ख.
[8] कुर्यान्नागस्य मूलमन्त्रतः — ख; 'नागगायत्रि' इति ह्रस्वान्तप्रयोगविषये ३१ पूर्वार्धटिप्पणी द्रष्टव्या ।
[9] ०मन्त्रैः — घ.
[10] महानागाय — ख; महानन्दाय — ग; घ.
[11] शङ्खपद्माय — ख.
[12] तन्नो — ख, ग, घ.
[13] 'घ' मातृकायांमत्र 'ओं' इति न दृश्यते ।
[14] 'ग, घ' मातृकयोरत्र 'ओं' इति न दृश्यते ।
[15] इत्यादिरष्टोत्तर० — ख.
[16] नियोगेण — ख.
[17] मूर्तिवास्त० — ख; मूर्तिपा तदनन्तरम् — घ.
[18] एतद्विषये ३१ श्लोकपूर्वार्धटिप्पणी द्रष्टव्या ।
[19] प्रत्येकं चाष्टोत्तरं शतम् — ख, घ; शतमष्टोत्तरं हुनेत् — ग; अत्र 'जुहुयुः' इति पदमध्याहृत्य व्याख्येयम् ।
[20] संस्पृश्या — घ.
[21] जप्त्वा तु — ख.
[22] ऋत्विक्शब्दस्यात्राकारान्ते प्रयोगः ।

संपूज्याग्नौ[1] च [2]संतर्प्य प्रायश्चित्तं [3]ततश्चरेत् ।
[4]मूलाघोरशिवास्त्रैश्च शतमष्टोत्तरं हुनेत् ॥११४॥
ततः पूर्णाहुतिं हुत्वा तत्तन्मूलाणुना तथा[5] ।
[6]पूर्वोक्तेन विधानेन [7]सर्पबेरं प्रतिष्ठितम् ॥११५॥
शक्त्याद्यासनपर्यन्तं पूजयित्वा [8]यथाविधि ।
[9]षडङ्गन्यासमन्त्रेण [10]न्यसेत्तं सर्पराजकम् ॥११६॥

[11] [प्राणप्रतिष्ठा कुम्भाभिषेकश्च]

प्राणप्रतिष्ठां कुर्वीत आगमोक्तविधानतः ।
[12]अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य इत्यादि जपन्गायत्रिमार्गेण
[13]जीवन्यासं समाचरेत् ।

---

[1] 'घ' मातृकायां चकारो न दृश्यते ।
[2] संतर्प्या — ख, घ.
[3] ततः कुरु — ख, ग, घ.
[4] मूलमन्त्रशि० — ख.
[5] ०न्मूलाणुनां तथा — ख; मूलमन्त्रविषये ६४ उत्तरार्धटिप्पणी द्रष्टव्या ।
[6] पूर्वोक्तविधिना स्थाने सर्प० — ग, घ.
[7] सर्वबेरप्रति० — ख; सर्पबेरप्रति० — घ.
[8] यथाविधिः — ख.
[9] षडङ्गन्यास० — ख.
[10] न्यसेत्वं — ख.
[11] मुहूर्ते समनुप्राप्ते यागशालां प्रविश्य च ।
आचार्यो यजमानेन प्राङ्मुखोदङ्मुखोऽपि वा ॥
उपविश्य च संकल्प्य ऋत्विग्भिर्ब्राह्मणैः सह ।
यात्रादानं ग्रहप्रीतिदानं च दशदानकम् ॥
यथाशक्त्या तु दत्त्वा च आचार्यो मूर्तिपैः सह ।
कुम्भांश्च वाहयित्वाथ त्वालयस्य प्रदक्षिणम् ॥
कृत्वा शेषसमीपं च गत्वा धूपादिकं ददेत् ।
प्राणप्रकृतियोगं तु ज्ञात्वा कर्म समाचरेत् ॥
कुम्भाद्बीजं समादाय शेषवक्त्रे तु योजयेत् ।
बीजं च शिवकुम्भाच्च फणामध्यस्थलिङ्गके ॥
विद्येशबीजमादाय तत्तत्स्थाने तु योजयेत् ।
कुम्भाद्भिरभिषिच्याथ तैलादीनि यथाक्रमम् ।
नैवेद्यं सोपदंशं तु पायसापूपसंयुतम् ।
प्रियङ्गुपिष्टं मधुना ताम्बूलं च निवेदयेत् ॥
धूपदीपादिकं दत्त्वा मन्त्रपुष्पं ददेद्गुरुः ।
अभीष्टं यजमानस्य प्रार्थयेत्तदनन्तरम् ॥'
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० १२५, १२६);
एतस्मिन्विषये पुनः **रौरवे** क्रियापादे ३८.२८ उ० –३६ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[12] 'अस्य श्री प्राणप्रतिष्ठामहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामाथर्वाणि छन्दांसि । सकलजगत्सृष्टिस्थितिसंहारकारिणी प्राणशक्तिः परा देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । प्राणप्रतिष्ठापने विनियोगः । आम् अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । क्रों मध्यमाभ्यां नमः । आम् अनामिकाभ्यां नमः । ह्रीं कनिष्ठिकाभ्यां नमः । क्रों करतलकरपृष्ठाभ्यां नमः । आं हृदयाय नमः । ह्रीं शिरसे स्वाहा । क्रों शिखायै वषट् । आं कवचाय हुम् । ह्रीं नेत्रत्रयाय वौषट् । क्रोम् अस्त्राय फट् । भूर्भुवःसुवरोमिति दिग्बन्धः ।
ध्यानम् —
रक्ताम्भोधिस्थपोतोल्लसदरुण-
सरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुण
मप्यङ्कुशं पञ्चबाणान् ।

विसृज्याग्निस्थितं देवं कुम्भमध्ये तु योजयेत् ॥११७॥
[1]कुम्भानुद्धृत्य [2]नागस्य शिरःस्थानेऽभिषेचयेत् ।
शक्ति[3]कुम्भौ च तत्पार्श्वे [4]अनन्तादीन् [5]यथाक्रमम् ॥११८॥
अभिषिच्य यथान्यायं [6]पूजयेत्सर्पराजकम् ॥
[7]पञ्चामृतैः पञ्चगव्यैर्नारिकेलेक्षुसारकैः[8] ॥११९॥
गन्धोदकाद्यैः संपूज्य धूपदीपं प्रकल्पयेत् ।
जातिकुन्दादिपुष्पैश्च तुलसीकरवीरकैः ॥१२०॥

विभ्रणा स्रक्कपालं त्रिनयनलसिता
पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी
प्राणशक्तिः परा नः ॥
आं ह्रीं क्रोम्। क्रों ह्रीं आम्। य र ल व श ष स हों हंसः सोऽहं हंसः। अस्यां मूर्तौ प्राणास्तिष्ठन्तु। अस्यां मूर्तौ जीवस्तिष्ठतु।
अस्यां मूर्तौ सर्वेन्द्रियाणि मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थाख्यानि प्राणापानव्यानोदानसमानाश्चागत्य सुखं चिरं तिष्ठन्तु स्वाहा। असुनी ते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्। जोक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति। (गर्भाधानादिपञ्चदशसंस्कारार्थं पञ्चदशवारं प्रणवजपं कृत्वा) आवाहनीयतत्तद्देवतामन्त्रैर्देवता आवाह्य निवेदनं कृत्वा, आवाहितो भव। स्थापितो भव। संनिहितो भव। संनिरुद्धो भव। अवकुण्ठितो भव। सुप्रीतो भव। सुप्रसन्नो भव। सुमुखो भव। वरदो भव। प्रसीद प्रसीद इति मुद्राः प्रदर्श्य, —
स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्त्वं प्रीतिभावेन बिम्बेऽस्मिन्संनिधिं कुरु ॥
इति प्रार्थयेत्। इति प्राणप्रतिष्ठा।'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० १४, १५)

[13] 'गुरूपदेशात्कन्दादेर्मन्त्रमुच्चारयेच्छनैः।
नादं शक्तिमयं सूक्ष्मं घण्टानादविसर्पिणम् ॥
कारणत्यागयोगेन ब्रह्मरन्ध्राद्विनिर्गतम्।
दिवाकरसहस्राभं विद्युत्कोटिसमप्रभम् ॥
स्फुरद्रश्मिवितानेन प्रदीपितदिगन्तरम्।
मन्त्रं च मनसाभिन्नं प्राप्तानन्दरसोद्गमम् ॥
द्वादशान्तात्समानीय निष्कलं व्यापकं शिवम्।
अष्टत्रिंशत्कलोपेतं सहस्रकिरणोज्ज्वलम् ॥
सर्वशक्तिमयं साङ्गं ध्यात्वा स्वाञ्जलिसंगतम्।
तेजोबिम्बं ललाटस्थघण्टिकाद्वारमानयन् ॥
सुषुम्नानिर्गतं ध्यात्वा स्फुरत्तारकसर्पिणम्।
विशन्तं ब्रह्मरन्ध्रेण सकले व्यापकं न्यसेत् ॥
जीवन्यासो भवेदेवं लिङ्गे (बिम्बे) सर्वार्थसाधकः।
स्थापनं संनिधानं च संनिरोधावकुण्ठने।
मुद्रासंदर्शनं पाद्यमाचामार्घ्यप्रसूनकम् ॥
एभिः संस्कृत्य संपूज्य वस्त्रेणाच्छाद्य देशिकः।
भस्मदर्भतिलैश्चापि प्राकारत्रितयं चरेत्।
पश्चाद्धूपदीपाचमनार्घ्याणि दत्त्वा निवेद्य'
(**अघोरशिवाचार्यविरचितशिवप्रतिष्ठाविधौ** पृ० २४६, २४७)

[1] कुम्भानुद्धाय — ख; कुम्भानुत्थाय — ग, घ.
[2] देवस्य — ग, घ.
[3] ०कुम्भं च — ग.
[4] अनन्तादि — ख, घ.
[5] यथाक्रमात् — ग.
[6] प्रपूजयेत्सर्प० — घ.
[7] 'ग' मातृकायां ११९ उत्तरार्धस्य १२० पूर्वार्धस्य च स्थाने 'पञ्चामृतादिभिः पूज्य धूपदीपं प्रकल्पयेत्' इत्येकमेवार्धं दृश्यते।; पञ्चामृदै पञ्चगवै — ख.
[8] ०नारिकेलक्षुसारकैः — ख; नालिकेरेषुसरकैः— घ.

[1] [अङ्गपूजा]

[2]अङ्गपूजा [3]प्रकर्तव्या पादमारभ्य [4]बुद्धिमन्।

श्रीकृष्णाय नमः पादौ पूजयामि। विष्णवे नमः [5]गुल्फौ पूजयामि। हराय नमः [6]जङ्घे पूजयामि। [7]माधवाय नमः [8]जानुनी [पूजयामि]। ब्रह्मणे नमः ऊरू पूजयामि। भास्कराय नमः कटिं [पूजयामि]। ईश्वराय नमः नाभिं [पूजयामि]। विश्वरूपाय नमः उदरं [पूजयामि]। महाकालाय नमः [9]वक्षः [पूजयामि]। सृष्टि[10]स्थितिसंहारकारिणे नमः [11]बाहून् [पूजयामि]। विश्वमूर्तये नमः [12]कण्ठं [पूजयामि]। वासुदेवाय नमः मुखं [पूजयामि]। बलिबन्धनाय नमः शिरः पूजयामि। [13]त्रिविक्रमाय नमः पार्श्वौ [पूजयामि]। आदिशेषाय नमः सर्वाङ्गं पूजयामि इत्यङ्गानि संपूज्य महानैवेद्यमाचरेत्॥

[14]हस्तप्रक्षालनं धूपदीपनैवेद्यमेव च॥१२१॥
ताम्बूलं भस्मरक्षां च षोडशैरुपचारकैः।
प्रदक्षिण[15]नमस्कारैराशीर्वादपुरःसरम्॥१२२॥
[16]साष्टाङ्गं दण्डवत्प्रार्थ्य अभीष्ट[17]सिद्धये ततः।

---

[1] 'अथाङ्गपूजा — सर्पराजाय नमः पादौ पूजयामि। अनन्ताय नमः गुल्फौ पूजयामि। विश्वरूपाय — जानुनी। त्रैलोक्यनाथाय — ऊरू। जगन्नाथाय-कटिम्। काकोदराय – उदरम्। विश्वबाहवे — बाहून्। पन्नगाधिपतये — हृदयम्। विश्वरूपाय – नाभिम्। शिवभूषणाय – वक्षः। तुलसीमाला-धारिणे – कण्ठम्। अनन्ताय – मुखम्। सहस्र-नयनाय – –नेत्राणि। चक्षुःश्रवसे – श्रोत्राणि। नारायणाय – ललाटम्। सहस्रशिरसे – शिरांसि। नागलोकवासिने – सर्वाण्यङ्गानि पूजयामि।'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० २२)

[2] नागपूजा — ग.

[3] प्रकर्तव्य — ख; कर्तव्यं — घ.

[4] बुद्धिमान् — ख. ग, घ; 'बुद्धिमन्' इति संबोधनम्। 'हे बुद्धिमन् त्वया कर्तव्या' इति व्याख्येयम्।

[5] गुल्बौ — ख.

[6] जङ्घे — ख.

[7] शिवाय — घ.

[8] जानुनि — ख.

[9] वक्षसि — ख; वक्षौ — घ.

[10] ०स्तित्यन्तकारणाय — ख.

[11] बाहुं — घ.

[12] कण्ठौ — ख.

[13] श्रीविश्वनाथाय नमः सर्वाङ्गानि पूजयामि — घ.

[14] 'घ' मातृकायां १२१ उत्तरार्धस्य १२२ पूर्वार्धस्य च स्थाने 'धूपदीपाद्युपचारैस्ताम्बूलं तु निवेदयेत्' इत्येकमेवार्धं दृश्यते।

[15] ०नमस्कारमाशीर्वाद० — घ.

[16] साङ्गं दण्डवत्कृत्वा प्रार्थनाभीष्टसिद्धिता – घ.

[17] ०सिद्धयेत्ततः — ख.

[1][आचार्यादिपूजा]

[2]**आचार्यं [3]पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ।।१२३।।**
[4]गां दद्याद्गुरवे [5]प्रार्थ्य गोकुलस्याभिवृद्धये[6] ।
[7]ऋत्विग्भ्यो दक्षिणादींश्च [8]दद्याच्च जापकांस्तथा ।।१२४।।
[9]परिवारान्दक्षिणाद्यैः पूजयेच्च यथाविधि ।

[10][दशदानादिकरणम्]

[11]दशदानादि कुर्वीत यथोक्तद्रव्यसंयुतम् ।।१२५।।
भूरिदानं विशेषेण ब्राह्मणाय प्रदापयेत् ।
ब्राह्मणान्भोजये[12]त्पश्चाद्भक्ष्यभोज्यसमन्वितम् ।।१२६।।
विवाहं कारयेत्पश्चात्स्वसूक्तेनैव [13]वर्त्मना ।

---

[1] 'कर्ता तु प्राङ्मुखो भूत्वा त्वाचार्यादीन्प्रपूजयेत् ।
आचार्यं गन्धपुष्पाद्यैरभ्यर्च्य च यथाविधि ।।
गोभूहिरण्यवस्त्रैश्च प्रतिमा च सदक्षिणा ।
आचार्याय प्रदातव्या अभीष्टफलसिद्धये ।।
ऋत्विग्भ्यश्च तथा दद्यात्प्रतिमां वस्त्रसंयुताम् ।
दक्षिणां च प्रदत्त्वाथ जापकेभ्यश्च दक्षिणाम् ।।
दद्याद्वै भूरिदानं च यथाशक्त्यनुसारतः ।
अधमा पञ्चनिष्का तु द्विगुणा मध्यमा भवेत् ।।
त्रिगुणा चोत्तमा ज्ञेया देशिकस्य तु दक्षिणा ।
ऋत्विग्भ्यो जापकेभ्यश्च तदर्धार्धा तु दक्षिणा ।।
ब्राह्मणान्भोजयेत्पश्चाच्छतसंख्यान्यथाक्रमम् ।
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० १२६, १२७)

[2] कर्ता च स्वस्त्रिया युक्तो वस्त्रहेमाङ्गुलीयकैः — ग.

[3] पूजयेत्कर्ता वस्त्र० — घ.

[4] गा दद्या० — घ.

[5] सम्यगलकारयुतां ततः — ग; सम्यक् गोमूल्यमथा भवेत् — घ.

[6] ०भिवर्द्धये — ख.

[7] 'ग' मातृकायां १२४ उत्तरार्धस्य १२५ पूर्वार्धस्य च स्थाने 'ऋत्विजान् जापकान्पूज्य दक्षिणाद्यैः प्रपूजयेत्' इत्येकमेवार्धं दृश्यते। एवं 'घ' मातृकायां १२४ उत्तरार्धात्प्रभृति १२६ पर्यन्तश्लोकानां स्थाने —
'ऋत्विजां दक्षिणां दद्यात्साधकं पूजयेत्क्रमात् ।
जापकान्पूजयेत्पश्चाद्दश दानानि भूरिशः ।।
कृत्वा स्वशक्त्या विधिवद्ब्राह्मणान्भोजयेत्सुधीः ।'
इति सार्धश्लोक एव दृश्यते।; ऋत्विजान् दक्षिणा० — ख.

[8] दद्यात् जापकान् तथा — ख.

[9] परिवारांश्च दक्षिणां पूजये यथाविधि — ख.

[10] दशदानानि —
'गोभूतिलहिरण्याज्यवासोधान्यगुलानि च ।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ।।'
(**शैवागमपरिभाषामञ्जरी** १०.३६)

[11] 'ग' मातृकायां १२५ उत्तरार्धस्य १२६ पूर्वार्धस्य स्थाने —
'दशदानानि कृत्वाथ भूरिदानं विशेषतः ।'
इत्येकमेवार्धं दृश्यते ।

[12] ०त्पश्चाद् षड्रसैश्च विशेषतः — ग.

[13] मन्त्रतः — ख.

[दम्पतीब्रह्मचारिसुवासिनीपूजा]

[1] **दम्पती पूजयेत्पश्चात्सर्वद्रव्योपचारकैः ॥१२७॥**
[2] **ब्रह्मचारि [3]सुवासिनीर्भोजयेत्परमान्नकैः ।**

[4] [नागराजप्रतिष्ठाफलम्]

एवं कृत्वा नागराजप्रतिष्ठां [5]प्रीतिसंयुतम् ॥१२८॥
[6] **यं यं काममपेक्षेत [7]तं तमाप्नोति मानवः ।**
भर्तारं लभते कन्या [8]पुत्रकामो लभेत्सुतम् ॥१२९॥
वश्यकामो लभेद्वश्यं जयकामो लभेज्जयम् ।
धनकामो धनं प्राप्य [9]मोदते दिवि देववत् ॥१३०॥

[10] [प्रतिवर्षमाश्वयुजमासपूजाफलम्]

[11] **आश्विनशुक्लपक्षे तु चतुर्थ्यां सर्पराजकम् ।**

---

[1] दम्पति — ख.

[2] ब्रह्मचारिपूजाविषये —
'विष्णुलोके च ये सर्पा अनन्ताद्या महाबलाः ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
ब्रह्मलोके च ये सर्पा वासुकिप्रमुखाः शुभाः ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
इन्द्रलोके च ये सर्पास्तक्षकाद्या महाबलाः ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
कैलासलोके ये सर्पाः कार्कोटकबलादयः ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
पाताललोके ये सर्पा आदिशेषादयो वराः ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु में सदा ॥
द्वीपान्तरे च ये सर्पाः कालिन्दीनिलयास्तथा ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
पर्वताग्रेषु ये सर्पाः शिलासंधिषु संस्थिताः ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
ग्रामे वा यदि वारण्ये ये च सर्पा गृहेषु वा ।
नमोऽस्तु तेभ्यः सुप्रीताः पन्नगाः सन्तु मे सदा ॥
इति स्तुत्वा, अष्टानां ब्रह्मचारिणां वस्त्रापूपताम्बूलदक्षिणादीनि तत्संनिधावेव दत्त्वा, नागराजार्पितपुष्पाक्षतान्ब्राह्मणानुग्रहेण सपत्नीकः परिगृह्य'
(**शान्तिकुसुमाकरे** पूर्वभागे पृ० २५, २६)

[3] सुवासिन्यो भोज० — ख; सुवासिन्यो पूजयेद्भोजनादिभिः — घ.

[4] 'सर्वपापहरं पुण्यं सर्वव्याधिनिवारणम् ।
आरोग्यमायुः कीर्तिश्च धनधान्यसमृद्धिदम् ॥
पुत्रार्थी लभते पुत्रं सर्वसंपत्तिमेव च ।
इहैव सकलं प्राप्य परतो मोक्षमाप्नुयात् ॥
(**कारणे** (टि. १२०) पृ० ८२, ८३);
'एवं यः कुरुते शेषराजस्थापनमुत्तमम् ।
प्रतिबन्धनिवृत्त्याथ चिरायुः सुखितो भवेत् ॥
वन्ध्या स्वदोषनिर्मुक्ता जीवपुत्रा भवेद्ध्रुवम् ।
पूर्वोक्तविविधैः पापैर्मुच्यते नात्र संशयः ॥
न तस्य संततेर्हानिः सत्यं सत्यं मयोदितम् ।
इहैव सकलान्भुक्त्वा सोऽन्ते सायुज्यमाप्नुयात् ।
(**सिद्धान्तदीपिकायाम्** (टि. १२०) पृ० १२७)

[5] प्रीतिसंयुतः — घ.

[6] यत्कामनवाप्नोति — ख; यं यं कामयते कर्ता — ग.

[7] तत्कामं तत्क्षणेन वै — ख.

[8] पुत्रकामे — ख.

[9] मोदन्ते — ख, ग, घ.

प्रतिवर्षं यजेद्विद्वान्सर्वकामार्थसिद्धये[1] ॥१३१॥
ब्राह्मणान्परमान्नेन भोजयेदपरेऽहनि ।
[2]स्तोत्रैः स्तुत्वा तु नागेशं क्षमस्वेति [3]नमस्कृतीः ॥१३२॥
एवं यः कुरुते मर्त्यः पुत्रपौत्राभिवृद्धये[4] ।
सर्प[5]बाधाविरहितः प्राप्नुयात्परमं पदम् ॥१३३॥

इति रौरवाख्ये महातन्त्रे क्रियापादे नागप्रतिष्ठा[6]विधिः
सप्तपञ्चाशः पटलः ॥

---

[10] 'तथा चाश्वयुजे मासि पञ्चम्यां कुरुनन्दन ।
कृत्वा कुशमयान्नागान्गन्धाद्यैः संप्रपूजयेत् ॥
घृतोदकाभ्यां पयसा स्नपयित्वा विशांपते ।
गोधूमैः पयसा स्विन्नैर्भक्ष्यैश्च विविधैस्तथा ॥
यस्त्वस्यां विधिवन्नागाञ्शुचिर्भक्त्या समन्वितः ।
पूजयेत्कुरुशार्दूल तस्य शेषादयो नृप ॥
नागाः प्रीता भवन्तीह शान्तिमाप्नोति वा विभो ।
स शान्तिलोकमासाद्य मोदते शाश्वतीः समाः ॥
इत्येष कथितो वीर पञ्चमीकल्प उत्तमः ।
यत्रायमुच्यते मन्त्रः सर्वसर्पनिषेधकः ॥
ओं कुरुकुल्ले फट् स्वाहा ।'
(**भविष्यपुराणे** ब्राह्मपर्वणि ३८ तमोऽध्यायः) ;
'नागचतुर्थी तु मध्याह्नव्यापिनी पञ्चमीयुता ग्राह्येति निर्णयामृते माधवीये चोक्तम्'
(**जयसिंहकल्पद्रुमे** चतुर्थीव्रतनिर्णये पृ० १८४)

[11] आश्विजशुक्ल० — ख; आश्वयुक्शुक्ल० — ग; आश्विचशुक्लपक्षं — घ.

[1] ०सिद्धितम् — ग; ०सिद्धने — घ.

[2] स्तोत्रे — ख.

[3] नमस्कृतः — ख, ग, घ.

[4] ०पौत्राभिवन्धयेत् — घ.

[5] ०भाथविरभितः — ख; ०बाधा विनश्यन्ति — ग; ०भाथविरहितम् — घ.

[6] ०विधिसप्तविंशतिपटलः — ख; ०विधानो नाम सप्तमपटलः — ग, घ.

अष्टपञ्चाशः पटलः

[1] ज्ञानदीक्षाविधिः

[दीक्षायोग्यस्थानम्] [2]

नदीतीरे मठे वापि [3]स्वस्थाने गुरुमन्दिरे।
पर्वताग्रे [4]शुचिस्थाने [5]मण्डपं तत्र कारयेत् ॥१॥
परीक्ष्य [6]चतुरङ्गुल्या [7]चतुर्हस्तं [8]सुवेदिकम्।
चतुर्द्वारसमायुक्तं चतुस्तोरणसंयुतम् ॥२॥
दुकूलचित्रपट्टैश्च [9]मुक्तादामैरलंकृतम्।
ऊर्ध्वं [10]विमानकं कुर्यात्पुष्पदामैः सुगन्धिभिः ॥३॥

[11][अधिवासः]

गोमयालेपनं कृत्वा पञ्चगव्यैरवोक्षणम्[12]।

---

[1] अयं पटलः **ज्ञानावरणविळक्के** ३८७–३९१ पृष्ठेषु; **क्रियादीपिकायाम्** २१८, २१९ पृष्ठयोः; **शैवसंन्यासपद्धतौ** १३१–१३३; १४४–१४८ पृष्ठेषु च दृश्यते।;

एतस्मिन्विषये **अचिन्त्यविध्वसादाख्ये** ३३ पटलः; **चिन्त्ये** ३३ पटलः; **उत्तरकामिके** (आर्. इ.३४०६५) १४४ तमपत्रं (टि. २९८(२) २०१, २०२ पृष्ठे); **सार्धत्रिशतिकालोत्तरे** ८. पटलः; **सुप्रभेदे** (टि. २४५) २६२–२६५ पृष्ठानि; **सूक्ष्मे** (टि. ११२) ५५२–५५६ पृष्ठानि च द्रष्टव्यानि।

[2] 'शिवालये गुरुस्थाने शक्तिपीठे मठे गृहे। शुद्धदेशे' (**उत्तरकामिके** टि.२९८ (२) २०१ पृ०)

[3] सुस्थाने — ङ; च.

[4] रुचिस्थाने — ङ.

[5] 'एकान्ते भवने रम्ये वितानध्वजभूषिते।
मण्टपं कारयित्वाथ रङ्गवल्याद्यलंकृतम् ॥'
(**सुप्रभेदे** (टि. २४५) २६३ पृ०);

'स्वगृहे मठे नदीकूले पर्वताग्रे गुरुमन्दिरे, शुचिस्थाने वा चतुरङ्गुलं खात्वा संशोध्य चतुर्हस्तं चतुरश्रं चतुर्द्वारं चतुस्तोरणं विमानाकारं क्षौमादिचित्रपटैः सुगन्धिपुष्पमालादिभिरलंकृतमण्टपं गोमयेनालिप्य पञ्चगव्येन प्रोक्ष्य गन्धोपलिप्तं कारयेत्।'
(**शैवसंन्यासपद्धतौ** पृ० १२९)

[6] 'चतुरङ्गुलं खात्वा संशोध्य' इत्यर्थे 'परीक्ष्य चतुरङ्गुल्या' इति प्रयुक्तमिति भाति।

[7] चातुर्हस्ता — ङ; चतुर्हस्ता — च; 'छ' पाठान्तरम्; चतुर्हस्तस्य वेदिका — छ.

[8] सुवेक्षता — ङ; सुवेदिका — च, छ.

[9] ०पटजैः — छ.

[10] विमानमाहृत्य — छ.

[11] 'ततः समयविशेषदीक्षानन्तरं निर्वाणदीक्षाकाङ्क्षिणः शिष्यस्य ज्ञानदीक्षां कुर्यात्। तद्यथा शुभनक्षत्रादियुक्तकालं निर्णीय, ततः पूर्वदिने शिष्यमेकभुक्तं कारयित्वायुतमघोरजपं कार-

स्थानमित्युक्तमाश्रित्य कालं [1]कल्पितमेव च ॥४॥
शुभनक्षत्र[2]युक्ते तु दीक्षा [3]ग्राह्या हि तद्दिने ।
ज्ञानदीक्षासमायुक्तं [4]ज्येष्ठं कृत्वा पुरोहितम् ॥५॥
[5]पुरोदिने त्वेक[6]भुक्तिस्तद्रात्रौ गव्य[7]सेवनम् ।
[8]तद्दिने [9]चोपवासी स्यात्स्नानशौचसमन्वितः ॥६॥

[10][ज्ञानदीक्षायां रात्रिकाल उत्तमः]

अशुद्ध[11]मायारूपेण कालरात्रिरुदाहृता[12] ।
माया[13]तत्त्वान्तिमस्थाने [14]चिद्रूपस्य हि दर्शनम् ॥७॥
[15]चिद्रूपं शुद्धमायान्ते [16]वस्तुनिश्चायकं क्रमात् ।
[17]मायाद्वयोर्विलयनमेकाकारस्य भावनम् ॥८॥
तिरोधानातिरोधानं [18]निर्दर्शनसुदर्शनम् ।
एतैः संयुक्त[19]काला तु काल[20]रात्रिर्विशिष्यते ॥९॥
[21]क्षयकृत्येऽर्धरात्रिः[22] स्यान्नित्य[23]संहृन्निशि स्थिता[24] ।

येत्'। 'ततो मण्टपात्पश्चिमभागे पूर्वादिपश्चिमान्तमण्डलत्रयमुत्पाद्य पश्चिममण्डले त्रैवर्णिकमन्यामिनं प्रणवेन, चतुर्थ हंसेन उभावपि मुमुक्षू पञ्चाक्षरेण ब्रह्मकूर्चं प्राशयित्वा, मध्यममण्डले दन्तशोधनं पूर्वमण्डले पादप्रक्षालनं शुद्धाचमनं च कारयित्वा तदहरुपवासं कारयेद् इत्यधिवासविधिः।'

(**शैवसंन्यासपद्धतौ** पृ० १२७, १२८)

[12] पञ्चगव्येन प्रोक्षणम् — च; पञ्चगव्येन चोक्षणम् — छ.

[1] 'कल्पितम्' विहितम् इत्यर्थे प्रयुक्तमिति भाति।

[2] ०योगे स्याद्दीक्षा — ङ; ०योगः स्याद्दीक्षा — चः

[3] ग्राह्यास्य — च; कार्या शुभे दिने — छ.

[4] श्रेष्ठं — ङ.

[5] तद्दिने — छ.

[6] ०भुक्तिः स्यात्तद्रात्रौ — छ.

[7] ०मिश्रितम् — छ.

[8] पुनर्दिने तूपवसन् स्नान० — छ.

[9] 'उपवासः प्रकर्तव्यो विधिवत्स्नानमाचरेत्।
स्वात्मार्चनाग्निकार्यं च दिवा मौनं सुतृप्तये ॥
(**सूक्ष्मे** (टि. ११२) ५५१ पृष्ठे)

[10] 'अर्धरात्रोपदेशेन ज्ञानदीक्षां समाचरेत्।'
(**सूक्ष्मे** (टि. ११२) ५५१ पृष्ठे);
'रात्रौ निशीथसमये एकान्ते भवने शुभे।'
(**सुप्रभेदे** (टि. २४५) २६२ पृष्ठे);
'एकान्ते निर्जने स्थाने मध्यरात्रावुपक्रमे।
सच्छिष्याणां सदाचार्यो बोधं कुर्याद्विशेषतः ॥'
(**उत्तरकामिके** टि. २९८(२) पृ० २०१)

[11] ०मायास्वरूपं — छ.

[12] ०रात्रिसमन्वितम् — छ.

[13] ०तत्त्वान्तिके स्थाने — छ.

[14] चिद्रूपां दर्शयेत्क्रमात् — छ.

[15] तद्रूपं — ङ.

[16] वस्तु निश्चयतिक्रमात् — च, 'छ' पाठान्तरम्।; यस्तु निश्चय एव च — छ.

[17] मायाद्विलीनमत्पत्ति — छ.

[18] न दर्शन० — ङ; निदर्शन — छ.

[19] कालैश्च — ङ; कालश्च — च.

[20] ०रात्रिरिति स्थितम् — ङ, च.

[21] क्षयस्योरर्ध० — छ.

[22] ०रात्री — ङ.

[23] ०स्मसृन्निशि — ङ.

[24] स्थितौ — ङ, च.

[1] देहेन्द्रियादिव्यापारो [2]रात्रौ संलीयते यतः[3] ॥१०॥
एतेन शास्त्रविदुषां [4]रात्रिः कालोत्तमा[5] भवेत्।

[6][गुरुपादाम्बुजपूजनम्]

[7]सुकाले मण्डपं वेश्य गन्धपुष्पादिषोडश[8] ॥११॥
पूजाद्रव्याणि संपाद्य [9]उत्तराभिमुखः स्थितः।
भूत[10]शुद्ध्यात्मशुद्ध्यादि [11]कृत्वा चार्घ्यादिकं तथा ॥१२॥
[12]चतुस्तालं तु दीर्घं स्यात्षट्त्रिंशाङ्गुलमुन्नतम्।

---

[1] देहेन्द्रियस्य — छ.

[2] रात्र्यां तु लयनं व्रजेत् — छ; रात्र्यां तु विलयं व्रजेत् — 'छ' पाठान्तरम्।

[3] 'छ' मातृकायां १० श्लोकानन्तरं 'निशासु दीपकालं वा ज्ञानदीपस्य दर्शनम्' — इत्यधिकम्।

[4] रात्रिकालोत्तमं — इ.

[5] कालोत्तमं — च.

[6] 'तदनु अर्धरात्रे ज्ञानदीक्षायुक्तं स्वज्येष्ठं पुरोहितं कृत्वा, मण्डपस्य दक्षिणभागे दर्भासने उदङ्मुख उपविश्य, भूतशुद्धिकरन्यासाङ्गन्यासकलान्यासानात्मपूजां च विधाय, पाद्याचमनार्घ्यपात्राण्यासाद्य, गन्धपुष्पादिपूजाद्रव्याणि संशोध्य चतुरश्रं षट्त्रिंशदङ्गुलोन्नतं गन्धानुलिप्तं क्षित्यादिकुटिलान्तमन्त्रसिंहासनं संपूज्य, गन्धोदकेन स्नातं सिंहासने उपविष्टं ज्ञानाचार्यं स्वामिन् भवन्तं पूजयामीति प्रार्थ्य, लब्धानुज्ञो घृतकाठिन्यवज्ज्ञानात्मानमेव शिष्यानुग्रहार्थं द्विभुजमेकवक्त्रं त्रिनेत्रं चन्द्रशेखरं स्फटिकाभं जातं ध्यात्वा शक्तिशिवात्मकं रक्तस्फटिकाभ पादाम्बुजद्वन्द्वं संगृह्य, गन्धादियुक्तजलेन शिवमन्त्रेणाभिषिच्य, दुकूलेन परिमृज्य, भूर्जपत्रे शिलावृत्ते सुगन्धानुलिप्ते प्रणवं लिखित्वा, तन्मध्ये तिरोधानमलरूपं नमः समालिख्य, ज्ञानाचार्यदक्षिणपादस्यासनं संक्षिपेत्।

ततो दक्षिणामूर्तिरूपं वीरसिंहासनस्थितं दिव्यगन्धैः पुष्पादिभिर्भूषणैर्दिव्यवस्त्रकिरीटमकुटैश्च शिवमन्त्रेण संपूज्य, धूपदीपौ दत्त्वा, विधिवदुत्पन्न स्थालीपाकं सव्यञ्जनं घृतक्षीरमधुशर्करापूपपानीयफलादिसहितं कनकादिपात्रे शिवमन्त्रेण स्वाहान्तेन निवेद्य, निवेदितमन्नमन्यत्र शुद्धदेशे पादाभिषेकजलं च निधाय, स्थलशुद्धिं कृत्वा, पाद्याचमनार्घ्याणि मुखवासं च दत्त्वा, धूपदीपाराक्रिकच्छत्रचामरव्यजनदर्पणानि समर्पयेत्।'

(**शैवसंन्यासपद्धतौ** १२९, १३० पृष्ठयोः)

[7] स्वकाले मण्डपे — इ, च, छ.

[8] ०षोडशैः — इ, च, छ.

[9] 'शिष्यः —
देहशुद्ध्यादिकं कृत्वा शुद्धवस्त्रैरलंकृतः।
भस्मरुद्राक्षचिह्नाङ्गः शिवमन्त्रं समुच्चरन् ॥
गुरुसंनिधिं गत्वा च अञ्जलीहस्तसंयुतः।
उत्तराभिमुखो भूत्वा स्थित्वा ज्ञानं प्रपूरयेत् ॥'

(**सूक्ष्मे** (टि. ११२) ५५२, ५५३ पृष्ठयोः)

[10] ०शुद्धिं चात्मपूजामर्घ्यत्रयं सुपूर्ववत् — छ.

[11] कृत्वा चार्यादिकं — च.

[12] 'गोमयेनोपलिप्योर्वीं पिष्टचित्रैरलंकृतम्।
सिंहासनं तदूर्ध्वे तु स्थापयेल्लक्षणान्वितम् ॥
गन्धपुष्पैरलंकृत्य कबरीकेशसंयुतम् ॥
मुक्तादुकूलवसनं पद्मनीलोत्पलैर्युतम् ॥
आरग्वधैश्च बिल्वैश्च शमीदूर्वैरलंकृतम्।'

(**सूक्ष्मे** (टि. ११२) ५५१, ५५२ पृष्ठयोः); चतुः सालस्य दीर्घं — इ; चतुस्तालस्य दीर्घं — च, छ.

गन्धानुलेपनं कुर्याद्विधि[१]वत्क्लृप्तमासनम् ॥१३॥
क्षित्यादिकुटिलाप्रान्तं मन्त्ररूपं समर्चयेत् ।
[२]गन्धोदकेन सुस्नातं रक्तपट्टाम्बरान्वितम् ॥१४॥
[३]अष्टत्रिंशत्कला[४]न्याससोऽहंभावनयान्वितम् ।
ज्ञानदेशिकमास्थाय दिव्यपादाम्बुजं [५]ग्रहेत् ॥१५॥
[६]शास्त्रोक्तगन्धद्रव्येण [७]ह्याभिषिच्य पदद्वयम्[८] ।
शुक्लवस्त्रेण संमृज्य [९]कुसुमानि समर्पयेत् ॥१६॥
भूर्जपत्रे शिलावृत्ते [१०]सुगन्धेनानुलेपिते ।
प्रणवं च लिखित्वाथ [११]तन्मध्येऽथ लिखेन्नमः ॥१७॥
तिरोधानमलं ध्यात्वा गुरुपादासनं क्षिपेत् ।
[१२]नानादिव्यसुगन्धैश्च [१३]पुष्पदामैश्च पूजयेत् ॥१८॥
धूपदीपौ समारोप्य [१४]स्थालीपाकं निवेदयेत् ।
दक्षिणामूर्तिरूपेण गुरुं शिष्यस्तु भावयेत् ॥१९॥
[१५]इत्थं हि भावः शिष्यस्य [१६]गुरुं पाशविमोचनम्[१७] ।

[१८][ज्ञानदीक्षाकरणप्रकारः तत्राध्वशोधनम्]

ईक्षणज्ञानदीक्षाभ्यां क्रमात्कृत्यं करोति सः ॥२०॥

---

[१] ०वच्चाप्तमासनम् — च; ०वच्चास्त्रमासनम् — छ.

[२] 'दुकूलवस्त्रैरलंकृत्य उष्णीषाद्युत्तरीयकैः ।
सर्वाभरणैः संभृष्य गन्धचन्दनलेपनः ॥
भस्मरुद्राक्षसंपन्नो यो।गपट्टविभूषितः ।
पुष्पमाल्यैरलंकृत्य मूर्तिभावमनुस्मरन् ॥
सिंहासनोपरि स्थाप्य लम्बपादसमन्वितः ।
दक्षिणाभिमुखो भूत्वा दक्षिणामूर्तिवद्गुरुः ॥'
(**सूक्ष्मे** (टि. ११२) ५५२ पृष्ठे)

[३] अष्टात्रिंशत् — ङ.

[४] न्यासं सोऽहं — च, छ.

[५] गृहेत् — ङ.

[६] शास्त्रोपचारद्रव्येण — छ.

[७] अभिषेचनमन्त्रतः — छ.

[८] 'शिष्यः—
जान्वादिपादपर्यन्तं शुद्धाभिषेकमाचरेत् ।
पञ्चगव्याभिषेकं च पञ्चामृताभिषेचनम् ॥
शुद्धाभिषेकसंयुक्तं वस्त्रोद्वर्तनमेव च ।
गन्धचन्दनलेपैश्च अर्चयेद्विधिना पशुः ॥
पायसान्ननिवेद्यं च फलापूपगुलान्वितम् ।
निवेद्य विधिवच्छिष्यो धूपदीपार्घ्यसंयुतम् ॥
पोडशेनोपचारेण गुरुपादौ प्रपूजयेत् ।
आगामि दग्धं तत्काले शिष्यदेहस्थितिर्भवेत् ॥'
(**सूक्ष्मे** (टि. ११२) ५५३ पृष्ठे)

[९] समत्वेकस्थिरासनम् — छ.

[१०] सुगन्धमनुलेपनम् — छ.

[११] तस्य मध्ये नमो लिखेत् — छ.

[१२] नानाद्रव्यसु० — च.

[१३] पुष्पदामैरलंकृतम् — छ.

[१४] स्थालीपाकशब्दस्य लक्षणया स्थालीपाककर्मणा निर्मितमन्नमित्यर्थः ।

[१५] इदं हि भावं — ङ, च.

[१६] गुरोः पाशविमोचनम् — ङ, च, छ.

[१७] अत्र 'कारयति' इति पदमध्याहृत्य व्याख्येयम् ।;

[1]ब्रह्माण्डस्य स्वरूपेण [2]पृथिवी जानुमात्रतः।

'छ' मातृकायां (१–२० पृ०) श्लोकाः **'अचिन्त्यविश्वसादाख्ये'** इति निर्दिश्योद्धृताः।

[१८] 'आचार्यः सर्वदा शुद्धो भस्मोद्धूलितविग्रहः।
रुद्राक्षमालाभरणश्चीरकृष्णाजिनाम्बरः॥
स्वानुष्ठानं समाप्याथ शिवतत्त्वं विभावयन्।
कृपया वीक्षितं शिष्यं मण्डलत्रयसंस्कृतम्॥
पञ्चगव्यं प्राशयित्वा षडध्वन्यासशोधनम्।
स्थूलसूक्ष्मप्रभेदेन कृत्वा देहे शिवाणुना॥
पादाङ्गुष्ठादिमूर्धान्तं दिव्यदृष्ट्या विलोक्य च।
मौषुम्नेन पथा नीत्वा तज्जीवं द्वादशान्तकम्॥
स्वात्मना तु समंयोज्य तद्देहं च विशोध्य च।
रेचकादिभिराकृष्य तद्देहं च प्रवेश्य च॥
तद्द्वादशान्ते संस्थाप्य सुसंशोध्य शिवेन तु।
तदा समरसीभावं भावयन्नात्मजीवयोः।
आत्मानं शिवतत्त्वेन संयुक्तं हृदयेऽप्यसौ॥
संस्थाप्य मूलमन्त्रेण सदा सन्तुष्टमानसः।'
(**सुप्रभेदे** (टि. २४५) २६३ पृष्ठे);

'तत आचार्यः शिष्यसमर्पितपूजां शिवोऽहंभावनया स्वीकृत्य शिष्यस्य कलाः शोधयेत्।' 'तदनु मण्डले षडुत्थासने उदङ्मुखं शिष्यमवस्थाप्य, शिखादिपादान्तं शान्त्यतीतादिनिवृत्त्यन्तकलाभिर्मन्त्रंपदवर्णभुवनतत्त्वरूपं व्याप्तं विभाव्य, मलमायाकर्माणि कलापञ्चकव्याप्तानि संचिन्तयेत्।'

'तदनु मन्त्रादीनां व्याप्यव्यापकभावमनुसंदध्यात्। तद्यथा मन्त्राः पदैर्व्याप्ताः। पदानि वर्णैः। वर्णा भुवनैः। भुवनानि तत्त्वैः। कर्मानुस्यूतानि तत्त्वानि मायाभ्याम्। ते च मलेन। मलं कलाभिरिति विभाव्य कलाः शोधयेत्।

तदनु शिष्यस्य नाभिकुण्डे वागीश्वरीवागीश्वरौ ध्यात्वा, समयाचाराधिकारी चेत्समबीजदीक्षया वर्तमानशरीराम्भकधर्मादिष्टापूर्तादिकात्मानुषङ्गिकात्समयाचाराच्चान्यत्सर्वं कर्म युगपत्परिपक्वं कृत्वा, वागीश्वरीवागीश्वरसंयोगं विभाव्य, शिष्यस्यात्मानं तद्गर्भे स्थित्वा, युगपत्सर्वयोनिषु जातं संचिन्त्य, कालत्रयव्यापिधर्माधर्मात्मकं सर्वं कर्म युगपद्भोजयित्वा, मन्त्रौषधतिरोहितविषशक्तिवदज्ञानं प्रतिबन्धं विभाव्य, ब्रह्मादिकारणत्यागक्रमेण शिवपदे संयोज्य, सर्वज्ञतादिषाङ्गुण्याभिव्यक्तिं प्रकाश्य, शिवसमत्वं प्रापयेत्।

समयाचारानधिकारी बालादिश्चेन्निर्बीजदीक्षया देहारम्भकधर्मादानुषङ्गिकाच्चान्यत्समयाचारसहितं सर्वं कर्म शोधयेत्।

बुभुक्षुश्चेत्कालत्रयव्यापिधर्माधर्मात्मकं सर्वं कर्म वर्तमानशरीरे भोगदायकं संभाव्यातिरिक्तं सर्वधर्माधर्मात्मकं शोधयित्वा, ब्रह्मादिकारणत्यागक्रमेण शुद्धविद्यातत्त्वे संयोज्य, शिष्यमस्तके शिवहस्तं निधाय, मात्रालक्षणसंयुक्तं सकलप्रासादमुपदिशेत्।

मुमुक्षुश्चेत्प्रारब्धकर्म विहाय धर्माधर्मात्मकं सर्वं कर्म शोधयित्वा, पूर्ववदज्ञानं प्रतिबन्धं विभाव्य, ब्रह्मादिकारणत्यागक्रमेण परशिवपदे पूर्ववच्छिवसमत्वे योजयित्वा, शिष्यमस्तके शिवहस्तं निधाय, मात्रालक्षणसंयुक्तं निष्कलप्रासादमुपदिशेत्। इति ज्ञानदीक्षाविधिः॥

शान्त्यतीतकलास्थितभुवनपर्यन्तगतभोगानपेक्षिणं तीव्रतरशक्तिनिपातयुक्तं शिष्यमाचार्यो मुहूर्तं परमानन्दनिमग्नो भूत्वानन्तरं पराशक्तिमयो भूत्वा, चक्षुषी उन्मील्य, प्रारब्धकर्म विहाय ज्ञानदृष्ट्यवलोकनोत्थितागिनना निवृत्त्यादिकलासु स्थितं सर्वं कर्म दाहयित्वा, मन्त्रपदवर्णभुवनतत्त्वादिक्रमेण कलासु संयोज्य, कलाः पञ्च शक्तिषु नियुज्य, हस्तमस्तकसंयोगेन मायाद्वयं विसृज्याणवमलावृतस्य राहुग्रस्तचन्द्रवत्स्थितस्यात्मनो मलं ज्ञानक्रियाशक्तिभिरपसार्यात्मानं पराशक्त्यां संयोज्य, पुनरात्मानं पराशक्तिं चाद्वैतरूपपरशिवे नदीसमुद्रजलवत् क्षीरे क्षीरवद् घृते घृतवद्योजयेत्। मन्दमलपरिपाकश्चेत्पूर्ववदधिकारितारतम्येन योजयेत्। जीवपरयोरैक्यं प्रासादेन पञ्चाक्षरेण वोपदिशेत्॥' (**शैवसंन्यासपद्धतौ** पृ० १३०, १३३, १३७-१३९)

[1] ब्रह्मण्यस्य — ङ, ब्रह्मणेऽस्य — च.
[2] पृथ्वी जानुप्रभृत्यधः — छ.

पृथ्वीप्रकृति[१]पर्यन्तं [२]व्याप्तमप्तत्त्वं नाभितः ॥२१॥
पृथिवीश्वरतत्त्वान्तं[३] [४]व्याप्तश्चाग्निस्तु [५]कण्ठतः ।
पृथ्वीसदाशिवान्तं च[६] वायुतत्त्वं ललाटतः ॥२२॥
पृथिवी[७]शक्तितत्त्वं च आकाशं ब्रह्मरन्ध्रतः[८] ।
मन्त्रादिषड्विधं रूपं [९]भूतादिद्वन्द्वभावकम् ॥२३॥
एतैः [१०]सुगन्धिते स्थाने निवृत्त्यादिकलाङ्गवित् ।
सोऽहं [११]भावित आचार्यस्त्वध्वसंचितकर्म च[१२] ॥२४॥
[१३] ज्ञानाग्निना दहेत्तत्तु [१४]ह्यध्वसंशोधनं भवेत् ।
[१५] शुद्धमायास्वरूपं चाप्याणवाख्यमलं तथा ॥२५॥
[१६] आत्मशक्ति निरुध्यैव तिष्ठत्येतदनादि च ।
[१७] ज्ञानदृष्टचा निरीक्षेत निर्मलस्त्वभिधीयते ॥२६॥
शिष्यस्य ब्रह्मरन्ध्रे तु स्वहस्त[१८]तलमादिशेत् ।
[१९] राहुमुक्तग्रहश्चन्द्रस्त्वत्यन्तं निर्मलो यथा ॥२७॥
शिवे[२०] चैतन्यसंधानं शिवत्वव्यक्ति तत्पदम् ।
ततः शिवात्मनोरैक्यं मूलमन्त्रेण दर्शयेत्[२१] ॥२८॥

---

[१] ०पर्यन्तव्याप्तिरप्तत्त्वं — ङ; ०पर्यन्तव्याप्तिरप्तत्वनाभि च — च.
[२] व्याप्ताप्तत्त्वेन नाभि च — छ.
[३] ०तत्त्वं च — ङ.
[४] व्याप्य चाग्निस्तु — ङ, च; व्याप्तमग्नि च — छ.
[५] कर्णयोः — छ.
[६] ०सदाशिवालीनं — ङ, छ.
[७] ०शक्तिबीजं च — छ.
[८] ०रन्ध्रवित् — 'छ' पाठान्तरम् ।
[९] भूतानि — च.
[१०] सुगन्धिते — ङ, च, छ.
[११] ०भावितमाचार्य — च.
[१२] ०कर्मणः — छ. —
[१३] ज्ञानाग्निन्दाहमाश्रित्य — छ.
[१४] अध्वसं० — ङ, च —
[१५] 'छ' मातृकायां २५ उत्तरार्धस्थाने
'शुद्धमायास्वरूपेण शिष्यचैतन्यभावनम् ।
शिष्यचैतन्यमूढेन आणवादि तिरोहितम् ॥'
इत्यर्धद्वयं दृश्यते ।
[१६] आत्मशक्तिनिरुद्धैव — ङ.
[१७] 'ज्ञात्वा विलोक्य कृपया शिवहस्तं च दापयेत् ।
प्रणामं कारयेत्पश्चात्तस्य नाम च दापयेत् ॥'
(**अचिन्त्यविध्वसादाख्ये** ३६.३२);
'शिष्यं विनीतमाचार्यः कारुण्येनावलोकयेत् ।
कारुण्यदृष्टिमात्रेण सिद्धिर्भवति शिष्यके ॥'
(**चिन्त्ये**, ३३.२६);
'आचार्यः —
मूर्धादिपादपर्यन्तं ज्ञानदृष्टचा निरीक्षयेत् ।
तत्काले संचितं दग्धं पश्चाच्छ्रीपादयोः क्रमात् ॥
शिष्यमूर्ध्नि शिवं हस्तं सूक्ष्ममन्त्रोपदेशयुक् ।'
(**सूक्ष्मे** (टि. ११२) ५५३, ५५४ पृष्ठयोः)
[१८] ०तलसंस्पृशः — छ.
[१९] राहुनिग्रहतश्चन्द्र — ङ; राहुनिग्रहणाच्चन्द्र — छ.
[२०] वै तव संधानं — ङ.
[२१] 'छ' कोशे २८ श्लोकानन्तरं —
'स्वयं संधानयोः शिष्य एकाग्रचित्तयोः स्थितम् ।
मात्रालक्षणसंयुक्तप्रासादसहिताक्षरम् ।
विध्युक्तेन प्रकारेण उपदेशं च कृत्य यत् ।
एषां कृत्यविशेषेण पाशं कालिङ्गसंभवम् ।
पाशच्छेदेन मुक्तिः स्यादतिरहस्यकर्मणि ।'
इत्यधिकं दृश्यते ।

[1] [शिष्यमूर्धादौ पादद्वयन्यासः, शिवज्ञानबोधनं च]

[2] शिष्यं तु संमुखं कृत्वा [3] स्वस्य पादद्वयं च तत् ।
शिवशक्तिस्वरूपेण मूर्धादौ विन्यसेद्गुरुः [4] ॥२९॥
[5] पृथ्व्यादिभूतसंचार [6] आकाशगुण उच्यते ।
आकाशे ब्रह्मरन्ध्रेऽपि [7] निर्दग्धः कर्मनाशनः ॥३०॥
[8] ज्ञानेन्द्रियाणां सर्वेषामधिका चाक्षुषी भवेत् ।
[9] तस्माद्दृष्टिद्वये [10] चैव युग्मपादस्पृशो [11] भवेत् ॥३१॥
कर्मेन्द्रियार्जितं दग्धं ज्ञानेन्द्रियस्य [12] संस्पृशात् ।
मनो बुद्धिरहंकारः [13] [14] सर्वेन्द्रियप्रवर्तकम् ॥३२॥

---

[1] 'अर्चापयेत्स्वपादाब्जं वस्त्रगन्धसुमादिभिः ।
धूपं दीपं च नैवेद्यं कारयित्वा पदाम्बुजे ॥
प्रणामं कारयित्वाथ तत्पदं तस्य मस्तके ।
विनिक्षिप्य यथाशास्त्रमनारभ्य [स्त्रं समालभ्य ?] कुशादिभिः ॥
रात्रौ निशीथसमये एकान्ते भवने शुभे ।
मुद्रया च महत्या वा शिष्यदेहं च संस्पृशन् ॥
इच्छाज्ञानक्रियाशक्तिसंपन्नं मन्त्रमुत्तमम् ।
एकाक्षरं महामन्त्रं सर्वसिद्धिप्रदायकम् ॥
सकलं निष्कलं चैव निर्बीजं च सबीजकम् ।
सर्वाधारं निराधारमनादि जगदादिकम् ॥
एकाक्षरं महामन्त्रं ज्योतीरूपं परात्परम् ।
शिष्यस्य कर्णमूले तु व्यादिशेत्सावधानतः ॥
उपदिश्य शिवज्ञानं शिवरूपं च तत्त्वतः ।
अनुगृह्य कृपादृष्ट्या विसृजेत्तं यथासुखम् ॥'
(**सुप्रभेदे** (टि. २४५) २६३, २६४ पृष्ठयोः) ;
'आचार्यः —
पश्चाच्छीर्षादं शिरसि मुखे हृदय एव च ।
त्रिस्थाने शिवपादं स्थापितं [स्थापयेद् ?] विधिवद्गुरुः ॥
प्रारब्धमलमेवं तु सूर्याग्रे ग्रहदीपनात् ।
अप्रकाशमयं कृत्वा तथैव मलमेव च ॥
पञ्चमलं क्रमाद्दग्धं शिवपादस्य स्थापनात् ।
दशकार्यक्रमं चैव बोधयेच्छिष्यं सद्गुरुः ॥
तस्य ज्ञानं महासूक्ष्मं वाङ्मनोतीतगोचरम् ।
रहस्यमतिगुह्यं च सूक्ष्मात्सूक्ष्मं शिवं भवेत् ॥'
(**सूक्ष्मे** (टि. ११२) ५५४ पृष्ठे) ;
'एवं योजितस्यात्मनः प्रारब्धकर्मभोगार्थं देहे स्थितत्वात्पञ्चभूतपञ्चेन्द्रियान्तःकरणबाधानिवृत्त्यर्थं समाधिसामर्थ्यार्थं च ब्रह्मरन्ध्रचक्षुर्हृदयभ्रूमध्यानि शिवशक्तिरूपदिव्यपादद्वयेन स्पृशेत् ।
ब्रह्मरन्ध्रस्याकाशस्थानत्वादितरेषां चतुर्णां भूतानां तत्रान्तर्भूतत्वात्तत्स्पर्शेन तच्छुद्धिः । भ्रूमध्यस्य समाधिस्थानत्वात्तत्स्पर्शात्समाधिशुद्धिः ।'
(**शैवसंन्यासपद्धतौ** १३९ पृष्ठे)

[2] शिष्यस्य संमुखे स्थित्वा — छ.
[3] दिव्यपादद्वयेन च — छ.
[4] विन्यसेत्क्रमात् — ङ; विन्यसो भवेत् — छ.
[5] 'च' कोशे ३०—३५ श्लोका न दृश्यन्ते ।; पृथिव्यादि — ङ.
[6] ०संचारं — ङ.
[7] निर्दग्धकर्म० — ङ.
[8] कर्मेन्द्रियाणि सर्वाणि अधिका — छ.
[9] अस्माद् — छ.
[10] ०द्वयं — ङ.
[11] ०स्पृशं — ङ.
[12] कर्मणि — छ.
[13] ०कारं — ञ; अत्र 'एतत्त्रयम्' इति पदमध्याहृत्य व्याख्येयम् ।
[14] सर्वेन्द्रियाणि च गोचरम् — छ.

[1]तस्य कर्म च दग्धं [2]स्याद्धृद्देशे तु स्पृशेत्पदा।
पुनरागत्य भ्रूमध्यमात्मनः सोऽहमाप्नुवन्[3] ॥३३॥
[4]प्रविश्य च तनुं ग्राह्य ब्रह्मरन्ध्रे प्रवेशयेत्।
[5]स्वस्थाने पादमाहृत्य [6]प्रणतं दण्डवद्गुरुः ॥३४॥
भावनादीक्षया [7]चैनं [8]शुद्धं कृत्वा यथाविधि।
शिवज्ञानबोध[9]शास्त्रं दद्यात्पत्यादिचिन्तनम् ॥३५॥

[10][शिष्येण गुरवे स्वात्मसमर्पणं, तदनन्तरकर्तव्यं च]

अनुग्राह्यस्तु यः शिष्यो वाङ्मनःकायकर्मभिः।
अर्थप्राणाभिमानांश्च[11] सद्गुरुभ्यो निवेदयेत् ॥३६॥
एतस्मात्कारणादेव[12] [13]स्वातन्त्र्यरहितो भवेत्[14]।

---

[1] तस्मात्कर्म — ङ.
[2] च हृद्देशे — छ.
[3] ०माप्नुयात् — ङ. छ.
[4] विवशो यस्त्वनुं — छ; इदमर्धं 'ङ' कोशे न दृश्यते।
[5] स्वस्थानपाद० — ङ.
[6] साष्टाङ्गं दण्डवद्गुरुम् — छ.
[7] शिष्यं — छ.
[8] हस्ते प्रणवमीक्षणम् — छ.
[9] शास्त्रं च ददौ रूपस्य चिन्तनम् — छ.
[10] 'शरीरमर्थं प्राणं च गुरवे संनिवेदयेत्।
शरीरप्राणकं चैव गुर्वनुज्ञापुरस्सरम् ॥
तदाज्ञया चानुभवः सततं भक्तिसंयुतः।
चित्तं तु सकलं तस्मै गुरवे तु समर्पयेत् ॥
स्वातन्त्र्यं च सर्वं च विसृज्य मनसा तदा।
वाचा च कर्मणा चैव गुर्वर्थं तु चरेद्बुधः ॥'
(**अचिन्त्यविश्वसादाख्ये** ३६.३३-३६);
'दासीदाससमृद्धिं च हस्त्यश्वरथगोकुलम्।
धनधान्यं च वस्त्रं च आसनं शयनादिकम् ॥
ग्रामाद्यं श्रद्धया युक्तः सद्गुरुभ्यो निवेदयेत्।'
'अथवान्यकुलः श्रीमाञ्छिष्यो भक्तिसमन्वितः।
यत्संभवति तत्सर्वं गुरवे संनिवेदयेत् ॥
धनधान्यादिहीने तु त्रिशुद्धया भक्तवत्सलः।
मानमोहविनिर्मुक्तः कायक्लेशपरायणः ॥
कृत्वा दीर्घनमस्कारं स्वशरीरं निवेदयेत्।'
(**चिन्त्ये** ३३.२० उ०, २१; २३ उ०-२५);
'सोऽपि लब्ध्वा गुरोस्तस्मान्महामन्त्रमनुत्तमम्।
संतुष्टेन हृदा तत्र शिवाविर्भावमात्मनः ॥
संतोष्य च शिरःकम्पैर्ज्ञानप्राप्तिमनुत्तमाम् ॥
विचरेत्स्वेच्छया लोके जगदानन्दकारकः ॥
समर्प्य गुरवे सर्वं क्षेत्रसंपद्धनादिकम्।
ईषणात्रयनिर्मुक्तः शिवानन्दानुभूतिमान् ॥
सर्वत्र समदृष्टिश्च सर्वं शिवमनुस्मरन्।
समाधिसाधनैर्युक्तः समाधिस्थो जितेन्द्रियः ॥
स शिवाकारमापन्नः शिवतत्त्वे विलीयते।
इयमेव ज्ञानदीक्षा इयमेव परा गतिः ॥
इदमेव शिवज्ञानं तदूर्ध्वं तु न किंचन।'
(**सुप्रभेदे** (टि. २४५) २६४, २६५ पृष्ठयोः);
'ज्ञानदीक्षां गुरोर्लब्ध्वा ह्यात्मारामः सुखी भवेत्।
अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ॥
शिवतत्त्वमनाद्यन्तं भावयन्सर्वदा हृदि।
विचरेत्कामतः शुद्धो यत्र कुत्रापि देशिकः ॥
नित्यं समाधिसंपन्नः स शिवः सर्वदा भवेत्।
स एव परमः श्रेष्ठो गुरूणां गुरुरुत्तमः ॥
तत्समो नास्ति लोकेऽस्मिन्नात्र कार्या विचारणा।
(**सुप्रभेदे** (टि. २४५) २६०, २६१ पृष्ठयोः)

[11] ०मानानि — ङ.
[12] एत्यैव कारणं कुर्यात् — छ.

[१]स्वातन्त्र्यरहितोऽप्येष समयाचारकल्पितम्[२] ॥३७॥
[३]निर्दग्धपटवद्देही वाङ्मनःकायकर्मभिः।
निःसारदेहं संगृह्य शुद्धकृत्यैरनुष्ठितम् ॥३८॥
कुलालचक्रभ्रमणं धनुर्बाणसमन्वितम्।
[४]एतैश्च करणैर्हृत्वा शब्दादिविषयान्वितम् ॥३९॥
[५]संस्कारैर्लाशुनं पात्रं यथा परिमलं भवेत्।
पद्मासने स्थितिं कृत्वा कायकर्मसु निश्चलम्[६] ॥४०॥
मौनमास्थाय [७]वाग्दोषात्प्राणायाममना भवेत्।
[८]शिवध्यानपरो यस्मात्[९]सर्वकर्म विनश्यति ॥४१॥
चिदाकाशे [१०]हि हृत्पद्मे ज्योतीरूपं विभावयेत्।
[११]ईक्षेत सर्वद्रव्याणि कार्पासाश्रयदीपवत् ॥४२॥
[१२]दहेच्च सर्वपापानि देहनाशे तु मुक्तिदम्।

[१३][ज्ञानदीक्षा मुक्तिदा]

[१४]जले जलं यथा क्षिप्तं क्षीरे क्षीरमिवार्पितम् ॥४३॥
तथैव ह्योकतां याति दीक्षामन्त्रेण मन्त्रवित्।
यथा प्रदीप्ते ज्वलने तूलराशिः समर्पितः ॥४४॥
दग्धो [१५]निर्याति सर्वत्र न भूयस्तूलतां व्रजेत्।
एवं शैवाध्वरं प्राप्य दीक्षामन्त्रसमुद्भवम् ॥४५॥
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः।

---

[१३] स्वतन्त्र — ङ.
[१४] 'ङ' कोशे ज्ञानदीक्षायां 'रौरवे' इति निर्दिश्यैतावानेव भाग उद्धृतः।
[१] स्वतन्त्ररहितोऽप्येष — ङ; स्वातन्त्र्यरहितश्चैव — छ.
[२] कल्पितः — ङ, छ.
[३] निर्दिश्य पटरूपानां — छ.
[४] एवं तत्कारणै० — ङ.
[५] संस्करणाभिलशुनं पात्रं परिमलं — छ.
[६] निश्चितम् — छ.
[७] वाग्दोषात्तस्य नश्यति तत्क्षणात् — छ.
[८] प्राणायाममनाः स्थित्वा — छ.
[९] शिवध्यानपरायणः — छ.
[१०] हृदा पद्मे — छ.
[११] ईक्षेण —ङ, छ.
[१२] दहेयुः — ङ, छ.
[१३] 'एषा ज्ञानवती दीक्षा शिवज्ञानप्रदायिनी।
शिवसायुज्यदा श्रेष्ठा मलत्रयविमोचिनी॥
इच्छाशून्या क्रियाशून्या साक्षान्मोक्षप्रदायिनी।'
(सुप्रभेदे (टि. २४५) २६१ पृष्ठे)
[१४] 'ङ' कोशे ४३ उत्तरार्ध ४४ श्लोकः ४५ पूर्वार्ध च न दृश्यन्ते।; एतत्पटलस्थाः ४३ उ०-४८ श्लोकास्तथा ५१-५३ श्लोकाश्च किंचित्पाठभेदेन सह **रौरवे** विद्यापादे अष्टमपटले दृश्यन्ते।
[१५] निर्वाति — छ.

[१]भिन्ने देहे शिवो भूत्वा शिव[२]धर्मैः समन्वितः ।।४६।।
शिवानन्दमनुप्राप्य [३]नाविर्भावाय कल्पते ।
[४]जलं सामुद्रमासाद्य नदी हृष्टाम्बुवाहिनी ।।४७।।
क्षारतोयत्वमायाति प्रभावाद्धि महोदधेः ।
एवं वै देहभिन्नात्मा शिवमेवाधिगच्छति ।।४८।।
[५]एवं दीक्षाविशुद्धात्मा देहस्थोऽपि न देहभाक् ।
निर्दग्धाशेषपाशत्वाज्जीवन्मुक्तः शिवैकधीः ।।४९।।
देहपाते चिदानन्दशिवैकरसतां व्रजेत् ।
न पुनर्भेदमायाति सरित्तोयमिवाम्बुधेः ।।५०।।
यथा सूर्योदयं प्राप्य तमः क्षिप्रं विनश्यति ।
एवं दीक्षां समासाद्य धर्माधर्मौ विनश्यतः ।।५१।।
यथा सूर्य इमाँल्लोकान्प्रकाशयति रश्मिभिः ।
तथा मन्त्रान्हरो देवः शक्तिभिस्तान्प्रकाशयेत् ।।५२।।
यथादित्यस्तु भूयिष्ठं रश्मिभिर्हरते जलम् ।
एवं शक्तिभिरीशोऽपि दीक्षिताद्धरते [६]मलम् ।।
[७]इत्येवं ज्ञानदीक्षेयं कथिता मुक्तिदायिनी ।।५३।।

[इति रौरवे क्रियापादे ज्ञानदीक्षाविधिः अष्टपञ्चाशः पटलः]

---

[१] भिन्नदेहः — छ.
[२] ०धर्मसमन्वितः — छ.
[३] चाविर्भावाय — ङ, छ.
[४] यथा समुद्र — छ.
[५] 'ङ' कोशे ४९-५३ द्वितीयार्धपर्यन्तश्लोका न दृश्यन्ते ।
[६] पशून् — छ.
[७] इदमर्धं 'छ' कोशे न दृश्यते ।

एकोनषष्टितमः पटलः

[1]नित्यपूजाविधिः

[2]**अथातः संप्रवक्ष्यामि शिवपूजाविधिक्रमम् ।**

[शिवपूजाफलम्]

ब्रह्महत्यादिदोषघ्नं सर्वज्ञानफलप्रदम् ॥१॥
यजनं श्रीकरं राष्ट्रवर्धनं रिपुनाशनम् ।
शिवपूजासमं पुण्यं न [3]भूतं न भविष्यति ॥२॥

[4][आत्मार्थपूजा परार्थपूजा च]

यजनं द्विविधं प्रोक्तमात्मार्थं च परार्थकम् ।

---

[1] अयं पटलः पुदुक्कोट्टैसंस्थानान्तर्गत 'कुडुमियामलै' ग्रामवास्तव्येन साम्बशिवशिवाचार्येण 'रौरवागमे नित्यपूजाविधिः' इति शीर्षकं दत्त्वा १९१० तमे संवत्सरे पञ्चनदक्षेत्रस्थब्रह्मानन्दाख्यमुद्रागारे संमुद्रय प्रकाशितः।; अयं पटलः रौरवागमे प्रथमभागे दशमपटले निर्दिष्टशिवार्चनविधिपटलाद्भिन्नः। एतस्मिन्विषये **अंशुमदागमे** आत्मार्थपूजाविधिपटलः; **अचिन्त्यविश्वसादाख्ये** १२, १३; **अजिते** २०, २२; **पूर्वकामिके** ४, ५; **पूर्वकारणे** ३०, ३१; **कारणे** (टि. ३४) वामनार्चनाविधिपटलः; **किरणे** क्रियापादे २; **चिन्त्ये** ६, ७, ८; **दीप्ते** २३, २६; **मकुटे** ३, ४; **मतङ्गपारमेश्वरे** क्रियापादे ३; **मृगेन्द्रे** क्रियापादे ३; **योगजे** ६; **रौरवे** क्रियापादे ९, १०; **वीरे** ३७, ३८; **सहस्रे** ४; **सार्धत्रिशतिकालोत्तरे** ५; **सुप्रभेदे** क्रियापादे ७, ८; **सूक्ष्मे** ४, ५; **स्वायम्भुवे** ७, ८ पटला द्रष्टव्याः।

[2] 'वक्ष्ये नित्यार्चनं पुण्यं शिवदं पापनाशनम्।
योगदं ज्ञानदं चैव मोक्षदं भक्तिवर्धनम् ॥
शिवपूजासमं पुण्यं न भूतं न भविष्यति।'
(**अचिन्त्यविश्वसादाख्ये** १२.१, २ पू०);
'अथातः संप्रवक्ष्यामि शिवार्चनविधिक्रमम्।
सर्वपापहरं पुण्यं सर्वरोगनिवारणम् ॥
महापातकनाशार्थं सर्वयज्ञफलप्रदम्।'
(**दीप्ते** २३.१, २ पू०);
'वक्ष्ये नित्यार्चनं पुण्यं सर्वसिद्धिकरं शुभम्।
महापातकदोषघ्नं सर्वैश्वर्यप्रदायकम् ॥'
(**मकुटे**, ४.१);
'अतः परं प्रवक्ष्यामि शिवपूजाविधिक्रमम्।
आयुरारोग्यजयदं सर्वयज्ञफलप्रदम् ॥
ब्रह्महत्यादिदोषघ्नं पूजावृद्धिकरं परम्।
शिवपूजासमं पुण्यं न भूतं न भविष्यति ॥'
(**सूक्ष्मे** ५.१, २);
एतद्विषये पुनः **अजिते** २०. प्रथमश्लोकस्तदीयटिप्पणी च द्रष्टव्ये।

[3] भूतो — ज.

[4] 'आत्मार्थं च परार्थं च पूजा द्विविधमुच्यते।
गुरुदेहे शुभे लिङ्गे स्थण्डिले स्वयमात्मनि ॥
क्षणिके मण्डले तोये चात्मार्थयजनं स्मृतम्।

[1]शिष्यस्तु गुरुणादौ तु [2]दीक्षितोत्तरकालके ।।३।।
ध्यातव्यमण्डले वापि [3]लिङ्गे वा [4]प्रतिमेऽपि वा ।
क्षणिके मानसे वापि यजेद्भक्त्या जपादिकम् [5]।।४।।
आत्मार्थमिति विज्ञेयं परार्थं शृणु सुव्रत ।
सर्वेषां रक्षणार्थाय [6]ग्रामे वा नगरेऽपि वा ।।५।।
पत्तने [7]कुटिके वापि खेटके राजधानिके ।
अन्यदेशे मनोरम्ये स्थाने [8]धाम्नि तु कल्पिते ।।६।।
स्थापितं पूजितं लिङ्गं परार्थमिति कथ्यते ।

[9][आत्मार्थपरार्थयजनेऽधिकारिणः]

[10]**चातुर्वर्ण्यसमुत्पन्नैरनुलोमैस्तु दीक्षितैः ।।७।।**

स्थापितं विधिना लिङ्गं सुरैर्वा मुनिभिर्नरैः ।।
स्वयमुद्भूतलिङ्गं च प्रतिमा चेश्वरात्मिका ।
परार्थे तु समाख्याताः सर्वेषामात्मनां फलम् ।।'
(**मकुटे** ४.२-४);
एतस्मिन्विषये पुनः **अजिते** २०.२-७ श्लोकास्त-
दीयटीप्पणी च द्रष्टव्याः ।

[1] शिष्यस्य — ज.

[2] दीक्षितः + उत्तरकालके = दीक्षित उत्तरकालके
ततः संधिरार्षः ।

[3] अत्र 'दत्ते' इति पदमध्याहृत्य 'गुरुणा आदौ
दत्ते लिङ्गे' इति व्याख्येयम् ।

[4] प्रतिमाशब्दस्य क्लीबे प्रयोगः ।

[5] 'कुर्यात्' इति शेषः ।

[6] 'विप्रैरन्यैर्वर्णैर्वा भोग्यो ग्राम उदाहृतः ।
एको ग्रामणिको यत्र सभृत्यपरिचारकः ।।
कुटिकं तद्विजानीयादेकभोगः स एव तु ।
जनैः परिवृतं द्रव्यक्रयविक्रयकादिभिः ।।
अनेकजातिसंयुक्तं कर्मकारैः समन्वितम् ।
सर्वदैवतसंयुक्तं नगरं चाभिधीयते ।।'
'क्रयविक्रयसंयुक्तमब्धितीरसमाश्रितम् ।।
देशान्तरागतजनैर्नानाजातिभिरन्वितम् ।
पट्टणं तत्समाख्यातम्'
'वने जनपदे चैव केवले शूद्रसेवितः ।
कर्णकः खेटको ग्रामः क्रमात्त्रिविध ईरितः ।।
'विद्यास्थानं तु तद्वत्स्याद्बहुसेनासमन्वितम् ।
राजवेश्मसमायुक्ता राजधानीति कथ्यते ।।
ग्रामादीनां समीपं यत्स्थानं कुब्जमिति स्मृतम् ।
(**पूर्वकामिके** २०.८-९; ८ उ०; ९; १० उ०,
११ पू०; १४ उ०, १५);
'विप्राणां च समत्यानां वासो ग्राम इति स्मृतः ।
स एव विप्रमुख्यानामग्रहार इति स्मृतः ।।
अनेकजातिसम्बाधं नानाशिल्पिजनैर्युतम् ।।
क्रयविक्रयकैः कीर्णं सर्वदेवैः समायुतम् ।।
नगरं त्विति विख्यातं पत्तनं शृणु साम्प्रतम् ।
द्वीपान्तरागतद्रव्यविक्रयक्रयकैर्युतम् ।।
पत्तनं त्वब्धितीरे तु'
'शूद्रैरधिष्ठितं यत्तत्खेटकं त्विति कीर्तितम् ।
तेषां समान्तरे येषां वासं कुटिकमुच्यते ।।'
'चतुरङ्गसमाकीर्णं नृपभूतिसमायुतम् ।
राजवेश्मसमायुक्तं राजधानीति चोच्यते ।।'
सुप्रभेदे क्रियापादे (२३.३ उ०-६; ८; ९ उ०,
१० पू०)

[7] वा कुटुम्बे वा — ज.

[8] धामान्कल्पयेत् — ज.

[9] 'चातुर्वर्ण्यस्य दीक्षायां विशेषाद्ब्राह्मणो गुरुः ।
विप्रक्षत्रियविट्शूद्रा दीक्षिताश्च प्रवेशकाः ।।
आत्मार्थयजनं कुर्यान्न कुर्यात्तु परार्थकम् ।
ऊर्ध्वशैवेन कर्तव्यमात्मार्थं च परार्थकम् ।।

आत्मार्थमर्चनं[१] योग्य[२]मयोग्यं तु परार्थकम् ।
आदिशैवेन कर्तव्यमात्मार्थं च परार्थकम् ॥८॥
वेदशास्त्रेषु निपुणः [३]शास्त्रज्ञस्त्वपरिग्रहः ।
[४]तन्त्रज्ञो मतिमान्प्राज्ञो दृढ[५]भक्तिर्दृढव्रतः ॥९॥
आदिशैव [६]इति प्रोक्तः स शिवब्राह्मणो गुरुः ।
[७]एषु वै [८]भौतिकेष्वेव योग्यं संस्थापनार्चनम्[९] ॥१०॥
[१०]भौतिकश्च सपत्नीको नैष्ठिकोऽथ विपत्निकः[११] ।
[१२]शैवे च [१३]भौतिकः श्रेष्ठस्तदभावे[१४] तु नैष्ठिकः[१५] ॥११॥
लिङ्गस्थापनयोग्यत्वात्स्थापको[१६] भौतिकः स्मृतः ।
अर्चनं चाग्निकार्यं च नित्योत्सवमहोत्सवम्[१७] ॥१२॥
स्नपनं बलिदानं च नैष्ठिकस्यापि योग्यकम् ।
शैवादन्यच्च[१८] बौद्धाख्यं यावत्स [१९]नैष्ठिकश्चरेत् ॥१३॥
शैवान्यत् [२०]पाञ्चरात्रं स्याद्बौद्धमार्हं [२१]तथापरम् ।
[२२]गोवत्समयभेदः स्यात् क्षीरवच्छिव उच्यते[२३] ॥१४॥
शिवं सर्वगतं शान्तं यजेन्नित्यं शिवव्रती[२४] ।

ऊर्ध्वशैव इति प्रोक्तः स शैवब्राह्मणो गुरुः ।
निर्वाणदीक्षितानां तु आत्मार्थं च परार्थकम् ॥'
(**मकुटे** ४.५–७);
एतस्मिन्विषये पुनः **अजिते** २०.८, ९ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[१०] चातुर्वर्ण — ज.
[१] अत्र 'कर्तुं' इत्यध्याहृत्य व्याख्येयम् ।
[२] ०मयोग्यस्तु — ज.
[३] शास्त्रज्ञस्य परि — ज.
[४] तन्त्रज्ञ मति — ज.
[५] ०भक्त्या दृढ — ज.
[६] मितिप्रोक्तं — ज.
[७] एषुर्वै — ज.
[८] भौतिकैरेवमयोग्यसंस्थापनार्चकम् — ज.
[९] 'आदिशैव इति प्रोक्तः स शिवब्राह्मणो गुरुः ।
तेषु वै भौतिकैरेव योग्या ये स्थापनादयः ॥'
वर्णाश्रमचन्द्रिकायां ८० पृष्ठे 'भीमसंहितायाम्' इति निर्दिश्योद्धृतः ।
[१०] भौतिक — ज;
भौतिकश्च सपत्नीको नैष्ठिकोऽथ विपत्निकः ।
तेषु वै भौतिकः श्रेष्ठस्तदभावे तु नैष्ठिकः ॥
वर्णाश्रमचन्द्रिकायां ८० पृष्ठे 'भीमसंहितायाम्' इति निर्दिश्य उद्धृतः ।
[११] 'विपत्नीकः' इत्यस्यात्र 'विपत्निकः' इति ह्रस्वान्त-प्रयोगो वृत्तार्थ इति भाति ।
[१२] शैवं च — ज.
[१३] भौतिकश्रेष्ठं — ज.
[१४] तथाभावे — ज.
[१५] नैष्ठिकम् — ज.
[१६] ०त्स्थापिते — ज.
[१७] उत्सवशब्दस्यात्र क्लीबे प्रयोगः ।
[१८] ०दन्यं च — ज.
[१९] नैष्ठिकं — ज.
[२०] पञ्चरात्रं — ज.
[२१] तथा परे — ज.
[२२] 'गोवत्समयभेदः स्यात्क्षीरवच्छिवमुच्यते ।
शिवं सर्वगतं शान्तं भजेन्नित्यं शिवाश्रमी ॥'
ज्ञानावरणविळक्के ४१३ पृष्ठे 'भीमसंहितायाम्' इति निर्दिश्योद्धृतः ।
[२३] ०च्छिवमुच्यते — ज.
[२४] शिवव्रतैः — ज.

[1][चतुर्विधपूजा तत्फलं च]

दीपान्तं वा हविष्यान्तमुत्सवान्तं [2]नटान्तकम् ॥१५॥
दीपान्तं मुक्तिदं प्रोक्तं नैवेद्यान्तं तु भुक्तिदम् ।
श्रीप्रदं चोत्सवान्तं तु [3]नटनान्तं तु सौख्यदम् ॥१६॥

[श्रेष्ठादिभेदेन पूजात्रैविध्यम्]

श्रेष्ठं मध्यं कनिष्ठं च त्रिविधं तत्प्रकीर्तिम् ।

[4][संधिलक्षणम्]

[5]स्वस्थनराक्ष[6]निमिषचतुर्भागस्त्रुटिः स्मृता ॥१७॥
तद्द्वयं तु [7]लवः प्रोक्तो निमिषस्तद्द्वयं भवेत् ।
निमिषाः पञ्चदश काष्ठा[8] [9]तिथिकाष्ठाः कला स्मृता[10] ॥१८॥
त्रिंशत्कला[11] मुहूर्तं च तदेव घटिकाद्वयम् ।

---

[1] दीपान्तमर्चनं प्रोक्तं नैवेद्यान्तं तु पूजनम् ।
बल्यन्तं शान्तिकं प्रोक्तं पूजेयं त्रिविधोदिता ॥'
(**पूर्वकामिके** ४.३७७);
'सावश्यं धूपदीपं स्यात्सौभाग्यं हविषान्तकम् ।
बल्यन्तं शान्तिकं प्रोक्तं नृत्तान्तं पौष्टिकं तथा ॥'
(**पूर्वकारणे** ३०.४३८);
एतस्मिन्विषये पुनः **अजिते** २०.१९, २० पू० श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[2] नटान्तकम्-नटनान्तकम् ।

[3] धावनानां तु — ज.

[4] 'कालो द्विविध इत्युक्तः स्थूलः सूक्ष्म इति द्विधा ।
स्थूलो लौकिकसंज्ञस्तु सूक्ष्मश्चाध्यात्मिको मतः ॥
स्थूलकाले प्रयोक्तव्यं शिवपूजादि सर्वदा ।
योगिनां निमिषे वेदभागं त्रुटिरिति स्मृता ॥
लवं तद्द्वयसंख्यातं तद्द्वयं निमिषं तथा ।
निमिषं तिथिसंख्यं स्यात्काष्ठा चेति प्रकीर्तिता ॥
काष्ठा च तिथिसंख्या च कला चेति प्रकीर्तिता ।
कलात्रिंशन्मुहूर्तं च तथैव घटिकाद्वयम् ॥
मुनिसंख्यार्धनाडी च याममित्युच्यते बुधैः ।
तत्संध्यष्टौ ह्यहोरात्रं यजनं प्रतियामके ॥
अष्टसंध्यासु यजनमुत्तमं चेति कीर्तितम् ।
चतुःसंध्यासु यजनं मध्यमं चेति कीर्तितम् ॥
त्रिसंध्यास्वर्चनं कुर्यादधमं चेति कथ्यते ।'
(**सूक्ष्मे**, ४.२–८ पू०);
'यजनं प्रतियामं तु उत्तमं त्विति कीर्तितम् ।
उदये चैव मध्याह्ने प्रदोषे चार्धयामके ॥
यजनं मध्यमं मध्ये उदयेऽस्तमनेऽधमम् ।
परार्धेष्वेषु कालेषु पूजयेत्तु विशेषतः ॥'
(**पूर्वकारणे**, ३१, ६, ७);
एतस्मिन्विषये पुनः **अजिते** २०.१०–१८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[5] स्वस्था नराक्ष — ज.

[6] निमिषं चतुर्भागं तुटि स्मृतम् — ज.

[7] लयं प्रोक्तं निमिषं — ज.

[8] निमिषं पञ्चदशकाष्ठ — ज.

[9] दशकाष्ठा — ज.

[10] स्मृताः — ज.

[11] त्रिंशत्काल० — ज.

[1]**सार्धास्तु नाडिकाः सप्त [2]यामः स संधिरुच्यते ॥१९॥**
[3]संधयोऽष्टौ समाख्यातमहोरात्रं [4]प्रजापते ।
यजनं प्रतियामं तु श्रेष्ठमित्यभिधीयते ॥२०॥
उदये चैव [5]मध्याह्ने संध्याकालेऽर्धयामके[6] ।
[यजनं मध्यमं मध्ये उदयेऽस्तमये तथा] ॥२१॥
अर्चनं ह्यधमं प्रोक्तमिति शास्त्रस्य [7]निश्चयः ।

[8][संधिक्रमः]

[9]घटिके द्वे भवेत्स्नानं घटिकैकार्चने[10] भवेत् ॥२२॥
घटिकार्धं निवेद्यार्थं बलिदानं तु तत्समम् ।
नित्याग्नि[11]कार्ये त्वर्धं च नित्योत्सवं [12]त्रिनाडिकम् ॥२३॥
एवं संधि[13]क्रमः प्रोक्तो ह्यर्चयेद्देशिकोत्तमः ।

[14][दशविधानि पूजाङ्गानि]

[15]दशप्रकारपूजाङ्गं ज्ञात्वा पूजां समारभेत् ॥२४॥

---

[1] सार्धेन नाडिका सप्ता — ज.
[2] यामान्तःसंधि — ज.
[3] संधीराष्टौ — ज.
[4] प्रजापतेः — ज.
[5] माध्यान्ने — ज.
[6] ०काले तु सायके — ज; पूर्वकारणश्लोकमनुसृत्यात्र पाठः साधितः ।
[7] निश्चयम् — ज.
[8] घटिके द्वे भवेत्स्नानं घटिकैकार्चनं भवेत् ।
घटिकार्धं तु नैवेद्यं बलिदानं तु तत्समम् ॥
नित्याग्निकार्यमर्धं तु नित्योत्सवं त्रिनाडिका ।
स्तोत्रसंगीतनृत्तेषु सप्तार्धं चुलुकोदकम् ॥
(**पूर्वकारणे** उ० ४४२ उ०–४४४ पृ०);
एतद्विषये पुनः **अजिते** उ०.२६३ उ०–२६७ श्लोकास्तदीयटिप्पणी, तथा **रौरवे** क्रियापादे १.९ – १० श्लोकौ च द्रष्टव्याः ।
[9] घटिकाद्वौ — ज.
[10] ०कार्चनं — ज.
[11] ०कार्यमर्धं च — ज.
[12] त्रिनाडिका — ज.
[13] ०क्रमं प्रोक्तमर्चये — ज.
[14] पञ्चशुद्धिक्रमं वक्ष्ये शृणुष्वैवं महेश्वर ।
प्रथमं चात्मशुद्धिर्द्वितीयं स्थानशोधनम् ॥
तृतीयं द्रव्यशुद्धिः स्याच्चतुर्थं लिङ्गशोधनम् ।
पञ्चमं मन्त्रशुद्धिस्तु वक्ष्यते च पृथक् पृथक् ॥
(**मकुटे** (टि० १९) उ.५६ उ० – ५८ पृ०);
एतद्विषये पुनः **रौरवे** क्रियापादे १०.२, ३ पृ० तदीयटिप्पणी च द्रष्टव्याः ।
[15] दश प्रकारा यस्मिंस्तत् दशप्रकारं, पूजाया अङ्गं पूजाङ्गं दशप्रकारं पूजाङ्गं दशप्रकारपूजाङ्गं तत् ।;
'अथ आत्मशुद्धिः । सा द्विविधा पूजकजीवस्य शिवभावापादनात्मिका जीवशुद्धिरूपा, पूजकदेहस्य शिवदेहत्वापादनात्मिका देहशुद्धिरूपा च ।'
'अथ देहशुद्धिः । सा द्विविधा सूक्ष्मदेहशुद्धिः स्थूलदेहशुद्धिश्च ।'
(**शिवार्चनचन्द्रिका** पृ० २१, २२)
शिवार्चनचन्द्रिकोक्तप्रकारेण देहात्मशुद्धिविषये द्विविधत्वाङ्गीकारे पूजायां दशाङ्गानि सम्यगुक्तानि स्युः ।

प्रथमं काय[1]शुद्धिः स्यादात्मशुद्धिरतः[2] परम् ।
पुष्प[3]शुद्धिर्यथामन्त्रं स्थानशुद्धिस्तथैव[4] च ॥२५॥
द्रव्य[5]शुद्धिस्तथा मन्त्रलिङ्गशुद्धिरतः[6] परम् ।
पीठ[7]शुद्धिस्तथैवं स्यादासनं कल्पयेत्क्रमात् ॥२६॥
एवं दशप्रकारेण पूजयेत्परमेश्वरम् ।

[8][कायशुद्धिरात्मशुद्धिश्च]

शौचमाचमनं स्नानं तर्पणं विधिपूर्वकम् ॥२७॥
कृत्वा प्रविश्य [9]हर्म्यं तु त्रिःकृत्वा तु प्रदक्षिणम् ।
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः ॥२८॥
दशदिग्बन्धनं पूर्वं कृत्वास्त्रेणैव देशिकः ।
करपूजा [10]प्रकर्तव्या गन्धपुष्पादिना पुरः ॥२९॥
दहनाप्लावनं कुर्यान्नाडिशोधनकर्मभिः ।
प्राणो वै त्रिः [11]प्रकर्तव्यः प्राणायामेन सुव्रत ॥३०॥

[12][करन्यासः]

करन्यासं ततः कुर्याद्देहन्यासमतः परम् ।

---

[1] ०शुद्धि — ज.
[2] ०शुद्धिमतः — ज.
[3] ०शुद्धि यथा० — ज
[4] ०शुद्धि तथैव — ज.
[5] ०शुद्धि तथा मन्त्र — ज.
[6] ०शुद्धिमतः — ज.
[7] ०शुद्धि तदेवं — ज.
[8] 'प्रातरुत्थाय मनसा शिवं संचिन्तयेद्बुधः ।
तद्ग्रामाद्बहिर्निर्गत्य विण्मूत्रं च विसर्जयेत् ॥
शौचमाचमनं दन्तताल्वुसंशोधनं कुरु ।
ऋग्वेदादिकमन्त्रेण स्नानं कृत्वा विचक्षणः ॥
संशुद्धवस्त्रखण्डेन मार्जेद्देहगतं जलम् ।
धौतवस्त्रेण संवेष्टच चार्द्रवस्त्रं परित्यजेत् ॥
ततः संध्यामुपासीत क्रमाद्वैदिकशैवकम् ।
ततो देवालयं गत्वा प्रदक्षिणमथाचरेत् ॥
पादप्रक्षालनं कृत्वा द्वारदेवान्समर्चयेत् ।
मण्डपं तु प्रविश्याथ रुचिरासनसंस्थितः ॥
भस्म तु वामहस्ते तु दक्षेणैवाभिमन्त्रयेत् ।
असुरांशं परित्यज्य दिग्बन्धं चास्त्रमन्त्रतः ॥
दक्षहस्तजलं पीत्वा अङ्गुल्या चैव मर्दयेत् ।
शिरोललाटकर्णे तु कण्ठे च हृदयेऽपि च ॥
बाह्वोर्नाभ्यां परस्ताच्च भस्मन्यासं समाचरेत् ।
रुद्रो विष्णुर्विरिञ्चिश्च ऊर्ध्वाधस्तात्त्रिरेखिकाः ॥
दिग्बन्धनं ततः कृत्वा प्राणायामत्रयं कुरु ।
भूतशुद्धिं ततः कृत्वा पञ्चग्रन्थिं तु छेदयेत् ॥
मूर्धादिपादपर्यन्तममृताप्लावनं नयेत् ।
करन्यासं ततः कुर्यादङ्गुल्या न्याससमाचरेत् ॥
अङ्गन्यासं ततः कुर्यादष्टत्रिंशत्कला न्यसेत् ।
हृत्पद्मे चार्चयेद्देवं नाभौ होमं समाचरेत् ॥
भ्रूमध्ये ध्याययेद्देवमात्मशुद्धिरिति स्मृता ।'
(**सूक्ष्मे** ५.५ उ०–१६);
एतद्विषये पुनः **अजिते** २०.३३–१०८ पू० श्लोकास्तदीयटिप्पणी; **रौरवे** क्रियापादे १० ३ उ०–६ पू० श्लोकाश्च द्रष्टव्याः ।
[9] हर्म्यं तु — ज.
[10] प्रकर्तव्यं — ज.
[11] प्रकर्तव्यं — ज.
[12] 'शोधयेदस्त्रमन्त्रेण तलिकौ हस्तपृष्ठकौ ।

गृहस्थः सृष्टिमार्गेण [1]ब्रह्मचारी स्थितिक्रमात् ॥३१॥
वानप्रस्थयतीनां[2] च संहारन्यास उच्यते[3]।
ईशानादीनि सद्यान्तमङ्गुष्ठादिक्रमेण तु ॥३२॥
कनिष्ठान्तं[4] न्यसेद्धीमान्सृष्टिन्यास उदाहृतः[5]।
मध्यादि [6]तर्जन्यन्तं[च]स्थितिन्यास उदाहृतः[7] ॥३३॥
कनिष्ठाद्यङ्गुष्ठान्तं च सद्यादीनि क्रमान्न्यसेत्।
संहारन्यास एवोक्तः[8] शिवे तु[9] परमात्मनि ॥३४॥
[10]अङ्गुल्या तु न्यसेत्पर्व तर्जन्याङ्गुष्ठके न्यसेत्।
हृदयाद्यस्त्रपर्यन्तं मध्यमादि तु[11] विन्यसेत् ॥३५॥
[12]तलयोस्तर्जन्यन्तं च [13]सर्वेषु विन्यसेद्बुधः।
[14]तलयोर्विन्यसेन्नेत्रमस्त्रं [15]तर्जनि विन्यसेत् ॥३६॥
शिवमन्त्रं न्यसेद्धीमान्करशाखासु पर्वसु।
कर[16]न्यासस्त्वयं प्रोक्तो ह्यङ्गन्यासमथ शृणु ॥३७॥

[17][अङ्गन्यासः]

[18]मूर्धादिपादपर्यन्तं सृष्टिन्यास उदाहृतः[19]।

अस्त्रेण हुंफडन्तेन द्विर्वामं शोधयेत्करम् ॥
तेन मन्त्रेण सव्यं तु ऊर्ध्वाधः शोधयेत्त्रिधा।
गन्धलिप्तकरौ कृत्वा शिवहस्तप्रकल्पनम् ॥'
'अङ्गुष्ठादि कनिष्ठान्तं सृष्टिन्यासमुदाहृतम्।
कनिष्ठाद्यङ्गुष्ठकान्तं यत्संहारन्यासमुच्यते ॥
ईशादि सद्यमन्त्रान्तं सृष्टिन्यासमुदाहृतम्।
सद्यादीशानपर्यन्तं संहारन्यासमुच्यते ॥
दक्षिणाङ्गुष्ठमादि स्यात्कनिष्ठादीतरे ततः।
दशबीजं न्येसेद्धीमान्स्थितिन्यासमतः परम् ॥
तर्जन्यन्तं तु मध्यादि क्रमादङ्गानि विन्यसेत्।
न्यसेद्धस्ततले नेत्रं तर्जन्यामस्त्रकं न्यसेत् ॥
शिवाङ्गान्येवमेवं स्याच्छिवं पर्वणि पर्वणि।
गृहस्थः सृष्टिमार्गेण करन्यासं तु कारयेत् ॥
वानप्रस्थयतीनां तु संहारक्रममेव हि।
अपत्नीकवनस्थानां संहारन्यासमुच्यते ॥
नैष्ठिके तु स्थितिन्यासं सर्वकार्येषु पूजितम्।
करन्यासं समाख्यातम्'
(**पूर्वकारणे**, ३०, १२२, १२३; १२६–१३२);
एतद्विषये पुनः **अजिते** २०.७३ उ०–८० पू०
श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[1] ब्रह्मचारिस्थितिक्रमम् — ज.
[2] यदीनां — ज.
[3] ०न्यासमुच्यते — ज.
[4] कनिष्ठादि० — ज.
[5] ०न्यासमुदाहृतम् — ज.
[6] तर्जन्यान्तं — ज.
[7] ०न्यासमुदाहृतम् — ज.
[8] ०न्याससमेवोक्तं — ज.
[9] शिवेन — ज.
[10] 'अङ्गुलिः–अङ्गुष्ठः इत्युणादिकोशः' इति **शब्दकल्पद्रुमः**।; अङ्गुलिद्वन्यसेपर्वान् — ज.
[11] मध्यमादीनि — ज.
[12] स्थलयोस्तर्जन्योश्चैव — ज.
[13] सर्वेषां — ज.
[14] स्थलयोर्विन्यसे नेत्रमस्त्र० — ज.
[15] अत्र तर्जन्यां विन्यसेदिति भाव्यम्।
[16] ०न्यासमिदं प्रोक्तमङ्ग० — ज.
[17] 'अङ्गन्यासमथ शृणु।

[1]हृदादिपादपर्यन्तं स्थितिन्यास उदाहृतः[2] ॥३८॥
[3]पादादिमूर्धपर्यन्तं संहारन्यास उच्यते[4]।
एवं न्यासत्रयं कृत्वा [5]स्थावरे जङ्गमे बुधः ॥३९॥
स्थावरं लिङ्गमित्याहुर्जङ्गमं तस्य [6]पूजकः।

[7][अन्तर्यागः]

अन्तर्यागमतः कुर्यादर्चयेदात्मदैवतम् ॥४०॥
हृत्पद्मकर्णिकामध्ये ओंकारमयमीश्वरम्।
[8]ध्यायेद्यजनसहितं सदाकालं यजेद्बुधः ॥४१॥
चिन्तयेन्मनसा पूर्वं [9]गुणांस्तत्र गुणत्रयम्।
[10]ततः प्रच्छाद्य च तमो [11]रजः सत्त्वेन साधयेत् ॥४२॥
[12]ध्यायेत्त्रिमण्डलं पूर्वं [13]धूम्रं रक्तं सितं क्रमात्।

मूर्धादिः मृष्टिरेवं स्यात्पादादिः संहृतिर्भवेत् ॥
नाभ्यादि हृदयान्तं तु स्थितिन्यासं प्रकीर्तितम्'।
'मूर्ध्नयानने च हृदये गुह्ये वै पादयोः क्रमात्।
ब्रह्माणि सृष्टिमार्गेण ईशानादीनि विन्यसेत् ॥
पादादारभ्य मद्यादि संहारन्यासकर्मणि।
नाभ्यादि हृदयान्तं तु स्थितिन्यासं प्रकीर्तितम् ॥'
(**सुप्रभेदे** क्रियापादे ८.४७ उ०, ४८; ५३ उ० –५५ पू०);
एतस्मिन्विषये पुनः **अजिते** २०.८१–८४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[2] ०न्यासमुदाहृतम् — ज.
[3] पादादि मूर्ध्निपर्यन्तं — ज.
[4] ०न्यासमुदाहृतम् — ज.
[5] हृदयादिपादपर्यन्त — ज.
[6] ०न्यासमुच्यते — ज.
[7] 'लिङ्गभेदक्रमं वक्ष्ये विशेषात्तु यथाक्रमम्।
लिङ्गद्वयमिति प्रोक्तं चलं चाचलमेव च ॥
चललिङ्गे सदावासं पूजयेत्परमेश्वरम्।
अचलं लिङ्गमेवं तु मन्त्रसंस्कारपूर्वकम् ॥
मन्त्रसंस्कारहीने तु लिङ्गमाकृतिमात्रकम्।
चललिङ्गविशेषस्तु गुरुर्देवो महेश्वरः ॥''
स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते।
जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत् ॥'
(**मकुटे** ४.१०५ उ०–१०९ पू०)

[8] पूजकम् — ज.
[9] उत्सृज्य प्राकृतं भावं शिवोऽहमिति भावयेत्।
एवं कृत्वा विशेषेणाप्यन्तर्यागं समाचरेत् ॥
नाभिचक्रं समाश्रित्य कारयेद्वह्निमण्डलम्।
हृदये धारयेत्सोमं भ्रूमध्ये रविमण्डलम् ॥
हृदये यजनं कुर्याद्धोमं नाभौ प्रकल्पयेत्।
तथेश्वरं तु भ्रूमध्ये ध्यायेत्सर्वगतं प्रभुम् ॥
पञ्चावरणमार्गेण पूजयित्वा विशेषतः।
हृत्पद्मे चार्चयेन्नित्यं त्रिकालं वा द्विकालकम् ॥
अथवाप्येककालं वा संयजेन्मानसेन तु।
आत्मशुद्धिरिति प्रोक्ता'
(**पूर्वकारणे** ३०.१३७–१४१);
एतद्विषये पुनः **अजिते** २०.११० उ०, १११ पू० श्लोकस्तदीयटिप्पणी, **रौरवे** क्रियापादे १०.३ उ०–६ पू० श्लोकाश्च द्रष्टव्याः।

[9] ध्यानं यजन० — ज.
[10] गुणा तत्र — ज.
[11] तं पृश्चाद्य रजमा — ज.
[12] रसमतेन — ज.
[13] 'ध्यायेत्त्रिमण्डलं पूर्वं धूम्रं रक्तं सितं क्रमात्।
द्वादशाङ्गुलविस्तीर्णं शुक्लं विकसितं शुभम् ॥

सत्त्वोपरि[१] गुणातीतं पुरुषं पञ्चविंशकम् ।।४३।।
ऐश्वर्यपङ्कजं[२] नित्यं पुरुषोपरि संस्थितम् ।
द्वादशाङ्गुलविस्तीर्णं शुक्लं विकसितं शुभम् ।।४४।।
नालमष्टाङ्गुलं ज्ञेयं [३]नाभिकन्दसमुद्भवम् ।
पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम् ।।४५।।
कर्णिका[४]केसरं ज्ञानं नालं वैराग्यमेव हि ।
पार्थिवाण्ड[५]मधःकन्दमिति पद्मं विचिन्तयेत् ।।४६।।
[६]धर्मज्ञाने च वैराग्यमैश्वर्यादि[७] समन्वितम् ।
ध्यात्वा पद्मासनं ह्येवं सर्वपापहरं परम् ।।४७।।
तत्पद्मकर्णिकामध्ये शुद्धदीपसमाकृति ।
[८]आवृतेषु दलेष्वष्टौ ओं शिवाय नमो नमः ।।४८।।
इन्द्रादीशानपर्यन्तं न्यसेदष्टाक्षरं क्रमात् ।।
[९]रुद्ररूपं वरं व्यक्तमानन्तमचलप्रभम् ।।४९।।
युगाङ्गुलप्रमाणेन [१०]नित्यं निष्कलदीपवत् ।
अर्चयेदष्टपुष्पैस्तु शिवमोंकाररूपिणम् ।।५०।।

[११][अष्टपुष्पाणि]

अहिंसा प्रथमं पुष्पं क्षमापुष्पं द्वितीयकम् ।

नालमष्टाङ्गुलं ज्ञेयं नाभीमङ्गसमुद्भवम् ।
पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम् ।।
कर्णिकाकेसरं ज्ञानं नालं वैराग्यमेव हि ।
पार्थिवाण्डमधःकन्दमिति पद्मं विचिन्तयेत् ।।
तत्पद्मकर्णिकामध्ये शुद्धदीपसमाकृतिम् ।
आवृतेषु दलेष्वष्टौ ओं शिवाय नमो नमः ।।
इन्द्रईशान[इन्द्रादीशान ?]पर्यन्तं न्यसेदष्टाक्षरं क्रमात् ।
रुद्ररूपवरं व्यक्तमानन्तमचलप्रभम् ।
युगाङ्गुलप्रमाणेन नित्यं निष्कलदीपवत् ।।'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले २०४–२०८);

'कदलीपुष्पसंकाशं हृदयं सर्वदेहिनाम् ।
तस्य मध्ये स्थितं पद्ममष्टपत्रं सकर्णिकम् ।।
द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम् ।
नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवम् ।।
पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम् ।
कर्णिकाकेसरं ज्ञानं नालं वैराज्ञ[वैराग्य ?]मुत्तमम् ।।
शिवधर्मं च तत्कन्दमिति पद्मं विचिन्तयेत् ।
मन्त्रमिहासनासीनं मन्त्रसंनद्धविग्रहम् ।।
मन्त्रपूजासु संपन्नो यजेत्तत्र महेश्वरम् ।'
(**सकलागमसारसंग्रहे** ६४, ६५ पृष्ठयोः 'निश्वासकारिकायाम्' इति निर्दिश्योद्धृताः ।)

[१] सत्तोपरि — ज.
[२] ०पङ्कजे — ज.
[३] नाभिसङ्ग० — ज.
[४] ०केसरज्ञानं — ज.
[५] ०मथस्कन्दमिति — ज.
[६] धर्मं ज्ञानं च — ज.
[७] अत्र 'एभिः' इति पदमध्याहृत्य व्याख्येयम् ।
[८] आवृतेऽष्टदले स्पृष्टौ — ज.
[९] रुद्रा उपवरव्यक्तमानन्दमचलं प्रभः — ज.
[१०] धूमभ्रान्तं — ज.

तृतीयं तु दयापुष्पं चतुर्थं क्रोधवर्जितम्[1] ॥५१॥
पञ्चमं [2]कृतिमात्सर्यं षष्ठमं भावपुष्पकम्।
सप्तमं ध्यानपुष्पं च [3]समाधिश्चाष्टपुष्पकम्।५२॥
[4]सर्वोपचारान् मनसा ध्यात्वा [5]तं पूजयेच्छिवम्।
[6]प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्॥५३॥
आत्म[7]शुद्धिरियं प्रोक्ता; पुष्पशुद्धिमथ शृणु।

[8][पुष्पशुद्धिः, तत्र सात्त्विकपुष्पाणि]

श्वेतं रक्तं तथा पीतं कृष्णं चेति चतुर्विधम्॥५४॥
द्रोणमन्दारपुन्नागं शुक्लार्कं श्वेतपङ्कजम्।
नन्द्यावर्तं श्रियावर्तं पट्टिका बहुकर्णिका॥५५॥
मालती [9]शतपत्री च वकुलं [10]कुरवं तथा।

---

[1] वर्जितम्—वर्जनम् भावे क्तप्रत्ययः।
[2] कृतिः—कर्म; काम्यकर्मणि मात्सर्यमिति भाति।
[3] समाधि चाष्ट० — ज.
[4] सर्वोपचारं — ज.
[5] तत्पूजये० — ज.
[6] प्रकृतिं — ज.
[7] ०शुद्धिमिदं प्रोक्तं — ज.
[8] 'पुष्पाणां विधिरुच्यते।
श्वेतं रक्तं तथा पीतं कृष्णं चेति चतुर्विधम्॥
श्वेतपद्मं च पुन्नागं शङ्खपुष्पं च मल्लिका॥
नन्द्यावर्तं श्रियावर्तं मन्दारं बहुकर्णिका॥
द्विकर्णी कुरवं जाती लक्ष्मी च वकुलं तथा॥
श्वेतार्कं मालती द्रोणमतसी श्वेतलोध्रकम्।
विषकासीसकुसुमं भद्रं चैव महा तथा॥
एतानि श्वेतपुष्पाणि सात्विकानि विनिर्दिशेत्।
(**पूर्वकारणे** ३१.५५–५८);
'नन्द्यावर्तं श्रियावर्तं मन्दारं शतपत्रिका।
श्वेतार्कं मालती चैव पुन्नागं कुरवं तथा॥
एवमादीनि पुष्पाणि सात्त्विकानि विनिर्दिशेत्।'
(**दीप्ते** २६, १३, १४ पू०);
'द्रोणं च श्वेतपद्मं च जाती च बहुकर्णिका।
नन्द्यावर्तं श्रियावर्तं मन्दारं शतपत्रिकम्॥
श्वेतार्कं मालती चैव पुन्नागं कुरव तथा।
एवमादीनि पुष्पाणि सात्त्विकानि समादिशेत्॥'
(**सुप्रभेदे** क्रियापादे ७.१२, १३);
'द्रोणं च श्वेतपद्मं च जाती च बहुपर्णिका।
नन्द्यावर्तं श्रियावर्तं मन्दारं शतपत्रिका॥
श्वेतार्कं मालती बिल्वं पुन्नागं कुरवं तथा।
एवमादीनि पुष्पाणि सात्त्विकानि विनिर्दिशेत्॥'
(**सकलगमसारसंग्रहे** पृ० ९१)
[9] शतपत्रा — ज.
[10] 'कुरवकम्' इत्यत्र वृत्तार्थं कुरवमिति प्रयुक्तमिति भाति।
[11] 'अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः।
सर्वभूतदयापुष्पं क्षमापुष्पं विशेषतः॥
ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तथैव च।
सत्यमष्टदलं पुष्पं रुद्रप्रीतिकरं भवेत्॥'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले २१३, २१४);
'अहिंसा प्रथमं पुष्पमिन्द्रियाणां तु निग्रहः।
क्षान्तिपुष्पं दयापुष्पं ज्ञानपुष्पमतः परम्॥
तपःपुष्पं सत्यपुष्पं भावपुष्पं तथाष्टमम्॥'
(**शिवपूजास्तवव्याख्यायाम्** पृ० ३३);
'अहिंसेन्द्रियनिग्रहक्षमादानज्ञानतपस्सत्यभाव-रूपैरष्टभिः पुष्पैरभ्यर्चयेत्।'
(**शिवार्चनचन्द्रिकायाम्** पृ० २९)

[1]द्विकर्णिबकपुष्पं च कुशपुष्पं कदम्बकम् ॥५६॥
[2]लक्ष्मीपुष्पं महाद्रोणं [3]भद्री चैव महा तथा।
[4]अतसी जातिपुष्पं च काशपुष्पं [5]च लोध्रकम् ॥५७॥
[6]विषकासीसकुसुमं [7]करवीरं तथैव च।
सुश्वेता [8]गिरिकर्णी च सात्त्विकानि विनिर्दिशेत् ॥५८॥

[9][राजसानि पुष्पाणि]

करवीरं रक्तपद्मं पाटली बृहती तथा।
रक्तोत्पल च [10]धुत्तूरं पट्टिकाषाढमेव च ॥५९॥
रक्ताशोकं च मन्दारं वैजिका मौसली तथा।
व्याघ्री च रक्तागस्त्यं च रक्तार्कं च कदम्बकम् ॥६०॥
भूपाटली च लक्ष्मी च राजसानि विनिर्दिशेत्।

[11][मिश्रितानि पुष्पाणि]

चम्पकं करवीरं च कर्णिकारं च [12]धुत्तुरम् ॥६१॥
मौसली केतकी चैव [13]शौनक्यं च शमी तथा।

---

[1] द्विकर्णबक० — ज.
[2] लक्ष्मिपुष्पं — ज.
[3] अत्र 'महाभद्री तथैव च' इति पाठश्चेत्सुष्ठु।
[4] अतसिजाति० — ज.
[5] कदम्बकम् — ज.
[6] विषकासीच — ज.
[7] भद्राश्चैव महा तथा — ज.
[8] गिरिकर्ण — ज.
[9] 'रक्तपद्मं पलाशं च रक्तोत्पलं च पाटली।
मौसली चैव धुत्तूरं बृहती करवीरकम् ॥
व्याघ्री च रक्तमन्दारं पट्टिका वैजिका तथा।
रक्तान्येतानि पुष्पाणि राजसानि विनिर्दिशेत् ॥'
(**पूर्वकारणे**, ३१, ५९, ६०);
'रक्तोत्पलं तथा पद्मं बृहती धुत्तूरपाटलम्।
एवमादीनि पुष्पाणि राजसानि विनिर्दिशेत् ॥'
(**दीप्ते**, २६.१४ उ०, १५ पू०);
'रक्तोत्पलं तथा पद्मं बृहती धुत्तूरकं तथा।
पाटली रक्तपुष्पाणि राजसानि विनिर्दिशेत् ॥'
(**सुप्रभेदे** क्रियापादे ७.१४);
'रक्तोत्पलं तथा पद्मं धुत्तूरं बृहतीद्वयम्।
पलाशपाटलादीनि राजसानि विनिर्दिशेत् ॥'
(**सकलागमसारसंग्रहे** पृ० ९१)
[10] धुर्धुरं — ज.
[11] 'शौनक्यं कर्णिकारं च चम्पकं हेमधुत्तुरम्।
आरग्वधं च कोरण्डं शैर्या च गिरिकर्णिका ॥
एतानि मिश्रपुष्पाणि'
(**पूर्वकारणे** ३१.६१, ६२ पू०);
'कर्णिकारं च धुत्तूरं सरलारग्वधं तथा।
एवमादीनि पीतानि मिश्रकाणि विनिर्दिशेत् ॥'
(**सुप्रभेदे** क्रियापादे ७.१५)
[12] धुर्धुरम् — ज.
[13] शौनाख्यं — ज.

शङ्खिन्नी चैव कोरण्डं [1]कुसुम्भकुसुमानि च ॥६२॥
महेशाना [2]भृङ्गमिति मिश्रितानि विनिर्दिशेत् ।

[3][तामसानि पुष्पाणि]

नीलोत्पलं च [4]सिन्धु स्याद्गिरिकर्णी च[5] वैष्णवी ॥६३॥

[6][सात्त्विकादिपुष्पफलम्]

तामसानि; समाख्यातं सात्त्विकं मोक्षकारणम् ।
राजसं श्रीप्रदं ज्ञेयं [7]मिश्रितं द्वयसिद्धिदम् ॥६४॥
तामसं पुष्टिदं ज्ञेयं पुत्रपौत्रसमृद्धिदम् ।

[8][पत्राणि]

शमी बिल्वमपामार्गं [9]कुशं दूर्वा सहा तथा ॥६५॥
नागनन्दि रुद्रनन्दि द्रोणपत्रद्वयं तथा ।
तुलसी [10]चक्रबिल्वं च [11]लक्ष्मीश्चन्द्रपतिस्तथा ॥६६॥
भूपद्मं चूतपत्रं च हरिताङ्कोलपत्रकम् ।
मल्लिका करवीरं च रविपत्रद्वयं तथा ॥६७॥
जम्बू[12]पत्रं कदम्बं च जातिपत्रं तथैव च ।
मुनिपत्रद्वयं चैव कदलीपत्रमेव च ॥६८॥
[13]आषाढं कृष्णतुलसी नीलकर्णी [14]हली तथा ।
गिरिकर्णिद्वयं चैव [15]दान्तं च हरिबेरकम् ॥६९॥
[16]कोरण्डं सैर्यकं चैव [17]भद्रवल्ली तथैव च ।

---

[1] कुसुम्ब — ज.
[2] भृङ्ग इत्येते — ज.
[3] 'कृष्णवर्णानि पुष्पाणि तामसानि विनिर्दिशेत् ।' (**दीप्ते** २६.१७ पू०)
[4] शैधी स्या० — ज.
[5] ०कर्ण च — ज.
[6] 'मोक्षदं सात्त्विकं चैव पौष्टिकं राजसं तथा ॥
मिश्रपुष्पाणि सिद्धचर्थं पत्रं पुत्रविवर्धनम् ॥' (**पूर्वकारणे** ३१.६२ उ०, ६३ पू०)
[7] मिश्रिका — ज.
[8] 'बिल्वपत्रं तपस्वी च महपत्री च धातकी ।
अपामार्गं कुशं दूर्वा पञ्चबिल्वं शमी तथा ॥
तुलसी चम्पकं चैव जम्बुकं नागनन्दिका ।
एकपत्रारविन्दं च विष्णुक्रान्तिस्तथैव च ॥'
'पत्रजातिषु सर्वासु बिल्वपत्रं विशिष्यते ।'
(**पूर्वकारणे** ३१.६३ उ०–६५ पू०, ६६ उ०);
एतस्मिन्विषये पुनः **अजिते** २२.४३ उ०–४७ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[9] कुशदूर्वा — ज.
[10] चक्रबिल्वी – ज.
[11] लक्ष्मी चन्द्रपती तथा — ज.
[12] ०पत्रकदम्बं — ज.
[13] आषाढकृष्ण० — ज.
[14] सळितथा — ज.
[15] दानन्दं च थिरिबेरिका — ज.
[16] कोरण्डशर्यकं — ज.
[17] भद्रवल्लि — ज.

पत्रजातिषु [१]सर्वासु बिल्वपत्रं विशिष्यते ।।७०।।
बिल्व[२]पत्रस्य चालाभे तस्य मूलेन पूजयेत् ।

[३][निर्माल्यदोषहीनं पुष्पम्]

पुष्पजातिषु [४]सर्वासु करवीरं विशिष्यते ।।७१।।
तस्य मध्ये [५]स्थितो देवो लिङ्गपीठप्रकारतः ।
तत्पुष्पं हेमपुष्पं च [६]पूजयेद् वत्सरायुतम् ।।७२।।
निर्माल्यं न भवेत्तत्र इति शास्त्रस्य [७]निश्चयः ।
पूजान्ते तु समादाय क्षालयेद्धृदयेन तु ।।७३।।
प्रोक्षयेत्पुरुषेणैव पूजयेत्तु पुनः पुनः ।

[८][वर्ज्यानि पुष्पाणि]

करञ्जं [९]बन्धुकुसुमं [१०]विभीतं चैव किंशुकम् ।।७४।।
महालक्ष्मि मधूकं च शिरीषं [११]जपदाडिमम् ।
कुमुदं माधवी चैव [१२]त्रुटिमन्दारधानिकम् ।।७५।।

---

[१] सर्वेषां — ज.

[२] ०पत्रालाभे तु — ज.

[३] पुष्पजातिषु सर्वासु करवीरं विशिष्यते ।
तत्पुष्पं हेमपुष्पं च निर्माल्यं न भवेत्सदा ।।'
(**पूर्वकारणे**, ३१. ६७);
'अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते ।
तस्य मध्यस्थितो देवो लिङ्गपीठप्रकारतः ।।
तत्पुष्पं हेमपुष्पं च पूजायां वत्सरेऽयुतम् ।
निर्माल्यं न भवेत्तस्य इति शास्त्रस्य निश्चितम् ।।'
(**सकालागमसारसंग्रहे** पृ० ८९)

[४] सर्वेषां — ज.

[५] स्थितं देवं लिङ्गपीठं — ज.

[६] पूजायां वत्सरैर्युतम् — ज.

[७] निश्चयम् — ज.

[८] 'अतिपक्वमपक्वं च मुकुलं च विसर्जयेत् ।
केशकीटोपविद्धं च लूतासूत्रवृतानि च ।।
स्वयंपतितपुष्पाणि संचितान्यपि वस्त्रके ।
एरण्डपत्रकानीतं करानीतमथापि वा ।।
अशुचिस्थानकानीतं रोगार्तापहृतान्यपि ।
एकाहोषितपुष्पाणि वर्जयेत्तु विशेषतः ।।
(**पूर्वकारणे**, ३१, ७४–७६);
'केतकी माधवी चैव कुन्दयूथी मदन्तिका ।
शिरीषमर्जबन्धूककुसुमानि विवर्जयेत् ।।'
कीटकेशोपविद्धानि शीतपर्युषितानि च ।
स्वयंपतितपुष्पाणि त्यजेदुपहतानि च ।।
मुकुलैर्नार्चयेत्'
(**शिवधर्मे** पूर्वे (टि. ३२) पृ० ३२, ३३);
एतस्मिन्विषये पुनः **अजिते** २२.५० उ०–५३ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[९] बद्धुकुसुमं — ज.

[१०] विहितं चैव किंशुकः — ज.

[११] 'जपा'इत्यस्य 'जप' इति ह्रस्वान्ततया प्रयोगो वृत्तार्थ इति भाति ।

[१२] धृटिमन्दारधानिका — ज.

[1]मदयन्ती च शिग्रुश्च पुष्पाण्येतानि वर्जयेत् ।
अपक्वमतिपक्वं च [2]लूतसूत्रावृतानि च ॥७६॥
[3]केशकीटापविद्धानि [4]दुर्देशे संस्थितानि च ।
एकाहोषितपुष्पाणि संचितान्यपि वस्त्रके ॥७७॥
स्वयंपतितपुष्पाणि वर्जयेत्तत्प्रयत्नतः ।

[5][प्रातरादिकालेषु देयानि पुष्पाणि]

श्वेताम्बुजं च शुक्लार्कमागस्त्यं[6] चैव मालतीम्[7] ॥७८॥
नन्द्यावर्तं श्रियावर्तं पुन्नागं चैव पट्टिकाम्[8] ।
[9]द्विकर्णीं चैव लक्ष्मीं च वकुलं [10]पाटलीं तथा ॥७९॥
[11]वैजिकं च पलाशं च अशोकं [12]शङ्खिनीं तथा ।
कदलीकुसुमं चैव प्रातः[13]काले तु दापयेत् ॥८०॥
करवीरं रक्तपद्मं पाटली बृहती तथा ।
द्रोणपुष्पद्वयं चैव उत्पलं पद्मपुष्पकम् ॥८१॥
[14]धुत्तूरं चैव कोरण्डं [15]मध्याह्ने तु प्रदापयेत् ।
[16]भद्री चैव [17]महाभद्री मल्लिका मालती तथा ॥८२॥
शङ्खिनीपुष्पकुरवं [18]शमीपुष्पं च मौसली[19] ।
अतसी बहुकर्णी च [20]दापयेत्तु प्रदोषके ॥८३॥

---

[1] मदयाक्षी च शिग्रुं च — ज.
[2] वालुसूत्रविधानि च — ज.
[3] केशक्रीडोपतीर्थानि — ज.
[4] दुर्दिशे — ज.
[5] 'नन्द्यावर्तं श्रियावर्तं श्वेतार्कं श्वेतपङ्कजम् ।
पुन्नागं पट्टिकाषाढं मालतीमुदये ददेत् ॥
पङ्कजं बृहतीव्याघ्रीव्याघातं करवीरयुक् ।
उत्पलं पाटलीद्रोणं मध्याह्ने तु प्रदापयेत् ॥
चम्पकं वैजिकापत्रीधुत्तूरं बहुकर्णिकाम् ।
मालतीं मल्लिकां चैव दापयेत्तु प्रदोषके ॥
जातीनीलोत्पलं चैव बिल्वपत्रं कदम्बकम् ।
द्विकर्णीं चैव भद्रं च अर्धयामे प्रदापयेत् ॥
अन्यपुष्पाणि सर्वाणि अन्यसंध्यासु दापयेत् ।'
(**पूर्वकारणे** ३१. ६९ उ०–७३) ;
एतस्मिन्विषये पुनः **अजिते** २२. ४८–५० पू० श्लोकाः, **रौरवे** क्रियापादे १.६. ७ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[6] शुक्लार्कमरगस्त्वं — ज.
[7] मालति — ज.
[8] पट्टिका — ज.
[9] द्विकर्णि चैव लक्ष्मी — ज.
[10] पाटली — ज.
[11] वैदिका — ज.
[12] शङ्खनी — ज.
[13] काले ददापयेत् — ज.
[14] धूर्धूरं — ज.
[15] माध्याह्ने — ज.
[16] भद्रि — ज.
[17] महाभद्रि — ज.
[18] शमि — ज.
[19] मौमलि — ज.
[20] अत्र 'एतानि पुष्पाणि' इत्यध्याहृत्य व्याख्येयम् ।

जातिनीलोत्पलं चैव दान्तं बिल्वस्य पत्रकम् ।
केतकीं पृथिवीपद्ममर्धयामे प्रदापयेत् ॥८४॥
उक्तानि सर्वपत्राणि सर्वसंध्यासु दापयेत् ।
[1]उत्तमारामपुष्पाणि मध्यमं वनपुष्पकम् ॥८५॥
अधमं चैव [2]विक्रीतं [3]याचितं निष्फलं भवेत् ।
उग्रगन्धं च निर्गन्धं पत्रपुष्पं विसर्जयेत् ॥८६॥
पुष्प[4]शुद्धिः समाख्याता; द्वारपूजाविधिं शृणु ।

[5][द्वारपूजा, तत्र सामान्यविधिः]

द्वारोर्ध्वे दक्षिणे विघ्नं तस्य वामे तु [6]वाक्पतिम् ॥८७॥
द्वारस्य सव्यपार्श्वे तु जाह्नवीं संप्रपूजयेत् ।
यमुनां तस्य वामे तु द्वाराग्रे वृषभं न्यसेत् ॥८८॥
कवाटे दक्षिणे वामे विमलं च सुबाहुकम् ।
तयोर्मध्ये यजेल्लक्ष्मीं [7]तस्याधः पृथिवीं न्यसेत् ॥८९॥
ज्ञानशक्तिं [8]यजेत्सव्ये क्रियाशक्तिं तु वामके ।
एवं सामान्यमाख्यातं विशेषमधुना शृणु ॥९०॥

---

[1] 'आत्मारामोद्भवैः पुष्पैरथवा वनसंभवैः ।
द्रव्यक्रीतैः प्रसूनाद्यैरर्चयेदन्यथा न च ॥'
(**पूर्वकामिके**, ५, ६५);
'पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥
आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवम् ।'
(**शिवधर्मे** पूर्वे (टि. ३२) ५.६९, ७० पू०);
उत्तमारामपुष्पाणि मध्यमं वनसंभवम् ।
अधमं विक्रयं चैव याचकं निष्फलं भवेत् ॥
(**सकलागमसारसंग्रहे** पृ० ८९);
'उत्तमं त्वारामपुष्पं' इति पाठश्चेत्सुष्ठु ।

[2] विक्रयं चैव — ज.

[3] याचकं — ज.

[4] ०शुद्धिसमाख्यातं — ज.

[5] 'विघ्नेश्वरं समभ्यर्च्य फलभक्ष्यादिकं ददेत् ।
वृषभं पूजयेत्पश्चाद्द्वारदेवान्समर्चयेत् ॥
तस्यैव वामपार्श्वे तु वाग्देवीं च प्रपूजयेत् ।
तयोर्वामे महालक्ष्मीं द्वारदक्षिणपार्श्वयोः ॥
नन्दिं गङ्गां समभ्यर्च्य वामपार्श्वे विशेषतः ।
महाकालं च यमुनां समभ्यर्च्य कवाटयोः ॥
विमलं च सुबाहुं च भुवङ्गं च पतङ्गकम् ।
ऊर्ध्वेऽधः संप्रपूज्याथ शिवास्त्रं संप्रपूजयेत् ॥
धूपान्तं वाथ दीपान्तं हविष्यान्तं यजेत्ततः ।'
(**सूक्ष्मे** ५.३५–३९ पू०);
एतस्मिन्विषये **अजिते** २०.१२०–१२४ श्लोकास्तदीयटिप्पणी, **रौरवे** क्रियापादे १०.१४–१७ पू० श्लोकाश्च द्रष्टव्याः ।

[6] वाक्पतिम् सरस्वतीम्; वाग्देवीम् इत्यर्थे प्रयुक्त इति भाति ।

[7] तस्याथ — ज.

[8] यजेत्सर्वे — ज;
'श्रीदेवीमूर्ध्वभागे तु भूमिदेवीं यजेदधः ।
ज्ञानशक्तिं क्रियाशक्तिं गर्भद्वारे प्रपूजयेत् ॥'
(**मकुटे** ४, १९३);
'अभ्यन्तरगृहद्वारं शक्तिद्वारमिति स्मृतम् ।
दक्षिणे ज्ञानदा शक्तिर्धर्मदा चैव चोत्तरे ॥'
(**सुप्रभेदे** क्रियापादे ३९.१२)

[1][द्वारपूजायां विशेषः]

प्राग्द्वारे दक्षिणे भागे नन्दिनं संप्रपूजयेत् ।
कालं संपूजयेद्वामे तन्मन्त्रेणैव देशिकः ॥९१॥
नीलवर्णसमायुक्तं [2]वेत्रहस्तसमन्वितम् ।
[3]नन्दीशं संयजेत्पश्चाद्रक्तवर्णसमन्वितम् ॥९२॥
कालं परशुसंयुक्तं सर्वाभरणभूषितम् ।
दक्षिणद्वारसव्ये तु अनन्तं संयजेद्बुधः ॥९३॥
तप्तकाञ्चनवर्णाभं वज्रहस्तसमन्वितम् ।
वामभागे पशुपतिं शक्तिहस्तोग्रलोचनम् ॥९४॥
नीलवर्णसमायुक्तं सर्वाभरणभूषितम् ।
पश्चिमद्वारहर्म्ये तु दण्डिनं सव्यभागके ॥९५॥
पूजयेदिन्द्रचापाभं खड्गहस्तोग्रदंष्ट्रकम् ।
वामभागे मुण्डिनं तु भिण्डिपालायुधं तथा ॥९६॥
शुभ्रकुन्देन्दुवर्णाभं सर्वाभरणभूषितम् ।
उत्तरद्वारे विजयं शूलहस्तसमन्वितम् ॥९७॥
इन्द्रगोपनिभं सव्ये पूजयेदथ वामके ।
भृङ्गवर्णं तु भृङ्गीशं क्षुरिकायुधहस्तकम् ॥९८॥
यथाक्रमेण संयुज्य गन्धपुष्पादिनार्चयेत् ।

[4][अग्रमण्डपप्रवेशः, घण्टाताडनं च]

सद्योजातं समुच्चार्य प्रविश्येशाग्रमण्टपम् ।

---

[1] तत्पूर्वद्वारपालौ तु नन्दी कालस्तथैव च ।
नन्दीशः श्यामवर्णस्तु दण्डहस्तस्त्रिभङ्गयुक् ॥
कुङ्कुमाभो महाकालः परशुश्चायुधस्तथा ।
अनन्तेशः पशुपतिर्दक्षिणद्वारपालकौ ॥
अनन्तो रक्तवर्णस्तु वज्रायुधसमन्वितः ।
पशुपतिर्नीलवर्णस्तु शक्तिहस्तोग्रलोचनः ॥
पश्चिमद्वारपालौ च दण्डिमुण्डीशसंज्ञकौ ।
दण्डी सुरेन्द्रचापाभः खड्गहस्तोग्रदंष्ट्रकः ॥
मुण्डी कुन्देन्दुवर्णाभो भिण्डिपालायुधस्तथा ।
विजयश्चैव भृङ्गीशश्चोत्तरद्वारपालकौ ॥
भृङ्गीशो भृङ्गवर्णस्तु क्षुरिकायुधहस्तकः ।
विजयश्चेन्द्रगोपाभः शूलहस्तो भयंकरः ॥
(**सुप्रभेदे** क्रिया० (टि० ३६.) ३९.१५–२०);
एतद्विषये पुनः **रौरवे** क्रियापादे ३२.६ उ०–१६ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[2] वेरहस्त० — ज.

[3] ९२ श्लोकस्योत्तरार्धप्रभृति ९८ श्लोकपर्यन्तं 'ज' मातृकायां
'विजयं पश्चिमे भागे रक्तवर्णसमन्वितम् ।
दण्डशूलसमायुक्तं सर्वाभरणभूषितम् ।
पश्चिमद्वारहर्म्ये तु आनन्दं संयजेद्बुधः ।
तप्तकाञ्चनवर्णाभं वज्रहस्तसमन्वितम् ।
पूर्वभागे तु विजयं वज्रहस्तसमन्वितम् ।'
इति पाठो दृश्यते । सुप्रभेदागममनुसृत्यात्र पाठः साधितः ।

[1]**वास्तोष्पतेति मन्त्रेण ऐशान्यां वास्तुदैवते**[2] ॥९९॥
गन्धपुष्पं बलिं दत्त्वा महाघण्टां प्रताडयेत् ।
स्नानारम्भे तदन्ते तु[3] **अर्चनान्ते निवेद्यके**[4] ॥१००॥
होमान्ते चोत्सवान्ते तु नृत्तान्ते घोषयेत्क्रमात् ।
घण्टायास्तु ध्वनिं श्रुत्वा राक्षसानां विनाशनम् ॥१०१॥

[5][स्थानशुद्धिः]

स्थानशुद्धिं ततः कृत्वा गोमयेनोपलेपयेत् ।
तन्मध्ये [6]**वसुधां** [7]**यष्ट्वा दिग्बन्धं चास्त्रमन्त्रतः**[8] ॥१०२॥
स्थानशुद्धिरिति[9] **ख्याता'**

---

[1] वास्तोष्पतीं च मन्त्रेण — ज; **तै० संहिता** ३.४.१०.१.

[2] ०दैवतं — ज; 'वास्तुदेवताविषये' इत्यर्थः ।

[3] ०रम्भाकृतान्तेन — ज.

[4] निवेदयेत् — ज.

[5] 'एवं द्वारार्चनं कृत्वा पश्चान्मण्टपमर्चयेत् ।
वास्तोष्पतेति मन्त्रेण ऐशान्यां वास्तुदेवताम् ॥
संपूज्य गन्धपुष्पाद्यैर्महाघण्टां प्रताडयेत् ।
मणीनां वासवो देवः सूचयः सोमदेवताः ॥
विदध्यादर्चनाकाले घण्टानां तु महाध्वनिम् ।
तेन शब्देन महता राक्षसानां विनाशनम् ॥'
(**मकुटे** ४.१९४–१९६);
'घण्टां तु ताडयेत्तत्र पाणिघातत्रयेण तु ।
सद्योजातं समुच्चार्य अर्धमण्टपमाविशेत् ॥
यवनिकां परित्यज्य गर्भद्वारसमन्विताम् ।
स्थाणुमन्त्रं जपित्वा तु गर्भगेहं विशेद्बुधः ॥
(**सूक्ष्मे** ५.३९ उ०–४१ पू०);
यक्षराक्षसपैशाचदानवा ब्रह्मराक्षसाः ।
देवसान्निध्यपूजार्थं गच्छन्ति मणिशब्दतः ॥
आवाहने च पूजान्ते पूजारम्भे विसर्जने ।
अर्घ्ये विलेपने स्नाने दीपे गन्धाभिषेचने ॥
अभिषेके च धूपे च नैवेद्ये बलिकर्मणि ।
अन्येषु सर्वकार्येषु महाघण्टां प्रताडयेत् ॥'
(**पूर्वकारणे** ३०, १८८ उ०–१९१ पू०);
'स्नानादौ च तदन्ते च ह्यर्चनान्ते तथैव च ।
नैवेद्यादौ चोत्सवादौ तदन्ते नर्तनान्तके ॥
एवमादिषु कालेषु महाघण्टां तु ताडयेत् ।'
(**नित्यपूजालक्षणसंग्रहे** पृ० ७०)

[6] वसुधा — ज.

[7] यष्ट्वा — ज; 'इष्ट्वा' इत्यस्य 'यष्ट्वा' इति प्रयोगः **अजिते** क्रियापादे १८.१२९ श्लोके दृश्यते ।

[8] ०मन्त्रकम् — ज.

[9] ख्यातं — ज.

'स्थानशुद्धिं शृणुष्व ह ।
प्रोक्षयेदस्त्रमन्त्रेण सामान्यार्घ्यजलेन च ॥
मूलं नेत्रत्रयं न्यस्य दिव्यदृष्ट्यावलोकयेत् ।'
(**अचिन्त्यविभ्वसादाख्ये** १२.१२३, १२४ पू०);
'स्थानशुद्धिमथाचरेत् ।
तालमुद्रात्रयं कृत्वा प्राकारं हेतिना स्मरेत् ॥
तद्बहिः परिघां न्यस्त्वा कवचेनैव मन्त्रतः ।
अस्त्रजालं तु तद्बाह्ये न्यसेद्विघ्नापनुत्तये ॥
दिव्यं धाम विचिन्त्याथ'
(**पूर्वकामिके** ४.२००–२०२ पू०);
एतद्विषये पुनः **अजिते** २०.१०८ उ०–११० पू० श्लोकास्तदीयटिप्पणी, **रौरवे** क्रियापादे १०.६ उ०, ७ पू० श्लोकश्च द्रष्टव्याः ।

[1][द्रव्यशुद्धिः]

[2]पाद्याचमनपात्रकम् ।
अर्घ्यपात्रं शरावं च शङ्खं भाण्डं च क्षालयेत् ॥१०३॥
निरीक्ष्य हृदयेनैव कवचेनावकुण्ठयेत् ।
वस्त्रपूतेन तोयेन वर्धनीं च प्रपूरयेत् ॥१०४॥
पञ्चब्रह्मषडङ्गैश्च शिवमन्त्रेण तज्जलम् ।
धेनुमुद्रां दर्शयित्वा सर्वपात्राणि प्रोक्षयेत् ॥१०५॥
[3]यववेणूंस्तथा दूर्वाः [4]कुशांश्चैव शिवाम्भसा ।
पाद्यादिसर्वपात्राणि [5]साधयेत्तु विचक्षणः ॥१०६॥

[6][पाद्यम्]

चन्दनं कुङ्कुमं तोयमुशीरं शुक्लसर्षपः[7] ।
[8]यवो वेणुस्तथा दूर्वा उत्तमं पाद्यमुच्यते ॥१०७॥
यवसिद्धार्थ[9]दूर्वं च चन्दनोशीरसंयुतम् ।
मध्यमं पाद्यमेवं स्यादुशीरं चन्दनं जलम् ॥१०८॥
कन्यसं पाद्यमित्युक्तं प्रत्येकं [10]धारणं [11]पलम् ।

---

[1] 'शरावं पाद्यपात्रं च शङ्खमाचमनीयकम् ।
जलभाण्डं वर्धनीं च पुष्पपात्रार्घ्यपात्रके ॥
अस्त्रेण क्षालयेद्धीमान्निरीक्ष्य हृदयेन तु ।
कवचेनावकुण्ठ्याथ तेनैवोन्मीलनं कुरु ॥
वर्धनीं शङ्खकेनैव पूरयेत्तु शिवाम्भसा ।
पञ्चब्रह्मषडङ्गानि तोयमध्ये तु विन्यसेत् ॥
पिधाय दक्षहस्तेन दशबीजं न्यसेत्ततः ।
दर्शयेल्लिङ्गमुद्रां तु पद्ममुद्रां प्रदर्शयेत् ॥
पात्राणि च हृदा प्रोक्ष्य शङ्खतोयेन सर्वशः ।
क्षीरं दधि घृतादीश्च गन्धं पुष्पं च धूपकम् ॥
वर्धनीतोयमादाय प्रोक्षयेत्पुरुषेण तु ।
द्रव्यशुद्धिर्भवेदेवम्'
(**पूर्वकारणे** ३०.१४७–१५२);
एतस्मिन्विषये पुनः **अजिते** २०.११२–११६ पू० श्लोकास्तदीयटिप्पणी, **रौरवे** क्रियापादे १०.७.८ पू० श्लोकश्च द्रष्टव्याः ।

[2] यववेणुस्तथा — ज.

[3] कुशेनैव — ज.

[4] सादयेत्तु — ज.

[5] 'पाद्यादीनां विधिं शृणु ।
सिद्धार्थं चन्दनोशीरं कुङ्कुमं भस्ममिश्रितम् ॥
पाद्यमुत्तममित्युक्तमुशीरं चन्दनं तथा ।
दूर्वासिद्धार्थकं चापः पाद्यं मध्यममुच्यते ॥
चन्दनोशीरसंमिश्रमम्भः कन्यसमुच्यते ।
द्रव्याणां च प्रमाणेन निष्कं चोत्तममुच्यते ॥
तस्यार्धं मध्यमं प्रोक्तं तदर्धं कन्यसं भवेत् ।
पाद्यद्रव्यमिदं प्रोक्तम्' (**सूक्ष्मे** ४.२६–२९);
एतस्मिन्विषये **अजिते**, २२, २३ उ०, २४ पू० श्लोकस्तदीयटिप्पणी च द्रष्टव्यौ ।

[6] ०सर्षपम् — ज.

[7] यववेणु० — ज.

[8] ०दूर्वा च — ज.

[9] धारणं — परिमाणविशेषः 'धारणं माषविंशतिः' **पूर्वकारणे** ३१.४१ उ०.

[10] फलम् — ज.

तदर्धमधमं प्रोक्तं [१]तदर्धं कन्यसं भवेत् ॥१०९॥

[२][आचमनीयकम्]

एलालवङ्गकर्पूरं [३]मुरा तोयमुशीरकम् ।
सर्वं जातिफलैर्युक्तं श्रेष्ठमाचमनीयकम् ॥११०॥
लवङ्गं चैव कर्पूरं [४]त्रुटिजातिमुरं जलम् ।
[५]मध्यमाचमनीयं [६]स्यात्त्रुटिभस्म तथा जलम् ॥१११॥
लवङ्गेन समायुक्तं कन्यसाचमनं स्मृतम् ।
एतेषां तु प्रमाणं तु प्रागुक्तविधिना कुरु ॥११२॥

[७][अर्घ्यम्]

तिलव्रीहिकुशाग्रैश्च [८]आपःक्षीरयवैस्तथा ।
तण्डुलैः सर्षपोपेतमर्घ्यमष्टाङ्गमुच्यते ॥११३॥
[९]तण्डुलो यवसिद्धार्थमाढकी[१०] शालिसंयुतम् ।
[११]मध्यमर्घ्यमिदं प्रोक्तं शालितण्डुलतोयकम् ॥११४॥
कन्यसार्घ्यमिदं प्रोक्तं प्रमाणं [१२]पूर्ववत्कुरु ।
द्रव्यालाभे तु तोयं च चन्दनं [१३]च कुशैः सह ॥११५॥
[१४]पाद्यादीनां त्रयं कल्प्य [१५]क्लृप्तपात्रेषु बुद्धिमान् ।

---

[१] तदर्थ — ज.

[२] 'त्रुटितिम्बुलवङ्गकम् ।
उशीरं जातिकर्पूरं मुरमम्भोविमिश्रितम् ॥
श्रेष्ठमाचमनं प्रोक्तमेलाजातिलवङ्गकम् ।
मुरं कर्पूरतोयेन युक्तं मध्यममाचमम् ॥
एलाभस्मलवङ्गं च कन्यमाचमनं स्मृतम् ।
एषां द्रव्यप्रमाणं तु पूर्ववन्मुदीरितम् ॥'
(**सूक्ष्मे** ४.२९ उ०–३२ पू०);
एतस्मिन्विषये पुनः **अजिते** २२.२४ उ०–२६ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[३] मुरं — ज.

[४] तट्जाति — ज.

[५] 'मध्यमं' इत्यत्र मध्यमिति प्रयोगो वृत्तार्थ इति भाति ।

[६] स्यात्तटिभस्मं — ज.

[७] आपःक्षीरकुशाग्रैश्च तण्डुलैरक्षतैर्यवैः ।
सिद्धार्थैश्च तिलैर्युक्तमर्घ्यमुत्तममुच्यते ॥
सर्षपैर्यवशाल्यद्भिस्तण्डुलैर्मध्यमर्घ्यकम् ।
तण्डुलैर्यवशाल्यद्भिरर्घ्यं कन्यसमुच्यते ॥
एतद्द्रव्यप्रमाणं तु पूर्वोक्तविधिवद्ग्रहेत् ।
(**सूक्ष्मे** ४.३२ उ०–३४);
एतस्मिन्विषये पुनः **अजिते** २२.२६ उ०–२९ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[८] ०कुशाग्राणि — ज.

[९] तण्डुलं — ज.

[१०] ०माढकं — ज.

[११] 'मध्यमं' इत्यत्र मध्यमिति प्रयोगो वृत्तार्थः ।

[१२] पूर्ववत्कृतम् — ज.

[१३] कुशया सह — ज.

[१४] पाद्यादीनि त्रयं — ज.

[१५] कल्प्य पात्रेषु — ज; अत्र निक्षिपेदित्यध्याहार्यम् ।

[1][धूपः]

फलत्रयं तथा [2]भस्म कुङ्कुमं चन्दनं [3]घनम् ॥११६॥
पत्रलोहमुशीरं च भागान्वक्ष्ये[4] पृथक् पृथक् ।
व्योमपक्षाग्न्यश्वबाणान्[5] कौशिकं चैवमादरात् ॥११७॥
तस्मात्प्रोक्तात्क्रमाद्भागात्कृष्णचूर्णं तु कारयेत् ।
[6]शीतारिद्रव्यमेवोक्तं मधु प्लाव्याथ तेन तु ॥११८॥
उत्तमं धूपमाख्यातं शिवप्रीतिकरं भवेत् ।
चन्दनं चैव निर्यासं कृष्णलोहं क्रमेण तु ॥११९॥
अग्निपक्षैकभागं तु[7] किंचिद्धूस्मविमिश्रितम्[8] ।
मध्यमं धूपमाख्यातं गुग्गुलुघृतसंयुतम् ॥१२०॥
कन्यसं धूपमाख्यातं किंचित्कर्पूरमिश्रितम्[9] ।

[10][अर्घ्यादिविनियोगकालः]

आवाहनान्ते[11] पूजान्ते [12]विसर्जनेऽर्घ्यं प्रदापयेत् ॥१२१॥

---

[1] 'अगरु चैकभागं स्यान्निर्यासं द्विगुणं भवेत् ।
चन्दनं द्विगुणं हीषत्कृत्वा कर्पूरसंयुतम् ॥
शीतारि नाम धूपं तु मधुना च परिप्लुतम् ।
एवं धूपं वरं श्रेष्ठमुत्तमं धूपमिष्यते ॥
गुग्गुलुघृतसंयुक्तं मध्यमं धूपमिष्यते ।
कोष्ठं वा चन्दनं वापि मधुना घृतसंयुतम् ॥
अधमं धूपमेवोक्तं त्रिविधं धूपमिष्यते ।'
(**दीप्ते** २६.२३–२६ पू०);
एतस्मिन्विषये पुनः **अजिते**, २२, ५४,[*] ५५ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।

[2] भस्मं — ज.

[3] वनम् — ज; घनम्—कर्पूरम् ।

[4] भागाद्वक्ष्य — ज.

[5] ०पक्षानियश्वाणां — ज.

[6] शितारि — ज.

[7] भागानि — ज.

[8] ०द्धूस्मं विमिश्रकम् — ज.

[9] ०मिश्रकम् — ज.

[10] 'पुष्पदानार्घ्यपाद्येषु स्नाने चाचमने तथा ।
क्षालने प्रोक्षणे चैव वारि सप्तसु योजयेत् ॥
धूपं सर्वत्र दातव्यं शेषं ज्ञात्वा प्रयोजयेत् ।'
'अष्टपुष्पं त्रिगन्धं च सप्तवारि नियोजयेत् ।
आवाहनार्घ्यपाद्येषु स्नाने धूपे विलेपने ॥
नैवेद्ये च विसर्गे च पुष्पमष्टसु योजयेत् ।
अर्घ्ये विलेपने स्नाने त्रिषु गन्धं प्रकल्पयेत्' ॥
(**पूर्वकामिके** ४.४१२ उ०; ४१३; ४१५ उ०–४१७ पू०);
'आवाहने तु पूजान्ते विमर्जनविधौ तथा ।
अर्घ्यं दद्यात्तु मन्त्रज्ञस्त्रिषु कालेषु बुद्धिमान् ॥
अर्घ्ये विलेपने स्नाने त्रिषु गन्धं प्रयोजयेत् ।
आवाहनार्घ्यपाद्येषु स्नाने धूपे विलेपने ॥
नैवेद्ये च विसर्गे च पुष्पमष्टसु योजयेत् ।
आवाहनं विना सप्तकाले वारि सुयोजयेत् ॥'
(**सुप्रभेदे** क्रियापादे ८.१२०–१२२);
एतस्मिन्विषये पुनः **रौरवे** १०.५६–५९ श्लोका द्रष्टव्याः ।

[11] आवाहनेन — ज.

[12] विमर्जनार्घ्यं — ज.

अर्घ्ये विलेपने स्नाने [1]त्रिषु गन्धं सुयोजयेत् ।
[2]आवाहनार्घ्यपाद्येषु स्नाने धूपे विलेपने ।।१२२।।
नैवेद्ये च विसर्गे च पुष्पमष्टसु योजयेत् ।।
[3]तत्कालं तु विसृज्याथ [4]सप्तवारि नियोजयेत् ।।१२३।।
स्नानोदकं च पाद्यादि गन्धपुष्पनिवेद्यकम् ।
क्षीरं दधिघृतादीनि प्रोक्षयेत्तु शिवाम्भसा ।।१२४।।
द्रव्यशुद्धिर्भवेदेवं मन्त्रशुद्धिमथ शृणु ।

[5][मन्त्रशुद्धिः]

[6]ओंकारदीपिता मन्त्रा नमस्कारान्तयोजिताः ।।१२५।।
अर्चने तु प्रयोक्तव्या मन्त्राश्चामोघशक्तयः ।

[7][यवनिकाया आवश्यकता]

अस्त्रेणैव तु मन्त्रेण महाघण्टां प्रताडयेत् ।।१२६।।
[8]क्षिपेत्ततो यवनिकां ब्रह्ममन्त्रं समुच्चरन् ।

---

[1] त्रिधा — ज.

[2] १२२ उत्तरार्धं १२३ पूर्वार्धं च सुप्रभेदागममनुसृत्यात्र संघटितम् ।

[3] 'तत्कालः' इत्यनेन आवाहनकालो लक्ष्यते ।

[4] सप्तकालेषु वारि सप्तवारि मध्यमपदलोपिसमासः ।

[5] 'संग्राह्य वाच्छितं मौनं ततो मन्त्रान्विशोधयेत् ।
मालाद्यैश्चर्यजालानि मन्त्राणां कीर्तितानि वै ।।
तेषां प्रबोधिनी शक्तिः शिवाज्ञा ओं नमः स्मृताः ।
ओंकारादिनमोऽन्तांश्च पठेन्मन्त्रानशेषतः ।
बद्धपुष्पाञ्जलिर्भूत्वा शिवमद्भावभावितः ।
त्रिमात्रादिक्रमेणैव यावन्नादान्तिमं व्रजेत् ।।
मन्त्रशुद्धिर्भवेदेवम्'
(**पूर्वकामिके** ८.२२२–२२५ पू०) ;
एतस्मिन्विषये पुनः **अजिते** २०.११७ उ०. ११८ श्लोकस्तदीयटिप्पणी **रौरवे**. क्रियापादे १०. ११, १२ पू० श्लोकश्च द्रष्टव्याः ।

[6] १२५ उत्तरार्धं १२६ पूर्वार्धं च दीप्तागमस्थ-(२३.३७) श्लोकमनुसृत्यात्र संघटितम् ।

[7] 'अर्चनादिक्रियाकाले प्रच्छन्नपटमुत्तमम् ।
पापरोगी परिभ्रष्टो नास्तिकः शिवनिन्दकः ।।
वेदविक्रयकश्चैव ग्रन्थविक्रयकस्तथा ।
दुर्मुखश्च दुराचारो मूर्खश्च गुरुनिन्दकः ।।
पाषण्डः प्रतिलोमश्च शिवद्रव्यापहारकः ।
लिङ्गच्छेदी बृहद्वीजी सुरापायी च हेममुट् ।।
मातृहा पितृहा स्तेयी गुरुद्रव्यापहारकः ।
प्रविश्य दर्शनं कृत्वा पूजाया निष्फलं भवेत् ।।'
(**पूर्वकारणे** ३०.१९१ उ०–१९५)

[8] क्षिपेव्यवरिक्तमन्द्रमन्त्रेण — ज ;
अत्र 'ब्रह्ममन्त्रं' इति पाठः १८५ पूर्वार्धमनुसृत्य साधितः । ;
'अस्त्रमन्त्रं समुच्चार्य पटं तत्रावलम्बयेत् ।
हृदयेनैव मन्त्रेण पटं तत्रापनीय च ।।'
(टि० ३४. पृ० १६२)

वेदविक्रयकाश्चापि[1] तन्त्रविक्रयका अपि[2] ॥१२७॥
पापक्रूरपरिभ्रष्टनास्तिकाः[3] श्रुतिदूषकाः[4]।
दुश्चर्मकुष्ठसंयुक्ताः[5] शिवद्रव्यापहारिणः[6] ॥१२८॥
गुरुद्रव्यापहारी च गुरुरोगी च पातकी।
दुर्मुखश्च दुराचारो[7] मूर्खाश्च गुरुनिन्दकाः॥१२९॥
[8]कुनखाः कुब्जकाश्चैव गोलका एकचक्षुषः।
अङ्गहीनः सुरासेवी[9] वेश्यामिश्रणचारिणः[10] ॥१३०॥
[11]लिङ्गच्छेदकविच्छिन्नान्वर्जयेच्छिवदर्शने।
प्रमादाद्दर्शनं कृत्वा तत्पूजा निष्फला[12] भवेत् ॥१३१॥

[13][प्रच्छन्नपटकालः]

त्रिकालेषु पटं दत्वा स्नाने धूपे [14]तथोत्सवे।
शेषकालेषु सर्वेषु [15]पटं न परिवेष्टयेत् ॥१३२॥
अथवान्यप्रकारेण पटकालो[16] विशेषतः।
पूजाकाले तु नैवेद्ये[17] [18]पुष्पालंकरणे ततः ॥१३३॥
मुद्रादर्शनकाले तु हेमरत्नादियोजने[19]।
एव[20]मादिषु कालेषु प्रच्छन्नपटमारभेत् ॥१३४॥

[21][लिङ्गशुद्धिः पीठशुद्धिश्च]

लिङ्गं चतुर्विधं ज्ञात्वा शोधयेदस्त्रमन्त्रतः।

---

[1] कैश्चापि — ज.
[2] ०विक्रयकोपरि — ज.
[3] नास्तिकैः — ज.
[4] ०दूषकैः — ज.
[5] ०संयुक्तं — ज.
[6] ०हारिभिः — ज.
[7] दुराचारी — ज.
[8] कुनकाकुष्टकाश्चैव कोलका एकचक्षुषा — ज.
[9] ०हीनसुरासेव्यो — ज; अत्र 'एतान्' इत्यध्याहृत्य व्याख्येयम्।
[10] वेश्यमिश्रयचारिणा — ज.
[11] लिङ्गच्छेदनविच्छिन्नं शिवदर्शनवर्जयेत् — ज.
[12] निष्फलं — ज.
[13] 'द्वारपूजावसाने तु स्नानान्ते च निवेद्यके।
संध्यावसाने निक्षेप्यं प्रच्छन्नपटमुत्तमम्॥'
(**पूर्वकामिके** ४.२७९);
एतस्मिन्विषये पुनः **अजिते** २०.२६८–२६९ पू० श्लोकस्तदीयटीप्पणी, **रौरवे** क्रियापादे १०.६१ श्लोकश्च द्रष्टव्याः।
[14] ततोत्सवे — ज.
[15] पटेन — ज.
[16] पटकालं — ज.
[17] नैवेद्यं — ज.
[18] पुष्पालंकारयेत्ततः — ज.
[19] ०योजयेत् — ज.
[20] ०मादीनि काले तु — ज.
[21] 'लिङ्गं चतुर्विधं ज्ञेयं स्थावरं शास्त्रचोदितम्।
दैविकं चार्षकं चैव गाणपं मानुषं तथा॥'

प्रोक्षणं पुनराह्वानं [1]पुरश्चरणमेव हि ॥१३५॥
स्थापिते मानुषैर्लिङ्गे[2] सर्वकर्माणि कारयेत् ।
[3]ज्ञात्वा तु लिङ्गमाचार्यस्तल्लिङ्गं हृदयेन तु ॥१३६॥
लिङ्गं[4]पीठस्थलं सर्वं [5]शुद्धं कृत्वा शिवाम्भसा ।
शोधयेद्दैविकं लिङ्गं [6]स्थानजं हृदयेन तु ॥१३७॥
[7]आर्षं तु योगजं चैव [8]भूतजं चैव गाणपम् ।
मानुषं रत्नजं लिङ्गं बाणलिङ्गं विशेषतः ॥१३८॥
शोधयेदस्त्रमन्त्रेण शुद्धतोयेन देशिकः ।
लिङ्गस्य [9]मूर्धदेशे तु [10]पञ्चमेन तु संस्पृशेत् ॥१३९॥
लिङ्गस्य मुखदेशे तु नरमन्त्रेण संस्पृशेत् ।
लिङ्गपार्श्वे तु दक्षे स्यादघोरेण तु संस्पृशेत् ॥१४०॥
लिङ्गस्य वामपार्श्वे तु वामदेवेन संस्पृशेत् ।
पृष्ठान्तं संस्पृशेत्पादौ सद्योजातेन मन्त्रतः ॥१४१॥
उन्मनीमूलमन्त्रेण पीठशुद्धिं तु कारयेत् ।
[11]महापट्टैरुपानान्तं देव्यङ्गानि च संस्पृशेत् ॥१४२॥
लिङ्गं[12]शुद्धिः समाख्याता; पश्चात्संपूजयेद्गुरुम् ।

'प्रोक्षणं पुनराह्वानं पुरश्चरणमेव च ।
स्थापिते मानुषे लिङ्गे सर्वकर्माणि कारयेत् ॥
यल्लिङ्गमर्चयित्वा तु तल्लिङ्गं हृदयेन तु ।
पूजापर्युषितं तत्र गन्धाद्यैरर्चयेत्क्रमात् ॥
कनिष्ठानामिकाभ्यां तु पुष्पं संग्राह्य देशिकः ।
पूर्वमंध्यार्चितं पुष्पं विसृजेदीशमन्त्रतः ॥
अङ्गुष्ठतर्जनीभ्यां तु पीठपार्श्वे विसर्जयेत् ।
तत्पुष्पं दापयेत्पश्चात्महसा लिङ्गमूर्धनि ॥
लिङ्गमूर्धनि पुष्पेण शून्ये नश्यति साधकः ।
लिङ्गं प्रक्षाल्य शस्त्रेण पीठं पाशुपतास्त्रतः ॥
निर्माल्यशेषं तत्सर्वं चण्डेशाय प्रदापयेत् ।
लिङ्गपीठस्थलं चैव शोधयित्वा हृदाम्भसा ॥
गन्धपुष्पादिनाभ्यर्च्य लिङ्गं सर्वाङ्गमुच्चरन् ।
लिङ्गस्य मूर्ध्नि देशे तु स्पृशेदीशानमन्त्रतः ॥
लिङ्गस्य मुखदेशं तु तत्पुरुषेण संस्पृशेत् ।
लिङ्गस्य पार्श्वौ बाहुभ्यामघोरेण तु संस्पृशेत् ॥
लिङ्गस्य पृष्ठदेशे तु वामदेवेन संस्पृशेत् ।
पीठान्तं स्पर्शयेत्पादौ बाहुभ्यां सद्यमन्त्रतः ॥
महापट्टिकादुपानान्तं देव्यङ्गानि प्रपूजयेत् ।'
(**मकुटे** (टि० १९) ४.१९७; २२८ उ०–२३७);
एतस्मिन्विषये पुनः **अजिते** २०.१२९ उ० — १३९ श्लोकास्तदीयटिप्पणी, **रौरवे** क्रियापादे १०.८ उ०, ९ पू० श्लोकाश्च द्रष्टव्याः ।

[1] पुनश्चरण — ज.
[2] मानुषे लिङ्गे — ज.
[3] एवं लिङ्गं तु आचार्य — ज.
[4] ०पीठे मुलं सर्वं — ज.
[5] शुद्धि — ज.
[6] स्नानजं — ज.
[7] आर्षः योगजेनैव — ज.
[8] भूतजेनैव गाणवम् — ज.
[9] मूर्ध्नि देशे तु — ज.
[10] पञ्चमेन—ईशमन्त्रेण.
[11] महापट्टिद्विपानान्तं देव्याङ्गानि — ज.
[12] ०शुद्धिसमाख्यातं — ज.

[1][गुरुपूजा]

शिरोर्ध्वं कल्पयेत्पद्मं साष्टपत्रं सकर्णिकम् ॥१४३॥
स्वगुरुं पूजये[न्म]ध्ये तस्य शक्तिसमन्वितम् ।
तस्माद्गुरूपदेशेन [2]यजेद्देवं सदाशिवम् ॥१४४॥

[3][आसनकल्पनम्]

आसनं कल्पयेत्पश्चाच्छास्त्रदृष्टेन कर्मणा ।
शक्तिरेवासनं पूर्वं पद्मासनं ततः क्रमात् ॥१४५॥
ततोऽनन्तासनं पूर्वं सिंहासनमतः परम् ।
योगासनं तृतीयं स्या[4]दम्बुजं तु चतुर्थकम् ॥१४६॥
विमलं पञ्चमं ज्ञेयमुपर्युपरि कल्पयेत् ।

[5][अनन्तासनम्]

[6]**कन्दं हि पार्थिवं तत्त्वं सौवर्णं ब्रह्मदैवतम् ॥१४७॥**

---

[1] 'ऐशान्ये स्वगुरौ भक्त्या चासनं पूजयेत्ततः ।
ओं ह्रां गुं गुर्वासनाय नमश्चैव तु कल्पयेत् ॥'
(**अचिन्त्यविश्वसादाख्ये** १२.५२ उ०, ५३ पू०);
'मुख्यैशान्ये दक्षिणामुखं स्वगुरुं गुरुपादुकां वा गन्धादिषु वा शिवमन्त्रेण आवाहनादिजपान्तं पूजयित्वा स्वामिन् भवदुपदिष्टमार्गेण शिवं पूजयाम्यनुज्ञां देहीति प्रार्थयेत् ।'
(**क्रियादीपिकायां** पृ० ५६);
'गणेशं पीठवाय्व्यां गन्धपुष्पादिभिर्यजेत् ।
ऐशान्यां गुरुपङ्क्तीश्च पूजयेद्धृदयेन तु ॥'
(**पूर्वकामिके** ४.२८७)

[2] यष्ट्वा — ज.

[3] 'आसनं कल्पयेत्तत्र शिवासनं विधीयते ।
आधारमासनं लिङ्गमाधेयं परमः शिवः ॥
नादो लिङ्गमिति प्रोक्तं बिन्दुः पीठमुदाहृतम् ।
न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ॥
पुष्पेषु गन्धवज्ज्ञेयं तिलेषु तैलवत्तथा ।
देहेषु प्राणवच्छक्तिस्तस्माच्छक्तिं प्रपूजयेत् ॥
शक्तिरेवासनं प्रोक्तं पद्मानन्तादयः क्रमात् ।
पार्थिवाण्डमधः कन्दं नालं वह्न्यन्तमुच्यते ॥
ततोऽनन्तासनं प्रोक्तं सिंहासनं द्वितीयकम् ।
योगासनं तृतीयं तु चतुर्थं पद्मासनं भवेत् ॥
पञ्चमं विमलाख्यं तु पञ्चभूतात्मकं भवेत् ।
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले ३१६–३२१ पू०);
एतस्मिन्विषये पुनः **अजिते** २०.१४०–१५७ श्लोकास्तदीयटिप्पणी. **रौरवे** क्रियापादे १०.२० उ० – २६ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[4] ०दम्बुजार्थं चतुर्थकम् — ज.

[5] 'तृणवद्वायुना दृश्यं धार्यते जायते यया ।
साधारशक्तिर्न्यस्तव्या पूर्वं कूर्मशिलासने ॥
चन्द्रांशुनिर्मला सौम्या चतुर्वक्त्रा चतुर्भुजा ।
दुग्धाब्धिसदृशाकारा कल्पिता हृदयार्णगा ॥
अनन्तं नीलमंकाशमनेकफणमण्डितम् ।
हृदयेऽञ्जलिसंयुक्तमेकवक्त्रं चतुर्भुजम् ॥
क्षीराब्धितः समुत्पन्नमरोरुहसमाकृतिम् ।

अशेष[१]धात्रीपर्यन्तं नालाङ्कुरसमन्वितम् ।
आधारशक्तिमध्यस्थमनन्तं शुभमव्ययम् ॥१४८॥
[२]कुन्देन्दुवर्णां वरदां त्रिणेत्रां कोटीरभारामभयां भयघ्नाम् ।
पाशाङ्कुशाढ्यां[३]गजमध्यसंस्थामाधारशक्तिं [४]मह शक्तिमूलाम् ॥१४९॥
[५]अनन्तं वासुकिं चैव तक्षकं चाम्बुजं तथा ।
[६]महापद्मं शङ्खपालं [७]कार्कोटं गुलिकं तथा ॥१५०॥
पूर्वादीशानपर्यन्तं कल्पयेत्कल्पवित्तमः ।
सद्य[८]मन्त्रसमायुक्तं[९]मानन्तबीजसंयुतम् ॥१५१॥
अनन्ताद्यष्टसंयुक्तं तेनानन्तासनं भवेत् ।
अधस्तात्कल्पयेदूर्ध्वे सिंहासनं प्रकल्पयेत् ॥१५२॥

[१०][सिंहासनम्]

धर्मादि[११]चरणैर्युक्तं[१२]मधर्मादीलिकान्वितम् ।

तत्राधारे हृदा मन्त्री विन्यसेदासनात्मकम् ॥'
(**पूर्वकामिके** ४.२९१–२९४);
'वृत्ताकारमनन्तं च सूर्यकोटिप्रकाशकम् ।
अधस्तात्कल्पयेत्'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले श्लो० ३२१ उ०, ३२२ पू०);
'अनन्ताख्यासनं वक्ष्ये समाहितमनाः शृणु ।
धर्मयुक्तो वृषाकारो ज्ञानसिंहस्वरूपकः ॥
वैराग्यं पीतभूतं स्यादैश्वर्यं श्वेतकुञ्जरः ।
अनन्तासनपादादि पार्श्वयष्टिमथो शृणु ॥
अधर्माज्ञानावैराग्यमनैश्वर्यं च कल्पयेत् ।
राजावर्तनिभाः सर्वे प्रागादिषु च कल्पयेत् ॥
प्रथमं नागराजानमनन्तं वासुकिं तथा ।
तक्षकं चाथ कार्कोटं पद्माख्यं च ततः परम् ॥
महापद्मं शङ्खपालं गुलिकं नवमं स्मृतम् ।
विद्येश्वराणामष्टानां प्रत्येकं रूपमास्थिताः ॥
फणपञ्चत्रयं चैकं पुच्छादारभ्य नागवत् ।
पुरुषाकारसंयुक्तमुदरोपरिशोभितम् ॥
सुमुखं कुण्डलोपेतं सर्वाभरणभूषितम् ।
फणतत्परभागेऽपि द्विबाहुं क्षौमवस्त्रकम् ॥
वरदाभयदहस्तं सुवृत्तं तद्वरं ततः ॥
गुलिकाद्याननन्तादीन् परितो दिक्षु कल्पयेत् ।
एकैकफणसंयुक्तं कृताञ्जलिपुटान्वितम् ॥
प्रधानमीक्ष्य सर्वे ते नागाधिपमनूपमम् ।
ओं हां पूर्वं समुच्चार्य नाममन्त्रेण पूजयेत् ॥
ओं हां नागराजाय नमः । ओं हां अनन्ताय नमः । इत्यादि ।
फुल्लाष्टदलकं कृत्वा देवस्यानन्तपङ्कजम् ।
नागाधिपशिरोदेशे कल्पयेन्नन्दिकेश्वर ॥
अनन्तासनमित्युक्तम्'
(**अचिन्त्यविश्वसादाख्ये** १३.१३ उ०–२४ पू०)

[१] स्कन्दं — ज.
[२] °धात्रि० — ज.
[३] 'कुन्देन्दुवर्णां धवलां त्रिणेत्रां
कोटीरभारां वरदाभयां च ।
पाशाङ्कुशौ दक्षिणवामहस्ते
आधारशक्तिं रविचन्द्रमौलिम् ॥'
(सद्योजातशिवाचार्यसंपादितायां '**अघोरशिवाचार्यपद्धत्यां** चलासनार्चनाविधौ पृ० १९८)
[४] गजमध्यहस्तां — ज.
[५] महिशक्ति० — ज; मह—'मह' पूजायां इति धातोर्लोटि मध्यमपुरुषैकवचनम् ।
[६] अनन्तो वासुकी — ज.
[७] महापाशं कपालं च — ज.

[1]पञ्चाननैः प्रकल्प्यं तच्छ्वेतरक्तादिभानकैः ॥१५३॥
[2]वर्णैस्त्रिनेत्रसंयुक्तैं[3]श्चरणैरुपशोभितैः ।
उमामन्त्रसमायुक्तं [4]जलाध्यक्षाक्षरान्वितम् ॥१५४॥
शुद्धस्फटिकसंकाशं तत्त्वं वै विष्णुदैवतम् ।
गुणत्रयेण [5]संछाद्यमेवं सिंहासनं भवेत् ॥१५५॥
सिंहासनोपरिष्टात्तु योगासनमिहोच्यते ।

[6][योगासनम्]

भूतरूपेण कोणेषु पादाः कृतयुगादयः ॥१५६॥
[7]श्वेतो रक्तस्तथा पीतः [8]कृष्णः कृतादिवर्णकाः[9] ।
अव्यक्तो नियतिः [10]कालः [11]कला चेति चतुष्टयम् ॥१५७॥
[12]महादिक्षु न्यसेत्तावन्मध्यपादस्तु केशवः ।
वर्णाञ्जननिभाः [13]सर्वाः प्रागादि[14]ष्वीलिका न्यसेत् ॥१५८॥
[15]मायान्तं रुद्रदैवत्यं घोरमन्त्रकलान्वितम् ।

---

[1] कार्कोटगुलिकस्तथा — ज.
[2] ०मन्त्रं ममा — ज.
[3] ०मानन्दं — ज.
[4] 'ऊर्ध्वे सिंहासनं प्रकल्पयेत् ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम् ॥
शुक्लाभं पद्मरागाभं हैमं मरकतप्रभम् ।
धर्मादीनां चतुर्णां स्यादाग्नेयादिक्रमेण तु ॥
पादांश्च चतुष्कोणेषु सिंहरूपेण कल्पयेत् ।
दंष्ट्राकरालवदनास्त्रिणेत्रा भीमरूपिणः ॥
कोटिसिंहैर्विशेषेण प्रत्येकं परिवारकम् ।
अधर्माज्ञानावैराग्यमनैश्वर्यं तथेलिकाः ॥
राजावर्तनिभाः सर्वाः प्रागादिषु प्रकल्पयेत् ।
गुणत्रयेण संछाद्यमेवं सिंहासनं भवेत् ॥'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले श्लो० ३२२–३२६)
[5] जलमध्यक्षरान्वितम् — ज.
[6] संछाद्य एवं — ज.
[7] 'भूतरूपेण कोणेषु पादाः कृतयुगादयः ।
श्वेतं रक्तं तथा पीतं कृष्णं कृतादिवर्णकम् ॥
अव्यक्तो नियतिः कालः कला चेति चतुष्टयम् ।
अव्यक्तं स्फटिकाभासं नियतिःकालाञ्जनद्युतिः ॥
कालो दाडिमपुष्पाभः कला भिन्नाञ्जनप्रभा ।
प्रागादिष्वीलिकाः प्रोक्ता मध्यपादस्तु केशवः ॥
एवं योगासनं प्रोक्तम्'
(**कारणे** (टि.३४) वासनार्चनाविधिपटले श्लो० ३२७-३३० पू०)
[8] श्वेतं रक्तं तथा पीतं — ज.
[9] कृष्णं — ज.
[10] क्रेतादिवर्णकम् — ज.
[11] कालाः — ज.
[12] कलाश्चेति — ज.
[13] महादीक्ष न्यसे ताव — ज.
[14] सर्वे — ज.
[15] ०क्ष्वेलिकन्यसेत् — ज.
[1] पञ्चासने प्रकल्प्यान्ते श्वेतं रक्ताभिमानवै — ज.
[2] वर्णै त्रनेत्रै — ज.
[3] ०श्चारणैरुप — ज.

[1][पद्मासनम्]

तस्योपरि समुद्भूतं पद्मासनं प्रजापते[2] ॥१५९॥
शुद्धस्फटिकसंकाशं कर्णिकाकेसरैर्युतम्।
इच्छाशक्त्युद्भवं पद्मं सहस्रदलभूषितम् ॥१६०॥

[3][विमलासनम्]

वामादिशक्तिपर्यन्तम्; मण्डलत्रयमध्यगम्।
[4]गुणत्रययुतं [5]चात्मतत्त्वत्रयमनोहरम् ॥१६१॥
आकाश[6]तत्त्वं विमलमासनं स्फटिकप्रभम्।
वृत्तं सदाशिवं तत्त्वं तस्य रूपं परात्परम् ॥१६२॥
ईशानमन्त्रसंयुक्तं सर्वतत्त्वमयं प्रभुम्।
अस्मिन्नासनमध्ये तु शिवं परमकारणम् ॥१६३॥
शिवतत्त्वे शिवं ध्यात्वा आवाह्याभ्यर्चनं कुरु।

[7][चन्द्रार्कनाशनयुक्तकाले पूजा कार्या]

[8]दिवाकाले [9]तु नाभ्यर्च्यं [10]निशाकाले तु नार्चनम् ॥१६४॥

---

[1] 'पद्मासनं ततोपरि।
मायातत्त्वं बृहद्ग्रन्थि शुद्धविद्याब्जशोभितम् ॥
विद्येश्वरदलाष्टं च शक्तिकेसरसंयुतम्।
विद्यातत्त्वमायातत्त्वं कर्णिकां संप्रपूजयेत् ॥
बीजं प्रवालवर्णाभमङ्कुरं रजतप्रभम्।
तस्य नालं तु वैडूर्यं कर्णिका रक्तपिङ्गला ॥
श्वेतवर्णं दलाग्रं चारक्ताश्चोपदलाः स्मृताः।
किंचिल्लोहितपीतानि मध्येषु केसराणि च ॥
तन्मध्ये कल्पयेद्धीमान्कर्णिकां कनकप्रभाम्।
नव बीजानि तन्मध्ये हेमाभानि प्रकल्पयेत् ॥
वामादिशक्तयश्चाष्ट केसराणि प्रकल्पयेत्।
इन्द्रादीशानपर्यन्तं न्यसेन्मध्ये मनोन्मनीम् ॥
आत्मतत्त्वं न्यसेत्सव्ये विद्यातत्त्वं तु वामके।
मध्यमे शिवतत्त्वं तु कल्पयेत्कल्पवित्तमः ॥
एवं पद्मासनं प्रोक्तम्'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले श्लो० ३३०–३३७ पू०)

[2] प्रजापतेः — ज.

[3] 'तस्योर्ध्वे विमलासनम्।
मण्डलत्रयमध्ये च कल्पयेद्विमलासनम् ॥'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले श्लो० ३३७)

[4] गुणत्रयायुतं — ज.

[5] चात्मं तत्त्व — ज.

[6] ०तत्त्वविमल — ज.

[7] अयं विषयो योगिनामन्तर्यजनप्रकरणविषयकः पूजाप्रसङ्गादत्र वर्णित इति भाति।

[8] 'अथ ज्ञानक्रमः कथ्यते। कामिके —
"न दिने पूजयेद्देवं रात्रौ नैव च नैव च।
सततं पूजयेद्देवं दिवारात्रौ च वर्जयेत् ॥"
अस्यार्थः। दिनं विकल्पज्ञानम्। रात्रिरज्ञानम्। तस्मात्सकलावस्थां केवलावस्थां च त्यक्त्वा निर्मलजागरादिना सन्ततं शिवं पूजयेत्।'
(**क्रियादीपिकायां**, पृ० ५०, ५१)

[9] न मभ्यर्च्य — ज.

[10] निशिकाले तु अर्चनम् — ज.

[१] दिवारात्रं सदा ज्ञात्वा देवेशं पूजयेत्सुधीः ।
योजयेत्तु दिवारात्रं[२] [३]वृथार्कशशिवर्धने[४] ॥१६५॥

श्रीनन्दिकेश्वर उवाच —

देव देव महादेव स्थित्युत्पत्तिलयेश्वर ।
[५]दिवारात्रं परित्यज्य सौम्य[६]पूजां निदेशय ॥१६६॥

श्रीभगवानुवाच —

सर्वभूतमनश्चक्षुश्चक्षुषी शशिभास्करौ ।
मनसानन्यमनसा[७] दृष्टिभ्यामीक्षणेन च ॥१६७॥
पूजोपकरणं द्रव्यं [८]साधनीयं प्रजापते ।
यावत्पूजा[९]समाप्तिस्तु तावच्चक्षुर्मनोगतिः ॥१६८॥
नान्येक्षणमना[१०] भूत्वा [११]येनार्चितः परः शिवः ।
[१२]तेनार्चितस्तु देवेशो [१३]नार्चने चान्यगं मनः ॥१६९॥
मनश्चक्षुर्द्वयोर्वृत्तिर्यस्मिन्काले द्विजोत्तम ।
[१४]एकस्थितिमनुप्राप्ता तस्मिन्काले द्विजोत्तम ॥१७०॥
[१५]चन्द्रार्कनाशनः कालस्तत्काल[१६] इह कथ्यते ।

---

[१] दिवारात्रौ — ज.

[२] दिवारात्रौ — ज.

[३] वृथर्के शशिवर्धनम् — ज.

[४] 'चन्द्रार्कोदयतः पूजा वृथा क्लेशो भविष्यति ।'
(**पूर्वकामिके** ४.१९४ उ०)

[५] दिवारात्रौ — ज;
'दिवारात्रौ परित्यज्य कथं पूजयते गुरुः ।
सर्वभूतमनश्चक्षुर्वृत्ती तौ शशिभास्करौ ॥'
'मनश्चक्षुर्द्वयोर्वृत्ती यस्मिन्काले द्विजोत्तम ।
एकचित्तमनुप्राप्ते तस्मिन्काले समर्चयेत् ॥'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले श्लो० २९७, ३०० उ०, ३०१ पू०)

[६] ०पूजा निदेशकः — ज.

[७] ०मनसो — ज; न विद्यतेऽन्यस्मिन्मनो यस्य तेनेति बहुव्रीहिसमासोऽत्राभ्युपगन्तव्यः । एतच्च साधनीयमित्यत्रान्वेति ।

[८] सादयेत्तु — ज.

[९] समाभ्यन्तं — ज.

[१०] ०मनो — ज.

[११] येनार्चनं परं शिवम् — ज.

[१२] तेनार्चनदेवेशं — ज.

[१३] सार्चनं चान्यरम्मनः — ज.

[१४] एकचित्ते मनुप्राप्ते — ज.

[१५] 'प्रथमं योगमार्गः । कामिके —
"चन्द्रार्कनाशने पूजा साधयेदीप्सितं फलम् ।
सुषुम्नामध्यगे प्राणे पूजयेत्सर्वदा शिवम् ॥"
(**पूर्वकामिके**, ४.१९५ उ०, १९६ पू०);
अस्यार्थः । चन्द्रस्तु इडा नाडी । अर्कस्तु पिङ्गला नाडी । तन्नाश उच्छ्वासनिश्वासराहित्यम् । तदेव केवलकुम्भकम् । पूजा तत्र शिवानुभव एव । ईप्सितं फलं सिद्धिर्मुक्तिश्च । साधयेत् — प्राणवायौ सुषुम्नारन्ध्रप्रविष्टे सति शिवानुभूतिमान्भवेत् ।' (**क्रियादीपिकायां** पृ० ५०);
'यजनेऽर्केन्दुसंचारे निष्फलं तदवाप्नुयात् ।
चन्द्रार्कनाशयजनं सर्वसिद्धिकरं शुभम् ॥
ऊर्ध्वप्राणस्तथादित्योऽधःप्राणस्तु चन्द्रमाः ।
तयोर्निरोधनं कुर्यात्तस्य चन्द्रार्कनाशनम् ॥'
(**कारणे** (टि. ३४) वासनार्चनाविधिपटले श्लो० १९५, १९६);
'इडा चन्द्रकला ज्ञेया पिङ्गला भास्करांशका ।
द्वयेन पूरयेद्वायुं नासिकामण्डलद्वयम् ॥
रेचकं सूतकोपेतं पूरकं मृतकाश्रितम् ।

तस्मात्सर्वप्रयत्नेन एकचित्तेन धीमता ॥१७१॥
[1]देवेशस्यार्चनं कार्यं सर्वसंपत्सुखावहम् ।
प्राणा[2]पानावर्कचन्द्रौ [3]प्रोक्तौ किंचिच्छिवागमे ॥१७२॥

[4][लिङ्गपूजाकरणप्रकारः]

[5]आवाहोद्वासनं नास्ति मानुषादन्यलिङ्गके ।
सर्वत्र [6]चादिमं देवं परमेशं सदाशिवम् ॥१७३॥
अभि[7]मुखीकृतं कुर्यात्तत्तदावाहनं भवेत् ।
पूजापरि[8]समाप्तौ तु विमुखं[9] तत्प्रकीर्तितम् ॥१७४॥
विसर्जनम्; [10]परिवृते पश्चात्पञ्चमुखे पृथक् ।
स्नानद्रव्यैश्च[11] सर्वेषामर्चयेद्गन्धपुष्पकैः ॥१७५॥
[12]आवाहमुद्रयावाह्य स्थपयेत्तं [13]तु मुद्रया ।

सूतकप्रेतकारित्वात्पूजाहोमं न कारयेत् ॥
निष्फलं न तु सान्निध्यं यथोक्तविधिना कुरु ।
तस्मात्सर्वप्रयत्नेन कुरु चन्द्रार्कनाशनम् ॥
चन्द्रार्कनाशन वक्ष्ये शृणुष्वैवं महेश्वर ।
ऊर्ध्ववक्त्रं तु जिह्वाग्रं मुषुम्नाद्वारबन्धनम् ॥
साधकस्य तु तद्दृष्टिमात्मानं हस्तगामिकम् ।
कुम्भकं प्राणनिरतं मौनकर्म निरन्तरम् ॥
दृढचित्तं सदा ध्यात्वा तस्य चन्द्रार्कनाशनम् ।
मृतकं सूतकं त्यक्त्वा यावन्निर्णयमुच्यते ॥
चन्द्रार्कनाशनं यावत्तावत्संपूजयेच्छिवम् ।'
(**मकुटे** ३, ६३–६९ पू०);

चन्द्रार्कदर्शनं कालं — ज.

[16] ०त्कालं — ज.

[1] देवेशमर्चनं कुर्यात् — ज.

[2] ०पानार्कचन्द्रेति — ज.

[3] प्रोक्तं — ज.

[4] एतस्मिन्विषये **अजिते** २०.१५८–२१७ श्लोकास्तदीयटिप्पणी. **रौरवे** क्रियापादे १०.३०–५५ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[5] आवाहनोद्वासनं नास्ति मनुष्या अन्य — ज;
'स्वयंभु दैविकं बाणं गाणपं चार्षकं तथा ।
शिष्टलिङ्गमिति ख्यातं पूजां पूर्ववदाचरेत् ॥
शिष्टलिङ्गे विशेषेणावाहनोद्वासनं न हि ।
सर्वत्र व्यापिनं देवं परमेशं सदाशिवम् ॥
अभिमुखीकरणं यच्च तदावाहनमुच्यते ।
विमुखीकरणं यच्च तदुद्वासनमुच्यते ॥
पूजापरिसमाप्तौ तु विमुखं तु विसर्जनम् ।
यथा कुण्डगतस्याग्नेर्वायुना ज्वलनं भवेत् ॥
तथा च लिङ्गे मन्त्रेण जायते भगवाञ्शिवः ।
देवैश्च मुनिभिश्चैव पशुभिः पक्षिजालकैः ॥
मृगादिगणपैश्चैव स्वायम्भुवं प्रतिष्ठितम् ।
यक्षरक्षोगणैश्चैव यल्लिङ्गं तु प्रतिष्ठितम् ॥
तच्छिष्टलिङ्गमित्युक्तं शिवसान्निध्यकारणम् ।
तस्मादावाहनं नास्ति न चैवोद्वासनक्रिया ॥'
(**पूर्वकारणे** ३०.१९८उ०–२०५पू०)

[6] ०मादिनं — ज.

[7] ०मुखीकरणं — ज.

[8] समाप्ते — ज.

[9] अत्र कुर्यादित्यध्याहार्यम् । तद् विसर्जनं प्रकीर्तितम् इत्यन्वयः कार्यः ।

[10] परिवारं च — ज.

[11] स्नानद्रव्यं च — ज.

[12] आवाहनमुद्रया — ज;
'आवाहयेत्ततो देवं सद्योजातेन मन्त्रतः ।
स्थापयेद्वाममन्त्रेणाप्यघोरेण तु संनिधिः ॥
पुरुषेण निरोधश्चेशानेन स्वागतं भवेत् ।

[1]सांनिध्ये ध्वजमुद्राख्या [2]पुरुषेण निरोधयेत् ॥१७६॥
लिङ्गाख्यमुद्रयाभ्यर्च्य सद्यादिब्रह्मपञ्चकैः ।
पूर्वोक्तविधिना चैव ध्यात्वा देवं सदाशिवम् ॥१७७॥
सद्यमन्त्रमनुस्मृत्य पाद्यं [3]पादे प्रदापयेत् ।
मुखेष्वाचमनं दद्याद्वामदेवेन मन्त्रतः ॥१७८॥
अघोरेण तु मन्त्रेण अर्घ्यं शिरसि निक्षिपेत् ।
[4]जलेन स्नापयेत्पश्चात्पञ्चाङ्गैः [5]रुद्रसूक्तकैः[6] ॥१७९॥
गन्धोदकेन संस्नाप्य [7]गन्धद्वारेण मन्त्रतः ।
क्षीरं दधि घृतादीनि मधुशर्करमेव च ॥१८०॥

आगतस्य शिवस्यात्र पादे पाद्यं हृदा ददेत् ॥
मुखेष्वाचमनं दद्यादर्घ्यं शिरसि निक्षिपेत् ।
अष्टत्रिंशत्कलान्यासं मकुटादिक्रमेण तु ॥'
(**पूर्वकारणे** ३०.२७०–२७२)

[13] तन्मुद्रया — ज.
[1] सांन्निध्या — ज.
[2] तत्पुरुषेण — ज.
[3] पादौ — ज.
[4] जलेनास्थापये — ज;
'तैलेन हस्तयन्त्राद्यैः साधितेन नवेन च ।
पक्वेन वासितेनाथ शुद्धगव्येन सर्पिषा ॥
सपीठं लिङ्गमभ्यर्च्य धूपयेत्तदनन्तरम् ।
शुभेन शालिपिष्टेन हरिद्रासंयुतेन च ॥
उद्वर्त्य माषचूर्णेन निमज्जनमथाचरेत् ।'
नालिकेरफलाम्भोभिरन्यैर्वा रसवद्रसैः ॥
पुष्पाद्यैर्हेमतोयैश्च रत्नोदैर्गन्धतोयकैः ।
अभिषेकं ततः कुर्यान्न कुर्याच्छून्यमस्तकम् ॥'
सुगन्धामलकाद्यैस्तु स्नानं तत्र विधीयते ।
गन्धाम्बुनाभिषेकं तु कृत्वा लिङ्गं सपीठकम् ॥
वक्त्रेष्वाचमनं दत्त्वा मार्जयेच्छुद्धवाससा ।
गन्धद्रव्यैः समालिप्य शिवलिङ्गं सवेदिकम् ॥
वस्त्रैर्नानाविधैर्द्रव्यैर्देवमाच्छाद्य निर्मलैः ।
दत्त्वाष्टपुष्पं देवाय दद्यान्मन्त्रहविस्तदा ॥
मुद्गान्नं वाथ शुद्धान्नमुपदंशादिसंयुतम् ।
शुद्धाभिः पुष्पमालाभिः पत्रच्छेदैरथार्चयेत् ॥
हेमपट्टैश्च मकुटैः पर्णैर्हेमविनिर्मितैः ।
हेमदूर्वाङ्कुरैर्हेमलक्ष्मीपुष्पैरनेकशः ॥
भूषयेच्चन्द्रखण्डेन हेमपुष्पैरनेकशः ।
त्रिसरेणोत्तरीयेण कटिसूत्रेण साधकः ॥'
'पिण्डिकारूपिणीं देवीं स्नापयेत्तन्मनुं स्मरन् ।
दत्त्वा जातेन पाद्यं तु पादयोस्तन्मुखेषु च ॥
आचामान्ते च मूर्धाद्यैः शिरस्यर्घ्यं प्रदापयेत् ।'
'निर्धूमज्वलदङ्गारपूर्णपात्रोदरे भृशम् ।
दह्यमानेन धूपेन धूपयेत्तदनन्तरम् ॥
सुरूपां धीरनिर्घोषां घण्टां वामेन पाणिना ।
वादयन्सर्वदा धूपमुत्क्षिपेदस्त्रचोदितम् ॥
कपिलाघृतसंपूर्णैः कर्पूरागरुवर्तिभिः ।
अनिर्वाणप्रदीपैश्च चक्रतोरणपूर्वकैः ॥
त्रिशूलदीपिकाभिश्च दीपमालाभिरेव च ।
अन्यैर्नानाविधैर्दीपैर्ज्वालयेत्तु समन्ततः' ॥
'प्रभूतैः स्नेहसंपूर्णैर्ज्वलद्भिर्दीपकैः स्थिरैः ।
कुर्यादारात्रिकं पश्चात्सद्वर्त्या प्रतिबोधितैः ॥
यथाङ्गं भस्मनालभ्य तिलकैर्वा त्रिपुण्ड्रकैः ।'
(**पूर्वकामिके** ४.४०३ उ०–४०५; ४१०, ४११ पू०; ४२४–४२९; ४३४, ४३५ पू०; ४४१–४४४; ४४६, ४४७ पू०)

[5] पञ्चाङ्गं — ज;
'मूर्ध्ना वदनहृद्गुह्यपादाः पञ्चाङ्गसंस्थिताः'
(**रौरवोत्तरे** ९.२२ पू०)
[6] रुद्रसूक्तम् (**याजुषमन्त्ररत्नाकरे** पृ० ९०)
[7] **ऋग्वेदे** पञ्चममण्डलान्ते विद्यमाने खिलभागे (श्रीसूक्ते) ९.

स्नापयेद्देवदेवेशं [1]तत्तन्मन्त्रेण देशिकः ।
[2]हिरण्यवर्णेति मन्त्रेण हेमरत्नोदकं तथा ॥१८१॥
[3]महाव्योमेति मन्त्रेण शुद्ध[4]तोयाभिषेचनम्[5] ।
[6]वस्त्रेण मार्जनं कुर्याल्लिङ्ग[7]पीठे[8] तथैव च ॥१८२॥
ईशानेन तु मन्त्रेण पुष्पं शिरसि निक्षिपेत् ।
वस्त्रं तु दापयेच्छम्भोरीशानेन तु मन्त्रतः ॥१८३॥
उपवीतोत्तरीयं च भूषणं गन्धपुष्पकम् ।
दापयेद्धृदयेनैव [9]पञ्चाद्घण्टां तु ताडयेत् ॥१८४॥
[10]ब्रह्मणा च पटं नीत्वा[11] धूपदीपं प्रदापयेत् ।
पुनराचमनं दत्त्वा अर्घ्यं सद्येन दापयेत् ॥१८५॥
नैवेद्यं दापयेत्पश्चाद्धृन्मन्त्रेणैव देशिकः ।
[12]अस्त्रेणोद्वर्तनं कुर्यात्ताम्बूलं तु निवेदयेत् ॥१८६॥
[13]पश्चान्नीराजनं कुर्याच्छास्त्रदृष्टेन कर्मणा ।
[14]त्रियम्बकेति मन्त्रेण [15]भस्मानि दापयेत्प्रभोः ॥१८७॥
[16]प्रस्थस्य द्विफलं चैव त्रिफलं वा चतुष्फलम् ।
[17]फलस्य द्विगुणं पत्रं चूर्णयुक्तं [18]सदेलकम् ॥१८८॥
मातुलङ्गफलैर्युक्तं नालिकेरफलैर्युतम् ।
[19]मुखवासं [20]ददेत्पश्चात्पञ्चवक्त्रेषु बुद्धिमान् ॥१८९॥

---

[1] तत्त्वमन्त्रेण — ज.

[2] **ऋग्वेदे** पञ्चममण्डलान्ते विद्यमाने खिलभागे (श्रीसूक्ते) १.

[3] महाव्योमेति मन्त्रेण–व्योमव्यापिमन्त्रेण; व्योमव्यापिमन्त्रविवरणम् (**मतङ्गपारमेश्वरे** क्रियापादे १.६० उ० – ११७, **रौरवागमे** विद्यापादे दशमपटले च द्रष्टव्यम्).

[4] ०तोयेनाभिषेचयेत् — ज.

[5] अत्र कुर्यादिति शेषः ।

[6] अङ्गवस्त्रं तथा कुर्यात् — ज; अत्र पाठः 'मार्जयेच्छुद्धवासमा' इति पूर्वकामिकमनुसृत्य साधितः ।

[7] ०पीठं — ज.

[8] पञ्चघण्टां — ज.

[9] ब्रह्ममन्त्रेण पटं — ज.

[10] 'क्षिप्त्वा' इति पाठश्चेत्सुष्ठु ।

[11] अस्त्रेनोद्वर्तनं — ज;
'तृप्तावाचमनं दद्याद्धस्तोद्वर्तनपूर्वकम् ।
मुखवासं च ताम्बूलं देवयोग्यं प्रदापयेत् ॥'
(**पूर्वकामिके** ४.४९९ उ०, ५०० पू०)

[12] 'नीराजनं ततः कुर्यात्पुष्पार्घ्ये पात्रके क्षिपेत् ।
तन्मध्यमे यजेदस्त्रं गन्धपुष्पादिभिर्बुधः ॥
अघोरेण तथा तिस्रो भ्रामयेल्लिङ्गमूर्धनि ।
जलेन निक्षिपेदर्घ्यं हृदा संप्रोक्षयेच्छिवम् ॥
दर्शयेल्लिङ्गमुद्रां तु मन्त्रेण नयनेन च ।
सौख्यं कुर्यात्तदन्ते तु शास्त्रदृष्टेन कर्मणा ॥'
(**पूर्वकारणे** ३०.४०२ उ०–४०५ पू०)

[13] **तैत्तिरीयसंहिता** १.८.६.१०; त्र्यम्बकेति — ज.

[14] भस्मना दापये प्रभुम् — ज.

[15] प्रस्थस्य–प्रस्थपरिमितनिवेदनस्य

[16] फलस्या द्वि — ज.

[17] मतल्लिकम् — ज.

[18] एतद्विषये **अजिते** २२.१३८–१४१ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[19] ततो पश्चात् — ज.

लवङ्गं चैव कर्पूरं [1]पलत्रयसमन्वितम् ।
[2]तस्य चूर्णं ततः कृत्वा मधुशर्करमेव च ॥१९०॥
संयुक्तभागमेकं स्याद्दापयेच्छिवसंनिधौ ।

[3][बलिविधिः, नित्याग्निकार्यविधिश्च]

द्वारादिबलिपीठान्तं तदन्ते दापयेद्बलिम् ॥१९१॥
नित्याग्निकार्यं कुर्वीत; [4]पञ्चादावरणान्यसेत् ।

[5][आवरणार्चनम्]

[6]न रुद्रः शक्तिहीनस्तु [7]रुद्रहीना न शक्तयः ॥१९२॥
[8]पूज्य एव शिवः प्रोक्तः पूजकः शक्तिरुच्यते ।
पुष्पेषु गन्धवज्ज्ञेयं तिलेषु तैलवत्तथा ॥१९३॥
आकाशे वायुवत्प्रोक्तं [9]धूमध्वजे तु चोष्णवत् ।
स्वशक्ति[10]सहिता देवाः शिवमेव [11]निरीक्ष्य वै ॥१९४॥

[12][गर्भावरणम्]

ईशानं कर्णिकामध्ये पुरुषं पूर्वतो यजेत् ।

---

[1] फलत्रय० — ज.

[2] तस्मिन्चूर्णं — ज.

[3] 'द्वारस्य दक्षिणे पार्श्वे नन्दिने बलिमाचरेत् ।
महाकालाय वामे तु वृषभाय तदग्रतः ॥
ताम्बूलं दापयेत्पश्चात्सद्येन तु विशेषतः ॥
परिवारबलिं दत्त्वा नित्याग्निं कारयेद्बुधः ॥
सर्वलोकहितार्थं तु नित्योत्सवमतःपरम् ।'
(**पूर्वकारणे**, ३०, ४००–४०२ पू०)

[4] 'पञ्चादावरणान्' इत्यत्र आवरणशब्दः पुँल्लिङ्गे प्रयुक्तः ।

[5] एतद्विषये अजिते २०.२१८–२२५ पू० श्लोकास्तदीयटिप्पणी, रौरवे क्रियापादे १०.६२ उ०–६६ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[6] न रुद्र शक्तिहीनं तु — ज.

[7] रुद्रहीनं तु — ज;
'न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ।
पुष्पेषु गन्धवज्ज्ञेया तिलेषु तैलवत्तथा ॥
देहे च प्राणवच्छक्तिस्तस्माद्युक्तं प्रपूजयेत् ।'
(**पूर्वकारणे** पृ० २३८ श्लो० १०, ११ पू०);
'वह्नेरुष्णत्ववच्छक्तिरविनाभाविनी विभोः ।
शक्तिहीनः शिवो नास्ति शिवहीना न शक्तिका ॥
एते समस्तदेवाश्च शक्तिशम्भुमयाः स्मृताः ।'
(**सुप्रभेदे** ज्ञानपादे १.४६, ४७ पू०);

[8] पूजयेव शिवं प्रोक्तं पूजकं — ज.

[9] धूम्रवद्ध्वज उष्णवत् — ज.

[10] रहिता — ज.

[11] निरीक्षणाः — ज; 'न' मातृकामनुसृत्यात्र पाठः शोधितः ।

[12] 'सद्यं पश्चिमतोऽभ्यर्च्य वामदेवं तथोत्तरे ।
अघोरं दक्षिणेऽभ्यर्च्य पूर्वे तत्पुरुषं स्मरेत् ॥
ईशानमीशदेशे तु कर्णिकोर्ध्वे शिवं यजेत् ।
अम्बिकां वरुणदेशे तूत्तरे तु गणाम्बिकाम् ॥

दक्षिणे घोरमभ्यर्च्य वामदेवं तथोत्तरे ॥१९५॥
सद्योजातं तु वारुण्यां तत्तन्मन्त्रेण संयजेत् ।
[1]अम्बा चैव [2]गणाम्बा च गङ्गा [3]चोमा तथा मता ॥१९६॥
गौरी चैव तु पञ्चैताः[4] सद्यादीशान्तशक्तयः ।
[5]आग्नेय्यां हृदयं चैव [6]ईशाने तु शिरो यजेत् ॥१९७॥
नैर्ऋत्यां तु [7]शिखेज्या तु वायव्यां [8]कवचं तु वै ।
नेत्रमीशानदिग्भागे [9]अस्त्रमाशासु संयजेत् ॥१९८॥
[10] शिवानन्दा महेशी च [11]रौद्री गौरी सुरेश्वरी ।
[12] हृदयाद्यस्त्रपर्यन्तं शक्तयः परिकीर्तिताः ॥१९९॥
गर्भावरणमेवं तु विद्येशावरणं शृणु ।

[13][विद्येशावरणम्]

अनन्ता[14]द्यष्टमूर्तीस्तु पूजयेच्छिवसंनिधौ ॥२००॥

याम्ये भागीरथीं चैव पूर्वदेशे तु गौरिकाम् ।
उमां वै त्वीशदेशे तु सद्यादीशानमन्त्रतः ॥
स्वनाममन्त्रैरभ्यर्च्या ब्रह्मपञ्चकशक्तयः ।
हृदय चाग्निदेशे तु शिखां निर्ऋतिदेशके ॥
कवचं चानिलदेशे तु ऐशान्ये शिर अर्चयेत् ।
नैर्ऋते चास्त्रमभ्यर्च्य नयनं त्वीशगोचरे ॥
वामिनीं चाग्निदेशे तु नीलिनी निर्ऋतिगोचरे ।
चक्रीं चानिलदेशे तु पाशाङ्गीमीशगोचरे ॥
खड्गिनीं नैर्ऋते देशे जम्भिनीमीशगोचरे ।
गर्भावरणदेवांस्तु स्वस्वनाम्ना तु पूजयेत् ॥'
(**सूक्ष्मे** ५.६४–७०) ;

एतद्विषये पुनः **मतङ्गपारमेश्वरे** क्रियापादे ८३ उ०–९१ श्लोकाः, **सार्धत्रिशतिकालोत्तरे** ७.७, ८ श्लोकौ च द्रष्टव्याः ।

[1] 'अम्बा गणाम्बिका चैव गङ्गा गौरी उमा तथा ।
वामिनी नीलिनी चक्री शङ्खी खड्गी त्वसी तथा ॥
एता एकादश प्रोक्ता गर्भावरणशक्तयः ।'
(**मकुटे** ४.५९० ५९१ पू०) ;
'अम्बी गणाम्बी गङ्गा च गौरी चैव उमा तथा ।
वामी नीली च चक्राङ्गी पाशाङ्गी खड्ग-काम्बिका ॥'
('कालोत्तरे' इति **सकलागमसारसंग्रहे** पृ० ९४) ;

[2] कम्बी — ज.
[3] च यमुना तथा — ज.
[4] पञ्चैते — ज.
[5] आग्नेयं हृदयेनैव — ज.
[6] ईशानेन शिरो — ज.
[7] शिखायां तु — ज.
[8] कवचेन तु — ज.
[9] अस्त्रमीशासु — ज.
[10] शिवानन्दमहेशी — ज.
[11] रौद्रि गौरि सुरेश्वरि — ज.
[12] हृदयादस्त्र — ज.
[13] 'अनन्तेशं तथा भूमिमिन्द्रदेशे समर्चयेत् ।
स्वाहादेवीं च सूक्ष्मं च अग्निदेशे समर्चयेत् ॥
शिवोत्तमं स्वधादेवीं याम्यदेशे यजेद्बुधः ।
एकनेत्रं च क्षान्तिं च नैर्ऋते च समर्चयेत् ॥
एकरुद्रं च पुष्टिं च वरुणे तु समर्चयेत् ।
त्रिमूर्तिं च श्रुतिं चैव वायुदेशे समर्चयेत् ॥
श्रीकण्ठं कीर्तिशक्तिं च उत्तरे तु यजेद्बुधः ।
मेधाशक्तिं शिखण्डिं च ऐशान्यां संप्रपूजयेत् ॥
विद्येशावरणं प्रोक्तं स्वस्वनाम्नैव पूजयेत् ।'
(**सूक्ष्मे** ५.७१–७५ पू०)
[14] ०दष्टमूर्तिस्तु — ज.

[1]**वामाद्या अष्टशक्तीश्च द्वितीयावरणं परम्।**
विद्येशावरणं ह्येवं गणेशावरणं शृणु ॥२०१॥

[2][गणेशावरणम्]

उमा[3] चण्डेशनन्दीशमहाकाल[4]वृषांस्तथा।
[5]गणेशं चैव भृङ्गीशं महासेनं [6]च संयजेत् ॥२०२॥
[7]भद्रा च देव[8]याना च कुन्दी काली च मन्त्रिणी।
मालिनी च उमा चैव [9]यामिनी चण्डान्तशक्तयः ॥२०३॥
गणेशावरणं ह्येवं लोकेशावरणं शृणु।

[10][लोकेशावरणम्]

[11]इन्द्राग्नी च यमश्चैव [12]निर्ऋतिर्वरुणस्तथा ॥२०४॥

---

[1] वामाद्यष्टशक्तीश्च — ज;
'भूमिः स्वाहा स्वधा क्षान्तिः प्रभा पुष्टिस्तथैव च।
श्रुतिर्मेधा तथाष्टौ च विद्येशानां तु शक्तयः ॥'
(**मकुटे** ४.५९५ उ०, ५९६ पू०);

[2] 'भद्रादेवीं च वृषभं पूर्वदेशे समर्चयेत्।
नन्दिनं कुन्दलीं शक्तिमाग्नेय्यां दिशि विन्यसेत् ॥
गणेशं भृङ्गिणीं चैव दक्षिणे तु यजेद्बुधः।
पद्मिनीं च महाकालं नैर्ऋते तु समर्चयेत् ॥
गुहं च देवसेनां च पश्चिमे तु समर्चयेत्।
भृङ्गीशं ह्लादिनीशक्तिं वायुदेशे समर्चयेत् ॥
गौरीं चोत्तरदेशे तु रूपिणीं चण्डमीशके।
गणेशावरणं प्रोक्तं स्वस्वनाम्नार्चयेत्क्रमात् ॥'
(**मकुटे** ५.७५ उ०–७९पू०);

[3] ०चण्डीशनन्दीशो — ज.

[4] ०वृषस्तथा — ज.

[5] गणेशश्चैव बृङ्गीशो — ज.

[6] च वरं यजेत् — ज.

[7] 'भद्रा च देवयाना च कान्तिः काली च मन्त्रिणी।
मालिनी च विरूपी च मन्दी चण्डान्तशक्तयः ॥'
(**मकुटे**. ४.६०६ उ०, ६०७ पू०);
'भद्रा च देवयाना च कुन्दी काली च मन्त्रिणी।
मालिनी च उमा चैव यामिनी चण्डान्तशक्तयः ॥'
('कमलालये' इति **सकलागमसारसंग्रहे** पृ० ९५);
भद्री च — ज.

[8] ०यान कुन्दि — ज.

[9] यमुनि — ज.

[10] 'इन्द्रं च देहिनीं स्वाहाशक्त्याग्निदेवतां तथा।
यमं च कालकण्ठीं च दाहिनीं निर्ऋतिं तथा ॥
वरुणं भोगिनीशक्तिं वायुं चाघोरशक्तिकाम्।
कुबेरं कुम्भिनीशक्तिं हर्षिणीमीशगोचरे ॥
महाविष्णुं च लक्ष्मीं च सावित्रीं च विरिञ्चकम्।
दिक्पालावरणं प्रोक्तमिन्द्रादिषु प्रकल्पयेत् ॥'
(**सूक्ष्मे** ५.७९ उ०–८२ पू०);
'इन्द्रं वज्रायुधं पूर्वे वह्नौ वह्निं सशक्तिकम्।
यमं दण्डधरं याम्ये खड्गं च निर्ऋतिं स्वके ॥
वरुणं पश्चिमे भागे पाशहस्तं जलाधिपम्।
वायुमङ्कुशहस्तं च वायव्यां दिशि पूजयेत् ॥
सोमं च सौम्यदेशे तु गदाहस्तं प्रपूजयेत्।
ईशानमीशदिग्भागे शूलहस्तं प्रपूजयेत् ॥
शची स्वाहा सुदेवी च विलोहिन्याह्वया तथा।
कालकण्ठी च नीली च जितकारिस्तु देविका ॥
शक्तयोऽष्टौ क्रमादेता लोकेशानां प्रकीर्तिताः ॥'
(**मकुटे**, ४.६०८–६१०; ६१३, ६१४ पू०);
'इन्द्रश्चाग्निर्यमश्चैव निर्ऋतिर्वरुणवायवः।
सोमश्चैव तथेशानो लोकपालाः प्रकीर्तिताः ॥'
'शची पुलोमजा चैव स्वाहा चेति तथा प्रभा।

वायुः कुबेर ईशानो [1]ब्रह्मा विष्णुः प्रकीर्तिताः।
इन्द्राद्यष्टलोकपालान्स्वस्वदिक्षु प्रपूजयेत् ॥२०५॥
ब्रह्माणमीशदिग्भागे [2]विष्णुं च नैर्ऋते यजेत्।
शची पुलोमजा चैव[3] [4]स्वाहा चेति तथा[5]प्रभा ॥२०६॥
कालकण्ठी च नीली च नारी च सुसुकेतिनी।
सरस्वती च लक्ष्मीश्च शक्तयः परिकीर्तिताः॥२०७॥
यथाक्रमं च [6]लोकेशशक्तीः [पूर्वादितो] यजेत्।
लोकेशावरणं ह्येवमस्त्रेशावरणं शृणु ॥२०८॥

[7][अस्त्रेशावरणम्]

[8]वज्रं शक्तिश्च दण्डं च खड्गः पाशस्तथाङ्कुशः[9]।
गदा त्रिशूलं [10]चक्रं च पद्मं चेति [11]दशायुधम् ॥२०९॥
[12]ह्रादिनी [13]हर्षिणी चैव [14]अरिष्टिर्मङ्गिनी तथा।

कालकण्ठी च नीली च नारी च सुसुकेतिनी ॥'
(**सकलागमसारसंग्रहे** पृ० ९५, ९६);
'इन्द्रानलयमाश्चैव राक्षसो वरुणस्तथा।
वायुः सोमस्तथेशानो ब्रह्मा विष्णुश्च देवताः ॥'
'विलासिनी रूपिणी च धारिणी विमुखी तथा।
निर्मुखी दुर्मुखी चैव मतिभ्रंशी सुमालिनी ॥
सरस्वती च लक्ष्मीश्च शक्तयः परिकीर्तिताः।
विपुला च शचीदेवी स्वधा स्वाहा च पार्श्वयोः।
नीली च कालकण्ठी च जालकेशी सुकेशिनी ॥
हर्षिणी च हृदाद्री च मङ्गिनी मांसिनी तथा।
ऋद्धिश्चैव निवृत्तिश्च स्वरूपी च निवृत्तिका ॥
सावित्री भारती चैव श्रीदेवी पृथिवी तथा।
इत्येवं लोकपालानां शक्तिद्वयमुदाहृतम्।'
(**पूर्वकारणे** २४.५१ उ०, ५२ पू०; ५३–५७ पू०)

[11] इन्द्राग्नी यम० — ज.
[12] नैर्ऋतीवरुण — ज.
[1] लोकपालाः प्रकीर्तिताः। — ज.
[2] विष्णु नैर्ऋतो — ज.
[3] शचीदेवि पुलोमा च — ज.
[4] स्वाहाश्चेति — ज.
[5] ०यभौ — ज.
[6] लोकेशा शक्तयो — ज.
[7] 'कुलिशं पूर्वतोऽभ्यर्च्य शक्तिं चैवाग्निगोचरे।
सदण्डं याम्यदेशे तु खड्गं निर्ऋतिगोचरे ॥
पाशं वै वारुणे देशे चाङ्कुशं वायुदेशके।
गदां चैवोत्तरे देशे त्रिशूलमीशगोचरे ॥
त्रिशूलवामपार्श्वे तु पद्मायुधमथार्चयेत्।
खड्गस्य दक्षिणे पार्श्वे चक्रायुधं समर्चयेत् ॥
ऐन्द्रदेशे प्रसन्नात्मा कोपात्मा याम्यदेशके।
गुणात्मा नैर्ऋते देशे वारुणे कोमलात्मनी।
विषात्मी वायुदेशे तु विकृतात्मीशगोचरे ॥
महात्मी चक्रशक्तिश्च मङ्गलाख्याब्जशक्तिका।
अस्त्रेशावरणं प्रोक्तं क्रमेणैव समर्चयेत् ॥'
(**सूक्ष्मे** ५.८२ उ०–८७);
[8] 'वज्रं शक्तिं च दण्डं च खड्गं पाशाङ्कुशं तथा।
गदा त्रिशूलं चक्रं च पद्मं चैव दशायुधम् ॥'
(**पूर्वकारणे** २४.४९);
वज्रशक्तिं च — ज.
[9] खड्गं पाशं तथाङ्कुशम् — ज.
[10] शङ्खं च — ज.
[11] तथायुधम् — ज.
[12] 'कालिनी च विरूपी च धारिणी विमुखी तथा।
नीलिनी सुमुखी चैव मर्दिनी भृङ्गमालिनी ॥
एषा शक्तिरायुधानां स्वनामाद्येन पूजयेत्।'
(**मकुटे** ४.६२२, ६२३ पू०);
'ह्रादिनी हरणी चैव अरिष्टी मङ्गिनी तथा।

रुद्री चैव निरुद्री च जातका चित्स्वरूपिणी ।।२१०।।
महालक्ष्मीर्मङ्गलाख्या प्रोक्ताः शक्तय एव हि ।
[१]अस्त्रशक्तीरिति [२]प्रोक्ता अर्चयेद्देवसंनिधौ ।।२११।।
[३]आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
सर्वभूतालयं प्रोक्तं लयनाल्लिङ्गमुच्यते ।।२१२।।

इति रौरवतन्त्रे क्रियापादे नित्यपूजाविधिः
एकोनषष्टितमः पटलः ।।

ऋद्धा चैव निरुद्धी च जातकाशी स्वरूपिणी ।।
अस्त्रशक्तिरिति प्रोक्ता अर्चयेद्देवसंनिधौ ।।'
('कामिके' इति **सकलागमसारसंग्रहे** पृ० ९७)

[१३] हर्षणी — ज.

[१४] अरिष्टिमङ्गिरा — ज.

[१] अस्त्रेशक्ति० — ज.

[२] प्रोक्तमर्चयेद्देवि० — ज.

[३] आकाशलिङ्ग० — ज;
'आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयः सर्वभूतानां लयनाल्लिङ्गमुच्यते ।।'
(**शिवधर्मे** पूर्वे ३.२६)

षष्टितमः पटलः

[1]मठप्रतिष्ठाविधिः

[2][मठप्रवेशः शिवकुम्भस्थापनं च]

प्रतिष्ठादिदिने रात्रौ [3]प्रवेशश्चाभिधीयते।
मण्टपादीन्विधायाथ शिवकुम्भं च[4] तद्गतम् ॥१॥
[5]विलिप्य गोमयेनात्र सबाह्याभ्यन्तरं [6]मठम्।
[7]पुष्पस्रग्वस्त्रभूषाढ्यं कृत्वा तोरणभूषितम् ॥२॥
सबन्धुर्यजमानस्तु देशिकादिपुरःसरः।
वस्त्रयुग्मावृतं स्कन्धे[8] शिवकुम्भं द्विजन्मनः[9] ॥३॥
वेदवाद्यरवैश्चैव मठं कृत्वा प्रदक्षिणम्।
[10]किंचिद्विलम्ब्य तस्याग्रे देशिकं तपसान्वितम् ॥४॥
मठं प्रवेशयेत्[11] कर्ता सुलग्ने कृतमङ्गलः।
चतुष्के विन्यसेत्कुम्भं धान्यस्थमु[द]गाननम् ॥५॥

[12][दक्षिणादानम्]

दक्षिणां च [13]ततो दद्याद्विप्र[14]दैवज्ञशिल्पिनाम्।

---

[1] अयं पटलः आर् इ ३२५१९ इत्यङ्किते ताल-पत्रकोशे ६६तमे पत्रे दृश्यते।; एतस्मिन्विषये **अचिन्त्यविश्वसादाख्ये** ७३. उत्तरकारणे १८. **सूक्ष्मे** ७९ पटला द्रष्टव्याः।

[2] 'शिवकुम्भं च संस्थाप्य लेपयेद्गोमयेन तत्।
बाह्ये चाभ्यन्तरे चापि पुष्पगन्धसुशोभितम् ॥
पताकातोरणादींश्च कुर्यात्तत्र विशेषतः।
सुहृद्भिर्बहुभिः सार्धं तत्कर्ता गुरुपूजकः ॥
यजमानः सुलग्ने तु स्नातश्च कृतमङ्गलः।
चतुष्कुम्भान्न्यसेद्धीमान्वेदिकायामुदङ्मुखान्'
(**अचिन्त्यविश्वसादाख्ये** ७३.१३ उ०–१६ पू०)

[3] प्रवेशं चाभि — झ.

[4] अत्र 'संपाद्य' इति पदमध्याहृत्य व्याख्येयम्।

[5] विलिप्ते होमयेत्तत्र — झ; सोमशम्भुपद्धतिमनुसृत्यात्र पाठः साधितः।

[6] 'आगन्तुकानां सर्वेषां नैष्ठिकानां निवासभूः।
अन्नपानीयसंयुक्तं केवलं वा मठं स्मृतम् ॥'
(**अचिन्त्यविश्वसादाख्ये** ७३.३);

[7] पुष्पमृयस्त्र भूषाढ्यां — झ.

[8] अत्र 'वाहयित्वा' इति पदमध्याहृत्य 'द्विजन्मनः स्कन्धे शिवकुम्भं वाहयित्वा' इति व्याख्येयम्।

[9] शिवकुम्भं च ज . . . — झ; अत्र पाठः सोमशम्भुपद्धतिमनुसृत्य साधितः।

[10] किंचिद्वीळबुदस्याग्रे — झ; अत्रापि पाठः सोमशम्भुपद्धतिमनुसृत्य साधितः।

[11] कर्त लग्ने च कृ० — झ.

[12] 'ब्राह्मणानां च दानं च दैवज्ञाय विशेषतः।
शिल्पिने च ततो दद्याद् यथाविभवविस्तरम् ॥'
(**अचिन्त्यविश्वसादाख्ये** ७३.१६ उ०, १७ पू०);

[1][मण्डले कुम्भादिपूजा]

पूर्वतः पूजयेत्कुम्भान्वास्तुं द्विकरमण्डले[2] ॥६॥
[3]जगत्यां पादपीठे च [4]जङ्घायां च कपोतके।
[5]छदने च यथासंख्यं निवृत्त्यादिकला न्यसेत् ॥७॥
ततः शक्तिं समभ्यर्च्य हृदैव द्वारपालकान्।
[6]वेद्यां वाह्य स्वसंज्ञाभिः पूजयेद्धचानपूर्वकम्[7] ॥८॥

[8][होमो दिग्बलिः कुम्भतोयाभिषेकश्च]

[9]अग्न्यागारमथासाद्य तर्पयेद्वास्तुदेवताः।

'आचार्यसाधकादीनां दापयेद्वस्त्रभूषणम्।'
सूक्ष्मे ७९ (टि. १९१. पृ० ४१६)

[13] तते — झ.

[14] ०देवज्ञ० — झ.

[1] 'पूजयेत्पूर्वतः कुम्भान्वास्तुं द्विकरमण्टपे।
जगत्यां पादपीठे च जङ्घा चैव[यां च] कपोतके ॥
भेदेन च[छदने च]यथासंख्यं निवृत्त्यादिकला न्यसेत्।
हृदयेन समभ्यर्च्य शक्तिदिक्पालकानपि ॥
व्या[प्यावाह्य]स्वसंज्ञाभिः पूजयेद्धचानपूर्वकम्।'
(**अचिन्त्यविभ्वसादाख्ये** ७३.१७ उ०–१९);
'लाजपुष्पैश्च दर्भैश्च विकिरेत्तु विशेषतः।
तन्मध्ये पद्ममालिख्य साष्टपत्रं सकर्णिकम् ॥
ससूत्रान्सापिधानांश्च वस्त्रयुग्मेन वेष्टितान्।
फलपल्लवसंयुक्तान्स्वर्णरत्नादिगर्भितान् ॥
नव कुम्भांश्च संस्थाप्य मध्यकुम्भे शिवं यजेत्।
पूजां पूर्वोक्तवद्धीमान्गन्धादिभिर्यथाक्रमम् ॥
विद्येशान्परितो यष्ट्वा पूर्वादीशान्तकं क्रमात्।
गन्धपुष्पैश्च धूपैश्च नैवेद्यान्तैः प्रपूजयेत् ॥
तोरणं द्वारकुम्भांश्च यागपूजां समाप्य च'
(**सूक्ष्मे** ७९ (टि. १९१. पृ. ४१६)

[2] वास्तूंश्चाङ्गारमण्डले — झ; सोमशम्भुपद्धत्यनुसारेणात्र पाठः संघटितः।

[3] जगद्यां — झ.

[4] जङ्घायाश्च — झ.

[5] विताने च तथा संख्या — झ; सोमशम्भुपद्धतिमनूसृत्यात्र पाठः साधितः।

[6] व्याव्यावाह्या — झ; अत्रापि सोमशम्भुपद्धतिमनुसृत्य पाठः साधितः।

[7] एतत्पटलस्थाः १–८ श्लोकाः सोमशम्भुपद्धतिस्थमठप्रतिष्ठाविधिश्लोकाश्च प्रायेण सदृशा दृश्यन्ते।

[8] 'वह्निगेहं समासाद्य तर्पयेद्वास्तुदेवताः।
निवृत्त्यादिकलाश्चापि द्वारपालान्स्वमन्त्रकैः ॥
दत्त्वा दिग्बलिमाचम्य सकलीकृतविग्रहः।
मधुराम्रकपित्थैश्च बीजपूरफलैस्तथा ॥
बदरामलवार्ताकनारङ्गलिकुचादिभिः।
संस्थाप्य[संस्नाप्य] स्नापयेत्कुम्भजलैरुपरि चालयम् ॥'
(**अचिन्त्यविभ्वसादाख्ये** ७३.२०–२२);
'चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं तथा।
अघोरास्त्रं क्षुरिकास्त्रं जप्त्वा वै दक्षिणोत्तरे ॥
नृत्तगेयसमायुक्तमाचार्यो होममाचरेत्।
संस्कृत्य विधिना कुण्डं शिवाग्निं विधिना नयेत् ॥
अग्निमध्ये समावाह्य शिवमावरणैर्युतम्।
दत्त्वा नैवेद्यधूपादीन् मूलेनाज्यं तु होमयेत् ॥
समिल्लाजांश्च सक्तूंश्च सर्षपं च यवं तिलम्।
वेणुमुद्गं च निष्पावं माषमेकादश क्रमात् ॥
ईशानाद्यस्त्रपर्यन्तं मन्त्रमेकादशं हुनेत्।
शतमर्धं तदर्धं वा प्रतिद्रव्यं तु होमयेत् ॥

निवृत्त्यादिकलाश्चापि द्वारपालान्स्वशम्बरैः ।।९।।
दत्त्वा दिग्बलिमाचम्य सकलीकृतविग्रहः ।
बीजपूराम्रमालूरैर्नारङ्गैश्च कपित्थकैः ।।१०।।
बदर्यामलवार्ताकैर्दाडिमैः सकपर्दकैः ।
स्नापयेच्च घटाम्भोभिरुपरिष्टान्मठालयम् ।।११।।

[1][मठस्य कर्तृनामकरणम्]

विभूतिस्थितिहेत्वर्थं संतानादिविवृद्धये ।
तदर्थं कीर्तयेन्नाम कर्तृनामाङ्कितं मठम् ।।१२।।

[2][गर्भस्थापनम्]

गर्भन्यासं प्रवक्ष्यामि [3]शृणु भार्गव सुव्रत ।

द्रव्यान्ते व्याहृतिं हुत्वा महापूर्णाहुतिं हुनेत् ।।
एवं जागरणं रात्रौ प्रभाते स्नानमाचरेत् ।।
नित्यकर्म पुरा कृत्वा मठालयं प्रवेशयेत् ।
मठस्य प्रस्तरे देशे त्रिसूत्रैर्दर्भमालया ।।
वस्त्रयुग्मेन परितो वेष्टयेद्दिग्ध्वजेन च ।
वितानैश्च समाच्छाद्य मठस्योर्ध्वमलंकरेत् ।।
पञ्चमृद्भिश्च काषायैर्गव्यैश्चैवाभिषेचयेत् ।
मठान्तर्जगतीकण्ठपट्टिकाङ्घ्रिकपोतकम् ।
एतेषु पञ्चस्थानेषु सुगन्धेन विलिप्य च ।।
निवृत्त्यादिकलामन्त्रानर्चयित्वा क्रमेण तु ।
धूपदीपादिकं दत्त्वा द्वारे द्वाराधिपान्यजेत् ।।
ततो यागं समापाद्य पूर्ववत्पूजयेत्क्रमात् ।
प्रायश्चित्तं ततो हुत्वा अग्निस्थान्योजयेद्घटे ।।
वह्निं विसृज्य परिधिविष्टरस्थान्विसर्जयेत् ।
शालां प्रवेशयेत्कर्ता सुमुहूर्ते सुलग्नके ।।
दानं कुर्याद्विशेषेण यथावित्तानुसारतः ।
प्रधानकुम्भं शिरसा[वाहयित्वा] स्वबन्धुभिः ।।
मठं प्रदक्षिणं कृत्वा वाद्यमङ्गलघोषकैः ।
निधाय कुम्भं संस्थाने कर्ता नत्वा घटस्थितम् ।।
वेद्या उपरि मध्ये तु गुरुः संयोज्य सेचयेत् ।
तत्तत्कुम्भजलेनैव तत्तत्स्थानेऽभिषेचयेत् ।।
नैवेद्यं धूपदीपादीनुपचारान् समाचरेत् ।
सर्वद्रव्यसमृद्ध्यर्थं सर्वज्ञानफलार्थकम् ।।
मठं प्रवेशयेत्कर्ता फलद्रव्याणि संस्पृशेत् ।
उत्तराभिमुखः स्थित्वा चिन्तयेत्परमेश्वरम् ।।
गुरुसमीपमासाद्य पूजयेद्भक्तिमार्गतः ।
गुरुं प्रणम्य तत्कर्ता तस्मै दद्यात्सुदक्षिणाम् ।।
साधकाचार्यभक्तानां दक्षिणां दापयेत्ततः ।'
(**सूक्ष्मे** ७९ (टि. १९१ पृ० ४१७, ४१८)

[1] प्राक्तनश्लोकाष्टकस्य सोमशम्भुपद्धतिस्थमठप्रतिष्ठाविधिश्लोकसदृशत्वात् स भागो मातृकायामविद्यमानस्तदीयैः श्लोकैरेव पूरितः ।

[2] 'विभूतिस्थिरहेत्वर्थं संतानादिविवृद्धये ।
कीर्त्यर्थं कीर्तयेन्नाम कर्तृनामपुरःसरम् ।।
एकं मठं सुसंज्ञातं कुर्याद्वै देशिकोत्तमः ।
एवं मठप्रतिष्ठा च कार्या वै नन्दिकेश्वर ।।'
(**अचिन्त्यविभ्वसादाख्ये** ७३.२३, २४);
'मठस्य नाम कृत्वा तु कर्तृनामाङ्कितं मठम् ।
एवं यः कुरुते मर्त्यः सोऽन्ते सायुज्यमाप्नुयात् ।।'
सूक्ष्मे ७९ (टि. १९१. पृ० ४१९)

[3] एतस्मिन्विषये **अंशुमत्काश्यपे** २५, **अजिते** १७, **पूर्वकामिके** ३१, **पूर्वकारणे** ६, **दीप्ते** ४, **सुप्रभेदे** क्रियापादे २० पटला द्रष्टव्याः ।

[3] शृणु कौशिक सुव्रत — झ.

[१]आलये विन्यसेन्मन्त्री गर्भं तन्त्रेण मन्त्रतः ॥१३॥
वास्तु गर्भेण संयुक्तं कुरुते सर्वसंपदः[२]।
[३]यद्यत्क्रियाविधिं कुर्यात्तद्गर्भाविष्ट उच्यते ॥१४॥
प्रासादे मण्टपे चैव प्राकारे गोपुरे तथा।
महाविमाने शालायां [४]शयस्थाने च विन्यसेत् ॥१५॥
[५]प्रासादस्योचितं गर्भस्थापनं वक्ष्यतेऽधुना।
द्वारस्य दक्षिणस्थाने वास्तु[६]मूले तु विन्यसेत् ॥१६॥
[७]कवाटयोरर्गलयोर्विन्यसेत्तु विशेषतः।
सौवर्णं [८]राजतं ताम्रं कांस्यं वापि यथाक्रमम्[९] ॥१७॥

इति रौरवे क्रियापादे [१०]मठप्रतिष्ठाविधिः षष्टितमः पटलः।

---

[१] आलयेद्विन्यसेन्मन्त्रिगर्भमन्त्रेण — झ.
[२] संपदान् — झ.
[३] यच्चत् क्रियाविधिकार्या तद्गर्भाष्टिवमुच्यते — झ.
[४] शयनस्थानविन्यसेत् — झ; शयः—शयनमित्यर्थे-ऽत्र वर्तते।
[५] प्रासादस्य तु गर्भे यत् स्थापनं — झ.
[६] मूलं तु — झ.
[७] कवटयोरर्गलये विन्यसे तु — झ.
[८] रजितं — झ.
[९] अत्र गर्भन्यासविधिरतीव संक्षेपेण प्रोक्त इति भाति। अयं विषयो 'यथाक्रमम्' इत्यनेन सूच्यते। मठप्रतिष्ठाविधिपटलपुष्पिकायाः प्रागस्य विषयस्य प्रस्तुतत्वाद् मठविषये गर्भन्यासप्रकारोऽवश्यं सूचनीयः सोऽपि विसृष्टः। आगमान्तरेषु गर्भफेलास्थापनं होम इत्यादिविषया वर्ण्यन्ते।
[१०] मातृकायां 'मण्टपप्रतिष्ठाविधिः' इति विद्यते।

एकषष्टितमः पटलः

[1]अष्टबन्धविधिः

[2]**अतः परं प्रवक्ष्यामि अष्टबन्धविधिक्रमम् ।**
लिङ्गपीठान्तरे [3]योग्यं [4]गुह्याष्टं चाष्टबन्धनम्[5] ॥१॥
[6]**अपक्वं पक्वमेवं तु द्विविधं बन्धयेत्क्रमात् ।**

[7][अष्टबन्धहीने दोषः]

अष्ट[8]बन्धविहीनं तु राजराष्ट्रस्य दोषकृत्[9] ॥२॥

---

[1] अयं पटलः टि. ४९५.१७०–१७३ पृष्ठेषु, टि. ५१६.१६३–१६५ पृष्ठेषु, आर. ई. ३९७६४ इत्यङ्किते तालपत्रकोशे 'गु' इति निर्दिष्टे पत्रे, टि. १००९.१०३–१०५ पृष्ठेषु, आर्. ई. ३६९६७ इत्यङ्किते तालपत्रकोशे ४०–५३ पत्रेषु च दृश्यते। एतस्मिन्विषये **अनलागमे** (टि. १००९.३०४–३१० पृष्ठेषु), **कामिके** (टि. ७५१.११२–११४ पृष्ठेषु), **पूर्वकारणे** १३६ तमे पटले, **उत्तरकारणे** २३, ४२ तमयोः पटलयोः, **चन्द्रज्ञाने** (टि. १००९.१०५–१०८ पृष्ठेषु) **दीप्ते** ५७ तमे पटले, **निश्वासतन्त्रे** (टि. १००९.१००, १०१ पृष्ठयोः), **बिम्बागमे** (टि. १००९.१०२, १०३ पृष्ठयोः), **भीमसंहितायां** (टि. १००९.२१–२४ पृष्ठेषु), **मकुटे** (टि. ४६०.२४–६६ पृष्ठेषु), **योगजे** (टि. १००९.१०८–११० पृष्ठेषु), **वातुले** (टि. ७५१.१११, ११२ पृष्ठयोः), **शर्वोक्ते** (टि. ८२९.८७–९६ पृष्ठेषु), **संतानसंहितायां** (टि. ८२९.१४४–१४७ पृष्ठेषु), **सहस्रे** (टि. ३४.१–१४१ पृष्ठेषु, **स्वायम्भुवे** (टि. १३३.८१–८७ पृष्ठेषु च दृश्यमानोऽष्टबन्धनविधिर्द्रष्टव्यः।

[2] अथ वक्ष्ये विशेषेण — प.

[3] अत्र 'कर्तुं' इति पदमध्याहृत्य व्याख्येयम्। 'योज्यं' इति पाठश्चेत् सुष्ठु।

[4] गुह्यानि अष्ट यस्मिंस्तदिति बहुव्रीहिसमासोऽत्रावगन्तव्यः। 'गुह्याष्टकं' इत्यस्य पदस्य वृत्तार्थं 'गुह्याष्टं इति प्रयोग इति भाति।

[5] ०बन्धकम् — 'ड' पाठान्तरम्। अष्टबन्धनशब्दार्थविवरणम् ——
'अकारः सृष्टिरूपं तु ष्टकारः स्थितिरूपकम्।
बकारः संहृतिश्चैव तिरोभावोऽन्धकारकः ॥
अनुग्रहो नकारश्च बिन्दुःसर्वत्र साधकः।
इत्येवं मन्त्रतन्त्रैश्च भावनं संधिबन्धनम् ॥'
(**पूर्वकारणे** १३६.१ उ०–३ पू०)

[6] अपक्वं पक्वमेवं तु द्विविधं बन्धनक्रमम्।
पक्वं तु पाकयोग्यं स्यादपक्वं मर्दनं भवेत् ॥
पक्वापक्वपदं ज्ञात्वा बन्धयेन्मुदृढं बुधः।
(**सहस्रे** टि. ३४. पृ० १४);
अपक्वापक्व० — अ, ट, ड; पक्वापक्वभेदं — ठ; पक्वापक्वमेवं — प.

[7] 'अष्टबन्धविहीने च पूर्वे राष्ट्रं विनश्यति।
आग्नेय्यामग्निदग्धं तु याम्ये च मृतिरुच्यते ॥
ग्रामनाशं तु नैर्ऋत्यां वारुण्यां वर्षवर्जितम्।
सर्वनाशं तु वायव्यां स्त्रीणां नाशं तु सौम्यके ॥
ऐशान्यां धननाशः स्यात्सर्वदोषः प्रवर्तते।'
(**पूर्वकारणे** १३६.पृ० ६२३);
'पूर्वे तु कलहं विद्यादाग्नेय्यामग्निदाहकम्।
याम्ये तु व्याधिपीडा च नैर्ऋत्यां ग्रामनाशनम् ॥

आग्नेय्या[1] मग्निदग्धं च याम्ये[2] व्याधिभिरुच्यते ।
[3] ग्रामनाशस्तु [4] नैर्ऋत्यां वारुण्यां वर्षवर्जितम्[5] ।।३।।
सस्य[6] नाशस्तु वायव्यां [7] स्त्रीविनाशस्तु सौम्यके ।
[8] ऐशान्यामर्थनाशस्तु[9] [10] ऐन्द्रे स्यादाभिचारकम् ।।४।।
[11] विदिशि चैव विच्छिन्ने [12] ज्वरमारीप्रवेशनम् ।
[13] द्वादशाङ्गुलविच्छिन्ने [14] पर्यष्टकदलान्विते[15] ।।५।।
[16] अष्टबन्धविहीने तु [17] नित्यनैमित्तिकेऽपि च ।
[18] बलिर्नित्योत्सवं चैव [19] दक्षिणं स्नपनं तथा[20] ।।६।।
उपचाराणि सर्वाणि [21] निष्फलत्वमवाप्नुयात् ।
[22] ब्रह्मभागे[23] तु निर्माल्यं ब्रह्मवर्गविनाशनम् ।।७।।

---

[1] वारुण्यां वर्षनाशः स्याद्वायव्यां सस्यनाशनम् ।
सौम्ये चैवार्थनाशः स्यादैशान्यां पुत्रनाशनम् ।।
परितो बन्धहीने तु सर्वनाशकरं भवेत् ।'
(**सहस्रे** टि. ३४. पृ० ३)

[2] ०बन्धविहीने — अ, ट, ठ, ड; ०बन्धनहीने — प.

[3] दोषकम् — प.

[4] ०मग्निबन्धं वा — अ, ट, ठ, ड; ०मग्निदग्धं तु — प; 'दग्धं' इत्यत्र भावे क्तप्रत्ययः दाह इत्यर्थः । अत्र 'स्यात्' इति पदमध्याहृत्य व्याख्येयम् ।

[5] 'व्याधिभिः' इत्यस्यानन्तरं 'पीडा' इति पदमध्याहृत्य व्याख्येयम् ।; यं व्याधिरुच्यते — प.

[6] ग्रामनाशं तु — अ, ट, ठ, ड; ग्रामनाशं च — प.

[7] नैर्ऋत्यां वारुण्या वर्ष० — ठ.

[8] 'वर्जितम्' इत्यत्र भावे क्तप्रत्ययः; 'वर्जनम्' इत्यर्थः ।; वरुणवर्जितम् — प.

[9] ०नाशं तु — अ, ट, ठ, ड, प.

[10] स्त्रीविनाशं तु — अ, ठ, ड; स्त्रीविनां तु — ट; स्त्रीनाशं तु — प.

[11] ईशान्ये अर्थ० — प.

[12] ०नाशं तु — अ, ट, ठ, ड; ०नाशं च — प.

[13] ऐन्द्रस्यादभि — ट; ऐन्द्रस्याष्टाभि० — ठ, प.

[14] विदिग्वं चैव — ठ; विदिग्वन्तेव — प.

[15] 'ट' मातृकायां पञ्चमश्लोकस्य द्वितीयतृतीयपादौ न दृश्येते ।; ज्वरमारिविनाशनम् — अ, ठ; ज्वरमारीविनाशनम् — ड; ज्वरमारि प्रवेशयेत् — प.

[16] द्वादशाङ्गुलि — अ, ठ.

[17] परियाष्टकतान्वितम् — प.

[18] ०दलान्वितम् — अ, ट, ठ, ड.

[19] 'अष्टबन्धनहीने तु पूजानैवेद्यमेव च ।
बलिर्नित्योत्सवं चैव नमस्कारप्रदक्षिणम् ।।
नृत्तगीतं च वाद्यं च नित्यनैमित्तिकं तथा ।
उपचाराणि सर्वाणि निष्फलं तु विधीयते ।।'
(**पूर्वकारणे** १३६.पृ.६२७);
अष्टबन्धनहीने — प.

[20] नित्ये नैमि० — अ, ठ.

[21] बलिर्नित्योत्सवं — अ, ट, ठ, ड, प.

[22] प्रदक्षिणस्नपनं — ठ; प्रदक्षिणं स्नपनं — प; 'प्रदक्षिणं' इत्यत्र 'दक्षिणं' इति वृत्ताय प्रयुक्तमिति भाति ।

[23] षष्ठश्लोकस्योत्तरार्धानन्तरं 'अ, ड' मातृकयोः 'नित्यहोमादिकर्माणि' इति पाद एकोऽधिकतया दृश्यते । 'ट' 'मातृकायां 'होमादीनि सर्वाणि नित्यनैमित्तिकेऽपि च' इत्यर्धमेकमधिकतया दृश्यते । 'ठ, प' मातृकयोः 'नित्यहोमादिकर्माणि-नित्यनैमित्तिकेऽपि च' इत्यर्धमेकमधिकतया दृश्यते ।

[24] निष्पलं तदवाप्नुयात् — अ, ट, ठ, ड; निष्पलत्वमवाप्नुयात् — प.

[25] 'अ, ट, ड' मातृकासु ७ उ०--१० श्लोकाः २९

विष्णु[1]भागे तु निर्माल्यं [2]क्षत्रवर्गविनाशनम् ।
[3]कूर्मासने तु निर्माल्यं वैश्यवर्गविनाशनम् ॥८॥
[4]नन्द्यावर्तात्स्रवेत्तोयं शूद्रवर्गविनाशनम् ।

[5][अष्टबन्धनद्रव्याणि]

[6]लाक्षा सर्जरसः सिक्थं कुरुविन्दश्च [7]गुग्गुलुः ॥९॥
गैरिकं [8]गुलतैलं [9]च [10]अष्टबन्धं प्रकीर्तितम् ।
अष्टबन्धं ततः कृत्वा [11]संप्रोक्षणमथाचरेत् ॥१०॥

श्लोकानन्तरं दृश्यन्ते ।;
'शक्तिस्थानेषु निर्माल्यं शैवस्त्रीवर्गनाशनम् ।
विष्णुभागे तु निर्माल्यं नृपवर्गविनाशनम् ॥
ब्रह्मभागे तु निर्माल्यं ब्रह्मवर्गविनाशनम् ।
शिलाभागे तु निर्माल्यं गर्भनाशकरं भवेत् ॥
नन्द्यावर्तशिलाभागे दुर्भिक्षं तु प्रजापते ।
कूर्मासने तु निर्माल्यं सर्वनाशकरं भवेत् ॥
स्थले चैव प्रवेशे तु विट्छूद्रमर्वनाशनम् ।
पीठान्तरेषु निर्माल्यं ज्वरमारीप्रवेशनम् ॥'
(**पूर्वकारणे** १३६.पृ० ६२७)

[1] ०भागं — अ, ट, ठ, ड, प.
[2] ०भागं — अ, ट, ठ, ड, प.
[3] क्षत्र्यवर्ग० — ठ; क्षत्रिवर्ग० — प.
[4] कूर्मासनं — अ, ट, ठ, ड, प.
[5] नन्द्यावर्तस्रवं तोयं — अ, ट, ड; नन्द्यावर्तस्यवन्तोयं — ठ; नन्द्यावर्तसुवं तोयं — प; अत्र 'यदि' इति पदमध्याहृत्य 'तोयं यदि स्रवेत्' इति व्याख्येयम् ।
[6] 'द्रव्याणि चाष्टबन्धस्य क्रमाद्वक्ष्ये विशेषतः ।
तैलं तु प्रथमं विद्धि द्वितीयं गौलमुच्यते ॥
तृतीयं गैरिकं विद्याच्चतुर्थं गुग्गुलुं न्यसेत् ।
पञ्चमं मिकतां विद्धि षष्ठं स्यात्सिक्थमुच्यते ॥
सप्तमं स्यात्सर्जरसं लाक्षा चैवाष्टमं स्मृतम् ।'
(**पूर्वकारणे** १३६.पृ० ६३१, ६३२);
एतस्मिन्विषये पुनः **अजिते** १८.२१६–२१८ श्लोकास्तदीयटिप्पणी. तथा रौरवोत्तरे १६.७९, ८० श्लोकौ तदीयटिप्पणी च द्रष्टव्याः ।
[6] लाक्षासर्जरसंयुक्तं कुरुविन्दं च — अ, ट, ठ, ड; 'प' मातृकायां '९ उ०, १० पू०' स्थाने अधोनिर्दिष्टाः श्लोका दृश्यन्ते —
'कार्षासतूलमहिषाज्य तु शर्कराणां (सुशर्कराभिः ?)
लाक्षामधूच्छिष्टकुरुन्दुरुक्षम् (सुकुन्दुरुष्कम् ?) ।
काषायपाषाणगुलं समानं
लिङ्गस्य पीठस्य विलाष्टबन्धम् ॥'
'श्वेतगुग्गुलुशर्करचूर्णयो-
र्माहिषं नवनीतं च माक्षिकम् ।
उलूखलै (उलूखले ?) मूसलैर्दृढघट्टना-
त्पाकयोगवशाद्दृढबन्धनम् ॥'
'लाक्षासर्जरपाषाणं समिद्धं (समिक्थं ?) कुरुविन्दकम् ।
गुग्गुलुं गैरिकं चैव गुलं तैलमिहोच्यते ॥'
'लाक्षागुग्गुलुपाषाणं शङ्खं च कदलीफलम् ।
मधूच्छिष्टं तु संयुक्तं कारयेत्पञ्चबन्धनम् ॥
'लाक्षागुग्गुलुपाषाणं माहिषं नवनीतकम् ।
त्रिबन्धनमिति ख्यातं पक्वापक्वं तु बन्धयेत् ॥
[7] गुगुलुम् — अ, ट, ठ, ड.
[8] गुरुतैलम् — ट.
[9] वा — अ, ट, ठ, ड.
[10] अष्टबन्धशब्दस्यास्मिन्पटले क्लीबे प्रयोगो दृश्यते । आगमेषु लिङ्गादिविषये व्यत्यासेन प्रयोगो बहुशो दृश्यत इत्ययं विषयः **रौरवे** प्रथमभागे ६९ तमे पृष्ठे टिप्पण्यां निर्दिष्टः ।
[11] संप्रोक्षणं धारयेत् — प.

[1][अष्टबन्धने कालोऽङ्कुरार्पणं च]

[2]**दिनवारमुहूर्तं च वर्जयेत्तु विचक्षणः।**
[3]**स षाण्मासावलग्नेषु[4] बन्धयेदङ्कुरं विना ॥११॥**
[5]**इत ऊर्ध्वं सुबन्धश्चेद्बन्धयेदङ्कुरादिकम्।**
सर्वमासेषु कर्तव्यमष्ट[6]बन्धं तु कारयेत् ॥१२॥
[7]**स्वयम्भुदैविके चैव [8]मानुषे लिङ्ग उच्यते।**

[9][यागमण्डपः, तत्र वेदिकाकुण्डकल्पनं च]

[10]**यागमण्डपमेवोक्तं चतुर्द्वारसमायुतम् ॥१३॥**
द्वात्रिंशत्स्तम्भमेवोक्तं षोडशस्तम्भमेव वा[11]।
द्वादशस्तम्भमथवा तन्मध्ये वेदिसंयुतम्[12] ॥१४॥

---

[1] 'दिनवारमुहूर्तं च वर्जयेत्तु विचक्षणः।
सर्वमासेषु कर्तव्यमष्टबन्धनकर्म च ॥'
(**पूर्वकारणे** १३६.पृ.६२०);
'दिनवारमुहूर्तं च वर्जयेद्दैशिकोत्तमः।
षण्मासादूर्ध्वमेवं चेदष्टबन्धविहीनके ॥
अङ्कुरं मासपक्षर्क्षे अष्टबन्धं समाचरेत्।'
(**चन्द्रज्ञाने** टि. १००९.पृ.१०६);
'दृष्टमात्रेण यत्रैव वसुबन्धं न्यसेद्यदि।
नैव वारक्रमोपेतं मुहूर्तादीनि चाङ्कुरम् ॥
षण्मासोर्ध्वकृतं चेद्धि मुहूर्ताद्यङ्कुरान्वितम्।
विपरीतं न कर्तव्यं कृतं कर्त्रादिनाशनम् ॥'
(**योगजे** टि. १००९ पृ. १०९);

[2] 'ठ' मातृकायां ११–३० पू० श्लोका न दृश्यन्ते।

[3] 'प' मातृकायां ११ उ०, १२ पू० श्लोको न दृश्यते।

[4] स ष्वाम्मासावलग्निषु — ट; अवलग्नेषु—मध्यमेषु;
'मध्यमं चावलग्नं च मध्योऽस्त्री' अमरकोशे १२३२.

[5] इति ऊर्ध्वासुबन्धं चेद् — ञ; इति ऊर्ध्वं सुबन्धं चेद् — ट; इति ऊर्ध्वं सुबन्धयेद्बन्ध० — ड; 'सुबन्धः' इत्यनेन लक्षणयाष्टबन्धो बोध्यत इति व्याख्येयम्।

[6] ०बन्धमिहोच्यते — प.

[7] इदमर्धं 'प' मातृकायां न दृश्यते।; स्वयम्भुदैविकं — ञ. ड; स्वयम्भूर्दैविकं — ट;
'पक्वाष्टबन्धनं कुर्यान्मानुषस्य प्रजापते।
आर्षस्य दैविकस्यैवं गाणपस्य तथैव च ॥
मृदुपाकेन कर्तव्यं स्वयमुद्भूतलिङ्गके।
आर्द्रबन्धनकं कुर्यादाचार्यः सम्यगेव तु ॥
द्रव्येषु तैलं सर्पिर्वा संयोज्य पाचयेत्क्रमात्।
अतिपक्वे प्रजानाशः अपक्वे द्रव्यनाशनम् ॥
पक्वं वै पाचयित्वाथ बन्धयेल्लिङ्गपीठयोः ॥'
(**पूर्वकारणे** १३६.पृ० ६३२)

[8] मानुषं लिङ्गमुच्यते — ञ, ट, ड.

[9] 'प्रासादस्यायाम्ये तु पावकेऽपि विशेषतः।
यागमण्डपमेवोक्तं चतुर्द्वारसमन्वितम् ॥
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा।
तन्मध्ये वेदिकां कुर्याद्विस्तारार्धं तदुन्नतम् ॥
नवपञ्चैककुण्डं वा दर्पणोदरसंनिभम्।
कूटं वापि प्रपां वापि निच्छिद्रं सुदृढं कुरु ॥
अष्टध्वजसमायुक्तं स्तम्भवेष्टनसंयुतम्।
वितानतोरणैर्युक्तं मङ्गलायुधसंयुतम् ॥'
(**पूर्वकारणे** १३६.पृ० ६२८);

[10] १३ उ०–१५ श्लोकाः 'प' मातृकायामेव दृश्यन्ते।

[11] च — प.

[12] वेदिसमायुतम् — प.

नवहस्ताष्टहस्तं वा सप्तषट्पञ्चहस्तकम् ।
[1] यागशालाया विस्तारमायामं च समं भवेत् ॥१५॥
[2] अग्निकुण्डैः समायुक्तं स्थण्डिलैश्च समन्वितम् ।
वालुकैश्च सितैर्वापि अग्नेरायतनं द्विधा ॥१६॥
[3] यागार्थद्रव्यं बहुधा विधिना कारयेद्बुधः ।

[4] [कुम्भस्थापनं तत्पूजा च]

[5] वेदिमध्ये समायुक्तमष्टद्रोणैश्च शालिभिः ॥१७॥
[6] तदर्धैस्तण्डुलैः प्रोक्तं [7] तदर्धैस्तु तिलैरपि ।
[8] लाजैः पुष्पैश्च दर्भैश्च [9] कारयेत्तु विचक्षणः ॥१८॥
[10] तन्मध्ये तु [11] जलद्रोणपूर्णकुम्भैश्च संयुतम् ।
मध्यकुम्भं [12] तथातोयं वर्धनीं तस्य वामके ॥१९॥
सदाशिवं तु तन्मध्ये वर्धन्यां तु मनोन्मनीम् ।

---

[1] यागशालां च विस्तारं — प.

[2] प्रकृतस्थले 'अ, ड' मातृकयोः 'द्विधा' इत्यसंपूर्णपाठदर्शनात् तत्पूरणाय, चन्द्रज्ञान-निश्वासतन्त्र-योगजागमेषु समानाकारतया दृश्यमानं श्लोकमनुसृत्य पाठः संघटितः ।

'अग्निकुण्डैः समायुक्तं स्थण्डिलैश्च समन्वितम् । वालुकैश्च सितैर्वापि अग्नेरायतनं द्विधा ।' (**चन्द्रज्ञाने** (टि. १००९. पृ. १०७); **निश्वासतन्त्रे** (टि. १००९. पृ० १००); **योगजे** (टि. १००९. पृ. १०९)

[3] इदमर्धं 'प' मातृकायामेव दृश्यते ।

[4] 'वेदिमध्ये विशेषेण अष्टद्रोणैश्च शालिभिः ।
तदर्धैस्तण्डुलैः प्रोक्तं तदर्धैस्तु तिलैरपि ॥
लाजैः पुष्पैश्च दर्भैश्च विकिरेत्तु विशेषतः ।
पद्ममष्टदलं लिख्य पदं प्रति सकर्णिकम् ॥
मध्ये तु शिवकुम्भं स्याद्वर्धनीं तस्य वामके ।
अष्टकुम्भेषु विद्येशान्परितः पूजयेत्क्रमात् ॥'
(**पूर्वकारणे** १३६.पृ० ६२८)

[5] 'प' मातृकायां १७ उ० — ३० पू० श्लोका न दृश्यन्ते ।

[6] तदर्ध तण्डुलं — अ, ट, ड.

[7] तदर्धं तु — अ, ट, ड.

[8] लाजपुष्पैश्च — अ, ट, ड.

[9] अत्र 'स्थण्डिलम्' इति पदमध्याहृत्य व्याख्येयम् ।

[10] कुम्भमध्ये जलद्रोणं पूर्वकुम्भं च सं — अ, ट, ड.

[11] 'द्रोणद्वयघटं शम्भोः स्वर्णेनैव तु कारयेत् ।
सुदृढं रजतेनैव द्रोणपूर्णां तु वर्धनीम् ॥
शिवपूर्णघटानष्टौ ताम्रेणैव तु कारयेत् ।
आढकेनैव पूर्णाः स्युः कलशाः संप्रकीर्तिताः ।
सर्वं ताम्रेण कर्तव्यं कांस्यं वा मृण्मयं तु वा ।
शक्त्या वित्तानुसारेण लक्षणोक्तं प्रकल्पयेत् ॥'
(**सहस्रे** टि. ३४.पृ० ४२, ४३);
अत्र 'जलद्रोणपूर्णकुम्भाष्टकैर्युतम्' इति पाठो युक्त इति भाति ।;
'कुम्भमध्ये जलद्रोणमष्टकुम्भसमन्वितम् ।
मध्यकुम्भं तथातोयं वर्धनीं तस्य वामके ॥
सदाशिवं यजेन्मध्ये वर्धन्यां तु मनोन्मनीम् ।
अष्टकुम्भेषु विद्येशानधिदेवाः प्रकीर्तिताः ॥'
(**पूर्वकारणे** १३६.पृ. ६२१, ६२२)

[12] तथा योगं — अ, ट, ड.

अष्टकुम्भेषु [1]विद्येशानधिदेवाः [2]प्रकीर्तिताः ॥२०॥

[3][होमः]

अग्निकार्योक्तमार्गेण कारयेत्परितः क्रमात् ।
समिदाज्य[4]चरूंश्चैव होमयेत्तु विशेषतः ॥२१॥
समिधं सद्यमन्त्रेण आज्यं वामेन होमयेत् ।
अघोरेण चरुं हुत्वा [5]लाजं तत्पुरुषेण तु ॥२२॥
[6]तिलमीशानमन्त्रेण सर्षपं हृदयेन तु ।
शिरोमन्त्रेण भृङ्गं च शिखया माषमेव च ॥२३॥
आढकं कवचेनैव गोधूमं नेत्रमन्त्रतः ।
चणकं चास्त्रमन्त्रेण सद्याद्यस्त्रान्तमन्त्रवित् ॥२४॥
द्रव्यान्ते [9]व्याहृतिं हुत्वा [10]स्विष्टमग्नेति मन्त्रतः ।

---

[1] 'विद्येशान्' इत्यस्यानन्तरं 'यजेत्' इति पदमध्याहृत्य व्याख्येयम्। ततः 'एवम्' इति पदमध्याहृत्य 'एवमधिदेवाः प्रकीर्तिताः' इति व्याख्यानेन वाक्यपूरणं कर्तव्यम्।

[2] प्रकीर्तितः — अ, ट.

[3] 'अग्निकार्योक्तमार्गेण सर्वहोमं समाचरेत् ।
समिदाज्यचरूँल्लाजांस्तिलं सर्षपमेव च ॥
भृङ्गमाषाढकं चैव गोधूमं चणकं तथा ।
निष्पावं यवकं चैव गुलं ताम्बूलमेव च ॥
अपूपं कन्दमूलं च इक्षुकं पिष्टचूर्णकम् ।
क्षीरदधिमधून्येव नालिकेरफलत्रयम् ॥
अन्यांश्च होमयोग्यांश्च मन्त्रेणैव हुनेद्गुरुः ।
समिधं सद्यमन्त्रेण आज्यं वामेन होमयेत् ॥
अघोरेण चरुं हुत्वा लाजं तत्पुरुषेण तु ।
तिलमीशानमन्त्रेण सर्षपं हृदयेन तु ॥
शिरोमन्त्रेण भृङ्गं च शिखया माषमेव च ।
आढकं कवचेनैव गोधूमं नेत्रमन्त्रतः ॥
चणकं चास्त्रमन्त्रेण सद्याद्यस्त्रान्तकं पुनः ।
पञ्चाक्षरेण मन्त्रेण अन्यद्रव्यांश्च होमयेत् ॥
द्रव्यान्ते व्याहृतिं हुत्वा मूर्तिमन्त्रेण तत्समम् ।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
मृत्युंजयेन गायत्र्या प्रायश्चित्तं तु होमयेत् ।
बलिनैवेद्यकं दत्त्वा उपचारान्समर्पयेत् ॥
संप्रोक्षणविधानेन अन्यकर्माणि कारयेत् ।
अष्टबन्धनपाकं च कृत्वा रन्ध्रेषु बन्धयेत् ॥
कर्पूरं चन्दनं चैव लेपयेल्लिङ्गपीठके ।
दिशास्वध्ययनं विप्र चतुर्वेदाञ्शिवाङ्कितान् ॥
कुर्यादुपनिषद्वीद्रं पुराणानि परे शिवे ।
नृत्तं गीतं च वाद्यं च नैवेद्यं विविधं ददेत् ॥
एवं जागरणं रात्रौ'

(**पूर्वकारणे** १३६.पृ० ६२८, ६२९);

[4] चरुं चैव — अ, ड.

[5] 'ट' मातृकायां २२ तमश्लोकचतुर्थपादप्रभृति २४ तमश्लोकप्रथमपादान्तं न दृश्यते।

[6] 'अ, ड' मातृकयोः २३, २४ श्लोकयोः स्थाने — 'माषमीशानमन्त्रेण सर्षपं कवचेन तु ।
मुद्गमाषञ्चमेवोक्तमीशानाद्यं च मन्त्रवित् ॥'
इत्येक एव श्लोको दृश्यते। अत्र पाठः साजात्याय प्रदर्शितपूर्वकारणागमश्लोकानुसारेण साधितः।

[9] अर्च हुत्वा तु — अ; अर्चि हुत्वा तु — ड.

[10] स्विष्टमन्त्रेण मन्त्रतः — अ, ट; स्विष्टमन्त्रेण मन्त्रतः — ड; **तै. ब्राह्मणे** २.४.४.

[1]जयादिरभ्यातानं च [2]राष्ट्रभृच्च क्रम.द्धुनेत् ।।२५।।
[3]पूर्णाहुतिं च शिरसा [4]कुण्डमध्ये तु मूर्तिपैः ।

[5][कुम्भाभिषेकः]

द्वारपूजां ततः कृत्वा लिङ्गशुद्धिं समाचरेत् ।।२६।।
[6][शिवकुम्भं समुद्धृत्य वर्धनीं तु तथैव च ।]
[7]अष्टकुम्भान्समाहृत्य [8]मण्डपात्स्वस्वदेशके ।।२७।।

---

[1] जयहोममन्त्रा अभ्यातानमन्त्राश्च — **तै० संहिता** — ३.४.४.

[2] राष्ट्रभृन्मन्त्राः — **तै० संहिता** ३.४.७.

[3] पूण्याहुतिश्च — ञ.

[4] कुम्भमध्ये तु मूर्तिपान् — ञ, ट, ड.

[5] 'प्रभाते विमले सति ।
स्नात्वा गुरुर्विधानेन नित्यकर्म समापयेत् ।।
यागशालां प्रविश्याथ ऋत्विग्भिः परिचारकैः ।
यागपूजाप्रकारेण यागपूजां समाचरेत् ।।
आसनावरणेनैव शिवं साङ्गं प्रपूजयेत् ।
गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च ।।
उपचाराणि सर्वाणि प्रत्येकं तु समर्पयेत् ।
अग्निं प्रज्वाल्य संपूज्य होमं पूर्ववदाचरेत् ।।
पश्चाद्गर्भगृहं प्राप्य पुण्याहं वाचयेद्बुधः ।
पञ्चगव्येन संस्नाप्य लिङ्गपीठान्तरं क्रमात् ।।
अष्टमृत्तिकया चैव कषायोदकुशोदकैः ।
पञ्चपल्लवबिल्वैश्च प्रत्येकमभिषेचयेत् ।।
मन्त्रन्यासं ततो न्यस्त्वा नैवेद्यमुपचारकैः ।
यागशालां पुनर्गत्वा प्रायश्चित्तं हुनेत्क्रमात् ।।
पूर्णाहुतिं हुनेत्पश्चात्सर्वकर्म समापयेत् ।
मुमुहूर्ते त्वनुप्राप्ते यात्रादानं प्रदापयेत् ।।
प्रधानकुम्भमुद्धृत्य वर्धनीं च शिरोपरि ।
निधाय विद्येश्वरानष्टौ क्रमेण परिचारकाः ।।
वाद्यघोषसमायुक्तं छत्रचामरसंयुतम् ।
वेदध्वनिसमायुक्तं स्तोत्रमङ्गलवाचकैः ।।
हर्म्यप्रदक्षिणं कृत्वा सर्वभक्तजनैः सह ।
धूपदीपं पुरा कृत्वा पुष्पलाजान्प्रसारयेत् ।।
पदात्पदान्तरं गत्वा गर्भगेहं प्रवेशयेत् ।
लिङ्गे तु योजयेन्मूर्तिं वर्धनीं पीठके न्यसेत् ।।
अष्टविद्येश्वरान्सर्वांस्तत्तत्स्थानेषु योजयेत् ।
कुम्भाभिषेचनं कुर्यादुपचारसमन्वितम् ।।
आवाहनादिपूजान्तं विशेषेण समाचरेत् ।
धूपदीपं ततो दद्यान्नैवेद्यं तदनन्तरम् ।।
अष्टोत्तरशतन्यासं कुर्यात्तत्तद्विधानतः ।
स्नपनं तत्र कुर्वीत अष्टोत्तरसहस्रकम् ।।
अष्टोत्तरशतं वापि शान्तिहोमं समाचरेत् ।
महाभिषेकं कृत्वा तु चन्दनेन समर्पयेत् ।।
वस्त्रयज्ञोपवीतं च मालिकाभूषणं तथा ।
आसनावरणं चैव विशेषेणैव पूजयेत् ।।
महाहविर्निवेद्याथ प्रसन्नं पूजयेच्छिवम् ।
नृत्तं गीतं च वाद्यं च स्तोत्रमङ्गलवाचकैः ।।
प्रार्थयेत्परमेशानं क्षमस्वेत्यपि पातयेत् ।'
(**पूर्वकारणे** पृ० ६२९, ६३०);
'स्नपनं तत्र कुर्वीत तत्तत्कर्मसमन्वितम् ।
द्वारपूजां ततः कृत्वा लिङ्गशुद्धिमथाचरेत् ।।
शिवकुम्भं समुद्धृत्य वर्धनीं तु तथैव च ।
धामप्रदक्षिणं कृत्वा लिङ्गपीठे सुयोजयेत् ।।
अष्टकुम्भान्समुद्धृत्य योजयेत्तु क्रमेण तु ।
वस्त्राभरणसंयुक्तं धूपदीपसमाकुलम् ।।
वेदध्वनिसमायुक्तं स्तोत्रमङ्गलवाचकैः ।
नैवेद्यं दापयित्वैव ताम्बूलं तु निवेदयेत् ।।
मुखवासं ततो दत्त्वा'
(**योगजे** टि. १००९, पृ० १०९)

[6] इदमर्धं साजात्याय प्रदर्शितयोगजागमश्लोकमनुसृत्य संघटितम् ।

[7] 'ञ, ड' मातृकयोरस्मिन्नर्धे 'अष्टकुम्भान्' इत्येतावन्मात्रं दृश्यते । अन्ये वर्णा लुप्ताः ।

[8] मण्डपे स्व० — ट.

[1]**प्रातः प्रदक्षिणीकृत्य अभिषेकं तु कारयेत्।**
वस्त्राभरणसंयुक्तं धूपदीपसमन्वितम् ॥२८॥
[2]**वेदध्वनिसमायुक्तं [3][स्तोत्रमङ्गलवाचकैः।**
नैवेद्यं दापयित्वा तु] बलिदानं समाचरेत् ॥२९॥
[4]**स्नपनं तत्र कुर्वीत [5]पूजयेत्तु विशेषतः।**
[6]**एवं संपूज्य [7]देवेशं ज्ञापयेत च देशिकः ॥३०॥**

[8][आचार्यपूजा]

[9]**आचार्यभूषणं कृत्वा [10]स्वर्णयज्ञोपवीतकम्।**
कटकं मणिबन्धं च कर्णकुण्डलमेव च ॥३१॥
हारकेयूरसंयुक्तं हेमाङ्गुलीय[11]कादिकम्।
अञ्जनं तु [12]प्रकर्तव्यं [13]पञ्चमुद्रैरलंकृते[14] ॥३२॥

---

[1] प्रातः काले प्रदक्षिण्यामभि० — ञ, ड; प्रातः प्रदक्षिण्यामभि० — ट.

[2] 'वेदध्वनिसमायुक्तं स्तोत्रमङ्गलवाचकैः।
नैवेद्यं दापयित्वा तु बलिदानं समाचरेत् ॥
मुखवाससमायुक्तं ताम्बूलं तु निवेदयेत्।'
(**चन्द्रज्ञाने** टि. १००९. पृ० १०८);
'वेदध्वनिसमायुक्तं स्तोत्रमङ्गलवाचकैः।
नैवेद्यं दापयित्वा तु बलिदानं समाचरेत् ॥
मुखवाससमायुक्तं ताम्बूलं तत्र कारयेत्।'
(**निश्वासतन्त्रे** (टि. १००९. पृ० १०१)

[3] कोष्ठान्तर्गतो भागः साजात्याय प्रदर्शितचन्द्रज्ञानागमानुसारेण निश्वासतन्त्रानुसारेण च साधितः।

[4] यद्यपीदमर्धं 'ञ, ट, ड' मातृकासु तिसृष्वपि २६ पूर्वार्धानन्तरं दृश्यते। तथाप्यर्थानुगुण्येन ३० पूर्वार्धतया संघटितम्। साजात्याय प्रदर्शितपूर्वकारणागमवचनानुसारेण स्नपनविशेषपूजयोः प्रतिपादकमिदमर्धमत्र निवेशितम्।

[5] कारयेत्तु — ञ, ट, ड.

[6] इदमर्धं 'प' मातृकायां परं दृश्यते।

[7] देवस्य इति विज्ञाप्य देशिकः — प; विज्ञापनप्रकारः "अन्तः प्रविश्य देवसमीपं गत्वा 'ज्ञानतोऽज्ञानतो वापि शास्त्रोक्तमकृतं हि यत्।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥' इति विज्ञाप्य'
(**शिवागमशेखरे** द्वितीयभागे पृ. ३६५)

[8] 'आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः।'
(**पूर्वकारणे** पृ० ६२२);
'आचार्यं पूजयेत्तत्र यथाविभवसंयुतम्।
उष्णीषमुत्तरीयं च परिधानं तथैव च ॥
हेमाङ्गुलीयकं चैव गन्धपुष्पं तथैव च।
मकुटं कुण्डलं चैव हारकेयूरकं तथा ॥
कटकं कटिसूत्रं च आचार्यस्य प्रदापयेत्।'
सुप्रभेदे क्रियापादे ३६.१०९ उ०–१११)

[9] 'हेमाङ्गुलीयकटकं केयूरं कुण्डलं तथा।
हेमयज्ञोपवीतं च पञ्चाङ्गभूषणं स्मृतम् ॥'
(**शैवागमपरिभाषामञ्जरी** ५.१७९ उ०, १८० पू०)

[10] अत्र 'तस्मै दद्याद्' इति पदद्वयमध्याहृत्य 'व्याख्येयम्।

[11] ०कादिभिः — ञ, ट, ठ, ड, प.

[12] अत्रापि 'तस्मै दद्याद्' इति पदद्वयमध्याहृत्य 'नेत्रप्रसाधनयोग्यमञ्जनं प्रकर्तव्यम्। तच्च कृत्वाचार्याय दद्यादिति व्याख्यानेन वाक्यं समापनीयम्।

तिलकं चन्दनं चैव[१] [२]देशिके शिवभावनाम् ।
[३]आचार्यदक्षिणाहीने क्रिया निष्फलतां व्रजेत् ॥३३॥
क्रिया शरीरमित्युक्तं दक्षिणा [४]जीव उच्यते ।
[५]क्रिया तु दक्षिणाहीना निर्जीवत्वात्तु निष्फला[६] ॥३४॥
तस्मात्सर्वप्रयत्नेन आचार्यं पूजयेत्ततः ।
देवे रुष्टे गुरुस्त्राता [७]गुरौ रुष्टे न कश्चन ॥३५॥
[८]देवेभ्योऽप्यधिकं तस्माद्गुरुं यत्नेन पूजयेत् ।
[९]देवकोपाद् गुरुस्त्राता [१०]गुरोः कोपान्न साधुता ॥३६॥
[११] देवेभ्योऽप्यधिकं तस्माद्गुरुं यत्नेन पूजयेत् ।
पञ्च[१२]निष्काधमा प्रोक्ता दशनिष्का तु [१३]मध्यमा ॥
[१४] उत्तमा त्रिगुणा प्रोक्ता आचार्याय प्रदापयेत् ॥३७॥

इति [१५]रौरवेऽष्टबन्धविधिरेकषष्टितमः पटलः ।

---

[१३] पञ्चमुद्राः —
'रुद्राक्षमुपवीतं च उष्णीषं चोत्तरीयकम् ।
भस्म चैवादिशैवानां पञ्चमुद्राः प्रकीर्तिताः ॥'
(**शैवागमपरिभाषामञ्जरी** ५.१७५ उ०, १७६ पू०);
अत्र मुद्राशब्दस्य स्त्रीलिङ्गस्य क्लीबे प्रयोग इति भाति।
आगमेषु लिङ्गव्यत्यासो बहुशो दृश्यत इति **रौरवे** प्रथमभागे ६९ तमे पृष्ठे टिप्पण्यां निर्दिष्टम् ।

[१४] 'अलंकृते' इत्येतत्पदस्य 'देशिके' इत्यस्मिन् पदे विशेषणतयान्वयो वक्तव्यः ।

[१] अत्रापि 'आचार्याय दद्याद्' इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[२] देशिकं शिवभावयेत् — अ, ट, ठ, ड, प; अत्र 'कुर्याद्' इति पदमध्याहृत्य व्याख्येयम् ।

[३] ३३ उ०–३७ श्लोकाः 'प' मातृकायामेव दृश्यन्ते ।

[४] जीवमुच्यते — प.

[५] क्रियादक्षिणहीनानि — प.

[६] ०त्वा तु निष्पलम् — प.

[७] गुरो रुष्टे — प.

[८] देवितोप्यधिकं — प.

[९] देव्यःकोपात् — प.

[१०] गुरो कोपात्न्न साधता — प.

[११] देवितोऽप्यधिकं — प.

[१२] ०निष्काधमं प्रोक्त दश० — प.

[१३] मध्यमम् — प.

[१४] उत्तमं त्रिगुणं प्रोक्तं; अत्र 'एतादृशी दक्षिणा' इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[१५] रौरवेऽष्टबन्धनविधिः — ट, ठ; रौरवाख्ये महातन्त्रेऽष्टबन्धविधिः — प.

द्विषष्टितमः पटलः

[1] कृत्तिकादीपनिर्णयः

कार्त्तिके कृत्तिका[2]युक्तपौर्णमास्यां विशेषतः ।
[3]दीपोत्सवं प्रकर्तव्यं [4]राजराष्ट्रविवर्धनम् ॥१॥
एकमासे द्विनक्षत्रे अपरे दीपमाचरेत् ।
[5]पर्वयुक्ते तु नक्षत्र[6]नाथं केतुर्ग्रसेद्यदि ॥२॥

---

[1] अयं पटलः आर्. इ. ३९७९५ इत्यङ्किते ताल-पत्रकोशे २८ तमपत्रे दृश्यते। एतद्विषये **पूर्व-कारणे** १११ तमपटलो द्रष्टव्यः।;
'मासे तु कार्तिकाख्ये तु नक्षत्रे कृत्तिकाद्वये ।
पूर्णायां वाथ तद्योगे 'सर्वकामप्रसिद्धये ॥
रव्यस्तमयवेलायां दीपारोपणमाचरेत् ।
कर्तुरष्टमराश्यादिलग्नदोषनिरीक्षणम् ॥
विष्टिवैनाशिकर्क्षादिप्रेक्षणं नात्र संमतम् ।
रवेरस्तमयात्पूर्वं यामपादावसानकम् ॥
कालस्तदूर्ध्वं यामार्धपर्यन्तः काल एव वा ।
एवं निश्चित्य कालं तु'
'यां तिथिं समनुप्राप्योदयं याति च भास्करः ।
सा तिथिः सकला ज्ञेया शुक्ले कृष्णे द्विजोत्तमाः ॥
यदृक्षं समनुप्राप्य अस्तं याति दिवाकरः ।
तदुक्तं सकलं ज्ञेयं नक्षत्रेऽप्येवमेव तु ॥
एवं ज्ञात्वा प्रयोक्तव्यं सर्वकर्म द्विजोत्तमाः ।'
(**उत्तरकामिके** ८.१ उ०–५ पू०; ६२ उ०–६४);
'अथातः संप्रवक्ष्यामि कृत्तिकादीपऋक्षकम् ।
तिथिनक्षत्रभेदांश्च विस्तरेण वदाम्यहम् ॥
कृत्तिका रोहिणीमिश्रा तद्रात्रौ पूर्णिमायुता ।
राजराष्ट्रसुभिक्षं स्यात्तत्काले दीपमुत्तमम् ॥
द्विवारे खण्डिते पर्वे पूर्वं त्यक्त्वा परं ग्रहेत् ।
अर्धास्तमनवेलायां दीपोत्सवं समाचरेत् ॥
पर्व नो चेत्तु संध्यायां पूर्वेद्युर्दीपमाचरेत् ।
उत्तमं कृत्तिकायुक्तं मध्यमं रोहिणीयुतम् ॥
अथवा भरणीयुक्तं दीपं पर्वणि कारयेत् ।
केवलं पौर्णमास्यां तु कृत्तिकोत्सवमाचरेत् ॥
भरणी कृत्तिकामिश्रा तद्दिने च चतुर्दशी ।
अल्पवृष्टिश्च रोगाश्च राष्ट्रक्षोभो न संशयः ॥'
'कृत्तिका रोहिणीमिश्रा तद्दिने तु चतुर्दशी ।
संभवेत्तु चतुर्वक्त्र तदन्यवासरे चरेत् ॥
तदन्यवासरे चैव कलया पौर्णमीयुता ।
दीपोत्सवं तथा सर्वं शोभयेन्मम मन्दिरम् ॥
रोहिण्यां वा भरण्यां वा कदाचिन्मृगशीर्षके ।
पर्वसंबद्धसंध्यायां दीपोत्सवमथाचरेत् ॥'
(**पूर्वकारणे** १११.१–६; ८ उ०–११ पू०);
'दीपोत्सवविधानं तु कार्तिक्यां कारयेद्बुधः ।
भरण्यामथ रोहिण्यां सदा पर्वणि शस्यते ॥
सायंकालयुता या तु संग्राह्या दीपकर्मणि ।
संध्यायां यत्र यत्र स्यात्तत्र दीपं समाचरेत् ॥'
(**कालोत्तरे** टि० ५५६ पृ० ४६०);
'रोहिणी भरणी चैव कृत्तिका चैव पर्वयुक् ।
तास्वेव तु विशेषेण दीपारोहणमुत्तमम् ॥
कृत्तिका रोहिणीमिश्रा तद्दिने तु चतुर्दशी ।
अल्पवृष्टिश्च रोगश्च राजराष्ट्रं विनश्यति ॥
कृत्तिका रोहिणीमिश्रा तद्दिनं पर्वसंयुतम् ।
राजराष्ट्रसुभिक्षं च तद्दिने दीपमुत्तमम् ॥
रोहिण्यां वा भरण्यां वा पर्वयुक्ते निशाकरे ।
अपर्वणि कृते दीपे राजराष्ट्रं विनश्यति ॥'
(**वातुले** टि. ५५६. पृ. ४६१)

[2] ०युक्ते पौर्ण० — ढ.
[3] दीपोस्सव प्र० — ढ.
[4] राजा राष्ट्र० — ढ.
[5] 'ऋक्षत्रययुते पर्वे राहुग्रस्ते चतुर्मुख ।

तस्मिन्दिने न कर्तव्य[१]मन्यर्क्षे तु यथोक्तवत् ।
भरणी[२]ऋक्षसंयुक्तकार्तिक्यां नाचरेद्बुधः ॥३॥
रात्र्यां [३]कृत्तिकया युक्ते [४]तस्मिन्दीपं समाचरेत् ।
अन्यथा यदि कुर्वीत राजराष्ट्रस्य दोषकृत् ॥४॥
[५]भरण्या वा तु [६]रोहिण्या [७]संमिश्रा कृत्तिका यदि ।
रात्र्यां [८]कृत्तिकया युक्ते तद्रात्रौ दीपमाचरेत् ॥५॥

[कार्त्तिकमासे आर्द्रान्तोत्सवमध्ये कृत्तिकादीपः]

[९]आर्द्रान्तोत्सवमध्ये तु अन्त्ये [१०]कृत्तिकया युते ।
पूर्वे च कृत्तिकायुक्ते तस्मिन्नेव समाचरेत् ॥६॥
दिवा [११]कृत्तिकया युक्ते [१२]मध्यमं तु प्रशस्यते ।

तद्रात्रौ दीपकाले वा ग्रसेद्दीपं समाचरेत् ॥'
(**पूर्वकारणे** १११.११ उ०, १२ पू०);
'कृत्तिमासे तु कार्त्तिक्यां रात्रौ दीपं समाचरेत् ।
तद्रात्रौ राहुदृष्टश्चेद्रोहिण्यां कारयेद्बुधः ॥'
(**कालोत्तरे** टि. ५५६.पृ० ४६१);
'वृश्चिकेऽर्के विधौ तुङ्गे पूर्णायामग्निभे वृषे ।
उपरागेऽपि कुर्वीत महादीपप्ररोहणम् ॥'
(**कालप्रकाशिकायाम्** ३३.३१)

[१] नाथ केतु ग्रसेद् — ढ.
[२] ०मन्यक्षे तु — ढ.
[३] ०मिश्र संयुक्तं कार्त्तिकां नामाचरेत् — ढ.
[४] कृत्तिकायुक्ते तस्मिन् — ढ; अत्र 'युक्ते' इत्यत्र भावे क्तप्रत्ययः, 'योगे' इत्यर्थः ।
[५] तस्मिन्दीपोत्सवमाचरेत् — ढ.
[६] भरण्यां — ढ.
[७] रोहिण्यां — ढ.
[८] संमिश्रे कार्त्तिकां यादि — ढ.
[९] कृत्तिकायुक्ते — ढ; अत्र 'युक्ते' इत्यस्य 'योगे' इत्यर्थः, भावे क्तप्रत्ययः ।
[१०] सर्वमासेष्वार्द्रान्तोत्सवे प्रमाणम् —
'चैत्रादिमर्वमासेषु रौद्रर्क्षं तीर्थभं भवेत् ।'
(**अजिते** २७.१४ पू०);
'मासभं तीर्थनक्षत्रमार्द्रर्क्षं सर्वमासके ।'
(**उत्तरकामिके** ६.३ उ०);
'सर्वमासेषु कर्तव्यमार्द्रान्तमुत्सवं परम् ।'
(**पूर्वकारणे** १४२.८ उ०);
'सर्वमासेषु कर्तव्यमार्द्रान्तं स्याच्छिवोत्सवम् ।'
(**दीप्ते** ८३.२२ उ०);
'आर्द्रान्तमुत्सवं कुर्यात्सर्वमासे शिवप्रियम् ।'
(**रौरवे**, क्रियापादे १८.१ उ०);
'सर्वमासेषु कर्तव्यमार्द्रान्तं च शिवोत्सवम् ।'
(**वीरे** ४४.११ पू०);
'आर्द्रान्तं सर्वमासेषु कर्तव्यं तु शिवोत्सवम् ।'
(**सुप्रभेदे** क्रियापादे १४.१४ पू०);
आरुद्रा उत्सवमध्ये — ढ.
[११] कार्त्तिकायाय युते — ढ.
[१२] कार्त्तिकायुक्ते — ढ.
[१३] 'अथ वक्ष्ये विशेषेण कृत्तिकादीपलक्षणम् ।
संकल्प्य कृत्तिकादीपं तिथ्यृक्षवारसंयुतम् ॥
कृतिकापर्वमाकल्प्य वह्निनक्षत्रमेव च ।
तस्मिन्पर्वणि तत्रैव कृत्तिकर्क्षयुतं यदि ॥
उत्तमं त्विति विख्यातं तस्मिन्पर्वणि रोहिणी ।
मध्यमं त्विति विख्यातं भरणीसहितं तु वा ॥
अधमं त्विति विख्यातं तत्पर्व मृगशीर्षयुक् ।
कन्यमं त्विति विख्यातं निश्चित्यैवं प्रकल्पयेत् ॥'
(**पूर्वकारणे** पृ० ५६०, ११२, १–४);
'वृश्चिकेऽर्के वृषे चन्द्रे पूर्णायामग्निभे वृषे ।
दीपारोपः प्रशस्तः स्याद्वेधितर्क्षविवर्जिते ॥

अपरे चैव कुर्वीत उत्तमोत्तममेव [१]वा ।।
[२]तस्मात्सर्वप्रयत्नेन युक्तायुक्तं च कारयेत् ।।७।।

इति [३]श्रीमद्रौरवतन्त्रे क्रियापादे [४]कृत्तिकादीपनिर्णयविधिः
द्विषष्टितमः पटलः

रोहिण्यां वा भरण्यां वा दीपं पर्वणि कारयेत् ।
अपर्वणि कृतो दीपो राजराष्ट्रविनाशकृत् ।।
रव्यस्तमयवेलायां दीपारोपः प्रशस्यते ।
मध्यमो मण्डले मग्ने निन्दितः स्यात्ततः परम् ।।
अविद्धमृक्षं लभ्येत पूर्णायोगे निशामुखे ।
उत्तमोत्तममादिष्टं ब्रह्मणा दीपकर्मणि ।।'
(**कालप्रकाशिकायाम्** ३३.१८ उ०–२२ पू०);

[१] चा — ढ.
[२] तस्मा सर्व० — ढ.
[३] श्री द्रौनवतन्त्रे — ढ.
[४] कृत्तिकानिर्णयं विधिसमाप्तः — ढ.

त्रिषष्टितमः पटलः

[1]शैवोत्पत्तिः

अतः परं प्रवक्ष्यामि शैवोत्पत्तेश्च[2] लक्षणम् ।
[3]सर्वसंहारकालस्तु[4] कल्पकोटिशतं बुधाः[5] ।।१।।

[6][शिवसृष्टिः]

पुनः [7]सृष्टेस्तु काले तु [8]सकलस्तु परः शिवः[9] ।
[10]सदेशमूर्तिमास्थाय आत्मरक्षार्थचिन्तनम्[11] ।।२।।
इच्छाशक्तिं च ज्ञानं च क्रियाशक्तिं तिरोधिकाम्[12] ।
[13]मनोन्मनीं च प्रज्वाल्य [14]तच्छक्तिप्रथमोद्भवाम् ।।३।।

---

[1] अयं पटलः आर. इ २५१८७ इत्यङ्किते तालपत्रकोशे ५, ६ पत्रयोर्दृश्यते। तथा आर्. इ. ४००५२ इत्यङ्किते तालपत्रकोशे ६८ पत्रे दृश्यते। एतस्मिन्विषये **सुप्रभेदे** चर्यापादे प्रथम-पटलः; क्रियापादे ५६ पटलश्च द्रष्टव्यौ ।।

[2] शैवोत्पत्तिश्च — ण, त.

[3] **मतङ्गपारमेश्वरे** विद्यापादे २५ पटले, **स्कान्दे** शंकरसंहितायां दक्षकाण्डे २० अध्याये च सर्वसंहारकालविषयो दृश्यते।

[4] ०काले तु — ण, त.

[5] बुधः — ण, त.

[6] 'सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणम्।
योगिनामुपकाराय स्वेच्छया चिन्तितः शिवः ।।
तच्छिवे तु पराशक्तिः सहस्रांशेन जायते।
तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः ।।
आदिशक्तिसहस्रांशादिच्छाशक्तिसमुद्भवः।
इच्छाशक्तिसहस्रांशाज्ज्ञानशक्तिसमुद्भवः ।।
ज्ञानशक्तिसहस्रांशात्क्रियाशक्तिसमुद्भवः।
एता वै शक्तयः पञ्च निष्कलाश्चेति कीर्तिताः ।।
शिवसृष्टिरियं प्रोक्ता शक्तीनां सृष्टिरुच्यते।
योगिनां च यतीनां च ज्ञानिनां मन्त्रिणां तथा ।।
ध्यानपूजानिमित्ताय सकलं निष्कलं भवेत्।
तद्रूपं हि समासेन सादाख्यमिति कीर्तितम् ।।
सादाख्यं पञ्चधा प्रोक्तं तेषां लक्षणमुच्यते।
पञ्चशक्त्यादिशक्तेश्च सादाख्यस्य समुद्भवः' ।।
'सदाशिवस्तथेशश्च ब्रह्मा वै चेश्वरः स्मृतः।
ईशानश्चेति पञ्चैते तत्त्वभेदाः प्रकीर्तिताः ।।'
(**वातुलशुद्धे** १.२३ उ०–३० पू०; ३२); एतस्मिन्विषये पुनः **अजिते** १.२६–३२ श्लोका द्रष्टव्याः।

[7] सृष्टिं तु — ण, त.

[8] सकलं तु — ण, त.

[9] शिवम् — ण, त.

[10] सदाशिवमूर्तिमास्थाप्य — ण; सदाशिवकृतिमा-स्थाप्य — त.

[11] ०चिन्दितम् — ण; ०चिन्तिदम् — त; अत्र कृतवानिति शेषः।

[12] ०शक्तिनिरोधकम् — ण; ०शक्तितिरोधकम् — त.

[13] मनोन्मनीशक्तिप्रज्वाया — ण; मनोन्मनिं शक्ति-प्रज्वाल्यं — त.

[14] तच्छक्तिं प्रतिमोद्भवम् — ण, त; अत्र 'समर्ज' इति पदमध्याहृत्य व्याख्येयमिति भाति।

पराशक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः[1] ।
बिन्दोः[2]**सदाशिवस्तस्मादीश्वरः समजायत**[3] ।।४।।
तस्माद्रुद्रस्ततो[4]**विष्णुर्विष्णोर्ब्रह्मण उद्भवः ।**
[5]**तदुद्भवं**[6]**जगत्सर्वं**[7]**पश्चात्तु स्थावरोद्भवः ।।५।।**
[8]**पञ्चकृत्यस्य कारणं**[9]**परमेश इति स्मृतः ।**

[10][सप्तविधं शैवम्]

शैवं सप्तविधं प्रोक्तमुद्भवं तु प्रकीर्तितम् ।।६।।
[11]**शिवोद्भवमिति ज्ञेयं शुद्धशैवमिति स्मृतम् ।**
संक्रान्ति[12]**च समावेशसमुत्पत्त्यभिव्यक्तिकम् ।।७।।**
[13]**उपशैवानादिशैवं शैवमार्गे तु संज्ञितम्**[14] ।

---

[1] ०समुद्भवम् — ण, त.
[2] सदाशिवं तस्मा० — ण, त.
[3] ०जायते — ण, त.
[4] विष्णु विष्णुब्रह्मा च भोद्भवम् — ण; विष्णु विष्णुब्रह्मा जगद्भवम् — त.
[5] ततोद्भवं — ण, त.
[6] जगस्सर्वं — ण.
[7] पश्चास्तावरमुद्भवम् — ण; पश्चात्तत्स्थावरोद्भवम् — त.
[8] पञ्चकृत्यन्यकारेण — ण; पञ्चकृत्यं तु कारेण — त.
[9] परमेश्वरमिति स्मृतम् — ण; परमेशमिति स्मृतम् — त.
[10] 'कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ।
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।।
संक्रान्तिं काश्यपं शैवं समावेशं तु कौशिकम् ।
भारद्वाजं समुद्भूतं शिवादाधिक्यगौतमम् ।।
आगस्त्यमभिव्यक्तं तु चानादिस्तु परं स्मृतम् ।'
(**ज्ञानावरणविळक्के** प्रथमभागे ३१२ पृष्ठे 'रौरवे' इति निर्दिश्योद्धृतम् ।);
'शैवं चतुर्विधं प्रोक्तं शैवं पाशुपतं तथा ।
सोमसिद्धान्तकं चैव लाकुलं च चतुर्विधम् ।।
चतुर्वक्त्रान्महेशाच्च पुरुषाद्याननोद्भवम् ।
पूर्वं पूर्वं गुणोत्कृष्टं तत्र त्वेवं चतुर्विधम् ।।
प्रत्येकं त्रिविधं प्रोक्तं वामदक्षिणभेदतः ।
सिद्धान्ताख्येन तेषां च सिद्धान्तः श्रेष्ठ उच्यते ।।
तत्रापि शैवसिद्धान्तः सर्वेभ्यो ह्युत्तमोत्तमः ।'
(**उत्तरकामिके** २४.७८ उ०–८१);
'शैवं पाशुपतं सोमं लाकुलं च चतुर्विधम् ।
तेषु शैवं परं सौम्यं रौद्रं पाशुपतादिकम् ।।
शैवं पुनश्चतुर्भेदं वामदक्षिणमेव च ।
मिश्रं चैव तु सिद्धान्तं तेषु सिद्धान्तमुत्तमम् ।।
अष्टाविंशतिभेदेन सिद्धान्तं शृणु तत्त्वतः ।'
(**सुप्रभेदे** क्रियापादे १.२८–३० पू०);
'सप्तधा शैवमादिष्टं मत्तस्त्वं तन्मनाः शृणु ।
अनादिशैवं प्रथममादिशैवं द्वितीयकम् ।।
महाशैवं तृतीयं तु चतुर्थं चानुशैवकम् ।
अवान्तरं तु शैवं तु पञ्चमं तु विदुर्बुधाः ।।
षष्ठं प्रवरशैवं तु सप्तमं चान्यशैवकम् ।'
(**वीरे**, ९.४–६ पू०)
[11] सदाशिवोद्भव० — ण.
[12] शैवं समावेदंसमुत्तभिव्यक्तकम् — ण; शैव समापेतसमुद्भूतमव्यक्तकम् — त.
[13] उपशैवं अनादि — ण;
उपमानादिशैवं च — त.
[14] संज्ञकम् — ण, त.

[1][ईशानादिपञ्चमुखोद्भवा आगमाः, पञ्चमुखैर्दीक्षिता मुनयश्च]

[2]कौशिकः काश्यपश्चैव [3]भरद्वाजश्च नन्दिकः ॥८॥
[4]अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः[5]।
कामिकादिसहस्रान्त[6]मीशानादुद्भवं तथा ॥९॥
[7]कौशिको ब्रह्म[8]ऋषिः प्रोक्त ऊर्ध्ववक्त्रेण[9] दीक्षितः[10]।

---

[1] 'कामिकं योगजं चिन्त्यं कारणं चाजितं तथा।
दीप्तं सूक्ष्मं सहस्राख्यं चांशुमत्सुप्रभेदकम् ॥
तन्त्राणां दशकं ह्येतदुपभेदसमन्वितम्।
वेदाः साङ्गाश्च चत्वारः शिवस्योर्ध्वमुखोद्भवाः ॥
विजयं पारमेशं च निश्वासाख्यमतः परम्।
प्रोद्गीतं मुखबिम्बं च सद्योजातमुखोद्भवाः ॥
सिद्धं सन्तानसंज्ञं च नृसिंहं चन्द्रभासकम्।
विमलं चेति पञ्चैते वामदेवमुखोद्भवाः ॥
स्वायंभुवं तथा वीरं रौरवं तन्त्रमुत्तमम्।
मकुटं किरणं चैते घोरवक्त्रसमुद्भवाः ॥
ललितं च तथास्नेयं तातुलं चेति तत्त्रयम्।
सोपभेदं समुद्भूतं पुरुषाख्यमुखाम्बुजे ॥'
(**अजिते** १.१०६–१११);
'कामिकाद्यजितान्ताश्च ईशवक्त्रसमुद्भवाः।
दीप्तादिसुप्रभेदान्ताः पुरुषाख्याननोद्भवाः ॥
विजयाद्वीरतन्त्रान्ताः पञ्चैते घोरवक्त्रजाः।
रौरवान्मुखबिम्बान्ता वामदेवमुखोद्भवाः ॥
प्रोद्गीताद्यष्टतन्त्रं च सद्यवक्त्रसमुद्भवम्।'
(**उत्तरकामिके**, २४.१२७ उ०–१२९);
'कामिकाद्यजितान्तं च सद्योजातमुखोद्भवम्।
दीप्तादि सुप्रभेदान्तं वामदेवमुखोद्भवम् ॥
विजयारभ्य वीरान्तं पञ्चैते घोरवक्त्रजाः।
रौरवान्मुखबिम्बान्तं पुरुषाख्याननोद्भवम् ॥
प्रोद्गीताद्यष्टतन्त्रं च ईशाननसमुद्भवम्।'
(**पूर्वकारणे** १.६८–७० पू०);
'कामिकाद्यजितान्तं च सद्योजातमुखोद्भवम्।
दीप्तादिसुप्रभेदान्तं वामदेवमुखोद्भवम् ॥
विजयाद्यं च वीरान्तं शास्त्रं घोरमुखोद्भवम्।
रौरवाद्यं च बिम्बान्तं चोद्भूतं पुरुषात्तथा ॥
सिद्धादिवातुलान्तं च ईशानस्य मुखोद्भवम् ॥'
(**चिन्त्ये** १.६५ उ०–६७);
'पञ्चशैवाः समाख्याताः सिद्धान्ते तु प्रजापते।
प्रथमोऽनादिशैवस्तु स शैवस्तु सदाशिवः ॥
आदिशैवो द्वितीयस्तु स शिवब्राह्मणः स्मृतः।
आदौ सदाशिवेनैव दीक्षितास्त्वादिशैवकाः ॥
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः।
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ॥
कौशिकः शिवमूर्त्या तु दीक्षितः शिवगोचरः।
काश्यपस्त्वीश्वरेणैव शिखागोचरसंस्थितः ॥
ईशानेन भरद्वाजो दीक्षितो ज्योतिगोचरः।
गौतमो ब्रह्ममूर्त्या तु सावित्रीगोचरः स्थितः ॥
अगस्त्यश्चोर्ध्ववक्त्रेण दीक्षितो व्योमगोचरः।
ऋषीणामेवं पञ्चानां गोचराः संप्रकीर्तिताः ॥'
(**पूर्वकारणे** २६. १उ०–७पू०);
'कौशिकः काश्यपश्चैव भारद्वाजोऽत्रिरेव च।
गौतमश्चेति पञ्चैते पञ्चवक्त्रेषु दीक्षिताः' ॥
'कौशिकश्चोत्तरमुखे काश्यपश्चैव दक्षिणे।
भारद्वाजः पुरा ज्ञेयः पश्चिमे गौतमस्तथा ॥
अत्रिरूर्ध्वमुखे ज्ञेय एवमेतेषु दीक्षिताः'।
(**वीरे** ७, ११उ०–१२पू०; १३उ०, १४)

[2] कौशिकं काश्यपं — ण, त.
[3] भरद्वाजं च नन्दिनम् — ण, त.
[4] अगस्त्यं — ण, त.
[5] दीक्षितः — ण, त.
[6] मीशानमुद्भवं — ण, त.
[7] कश्यपं — ण; कौशिकं — त.
[8] ऋषिप्रोक्तम् — ण; रिषिप्रोक्तम् — त.
[9] ०वक्त्रेषु — ण.
[10] दीक्षितम् — त.

[1]अंशुमदादिवीरान्तं पुरुषेणोद्भवं [2]भवेत् ॥१०॥
महीपर्षिः काश्यपो हि[3] पूर्ववक्त्रेण[4] दीक्षितः[5] ।
रौरवादिकचन्द्रान्तं[6] दक्षिणानन उद्भवम्[7] ॥११॥
एकादशानां[8] रुद्राणां[9] नन्दीशो [10]वैश्यतत्कुलम् ।
अघोरेण दीक्षितस्तु[11] शुद्धशैवेन[12] नन्दिकः[13] ॥१२॥
बिम्बादिकं तु [14]सिद्धान्तं वामवक्त्रोद्भवं तथा ।
ब्राह्मणर्षिरगस्त्यस्तु[15] वामवक्त्रेण दीक्षितः[16] ॥१३॥
[17] शर्वोक्तादिकं संप्रोक्तं वातुलान्तमिति स्मृतम् ।
सद्योजातमुखोत्पन्नं भारद्वाज ऋषिस्तथा ॥१४॥
शूद्रमार्गेण संचिन्त्य सद्योजातेन[18] दीक्षितः[19] ।

[सप्तविधशैवमतस्वरूपम्]

[20]संक्रान्तिशैवं काश्यपं [21]समावेशस्तु कौशिकम् ॥१५॥

---

[1] अंशुमादिकवी — ण, त.
[2] तथा — त.
[3] महीपतिषः काश्येऽपि — ण; महीपतिरिषिमकाश्या — त.
[4] ०वक्त्रेषु — ण, त.
[5] दीक्षयेत् — ण, त.
[6] चन्द्रान्ता — ण; अत्र चन्द्रान्तमित्यनेन चन्द्रज्ञानान्तमित्यर्थो बोध्यते ।
[7] दक्षिणाननोद्भवम् — ण; दक्षिणेनाननोद्भवम् — त.
[8] एकादशं तु — ण, त.
[9] रुद्रेण — त.
[10] वैश्याग्र्यं तत्कुलं वैश्यतत्कुलम्, मध्यमपदलोपिसमासः ।
[11] तु दीक्षेण — ण, त.
[12] 'शुद्धशैवेन' इत्यस्य शुद्धशैवमार्गेण इत्यर्थोऽवगन्तव्य इति भाति ।
[13] नन्दिनम् — ण, त.
[14] अत्र 'संतानान्तम्' इति भवितव्यम् इति भाति । 'बिम्बादि संतानान्तं तु' इति पाठश्चेत्सुष्ठु ।; सिद्धान्ता — ण.
[15] ब्राह्मणो ऋषिरगस्त्येन — ण, त.
[16] दीक्षिता — ण; दीक्षितम् — त.
[17] सर्वोक्तादिकसंप्रोक्तं — ण; शर्वोक्तादिकसंप्रोक्तं — त.
[18] सद्योजातं तु — ण, त.
[19] दीक्षितम् — त.
[20] 'शैवे संक्रान्तपक्षोऽयं काश्यपाभिमतः श्रुतः ।
कौशिकः काश्यपश्चैव भारद्वाजश्च गौतमः ॥
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
कामिकादिसहस्रान्तमीशानं . . . . . था ॥
काश्यपं ब्रह्मर्षिप्रोक्तमूर्ध्ववक्त्रेण दीक्षितम् ।
संक्रान्तिशैवं काश्यपमित्येवं रौरवागमे ॥
इत्येवं तत्र संक्रान्तिसाम्यमुक्तौ तु युक्तिमत् ।
अनेकेश्वरवादादिदोष एव न संभवेत् ॥'
(**ज्ञानावरणविळक्के** ३३२ पृष्ठे 'सर्वसिद्धान्तविवेके' इति निर्दिश्योद्धृतम्)
[21] समावे कौशिकस्तथा — ण; समावे कौशिकं तथा — त;
'अथ कौशिकसिद्धान्तः समावेश इति श्रुतः ।
महीपतिर्ऋषिः प्रोक्तः पूर्ववक्त्रेण दीक्षितः ॥
अंशुमादिकवीरान्तं पुरुषेणोद्भवं भवेत् ।

[1]भारद्वाजं [2]समुद्भूतं [3]शुद्धशैवं तु नन्दिनः ।

इत्येवं वचनात्पश्चात् समावेशस्तु कौशिकः ॥
तदावेशेन साम्यं तु संग्रहेण निरूप्यते ।
अप्रमेयगुणोपेतः सर्वज्ञः खलु सर्वदा ॥
सर्वकृत्सर्वलोकेशः शिवतुल्यः प्रजायते ।
इत्यागमेषु मुक्तस्य श्रूयते शिवतुल्यता ॥'
(**ज्ञानावरणविळक्के** ३१५ पृष्ठे 'सर्वसिद्धान्त-विवेके' इति निर्दिश्योद्धृतम्) ।

[1] भारद्वाजसमुद्भूत — ण; भारद्वाजसमु — त.

[2] 'उत्पत्तिसमतापक्षो भरद्वाजमतः श्रुतः ।
भारद्वाजं समुद्भूतमिति प्रागुक्ततः पुनः ॥
शर्वोक्तादिकसिद्धान्तं वातुलान्तमिति स्मृतम् ।
सद्योजातमुखोत्पन्नं भारद्वाज ऋषिस्तथा ॥
सूत्रमार्गेण [शूद्रमार्गेण ?] संचिन्त्य सद्योजातेन दीक्षितः ।
इत्यत्रोत्पत्तितः साम्यं मुक्तिरेव न चान्यथा ॥'
(**ज्ञानावरणविळक्के** ३१६ पृष्ठे 'सर्वसिद्धान्त-विवेके' इति निर्दिश्योद्धृतम्)

[3] 'शुद्धशैवं ततः शृणु ।
शुद्धत्वाच्छिवमुद्दिष्टं शिवाज्जातं हि शैवकम् ॥
शुद्धशैवसमायोगाच्छुद्धशैवमिति स्मृतम् ।
शिवेनोत्पद्यते शैवं तस्माज्जाताः शिवद्विजाः ॥
शिवद्विजास्तु विप्रेन्द्रा आदिशैवाः प्रकीर्तिताः ।
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ॥
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
तेषां वंशे तु जातास्ते शिवविप्रा इति स्मृताः ॥
पुनर्दीक्षां न चार्हन्ति कर्तव्या चेत्तु निष्फला ।
कामिकादिषु तन्त्रेषु अष्टाविंशतिषु क्रमात् ॥
वेदशास्त्रादिसर्वेषु कृताभ्यासः शिवव्रती ।
कर्षणादिप्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तकम् ॥
उत्सवात्प्रायश्चित्तान्तं ज्ञात्वा सर्वं समाचरेत् ।
मन्त्रयन्त्रक्रियामुद्रान्यासावाहनकादिभिः ॥
उपचारैर्बहुविधैर्लिङ्गं लिङ्गासने यजेत् ।
प्रासादं प्रणवं हंसं व्योमव्यापि शिवाक्षरम् ॥
अघोरं दक्षिणामूर्तिं मृत्युञ्जयमतःपरम् ॥
श्रीरुद्रं चैव परमं श्रीमत्पञ्चाक्षरं परम् ॥
अघोरास्त्रं शिवास्त्रं च तथा पाशुपतास्त्रकम् ।
द्वादशैते महामन्त्राः शिवमन्त्रोत्तमोत्तमाः ।
अस्त्रमुद्रा वक्त्रमुद्रा महामुद्रा ततः परम् ॥
शोधनाख्या महामुद्रा तथा संहृतिमुद्रिका ॥
मुद्रा पञ्चमुखी चैव तथा सुरभिमुद्रिका ॥
एवमष्टविधं प्रोक्तं मुद्रासामान्यलक्षणम् ॥
आत्मार्थं च परार्थं च पूजा द्विविधमुच्यते ।
दत्ते च गुरुणा लिङ्गे स्थण्डिले स्वयमात्मनि ॥
आत्मार्थमिदमाख्यातं परार्थं तु ततः शृणु ।
ग्रामादौ स्थापिते लिङ्गे यद्वा देवादिनिर्मिते ॥
परार्थमिति विज्ञेयं सर्वप्राणिहितावहम् ।
शिवद्विजेन कर्तव्या द्विधा पूजेति चोदिता ॥
अन्येषां स्वार्थयजनं न कुर्यात्तु परार्थकम् ।
मोहाल्लोभाच्च कुर्वीत राजराष्ट्रस्य दुःस्थितिः ॥
शिवावरणदेवांश्च सर्वान्संपूजयेद्गृह ।
पृथक्स्थानस्थितान्सर्वान्पूजयेदन्यदेवकान् ॥
मन्त्रपिण्डे हृदम्भोजे वा समन्त्रस्य भावतः ।
आवाहनादिसंयुक्तं लिङ्गे पूजादिकं चरेत् ॥
मन्त्रलिङ्गं शरीरं स्यात्स एव परमः शिवः ।
शुद्धशैवमिदं प्रोक्तम्'
(**ज्ञानावरणविलक्के** २४१–२४३ पृष्ठेषु 'वातुले' इति निर्दिश्योद्धृतम्);
'इदानीं शैवभेदानि वक्ष्यन्ते तु समासतः ।
शास्त्रं चतुर्विधं ज्ञेयं वामदक्षिणमिश्रकम् ॥
सिद्धान्तेन समायुक्तं चतुर्धैवं प्रकीर्तितम् ।
वामादिशास्त्रभेदेषु यो दीक्षां वहते क्रमात् ॥
वामी च दक्षिणी मिश्री सिद्धान्तीति च कीर्तिताः ।
वामं हि शाम्भवं स्याद्धि दक्षिणं भैरवात्मकम् ॥
मिश्रं यामलमित्युक्तं सप्तमातृप्रधानकम् ।
सिद्धान्तं शुद्धशैवं तु केवलं शुद्धशाम्भवम् ॥
सिद्धान्तं सर्वसारं हि तत्तु शुद्धशिवं स्मृतम् ।'
(**सुप्रभेदे** चर्यापादे १.६–१० पू०);

[3] शैवेन नन्दिनम् — ण, त.

[1]आगस्त्यं च [2]अभिव्यक्तमनादिशैवं[3] परं शिवम्[4] ॥१६॥

---

[1] अगस्त्यं चैवमभि — ण; आगस्त्यं चमभिस्यक्त — त.

[2] 'अथाभिव्यक्तिसाम्यं तु संग्रहेण निरूप्यते।
पूर्वोक्तेष्वर्थभेदेषु चाङ्गीकृत्य यथोचितम् ॥
अगस्त्य एतत्सिद्धान्तवादीति श्रूयते श्रुतौ।
आगस्त्यमभिव्यक्तं तु चानादिस्तु परं स्मृतम् ॥
बिम्बादिकं तु सिद्धान्तं वामदेवोद्भवं तथा।
ब्राह्मणर्षिरगस्त्यः स्याद्वामवक्त्रेण दीक्षितः ॥
इति साम्यश्रुतेर्मुक्तौ मुक्तस्य शिवतुल्यता।'
(**ज्ञानावरणविलक्के** ३२१ पृष्ठे 'सर्वसिद्धान्तविवेके' इति निर्दिश्योद्धृतम्);
'समता च समुत्पत्तिसंक्रान्त्यावेशपक्षतः।
अभिव्यक्तिपरा गीता बुद्धिवाचामगोचरा ॥
[अभिव्यक्तिः]
सर्वज्ञत्वादिगुणाभिव्यक्तिरूपपरमेश्वरसमता परा प्रकृष्टा।
[उत्पत्तिः] —
पश्चवस्थायां सर्वज्ञत्वादिधर्मासत्त्वान्मुक्तौ च परमेश्वरसमत्वश्रुत्यन्यथानुपपत्त्या पश्चात्मन्यपूर्व एव तदा सर्वज्ञत्वादिगुणः परमेश्वरसम उत्पद्यत इति उत्पत्तिसमतापक्षः कैश्चिदभ्युपगतः।
[संक्रान्तिः] —
तथा परैरपि पटादौ कस्तूरिकामोदवत्तत्र परमेश्वरगुणः संक्रामति मुक्ताविति समतासंक्रान्तिपक्षः प्रतिपन्नः।
[समावेशः] —
अन्यैस्तु तदा परमेश्वरगुणैः स्वाश्रयस्थैरेव सिद्धः समाविश्यते ग्रहैरिव पुरुष इत्यावेशपक्षः।'
(**परमोक्षनिरासकारिका** श्लो ७ तस्या रामकण्ठवृत्तिश्च।)

[3] 'अनादिशैवसिद्धान्ते त्वङ्गीकृत्य यथोचितम्।
पूर्वोक्तेषु विशेषेण कथ्यते लेशतः स्फुटम् ॥
शुद्धविद्यादितत्त्वानां जडता न शिवात्मता।
नादस्य ज्ञानरूपत्वं स शिवः स्यादिति श्रुतिः ॥
न तु शब्दादृते पुंसः प्रत्ययोऽस्ति कदाचन।
शब्दानुविद्धमेवेह विश्वज्ञानं प्रदृश्यते ॥
इति तज्ज्ञानसंसिद्धिः सूक्ष्मादिक्रमतः स्फुटम्।
तदेव प्रणवाकारं शिवं चैव तथागमः ॥
नादबिन्दूद्भवाकारमोङ्कारं शुद्धतत्त्वकम्।
शुद्धज्ञानं हताज्ञांशं शुद्धवर्त्मनि कारणम् ॥
ज्ञानबीजं पराकारमोङ्कारं प्रभुरीश्वरः।
तत्सादाख्यशिवाकारं कलापञ्चकसंभवम् ॥
अकारोकारमकारबिन्दु नादश्च पञ्चमम्।
ओङ्कारं स्वकलाकारं मध्ये वाक्पञ्चकोद्भवम् ॥
महासूक्ष्मान्नादमुत्पन्नं सूक्ष्माद्विन्दुसमुद्भवम्।
पश्यन्ती तन्मकारोत्थमुकारो मध्यमोदयम् ॥
अकारोत्पन्नवैखर्या आदिवाक्पञ्चसाधनम्।
तन्मध्ये तु महेशश्च रुद्रविष्ण्वात्मभूरिति ॥
पञ्चमस्य कलाशक्तिः पञ्चकृत्योद्भवं तथा।
सृष्ट्यादिपञ्चकृत्यर्थं ब्रह्मादिदेवसंभवम् ॥
षट्त्रिंशत्तत्त्वसंभिन्नकुटिलाशक्तिरुद्भवः।
कुटिला कुण्डली व्याप्ता कुण्डली प्रणवोदिता ॥
इति सर्वजगत्कर्ता शिवो नादात्मकः स्मृतः।
स्वस्वावसरभेदेन श्रूयते द्विविधः पुनः ॥
..... शब्दब्रह्मपरं तु यत्।
परं तत्तत्त्वमुद्दिष्टं ब्रह्मशब्देन शब्दितम् ॥
.....मयं यत्तत् सदाशिवमिति स्मृतम्।
सदाशिवतनुः साक्षात्प्रणवः स्याज्जनार्दन ॥
सर्वकारणभूतोऽसौ देवदेवः सदाशिवः।
तन्नादः परनादः स्यान्नान्यथेति तथागमः।
तस्मात्तु परशब्दार्थं ध्यायेदोङ्कारमीश्वरम्।
इत्येवं वैदिकेऽप्युक्तं श्रूयते च शिवागमे ॥
ममैषा परमा मूर्तिर्नादसंज्ञा वरानने।
चिन्त्यते योगिभिर्नित्यमपुनर्भवकाङ्क्षिभिः ॥
शब्दतत्त्वे परे लीने योगी तद्गतमानसः।
परमोक्षमवाप्नोति शब्दस्यैवार्थसिद्धये ॥
तत्सिद्धौ लययोगी स्याच्छ्रूयते तस्य वैभवम्।
ब्राह्मणानां शतं पुण्यमधिकं वेदवेदिनाम् ॥
तेषां सहस्रगुणिताः शैवतन्त्रेषु दीक्षिताः।
दीक्षितानां च सर्वेषां यजमानो विशिष्यते ॥
तेभ्यश्च यजमानेभ्यो भस्मलेपी विशिष्यते ॥
भस्मलेपिसहस्राणां पूजकोऽप्यधिको भवेत्।

[1]गोलकः [2]कुण्डकश्चैव उपशैवमिति स्मृतम्[3]।
भारद्वाजस्य मार्गेण शिवद्विजेन दीक्षितः ॥१७॥

[4][तन्त्रसंकरादिदोषः]

[5]तत्तन्त्रमिति विज्ञेयं [6]सांप्रतं तु प्रबोधयेत्।

पूजकानां च सर्वेषां मन्त्रवेत्ता विशिष्यते ॥
मन्त्रवर्णविदां तेषामध्वज्ञाता विशिष्यते।
अध्वविदां च सर्वेषां प्रासादज्ञो विशिष्यते ॥
प्रासादज्ञानवेदीनां लययोगी विशिष्यते।
लययोगवतां पुंसां प्राणलिङ्गी विशिष्यते ॥
इत्येवं नामतो मुक्तिः शुद्धतत्त्वसमाश्रया।
अथोपास्तिक्रमः शैवे योगदीक्षापुरःसरम् ॥
ज्ञेयं गुरुमुखादेव शक्तिपातपवित्रितैः।
इत्यनाद्याप्यशेषार्थः कथितः संग्रहादिह ॥'
(**ज्ञानावरणविळक्के** २७९–२८१ पृष्ठेषु 'सर्वसिद्धान्तविवेके' इति निर्दिश्योद्धृतम्)

[4] परःशिवम् — ण, त.

[1] गोलकं — ण; कोलकं — त.

[2] कुण्डकं चैवमुप — ण, त;
'ब्राह्मण्यां ब्राह्मणस्यैव प्रमादाद्गूढजातकः।
सोऽपि विप्रस्तु विज्ञेयो यागाध्ययनवर्जितः ॥
ब्राह्मण्यां मधवायां तु विप्राज्जातस्तु कुण्डकः।
विधवायां तु गोलः स्यादेतौ [ज्ञेयौ] विगर्हितौ ॥
तावान्मार्थस्य पूजार्हावुपनीय समन्त्रकम्।
आरामपोषकः कुण्डो ह्यकु[हिङ्गु?] विक्रयगोलकः ॥'
जातिनिर्णये (टि. ४०१ पृ० ८) मुखभेदे इति निर्दिश्योद्धृतम्।;
'परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ।
पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः ॥'
(**मनुस्मृतौ** ३, १७४)

[3] उभयोरपि मातृकयोः १७ श्लोकस्य पूर्वार्धानन्तरं
'महीपतिः कुष्ठरोगी वानप्रस्थश्च कन्यसः।
ब्राह्मण्या विधवायाश्च संयोगे भूपतेस्तदा ॥
कुण्डः शिवद्विजो नाम तत्कालेनोद्भवस्तथा।'
इत्यर्धत्रयं दृश्यते। एतस्य ग्रन्थस्य प्रतिलोमपरत्वादसंगतत्वाच्च नात्र पाठतया संघटनम्।

[4] 'शैवं चतुर्विधं ज्ञेयं शैवं पाशुपतं तथा।
सोमं लाकुलमित्येते चतुर्भेदाः प्रकीर्तिताः ॥
एतेषु शैवभेदेषु यदा तेनैव देशिकः।
तत्तन्मन्त्रेण कर्तव्याः स्थापनादिक्रियान्विताः ॥
एतेषु दीक्षितेष्वेषु सर्वान्वै स्थापनादिकान्।
यः करोत्यन्यतन्त्रेण तन्त्रसंकर उच्यते ॥
तेन दोषेण तद्वास्तु राजराष्ट्रं च नश्यति।
तस्मात्सर्वप्रयत्नेन वर्जयेत्तन्त्रसंकरम् ॥'
'वातुलान्ताः कामिकाद्याः प्रादुरासञ्शिवास्यतः।
एतेषामेकभेदत्वान्न दोषो न तु संकरः ॥
कश्चिदेष विशेषोऽस्ति न विशेषं शृणु द्विज।
प्रारब्धं येन तन्त्रेण तत्तन्त्रेण समापयेत् ॥
नोक्तं चेदन्यतन्त्रेण तत्सर्वं तु समाचरेत्।
समापयेद्यागकार्यम्'
(**पूर्वकारणे** २६.५८ उ०–६२ पू०; ६९ उ०–७२ पू०);
'मन्त्रसंकरदोषेण राजराष्ट्रं विनश्यति।
संप्रोक्षणं ततः कृत्वा पुण्याहं पुनराचरेत् ॥
आचार्यसंकरो यत्र कर्तुर्ग्रामस्य नाशकृत्।
मूर्तिहोमं ततः कृत्वा स्नपनं कारयेत्ततः ॥
पूर्वाचार्येण तत्सर्वं कर्तव्यं विधिपूर्वकम्।'
(**पूर्वकारणे** १४४-२०७–२०९ पू०);
'शिवसिद्धान्ततन्त्रेण प्रारब्धं कर्षणादिकम्।
न कुर्यादन्यशास्त्रेण कुर्याच्चेत्तन्त्रसंकरः ॥
तन्त्रसंकरदोषेण राजराष्ट्रं विनश्यति।'
(**मकुटे** १.१११–११२ पू०);
'बौद्धं चाप्यार्हतं चैव शैवं पाशुपतं तथा।
कापालं पाञ्चरात्रं च षडेते समयाः स्मृताः ॥
एतेषां संकरश्चैव तन्त्रसंकर उच्यते।
तन्त्रसंकरदोषेण राजराष्ट्रं विनश्यति ॥

अन्यतन्त्रेण [1]संक्रान्तं न [2]बोधेत्सांप्रदायिकम् ॥१८॥
प्रमादादन्यतन्त्रेण [3]चिद्बोधे नरकं [4]तदा ।
[5]प्रमादाच्चैव कृत्वा च निष्फलं [6]कर्म होमकम् ॥१९॥
[7]आचार्यसंकरे चैव तन्त्र[8]संकर एव च ।
उच्छिष्ट[9]संकरे दोषः कर्तृ[10]संकर एव च ॥२०॥
अर्चनं चाग्निकार्यं च नित्योत्सव[11]महोत्सवम् ।
स्नपनं बलिदानं च [12]तत्कर्म निष्फलं तथा ॥२१॥
आचार्य[13]संकराद्वास्तु राजराष्ट्रं विनश्यति ।
कर्तृ[14]संक्रान्तितो दोषः [15]संकरे कर्तृनाशनम् ॥२२॥
[16]इत्येतत्संकरं कृत्वा महापातकमाश्रयेत् ।
संक्रान्तिर्यस्य [17]दृश्येत [18]कुर्वाणो नरकं व्रजेत् ॥२३॥

[आचार्यप्रशंसा तत्कृत्यं च]

शिवसंस्कारसंबन्धाद्रुस्मरुद्राक्ष[19]मिश्रणात् ॥

तस्मात्सर्वप्रयत्नेन संकरं नैव कारयेत् ।
अष्टाविंशतिभेदेन शैवभेदो विधीयते ॥
एतेषां संकरश्चैव न दोषाय प्रकल्पते ।'
(**वीरे** १.७७–८० पू०);
'अथातः संप्रवक्ष्यामि तन्त्राणां संकरं परम् ।
शैवं पाशुपतं सोमं लाकुलं तु चतुर्विधम् ॥
तेषां भेदोपभेदैश्च तत्तच्छास्त्रे समाचरेत् ।
चतुर्विधेषु तन्त्रेषु यथेष्टं तेन बुद्धिमान् ॥
कर्षणादि प्रतिष्ठान्तं कर्म कुर्याद्विचक्षणः ।
कर्षणादि प्रतिष्ठान्तमेकतन्त्रेण कारयेत् ॥
भुक्तिमुक्तिप्रदं मुख्यं सर्वसिद्धिमवाप्नुयात् ।
पूर्वमेकेन कृत्वा तत्पश्चादन्येन वै कृतम् ॥
एतत्तु संकरं तेन राज्ञो राष्ट्रस्य दोषकृत् ।
आचार्यश्चैव कर्ता च नाशनं त्वखिलं तथा ॥
यच्छास्त्रेण यदारब्धं तच्छास्त्रेणैव तत्कुरु ।
कृतं चेदन्यशास्त्रेण तन्त्रदोषाय कल्पयेत् ॥'
(**सुप्रभेदे** क्रियापादे ५६.१–६)

[1] संक्रान्ति — ण, त.
[2] 'बोधेत्' इति अन्तर्भावितणिजन्तः, बोधयेदित्यर्थः ।; बोधन् संप्रदायिकम् — ण; बोधन् संप्रदायकम् — त.
[3] चिद्बोधं — ण; चिद्बोधत् — त.
[4] तथा — ण, त.
[5] प्रसादं चैव — ण; संप्रतां कर्म कृत्वा — त.
[6] भस्म भोमकम् — त.
[7] आचार्यसंकरं — ण, त.
[8] ०संकरमेव च — ण, त.
[9] ०संकरं दोषं — ण, त.
[10] ०संकरमेव च — ण, त.
[11] ०महोत्सवः — ण
[12] तत्कर्म — ण, त.
[13] ०संकरन्दास्तु — ण; ०सकरं वा तु — त.
[14] ०संक्रान्ति तद्दोषं — ण, त.
[15] संकरो — ण.
[16] इत्येते सं — ण, त.
[17] घृष्टेन — ण, सृष्टेन — त.
[18] कुर्वाणं — ण, त.
[19] ०माश्रकम् — ण; ०मिश्रकम् — त.

[5] तत्तत्तन्त्रमिदं ज्ञेयं — ण.
[6] युक्तमित्यर्थः ।; तत्संप्रतं तु बोधयन् — त.

शिखायज्ञोपवीतं तु [1]धृत्वा दीक्षित उच्यते ॥२४॥
[2]जङ्गमः शुद्धशैवं तु [3]तत्तत्तन्त्रे प्रवेशयेत् ।
शास्त्रस्य [4]संप्रदानेन [5]शास्त्रदीक्षेति चोच्यते ॥२५॥
[6]जटी वा [7]मुण्डको वापि [8]शिवाचार्यः प्रवेशकः ।
[9]स्थावरं [10]लिङ्गमित्याहुर्जङ्गमस्तु महेश्वरः[11] ॥२६॥
महेश्वरपदाविष्टं स्थानं [12]यत्संपदां पदम् ।

[13][भस्मरुद्राक्षधारणप्रशंसा]

ब्राह्मणो वापि चण्डालः सुगुणो दुर्गुणोऽपि वा ॥२७॥
भस्मरुद्राक्ष[14]संमिश्रः शिव एव न संशयः ।
[15]इत्येतच्छैव उत्पन्ने [16]पश्चाच्छैवं समाचरेत् ॥२८॥

इति [17]रौरवतन्त्रे क्रियापादे शैवोत्पत्तिः त्रिषष्टितमः पटलः ।

---

[1] कृत्वा दीक्षितमुच्यते — ण, त.

[2] जङ्गमं शुद्धशैवेन — ण, त; जङ्गमः — आचार्यः ।

[3] तत्तन्त्रं तु प्रवेशकम् — त.

[4] संप्रतातेन — ण; संप्रदायेन — त.

[5] 'चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा ।
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ॥'
'शास्त्रस्य सप्रदानेन शास्त्रदीक्षा समीरिता ।'
(**वरुणपद्धतौ** दीक्षाप्रकरणे (टि. १४३) पृ० १३, १४);
शास्त्रदीक्षान्तु मुच्यते — ण, त.

[6] 'योपिद्युक्तः सकेशश्च जटारुद्राक्षदण्डकैः ।
कौपीनमेखलाभिश्च परित्यक्तस्तु यो भवेत् ॥
स गृहस्थ इति प्रोक्तो मुण्डी वा स्याज्जटादियुक् ।
व्रती दारवियुक्तस्तु भिक्षार्थी च तथा भवेत् ॥'
(**उत्तरकामिके** २४.६१ उ०–६३ पू०);
जटे वा — ण, त.

[7] मुण्डके वापि — ण; मुण्डकेशी वा — त.

[8] शिवाचार्यप्रवेशकम् — ण; आचार्य तु प्रवेशयेत् — त.

[9] 'लिङ्गद्वयं समाख्यातं चरं चाचरमेव च ।
चरं व्यक्तीति विख्यातमचरं पार्थिवादिकम् ॥
चरे सदा वसत्येव प्रतिच्छन्नो महेश्वरः ।
अचरे मन्त्रसंस्काराद्वसत्येव सदाशिवः ॥
स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते ।
स्थावरं स्थापितं लिङ्गं जङ्गमं दीक्षितं विदुः ॥
जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत् ।
तस्माल्लिङ्गद्वयं प्राज्ञो नावमन्येत सर्वदा ॥'
(**शिवधर्मे** पूर्वे ३.६२–६५)

[10] जङ्गमित्याहु — ण, त.

[11] ०र्जङ्गमं तु महेश्वरम् — ण, त.

[12] यत्संपदा — ण.

[13] 'ब्राह्मणो वापि चण्डालो निर्गुणः सगुणोऽपि च ।
भस्मरुद्राक्षधारी यः स देवत्वं शिवं व्रजेत् ॥
शुचिर्वाप्यशुचिर्वापि तथाभक्ष्यस्य भक्षकः ।
म्लेच्छो वाप्यथ चण्डालो युतो वा सर्वपातकैः ॥
रुद्राक्षधारणादेव स रुद्रो नात्र संशयः ॥'
(**देवीभागवते** ११ स्कन्धे ६.१३ उ०–१५)

[14] संमिश्रं शिवमेवं — ण; संमिश्रं शिवमेवे — त.

[15] इत्येते शैवमुत्पन्नं — ण, त.

[16] पश्चाच्छौचं — त.

[17] रौरवागमे — त.

चतुष्षष्टितमः पटलः

[1] फलपक्वादिसमर्पणकालविधिः

[रुरुरुवाच] —

वद मे तन्महाप्राज्ञ देवेश तव शंकर।
सुमस्रग्गन्धवस्त्रादिभूषणानां समर्पणम् ॥१॥
कथं कार्यं च तत्कालं विस्तरेण जगत्पते।

ईश्वर [उवाच] —

शृणु [2]देव प्रवक्ष्यामि तत्कालं तद्विधिं क्रमात् ॥२॥
मदर्पणार्थमानीतं जलगन्धसुमादिकम्।
स्रग्वस्त्राभरणं[3] [4]भक्तैर्देशिकः कृतनित्यकः[5] ॥३॥
उद्वर्तने कर्ममध्ये प्राणसंस्थापने तथा।
[6]नैवेद्योत्पत्तिकायाश्च [7]कालं त्यक्त्वान्यकालके ॥४॥
स्वयं स्वीकृत्य तद्द्रव्यं शुद्धिं कृत्वा विचक्षणः।
जलं चेत्तु [8]तदुत्पूय [9]तीक्ष्णदृष्टचा निरीक्ष्य च ॥५॥
[10]तेन मां सेचयेन्मन्त्री तद्भक्तश्रेयसे शिवम्[11]।
गन्धं [12]चेदस्त्रतः प्रोक्ष्य विन्यसेन्मम मस्तके ॥६॥
तस्योपरि तथा पुष्पं विन्यस्याभ्यर्च्य मूलतः।
वस्त्राभरणकं चेत्तु शुद्धिं [13]कृत्वार्प्य मूलतः ॥७॥
[14]संभूष्यं मम सर्वाङ्गं तद्वस्त्राभरणैर्मुदा।
तद्भक्ता[15] हृतनैवेद्यं फलं वा पक्वमेव वा ॥८॥
समर्प्य तोषणं कृत्वा नीराज्याभ्यर्च्य मां ततः।
तस्मै भक्ताय संदद्यात्तत्तीर्थं तत्सुमं गुरुः ॥९॥

---

[1] अयं पटलः टि. ९८४ इत्यङ्किते पत्रात्मके कोशे १४५–१४७ पृष्ठेषु दृश्यते।
[2] देवि — थ.
[3] ०स्त्रावरणं — थ; प्रश्नवाक्यानुसारेणात्राभरणम् इति पाठः साधितः।
[4] भद्रैः — थ.
[5] कृतनैष्ठिकः — थ.
[6] नैवेद्योत्पार्तिकायां च — थ.
[7] काले — थ.
[8] तदुत्पुत्य — थ.
[9] तीक्ष्यदृष्टचा — थ.
[10] तेनेमां — थ.
[11] अत्र भवेदित्यध्याहृत्य व्याख्येयम्।
[12] च दस्रतः — थ.
[13] कृत्वास्य — थ.
[14] संभूष्य — थ.
[15] ०हृदनैवेद्यं — थ.

सुमन्त्रक्फलपक्वं चेत्त[१]च्चतुर्धा विभज्य च।
एकभागं स्वयं कर्ता स्वीकृत्यान्यं द्वितीयकम् ॥१०॥
आचार्याय प्रदायान्यं द्विजेभ्योऽथ द्विभागकम्।
एवं विभज्य[२] तत्कर्ता मम [३]संतुष्टिहेतवे ॥११॥
वस्त्राभरणकं चेत्तु धनागारे ममार्चकः।
संरक्ष्य भूषयेन्नित्यं यथायोग्यं विभूषणैः ॥१२॥
इत्युक्तविधिना [४]देव द्रव्यजालं समर्पयेत्।

[रुरुरुवाच]—

ग्रामान्यवासिनो भक्त्या परं तद्द्वारबन्धनात् ॥१३॥
त्वद्दर्शनार्थमायाता यद्यकस्माज्जटाधर[५]।
कथं कार्यं तदा देव वद तत्त्वं महेश्वर ॥१४॥

ईश्वर[उवाच] —

[६]धावन्यो वेगतश्चेत्तु [७]राजकीयाच्च दैविकात्।
तदा [८]द्वाराशयस्थाने दौवारिकमुखाच्छिवम् ॥१५॥
मां स्मृत्वा फलपक्वाद्यं समर्प्य विनिवेद्य च।
साष्टाङ्गं प्रणमेत्तत्र देवांशं फलपक्वकम् ॥१६॥
निक्षिप्य शेषं स्वीकृत्य गच्छेद्धामप्रदक्षिणात्।
इत्येवं [९]धावतः प्रोक्तो विधि[१०]रन्यो न कारयेत् ॥१७॥
द्वारोद्घाटनपर्यन्तं स्थित्वा चोद्घाटनात्परम्।
मां दृष्ट्वा फलपक्वाद्यमाचार्यप्रमुखात्ततः ॥१८॥
समर्प्यानम्य [११]तद्भक्त्या ममानुग्रहकारिणः।
निवर्तयेद्यथाकामं [१२]सद्योऽन्तेऽभीष्टमाप्नुयात् ॥१९॥

इति रौरवसंहितायां क्रियापादे फलपक्वादिसमर्पणकालविधिः
चतुष्षष्टितमः पटलः।

---

[१] चतुर्था — थ.
[२] विभक्त्य — थ.
[३] संतुष्ट० — थ.
[४] देवी — थ.
[५] ज्जडाधरा — थ.
[६] धावन्तो — थ.
[७] राजिकादैविकादपि — थ.
[८] द्वारशयो — थ.
[९] धावतं — थ.
[१०] 'एनं विधिं' इत्यध्याहृत्य व्याख्येयम्।
[११] ते भक्त्या — थ.
[१२] सद्यन्ते — थ.

पञ्चषष्टितमः पटलः

[1]कामकोष्ठलक्षणविधिः

[2][शक्तित्रयम्]

अथ वक्ष्ये विशेषेण कामकोष्ठस्य लक्षणम्।
योगं भोगं च वीरं च शक्ति[3]त्रयमिति स्मृतम् ॥१॥

[4][योगशक्तिः]

[5]योगशक्तिरुमाभागः [6]पीठिकाकृतिरुच्यते।
उपानं [7]जगती चैव [8]कुमुदं कम्पकण्ठकम् ॥२॥
[9]कम्पं पट्टी तदूर्ध्वे स्याद्घृतवारिसमायुतम्।
उपानं [10]पाद एव [11]स्याज्जङ्घा [12]जगतिरुच्यते ॥३॥
[13]कुक्षिस्तु कुमुदं ज्ञेयं बाहुयुग्मं च कम्पकम्।
[14]कण्ठं कण्ठमिति [15]ज्ञेयमधरोऽधरपट्टिका ॥४॥

---

[1] अयं पटलः टि. १०५५ इत्यङ्कितहस्तलिखित-मातृकायां ७–११ पृष्ठेषु तथा आर्. इ. १८६७० इत्यङ्कितताल्पत्रकोशे ६६–६९ पत्रेषु च दृश्यते।

[2] 'योगं भोगं च वीरं च शक्तिरेवं त्रिधा भवेत्।
योगं पीठसमायुक्तं भोगं वामसमन्वितम् ॥
वीरं स्वतन्त्रमित्युक्तं शक्तिरेवं त्रिधा भवेत्।
शक्तिलक्षणमेवोक्तम्'
(**पूर्वकारणे** ९०.१२ उ०–१४ पू०);
'अथातः संप्रवक्ष्यामि सर्वलोकहिताय च।
सर्वज्ञानप्रदं चैव शक्तित्रयमिहोच्यते ॥
योगं पीठसमायुक्तं भोगं वामसमन्वितम् ॥
वीरं स्वतन्त्रमित्युक्तं शक्तित्रयमिहोच्यते।'
(**उत्तरकारणे** ८४.१, २)

[3] ०बीजमिति त्रिधा — ध

[4] 'भद्रपीठमथ शृणु।
पूर्ववन्षोडशांशं तु कृत्वोन्मेधं विधानतः ॥
भागेनोपानमेकेन चतुर्भिर्जगती भवेत्।
कुमुदं तु त्रिभिर्भागैरेकेनैव तु पट्टिका ॥
कण्ठं कुर्यात्त्रिभिर्भागैरेकांशेन तु पट्टिका।
महापट्टिका द्व्यंशा तु एकेन घृतवारिणी ॥'
(**सुप्रभेदे** क्रियापादे ३३.१०३ उ०–१०६ पू०)

[5] योगं शक्तिरुमाभागं — द; योगशक्ति सदायुक्तं — ध.

[6] पीठाकृति तु रुच्यते — द; वीरकाकृतिं — ध.

[7] जगतीश्चैव — द; जगतिकं चैव — ध.

[8] मुर्मुदाकम्पकर्णकम्—द; कुमुदकंपकण्टकम्—ध.

[9] कम्पपट्टी — द; कम्पपट्टित ऊर्ध्वं स्या० — ध.

[10] पादमेवं — द; पादमेव — ध.

[11] स्याज्जङ्घांगेतिरुच्यते — द.

[12] वृत्तार्थं 'जगतिरिति' ह्रस्वान्तप्रयोग इति भाति।

[13] कुक्षि तत्कुमुदं — द; कुमुदं कुक्षिरित्याहुयुग्मं गबाहुस्य कंपकम् — ध.

[14] कंडकंडमिति — ध.

[15] ज्ञेयं प्रोक्तमधरोधरः — द; प्रोक्तमधरोदन्तन्त-पट्टिका — ध.

[1] **महापट्टी मुखं ज्ञेयं घृतवारि [2]शिरः स्मृतम् ।**
योगशक्ति[3]र्भवेदेवमित्युक्तं [4]पूर्वसूरिभिः ।।५।।

[5] [स्थानकभोगशक्तिलक्षणं, तन्मानं च]

[6]भोगशक्ति [7]ततो [8]वक्ष्ये [9]द्विनेत्रां [10]द्विभुजान्विताम् ।
[11]लोहजेन [12]समायुक्तां सर्वाभरण[13]भूषिताम् ।।६।।
[14]आसीनां [15]स्थानकां वापि[16] दक्षिणं [17]सुस्थितं पदम् ।
[18]वामपादः स्थितो वापि [19]दक्षिणं कुञ्चितं भवेत् ।।७।।
[20]वामहस्तः स्थितश्चैव दक्षिणोत्पल[21]मुद्रकः ।
दक्षिणे भङ्गमानं स्यात्सर्वाभरणभूषितम् ।।८।।
[22]मध्यमदशतालेन [23]मानोन्मानप्रमाणकम् ।

---

[1] पटिका महापट्टिका ज्ञेयं — द; महापट्टिमुखज्ञेयं — ध.

[2] शिरस्तिताम् — ध.

[3] ०र्भवेद्देवीमित्युक्तं — द; ०भवेद्देवं इत्युक्तं — ध.

[4] पृष्टभाषितम् — ध.

[5] 'मूललिङ्गसमीपे तु वामभागेऽर्धमण्टपे ।
आसीना स्थानका प्रोक्ता द्विविधा भोगशक्तिका ।।
द्वचक्षा च द्विभुजा शान्ता सरत्नमकुटोज्ज्वला ।
वामे भुजं निवेश्याथ आसनोपरि विन्यसेत् ।।
लम्बितं वामपादं तु सव्याङ्घ्रौ कुञ्चितं पदम् ।
सव्ये कटकहस्तः स्यादथवोत्पलधारिणी ।।
सर्वावयवसंपूर्णा सर्वलक्षणसंयुता ।'
'गौर्याश्च लक्षणं वक्ष्ये द्विभुजा च द्विनेत्रका ।
किरीटमकुटोपेता स्तनौ पीनौ सुयौवना ।।
कटकं सव्यहस्ते च लम्बहस्तं तु वामके ।
किंचिद्वामाङ्घ्रि दायस्थ [मालम्ब्य ?] पद्मपीठो-
परिस्थिता ।।
सर्वावयवसंपूर्णा गौरीलक्षणमुच्यते ।
द्विरूपा मूलबेरस्य भोगशक्तिरिहोच्यते ।।'
(**उत्तरकारणे** ८४.३–६ पू०; ७–९);
एतद्विषये पुनः **अजिते** ३६.२९५–३०१ श्लोका द्रष्टव्याः ।

[6] भोगशक्ति — द, ध.

[7] तथा — द.

[8] वक्षे — द.

[9] द्विनेत्रं — द, ध.

[10] द्विभुजं तु वा — द; द्विभुजान्वितम् — ध.

[11] मोहञ्जेत् नैव कर्तव्यं सर्वा० — ध.

[12] समायुक्तं — द.

[13] ०भूषितम् — द, ध.

[14] आसनं — द, ध.

[15] स्थानकं चैव — द; स्तानकं चैव — ध.

[16] अत्र 'मूर्तिं कुर्यात्' इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[17] स्वास्कं — द; स्थितं — ध.

[18] वामपादस्थितं — द; वामपादस्तितं — ध.

[19] अत्र यदि वामपादः स्थितः, तदा दक्षिणं पदं कुञ्चितं भवेदिति व्याख्येयम् ।

[20] अष्टमः श्लोकः 'ध' मातृकायामेव दृश्यते ।; वामहस्तस्तितं चैव — ध.

[21] ०मुद्रतम् — ध; दक्षिणः उत्पलमुद्रकः—दक्षिण उत्पलमुद्रकः; ततः संधिरार्षः ।

[22] मध्यमं दशतालेन — द, ध; मध्यमदशतालविधिविषये **अजिते** ३६ ११० उ०–१३९ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[23] मानामानप्रमाणकम् — द; मानोन्मानप्रमाणविषये **अजिते** ३६.४१–४४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[1] पूजांशसदृशं [2]मानं मध्यमं [3]प्रविधीयते ॥९॥
तदर्धमधमं; श्रेष्ठं [4]द्विगुणं प्रविधीयते।
तदन्तरे चाष्टभागे[5] [6]नवधा शक्तिमानकम् ॥१०॥
[7] नाहतारं तथा चैव [8]स्थूलदेशे [9]विधीयते।

[10][नतमानम्]

[11]आभङ्गं समभङ्गं वा [12]अतिभङ्गमिति त्रिधा ॥११॥
[13] क्रमेण नतमानं स्यादग्निवेदेषु[14]भागकम्।
[15] अष्टादश च [16]विंशं च चतुर्विंशाङ्गुलं त्रिधा ॥१२॥
आभङ्गादित्रिभङ्गानां पादाङ्गुष्ठान्तरं त्रिधा।
त्रिवेदपञ्चमात्रं स्यात्पार्श्वान्तरमुदाहृतम् ॥१३॥

[17][आभङ्गम्]

[18]ललाटवामपार्श्वे स्यात्त्वानेत्रान्तं पुटान्तकम्।

---

[1] 'द' मातृकायां 'पूजांशसदृशं मानं मध्यमं' इत्यत्र 'पूजांशं समधामानं' इत्येतावन्मात्रं दृश्यते।

[2] 'ध' मातृकायां 'मानं' इत्यस्य स्थाने 'तन्मानं' इति दृश्यते।

[3] प्रविशिष्यते — द.

[4] 'द' मातृकायां 'द्विगुणं' इत्यत्र 'प्राधान्यं' इति दृश्यते।

[5] दन्तरेष्टमष्टभागे तु — ध.

[6] नवशक्तिप्रमाणकम् — द.

[7] 'द' मातृकायां 'नाहतारं' इत्येतत्स्थाने 'पूजांशं नाहतारं' इति दृश्यते।

[8] स्थूलातेशे — द; स्तूलमेवं — ध.

[9] प्रविधीयते — ध.

[10] 'आभङ्गं समभङ्गं वा कल्पयेदतिसुन्दरम्।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम्।
आभङ्गे तु गुणांशं तु वेदांशं समभङ्गके। ततमानं समाख्यातम्'
(**अंशुमत्कश्यपे** ५६.५२ उ०–५४ पू०);
'आभङ्गं समभङ्गं वा अतिभङ्गमिति स्मृतम्।
त्रिवेदशरमात्रं च क्रमेण नतमानकम् ॥'
(**चित्रसारमते** टि. ६७०. पृ० ९८)

[11] आभङ्गसमभङ्गं वा — द; आभङ्गं वाप्यतिभङ्गं वा — ध.

[12] समभङ्गविधीयते — ध.

[13] 'ध' मातृकायां १२–१६ श्लोका न दृश्यन्ते।

[14] ०भागिकम् — द.

[15] अष्टादशाच्च — द.

[16] विशच्च — द

[17] 'सूत्रं वक्ष्ये यथाक्रमम्।
ललाटमध्याद्वामे तु नेत्रान्ते च पुटान्तके ॥
हनोर्वामे समालम्ब्यं स्तनयोरन्तरे तथा।
नाभेर्दक्षिणपार्श्वे तु वामोरुदक्षिणं स्पृशेत् ॥
अवामचरणे पार्ष्णिवामपार्श्वे तु लम्बयेत्।
पादाङ्गुष्ठद्वयोश्चैवाप्यन्तरं षोडशाङ्गुलम् ॥
तत्त्रिभागैकभागं तु पार्ष्ण्यन्तरमुदाहृतम्।
एवमाभङ्गमाख्यातम्'
(**अंशुमत्काश्यपे** ५६.५४–५७);
'अभयं वरदं पूर्वं कटकं तु परं भुजम्।
मूर्ध्नि मध्ये च तत्प्रोक्तं वामनासापुटान्तकम् ॥
हन्वन्त वामपार्श्वे तु हिक्कायां दक्षिणे भवेत्।
दक्षिणस्तनवामे तु नाभेर्वामे द्वियङ्गुलम् ॥
कुञ्चितस्योरुसव्ये तु स्थितपादस्य गुल्फके।

[1]हनोर्वामे च हृद्वामे [2]नाभेर्दक्षिणपार्श्वके ॥१४॥
वामोरु[3]पार्श्वे वामाङ्घ्रौ पार्ष्णिपार्श्वे प्रलम्बयेत् ।
एतदाभङ्गमित्युक्तम्'

[4][समभङ्गम्]

'समभङ्गं विधीयते ॥१५॥
मुखं पूर्ववदेवोक्तं भ्रूमध्ये नाभिमध्यमे ।
वामोरुमध्यमे पार्श्वे [5]दक्षिणाङ्घ्रौ तु गुल्फके ॥१६॥
[6]तत्सूत्राद्वामपार्श्वे तु हिक्कामध्यं तथाङ्गुलम् ।
तदर्धं हृदये सव्ये द्व्यङ्गुलं नाभिमध्यमे ॥१७॥
तत्सूत्राद्दक्षिणे योनि[7]मध्यमेकाङ्गुलं भवेत् ।
सार्धमात्राङ्गुलं जङ्घा[8]मानमत्र विधीयते ॥१८॥
[9]लम्बितं समभङ्गं [10]स्याद्'

[11][अतिभङ्गम्]

'अतिभङ्गं विधीयते ।
[12]मुखं पूर्ववदित्येवं [13]हृदये [14]दक्षपार्श्वके ॥१९॥

लम्बिताभङ्गमेवं च ब्रह्मसूत्रं प्रसारयेत् ॥'
(**चित्रसारमते** टि. ६७०. पृ० ९८)

[14] ललाटं वाम० — द.
[1] अतो वामे — द.
[2] नाभिर्दक्षिण० — द.
[3] ०पार्श्ववामाङ्घ्रिपाणिपार्श्वे — द.
[4] 'समभङ्गमथ शृणु ।
ललाटमध्ये नामाग्रे पादपार्ष्ण्योश्च मध्यमे ॥
प्रसार्य ब्रह्मसूत्रं तु द्व्यन्तरं तु प्रमीयते ।
तत्सूत्रात्स्तनयोर्मध्यं दक्षिणे तु गुणाङ्गुलम् ॥
तत्सूत्राद् वामतो (दक्षिणे) नाभिनीत्रं द्व्यङ्गुलकं-
भवेत् ।
तत्सूत्राद् वामतो (दक्षिणे) योनिमूलमध्यं युगाङ्गु-
लम् ॥
तत्सूत्राद् दक्षिणे जानुनीत्रं गुणाङ्गुलं भवेत् ।
शेषं पूर्ववदुद्दिष्टं गौरीलक्षणमेव हि ॥'
(**अंशुमत्काश्यपे** ५६.५७ उ०–६१ पू०);
'ललाटनासिकामध्ये पार्ष्ण्योर्मध्ये प्रलम्बयेत् ।
तत्सूत्राद्वामपार्श्वे तु अंशकं मध्यमात्रकम् ॥
सूत्राद्वामस्तनमध्यं मध्याङ्गुलमुदाहृतम् ।
तत्सूत्राद्दक्षिणे नाभौ व्यङ्गुलं वा विधीयते ॥
तत्सूत्राद्दक्षिणे योनिमध्ये तु चतुरङ्गुलम् ।
तत्सूत्राद्वामजान्वन्तं व्यङ्गुलं समभङ्गके ॥'
(**चित्रसारमते** टि. ६७०. पृ० ९८)

[5] दक्षिणाङ्घ्री तु — द.
[6] 'द' मातृकायां १७, १८ श्लोकद्वयं न दृश्यते।;
तत्सूत्रा वाम० — ध.
[7] ०मध्यममेका० — ध.
[8] ०मानमात्रं — ध.
[9] लम्बयेत्समभागं — द; लम्बितसम० — ध.
[10] स्यात्तिथिभागं — द; स्यादधिभङ्गं — ध.
[11] 'आभङ्गवन्मुखे सूत्रं स्तनं वह्नयङ्गुलं भवेत् ।
व्यङ्गुलं नाभिमध्यं च योनिमध्य शराङ्गुलम् ॥
जानुमध्यं गुणाङ्गुलं स्थितपादस्य मध्यमे ।
अतिभङ्गं प्रलम्ब्यं स्याद्'
(**चित्रसारमते** टि. ६७०.पृ० ९८)

[1] दक्षिणे स्तन[2]मध्ये स्यात्सूत्राद्वामे शिवाङ्गुलम् ।
[3] द्व्यङ्गुलं नाभि[4]वामोरु[5]मध्ये पार्ष्ण्यन्तरे तथा ॥२०॥
एवं [6]सूत्रत्रयं प्रोक्तम्'

[7][आसीनभोगशक्तिलक्षणम्]

[8][9]आसीनं तु [9]प्रवक्ष्यते ।
[10]आसीने वाम[11]हस्तस्तु [12]वेद्यूर्ध्वे [13]सुस्थितो भवेत् ॥२१॥
[14]वरदो वा तथा दिव्यं [15]कटकं दक्षिणाङ्गके ।
[16]दक्षिणेऽभयहस्तं वा वरदं वामहस्तके[17] ॥२२॥
[18]लम्बितं वामपादं तु सव्य[19]पादोर्ध्वजानुके[20] ।
करण्डमकुटोपेतं केशबन्धमथापि वा ॥
प्रसन्नवदनोपेतं सर्वकामार्थसिद्धिदम् ॥२३॥
[21]श्यामा [22]द्विनेत्रा [23]द्विभुजा [24]त्रिभङ्गी
सव्यापसव्यस्थित[25]कुञ्चिताङ्घ्रिः ।

---

[1] मुख स्याद् भङ्गवद्योनि हृदये — ध.
[2] हृस्ये — द.
[3] दक्षिणपार्श्वके — ध.
[1] 'द' मातृकायामिदमर्धं न दृश्यते ।
[2] ०मध्य स्यात् सूत्र द्वामे — ध.
[3] नाभिपार्श्वे तु वामोरु० — द.
[4] ०वोमोरु० — ध.
[5] ०मध्यमे हारमेव हि—द; मध्यपार्ष्ण्यन्तरं—ध.
[6] सुत्रत्रयं — द; सूत्रद्विविधं — ध.
[7] 'द्विनेत्रा द्विभुजा श्यामा गौरी दक्षकरोत्पला ।
करण्डमकुटोपेता सर्वाभरणभूषिता ॥'
(**पूर्वकारणे** ९०.२); एतद्विषये पुनः **अजिते** ३६.२९५–३०१ श्लोका द्रष्टव्याः ।
[8] आसनं — द, ध.
[9] प्रवक्षते — द.
[10] आसने — द, ध.
[11] ०हस्तं तु — द, ध.
[12] वेदोर्ध्वे — द; चिठाद्वे — ध.
[13] स्वस्तिकं — द; स्वस्तितं — ध.
[14] 'ध' मातृकायां २२ तमश्लोकस्य स्थानेऽधोलिखितवत् — 'कटकं दक्षिणे हस्ते वरदं वामहस्तके ।' इत्येकमेवार्धं दृश्यते ।; वरद वा — द.
[15] 'द' मातृकायां 'कटकं दक्षिणाङ्गके' इत्यत्र 'कटकाङ्गे तु कटकम्' इति दृश्यते ।
[16] 'द' मातृकायां २२ उत्तरार्धस्य स्थाने 'तेक्षिणी अस्तं वा वरदं वाम हा पा . . .' इत्यनन्वितया पाठो दृश्यते । २२ तमश्लोकपाठो मातृकाद्वयमप्यनुसृत्य यथाकथंचिदर्थानुगुण्येन साधितः ।
[17] 'द' मातृकायां २२ श्लोकस्योत्तरार्धानन्तरं 'प्रसन्नवदनोपेतं सर्वकामार्थसिद्धिदम्' । इत्येकमर्धमधिकतया दृश्यते ।
[18] कमलालम्बितं वामसव्य० — द.
[19] ०पादोर्थजानुकम् — द.
[20] ०जानुकम् — ध.
[21] 'श्यामा द्विनेत्रा द्विभुजा त्रिभङ्गी
सव्यापसव्यस्थितकुञ्चिताङ्घ्रिः ।
सव्योत्पला [सत्कटका] स्तनोच्चा
हस्तावलम्बा परमेश्वरी सा ॥'
(**पूर्वकारणे** ९०.३); श्यामां — द.
[22] द्विनेत्री — द; द्विनेत्रां — ध.
[23] द्विभुजां — द, ध.

[1]सव्योत्पला सत्कटका [2]स्तनोच्चा
[3]हस्तान्यलम्बा परमेश्वरी [4]सा ॥२४॥
[5]भोगस्यासीनमाख्यातं

[6][वीरशक्तिः, तन्मानं च]

वीर[7]शक्तिमथ शृणु ।
[8]चतुर्भुजं त्रिनेत्रं च जटामकुटमण्डितम् ॥२५॥

---

[24] त्रिभङ्गीं — द, ध.
[25] ०कुञ्चिताङ्घ्रीम् — द; ०कुञ्चिताङ्घ्रिम् — ध.
[1] सव्योत्फलानां कटकहस्तयुक्तं — ध.
[2] स्तनोश्च — द.
[3] महस्तमलम्ब्य — द.
[4] च — द; चा — ध.
[5] गोशक्तेव्याख्यातं — द; भोगस्वासनमाख्यातं — ध.
[6] देव्या मानं त्रिधा प्रोक्तं शिवलिङ्गानुरूपतः ।
पूजांशमदृशं वाथ द्विगुणं त्रिगुणं तु वा ॥
चतुष्पञ्चगुणं वापि पूजांशोच्चत्रिपादकम् ।
अर्धं तदन्तरेऽष्टांशे नवमानं च वा भवेत् ॥
पूजांशोच्चं चतुर्विंशच्छतं वाथ विभज्य च ।
भ्रूदृग्घ्राणास्यकर्णान्तं बाहुकक्षस्तनान्तकम् ॥
लिङ्गमानवशादेवीमानं निष्कलसंज्ञके ।
प्रतिमामानतस्तस्या मानमेवं समीरितम् ॥
स्वयंप्रधाना देवी चेत् स्वधामादिप्रमाणजा ।
तच्च पूर्ववदेव स्यादथ मानाङ्गुलेन वा ॥
मात्राङ्गुले गृहार्चायां यवैर्वा परिकल्पयेत् ।
ततश्चेयं प्रकर्तव्या देवी प्रोक्तप्रमाणतः ॥
चतुर्भुजा त्रिणेत्रा च सुप्रसन्नैकवक्त्रका ।
दुकूलवसना देवी करण्डमकुटान्विता ॥
वरदाभयसंयुक्तां पाशाङ्कुशकरान्विता ।
द्विभुजा वा द्विनेत्रा वा प्रलम्बितकरान्विता ॥
पद्महस्तातिशान्ता च सा देवी कनकप्रभा ।
शुकोत्पलकरा वापि शूलपाशकरापि वा ॥
यथेष्टास्त्रापि वा शङ्खचक्रहस्ता तु षड्भुजा ।
दंष्ट्राकरालवदना पञ्चास्या दशदोर्युता ॥
देवोक्तास्त्रासना वापि देवालिङ्गनतत्परा ।
देवोरुसंस्थिता वापि स्थानकासनसंयुता ॥
प्रलम्बवामपादा वा लम्बितापरपादिका ।
देवेन सहिता वापि केवला वा प्रकीर्तिता ॥
श्यामा श्वेताथवा रक्ता साधकेच्छानुरूपतः ।
ऋज्वाकारयुता वापि द्विभङ्गसहिताथवा ॥
नासाग्राल्लम्बयेत्सूत्रं दक्षिणस्थितपात्तले ।
गुल्फमध्ये स्थितं सूत्रं शिवसूत्रमिति स्मृतम् ॥
तत्सूत्राद्वामभागस्थस्तनमध्यं गुणाङ्गुलम् ।
तत्सूत्रं नाभिमध्यं यदेकाङ्गुलमिति स्मृतम् ॥
सूत्रयोरन्तरं वेदमात्रमित्यभिधीयते ।
जानुसूत्रान्तरं प्रोक्तं गुणाङ्गुलमिति द्विजाः ॥
द्वयोरङ्गुष्ठयोर्मध्यं सार्धविश्वाङ्गुलं मतम् ।
तत्त्रिभागैकभागं तु पाष्ण्योरन्तरकं स्मृतम् ॥
कटकाग्रस्य चोत्सेधः स्तनाक्षस्य समो भवेत् ।
नाभेस्तु मणिबन्धः स्यात्सार्धविश्वाङ्गुलो द्विजाः ॥
पार्श्वमध्यमबाह्वोश्च मध्यमं पर्वताङ्गुलम् ।
प्रलम्बितकरस्याग्रादूर्वग्रं तु द्विमात्रकम् ॥
जानोस्तु मणिबन्धाच्च मध्यमं चतुरङ्गुलम् ।
पार्श्वमध्यमबाह्वोश्च मध्यमं तु षडङ्गुलम् ॥
दृष्टान्तमात्रमेतत्स्यात् सूत्रे तु नियमो न हि ।
स्वतन्त्रे द्विविधं देव्या मानं शास्त्रे प्रचोदितम् ॥
मूलदेव्याः प्रमाणं तु पूर्वमुक्तं द्विजोत्तमाः ।
उत्सवाद्यङ्गदेवीनां मानं यन्मूलबेरजम् ॥
लिङ्गमानवशात्प्रोक्तं मूलदेवीवशात्तथा ।
अङ्गेषु मानं संग्राह्यं जानूरूसममेव वा ॥

द्विनेत्रं द्विभुजं वापि [1]स्थानकासनसंयुतम् ।
[2] स्थानकं समपादं स्या[3]द्वैशाखस्थानमेव वा ॥२६॥
सुखासनं [4]च कर्तव्यं [5]पर्यङ्कासनमेव वा ।
[6] मध्यमदशतालेन [7]मानोन्मानप्रमाणकम् ॥२७॥
[8] स्वप्रमाणेन कर्तव्यं [9] परिवारसमावृतम् ।
[10] दैविके तु पदे [11]स्थाप्यमथवा मानुषांशके ॥२८॥
[12] एकाश्रित[13]ममानुष्ये [14]अनाश्रिते च विक्रमः ।

एवं देवी प्रकर्तव्या तस्याः संज्ञा द्विधा मता ।
मनोन्मनीति गौरीति लक्ष्मभेदस्तु नानयोः ॥
मूर्तिः सादाशिवी यत्र कल्प्यते तत्र कल्प्यताम् ।
तदा मनोन्मनीसंज्ञां लभते विप्रमत्तमाः ॥
नृत्तमूर्त्यादिभेदेषु गौर्याद्याख्यां समश्नुते ।
कृत्वा सल्लक्षणां देवीं मन्त्रैः संस्थापयेत्ततः ॥'

(**उत्तरकामिके** ४४.३०–५५)

[7] ०शक्तिरथवरम् — द; ०शक्तिमयं शृणु — ध.

[8] 'बिम्बम्' इति नपुंसकपदमध्याहृत्य चतुर्भुजादिविशेषणपदेष्वन्वयं कृत्वा व्याख्येयमिति भाति ।

[1] स्थानकासनमुदाहृतम् — ध.

[2] स्थानकं पद्मासनं स्याद् — ध.

[3] ०द्वैशाखं स्थान० — द; वैशाखस्थानम् —
'तालास्त्रयोऽर्धतालश्च पादयोरन्तरं भवेत् ।
तालांस्त्रीनर्धतालांश्च निषण्णोरुं प्रकल्पयेत् ॥
त्र्यश्रौ पक्षस्थितौ चैव तत्र पादौ प्रयोजयेत् ।
वैशाखस्थानमेतद्धि स्कन्दश्चात्राधिदैवतम् ॥'

(**नाट्यशास्त्रे** १०.६१ उ०–६३ पू०)

[4] सव्यपादं तु पीठकासन० — ध.

[5] एतद्विषये **मतङ्गपारमेश्वरे** योगपादे २.१५–१७ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[6] मं दशतालेन — द; मध्यमं दशतालेन — ध; मध्यमदशतालविधिविषये **अजिते** ३६.११० उ० –१३९ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[7] मनो मानप्रमाणकम् — द; मानोन्मानप्रमाणविषये **अजिते** ३६.४१–४४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[8] तत्प्रमाणेन — ध.

[9] 'वामाद्याः शक्तयो वापि परिवारे व्यवस्थिताः ।
श्रीर्दुर्गा क्ष्मा शशिन्या च गायत्री चाप्युषा तथा ॥
संध्या सरस्वतीत्येताः स्थाप्या वा मुनिपुङ्गवाः ।
प्रज्ञा मेधा श्रुतिश्चैव स्मृतिः स्वाहा वषट् च वै ॥
धृतिर्मतिश्च पूर्वादिक्रमादेव्यः प्रकीर्तिताः ।
अथवा ज्येष्ठयोपेताः सप्त मातर ईरिताः ॥
देहली पेषणी चुल्ली खण्डनोलूखली तथा ।
मुसली मुद्गरी देवी वर्धमानी च वा मताः ॥
चतुर्द्विहस्ता इष्टास्त्राः पद्महस्तास्तु वा मताः ।
वृषो गणाधिपः स्कन्दो महाशास्ता धनेश्वरः ॥
वीरश्च क्षेत्रपालश्च भास्करः पूर्वतो दिशि ।
नैर्ऋते वाग्निदेशे वा विघ्नेशं संप्रकल्पयेत् ॥
इन्द्रादीन्वा तदस्त्राणि कल्पयेत्पूर्वतो दिशि ।
निर्माल्यधारिणीं देवीमशनीमीशगोचरे ॥
पूर्वोक्तपरिवारान्वा कल्पयेद्दैशिकोत्तमाः ।
महापीठे विशेषेण सर्वाश्चाप्सरसः स्थिताः ॥'

(**उत्तरकामिके** ४४.२२–२९)

[10] 'गर्भागारे सप्तसप्तांशकेऽंशं
मध्ये ब्राह्मं दैविकं चाष्टभागम् ।
मानुष्यं तत् षोडशांशं बहिष्ठात्
पैशाचांशं स्याच्चतुर्विंशमंशम् ॥
शैवं ब्राह्मे वैष्णवं दैविकांशे
सर्वे देवा मानुषे स्थापनीयाः ।
पैशाचांशे मातरश्चासुराद्या
रक्षोगन्धर्वादियक्षाश्च शेषाः ॥'
(**मयमते** ३४.६९, ७०); एकहीनं पदे — द.

[11] स्थाप्यामथवा — द; स्थाप्यामधप्रा — ध.

[12] 'ध' मातृकायां २९ पूर्वार्धस्य स्थाने —
'देविकोश्रीतुमानुष्य मानुष श्रीत देविकम् ।'
इति दृश्यते ।

[13] ०ममानुष्यं — द.

[14] अशृते ते च विक्रमम् । — द.

[1]स्थापिते च प्रमाणं च पूर्वलिङ्गस्य मानवत् ॥२९॥
पूजा[2] भागसमं हीनं [3]मध्यमं द्विगुणं [4]भवेत् ।
[5]पूजांशत्रिगुणं [6]श्रेष्ठमन्तरे त्वष्टधा भवेत् ॥३०॥
[7]नवधा शक्तिमानं चेत्त्याज्यांशं वर्ज्य योजयेत् ।
[8]तदुत्सेधाच्छक्तिमानं पादान्तं तु शुभं भवेत्[9] ॥३१॥
[10] आयादिषट्शुभोपेतं [11]योगराशि शुभं भवेत् ।
[12] तदुच्चं देविमानं स्यात् सूत्रं सप्तविधं भवेत् ॥३२॥

[सप्तसूत्रम्]

[13]मध्यमध्यं पुरोमध्यं पृष्ठमध्यं च पार्श्वकम्[14]।
पद्ममध्यं [15]द्विबाह्वोस्तु[16] सप्त[17]सूत्रमिति स्मृतम् ॥३३॥

[मध्यमध्यम्]

[18]सूत्रं कण्ठस्य मध्ये च वंशदण्डस्य मध्यमे[19]।
[20]गुल्फमध्येऽक्षयोर्मध्ये [21]मध्यमध्यं विधीयते ॥३४॥

[पुरोमध्यम्]

[22]शिखामणौ मौलिमध्ये [23]मूर्ध्नि ह्युत्सङ्गमध्यमे ।

---

[1] इदमर्धं 'द' मातृकायां न दृश्यते।; स्थापितं च — ध.
[2] भागं समहीनं — द.
[3] मध्यमं तु द्वि — ध.
[4] मतम् — ध.
[5] पूजांशं त्रिगुणं — द; पूजांशे तु गुणं — ध.
[6] श्रेष्ठमत्यमे श्रेष्ठवेष्टधा — द; श्रेष्ठं तदन्तरे त्वष्टधा — ध.
[7] नवधांशं शक्तिमानं त्यजत्यांशवर्ज० — द; नवशक्तिप्रमाणं चेदायाद्यंशेन योजयेत् — ध.
[8] तदुत्सेधावत्याक्ति पादान्तं तं भजेत् — द; तत्त्वे पन्धितं मानं शुभमानं तु बुद्धिमान् — ध.
[9] ३१ श्लोकानन्तरं 'पञ्चषडाधिकं भागैकरोहमुक्तं स्याशुभयादीनि संभवम्' इति 'द' मातृकायामधिकं दृश्यते ।
[10] आयनीविद्रशुभोपेतं — द; आयादिषट्शुभविषये **अजिते** ३६.३७५–३९० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[11] योगराशिगुणं शुभे — द.
[12] तदुच्चं ते विमानं — द; तदुश्रं ते विन्धनं — ध.
[13] मध्यं मध्यं — द; मध्यं मध्यपरे पृष्ठं मध्यं नाभिलपार्श्वयोः — ध.
[14] पार्श्वके — द.
[15] द्विबाहुद्वौ — द.
[16] मध्यमं चैव पार्श्वे तु — ध.
[17] ०सूत्रं विधीयते — द.
[18] मुनीशकण्ठमध्ये च — द; सूत्रखण्डस्य मध्यं च — ध.
[19] वंशकाममध्यमे — द.
[20] उदरमध्ये — ध.
[21] पृष्ठमध्य च सूत्रकम् — ध.
[22] शिखामणिं — द; शिखामौलिमध्यं तु — ध.
[23] स्यान्मूर्ध्ये हृत्संगमूर्धके — द; मूर्ध्नि हृत्संगमध्यमे — ध.

नासिकाग्रे च हिक्कायां[१] हृदयस्य च मध्यमे[२] ॥३५॥
[३]कुक्षौ नाभौ तथा योनौ [४]पादयोश्च प्रलम्बयेत् ।
पार्ष्णिद्व्यन्तरमध्ये तु[५] [६]पुरोमध्यं विधीयते ॥३६॥
[७]तस्मात्सर्वप्रयत्नेन सममात्रं विधीयते ।
[८]मौल्यग्रमानसूत्रान्तं द्व्यन्तरं सप्तमात्रकम् ॥३७॥
मौलिमध्यं च [९]पञ्चार्धं ललाटे [१०]कोलकं भवेत् ।
[११]हनोर्मध्ये च सूत्रं स्या[१२]द्यवकोलकमुच्यते ॥३८॥
[१३]सूत्रात्षडङ्गुलं [१४]हिक्का ह्युरोमध्यमथाङ्गुलम् ।
[१५]हृदयात्षट् च पञ्चैव [१६]नाभ्यूर्ध्वान्तरमध्यमे[१७] ॥३९॥
[१८]सूत्रमात्रार्धकं चैव [१९]नाभिमध्ये च षडवम् ।
योनिमूलं द्विमात्रं[२०] [२१]स्यादूरुमध्यं द्विमात्रकम् ॥४०॥
[२२]जानुजङ्घा षडङ्गुल्यं [२३]जङ्घान्तं वसुमात्रकम् ।
[२४]नलकं सार्धवस्वंशं [२५]सूत्रादङ्गुष्ठपूर्वकम् ॥४१॥
[२६]अर्धमात्रसमं चैव पुरःसूत्रं प्रशस्यते ।
पुरः[२७]सूत्रमिति प्रोक्तं पृष्ठसूत्रमथ शृणु ॥४२॥

---

[१] नासिकाग्रा स्यात्कण्ठस्यात् — द; नासिकाग्रस्य हिक्कायां — ध.
[२] अङ्कौ मध्यममध्यमे — द; हृदयं वाममध्यमे — ध.
[३] कुक्षिनाभेः तथा योनिः — द; कुक्षिनाभिस्तथा योनि — ध.
[४] प्रादयोश्च प्र० — द; पादयोचं प्र० — ध.
[५] स्पर्शान्तं श्रोणिनासाग्रं — द.
[६] लम्बयेद् ब्रह्मसूत्रकम् — ध.
[७] इदमर्धं 'ध' मातृकायां न दृश्यते ।
[८] इदमर्धं 'द' मातृकायां न दृश्यते ।
[९] पञ्चार्थ — द.
[१०] कोलकं — 'द्व्यङ्गुलं कोलकं ज्ञेयं'
अजिते ३६.३९ पू०
[११] हते नाकमध्यं च सूत्रं स्याध्यव — द; अनोर्मध्यसूत्रं स्यात्तपकोलक — ध.
[१२] यवः — 'भागं स्याच्चतुरङ्गुल्यं यावकं तद्द्वयं भवेत् ।'
अजिते ३६ ३९ उ०
[१३] 'द' मातृकायां '३९' पूर्वार्धस्थाने 'पदार्थं च हृत्का उरोममध्यं च पार्श्वकोलकम्' इति दृश्यते ।
[१४] हिक्कया हुरोर्मध्य — ध.
[१५] हृदयां षट्पञ्चैव — द.
[१६] नाभूर्थान्तरमध्यमे — द.
[१७] 'ध' मातृकायामेतदर्धस्थाने 'स्पृशन्तं हृदयान्त स्यात् समं वा नाभिमेव चा' इति दृश्यते ।
[१८] 'ध' मातृकायामिदमर्धं न दृश्यते ।; सूत्रमात्रार्थकं — द.
[१९] नाभिमध्यं — द.
[२०] मोकती मूलाद्विमात्रं — द; योनिमध्यद्विय ङ्गुल्यं — ध.
[२१] स्यान्मध्यमूरुसमाक्रमः — द; ऊरुमध्यद्वि — ध.
[२२] जङ्घान्ते तु षडङ्गुल्या — द;
[२३] जङ्घातं — द.
[२४] नलका० — द, ध.
[२५] सूत्रादङ्गुल — ध.
[२६] 'ध' मातकायां '४२' पूर्वार्धस्थाने 'द्वियङ्गुलाष्टनीर्गं स्यात् सूत्रात्पूर्वे तु निर्गमम् ।' इत्यर्धं दृश्यते ।; त्वर्धमात्रसमीपं च — द.
[२७] ०सूत्रमिदं प्रोक्तं — ध.

[पृष्ठसूत्रमथवा पृष्ठमध्यम्]

[१] **मौलिमूर्धकृकाटीनां** [२] **ककुदंशस्य मध्यमे।**
[३] **पार्ष्णिमध्ये च सूत्रं स्यात्पृष्ठमध्यं विधीयते ॥४३॥**
मध्ये [४] **शिखामणेर्मौलिकर्णपाल्यन्तमध्यमे।**
[५] **नीव्रं जानोश्च जङ्घाया मध्ये गुल्फस्य मध्यमे ॥४४॥**
लम्बितं [६] **पार्श्वयोर्मध्ये;** [७] **वक्त्रबाह्यमथोच्यते।**
[८] **पार्श्वे वा पट्टपार्श्वे वा** [९] **स्तनमण्डलबाह्यके** [१०] **॥४५॥**
[११] **उपमानं प्रवक्ष्यामि** [१२] **श्रोणिकूर्परपार्श्वके।**
[१३] **त्रिवेदपञ्चमात्रं** [१४] **स्याद्द्व्यन्तरं त्रिविधं भवेत् ॥४६॥**
[१५] **स्याद्ऊरुमूलान्तरमेकमात्रं**
[१६] **सार्धाङ्घ्रुले**[१७] **नान्तरमूरुमध्ये।**
जान्वन्तजङ्घा[१८] **नलकान्तरं च**
[१९] **स्यादष्टषड्भागषडङ्घ्रुलेन ॥४७॥**
मानसूत्रद्वयं चैव मणि[२०] **बन्धावसानकम्।**
अथवा पार्श्वसूत्रं च मणि[२१] **बन्धावसानकम् ॥४८॥**

---

[१] मौलिमूर्ध्निकाटीनां – द; मौलिमूर्ध्निकृकाटीनां — ध.
[२] कुहंशस्य मध्यमे — द; ककुद्वंशस्य मध्यमे — ध.
[३] वल्लमध्यं च सूत्रं — द; पार्ष्णिमध्यं तु — ध.
[४] शिखामणी मौलिककुबर्हात्तमध्यमे — द; शिखामणिमौधिकं च पाल्यन्तं मध्यमे कृपा — ध.
[५] 'ध' मातृकायामिदमर्धं न दृश्यते।; श्रीवं जाचोश्च जङ्घानां — द.
[६] पादमर्धं तु — द.
[७] वक्त्रं बाह्य — द; परो बाह्य० — ध.
[८] पार्श्वं च पट्टं चाश्वं — द; पार्श्वं व पट्टपट्टं वा पार्श्वे तु — ध.
[९] स्नानमण्डल० — द; स्थनमण्डल० — ध.
[१०] 'ध' मातृकायां '४५' श्लोकानन्तरं 'मध्ये श्रोण्यं च पार्श्वे तु जङ्घामध्ये तथाङ्घ्रुष्ठबाह्यस्यामातत्र' इत्यधिकं दृश्यते।
[११] उपायमुपमानं स्यात्प्रवक्ष्यामि — द; उपकनं प्रवक्ष्यामि — ध;
'मानं चैव प्रमाणं च उन्मानं ह्युपमानकम्।
परिमाणं लम्बमानं षड्विधं मानमिष्यते।
मानं यत्प्रतिमायामं तिर्यङ्मानं प्रमाणकम्।
उन्मानं तत्प्रदेशाच्च द्व्यन्तरं ह्युपमानकम्।
परिमाणं नाहमानं लम्बमानं च सूत्रकम्।'
(**पूर्वकारणे** (११.६४ उ०–६६); एतद्विषये पुनः **अजिते** ३६.४१–४४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।
[१२] श्रोणिकर्पूर० — द; श्रोणिकोर्पर० — ध.
[१३] त्रिवेदापञ्च — द, ध.
[१४] स्यादन्तरा — द.
[१५] सार्धं ऊरुस्य मूलान्तरमेक० — ध.
[१६] सार्धाङ्घ्रुलानां तममुंतरेरे — द.
[१७] ०नान्तमध्यमध्यरमोरता — ध.
[१८] ०नलकातलान्याच्च — ध.
[१९] स्यादष्टांशभागे त्रिप्राष्टषड० — ध.
[२०] ०बन्धवेदवसानकम् — ध.
[२१] ०बन्धवसानम् — ध.

द्व्यन्तरं [1]वेदभागः स्यात्पञ्चभेदावसानकम् ।
करण्डमकुटोपेतं जटामकुट[2]मण्डितम् ॥४९॥
पीताम्बरधरं चैव [3]दुकूलाम्बरमेव [4]वा ।
[5]नाभ्यधः पञ्चमात्रं [6]स्याद्व्यासमानं विधीयते ॥५०॥
[7]गुल्फादूर्ध्वे षडङ्गुल्यं वस्त्र[8]पर्यन्तमिष्यते ।
अभयं [9]सव्यहस्ते स्यात्स्तनचूचुकसीमकम् ॥५१॥
[10]सूत्रात्तु तलमध्ये तु द्व्यन्तरं [11]द्वादशाङ्गुलम् ।
[12]वरदं वाम[13]हस्ते स्याच्छ्रोण्या ऊर्ध्वे समायुतम् ॥५२॥
[14]सूत्रात्तु करमध्यं च त्रयोदशाङ्गुलमिष्यते ।
अथवा[15]ऽधोर्ध्वपार्श्वे [16]तु [17]सिंहकर्णमथापि वा ॥५३॥
परहस्तद्वये चैव कटकं तु विधीयते ।
[18]हिक्कासमं च कटकं कर्तरीमुखमेव वा ॥५४॥
[19]बहिः कक्षान्तरे वापि सव्य[20]पार्श्वे जपाक्षकम्[21] ।
[22]वामपार्श्वकरे [23]चैव [24]पद्मोत्पलसमन्वितम्[25] ॥
बीजापूरं च पद्मं च [26]शङ्खचक्रमथापि वा ॥५५॥

[27] [मनोन्मनीस्वरूपम्]

श्यामनिभवेदकर [वह्निनयनं स्यात्]
पद्मवरदाभयजपाक्षफलयुक्तम् ।

---

[1] वेदभागं स्यात् — द; वेदभागं वा — ध.
[2] ०मंयुतम् — ध.
[3] द्विकूलं परमेव च — ध.
[4] च — द.
[5] नाम्याथ पञ्च० — द; नाभ्याधापञ्च० — ध.
[6] स्याद्व्यासनाम — द; स्यादिविसानं — ध.
[7] गुल्फमूर्ध्वे — द; गुल्पमध्ये — ध.
[8] ०पञ्चान्तमिष्यते — ध.
[9] सव्यहस्तं स्यात्स्थानचूचुक — द; सव्यहस्तान्तन्स्तनसूचिक० — ध.
[10] सूत्रात्तलह्याममध्य तु — द; सूत्रान्तरस्य मध्ये तु — ध.
[11] त्रयोदशाङ्गुलम् — द.
[12] 'ध' मातृकायां '५२' उत्तरार्धस्थाने 'वामहस्तस्यदनसंबितम्' इत्येतावन्मात्रमेव दृश्यते ।
[13] ०हस्तं स्याच्छ्रोणीदूर्वासमायुतम् — द.
[14] सूत्रद्व्यन्तरहस्तं च — द.
[15] चोरुपार्श्वे — ध.
[16] वा — द.
[17] 'द' मातृकायां '५३' चतुर्थपादस्य स्थाने '५४' श्लोकस्य प्रथमपादस्थाने च 'वामोरुद्वयं अद्वयं चैव' इत्येतावन्मात्रमेव दृश्यते ।
[18] जत्रो हिक्क्ली समं चैव कटकं कर्तरीदम् — द.
[19] न हि रक्ष्यन्तरं वापि — द;
[20] ०पार्श्वजपाक्षकैः — द.
[21] बहिपा विसस्य पार्श्वे च वामके — ध.
[22] वामं च करैवैव — द.
[23] रोप — ध.
[24] पद्मेन वा उत्पलेन वा समन्वितम् इत्यर्थोऽत्र व्याख्येय इति भाति। 'पद्मं वोत्पलमन्वितम्' इति वात्र पाठो भवितव्यः ।
[25] ०समायुतम् — ध.

पीतवसनान्वितजटामकुटयुक्तं
[1]श्वेतकमलासनमनोन्मनिस्वरूपम्[2] ॥५६॥

[कामकोष्ठस्थापनयोग्यस्थानम्]

[3]इच्छामयी ज्ञानमयी क्रिया च
सान्तर्लिङ्गे चालयान्तर्गते[4] स्यात् ।
बाह्ये [5]शालादिग्विदिक्ष्विष्टदेशे
तत्तन्मध्ये स्थापयेत्कामकोष्ठम्[6] ॥५७॥

[7]इति रौरवे क्रियापादे कामकोष्ठविधिः
पञ्चषष्टितमः पटलः ।

---

[२६] शङ्खं चक्रं धरोर्मिव — द; शंखचक्रधरोऽपि वा — ध.

[२७] 'कुन्दनिभवेदकरवह्निनयनं स्यात्
पङ्कजवराभयकरोत्पलचतुष्कम् ।
अङ्गहिमभूषणविचित्रनयनं स्यात्
तुङ्गमकुटोज्ज्वलमनोन्मनिस्वरूपम् ॥'
(**पूर्वकारणे** ९०.१०);
'वेणुनिभवेदकरवह्निनयनं स्यात्
पद्मवरदाभयजपाक्षवलययुक्तम् ।
पीतवसनाम्बरजटामकुटयुक्तं
श्वेतकमलासनमनोन्मनिस्वरूपम् ॥'
(टि. ६७०. पृ० ३८४)

[1] पद्मकमलासन० — ध.

[2] 'द' मातृकायामयं श्लोको न दृश्यते।

[3] 'ध' मातृकायामयं श्लोको न दृश्यते।; शक्ति यम ज्ञानशक्तियमक्रियाशक्ति यम च — द.

[4] ०र्गतो — द.

[5] माला — द.

[6] ०कोष्ठः — द.

[7] पद्मसंहितायां रौरवभेदे कामकोष्ठविधिपटलः— द; पद्मसंहिते कामकोष्ठलक्षणं समाप्तम्। सप्तमोऽध्यायः — ध.